6981

BHARATIYA VIDYA BHAVAN
S. N. 947
LIBRARY.

947

SAY

Funding by IKS-MoE

6981
Sa 2 VI
BHARATIYA VIDYA BHAVAN LIBRARY
S. N.

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥

सोऽभस्येत्यनुवाके द्वादश सूक्तानि तत्र प्रय आरुरिति एकादशर्चं सप्तमं सूक्तम् मण्डलद्रष्टा विश्वामित्र ऋषिः अनुक्तत्वात् त्रिष्टुप्छन्दः मण्डलादिपरिभाषयाग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोः सूक्तत्रयस्य प्रत्यग्निरुषसस्त्रीणीति विनियोग उक्तः तत्रेदं तृतीयं सूक्तम् ।

तस्मिन्नियमृक्प्रथमा—

ॐम् प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥ १ ॥

प्र । ये । आरुः । शितिऽपृष्ठस्य । धासेः । आ । मातरा ।
विविशुः । सप्त । वाणीः । परिऽक्षिता । पितरा । सम् । चरेते इति ।
प्र । सर्स्राते इति । दीर्घम् । आयुः । प्रऽयक्षे ॥ १ ॥

शितिपृष्ठस्य नीलपृष्ठस्य धासेः सर्वस्य धारयितुरग्नेर्ये रश्मयः प्रारुः प्रकर्षेणोद्गच्छन्ति ते रश्मयः मातरा मातरौ द्यावापृथिव्यौ आविविशुः सर्वतः प्रविष्टाः सप्त सर्पणस्वभावाः वाणीः वननीया नदीश्चाविविशुः । परिक्षिता परितो वर्तमाने पितरा पितरौ द्यावापृथिव्यौ तेनाग्निना सञ्चरेते सम्यक् व्यवहरतः तथा प्रयक्षे प्रकर्षेण यष्टुं दीर्घमायुरग्नेश्चिरं जीवनं प्रभूतमन्नं वा प्रसर्स्राते प्रसारयतः संपादयत इत्यर्थः यद्वा द्यावापृथिव्यौ प्रयक्षे प्रकर्षेण सततं यष्टुं यजमानस्य दीर्घमायुः संपादयतः ॥ प्र निपातत्वेन आद्युदात्तः तस्य छन्दसि व्यवहिताश्चेति आरुः इत्यनेन सम्बन्धः । आरुः ऋ गतौ लिटि उसि रूपम् यद्वृत्तयोगादनिघातः प्रत्ययस्वरः । शितिपृष्ठस्य पृष्ठशब्दः स्थक्प्रत्ययान्तोऽन्तोदात्तः शितेर्नित्याबह्वज्बहुव्रीहावभसदिति उत्तरपदप्रकृतिस्वरत्वम् । धासे डुधाञ् धारणपोषणयोः धेट् पाने वा तस्मात्कर्तरि औणादिकः सिः प्रत्ययस्वरः । मातरा नप्तृनेष्टृत्वष्टृक्ष-

तृहोतृपोतृमातृपितृजामातृदुहितृइतितृजन्तत्वेननिपातनादन्तोदात्तः ऋतोङीतिगुणः सुपांसुलुगितिसुपोडादेशः। विविशुः विशप्रवेशने लिटि असंयोगाल्लिट्किदितिकिद्वद्भावाद्गुणाभावः निघातः । सप्त सृप्लृगतौ सप्यशूभ्यांतुट्चेतिसपेर्विधीयमानःकनिन्तुडागमश्च बाहुलकादेतस्यापि भवति ऋकारस्याकारश्च नित्त्वेपिव्यत्ययेनान्तोदात्तत्वम्। परिक्षिता क्षिनिवासगत्योः क्विप्चेति क्विप् पित्त्वात्तुगागमः प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वम् सुपांसुलुगितिसुपोडादेशः । चरेते चरगतिभक्षणयोः संपूर्वाच्चरतेः समस्तृतीयायुक्तादित्यात्मनेपदं निघातः। सुस्रते सृगतौअयमन्तर्भावितण्यर्थः रेफश्छान्दसः ईदूदेदितिप्रगृह्यसंज्ञा निघातः। आयुः इण्गतौ उसिन्नित्यनुवृत्तौएतेर्णिच्चेत्युसिन् णित्त्वाद्वृद्धिः नित्त्वादाद्युदात्तः। प्रयक्षे यजदेवपूजासङ्गतिकरणदानेषु इत्यस्मात्तुमर्थेसेन्प्रत्ययः प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वम् कृन्मेजन्तइत्यव्ययसंज्ञायामव्ययादाप्सुपइतिसुपोलुक् ॥ १ ॥

अथद्वितीया–

दि॒वक्ष॑सोधे॒नवो॒वृष्णो॒अश्वा॑दे॒वीरात॑स्थौ॒मधु॑म॒द्वह॑न्तीः ।
ऋ॒तस्य॑त्वा॒सद॑सिक्षे॒म॒यन्तं॒पर्ये॑का॑चरतिवर्त॒निं॑गौः ॥ २ ॥

दि॒वक्ष॑सः । धे॒नवः॑ । वृष्णः॑ । अश्वाः॑ । दे॒वीः । आ । त॒स्थौ॒ ।
मधु॑ऽमत् । वह॑न्तीः । ऋ॒तस्य॑ । त्वा॒ । सद॑सि । क्षे॒म॒ऽयन्त॑म् ।
परि॑ । एका॑ । च॒र॒ति॒ । व॒र्त॒निम् । गौः ॥ २ ॥

वृष्णःकामानांवर्षितुरग्नेः अश्वावाहनरूपारोहिताः दिवक्षसः दिवंव्याप्यवर्तमानाधेनवः अग्नेः प्रीणयित्र्योभवन्ति सोयमग्निः मधुमत् माधुर्योपेतमुदकंवहन्तीः देवीः द्योतनशीलानदीः आतस्थौआतिष्ठति प्राप्नोतीत्यर्थः गोशब्दोमाध्यमिकावाग्वाची माध्यमिकांवाचमितिनैरुक्ता[१]इत्यभिधानात्। एकागौः काचिदुक्तविधावाक् ऋतस्योदकस्यसदसिस्थानेन्तरिक्षे क्षेमयन्तं क्षेममावासमिच्छन्तंवर्तनिंज्वालाः प्रवर्तयन्तंत्वा हेअग्नेत्वां परिचरतिसेवते ॥ दिवक्षसः अक्षूव्याप्तौ दिवंव्याप्नुवन्तीतिदिवक्षसः वक्षरोधे रोधार्थोप्ययंधातुःअत्रव्याप्तौवर्तते दिवंवक्षन्ति व्याप्नुवन्ति असुन्नित्यसुन्प्रत्ययः लोपोव्योर्वलीतिवलोपः कृदुत्तरपदप्रकृतिस्वरत्वम्। धेनवः नु-

---

[१] नि० २.९.।

रित्यनुवृत्तौ धेटइच्चेतिनुप्रत्ययः इकारस्यगुणः प्रत्ययस्वरः । वृष्णः वृषसेचने कनिन्युवृषितक्षिसजीत्यादिनाकनिन् कित्त्वाद्गुणाभावः नित्त्वादाद्युदात्तः । अश्वाः अशूव्याप्तौ अशूप्रुषिलटिकणीत्यादिनाक्वन् नित्त्वादाद्युदात्तः । तस्थौ ष्ठागतिनिवृत्तौ छन्दसिलुङ्लङ्लिटइतिवर्तमाने लिट् आतऔणलइत्यौकारः निघातः । मधुमत् निदित्यनुवृत्तौ फलिपाटिनमिमनिजनामित्यादिनामनेरुप्रत्ययः तत्संनियोगेननकारस्यधकारः नित्त्वादाद्युदात्तः । त्वा युष्मच्छब्दस्यद्वितीयैकवचनान्तस्य त्वामौधितित्वाआदेशः अनुदात्तश्च । क्षेमयन्तम् क्षिनिवासगत्योः अर्तिस्तुसुहुसृधृक्षीत्यादिनामन् क्षेममावासमात्मनइच्छन्तं सुपआत्मनःक्यजितिक्यच् क्यचिचेतीत्वम् अकृत्सार्वधातुकयोर्दीर्घत्वंच नच्छन्दस्यपुत्रस्येतिप्रतिषिध्यते क्यचश्चित्त्वादन्तोदात्तः तदन्ताच्छतृप्रत्ययः शप् शपःपित्त्वादनुदात्तत्वम् शतुश्चसार्वधातुकस्वरेणतयोःक्यचासहैकादेशेकृते एकादेशउदात्तेनोदात्तइत्येकादेशउदात्तः अम् सुप्त्वादनुदात्तः उदात्तादनुदात्तस्येत्यमःस्वरितत्वम् । एका इण्गतौ इण्भीकापेत्यादिनाकन् तदन्तादाप् नित्स्वरः । वर्तनिम् वृतुवर्तने अन्तर्भावितण्यर्थः वृत्तेश्चेत्यनिः गुणः व्यत्ययेनान्तोदात्तत्वम् । गौः गम्लृगतौ गमेर्डोइतिडोप्रत्ययः डित्त्वाट्टिलोपः गोतोणिदिति सुपोणित्त्वाद्वृद्धिः प्रत्ययस्वरः ॥ २ ॥

अथतृतीया–

आसी॑मरोहत्सु॒यमा॒भव॑न्तीः॒पति॑श्चिकि॒त्वान्र॑यि॒विद्र॑यी॒णाम् ।
प्रनील॑पृष्ठोअत॒सस्य॑धा॒सेस्ताअ॑वासयत्पुरु॒धप्र॑तीकः ॥ ३ ॥

आ । सी॒म् । अ॒रो॒ह॒त् । सु॒ऽयमाः॑ । भव॑न्तीः । पति॑ः । चि॒कि॒त्वान् ।
र॒यि॒ऽवित् । र॒यी॒णाम् । प्र । नील॑ऽपृष्ठः । अ॒त॒सस्य॑ । धा॒सेः ।
ताः । अ॒वा॒स॒य॒त् । पु॒रु॒धऽप्र॑तीकः ॥ ३ ॥

रयीणां रयिवित् धनानांमध्येविशिष्टधनस्यलम्भयिता चिकित्वान् ज्ञानवान्पतिः अश्वानांपतिरग्निः सीं सर्वतः सुयमाः सुखेननियन्तुंशक्याभवन्तीः यावडवाः आरोहत् आरोहयतिस्म नीलपृष्ठः पुरुधप्रतीकः बहुधाविक्षिप्ताङ्गः सोग्निरेवअतसस्यसततगमनस्यधासेः पोषणार्थंताअश्वाः प्रावासयत् प्रकर्षेणवासयतिस्म निवासेनश्रमेपनीतेसततगमनंपोषयितुंशक्यमित्यर्थः ॥ सीं चादयोनुदात्ताइत्यनुदात्तः । अरोहत् रुहप्रादुर्भावे लङिरूपं निघातः । सुयमाः यमउ-

परमे अस्माच्छक्यार्थेईषदुःसुषुइतिखल् कृदुत्तरपदप्रकृतिस्वरत्वम् । पतिः पारक्षणे पातेर्डतिरितिडित्त्वाट्टिलोपः प्रत्ययस्वरः । चिकित्वान् कितज्ञाने क्वसौरूपम् । रयिवित् विद्लृलाभे क्विप् । रयीणाम् नामन्यतरस्यामितिविभक्तेरुदात्तत्वम् । नीलपृष्ठः नीलशब्दोवृषादित्वादाद्युदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अतसस्य अतसातत्यगमनेइत्यस्मादत्यविचमितमिनमिरभिलभितपिपतिपनिपणिमहिभ्यइत्यसच् चित्स्वरः । अवासयत् वसनिवासे हेतुमतीति णिच् लुङ्लङ्लृङ्क्ष्वित्यडागमः तिङ्ङतिङइतिनिघातः । पुरुधप्रतीकः पुरुशब्दइहसंख्यावाची संख्यायाविधार्थेधेतिधाप्रत्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ह्रस्वश्छान्दसः ॥ ३ ॥

अथचतुर्थी—

महित्वाष्ट्रमूर्जयन्तीरजुर्यंस्तभूयमानंवहतोवहन्ति ।
व्यङ्गेभिर्दिद्युतानःसधस्थएकामिवरोदसीआविवेश ॥ ४ ॥

महि । त्वाष्ट्रम् । ऊर्जयन्तीः । अजुर्यम् । स्तभुऽयमानम् । वहतः ।
वहन्ति । वि । अङ्गेभिः । दिद्युतानः । सधऽस्थे । एकाम्ऽइव ।
रोदसी इति । आ । विवेश ॥ ४ ॥

ऊर्जयन्तीरबलंबलिनंकुर्वन्त्यः वहतः वहनपरानद्यः महि महान्तं त्वाष्ट्रं त्वष्टुःसुतमजुर्यं जरयितुमनर्हं स्तभूयमानंलोकानांस्तम्भनं धारणमिच्छन्तंअग्निंवहन्ति धारयन्ति सधस्थे अपांसमीपेअङ्गेभिरवयवैः दिद्युतानः दीप्यमानःसन्नग्निः रोदसी द्यावापृथिव्यौ व्याविवेशविविधंप्रविष्टवान् रोदस्योः प्रवेशनेदृष्टान्तः—एकामिव यथापुमानेकांस्त्रियंप्रविशतितद्वत् ॥ त्वाष्ट्रं त्वष्टुरपत्यमित्यर्थे तस्यापत्यमित्यण् प्रत्ययस्वरः । स्तभूयमानं स्तभुस्तम्भनंतदिच्छन्तंसुपआत्मनःक्यच् अकृत्सार्वधातुकयोरितिदीर्घः तदन्ताद्व्यत्ययेनशानच् अकारान्तत्वादानेमुक् शानचोलसार्वधातुकस्वरेणानुदात्तत्वेकृतेक्यजन्ताद्धातुस्वरःशिष्यते । अङ्गेभिः बहुलंछन्दसीतिभिसऐसादेशाभावः बहुवचनेझल्येदित्येत्वम् । दिद्युतानः द्युतदीप्तौ छन्दसिलिट् तस्यकानजादेशः द्विर्वचनं हलादिशेषेकृते द्युइत्येतस्याभ्यासस्यद्युतिस्वाप्योःसम्प्रसारणमितिसम्प्रसारणम् सम्प्रसारणाच्चेतिपूर्वरूपत्वं चित्त्वादन्तोदात्तत्वम् । एकामिव इवेनविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचेतिवचनात्पूर्वपदप्रकृतिस्वरः । विवेश विशप्रवेशनेइत्यस्माल्लिटिरूपं निघातः ॥ ४ ॥

Funding by IKS-MoE

BHARATIYA VIDYA BHAVAN S. N. ...... LIBRARY.

अथपञ्चमी–

जानन्तिवृष्णोअरुषस्यशेवमुतब्रध्नस्यशासनेरणन्ति ।
दिवोरुचःसुरुचोरोचमानाइळायेषांगण्यामाहिनागीः ॥ ५ ॥ १॥

जानन्ति । वृष्णः । अरुषस्य । शेवम् । उत । ब्रध्नस्य । शासने ।
रणन्ति । दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषाम् ।
गण्या । माहिना । गीः ॥ ५ ॥ १ ॥

वृष्णः कामानांवर्षितुः अरुषस्यरुषाहिंसकास्तद्रहितस्यशत्रुराहित्येनरोचमानस्येत्यर्थः तथाविधस्याग्नेः सम्बन्धिशेवंआश्रयविषयंसुखंजनाजानन्ति उतापिच जानन्तस्तेब्रध्नस्य महतोग्नेःशासनेआज्ञायां सर्वेजनारणन्तिरमन्ते तथाचमन्त्रः–अस्यशासुरुभयासःसचन्तेहविष्मन्तउशिजोयेचमर्ताईति । अपिचयेषांमनुष्याणांअग्निविषयामाहिनामहतीइळागीः स्तुतिरूपावाक्गण्यागणनीयापूज्या तेदिवोरुचः द्युलोकस्यरोचकाः सुरुचः शोभनदीप्तयः रोचमानाः देदीप्यमानाभवन्ति ॥ जानन्ति ज्ञाअवबोधने क्र्यादित्वात्तस्यज्ञाजनोर्जेतिजादेशः प्रत्ययस्वरः । अरुषस्य रुषरिषहिंसार्थाः रोषन्तीतिरुषाहिंसकाः इगुपधेतिकः नसन्तिरुषायस्यासावरुषः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । शेवम् शीङ्स्वप्ने इण्शीङ्भ्यांवन्निितिवन् नित्स्वरः । शासने शासुअनुशिष्टौ अस्माद्भावेल्युट् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । रणन्ति निघातः । दिवोरुचः रुचदीप्तौ अस्मात्क्विप् तत्पुरुषेकृतिबहुलमितिषष्ठ्याअलुक् कृदुत्तरपदप्रकृतिस्वरत्वम् । सुरुचः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । इळा ईडस्तुतौ ह्रस्वश्छान्दसः यथावाक्शब्दष्टाबन्तस्तद्वत् पित्त्वादनुदात्तत्वेधातुस्वरः । गण्या गणसंख्याने स्वार्थाण्ण्यन्तादचोयत् यतोनावइत्याद्युदात्तत्वम् । माहिना महेरिनण्चेतीनण्णित्त्वादुपधावृद्धिः व्यत्ययेनाद्युदात्तः । गीः गॄशब्दे अस्मात्क्विप् ऋतइद्धातोरितीत्वम् वोंरुपधायादीर्घः प्रातिपदिकस्वरः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेप्रथमोवर्गः ॥ १ ॥

Bharatiya Vidya Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya

अथषष्ठी–

उतोपितृभ्यांप्रविदानुघोषंमहोमहद्भ्यामनयन्तशूषम् ।
उक्षाहयत्रपरिधानमक्तोरनुस्वंधामंजरितुर्ववक्ष ॥ ६ ॥

---

१ ऋ० सं० १. ४. २६. ।

उतो इति । पितृऽभ्याम् । प्रऽविदा । अनु । घोषम् । महः ।
महत्ऽभ्याम् । अनयन्त । शूषम् । उक्षा । ह । यत्र । परि । धानम् ।
अक्तोः । अनु । स्वम् । धाम । जरितुः । ववक्ष ॥ ६ ॥

उतोअपिचमहोमहद्भ्यांमहतोमहद्भ्यांपितृभ्यां द्यावापृथिवीभ्यांप्रविदा प्रवेदनेनअनुघोषं अनुघुष्यमाणं शूषंसुखम् शूषंशुनमितिसुखनामसुपाठात् तत्सुखंयजमानाअग्निमनयन्त अग्निंप्रापितवन्तः सोग्निः यत्रयजमानेषुउक्षावृष्ट्युत्पादनेनोदकस्य सेक्ता अक्तोः अक्तुशब्दोरात्रिमाचष्टे शर्वरीअक्तुरितितन्नामसुपाठात् अज्यतेसिच्यतेनीहारेणजगदस्यामितिव्युत्पत्तेश्च तस्यारात्रेः परिधानंपरितोधारकं स्वमात्मीयंधामतेजः जरितुः स्तोतुः स्तुतिश्रवणार्थं अनुववक्षह समीपेवहतिखलु संनिहितंकरोतीत्यर्थः ॥ उतो ओदितिप्रगृह्यसंज्ञा एवमादित्वादन्तोदात्तः । घोषम् घुषिशब्दने अस्मात्कर्मणिघञ् लघूपधगुणः । ञित्स्वरः । महः अकारतकारयोर्लोपश्छान्दसः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । अनयन्त णीञ्प्रापणे इत्यस्यलङिरूपं निघातः । उक्षा उक्षसेचने श्वन्नुक्षन्नित्यादिनाकनिन्प्रत्ययान्तत्वेनोक्षन्शब्दोनिपातितः व्यत्ययेनान्तोदात्तः । ह चादित्वादनुदात्तः । यत्र लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । अक्तोः अञ्जूव्यक्तिम्रक्षणेष्वित्यस्मात्व्याज्यर्तिभ्यःकुरितिकुः कित्त्वादनिदितामितिनलोपः प्रत्ययस्वरः । ववक्ष वहप्रापणे छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् सकारश्छान्दसः तिपोणलादेशः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ॥ ६ ॥

अथसप्तमी—

अध्वर्युभिःपञ्चभिःसप्तविप्राःप्रियंरक्षन्तेनिहितंपदंवेः ।
प्राञ्चोमदन्त्युक्षणोअजुर्यादेवादेवानामनुहिव्रतागुः ॥ ७ ॥

अध्वर्युऽभिः । पञ्चऽभिः । सप्त । विप्राः । प्रियम् । रक्षन्ते ।
निऽहितम् । पदम् । वेरिति वेः । प्राञ्चः । मदन्ति । उक्षणः ।
अजुर्याः । देवाः । देवानाम् । अनु । हि । व्रता । गुरिति गुः ॥ ७ ॥

उद्गातृवर्गव्यतिरिक्ताद्वादशर्त्विजोभवन्ति तत्रसप्तवषट्कर्तारः पञ्चान्येध्वरंनयन्ति तैः पञ्चभिरध्वर्युभिःसहसप्तविप्रामेधाविनोहोत्रकावेःगमनस्वभावस्याग्नेः प्रियंनिहितमाहवनीया-

रुयंपदंरक्षन्तेपालयन्ति प्राञ्चःसोमपानार्थंप्राङ्मुखागच्छन्तः अजुर्याः जरयितुमशक्याः उक्षणः सोमरसस्यसेक्तारः देवाः स्तोतारःमदन्तिहृष्यन्ति किञ्च तेदेवाःदेवानांसंबन्धीनिव्रतानियज्ञान्अनुगुः अन्वगच्छन् हिप्रसिद्धौ अग्नेःप्रसादाद्देवायज्ञान्लब्धवन्तइत्यर्थः ॥ रक्षन्ते रक्षपालने व्यत्ययेनात्मनेपदं निघातः । निहितं डुधाञ्धारणपोषणयोरित्यस्यकर्मणिनिष्ठायां दधातेर्हिरितिहिरादेशः गतिरनन्तरइतिगतेःपूर्वपदप्रकृतिस्वरत्वम् । वेः वीकान्तिगत्यादिषु अस्माद्विच् सार्वधातुकार्धधातुकयोरितिगुणः ङसिङसोश्चेतिपूर्वरूपत्वम् । प्राञ्चः अनिगन्तोञ्चतावितिपूर्वपदप्रकृतिस्वरत्वम् । मदन्ति मदीहर्षे निघातः । गुः इण्गतावित्यस्माल्लुङिरूपम् इणोगालुङीतिगादेशः आतइतिझेर्जुसादेशः बहुलंछन्दसीत्यडभावः हिशब्दयोगान्ननिहन्यते ॥ ७ ॥

अथाष्टमी–

दैव्या॒होता॑राप्र॒थ॒मान्यृ॑ञ्जेस॒प्तपृ॒क्षासः॑स्व॒धया॑मदन्ति ।
ऋ॒तंशंस॑न्तऋ॒तमित्तआ॑हु॒रनु॑व्र॒तंव्र॑त॒पादीध्या॑नाः ॥ ८ ॥

दैव्या॑ । होता॑रा । प्र॒थ॒मा । नि । ऋ॒ञ्जे॒ । स॒प्त । पृ॒क्षासः॑ । स्व॒धया॑ ।
म॒द॒न्ति॒ । ऋ॒तम् । शंस॑न्तः । ऋ॒तम् । इत् । ते । आ॒हु॒ः । अनु॑ ।
व्र॒तम् । व्र॒त॒ऽपाः । दीध्या॑नाः ॥ ८ ॥

दैव्यादैव्यौदेवतारूपौ होताराहोतारौ होमनिष्पादकौ प्रथमाप्रथमौमुख्यौ इमंचामुंचाग्नीन्यृञ्जे ऋञ्जतिःप्रसाधनकर्मेतियास्कः । मंत्रद्रष्टाविश्वामित्रोहं प्रसाधयामि सप्तपृक्षासः सप्तहोत्रकाः स्वधयासोमेनमदन्तिहृष्यन्ति ऋतंस्तोत्रंशंसन्तोव्रतपाः व्रतस्ययज्ञकर्मणोरक्षितारः दीध्यानाः दीप्यमानास्तेहोत्रकाः अनुव्रतंयज्ञकर्मणिऋतमित्सत्यमेवाग्निमाहुःवदन्ति ॥ ऋञ्जे ऋजिभृजीवर्जने निपूर्वोयंधातुःप्रसाधनेवर्तते निघातः । स्वधयास्वंलोकंयजमानस्यदधातिविदधातीति स्वधासोमः आतोनुपसर्गेकइतिकप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । आहुः ब्रूञ्व्यक्तायांवाचीत्यस्यलटिब्रुवःपञ्चानामादितआहोब्रुवइतिझेरुसादेशः ब्रुवश्चाहादेशः निघातः । दीध्याना दीधीङ्दीप्तिदेवनयोरित्यस्माल्शानच् तस्यचित्त्वादन्तोदात्तत्वेप्राप्तेअभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ८ ॥

अथनवमी—

वृ॒षा॒यन्ते॑म॒हेअत्या॑यपू॒र्वीर्वृष्णे॑चि॒त्राय॑र॒श्मयः॑सुया॒माः ।
देव॑होतर्म॒न्द्रत॑रश्चिकि॒त्वान्म॒होदे॒वान्रोद॑सी॒एहव॑क्षि ॥ ९ ॥

वृ॒ष॒ऽयन्ते॑ । म॒हे । अत्या॑य । पू॒र्वीः । वृष्णे॑ । चि॒त्राय॑ । र॒श्मयः॑ ।
सु॒ऽया॒माः । देव॑ । हो॒त॒रः । म॒न्द्रऽत॑रः । चि॒कि॒त्वान् । म॒हः ।
दे॒वान् । रोद॑सी॒ इति॑ । आ । इ॒ह । व॒क्षि॒ ॥ ९ ॥

देवदेदीप्यमान होतः देवानामाह्वातः हेअग्ने महेमहतेअत्यायसर्वानप्यतिक्रम्यवर्तमानाय चित्रायनानाविधवर्णाय यद्वा चित्रायदेवैश्चायनीयायपूज्यायवृष्णेकामानांवर्षित्रेतुभ्यंत्वदर्थंपूर्वीः प्रभूताःसुयामाःअतिशयेनविस्तृतारश्मयःसर्वतोव्याप्ताज्वालाः वृषायन्ते वृषेवाचरन्ति सेचकाइवभवन्ति होतारः ज्वालाभिः समिद्धमग्निंदृष्ट्वासोमाज्यपयःप्रभृतीनिहवींषितत्रप्रक्षिपन्तीतिज्वालानांवृषत्वम् यद्वा षष्ठ्यर्थेचतुर्थी तथाचमहतोऽत्यस्यचित्रस्यवृष्णोग्नेर्बहवोरश्मयोवृषेवाचरन्ति वृष्ट्युत्पादनद्वारापर्जन्यवदाचरन्तीत्यर्थः अपिचमन्द्रतरः यजमानस्यमादयितृतमः चिकित्वान्ज्ञानोपेतः सत्वंमहःमहतःपूज्यान्यष्टव्यान्देवान्रोदसीद्यावापृथिव्यौचइहवैदिकेस्मिन्कर्मणिआवक्षि आवह ॥ वृषायन्ते उपमानादित्यनुवृत्तौकर्तुःक्यङ्सलोपश्चेतिक्यङ् अकृत्सार्वधातुकयोरितिदीर्घः पादादित्वान्ननिघातः धातुस्वरः । महे अकारतकारयोर्लोपश्छान्दसः बृहन्महतोरितिविभक्तेरुदात्तत्वम् । पूर्वीः पॄपालनपूरणयोरित्यस्मात्कुरित्यनुवृत्तौपॄभिदिव्यधिगृधीत्यादिनाकुप्रत्ययः कित्त्वाद्गुणप्रतिषेधेउदोष्ठ्यपूर्वस्येत्युत्वम् उरण्रपरः तस्माद्वोतोगुणवचनादितिङीष् यणादेशेकृतेहलिचेतिदीर्घः वाछन्दसीतिसवर्णदीर्घः । रश्मयः अशूव्याप्तौ अश्नुवतेसर्वंजगदित्यनुवृत्तौअशेरशचेतिमिप्रत्ययः रशादेशश्च प्रत्ययस्वरः। सुयामाः यमनंयामः भावेघञ् बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । देव अपादादावितिपर्युदासात्षाष्ठिकमाद्युदात्तत्वम् । होतः ह्वयतेस्ताच्छीलिकस्तृन् बहुलंछन्दसीतिसम्प्रसारणं अपादाद्यामन्त्रितत्वान्निघातः । मन्द्रतरः मदिस्तुत्यादिषु स्फायितंचिवञ्चीत्यादिनारक् इदित्त्वान्नुम् तरपःपित्त्वादनुदात्तत्वेरक्प्रत्ययस्वरः । वक्षि वहप्रापणेइत्यस्यबहुलंछन्दसीतिशपोलुक् ढत्वकत्वषत्वानि निघातः ॥ ९ ॥

BHARATI LIBRARY S. N. १

पृक्षप्रयजोद्रविणःसुवाचःसुकेतवउषसोरेवदूषुः ।
उतोचिदग्नेमहिनापृथिव्याःकृतंचिदेनःसंमहेदशस्य ॥ १० ॥

पृक्षऽप्रयजः । द्रविणः । सुऽवाचः । सुऽकेतवः । उषसः । रेवत् ।
ऊषुः । उतो इति । चित् । अग्ने । महिना । पृथिव्याः । कृतम् ।
चित् । एनः । सम् । महे । दशस्य ॥ १० ॥

द्रविणः द्रवतिसततंगच्छतीतिद्रविणःशब्देनाग्निरभिधीयते द्रविणः सततगमनस्वभावहेअग्ने पृक्षप्रयजः पृक्षाणिहविर्लक्षणान्यन्नानि प्रकर्षेणयष्टुं प्रक्रम्यते यासूषःसु ताः पृक्षप्रयजः सुवाचः प्रातरनुवाकादिशोभनावाचोयासांताः सुकेतवः वयसांमनुष्याणांचशब्दैः सुप्रज्ञानाः एवंविधाउषसः रेवत् अस्माकंधनंयुक्तं यथाभवतितथाऊषुः व्युच्छन्ति उतोचित् अपिच हेअग्ने पृथिव्याः विस्तीर्णायाः ज्वालायाः महिनामहत्त्वेन कृतंसंपादितंचित्यत्किंचिदेनः प्राण्युपघातादिलक्षणंपापंमहे महते यजमानायमह्यंमदर्थं संदशस्य संक्षपय ॥ पृक्षप्रयजः अन्येभ्योपिदृश्यन्तइतिकर्मणिविच् दृशिग्रहणादधिकृतोभवतीत्युक्तं बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम् । द्रविणः द्रुगतावित्यस्मात् द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः गुणावादेशौ संबुद्धौसोर्लोपाभावश्छान्दसः आमन्त्रितत्वान्निघातः । सुवाचः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । रेवत् रयिर्धनमस्मिन्विद्यतइतिमतुप् ह्रस्वनुड्भ्यामितिमतुबुदात्तः छन्दसीरइतिवत्वं रयेर्मतौ बहुलंछन्दसीतिसम्प्रसारणम् परपूर्वत्वेगुणः । ऊषुः उषप्लुषदाहे दाहार्थोप्ययंधातुरत्रप्रकाशनेवर्तते छन्दसिलुङ्लिङितिवर्तमानेलिट् उसिरूपं निघातः। पृथिव्याः प्रथप्रख्यानेइत्यस्मात् प्रथेःषिवन्संप्रसारणंचेतिषिवन्प्रत्ययः तत्सन्नियोगेनधातोःसम्प्रसारणम् षिद्गौरादिभ्यश्चेतिङीष् प्रत्ययस्वरेणान्तोदात्तः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् । दशस्य निघातः ॥ १० ॥

अथैकादशी–

इळांमग्नेपुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध ।
स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ ११ ॥ २ ॥

Funding by IKS-MoE

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् ।
हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने ।
सा । ते । सुऽमतिः । भूतु । अस्मेइति ॥ ११ ॥ २ ॥

हेअग्ने पुरुदंसं अपः अप्नः दंसः वेषइतिकर्मनामसुपठितत्वात् दंसः शब्दःकर्मवाची पुरूणि बहूनिदंसांसिकर्माणियस्याःसा तां बहुकर्माणं गोःसनिंगवादिपशूनांप्रदात्रींइळांएतन्नामिकांगोरूपांदेवतां शश्वत्तमंनिरन्तरं हवमानाययजमानायमह्यं साधसाधय किञ्च नोस्माकंसूनुःपुत्रःतनयः पौत्रःस्याद्भवतुइति तेतवयासुमतिःशोभनाबुद्धिः साविजावाअवन्ध्यासतीअस्मेअस्माकंभूतु भवतु ॥ शश्वत्तमं उञ्छादिषुपाठादन्तोदात्तत्वम्। साध राधसाधसंसिद्धौ अन्तर्भावितण्यर्थोयम् लोटिव्यत्ययेनशप् सेर्ह्यपिच्चेतिहिरादेशः तस्यातोहेरितिलुक् निघातः। विजावा जनीप्रादुर्भावे अस्मादन्येभ्योपिदृश्यन्तइतिवनिप् विड्वनोरनुनासिकस्यादित्यात्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् लिङ्गव्यत्ययः। भूतु भूसत्तायाम् बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः ॥११॥

॥ इतितृतीयस्यप्रथमेद्वितीयोवर्गः ॥ २ ॥

अञ्जन्तीत्यष्टमंवैश्वामित्रमेकादशर्चंसूक्तम् अत्रानुक्रमणिका—अञ्जन्तियूपस्तुतिःषष्ठ्याद्याभिर्बहवोन्त्याव्रश्चिन्यष्टमीवैश्वदेवीवा तृतीयासप्तम्यावनुष्टुभाविति उच्छ्रयस्ववनस्पतेयेवृक्णासइत्येतेतृतीयासप्तम्यावनुष्टुभौ शिष्टास्त्रिष्टुभः कृत्स्नस्यसूक्तस्ययूपोदेवता वनस्पतेशतवल्शइत्यस्याश्छिन्नयूपस्यमूलभूतःस्थाणुर्देवता आदित्यारुद्रावसवइत्यष्टमीवैश्वदेवी यौपीवा अत्र षष्ठ्यादीनांबहवोयूपादेवताः बहूनांस्तूयमानत्वात् शिष्टाएकयूपदेवत्याः यूपोञ्जनेअञ्जंतित्वामित्येषा प्रेषितोयूपायाज्यमानायाञ्जन्तित्वामध्वरेदेवयन्तइतिसूत्रितत्वात्। यूपोच्छ्रयणेसमिद्धस्येतिद्वेऋचौ सूत्रितंच—उच्छ्रयस्ववनस्पतेसमिद्धस्यश्रयमाणःपुरस्तादिति यूपपरिव्ययणेयुवासुवासाःपरिवीतआगादितिपरिदध्यादितिसूत्रितत्वात् यूपोच्छ्रयणेजातोजायतेसुदिनत्वेअह्नामित्यर्धर्चआरमेदितिसूत्रितम्। यूपैकादशिन्यामन्यत्रापि बहुयूपयुक्तेकर्मणियान्वोनरइत्यादिभिः षड्भिःपञ्चभिर्वासंस्तुयात् संस्तुयादनभिहिंकृत्ययान्वोनरोदेवयन्तोनिमिम्युरितिषड्भिःपञ्चभिर्वेति॥

तस्मिन्सूक्तेप्रथमा—

अञ्जन्तित्वामध्वरेदेवयन्तोवनस्पतेमधुनादैव्येन ।
यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याउपस्थे ॥ १ ॥

Funding by IKS-MoE

अ॒ञ्जन्ति॑ । त्वाम् । अ॒ध्व॒रे । दे॒व॒ऽयन्तः॑ । वन॑स्पते । मधु॑ना ।
दैव्ये॑न । यत् । ऊ॒र्ध्वः । तिष्ठाः॑ । द्रवि॑णा । इ॒ह । ध॒त्ता॒त् । यत् ।
वा॒ । क्षयः॑ । मा॒तुः । अ॒स्याः । उ॒पऽस्थे॑ ॥ १ ॥

वनस्पतेखदिरपलाशादिलक्षणहेयूप अध्वरे यज्ञेदेवयन्तः देवान्कामयमानाअध्वर्य्वादयः दैव्येनमधुनादेवसम्बन्धिनामधुनाघृतेन एतद्वैमधुदैव्यंयदाज्यमित्याम्नानात्[1] । तेनघृतेनत्वामञ्जन्ति त्वयिघृतंसिञ्चन्तीत्यर्थः यत्यदित्वंऊर्ध्वस्तिष्ठाः उन्नतस्तिष्ठसि ।यद्वायदिवामातुरस्याः मातृभूतायाः पृथिव्याः उपस्थे उत्सङ्गेतेक्षयोनिवासः यद्यूर्ध्वस्तिष्ठसियदिवाभूमौशयानोवर्तसे उभयथापित्वं इहास्मासुद्रविणानिधनानिधत्तात् धेहि ब्राह्मणेनेयमृग्व्याख्याता—अञ्जन्तित्वामध्वरेदेवयन्तइत्यन्वाहाध्वरेह्येनंदेवयन्तोञ्जन्तिवनस्पतेमधुनादैव्येनेत्येतद्वैमधुदैव्यंयदाज्यं यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याउपस्थइतियदिचतिष्ठासियदिचशयासैद्रविणमेवास्मासुधत्तादित्येवतदाहेति[2] । तथाचनिरुक्तमपि— अञ्जन्तित्वामध्वरेदेवान्कामयमानावनस्पतेमधु नादैव्येनचघृतेनचयदूर्ध्वःस्थास्यसिद्रविणानिचनोदास्यसियद्वातेकृतःक्षयोमातुरस्याउपस्थउपस्थाने[3]इति ॥ अञ्जन्ति अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु रुधादित्वात्श्नम् तस्यलटिझेङित्त्वादनिदितामित्युपधालोपः श्नसोरल्लोपइत्यल्लोपः प्रत्ययस्वरेणमध्योदात्तः । त्वां अमियुष्मच्छन्दस्यत्वमावेकवचनेइतित्वादेशः द्वितीयायांचेत्याकारः एकादेशउदात्तेनोदात्तइत्येकादेशस्योदात्तत्वम् । अध्वरे नविद्यतेध्वरोहिंसायस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरेप्राप्तेनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । देवयन्तः देवानात्मनइच्छन्तः सुपआत्मनइतिक्यच् क्यचिचेतीत्वम् अकृत्सार्वधातुकयोरितिदीर्घत्वंच नच्छन्दस्यपुत्रस्येत्यनेनप्रतिषिध्यते तदन्ताच्छतृप्रत्ययः शपःपित्त्वाल्लसार्वधातुकस्वरेणचानुदात्तत्वेकृतेतयोरेकादेशउदात्तेनोदात्तइतिक्यचएवस्वरः । वनस्पते आमन्त्रितस्यचेत्याद्युदात्तत्वम् । मधुना फलिपाटिनमिमनीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम् । दैव्येन देवाद्यञञावितियञ् ञित्त्वादादिवृद्धिः यस्येतिलोपः ञित्त्वादाद्युदात्तः। तिष्ठाः ष्ठागतिनिवृत्तौ लेटिसिप् इतश्चलोपइतीकारलोपः शपःशित्त्वात्पाघ्रेत्यादिनातिष्ठादेशः लेटोडाटावित्यडागमः यच्छब्दयोगान्निघाताभावः तिष्ठादेशस्याद्युदात्तत्वेननिपातितत्वादाद्युदात्तः । द्रविणा द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः सुपांसुलुगितिसुपो-

---

[1] ऐ० ब्रा० २. २. । [2] ऐ० ब्रा० २. २. । [3] नि० ८. १८. ।

डादेशः नित्त्वादाद्युदात्तः । इह इदम्शब्दात्सप्तम्यर्थेइदमोहइतिहः इदमइशितीशादेशः शित्वात्सर्वादेशः प्रत्ययस्वरः । धत्तात् डुधाञ्धारणपोषणयोरित्यस्यप्रार्थनेलोट् सिप् तस्य सेर्ह्यपिच्चेतिहिरादेशः तुह्योरितितातङादेशः श्नाभ्यस्तयोरातइत्याकारलोपः दधस्तथोश्चेतिभष्भावः जश्त्वचर्त्वे निघातः । वा चादित्वादनुदात्तः । क्षयः क्षियन्तिनिवसन्त्यस्मिन्निति अधिकरणेघः क्षयोनिवासेइत्याद्युदात्तत्वम् । मातुः नप्तृनेष्टृइत्यादिनातृजन्तत्वेननिपातनादन्तोदात्तः ऋतउदितिङसःपूर्वपरयोरुकारः । अस्याः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । उपस्थे ष्ठागतिनिवृत्तौ आतश्चोपसर्गेइतिकः तत्पुरुषेतुल्यार्थेतिमरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् ॥ १ ॥

अथद्वितीया—

स॒मिद्ध॑स्य॒श्रय॑माणःपु॒रस्ता॒द्ब्रह्म॑वन्वा॒नोअ॒जरं॑सु॒वीर॑म् ।
आ॒रेअ॒स्मद॒मतिं॒बाध॑मान॒उच्छ्र॑यस्वमह॒तेसौभ॑गाय ॥ २ ॥

सम्ऽइ॑द्धस्य । श्रय॑माणः । पु॒रस्ता॑त् । ब्रह्म॑ । व॒न्वा॒नः । अ॒जर॑म् ।
सु॒ऽवीर॑म् । आ॒रे । अ॒स्मत् । अम॑तिम् । बाध॑मानः । उत् ।
श्र॒य॒स्व॒ । म॒ह॒ते । सौभ॑गाय ॥ २ ॥

हेयूप समिद्धस्यदीप्यमानस्याहवनीयस्याग्नेः पुरस्तात्प्राच्यांदिशिश्रयमाणः तत्रवर्तमानः ब्रह्मअन्नं ब्रह्मवर्चंइत्यन्ननामसुपाठात् अजरंजरारहितंसमृद्धंसुवीरंशोभनापत्ययुक्तंब्रह्मान्नंवन्वानः प्रयच्छन् अस्मदमतिंअस्माकंशत्रुभूतांअशनायाम् अशनायावैपाप्मामतिरितिश्रवणात् तादृशंशत्रुंआरेदूरेबाधमानः अपनुदंस्त्वंमहतेसौभगायधनादिसंपत्त्यर्थंउच्छ्रयस्व उच्छ्रितोभव । उक्तार्थेब्राह्मणम्— समिद्धस्यश्रयमाणःपुरस्तादितिसमिद्धस्यह्येषएतत्पुरस्ताच्छ्रयतेब्रह्मवन्वानोअजरंसुवीरमित्याशिषमेवाशास्तआरेअस्मदमतिंबाधमानइत्यशनायावैपाप्मामतिस्तामेवतदारान्नुदतेयज्ञाच्चयजमानाच्चोच्छ्रयस्वमहतेसौभगायेत्याशिषमेवाशास्त[१]इति ॥ समिद्धस्य ञिइन्धीदीप्तौ कर्मणिनिष्ठायांश्वीदितोनिष्ठायामितीट्प्रतिषेधः सम्यगिद्धइतिगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् । श्रयमाणः श्रिञ्सेवायामित्यस्यलटःशानच् तस्यलसार्वधातुकस्वरेणानुदात्तत्वे

---

[१] ऐ० ब्रा० २, २.

Funding by IKS-MoE

कृतेधातुस्वरःशिष्यते पुरस्तात्पूर्वशब्दस्यदिक्शब्देभ्यःसप्तमीपंचमीत्यादिनाअस्तातिप्रत्ययः अस्तातिचेतिपूर्वस्यपुरादेशः प्रत्ययस्वरः । ब्रह्म नब्विषयस्यानिसन्तस्येत्याद्युदात्तः। वन्वानःवनुयाचने अत्रायंधातुर्दानार्थेवर्तते लटःशानच्प्रत्ययः चित्त्वादन्तोदात्तः । अजरम् नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् । सुवीरम् वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । आरे एवमादित्वादन्तोदात्तः । अस्मत् युष्यसिभ्यांमदिगितिमदिक्प्रत्ययः सुपांसुलुगितिसुपोलुक् मदिक् प्रत्ययस्वरः । अमतिम् तत्पुरुषेइतिपूर्वपदप्रकृतिस्वरत्वम् । उत् निपातत्वेनाद्युदात्तः । श्रयस्व श्रिञ्सेवायामित्यस्यलोण्मध्यमैकवचनेथास् थासःसेइत्यादेशः सवाभ्यांवामावित्येकारस्यवकारः निघातः । महते वर्तमानेपृषद्बृहन्महदितिनिपातनादन्तोदात्तः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । सौभगाय प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यइत्यञ् हृद्भगसिंध्वन्तेपूर्वपदस्यचेतिवृद्धिः सर्वविधीनांछन्दसिविकल्पितत्वादित्युत्तरपदस्यवृद्धिर्नभवति ञित्स्वरः ॥ २ ॥

अथतृतीया–

उच्छ्रयस्ववनस्पतेवर्ष्मन्पृथिव्याअधि ।
सुमितीमीयमानोवर्चोधायज्ञवाहसे ॥ ३ ॥

उत् । श्रयस्व । वनस्पते । वर्ष्मन् । पृथिव्याः । अधि ।
सुऽमिती । मीयमानः । वर्चः । धाः । यज्ञऽवाहसे ॥ ३ ॥

हेवनस्पते यूप पृथिव्याअधि पृथिव्यांवर्ष्मन् उत्कृष्टेदेवयजनाख्येदेशेउच्छ्रयस्व उच्छ्रितोभव सुमतीशोभमानयाबुद्ध्या अथवाशोभनेनपरिमाणेनमीयमानःइयत्तयापरिच्छिद्यमानः त्वंयज्ञवाहसेयज्ञनिर्वाहकाययजमानायवर्चोधाः अन्नंधेहि अयमेवार्थोब्राह्मणेनदर्शितः–उच्छ्रयस्ववनस्पतइत्युच्छ्रीयमाणायाभिरूपायद्यज्ञेभिरूपंतत्समृद्धंवर्ष्मन्पृथिव्याअधीत्येतद्वैवर्ष्मपृथिव्यैयत्रयूपमुन्मिन्वन्तिसुमितीमीयमानोवर्चोधायज्ञवाहसइत्याशिषमाशास्तेइति[२] ॥ वनस्पते अपादादित्वादाष्टमिकमनुदात्तत्वम् । पृथिव्याः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् । सुमिती माङ्मानेइत्यस्यक्तिनिद्यतिस्यतिमास्थेतीकारादेशः शोभनयामित्या तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् सुपांसुलुगितिसवर्णदीर्घः । मीयमानः माङ्मानेइत्यस्यकर्मणियक्

---

[२] ऐ० ब्रा० २. २.

घुमास्थेतीत्वं प्रत्ययस्वरः । धाः धाधातोर्लोडर्थेछन्दसिलुङ्लङिति लुङ् इतश्चेतिसिपइकारलोपः गातिस्थेतिसिचोलोपः बहुलंछन्दसीत्यडभावः निघातः । यज्ञवाहसे यज्ञंवहतिप्राप्नोति वहप्रापणेइत्यस्य वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेरुपधावृद्धिः गतिकारकयोरितिपूर्वपदप्रकृतिस्वरत्वंचेतिपूर्वपदप्रकृतिस्वरः ॥ ३ ॥

अथचतुर्थी–

युवा॑सुवासा॒ःपरि॑वीत॒आगा॒त्सउ॒श्रेया॑न्भवति॒जाय॑मानः ।
तंधीरा॑सःक॒वय॒उन्न॑यन्तिस्वा॒ध्यो॒३॑मन॑सादेव॒यन्त॑ः ॥ ४ ॥

युवा॑ । सु॒ऽवासा॑ः । परि॑ऽवीतः । आ । अ॒गा॒त् । सः । ऊँ॒ इति॑ ।
श्रेया॑न् । भ॒व॒ति । जाय॑मानः । तम् । धीरा॑सः । क॒वय॑ः । उत् ।
न॒य॒न्ति॒ । सु॒ऽआ॒ध्य॑ः । मन॑सा । दे॒व॒ऽयन्त॑ः ॥ ४ ॥

युवादृढाङ्गः अष्टाश्र्यादिलक्षणलक्षितइत्यर्थः सुवासाः शोभनेनवाससारशनयायुक्तः परिवीतस्तयारशनयावेष्टितः एवंविधोयूपआगात्आगच्छति सउसएवयूपः श्रेयान्जायमानः सर्वेभ्योवनस्पतिभ्यउत्कृष्टतयासंपद्यमानोभवति तमेवंविधंयूपंधीरासः प्राज्ञाःमनसादेवयन्तः देवान्कामयमानाःस्वाध्यः सुष्ठुसर्वतोध्यानयुक्ताःकवयः क्रान्तदर्शिनोध्वर्य्वादयः उन्नयन्तिउन्नतंकुर्वन्ति एतस्मिन्नर्थेब्राह्मणम्–युवासुवासाःपरिवीतआगादित्युत्तमयापरिदधातिप्राणोवैयुवासुवासाःसोयंशरीरैःपरिवृतःसउश्रेयान्भवतिजायमानइतिश्रेयाञ्छ्रेयान्ह्येषएतद्भवतिजायमानस्तंधीरासःकवयउन्नयन्तिस्वाध्योमनसादेवयन्तइतियेवाअनूचानास्तेकवयस्तएवैनंतदुन्नयन्तीति[1] ॥ युवा यौतेःकनिन्युवृषितक्षीत्यादिनाकनिन्प्रत्ययः कित्त्वाद्गुणाभावः उवङादेशः नित्त्वादाद्युदात्तत्वम् । सुवासाः वसआच्छादने असुन्नित्यनुवृत्तौवसेर्णिदित्यसुन् णित्त्वादुपधावृद्धिः सोर्मनसीइत्युत्तरपदाद्युदात्तत्वम् । परिवीतः व्येञ्संवरणे कर्मणिक्तः यजादित्वात्संप्रसारणम् गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् । अगात् इण्गतावित्यस्यलुङिइणोगालुङीतिगादेशः गातिस्थेतिसिचोलोपः अडागमः । श्रेयान् प्रशस्यस्यद्विवचनविभज्योपपदेइतिईयसुन्प्रत्ययः तस्मिन्प्रशस्यस्यश्रइतिश्रादेशः गुणः नित्त्वादाद्युदात्तत्वम् एकादेशआद्युदात्तः । स्वाध्यः ध्यैचिंतायाम् स्वाङोरुपसर्गयोःप्राक्प्रयोगः अन्येभ्योपिदृश्यन्तइतिक्किप् दृशिग्रहणात्संप्रसा-

---

[1] ऐ० ब्रा० २. २. ।

रणं सम्प्रसारणाच्चेतिपूर्वरूपत्वं हलइतिदीर्घः जसि एरनेकाचइतियणादेशः कृदुत्तरपदप्रकृतिस्वरत्वम् उदात्तस्वरितयोर्यणइतिजसःस्वरितत्वम् । देवयन्तः सुपआत्मनःक्यजितिक्यच् चित्त्वादन्तोदात्तः ॥ ४ ॥

अथपञ्चमी—

जा॒तो॑जाय॑तेसुदि॒न॒त्वेअह्ना॑ंसम॒र्य॑आवि॒द॒थे॒वर्ध॑मानः ।
पु॒नन्ति॒धीरा॑अ॒पसो॑मनी॒षादे॑व॒याविप्र॒उदि॑यर्ति॒वाच॑म् ॥ ५ ॥ ३ ॥

जा॒तः । जा॒य॒ते॒ । सु॒दि॒न॒ऽत्वे । अह्ना॑म् । स॒ऽम॒र्ये॑ । आ । वि॒दथे॑ ।
वर्ध॑मानः । पु॒नन्ति॑ । धीराः॑ । अ॒पसः॑ । म॒नी॒षा । दे॒व॒ऽयाः ।
विप्रः॑ । उत् । इ॒य॒र्ति॒ । वाच॑म् ॥ ५ ॥ ३ ॥

जातः पृथिव्यां प्रथमंउत्पन्नोयूपः समर्ये मर्याइतिमनुष्यनाम तैःसहितेविदथेवर्धमानः विदथइतियज्ञनाम विदथः सवनमितियज्ञनामसुपाठात् । तस्मिन्यज्ञेआवर्धमानः घृताञ्जनरशनापरिव्ययणादिनासर्वतःशोभमानःसन् अह्नांसुदिनत्वेजायते पशुनियोजनादिद्वारेणयज्ञनिर्वाहकतयाअहानिसुदिनानिकरोतीत्यर्थः अपसःकर्मवन्तः धीराः प्रज्ञानवन्तः अध्वर्य्वादयः मनीषाबुद्ध्यातंयूपंपुनन्ति प्रक्षालनादिभिःशोधयन्ति देवयाः देवानां यष्टादेवानांहवींषिप्रापयितावा विप्रोमेधावीहोताचवाचंयूपविषयांस्तुतिलक्षणांवाचं उदियर्तिप्रेरयति उच्चारयतीत्यर्थः उक्तार्थे[३]ब्राह्मणम्—जातोजायतेसुदिनत्वेअह्नामितिजातोह्येषएतज्जायतेसमर्यआविदथेवर्धमानइति वर्धयन्त्येवैनंतत्पुनन्तिधीराअपसोमनीषेतिपुनन्त्येवैनंतद्देवयाविप्रउदियर्तिवाचमितिदेवेभ्यएवैनंतंनिवेदयति ॥ सुदिनत्वे सुदिनानांभावइति तस्यभावस्त्वतलावितित्वः प्रत्ययस्वरः । समर्ये मृङ्प्राणत्यागेइत्यस्माच्छन्दसिनिष्टर्क्येतिक्यप्रत्ययान्तत्वेननिपातनाद्गुणः समासस्येत्यन्तोदात्तत्वम् । पुनन्ति पूञ्पवने क्र्यादित्वात्श्ना प्वादित्वाद्ध्रस्वः प्रत्ययस्वरः । देवयाः याप्रापणे आतोमनिन्क्वनिबिति विच्प्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । इयर्ति ऋगतौ जुहोत्यादिः अभ्यासस्यअर्तिपिपर्त्योश्चेतीत्वम् अभ्यासस्यासवर्णेइतयङादेशः निघातः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेतृतीयोवर्गः ॥ ३॥

---

३ ऐ० ब्रा० २. २.

अथषष्ठी—

यान्वो॒नरो॑देव॒यन्तो॑निमि॒म्युर्व॑न॑स्पते॒स्वधि॑तिर्वा॑त॒तक्ष॑ ।
तेदे॒वास॒ःस्वर॑वस्तस्थि॒वांस॑ःप्र॒जाव॑द॒स्मेदि॑धिषन्तु॒रत्न॑म् ॥ ६ ॥

यान् । व॒ः । नर॑ः । दे॒व॒ऽयन्त॑ः । नि॒ऽमि॒म्युः । वन॑स्पते । स्वऽधि॑तिः ।
वा॒ । त॒तक्ष॑ । ते । दे॒वास॑ः । स्वर॑वः । त॒स्थि॒ऽवांस॑ः । प्र॒जाऽव॑त् ।
अ॒स्मे इति॑ । दि॒धि॒ष॒न्तु॒ । रत्न॑म् ॥ ६ ॥

हेयूपाः देवयन्तः देवान्कामयमानाः नरः कर्मणांनेतारोध्वर्य्वादयः यान्वः यान्युष्मान्निमिम्युः अवटेषुप्रचिक्षिपुः वाअपिचहेवनस्पतेस्वधितिः परशुः त्वदीयान्यूपान्ततक्ष चिच्छेद देवासोदीप्यमानाःस्वरवः स्वरुशब्दःस्वशकलवाची तद्वन्तः लुप्तमत्वर्थीयः तस्थिवांसः तिष्ठन्तस्तेतादृशाःयूपाः अस्मेअस्मैयजमानायप्रजावत्अपत्यसहितंरत्नंउत्तमंधनंदिधिषन्तुधारयन्तु प्रयच्छन्त्वित्यर्थः ॥ निमिम्युः डुमिञ्प्रक्षेपणेइत्यस्यलिट्युसिअसंयोगाल्लिट्किदितिकिद्वद्भावाद्गुणाभावः यद्वृत्तयोगादनिघातः सतिशिष्टस्वरोबलीयानितिवचनात्प्रत्ययस्वरः । स्वधितिःस्वशब्दोपपदाद्धिधारणेइत्यस्मात्क्तिन् स्वास्वकीयानिशितधाराधीयतेप्रक्षिप्यतेनेनेतिस्वधितिःखड्गः । ततक्ष तक्षूत्वक्षूतनूकरणेइत्यस्माल्लिटिणल्लिरूपादनिघातः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । स्वरवः स्वृशब्दोपतापयोरित्यस्मान्निदित्यनुवृत्तौशृस्वृस्निहित्रपीत्यादिनाउप्रत्ययः नित्त्वादाद्युदात्तः । तस्थिवांसः ष्ठागतिनिवृत्तावित्यस्माच्छन्दसिलिट् तस्यक्वसुः वस्वेकाजाद्धसामितीडागमः प्रत्ययस्वरः । प्रजावत् जनीप्रादुर्भावेइत्यस्मादुपसर्गेचसंज्ञायामितिडः ततष्टाप् तदस्यास्तीतिमतुप् तस्य पित्त्वादनुदात्तत्वम् । एकादेशस्वरः । अस्मै अस्मच्छब्दस्यसुपांसुलुगितिशेइत्यादेशः । दिधिषन्तु धिषधारणे जुहोत्यादिः निघातः ॥ ६ ॥

अथसप्तमी—

येवृ॒क्णासो॒अधि॒क्षमि॒निमि॑तासोय॒तस्रु॑चः ।
तेनो॑व्यन्तु॒वार्यं॑देव॒त्राक्षे॑त्र॒साध॑सः ॥ ७ ॥

ये । वृ॒क्णास॑ः । अधि॑ । क्षमि॑ । निऽमि॑तासः । य॒तऽस्रु॑चः । ते । न॒ः ।
व्य॒न्तु॒ । वार्य॑म् दे॒व॒ऽत्रा । क्षे॒त्र॒ऽसाध॑सः ॥ ७ ॥

अधिक्षमि क्षमायांभूमौ वृक्णासः परशुनाछिन्नायेयूपाः यतस्रुचइतिऋत्विग्वाची यतस्रुचः मरुतइतिऋत्विङ्नामसुपठितत्वात् यताः स्रुचोयैस्तेयतस्रुचः तैर्ऋत्विग्भिः निमितासः अवटेषुनितरांप्रक्षिप्ताः क्षेत्रसाधसः क्षेत्रस्ययज्ञस्यसाधकाः यथाक्षेत्रंसस्यादिद्वाराफलंप्रयच्छतितथायज्ञोपिअपूर्वद्वारास्वर्गादिफलंददातीतिक्षेत्रंयज्ञः एवंविधास्तेयूपाः नोस्मदीयंवार्यंवारणीयंसंभजनीयंहविर्देवत्रादेवेषुव्यन्तुगमयन्तु अस्मदीयंहविर्देवाधीनंकुर्वन्त्वित्यर्थः ॥ वृक्णासः ओव्रश्चूछेदनेइत्यस्यनिष्ठायांयस्यविभाषेतीट्प्रतिषेधः किच्चाद्ग्रहिज्यावयीत्यादिनासम्प्रसारणम् ओदितश्चेतिनिष्ठानत्वम् । क्षमि आतोधातोरित्यत्रआतइतियोगविभागादाकारलोपः निमितासः डुमिञ्प्रक्षेपणे कर्मणिक्तः गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् । यतस्रुचः बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । व्यन्तु इण् गतावित्यस्यलोटिरूपम् इकारलोपश्छान्दसः अयमन्तर्भावितण्यर्थः । वार्यं वृङ्संभक्तावित्यस्मादृहलोर्ण्यदितिकर्मणिण्यत् ईडवन्दवृशंसदुहेत्यादिनाद्युदात्तत्वम् । देवत्रा त्रेत्यनुवृत्तौ देवमनुष्यपुरुषपुरुमर्त्येभ्यइत्यादिनाधिकरणेत्राप्रत्ययः । क्षेत्रसाधसः राधसाधसंसिद्धावित्यस्मादौणादिकोसुन् कृदुत्तरपदप्रकृतिस्वरः ॥ ७ ॥

अथाष्टमी–

आ॒दि॒त्यारु॒द्रावस॑वःसुनी॒थाद्यावा॒क्षामा॑पृथि॒वीअ॒न्तरि॑क्षम् ।
स॒जोष॑सोय॒ज्ञम॑वन्तुदे॒वाऊ॒र्ध्वंकृ॑ण्वन्त्वध्व॒रस्य॑के॒तुम् ॥ ८ ॥

आ॒दि॒त्याः । रु॒द्राः । वस॑वः । सु॒ऽनी॒थाः । द्यावा॒क्षामा॑ । पृ॒थि॒वी ।
अ॒न्तरि॑क्षम् । स॒ऽजोष॑सः । य॒ज्ञम् । अ॒व॒न्तु॒ । दे॒वाः । ऊ॒र्ध्वम् ।
कृ॒ण्व॒न्तु॒ । अ॒ध्व॒रस्य॑ । के॒तुम् ॥ ८ ॥

सुनीथाः यज्ञस्यसुष्ठुनेतारः आदित्याः द्वादशादित्याः रुद्राः एकादशरुद्राः वसवः अष्टौवसवः यद्वा सुष्ठुनीथाः सुष्टुतयः स्तुतशस्त्राणिनीथानिचोक्थामदानिचेतिहिश्रूयते । द्यावाक्षामा द्यावापृथिव्यौ पृथिवी सुब्व्यत्ययः पृथुविस्तीर्णमन्तरिक्षंचसजोषसएतेसर्वेदेवाः ऐकमत्येनपरस्परंसङ्गताभूत्वाइममस्मदीयंयज्ञमवन्तुरक्षन्तु । किञ्च अध्वरस्ययज्ञस्यकेतुंध्वजभूतंप्रज्ञापकंवा इमंयूपंऊर्ध्वंकृण्वन्तु उच्छ्रितंकुर्वन्तु ॥ आदित्याः अदितेरपत्यानि दित्यदित्यादित्यपत्युत्तरपदादितिण्यः णित्त्वादादिवृद्धिः प्रत्ययस्वरः । रुद्राः रोदयन्तिसर्वानन्त-

Funding by IKS-MoE

काले रोदेर्णिलुक्चेतिरक्प्रत्ययः तत्सन्नियोगेनणिलोपः प्रत्ययस्वरः जसःसुप्त्वादनुदात्तत्वे एकादेशउदात्तेनोदात्तइत्येकादेशस्याप्युदात्तत्वम् । वसवः वसनिवासे निदित्यनुवृत्तौ शॄस्वृस्निहित्रप्यसिवसीत्यादिनाउप्रत्ययः नित्त्वादाद्युदात्तः । सुनीथाः णीञ्प्रापणे हनिकुषिनीरमिकाशिभ्यइतिक्थन् कित्त्वादगुणः थाथघञ्क्तेत्युत्तरपदान्तोदात्तत्वम् । द्यावाक्षामा द्यौश्चक्षामाच दिवोद्यावाइतिद्यावादेशः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् । पृथिवी प्रथप्रख्याने प्रथेःषिवन्संप्रसारणंचेतिषिवन्संप्रसारणंच षिद्गौरादिभ्यश्चेतिङीष् प्रत्ययस्वरेणान्तोदात्तः । अवन्तु अवरक्षणे निघातः । कृण्वन्तु कृविहिंसाकरणयोरित्यस्मात् लोटि धिन्विकृण्व्योरचेत्युप्रत्ययः अकारश्चान्तादेशः निघातः ॥ ८ ॥

अथनवमी–

ह॒ंसाइ॑वश्रे॒णि॒शोयता॑नाःशु॒क्रावसा॑ना॒ःस्वर॑वोन॒आगु॑ः ।
उ॒न्नी॒यमा॑नाःक॒विभि॑ःपु॒रस्ता॑द्दे॒वादे॒वाना॒मपि॑यन्ति॒पाथ॑ः ॥ ९ ॥

ह॒ंसाःऽइ॑व । श्रे॒णि॒ऽशः । यता॑नाः । शु॒क्रा । वसा॑नाः । स्वर॑वः ।
न॒ः । आ । अ॒गु॒ः । उ॒त्ऽनी॒यमा॑नाः । क॒विऽभि॑ः । पु॒रस्ता॑त् ।
दे॒वाः । दे॒वाना॑म् । अपि॑ । य॒न्ति॒ । पाथ॑ः ॥ ९ ॥

शुक्राशुक्राणिदिप्तानिवासांसिवसानाः आच्छादयन्तः स्वरवः स्वरुमन्तः श्रेणिशः पङ्क्तिशः यतानाः प्रवर्तमानाः अत्रदृष्टान्तः–हंसाइवेति यथानभसिपङ्क्तिशःपतन्तोहंसाः शोभन्तेतद्वत् शोभमानास्तेयूपाः नोस्मानागुः प्रापुः अपिचकविभिर्मेधाविभिरध्वर्य्वादयः पुरस्तादाहवनीयस्य पूर्वभागेउन्नीयमानाउच्छ्रीयमाणाः देवादीप्यमानास्तेयूपाः देवानांपाथः देवानांस्थानमन्तरिक्षम् पाथोन्तरिक्षंपथाव्याख्यातमितियास्कः[1] । पाथोनदीभ्यांङ्चणितिसूत्रेपाथोन्तरिक्षमितिवृत्तिकारोप्यवादीत् तादृशमन्तरिक्षमपियन्ति प्राप्नुवन्तिअध्वर्य्वाद्रिभिरुच्छ्रीयमाणायूपाः अतिदैर्घ्यादन्तरिक्षंव्याप्यवर्तन्तइत्यर्थः ॥ हंसाइव इवेनविभक्त्यलोपइतिवचनात्पूर्वपदस्वरः । श्रेणिशः बह्वल्पादिति शस् प्रत्ययस्वरः । शुक्रा शुचदीप्ताविव्यस्मात् ऋज्रेन्द्राग्रेत्यादिनारन्प्रत्ययान्तत्वेननिपातनादन्तोदात्तः । अगुः इण्गतौ अस्माल्लुङि रूपम् निघातः ॥ ९ ॥

---

[1] नि०६. ७.

अथदशमी–

शृङ्गा॑णी॒वेच्छृ॒ङ्गिणां॒संद॑दृश्रेच॒षाल॑वन्तः॒स्वर॑वःपृथि॒व्याम् ।
वा॒घद्भि॑र्वा॑विह॒वेश्रोष॑माणाअ॒स्माँअ॑वन्तुपृत॒नाज्ये॑षु ॥ १० ॥

शृङ्गा॑णिऽइव । इत् । शृ॒ङ्गिणा॑म् । सम् । द॒दृ॒श्रे॒ । च॒षाल॑ऽवन्तः ।
स्वर॑वः । पृ॒थि॒व्याम् । वा॒घत्ऽभिः । वा॒ । वि॒ऽह॒वे । श्रोष॑माणाः ।
अ॒स्मान् । अ॒व॒न्तु॒ । पृ॒त॒नाज्ये॑षु ॥ १० ॥

स्वरवः स्वरुमन्तः चषालवन्तः प्रतिमुक्तकटकाःएवंविधायूपाः पृथिव्यांश्रृङ्गिणांमहिषादीनांश्रृङ्गाणीवविषाणानीवसन्ददृश्रेइत् सम्यक्दृश्यन्तएववा अपिच विहवे विविधंहूयन्तेहवींष्यत्रेतिविहवोयज्ञः तस्मिन्यज्ञेवाघद्भिर्ऋत्विग्भिः वाघतः वृक्तबर्हिषइत्यृत्विङ्नामसुपाठात् । श्रोषमाणाः तैः क्रियमाणंस्तुतिलक्षणंशब्दंश्रृण्वन्तस्तादृशायूपाः पृतनाज्येषुपृतनाज्यशब्दःसङ्ग्रामवाची आजौपृतनाज्यमितिसङ्ग्रामनामसुपठितत्वात्पृतनाज्येषुसङ्ग्रामेषुवधस्थलेष्वितियावत् अस्माद्यजमानानवन्तुरक्षन्तु ॥ श्रृङ्गाणि शॄहिंसायामित्यस्मात् श्रीणातेर्ह्रस्वश्चेतिगन्नुडागमः धातोर्ह्रस्वश्च नित्स्वरः । ददृश्रे छन्दसिलुङ्लङ्लिटइतिलिङर्थेलिट् इरयोरेइतिइरेचोरेइत्यादेशःनिघातः ॥ १० ॥

अथैकादशी–

वन॑स्पतेश॒तव॑ल्शो॒विरो॑हस॒हस्र॑वल्शा॒विव॒यंरु॑हेम ।
यंत्वाम॒यंस्वधि॑ति॒स्तेज॑मानःप्रणि॒नाय॑मह॒तेसौभ॑गाय ॥ १३॥४॥

वन॑स्पते । श॒तऽव॑ल्शः । वि । रो॒ह॒ । स॒हस्र॑ऽवल्शाः । वि । व॒यम् ।
रु॒हे॒म॒ । यम् । त्वाम् । अ॒यम् । स्वऽधि॑तिः । तेज॑मानः ।
प्र॒ऽनि॒नाय॑ । म॒ह॒ते । सौभ॑गाय ॥ ११ ॥ ४ ॥

हेवनस्पते छिन्नयूपमूलभूतस्थाणो शतवल्शः शतशाखःसन्विरोह विशेषेणप्रादुर्भूतोभव वयमपिसहस्रवल्शाः पुत्रपौत्रादिसन्तानपरंपरयासहस्रशाखाःसन्तःविरुहेम विशेषेणप्रादुर्भूताभ-

Funding by IKS-MoE

वेम तेजमानोनिशितधारोयंस्वधितिःपरशुः हेस्थाणो यंत्वांमहतेसौभगायमहत्सौभाग्यंबहुशाखत्वलक्षणं प्रणिनाय प्रकर्षेणप्रापयामास ॥ सहस्रवल्शाः सहस्रशब्दःकर्दमादित्वान्मध्योदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । रुहेम रुहप्रादुर्भावेइत्यस्मादाशीर्लिङि किदाशिषीतियासुडागमः स्कोःसंयोगाद्योरितिसलोपः लिङ्याशिष्यङित्यङ्प्रत्ययः अतोयेयइतियादेशः लोपोव्योर्वलीतियलोपः गुणः । प्रणिनाय णीञ्प्रापणेइत्यस्मात् लिटिणलिरूपं पादादित्वादनिघातः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ॥ ११ ॥

॥ इतितृतीयस्यप्रथमेचतुर्थोवर्गः ॥ ४ ॥

सखायस्त्वेतिनवर्चंनवमंसूक्तंवैश्वामित्रम् अत्रेयमनुक्रमणिका—सखायोनवबार्हतं त्रिष्टुबन्तमिति अंत्यात्रिष्टुप् शिष्टाअष्टौबृहत्यः प्रातरनुवाकाश्विनशस्त्रयोर्बार्हतेछन्दस्यस्यसूक्तस्यविनियोगः अथैतस्याइतिखण्डेसूत्रितम् । सखायस्त्वायमग्निरग्नआयाहीति ।

तस्मिन्सूक्तेप्रथमा--

सखा॑यस्त्वाववृमहेदे॒वंमर्ता॑सऊ॒तये॑ ।
अ॒पांनपा॑तंसु॒भगं॑सु॒दीदि॑तिंसु॒प्रतू॑र्तिमने॒हस॑म् ॥ १ ॥

सखा॑यः । त्वा॒ । व॒वृ॒म॒हे॒ । दे॒वम् । मर्ता॑सः । ऊ॒तये॑ । अ॒पाम् ।
नपा॑तम् । सु॒ऽभग॑म् । सु॒ऽदीदि॑तिम् । सु॒ऽप्रतू॑र्तिम् । अ॒ने॒हस॑म् ॥ १ ॥

विश्वामित्रःस्तौति—हेअग्ने सखायः सोमाज्यादिहविःप्रदानेनोपकारकत्वान्मित्राणिमर्तासोमनुष्याऋत्विजोवयं अपांनपातं अपांनप्तारं सुभगंशोभनधनयुक्तंसुदीदितिंशोभनदीप्तिंसुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिःसुखेनगन्तव्यंअनेहसं उपद्रवरहितंएतादृशं देवंत्वां ऊतयेरक्षणायववृमहे वृणीमहे ॥ सखायः ख्याप्रकथने समानेख्यश्चोदात्तइतिसमानेउपपदेडिदित्यनुवृत्तौख्यातेरिण् तस्यडित्त्वाट्टिलोपः तत्सन्नियोगेनयलोपः समानस्यच्छन्दस्यमूर्धेतिसभावः उपपदस्योदात्तत्वम् । णिदित्यनुवृत्तौ सख्युरसंबुद्धावितिणिद्वद्भावः वृद्ध्यायादेशौ आद्युदात्तः । ववृमहे वृङ्संभक्तौ छन्दसि लुङ्लङ्लिटइतिवर्तमानेलिट् क्रादित्वादिडभावः निघातः । ऊतये अवरक्षणेइत्यस्य उदात्तइत्यनुवृत्तौ ऊतियूतीत्यादिनाक्तिन्नन्तत्वेननिपातनादन्तोदात्तः । अपां ऊडिदमितिविभक्तेरुदात्तत्वम् । सुभगं आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । सुप्रतूर्तिम् क्त्वादयश्चेति उत्तरपदाद्युदात्तत्वम् ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

कायमानोवनात्वंयन्मातॄरजगन्नपः ।
नतत्तेअग्नेप्रमृषेनिवर्तनंयद्दूरेसन्निहाभवः ॥ २ ॥

कायमानः । वना । त्वम् । यत् । मातॄः । अजगन् । अपः । न ।
तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनम् । यत् । दूरे । सन् । इह ।
अभवः ॥ २ ॥

हेअग्ने वनाकाननानिरक्षितुंकायमानः कामयमानः त्वंयद्यस्मात्कारणात्तानिविहायमातृरपःमातृभूताअपः अजगन्अगमः गतवानसि अप्सुप्रविष्टत्वाच्छान्तोवर्तसे तत्तस्मात्तेतव निवर्तनंनितरां तत्रैववर्तनं तेनचविनाशोलक्ष्यते सविनाशोनप्रमृषे नप्रमृष्यतेनसह्यते । कुतइत्यतआह । यद्यस्मात्कारणाद्दूरेसन्अदृश्यतयावर्तमानस्त्वंइहास्मत्सम्बन्धिष्वरणिरूपेषुकाष्ठेषु अभवः मन्थनात्क्षणमात्रेणास्माकंसमीपेभवसि तस्मात्तवदूरतोवर्तनमस्मभ्यंनरोचते । अस्मिन्नर्थेयास्कः—कायमानश्चायमानःकामयमानइतिवावनानित्वंयन्मातृरपोगमउपशाम्यंनतत्तेअग्नेप्रमृष्यतेनिवर्तनंदूरेयत्सन्निहभवसिजायमानइति[1] ॥ कायमानः कमुकान्तौ कमेर्णिङ् लटःशानच् मकारलोपश्छान्दसः । अजगन् गम्लृगतौइत्यस्यलङिबहुलंछन्दसीतिशपःश्लुः हल्ङ्यादिनासिलोपः मोनोधातोरितिनकारः यच्छब्दयोगादनिघातः अडागमस्वरः । प्रमृषे मृषतितिक्षायाम् व्यत्ययेनकर्मणितप्रत्ययः लोपस्तआत्मनेपदेष्वितितलोपः धातुस्वरः । अभवः छन्दसिलुङ्लङ्लिटइतिलडर्थेलङ् यद्योगादनिघातः ॥ २ ॥

अथतृतीया—

अतितृष्टंववक्षिथाथैवसुमनाअसि ।
प्रप्रान्येयन्तिपर्यन्यआसतेयेषांसख्येअसिश्रितः ॥ ३ ॥

अति । तृष्टम् । ववक्षिथ । अथ । एव । सुऽमनाः । असि ।
प्रऽप्र । अन्ये । यन्ति । परि । अन्ये । आसते । येषाम् । सख्ये ।
असि । श्रितः ॥ ३ ॥

---

[1] नि० ४. १४.।

Funding by IKS-MoE

हेअग्ने तृष्टंस्तोतुस्तृष्णाभिलाषंतदुचितफलप्रदानेनसफलंकर्तुंअतिववक्षिथ अतिशयेनवोढुमिच्छसि। अथैवअथापित्वंसुमनाअसिसंतुष्टमनस्कोवर्तसे किंच त्वंयेषांषोडशानामृत्विजां सख्येमैत्रेश्रितोसिवर्तसे। तेषांमध्येअन्येअध्वर्युप्रभृतयोद्वादशर्त्विजःप्रयन्ति प्रकर्षेणहोतुंगच्छन्ति अन्येउद्गातृप्रभृतयश्चत्वारःपर्यासते परितआसीनावर्तन्ते ॥ ववक्षिथ वहप्रापणेइत्यस्य सनिरूपम् अभ्यासस्यसन्यतइतीत्वाभावश्छान्दसः तदन्ताद्वर्तमानेलिट् थलआर्धधातुकस्येड्वलादेरितीट् कास्प्रत्ययादामित्याम्नभवति मन्त्रत्वात्निघातः।प्रप्र प्रसमुपोदइतिद्विर्वचनम्। यन्ति इण्गतावित्यस्यलटिरूपम् एकान्याभ्यांसमर्थाभ्यामित्यन्यशब्दयोगात्पूर्वस्यनिघाताभावः । आसते आसउपवेशनेउत्तरत्वान्निघातः । असि अस् भुवि तासस्त्योर्लोपइतिसकारलोपः यद्वृत्तयोगान्ननिहन्यते ॥ ३ ॥

अथचतुर्थी–

ई॒यि॒वांस॒मति॒स्रिधः॒शश्व॑ती॒रति॑स॒श्चतः॑ ।
अन्वी॑मविन्दन्निचि॒रासो॑अ॒द्रुहो॒प्सुसिं॒हमि॑वश्रि॒तम् ॥ ४ ॥

ई॒यि॒ऽवांस॑म् । अति॑ । स्रिधः॑ । शश्व॑तीः । अति॑ । स॒श्चतः॑ ।
अनु॑ । ई॒म् । अ॒वि॒न्द॒न् । नि॒ऽचि॒रासः॑ । अ॒द्रुहः॑ । अ॒प्ऽसु ।
सिं॒हम्ऽइ॑व । श्रि॒तम् ॥ ४ ॥

हेअग्ने अद्रुहः अद्रोग्धारःनिचिरासः नितरांचिरासश्चिरन्तनाः विश्वेदेवाःस्रिधः शोषकान्शत्रून्बलेन अतिअतिक्रम्यईयिवांसंगच्छन्तंशश्वतीर्बह्वीः सश्चतःसङ्गतिकारिणीः सेनाश्चाति अतिक्रम्यगच्छन्तंअप्सुश्रितंतिरोहितम् अतएवसिंहमिव गुहाप्रविष्टं सिंहमिवभीमंईमेनंत्वांअन्वविन्दन् अनुगम्यअलभन्त ॥ ईयिवांसम् इण्गतावित्यस्यक्वसौ उपेयिवाननाश्वाननूचानश्चेतिनिपातितः प्रत्ययस्वरः। स्रिधः स्रिधेःक्षयार्थस्य वाक्विप्चेतिक्विप् धातुस्वरः। सश्चतःशोषणार्थस्यषस्जगतौ जकारस्यव्यत्ययेनचकारः लटःशत्रादेशः प्रत्ययस्वरः । अविन्दन् विद्लृलाभेइत्यस्यलङिरूपम्। निचिरासः नितरांचिराः आज्जसेरसुक्इत्यसुक्समासस्वरः। अद्रुहः द्रुहजिघांसायाम्। सम्पदादित्वाद्भावेक्विप् बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। श्रितम् श्रिञ्सेवायामित्यस्यश्र्युकःकितीतीट्प्रतिषेधः प्रत्ययस्वरः ॥ ४ ॥

Funding by IKS-MoE

अथपञ्चमी–

ससृवाँसमिवत्मनाग्निमित्थातिरोहितम् ।
ऐनंनयन्मातरिश्वापरावतोदेवेभ्योमथितंपरि ॥ ५ ॥ ५ ॥

सस्रवांसम्ऽइव । त्मना । अग्निम् । इत्था । तिरःऽहितम् ।
आ । एनम् । नयत् । मातरिश्वा । पराऽवतः । देवेभ्यः ।
मथितम् । परि ॥ ५ ॥ ५ ॥

मातरिश्वावायुः इत्थाइत्थं त्मनास्वेच्छयाअप्सुप्रवेशेन तिरोहितंनिलीनंपरिपरितः मथितंमन्थनेननिष्पादितंएनमग्निंदेवेभ्यः तादर्थ्येचतुर्थी देवार्थं परावतः दूरदेशात्आनयत्आनीतवान् तत्रदृष्टान्तः–ससृवांसमिव यथास्वाच्छन्द्येनससृवांसंसरन्तंगच्छन्तंपुत्रंपिताबलादानयति तद्वत् ॥ ससृवांसमिव सृगतावित्यस्माल्लिट् तस्यक्वसुः इवेनविभक्त्यलोपइत्युक्तत्वात्प्रत्ययस्वरः । त्मना आत्मन्शब्दस्यमन्त्रेष्वाङ्यादेरात्मनइत्याकारलोपः । इत्था थाहेतौचच्छन्दसीतिव्यत्ययेनथाप्रत्ययः प्रत्ययस्वरः । एनम् अन्वादेशेद्वितीयाटौस्स्वेनइत्येनादेशः अनुदात्तश्च । नयत् णीञ्प्रापणेइत्यस्यलङिरूपम् अडभावश्छान्दसः । मातरिश्वा मातर्यन्तरिक्षेश्वसितिश्वन्नुक्षन्नित्यादिनानिपातितः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेपञ्चमोवर्गः ॥ ५ ॥

अथषष्ठी–

तंत्वामर्ताअगृभ्णतदेवेभ्योहव्यवाहन ।
विश्वान्यद्यज्ञाँअभिपासिमानुषतवक्रत्वायविष्ठ्य ॥ ६ ॥

तम् । त्वा । मर्ताः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन ।
विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव ।
क्रत्वा । यविष्ठ्य ॥ ६ ॥

हव्यवाहन हव्यानांवोढः हेअग्ने मर्ताः मनुष्याः अध्वर्युप्रभृतयः तंतादृशमप्सुतिरोहितं त्वात्वांदेवेभ्यः यष्टव्यदेवतार्थं अगृभ्णतअगृह्णत मानुष मनुष्याणांहितकारिन् यविष्ठ्य युवतमहेअग्ने तवक्रत्वाकर्मणामाहात्म्येनविश्वान्सर्वान्अस्माभिः क्रियमाणान् यज्ञान्

यत् यस्मात्कारणात्अभिपासि सर्वतःपालयसि तस्मात्त्वांअगृह्णतेतिपूर्वेणान्वयः ॥ अगृभ्णत ग्रहउपादाने क्र्यादित्वात्श्ना ग्रहिज्यावयीतिसम्प्रसारणम् हृग्रहोर्भश्छन्दसीति हकारस्यभकारः तिङ्ङतिङइतिनिघातः । हव्यवाहन वहप्रापणेइतिधातोःल्युडित्यनुवृत्तौ हव्येनन्तःपादमितिल्युट् उपधावृद्धिः योरनादेशः अपादादित्वादाष्टमिकमनुदात्तत्वम् । विश्वान् विशप्रवेशनेइत्यस्मात् अशिप्रुषिलटिरणिकणिखदिविशिभ्यःक्वन्निति क्वन् किच्वाद्गुणाभावः नित्त्वादाद्युदात्तत्वम् । अभिपासि पारक्षणे अस्यधातोरक्षणार्थत्वान्नपिबादेशः यच्छब्दयोगान्ननिघातः धातुस्वरः । ऋत्वा टा जसादयश्छन्दसिविकल्प्यन्तइतिअत्रनादेशाभावः यणादेशः प्रत्ययस्वरः । यविष्ठ्य युवशब्दादतिशायने तमबिष्ठनौस्थूलदूरयुवेतियणादिपरंलुप्यते पूर्वस्यचगुणः यस्वादित्वात्स्वार्थिकोयप्रत्ययः ॥ ६ ॥

अथसप्तमी—

त॒द्भ॒द्रंतव॑द॒ंसना॒पाका॑यचिच्छदयति ।
त्वां॑यद॑ग्नेप॒शव॑ःस॒मास॑ते॒समि॑द्धमपिशर्व॒रे ॥ ७ ॥

तत् । भ॒द्रम् । तव॑ । द॒ंसना॑ । पाका॑य । चि॒त् । छ॒द॒य॒ति॒ ।
त्वाम् । यत् । अ॒ग्ने॒ । प॒शव॑ः । स॒म्ऽआस॑ते । सम्ऽइ॑द्धम् ।
अ॒पि॒ऽश॒र्व॑रे ॥ ७ ॥

हेअग्ने तवसम्बन्धितदिदंभद्रंशोभनंदंसनाअग्निहोत्रादिकंकर्मपाकायचित् चिच्छब्दोप्यर्थे पाकायेतिकर्मणिचतुर्थी पाकोर्भकः तद्वदज्ञमपियजमानं छदयति स्वफलप्रदानेनपूजयति पशुपुत्रादिभिःपरिवृतंकरोतीत्यर्थः छदयतिशब्दोर्चतिकर्मा छन्दयतिछदयतीतितन्नामसुपाठात् यद्वा पाकशब्दःप्रशस्यंवक्ति पाकः वामइतिप्रशस्यनामसुपठितत्वात् तद्भद्रंकर्मप्रशस्यं यजमानं अभिमतफलप्रदानेनपूजयतीत्यर्थः यद्यस्मात्कारणात् अपिशर्वरेशर्वरीमुखेअग्निविहरणकालेएवसमिद्धंदीप्यमानं त्वांपशवोद्विपदाश्चतुष्पदाश्चोभयेपशवः समासतेपर्युपासतइत्यर्थः तदिदंपश्वादिलक्षणं फलंयजमानायप्रयच्छतीत्यर्थः ॥ भद्रं भदिकल्याणेइत्यस्माद्धातोरुपरिरक्प्रत्ययेननिपातनादन्तोदात्तत्वम् । पाकाय पारक्षणेइत्यस्मादिणूभीकापाशल्येत्यादिनाकन् पायतेरक्ष्यतेराजादिनेतिपाकः नित्त्वादाद्युदात्तः । छदयति छदअपवारणे स्वार्थेणिच् अदन्तत्वाद्वृद्ध्यभावः निघातः । समासते आसउपवेशने अदादित्वाच्छपोलुक् । अनकारान्तत्वात् झस्यादादेशः यद्योगादनिघातः तिङिचोदात्तवतीतिगतेर्निघातः धातुस्वरः ॥ ७ ॥

अथाष्टमी–

आजुहोतास्वध्वरंशीरंपावकशोचिषम् ।
आशुंदूतमजिरंप्रत्नमीड्यंश्रुष्टीदेवंसपर्यत ॥ ८ ॥

आ । जुहोत । सुऽअध्वरम् । शीरम् । पावकऽशोचिषम् ।
आशुम् । दूतम् । अजिरम् । प्रत्नम् । ईड्यम् । श्रुष्टी ।
देवम् । सपर्यत ॥ ८ ॥

ऋत्विजोयजमानःप्रेरयति हेऋत्विजः पावकशोचिषम् शोधकदीप्तिम् शीरम् काष्ठेष्वोषधीषुचानुशायिनं स्वध्वरं शोभनयज्ञोपेतमिममग्निमाजुहोत आहुतिभिरासमन्तात्तर्पयत अपिच आशुम् कर्मणिव्याप्तंदूतं आह्वानकारित्वेन देवानां दूतं अजिरंक्षिप्रंगन्तारं प्रत्नंपुरातनं ईड्यं स्तोतव्यं देवंद्योतमानमिममग्निंश्रुष्टी सपर्यत श्रुष्टीतिक्षिप्रनामेतियास्कः । क्षिप्रंपूजयत ॥ जुहोत हुदानादनयोः अस्माद्धातोर्लोट् जुहोत्यादिभ्यःश्लुरितिशपःश्लुः श्लावितिद्विर्वचनं लोटोलङ्वदितिलङ्वद्भावेतस्थस्थमिपामितितस्यतादेशः छन्दसीत्यनुवृत्तौ तस्यतप्तनप्तनथनाश्चेतितबादेशः पित्त्वाद्गुणः निघातः । स्वध्वरम् बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । शीरम् शीङ् स्वप्ने अस्माद्धातोः स्फायितञ्चिवञ्चीत्यादिनारक्प्रत्ययः कित्त्वाद्गुणाभावः प्रत्ययस्वरः पावकशोचिषमित्यत्रपवनं पावःशुद्धिः तंकाययतीतिपावकः आतोनुपसर्गेकः प्रत्ययस्वरः बहुव्रीहौप्रकृत्यापूर्वपदमितिपूर्वपदप्रकृतिस्वरत्वम् । आशुम् अशूव्याप्तौ अस्माद्धातोःकृवापाजिमीत्यादिनाउण् उपधावृद्धिः प्रत्ययस्वरः । अजिरम् अजगतिक्षेपणयोरित्यस्माद्धातोरजिरशिशिरशिथिलेतिकिरच् प्रत्ययान्तत्वेन निपातनादन्तोदात्तत्वम् । प्रत्नम् प्रगस्यच्छन्दसिगलोपश्चेतिगलोपः चकारात्त्नप्रत्ययः प्रत्ययस्वरः । ईड्यम् ईडस्तुतावस्माण्ण्यत् ईडवन्देत्यादिनाद्युदात्तत्वम् । सपर्यत सपरशब्दात् कंड्वादिभ्योयक्पूजायांवर्तते लोण्मध्यमपुरुषबहुवचनम् शप् अतोगुणेइति पूर्वरूपत्वं निघातः ॥ ८ ॥

अथनवमी–

त्रीणिंशतात्रीसहस्राण्यग्निंत्रिंशच्चदेवानवचासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माआदिद्धोतारन्यसादयन्त ॥ १॥ ६ ॥

त्रीणि॑ । श॒ता । त्री । स॒हस्रा॑णि । अ॒ग्निम् । त्रिं॒शत् । च॒ । दे॒वाः ।
नव॑ । च॒ । अ॒स॒प॒र्य॒न् । औक्ष॑न् । घृ॒तैः । अस्तृ॑णन् । ब॒र्हिः । अ॒स्मै॒ ।
आत् । इत् । होता॑रम् । नि । अ॒सा॒द॒य॒न्त॒ ॥ ९ ॥ ६ ॥

त्रीणिशता त्रीणिशतानि त्रीसहस्राणि त्रीणिसहस्राणित्रिंशच्चनवचएकोनचत्वारिंशदधिकशतत्रयोपेतत्रिसहस्रसङ्ख्याकादेवाः इममग्निमसपर्यन् अपूजयन् किंच तेदेवाः घृतैरिममग्निंऔक्षन्असिञ्चन् तथा अस्मैअग्नयेतदर्थंबर्हिरस्तृणन् बर्हिषाआस्तरणं वेद्याच्छादनमकुर्वन् आदित् अनन्तरमेवतेदेवास्तस्मिन्बर्हिषिएनमग्निंहोतारं कृत्वान्यसादयन्त उपावेशयन् देवैः पूज्यमिममग्निंसपर्यतेतिपूर्वेणान्वयः देवसंख्याचबृहदारण्यकेभिहिता—महिमानमेवैषां एतेत्रयस्त्रिंशत्त्वेवदेवाइति कतमेतेत्रयस्त्रिंशदष्टौवसवएकादशरुद्राद्वादशादित्यास्तएकत्रिंशदिन्द्रश्चैवप्रजापतिश्चत्रयस्त्रिंशदिति॥शता दशानांदशतां शभावस्तश्चप्रत्ययःदशदशतः परिमाणमेषां शतानि सुपांसुलुगित्यादिनासुपोडादेशः प्रत्ययस्वरः। त्री सुपांसुलुगितिपूर्वसवर्णदीर्घःफिट्स्वरः। सहस्राणि कर्दमादित्वान्मध्योदात्तः। त्रिंशत् त्रयाणां दशतानांत्रिन्भावःशच्चप्रत्ययः त्रयोदशतः परिमाणमस्यतत्रिंशत् प्रत्ययस्वरः। नव कनिन्नित्यनुवृत्तौ णुस्तुतावित्यस्माद्धातोर्नुदंशोर्णुदश्चेति कनिन्गुणश्च नित्त्वादाद्युदात्तः। असपर्यन् लङिरूपं निघातः। औक्षन् उक्षसेचने लङिआडजादीनामित्याडागमः वृद्धिः पादादित्वान्ननिहन्यते आगमस्वरः। अस्तृणन् स्तृञ्आच्छादने लङ् बहुवचने क्र्यादित्वात्श्ना झेरन्तादेशः नित्यंङितइतीकारलोपः संयोगान्तलोपः श्नाभ्यस्तयोरातइत्याकारलोपः लुङ्लङ्लृङ्क्ष्वित्यडागमः सचोदात्तः आगमस्वरः अभिन्नवाक्यत्वान्निघाताभावः वाक्येत्यनुवृत्तौचादित्वान्निघाताभावः। बर्हिः इसिरित्यनुवृत्तौबृंहेर्नलोपश्चेतोसिः तत्संनियोगेननलोपः प्रत्ययस्वरः । असादयन्त षद्लृविशरणगत्यवसादनेषु अस्माद्धेतुमतिचेतिणिच् उपधावृद्धिःणिचश्चेत्यात्मनेपदम् लङिबहुवचनेरूपं निघातः ॥ ९ ॥

॥ इतितृतीयस्यप्रथमेषष्ठोवर्गः ॥ ६ ॥

त्वामग्नइतिनवर्चंदशमंसूक्तं वैश्वामित्रमौष्णिहमाग्नेयम् त्वामग्नऔष्णिहमित्यनुक्रान्तत्वात् प्रातरनुवाकाश्विनशस्त्रयोरौष्णिहेछन्दसिअस्यसूक्तस्यविनियोगः अथैतस्याइतिखण्डेसूत्रितम्—पुरुत्वात्वामग्नइति।

तस्मिन्सूक्तेप्रथमा—

त्वाम॑ग्नेमनी॒षिणः॑स॒म्राजं॑चर्षणी॒नाम्।दे॒वंमर्ता॑सइन्धते॒सम॑ध्व॒रे॥१॥

त्वाम् । अ॒ग्ने । म॒नी॒षिणः॑ । स॒म्ऽराज॑म् । च॒र्ष॒णी॒नाम् ।
दे॒वम् । मर्ता॑सः । इ॒न्ध॒ते॒ । सम् । अ॒ध्व॒रे ॥ १ ॥

हेअग्ने मनीषिणोधीमन्तोध्वर्युप्रभृतयोमर्तासोमनुष्याः चर्षणीनां प्रजानां सम्राजमधिपतिं देवंद्योतमानं त्वांअध्वरे यज्ञेसमिन्धतेसोमाज्यपयःप्रभृतिभिराहुतिभिः सम्यग्दीपयन्ति ॥ मनीषिणः मनीषाएषामस्तीतिव्रीह्यादिभ्यश्चेतिइनिः यस्येतिचेत्यवर्णलोपः प्रत्ययस्वरः । सम्राजं राजृदीप्तौ संपूर्वादस्माद्धातोः सत्सूद्विषेतिक्विप् क्विलोपः समोमकारस्यमोनुस्वारइत्यनुस्वारे प्राप्तेमोराजिसमःक्वावितिसमोमकारः कृदुत्तरपदप्रकृतिस्वरत्वम् । चर्षणीनाम् नामन्यतरस्यामितिविभक्तेरुदात्तत्वम् । इन्धते ञिइन्धीदीप्तौ अस्माद्धातोर्हेतुमतिचेतिणिच् लटिझस्यआत्मनेपदेष्वनतः इत्यदादेशः छन्दस्युभयथेतिझस्यार्धधातुकत्वाण्णेरनिटीतिणिलोपः निघातः ॥ १ ॥

अथद्वितीया—

त्वांय॒ज्ञेष्वृ॒त्विज॒मग्ने॒होता॑रमीळते।गो॒पाऋ॒तस्य॑दीदिहि॒स्वेदमे॑ ॥२॥

त्वाम् । य॒ज्ञेषु॑ । ऋ॒त्विज॑म् । अग्ने॑ । होता॑रम् । ई॒ळ॒ते॒ ।
गो॒पाः । ऋ॒तस्य॑ । दी॒दि॒हि॒ । स्वे । दमे॑ ॥ २ ॥

हेअग्ने अध्वर्य्वादयःयज्ञेष्वग्निष्टोमादिषुत्वांहोतारमृत्विजंहोतृनामकमृत्विजंईळतेस्तुवन्ति तादृशस्त्वंऋतस्यसत्यस्ययज्ञस्यवागोपाः गोपायितासन्स्वेदमेस्वकीयेगृहेयज्ञशालायां दीदिहिदीप्यस्व । दीदिहि दिवुक्रीडादौ यङ्लुक् लोट् तुजादित्वादभ्यासस्यदीर्घत्वम् संज्ञापूर्वकोविधिरनित्यइत्यभ्यासस्यगुणाभावेलोपोव्योर्वलीतिवलोपः ॥ २ ॥

अथतृतीया—

सघा॒यस्ते॒ददा॑शतिस॒मिधा॑जा॒तवे॑दसे । सोअ॑ग्नेधत्तेसु॒वीर्यं॒सपु॑ष्यति॥३॥

सः । घ॒ । यः । ते॒ । ददा॑शति । स॒म्ऽइधा॑ । जा॒तऽवे॑दसे ।
सः । अ॒ग्ने॒ । ध॒त्ते॒ । सु॒ऽवीर्य॑म् । सः । पु॒ष्य॒ति॒ ॥ ३ ॥

हेअग्ने योयजमानः जातवेदसेजातप्रज्ञायतेतुभ्यंसमिधासमिन्धनकारीणिआज्यपुरोडाशादिहवींषिददाशतिददाति सघसखलुसुवीर्यंशोभनसामर्थ्योपेतंपुत्रंधत्तेधारयति अपिच सःस-

Funding by IKS-MoE

एवपुष्यतिपशुपुत्रादिभिःसमृद्धोभवति घ चादयोनुदात्ताइत्यनुदात्तः । ददाशति दाश्टदानेइत्यस्माद्धातोः कर्तरिशप् तिप् द्विर्वचनंछान्दसम् यद्वृत्तयोगादनिघातः अभ्यस्तानामादिरित्याद्युदात्तः । समिधा ञिइन्धीदीप्तौ अस्मात्क्विप्चेतिक्विप् उपधालोपः सुपांसुलुगिति शसोडादेशः कृदुत्तरपदप्रकृतिस्वरत्वम् । जातवेदसे बहुव्रीहौप्रकृत्यापूर्वपदमितिप्रकृतिस्वरत्वम् । सुवीर्यम् वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । पुष्यति पुषपुष्टौ अस्मात्श्यन् ङित्त्वाद्गुणाभावः निघातः ॥ ३ ॥

अथचतुर्थी–

सके॒तुर॑ध्व॒राणा॑म॒ग्निर्दे॒वेभि॒राग॑मत् । अ॒ञ्जा॒नःस॒प्तहोतृ॑भिर्ह॒विष्म॑ते॥४॥

सः । के॒तुः । अ॒ध्व॒राणा॑म् । अ॒ग्निः । दे॒वेभिः॑ । आ । ग॒म॒त् ।
अ॒ञ्जा॒नः । स॒प्त । होतृ॑ऽभिः । ह॒विष्म॑ते ॥ ४ ॥

अध्वराणांयज्ञानांकेतुःप्रज्ञापकः सोग्निः सप्तसप्तभिर्होतृभिर्वषट्कर्तृभिः अंजानः सोमाज्याहुतिभिरज्यमानःसन्हविष्मतेयजमानार्थंदेवेभिर्यष्टव्यः देवैःसहआगमत्आगच्छतु । गमत् लोडर्थेछन्दसिलुङ्लङ्लिटइतिलुङ् लृदित्वादङ् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः निघातः । अञ्जानः अञ्जूव्यक्तिगतिम्रक्षणेषु व्यत्ययेनकर्मणिशानच् चित्त्वादन्तोदात्तत्वम् । हविष्मते जुहोतेरर्चिशुचीत्यादिनाइसिप्रत्ययान्तोहविःशब्दोन्तोदात्तः स्वरविधौव्यञ्जनमविद्यमानवदितिपरिभाषानाश्रयणान्मतुपउदात्तत्वाभावः इसिप्रत्ययस्वरः ॥ ४ ॥

अथपञ्चमी–

प्रहोत्रे॑पू॒र्व्यंवचो॒ग्नये॑भरताबृ॒हत्।वि॒पांज्योतीं॑षि॒बिभ्र॑ते॒नवे॒धसे॑ ॥५॥७॥

प्र । होत्रे॑ । पू॒र्व्यम् । वचः॑ । अ॒ग्नये॑ । भ॒र॒त॒ । बृ॒हत् ।
वि॒पाम् । ज्योतीं॑षि । बिभ्र॑ते । न । वे॒धसे॑ ॥ ५ ॥ ७ ॥

यजमानोहोत्रादीन्प्रतिब्रूते हेहोत्रादयः विपांविप्राणांमेधाविनामध्वर्य्वादीनां ज्योतींषि सत्कर्मानुष्ठानसंपाद्यानितेजांसिबिभ्रतेनिमित्ततयाकुर्वाणायवेधसेजगतोविधात्रे होत्रेदेवानामाह्वात्रे अग्नये बृहन्महत् पूर्व्यं पूर्वैःकृतंपुरातनंवचः स्तोत्रशस्त्रादिकंवाक्यंप्रभरत प्रकर्षेण संपादयत नेत्ययंपादपूरणः अन्वयाभावात् यद्वा वेधसेन यथावेधाः जगद्विधातापरमेश्वरः आ-

दित्यादीनिज्योतींषिकरोति तद्वदिति ॥ प्रशब्दस्य छन्दसि व्यवहिताश्चेति भरतेत्यनेनसंबन्धः। पूर्व्यं पूर्वैःकृतमित्यर्थे पूर्वैःकृतमिनयौचेतियप्रत्ययः भसंज्ञकत्वादवर्णलोपः प्रत्ययस्वरः । भरत भृञ्भरणे भौवादिकः निघातः। बृहत् वर्तमानेपृषद्बृहदितिनिपातनादन्तोदात्तः । बिभ्रते भृञ्भरणे जुहोत्यादिभ्यःश्लुः भृञामिदित्यभ्यासस्यइत्वे अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥५॥

॥ इतितृतीयस्यप्रथमेसप्तमोवर्गः ॥ ७ ॥

अथषष्ठी–

अ॒ग्निंव॑र्धन्तुनो॒गिरो॒यतो॒जाय॑तउ॒क्थ्यः॑ ।
म॒हेवाजा॑य॒द्रवि॑णायदर्श॒तः ॥ ६ ॥

अ॒ग्निम् । व॒र्ध॒न्तु । नः॒ । गिरः॑ । यतः॑ । जाय॑ते । उ॒क्थ्यः॑ ।
म॒हे । वाजा॑य । द्रवि॑णाय । द॒र्श॒तः ॥ ६ ॥

योयमग्निः यतःयाभिःस्तुतिरूपाभिर्गीर्भिः उक्थ्योजायते उक्थ्यशब्दःप्रशस्यवाची अनभिशस्त्यः उक्थ्यइतितन्नामसुपाठात् अतिशयेनस्तुत्योभवतीत्यर्थः यश्चायमग्निः महेमहते वाजायान्नायद्रविणाय धनायचदर्शतः दर्शनीयोभवति तमिममग्निंनोगिरः अस्माकंस्तुतिरूपास्तावाचः वर्धन्तुवर्धयन्तु पूजयन्त्वित्यर्थः॥ वर्धन्तु वृधुवर्धने अस्माण्णिच् लघूपधगुणः छन्दस्युभयथेतिझेरार्धधातुकत्वाण्णिलोपः झेरन्तादेशःएरुरित्युकारः निघातः । उक्थ्यः वचपरिभाषणे अस्मात्पातॄतुदिवचिरिचीत्यादिनाथक् किर्त्वाद्वचिस्वपीत्यादिनासम्प्रसारणं । उक्थं शस्त्रंतेनस्तुत्यत्वेनतत्रभवउक्थ्यः भवेछन्दसीतियत् यस्येतिलोपः तित्स्वरितमितिस्वरितः। दर्शतः भृमृदृशियजीतिअतच्प्रत्ययःचित्त्वादन्तोदात्तः ॥ ६ ॥

अथसप्तमी–

अ॒ग्ने॒यजि॑ष्ठोअध्व॒रेदे॒वान्दे॑वय॒तेय॑ज ।
होता॑म॒न्द्रोविरा॑ज॒स्यति॒स्रिधः॑ ॥ ७ ॥

अग्ने॑ । यजि॑ष्ठः । अ॒ध्व॒रे । दे॒वान् । दे॒व॒ऽय॒ते । य॒ज॒ ।
होता॑ । म॒न्द्रः । वि । रा॒ज॒सि॒ । अति॑ । स्रिधः॑ ॥ ७ ॥

Funding by IKS-MoE

हेअग्ने यजिष्ठःयष्टृतमस्त्वं अध्वरेयज्ञेदेवयते देवानात्मनइच्छते यजमानायदेवान्यज तदर्थंयष्टव्यानग्न्यादीन्देवान्पूजय । किञ्च होतादेवानामाह्वातामन्द्रः यजमानस्यमादयितासत्वं स्निधःक्षपयितॄन्शत्रूनतिअतिक्रम्यविराजसि विशेषेणशोभसे ॥ यजिष्ठः तुश्छन्दसीतिइष्ठन् । तुरिष्ठेमेयःस्वितितृचोलोपः नित्त्वादाद्युदात्तः। देवयते क्यच् चित्त्वादन्तोदात्तत्वम् शपःपित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेणतयोःक्यचासहैकादेशे एकादेशउदात्तेनोदात्तइतिअन्तोदात्तोदेवयत्शब्दः ततः शतुरनुमइतिविभक्तेरुदात्तत्वम । यज यजदेवपूजासङ्गतिकरणदानेषु अस्माल्लोट्सिप् शप् सिपोहिरादेशः। अतोहेरितिहेर्लुक् निघातः। राजसि राजृदीप्तौ निघातः ॥ ७॥

अथाष्टमी—

सन॑ःपावकदीदिहिद्यु॒मद॒स्मेसु॒वीर्य॑म् ।
भवा॑ंस्तो॒तृभ्यो॒अन्त॑मःस्व॒स्तये॑ ॥ ८ ॥

सः । न॒ः । पा॒व॒क॒ । दी॒दि॒हि॒ । द्यु॒ऽमत् । अ॒स्मे इति॑ । सु॒ऽवीर्य॑म् ।
भव॑ । स्तो॒तृऽभ्य॑ः । अन्त॑मः । स्व॒स्तये॑ ॥ ८ ॥

नः पावकअस्मत्सम्बन्धिनःपापस्यशोधक हेअग्ने सपूर्वमन्त्रेप्रतिपादितस्त्वंद्युमत्कान्तियुक्तंसुवीर्यंशोभनसामर्थ्योपेतदानभोगार्हंधनंअस्मेअस्मभ्यंदीदिहिदेहि यद्वा द्युमत्तेजोयुक्तं सुवीर्यंशोभनवीर्योपेतंचयथाभवतितथाअस्मेअस्मदर्थंत्वंदीदिहिदीप्यस्व किञ्च स्तोतृभ्यः षष्ठ्यर्थेचतुर्थी त्वद्विषयस्तुतिकारिणांहोत्रादीनांस्वस्तयेअविनाशायक्षेमाय अन्तमः अन्तिकतमः तेषामतिशयेनसमीपवर्तीभव ॥ पावक पूञ्पवने अस्माद्धातोर्ण्वुच् णित्त्वाद्वृद्धिः वोरकादेशः आवादेशः आमंत्रितत्वादाष्टमिकमनुदात्तत्वम् । दीदिहि दिवुक्रीडादौअस्माद्यङ् तुजादीनामित्यभ्यासस्यदीर्घत्वम् संज्ञापूर्वकोविधिरनित्यइतिअभ्यासस्यगुणाभावः बहुलंछन्दसीतियङोलुक् लोटिसिप्चर्करीतंपरस्मैपदमदादिवच्चेतिवचनाच्छपोलुक् सिपोहिरादेशः लोपोव्योर्वलीतिवलोपः हेरपित्त्वाद्गुणाभावः निघातः । द्युमत्दिवउदित्युकारः ह्रस्वनुड्भ्यामितिमतुपउदात्तत्वम् । सुवीर्यम् वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । अन्तमः अन्तोस्यास्तीत्यन्तिकः अतइनिठनाविति ठन् अतिशयेनान्तिकइत्यतिशायनेतमबिष्ठनौतितमप् तमेतादेश्चेतितादिलोपः नित्त्वादाद्युदात्तः स्वस्तये प्रातिपदिकस्वरः ॥ ८ ॥

Funding by IKS-MoE

BVBSSMV

अथनवमी—

तं॑त्वा॒विप्रा॑विप॒न्यवो॑जागृ॒वांस॒ःसमि॑न्धते ।
ह॒व्य॒वाह॒मम॑र्त्यँ॑सहो॒वृधं॑म् ॥ ९ ॥ ८ ॥

तम् । त्वा॒ । विप्राः॑ । वि॒प॒न्यवः॑ । जा॒गृ॒ऽवांसः॑ । सम् । इ॒न्ध॒ते॒ ।
ह॒व्य॒ऽवाह॑म् । अम॑र्त्यम् । स॒ह॒ःऽवृध॑म् ॥ ९ ॥ ८ ॥

हेअग्ने विप्राःस्तुतीनां प्रेरकाः जागृवांसः अग्निहोत्रादिकर्मणिअप्रमत्ततयाप्रबुद्धाः विपन्यवः विपन्युशब्दोमेधाविनमाचष्टे । विपश्चित् विपन्युरितितन्नामसुपाठात् । विपन्यवोमेधाविनःस्तोतारः हव्यवाहंहव्यानांवोढारं अमर्त्यंमरणधर्मरहितं सहोवृधं सहसामथनरूपेणबलेनवर्धमानंतादृशंत्वात्वांसमिन्धते सोमाज्याद्याहुतिभिःसम्यग्दीपयन्ति ॥ विप्राः टुवपूबीजसन्ताने अस्माद्धातोः ऋज्रेन्द्राग्रवज्रविप्रेतिरन्प्रत्ययान्तत्वेननिपातनादाद्युदात्तत्वम् । विपन्यवः विविधंपननंपननंस्तुतिंयातीतिविपन्युः मृगय्वादयश्चेतिकुः अकारलोपश्छान्दसः प्रत्ययस्वरः । जागृवांसः जागृनिद्राक्षये अस्माल्लिट् तस्यक्वसुः उगिदचामितिनुम् द्विर्वचनाभावश्छान्दसः वस्वेकाजाद्घसामितिनियमादिडभावः जाग्रोविचिण्णल्ङित्स्वितिगुणोनभवति तत्र विरित्यत्रक्वसोरपिगृहीतत्वात् प्रत्ययस्वरः । इन्धते ञिइन्धीदीप्तौ अन्तर्भावितण्यर्थोयं निघातः। हव्यवाहं वहप्रापणे वहश्चेतिण्विः उपधावृद्धिः कृदुत्तरपदप्रकृतिस्वरत्वम् । सहोवृधम् वृधुवर्धने क्विप्चेतिक्विप् ॥ ९ ॥

॥ इतितृतीयस्यप्रथमेष्टमोवर्गः ॥ ८ ॥

अग्निर्होतेतिनवर्चमेकादशंसूक्तंवैश्वामित्रंगायत्रं आग्नेयम् । अग्निर्होतागायत्रमित्यनुक्रान्तत्वात् प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रेछन्दसीदंसूक्तम् सूत्रितंहि—अग्निर्होताग्नइळेतिचतस्रइति । आधानेप्रथमायांपवमानेष्टौ स्विष्टकृतोयाज्याअग्निर्होतेत्येषा सहव्यवाळमर्त्यइति पुरोनुवाक्या द्वितीयपवमानेष्टौ स्विष्टकृतोनुवाक्यासाह्वानिति सूत्रितंच साह्वान्विश्वाअभियुजोऽग्निमीळेपुरोहितमितिसंयाज्येइति आभिप्लविकेषूक्थ्येषुतृतीयसवनेमैत्रावरुणशस्त्रे अभिप्रयांसीतिवैकल्पिकोनुरूपस्तृचः । अत्रसूत्रम्—प्रवोवाजाअभिद्यवोभिप्रयांसिवाहसेति ।

Funding by IKS-MoE

तस्मिन्सूक्तेप्रथमा—

अ॒ग्निर्होता॑पु॒रोहि॑तोध्व॒रस्य॒विच॑र्षणिः । सवे॑दय॒ज्ञमा॑नु॒षक् ॥ १ ॥

अ॒ग्निः । होता॑ । पु॒रःऽहि॑तः । अ॒ध्व॒रस्य॑ । विऽच॑र्षणिः ।

सः । वे॒द॒ । य॒ज्ञम् । आ॒नु॒षक् ॥ १ ॥

विश्वामित्रःस्तौति—होतादेवानामाह्वातापुरोहितः पुरतएवाभिमतफलसम्पादकत्वेनहितकारीयद्वा पुरःपूर्वभागेआहवनीयादिरूपेणहितोनिहितइतिपुरोहितः अध्वरस्ययज्ञस्यविचर्षणिः विशेषणद्रष्टा विचर्षणिः विश्वचर्षणिरितितन्नामसुपाठात् सतथाविधोग्निः आनुषक्आनुपूर्व्येणसक्तंयज्ञमग्निष्टोमादिकंवेदजानाति । वेद विदज्ञाने विदोलटोवेतितिपोणलादेशः लघूपधगुणः निघातः । आनुषक् आसमन्तादनुषजतीत्यानुषक् षंजसङ्गे धातुषकारस्यसकारः क्विप्चेतिक्विप् अनिदितामित्युपधालोपः उपसर्गात्सुनोतीतिषत्वम् ॥ १ ॥

अथद्वितीया—

सह॑व्य॒वाळम॑र्त्यउ॒शिग्दू॒तश्चनो॑हितः । अ॒ग्निर्धि॒यासमृ॑ण्वति ॥ २ ॥

सः । ह॒व्य॒ऽवाट् । अम॑र्त्यः । उ॒शिक् । दू॒तः । चनः॑ऽहितः ।

अ॒ग्निः । धि॒या । सम् । ऋ॒ण्व॒ति॒ ॥ २ ॥

हव्यवाट् हविषांवोढाअमर्त्यः मरणधर्मरहितःउशिक्हविःकामयमानः दूतोदेवानांदूतः चनसेहविर्लक्षणान्नायहितोनिहितः यद्वा चनोहितः चनःअन्नंहविर्लक्षणंहितमस्येतिचनोहितः सतथाविधोग्निः धियाप्रज्ञयासमृण्वतिसङ्गच्छते कर्मविषयप्रज्ञान्वितोग्निरस्मानपिताद्दक्प्रज्ञान्वितान्करोत्वित्याशास्ते ॥ हव्यावाट् वहप्रापणे वहश्चेतिण्विः ढत्वजश्त्वचर्त्वानि कृदुत्तरपदप्रकृतिस्वरत्वम् । उशिक् वशकान्तौ । इजिरित्यनुवृत्तौ वशेःकिच्चेतिइजिप्रत्ययः तस्यकित्त्वाद्ग्रहिज्येतिसंप्रसारणम् प्रत्ययस्वरः । चनोहितः चनःशब्दः चायतेरन्नेह्रस्वश्चेत्यसुन्नन्तः चकारान्नुडागमः तस्मिन्यलोपः नित्त्वादाद्युदात्तः पुनश्चनसोश्छन्दसिगतिसंज्ञावक्तव्येतिगतिसंज्ञायांगतिरनन्तरइतिप्रकृतिस्वरत्वम् बहुव्रीहौतुपूर्वपदप्रकृतिस्वरत्वम् । धिया सावेकाचइतिविभक्तेरुदात्तत्वम् । ऋण्वति ऋणुगतौ लेटि तनादित्वादुप्रत्ययः लेटोडाटावित्यडागमः ॥ २ ॥

Funding by IKS-MoE

अथतृतीया–

अ॒ग्निर्धि॒यासचे॑तति के॒तुर्य॒ज्ञस्य॑पू॒र्व्यः । अर्थं॒ह्य॑स्यत॒रणि॑ ॥ ३ ॥

अ॒ग्निः । धि॒या । सः । चे॒त॒ति॒ । के॒तुः । य॒ज्ञस्य॑ । पू॒र्व्यः ।
अ॒र्थम्॑ । हि॒ । अ॒स्य॒ । त॒रणि॑ ॥ ३ ॥

यज्ञस्याग्निष्टोमादेःकेतुः प्रज्ञापकःपूर्व्यः पूर्वेभवःचिरन्तनः सतथाविधोग्निःधियाप्रज्ञया चेततिसर्वंजानीते अस्यैतादृशस्याग्नेरर्थंगमनस्वभावंतेजः अस्यआकाशेदृश्यमानस्यतमसः तरणिर्हि तारकंखलु निवर्तकमितियावत् ॥ चेतति चितीसंज्ञाने निघातः । अर्थं ऋगतौ उषिकुषिगार्तिभ्यस्थन्इतिथन् गुणः नित्त्वादाद्युदात्तः । तरणि तॄप्लवनतरणयोः अर्तिसृधृधमीत्यादिनानिप्रत्ययः गुणः प्रत्ययस्वरः ॥ ३ ॥

अथचतुर्थी–

अ॒ग्निंसू॒नुंसनं॑श्रु॒तंसहं॑सोजा॒तवे॑दसम् । वह्निं॑दे॒वाअ॑कृण्वत ॥ ४ ॥

अ॒ग्निम् । सू॒नुम् । सनं॑ऽश्रुतम् । सहं॑सः । जा॒तऽवे॑दसम् ।
वह्नि॑म् । दे॒वाः । अ॒कृ॒ण्व॒त ॥ ४ ॥

सहसःसूनुंबलस्यपुत्रंमथनरूपेणबलेननिष्पाद्यमानत्वात्सनश्रुतंसनातनत्वेनप्रसिद्धम् जातवेदसंजातप्रज्ञंतमिममग्निंदेवाः हविर्भुजोदेवाः वह्निंहविषांवोढारंअकृण्वताकुर्वत ॥ सनश्रुतम् श्रुश्रवणे कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । वह्निं वहप्रापणे निरित्यनुवृत्तौ वहिश्रीत्यादिनानिप्रत्ययः । अकृण्वत कृविहिंसाकरणयोः इदित्त्वान्नुम् धिन्विकृण्व्योरचेत्युप्रत्ययः अकारश्चान्तादेशः लङिव्यत्ययेनात्मनेपदं निघातः ॥ ४ ॥

अथपञ्चमी–

अदा॑भ्यःपुरए॒तावि॒शाम॒ग्निर्मानु॑षीणाम् ।
तूर्णी॒रथ॒ःसदा॒नवः॑ ॥ ५ ॥ १ ॥

Funding by IKS-MoE

अदा॑भ्यः । पु॒रः॒ऽए॒ता । वि॒शाम् । अ॒ग्निः । मानु॑षीणाम् ।
तूर्णिः॑ । रथः॑ । सदा॑ । नवः॑ ॥ ५ ॥ ९ ॥

मानुषीणांमनोर्जातानांविशांप्रजानांपुरएतासन्मार्गप्रदर्शनेनाग्रतोगन्ताअतएवतूर्णिः ताः प्रजाः वैदिककर्मप्रवर्तकत्वेनानुग्रहीतुंत्वरायुक्तः आलस्यरहितः रथः हविषांवहनाद्रथसदृशः सदासर्वदातत्कर्मणिनवोनूतनः पुनर्मथनादभिनवःएवंविधोग्निः अदाभ्यःअहिंस्यः नकेनापितिरस्कार्यइत्यर्थः॥ अदाभ्यः दम्भुदम्भने दभश्चेतिवक्तव्यमितिकर्मणिण्यत् उपधावृद्धिः । अदाभ्यः नञासमासेतत्पुरुषेतुल्यार्थेत्तिपूर्वपदप्रकृतिस्वरत्वम् । पुरएता इण्गतौ ण्वुल्तृचाविवितितृच् गुणः चित्त्वादन्तोदात्तः । मानुषीणां मनोर्जातावञ्यतौषुक्चेतिअञ् टिड्ढाणञितिङीप् ञित्त्वादाद्युदात्तः तूर्णिः ञित्वरासंभ्रमेइतिधातोर्निरित्यनुवृत्तौवहिश्रियुद्रुग्लाहात्वरिभ्योनिदितिनिप्रत्ययः ज्वरत्वरेत्यादिनाऊठ् तस्यनित्त्वादाद्युदात्तः संहितायां ढ्रलोपेपूर्वस्येतिदीर्घः । रथः हनिकुषिनीरमिकाशिभ्यइतिक्थन्प्रत्ययः कित्त्वादनुदात्तोपदेशेत्यादिनानुनासिकलोपः नित्त्वादाद्युदात्तः सदा स्वरादिषुआद्युदात्तत्वेनपठितत्वादाद्युदात्तः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेनवमोवर्गः ॥ ९ ॥

अथषष्ठी–

सा॒ह्वान्विश्वा॑अ॒भि॒यु॒जः॒क्रतु॑र्दे॒वाना॒ममृ॑क्तः ।
अ॒ग्निस्तु॒विश्र॑वस्तमः ॥ ६ ॥

स॒ह्वान् । विश्वाः॑ । अ॒भि॒ऽयुजः॑ । क्रतुः॑ । दे॒वाना॑म् । अमृ॑क्तः ।
अ॒ग्निः । तु॒विश्र॑वःऽतमः ॥ ६ ॥

अभियुजःअभियोक्त्रीः विश्वाःसर्वाःसेनाःसाह्वान्सहमानः स्वबलेनतिरस्कुर्वाणः अमृक्तः शत्रुभिरहिंसितः देवानांक्रतुःकर्ताहविःप्रदानेनपोषकःएवंभूतोग्निः तुविश्रवस्तमःतुविशब्दोबहुवाची तुविपुरुइतितन्नामसुपाठात् श्रवःशब्दोन्नवाची श्रवइत्यन्ननामश्रूयतइतिनिरुक्तेभिधानात् अतिशयेनबहुविधान्नोपेतोवर्तते यस्मादेवंतस्मादस्मानपिबहुविधान्नोपेतान्करोत्वितिभावः साह्वान् षहमर्षणे इत्यस्यक्वसौ दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनाद्द्विर्वचनमिडागमश्च

Funding by IKS-MoE

नभवति परस्मैपदंचभवति क्वसुस्वरः। क्रतुः कृञःकतुः कित्त्वाद्गुणाभावः प्रत्ययस्वरः। तुविश्रवस्तमः तुवृत्तिहिंसापूर्तिषु अस्मादौणादिकःकिप्रत्ययः कित्त्वाद्गुणाभावः उवङादेशः अन्तोदात्तः। श्रवः श्रुश्रवणे श्रूयतेन्नमितिकर्मणिअसुन्प्रत्ययः अतिशयेनतुविश्रवाइतिअतिशायनेतमबिति तमप् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

अथसप्तमी–

अ॒भिप्रयां॑सि॒वाह॑सादा॒श्वाँअ॑श्नोति॒मर्त्यः॑ । क्षयं॑पाव॒कशो॑चिषः॥७॥

अ॒भि । प्रयां॑सि । वाह॑सा । दा॒श्वान् । अ॒श्नो॒ति॒ । मर्त्यः॑ ।
क्षय॑म् । पा॒व॒कऽशो॑चिषः ॥ ७ ॥

दाश्वान्हविषांदातामर्त्योमनुष्योयजमानोवाहसाहविषां वाहकेनाग्निनाप्रयांस्यन्नानिअभ्यश्नोतिअभितःसर्वतःप्राप्नोति किञ्च पावकशोचिषःशोधकदीप्तेरग्नेःसकाशात्क्षयंगृहंचाभ्यश्नोति ॥ प्रयांसि प्रीञ्प्रीणनेअस्माद्धातोरन्तर्भावितण्यर्थादसुन्प्रत्ययः प्रीणयन्तिभक्षमितिप्रयांस्यन्नानि नित्त्वादाद्युदात्तः। वाहसा णिदित्यनुवृत्तौवहिहाधाञ्भ्यश्छन्दसीत्यसुन्णित्त्वादुपधावृद्धिः नित्स्वरः। दाश्वान् दाशृदानेइत्यस्यक्वसौदाश्वान्साह्वानितिनिपातनादिडागमोद्विर्वचनंचनभवति क्वसुन्प्रत्ययस्वरः। अश्नोति अशूव्याप्तौ व्यत्ययेनपरस्मैपदम् निघातः ॥ ७ ॥

अथाष्टमी–

परि॒विश्वा॑नि॒सुधि॑ता॒ग्नेर॑श्याम॒मन्म॑भिः । विप्रा॑सोजा॒तवे॑दसः ॥८॥

परि॑ । विश्वा॑नि । सुऽधि॑ता । अ॒ग्नेः । अ॒श्या॒म॒ । मन्म॑ऽभिः ।
विप्रा॑सः । जा॒तऽवे॑दसः ॥ ८ ॥

जातवेदसः जातप्रज्ञाः विप्रासः विप्रामेधाविनोहोत्रादयोवयंअग्नेः तवसंबन्धिभिः मन्मभिर्मननीयैःस्तोमैर्विश्वानिसर्वाणिसुधितासुहितानिसुष्ठुहितान्यभिलषितानिवसूनिपर्यश्याम सर्वतः प्राप्नुयाम। जातवेदसइत्यग्नेर्वाविशेषणम् जातानिसर्वाणिवेत्तीतिजातवेदाः सर्वज्ञइत्यर्थः एतादृशंजातवेदस्त्वमग्नेरेवोचितमितितद्विशेषणत्वंयुक्तम् ॥ सुधिता डुधाञ्धारणपोषणयोरित्यस्माद्धातोर्निष्ठायांछन्दसीत्यनुवृत्तौ सुधितवसुधितेत्यादिनानिपातितः शेश्छन्दसिबहुलमितिशे-

लुंक् गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। अश्याम अशूव्याप्तौ बहुलंछन्दसीतिश्नुप्रत्ययस्यलुक् व्यत्ययेनपरस्मैपदम् यासुट्परस्मैपदेषूदात्तइतियासुट् लिङःसलोपइतिसलोपः अदन्तत्वाभावादियादेशोनभवति मसःसकारस्यनित्यंङितइतिलोपः निघातः। मन्मभिः मनुअवबोधने अन्येभ्योपिदृश्यन्तइतिमनिन् नित्स्वरः ॥ ८ ॥

अथनवमी—

अग्ने॒विश्वा॑नि॒वार्या॒॑वाजे॑षुसनिषामहे । त्वे॑दे॒वास॒एरि॑रे ॥ ९ ॥ १० ॥

अग्ने॑ । विश्वा॑नि । वार्या॑ । वाजे॑षु । स॒नि॒षा॒म॒हे॒ । त्वे इति॑ ।
दे॒वास॑ः । आ । ई॒रि॒रे॒ ॥ ९ ॥ १० ॥

हेअग्ने वार्यावरणीयानिसम्भजनीयानिविश्वःनिसर्वाणिधनानिवाजेषुयुद्धेषुसनिषामहेवयं संभजामहे यतःकारणात्देवासः पूर्वमस्माभिरिष्टादेवाअस्मदभिमतफलप्रदानायत्वेत्वयिएरिरे आसमन्तादागमन् त्वयिप्रविष्टाइत्यर्थः सर्वथापित्वत्तःसकाशात्फलंलभेमहीतिभावः ॥ वार्यावृङ्संभक्तौ ऋहलोर्ण्यदितिण्यत् शेश्छन्दसिबहुलमितिशेर्लुक् ईडवन्देत्यादिनाद्युदात्तः। वाजेषुवृषादित्वादाद्युदात्तः। सनिषामहे वनषणसंभक्तौ धात्वादेःषःसः लेटिसिब्बहुलमितिसिप् सिपआर्धधातुकत्वादिडागमः लेटोडाटावित्यडागमः व्यत्ययेनात्मनेपदम् निघातः। त्वे युष्मच्छब्दस्य सप्तम्यांत्वादेशः सुपांसुलुगितिशेआदेशः शेइतिप्रगृह्यसंज्ञा । ईरिरे ईरगतावित्यस्मात्परस्यलिटोझस्यइरेजादेशः इजादेश्चगुरुमतइत्याम्नभवति मन्त्रत्वात् निघातः ॥ ९ ॥

॥ इतितृतीयस्यप्रथमेदशमोवर्गः ॥ १० ॥

इन्द्राग्नीइतिनवर्चंद्वादशंसूक्तंवैश्वामित्रमैन्द्राग्नम् तथाचानुक्रम्यते—इन्द्राग्नीऐन्द्राग्नमिति। गायत्रंत्वितितुशब्दादिदमपिसूक्तंगायत्रम् इन्द्राग्नीदेवता आभिप्लविकेष्वहःसु प्रातःसवनेच्छावाकशस्त्रेआवापार्थमिदंसूक्तम् अभिप्लवपृष्ठ्याहानीतिखण्डेसूत्रितम्—इन्द्राग्नीआगतंताहुवेययोरिदमिति । अग्निष्टोमेच्छावाकशस्त्रेइन्द्राग्नीआगतमितिस्तोत्रियस्तृचः तस्यैवाच्छावाकस्याद्याशस्त्रयाज्या इन्द्राग्नीआगतंसुतमितियाज्येइतिसूत्रितत्वात् चतुर्विंशेहनिप्रातःसवनेच्छावाकशस्त्रेइन्द्राग्नीआगतंसुतमितिषळहःस्तोत्रियः इन्द्राग्नीआगतमिन्द्रेअग्नानमोबृहदितिसू-

Funding by IKS-MoE

त्रितम् अग्निष्टोमाच्छावाकशस्त्रेतोशावृत्रहणाहुवइत्याद्यास्तिस्रः सूत्रितञ्च—तोशावृत्रहणाहुवइत्याद्यास्तिस्रइति । अग्निष्टोमेच्छावाकशस्त्रेइन्द्राग्नीअपसस्परीत्यनुरूपः सूत्रितञ्च—इन्द्राग्नीआगतंसुतमिन्द्राग्नीअपसस्परीति ।

तस्मिन्सूक्तेप्रथमा—

इन्द्रा॑ग्नी॒आग॑तंसु॒तंगी॒र्भिर्नभो॒वरे॑ण्यम् ।
अ॒स्यपा॑तंधि॒येषि॒ता ॥ १ ॥

इन्द्रा॑ग्नी॒ इति॑ । आ । ग॒त॒म् । सु॒तम् । गी॒ःऽभिः । नभः॑ ।
वरे॑ण्यम् । अ॒स्य । पा॒त॒म् । धि॒या । इ॒षि॒ता ॥ १ ॥

इन्द्रश्चअग्निश्चइन्द्राग्नी हेइन्द्राग्नीदेवौ सुतंअभिषवादिसंस्कारैःसंस्कृतं अतएववरेण्यं वरणीयंसंभजनीयंइमंसोमंप्रति गीर्भिःअस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिराहूतौसन्तौनभः नभसः स्वर्गस्थानादागतंआगच्छतम् आगत्यचधियास्माभिःक्रियमाणेकर्मणिइषिताप्रेरितौयुवांअस्यपातंइमंसोमंपिबतम् यद्वा धियाऽस्मदीययाबुद्ध्याइषितौप्राप्तौअस्मद्भक्त्याप्रेरितौ युवांइमंसोमंपिबतम् ॥ इन्द्राग्नी इन्द्रश्चाग्निश्च द्वन्द्वेघीतिअग्निशब्दस्यपूर्वनिपातेप्राप्ते अजाद्यदन्तमितिइन्द्रशब्दस्यपूर्वनिपातः पादादित्वान्निघातप्रतिषेधः षाष्ठिकस्वरः । गतम् गम्लृगतौ बहुलंछन्दसीतिशपोलुकिसति अनुदात्तोपदेशेत्यादिनामकारलोपः निघातः । वरेण्यं वृङ्संभक्तौ वृङएण्यः वृषादित्वादाद्युदात्तः । पातं पापाने सर्वेविधयश्छन्दसिविकल्प्यन्तेइतिनपिबादेशः । इषिता इषगतावित्यस्माद्धातोर्निष्ठायां तीषसहेतीडागमः आगमाअनुदात्ताइतिइटोनुदात्तत्वात् क्तस्वरःशिष्यते ॥ १ ॥

अथद्वितीया—

इन्द्रा॑ग्नीजरि॒तुःसचा॑य॒ज्ञोजि॑गाति॒चेत॑नः ।
अ॒यापा॑तमि॒मंसु॒तम् ॥ २ ॥

इन्द्रा॑ग्नी॒ इति॑ । ज॒रि॒तुः । सचा॑ । य॒ज्ञः । जि॒गा॒ति॒ ।
चेत॑नः । अ॒या । पा॒त॒म् । इ॒मम् । सु॒तम् ॥ २ ॥

हेइन्द्राग्नी जरितुः स्तोतुःसचास्वर्गादिलक्षणफलप्राप्तौसहायभूतःयज्ञः ज्योतिष्टोमादियज्ञसाधनभूतः चेतनः इन्द्रियाणांचेतयिताआप्यायनकारीसन् असौसोमः जिगातियुवामभिगच्छति अयाअस्मदीययास्तुतिलक्षणयानयावाचाआहूतौसन्तौसुतंअभिषवादिसंस्कारोपेतमिमंसोमंपातंपिबतम् ॥ जिगाति गास्तुतावित्ययंधातुरत्रगमनेवर्तते छन्दसिजुहोत्यादिः बहुलंछन्दसीत्यभ्यासस्येत्वं निघातः । चेतनः चितीसंज्ञाने कर्तरि बहुलवचनात्ल्युट् लितीत्याद्युदात्तत्वम् । अया इदम्शब्दस्यतृतीयायाःसुपांसुलुगितियाजादेशः अनादेशेप्राप्तौहलिलोपः । पातम् पापाने निघातः ॥ २ ॥

अथतृतीया–

इन्द्रमग्निंकविच्छदायज्ञस्यजूत्यावृणे। तासोमस्येहतृम्पताम् ॥ ३ ॥

इन्द्रम् । अग्निम् । कविऽछदा । यज्ञस्य । जूत्या ।
वृणे । ता । सोमस्य । इह । तृम्पताम् ॥ ३ ॥

अस्ययज्ञस्यसाधनभूतस्यसोमस्यजूत्या जूतिःप्रेरणंसोमस्तावद्यजमानंप्रेरयति साधनमुपलभ्यतत्साध्येक्रतौयजमानःप्रवर्ततइतिहितस्यप्रेरकत्वम् तयाप्रेरणरूपयाजूत्याप्रेरितोहंकविच्छदाकवीनांस्तोतृणांउचितफलप्रदानेनोपच्छन्दकौइन्द्रमग्निंचयुवांवृणे सोमपानार्थमिहकर्मणि आगच्छतमितिसंभजे आगतौचताविन्द्राग्नीइहकर्मणिसोमस्यसोमपानेनतृम्पतांतृप्यताम् ॥ इन्द्रं इन्दिपरमैश्वर्ये अस्माद्धातोःऋज्रेन्द्राग्रेतिरन्प्रत्ययान्तत्वेननिपातनादाद्युदात्तत्वम् । कविच्छदा छदिअपवारणे अस्मात्क्विप् सुपांसुलुगितिसुपोडादेशः कृदुत्तरपदप्रकृतिस्वरत्वम् । जूत्या जूइतिसौत्रोधातुः अस्मादुदात्तइत्यनुवृत्तौ ऊतियूतिजूतीत्यादिनानिपातनादन्तोदात्तत्वम् उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् । वृणे वृङ्संभक्तौ श्नाप्रत्ययः टितआत्मनेपदानामितिटेरेत्वं निघातः । ता सुपांसुलुगितिडादेशः । सोमस्य षुञ्अभिभवे अस्मादर्तिस्तुसुहुसृधृक्षीत्यादिनामन्प्रत्ययः नित्स्वरः । तृंपताम् तृपप्रीणने लोटि मुचादित्वान्नुमागमः निघातः ॥ ३ ॥

अथचतुर्थी–

तोशावृत्रहणाहुवेसजित्वानापराजिता। इन्द्राग्नीवाजसातमा॥४॥

तोशा । वृत्रऽहना । हुवे । सऽजित्वाना । अपराऽजिता ।
इन्द्राग्नी इति । वाजऽसातमा ॥ ४ ॥

तोशा शत्रूणांबाधकौवृत्रहणावृत्रस्यपापस्यहन्तारौ सजित्वानासमानजेतारौपरस्परापेक्षयाजयशीलौ अपराजिताकेनाप्यतिरस्कृतौ वाजसातमा अन्नस्यातिशयेनदातारौ इन्द्राग्नीयुवांहुवेइहकर्मणिसोमपानार्थमहमाह्वयामि ॥ वृत्रहणा हनहिंसागत्योः ब्रह्मभ्रूणवृत्रेषुक्किबिति क्विप् एकाजुत्तरपदेणइतिणत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । हुवे ह्वयतेर्बहुलंछन्दसीतिलुकि सति ह्वःसम्प्रसारणमित्यनुवृत्तौ बहुलंछन्दसीतिसम्प्रसारणम् उवङादेशः व्यत्ययेनात्मनेपदं निघातः । सजित्वाना जिजये शीङ्क्रुशिरुहिजिक्षिसृधृभ्यइतिक्वनिप् किस्वाद्गुणाभावः पित्त्वात्तुगागमः समानस्यच्छन्दस्यमूर्धेतिसमानस्यसभावः कृदुत्तरपदप्रकृतिस्वरत्वम्।अपराजिता नञ्समासे तत्पुरुषेतुल्यार्थेतिपूर्वपदप्रकृतिस्वरत्वम् । इन्द्राग्नी देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वेप्राप्ते नोत्तरपदेनुदात्तादावितिप्रतिषेधात्समासस्वरः । वाजसातमा षणुदाने अस्माज्जनसनखनक्रमगमइतिविट् विड्वनोरनुनासिकस्यादित्याकारः अतिशायनेतमबितितमप् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ४ ॥

अथपञ्चमी–

प्रवांमर्चन्त्युक्थिनोंनीथाविदोंजरितारः । इन्द्राग्नीइषआवृणे ॥५॥११॥

प्र । वाम् । अर्चन्ति । उक्थिनः । नीथऽविदः । जरितारः ।
इन्द्राग्नी इति । इषः । आ । वृणे ॥ ५॥ ११ ॥

हेइन्द्राग्नी उक्थिनः उक्थं शस्त्रं तद्वन्तः शस्त्रिणोहोत्रादयः वांयुवांप्रार्चन्ति इहकर्मणि स्तुतिरूपाभिर्वाग्भिःपूजयन्ति तथानीथाविदः स्तोत्राभिज्ञाः सामगानकुशलाः जरितारः स्तोतारः उद्गात्रादयः अभिलषितफलावाप्तयेयुवामर्चन्ति अहमपिइषेअन्नस्यलाभार्थं इन्द्राग्नी युवामावृणे सर्वतःसंभजे पूजयामीत्यर्थः ॥ वां युष्मच्छब्दस्य द्वितीयायांपदात्परत्वात् युष्मदस्मदोःषष्ठीचतुर्थीद्वितीयाइत्यादिनावामित्यादेशः अनुदात्तश्च । अर्चन्ति अर्चपूजायां निघातः । उक्थिनः वचपरिभाषणे पातॄतुदिवचिरिचीतिकर्मणिथक् वचिस्वपीत्यादिनासम्प्रसारणम् उक्थंशस्त्रं उक्थंयेषांते अतइतिठनावितीनिः यस्येतिलोपः प्रत्ययस्वरः । नीथाविदः णीञ्प्रापणे हनिकुषिनीरमीत्यादिनाक्थन् किस्वाद्गुणाभावः । विदज्ञाने क्विप्चेतिक्विप् कृदुत्तरपद-

Funding by IKS-MoE

प्रकृतिस्वरत्वम् । इन्द्राग्नी आमन्त्रितत्वादाद्युदात्तत्वम् । वृणे वृङ्संभक्तौ निघातः ॥ ५ ॥

॥ इतिद्वितीयस्यप्रथमेएकादशोवर्गः ॥ ११ ॥

अथषष्ठी—

इन्द्रा॑ग्नीनव॒तिंपुरो॑दा॒सप॑त्नीरधूनुतम् । सा॒कमेके॑न॒कर्म॑णा ॥ ६ ॥

इन्द्रा॑ग्नी॒ इति॑ । न॒व॒तिम् । पुरः॑ । दा॒सऽप॑त्नीः । अ॒धू॒नु॒त॒म् ।
सा॒कम् । एके॑न । कर्म॑णा ॥ ६ ॥

हेइन्द्राग्नी दासपत्नीः दासयन्तिउपक्षपयन्तीतिदासाउपक्षपयितारः शत्रवस्तेपतयः पालकायासांताः दासपत्नीः नवतिं नवतिसंख्याकाः पुरः एवंविधाः शत्रूणांपुरीः एकेनकर्मणाएकेनैवोद्योगेनयुवांसाकंसहयुगपत् अधूनुतंअकम्पयतम् ताविन्द्राग्नीआह्वयामीतिशेषः ॥ नवतिंनवानांदशतांनवभावः तिश्चप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः । दासपत्नीः दसुउपक्षये दासयतीतिदासः पचाद्यजन्तः चित्त्वादन्तोदात्तः तेपतयोयासां नित्यंसपत्न्यादिषुदासाच्चेत्युक्तत्वाद्विभाषासपूर्वस्येतिङीप् इकारस्यनकारः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अधूनुतम् धूञ्कम्पने लङि स्वादिभ्यःश्नुः निघातः । एकेन इण्गतौ इण्भीकापाशल्यतिमर्चिभ्यःकन्नितिकन् नित्त्वादाद्युदात्तः ॥ ६ ॥

अथसप्तमी—

इन्द्रा॑ग्नी॒अप॑स॒स्पर्यु॑प॒प्रय॑न्तिधी॒तयः॑ । ऋ॒तस्य॑प॒थ्या॒३॒अनु॑ ॥ ७ ॥

इन्द्रा॑ग्नी॒ इति॑ । अप॑सः । परि॑ । उप॑ । प्र । य॒न्ति॒ । धी॒तयः॑ ।
ऋ॒तस्य॑ । प॒थ्याः॑ । अनु॑ ॥ ७ ॥

हेइन्द्राग्नी धीतयः सोमस्यधातारः पातारोहोत्रादयः ऋतस्यकर्मफलस्यपथ्यापथोमार्गाननुलक्षीकृत्यअपसः अस्माभिःक्रियमाणस्यकर्मणः परिसर्वतः उपप्रयन्ति समीपेप्रकर्षेण वर्तन्ते अतःसोमपानार्थंयुवामागच्छतमितिभावः यद्वा धीतयः स्तुतयः ऋतस्य यज्ञस्यमार्गान्लक्षीकृत्यकर्मणःपरितःप्रवर्तन्ते अतःस्तोतव्यतयायुवामागतमिति ॥ यन्ति इण्गतौ यणादेशः निघातः । धीतयः धेट्पानेइत्यस्मात्कर्तरि क्तिच्क्तौचसंज्ञायामितिक्तिच् घुमास्थेतीत्वम् चित्त्वादन्तोदात्तः ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी–

इन्द्रा॑ग्नीतवि॒षाणि॑वांस॒धस्था॑नि॒प्रयां॑सिच । यु॒वोर॒प्तूर्यं॑हि॒तम् ॥८॥
इन्द्रा॑ग्नी॒ इति॑ । त॒वि॒षाणि॑ । वा॒म् । स॒धऽस्था॑नि । प्रयां॑सि ।
च॒ । यु॒वोः । अ॒प्ऽतूर्य॑म् । हि॒तम् ॥ ८ ॥

हेइन्द्राग्नी वांयुवयोः तविषाणिबलानिप्रयांस्यन्नानिचसधस्थानिपरस्परमवियुज्यवर्तन्ते तथाअप्तूर्यंवृष्टिद्वाराअपांप्रेरकत्वंयुवोः युवयोरेवहितंनिहितंवर्तते तस्मात्सोमपानप्रभृतिषुसर्वकर्मसुइन्द्राग्न्योः सहैववर्तमानत्वमितिभावः । वां षष्ठीद्विवचनेवामित्यादेशः । सधस्थानि ष्ठागतिनिवृत्तौ आतोनुपसर्गेकः सधमादस्थयोश्छन्दसीतिसहस्यसधादेशः ॥ ८ ॥

अथनवमी–

इन्द्रा॑ग्नीरोच॒नादि॒वःपरि॒वाजे॑षुभूषथः । तद्वां॑चेति॒प्रवी॒र्य॑म् ॥९॥१२॥
इन्द्रा॑ग्नी॒ इति॑ । रो॒च॒ना । दि॒वः । परि॑ । वाजे॑षु । भू॒ष॒थः ।
तत् । वा॒म् । चे॒ति॒ । प्र । वी॒र्य॑म् ॥ ९ ॥ १२ ॥

हेइन्द्राग्नी दिवोरोचना स्वर्गस्यरोचकौ प्रकाशकौयुवां वाजेषुसङ्ग्रामेषुपरिभूषथः परितःसर्वतः अलंकृतौभवथः शत्रून्पराजित्यसर्वतोविजयमानौवर्तेथे वांयुवयोःवीर्यंसामर्थ्यमेवतत्तादृशंसंग्रामविजयं प्रचेतिप्रकर्षेणज्ञापयति यद्वा युवां वाजेषु संग्रामेषु परिभूषथः शत्रून्परिभवथः शेषंपूर्ववत् ॥ रोचना रुचदीप्तावित्यस्य अनुदात्तेतश्चहलादेरितियुच् चित्त्वादन्तोदात्तः । भूषथः भूष भूषणे निघातः । चेति चितीसंज्ञाने अयमन्तर्भावितण्यर्थः । बहुलंछन्दसीतिशपोलुक् तकारलोपश्छान्दसः ॥ ९ ॥

॥ इतितृतीयस्यप्रथमेद्वादशोवर्गः ॥ १२ ॥

॥ इतितृतीयेमण्डलेप्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाकेसप्तसूक्तानि तत्रप्रवोदेवायेतिसप्तर्चमाद्यंसूक्तम् वैश्वामित्रऋषभस्यार्षम् अग्निदेवताकम् आनुष्टुभम् अत्रानुक्रमणिका—प्रवःसप्तऋषभस्त्वानुष्टुभमितिविश्वामित्रपुत्रऋषभऋषिः मण्डलादिपरिभाषयाग्निर्देवता अग्निष्टोमेइदंसूक्तमाज्यशस्त्रम् परा-

Funding by IKS-MoE

ऽध्वर्यावावृत्तइतिखण्डेसूत्रितम्—प्रवोदेवायेत्याज्यमुपसन्तनुयादिति इदमेवसूक्तंप्रातरनुवाकेआश्विनशस्त्रेचविनियुक्तम् सूत्रञ्च—प्रवोदेवायाग्नेकदातइतिपञ्चेति अभ्युदयेष्टौसयन्तेत्यग्नेःप्रदातुर्याज्या सूत्रितञ्च—सयन्ताविप्रएषांदीर्घस्तेअस्त्वंकुशइति ।

तस्मिन्सूक्तेप्रथमा—

प्रवोदेवायाग्नयेबर्हिष्ठमर्चास्मै ।
गमद्देवेभिरासनोयजिष्ठोबर्हिरासदत् ॥ १ ॥

प्र । वः । देवाय । अग्नये । बर्हिष्ठम् । अर्च । अस्मै ।
गमत् । देवेभिः । आ । सः । नः । यजिष्ठः । बर्हिः । आ । सदत् ॥ १ ॥

यजमानोहोत्रादीन्प्रतिब्रूते—हेहोत्रादयोवोयुष्मत्संबन्धिनेदेवायद्योतमानायअस्मै अस्मिन्कर्मणिस्तुत्यायाग्नयेबर्हिष्ठं वृद्धतमंप्रभूतमिदंस्तुतिरूपं स्तोत्रशस्त्रादिवोक्थ्यजातंप्रार्चंउच्चारयत एवंस्तुतः सोग्निर्देवेभिर्यष्टव्यदेवैःसहितःसन् नोस्मान्प्रतिआगमत् आगच्छतु आगत्यचयजिष्ठः यष्टृतमःसोग्निर्बर्हिःअस्माभिर्वेद्यांस्तीर्णे बर्हिषिआसदत् आसीदतु उपविशतु॥बर्हिष्ठं बर्हिःतृशब्दात्तुश्छन्दसीत्यतिशायनेइष्ठन् । अर्च अर्चपूजायां भौवादिकः बहुवचनस्यैकवचनं निघातः । गमत् गम्लृगतौ अस्य छन्दसिलुङ्लङ्लिटइतिलोडर्थेलुङ् लृदित्वात् च्लेरङ् नित्यंङितइतीकारलोपःपादादित्वान्ननिघातः ।यजिष्ठः यष्टृशब्दात्तुश्छन्दसीतीष्ठन् तुरिष्ठेमेयःस्वितितृचोलोपः नित्स्वरः । सदत् पूर्ववल्लोडर्थेलुङ् शद्लृविशरणगत्यवसादनेष्वित्यस्यलृदित्वादङ् निघातः ॥ १ ॥

अथद्वितीया—

ऋतावायस्यरोदसीदक्षंसचन्तऊतयः ।
हविष्मन्तस्तमीळतेतंसनिष्यन्तोवसे ॥ २ ॥

ऋतऽवा । यस्य । रोदसी इति । दक्षम् । सचन्ते । ऊतयः ।
हविष्मन्तः । तम् । ईळते । तम् । सनिष्यन्तः । अवसे ॥ २ ॥

यस्यपूर्वमन्त्रेप्रतिपादितस्याग्नेः रोदसीइमेद्यावापृथिव्यौवशेभवतःअग्नेःप्रकाशकत्वेनतदधीनप्रकाशकेभवतइत्यर्थः किञ्च ऊतयःयजमानस्यफलप्रदानेनरक्षितारोदेवाः दक्षं

यस्याग्नेर्बलंसचन्तेसेवन्ते सचन्तेसेवन्तइतियास्कः । अग्नेर्यजमानदत्तहविषांप्रदातृत्वेनतदधीनाइत्यर्थः एवंभूतःसोग्निर्ऋतावासत्यकर्मासत्यसंकल्पइत्यर्थः किञ्च हविष्मन्तःसंभृतहविष्कायजमानाः हविर्वहनार्थंतमेवाग्निमीळते स्तुतिरूपाभिर्वाग्भिःपूजयन्ति किञ्च सनिष्यन्तः धनादिलाभमिच्छन्तस्तंअवसेरक्षणायतमेवाग्निमाश्रयन्ते ॥ ऋतावा ऋतशब्दात्तदस्यास्तीतिछन्दसीवनिपौवक्तव्याविति वनिप् अन्येषामपिदृश्यतइतिदीर्घः वनिपःपित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः। सचन्ते षचसमवाये व्यत्ययेनात्मनेपदम् यद्वृत्तयोगादनिघातः । सनिष्यन्तः सनिर्लाभस्तमिच्छन्तः सुपआत्मनःक्यच् सर्वप्रातिपदिकेभ्योलालसायांसुग्वक्तव्यइतिक्यचिपरतःसुगागमः क्यचःस्वरः ॥ २ ॥

अथतृतीया–

सयन्ताविप्रंएषांसयज्ञानामथाहिषः ।
अग्निंतंवोदुवस्यतदातायोवनितामघम् ॥ ३ ॥

सः । यन्ता । विप्रः । एषाम् । सः । यज्ञानाम् । अथ । हि । सः ।
अग्निम् । तम् । वः । दुवस्यत । दाता । यः । वनिता । मघम्॥ ३ ॥

विप्रोमेधावीकर्माभिज्ञःसोग्निः एषांकालापराधेनहविर्निर्वापंकृतवतांयजमानानांयथोक्तकर्मप्रदर्शनेनतत्रप्रवर्तकः अथ किञ्च यज्ञानांज्योतिष्टोमादीनांसोग्निर्नियन्ताफलप्रदानेन नियामकः हिप्रसिद्धौ अतएवसर्वस्यनियन्ताखलु किञ्च सोग्निर्दाताज्योतिष्टोमादिकर्मफलदातामघंमंहनीयंधनं मघंरेक्णइतितन्नामसुपाठात् तद्धनंवनिताप्रयच्छंश्चभवति वःयुष्मत्सम्बन्धिनंतादृशमग्निं हेऋत्विजोयूयंदुवस्यत आहुतिप्रदानेनपरिचरत दुवस्यतिःपरिचरणकर्मा नमस्यतिदुवस्यतीतितन्नामसुपाठात् ॥ यन्ता यमउपरमे इत्यस्यतृचिरूपं ऋदुशनसित्यादिनाअनङादेशःचित्स्वरः । अथ निपातस्येतिदीर्घः । दुवस्यत दुवःपरिचरणंतदिच्छन्तःसुपः क्यच् तदन्तस्यधातोर्लोटिरूपम् । दाता डुदाञ्दाने ताच्छीलिकस्तृन् नित्त्वादाद्युदात्तः ॥ ३ ॥

अथचतुर्थी–

सनःशर्माणिवीतयेग्निर्यच्छतुशन्तमा ।
यतोनःप्रुष्णवद्वसुदिविक्षितिभ्योअप्स्वा ॥ ४ ॥

---

१ नि० २.९.।

स॒ः । न॒ः । शर्मा॑णि । वी॒तये॑ । अ॒ग्निः । य॒च्छ॒तु । शम्ऽत॑मा ।
यत॑ः । न॒ः । प्रु॒ष्णव॑त् । वसु॑ । दि॒वि । क्षि॒तिऽभ्य॑ः । अ॒प्ऽसु । आ ॥ ४ ॥

सोग्निः नः हविःप्रदातृभ्योस्मभ्यं शन्तमापशुपुत्रादिसमृद्ध्या अतिशयेनसुखकराणि शर्माणि शर्मशब्दोगृहवाची छायाशर्मेतितन्नामसुपाठात् तथाचेधानिगृहाणिवीतये संभजनाय अग्निहोत्रादिकर्मप्राप्त्यर्थं यच्छतुददातु यतोयस्मादग्नेःसकाशात्प्रुष्णवत् समृद्धिमत् दानभोगादिनाव्ययेसत्यपि अतिशयेनवर्धमानंदिविद्युलोकेक्षितिभ्योभूलोकात् अप्सुअन्तरिक्षेचसमुत्पन्नंवसुतत्तल्लोके असाधारण्येनवर्तमानंधनं आसमन्तादुपनमति यतोग्नेःप्रसादात्त्रिषुलोकेषु विद्यमानं धनमस्मानागच्छति सोग्निरितिपूर्वेणान्वयः ॥ वीतये वीगत्यादिषु मन्त्रेवृषेषपचेत्यादिनाक्तिन् उदात्तत्वेननिपातनादुदात्तः । यच्छतु यमउपरमे इषुगमियमांछइतिमकारस्य छकारः । प्रुष्णवत् प्रुषस्नेहनसेचनपूरणेषु अस्मादौणादिकोनक्प्रत्ययः तदस्यास्तीति मतुप् तस्योदात्तताभावश्छान्दसः ॥ ४ ॥

अथपञ्चमी–

दी॒दि॒वांस॒मपू॑र्व्यं॒वस्वी॑भिरस्यधी॒तिभि॑ः ।
ऋक्वा॑णोअ॒ग्निमि॑न्धते॒होता॑रंवि॒श्पतिं॑वि॒शाम् ॥ ५ ॥

दी॒दि॒ऽवांस॑म् । अपू॑र्व्यम् । वस्वी॑भिः । अ॒स्य॒ । धी॒तिऽभि॑ः ।
ऋक्वा॑णः । अ॒ग्निम् । इ॒न्ध॒ते । होता॑रम् । वि॒श्पति॑म् । वि॒शाम् ॥ ५ ॥

ऋक्वाणः स्तुतिंकुर्वाणाः शस्त्रिणोहोत्रादयः दीदिवांसंदीप्यमानं अपूर्व्यं तेजस्वितयाप्रतिक्षणाभिनवं होतारं देवानामाह्वातारं विशां विश्पतिं प्रजानामतिशयेनपालयितारं तमग्निंवस्वीभिः प्रशस्ताभिः अस्यधीतिभिः अग्निविषयस्तुतिलक्षणाभिर्वाग्भिः यद्वा वस्वीभिः वसुमद्भिः अस्यधीतिभिः एतदुद्देशेन क्रियमाणैःकर्मभिः इन्धतेदीपयन्ति स्तोत्रकरणहविःप्रदानादिव्यापारेणसमृद्धंकुर्वन्ति ॥ दीदिवांसं दिवुक्रीडादावित्यस्यक्वसौरूपं तुजादीनामित्यभ्यासस्य दीर्घः लोपोव्योरितिवलोपः । वस्वीभिः वसुशब्दात् व्यत्ययेनङीन् नित्स्वरः । धीतिभिः धेट् पाने क्तिच्क्तौचसंज्ञायामितिक्तिच् कित्त्वाद्घुमास्थेतीत्वं चित्स्वरः । ऋक्वाणः ऋच्शब्दान्मतुबर्थेवनिप् अयस्मयादित्वाद्भसंज्ञात्वात् कुत्वम् पदसंज्ञाभावाज्जश्त्वाभावः । इन्धते ञिइन्धीदी-

प्तौ । विश्पतिं परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । विशाम् सावेकाचइतिविभक्तेरुदात्तत्वम् ॥ ५ ॥

अथषष्ठी—

उतनोब्रह्मन्नविषउक्थेषुदेवहूतमः ।
शंनःशोचामरुद्वृधोग्नेसहस्रसातमः ॥ ६ ॥

उत । नः । ब्रह्मन् । अविषः । उक्थेषु । देवऽहूतमः ।
शम् । नः । शोच । मरुत्ऽवृधः । अग्ने । सहस्रऽसातमः ॥ ६ ॥

उतापिच हेअग्ने नःयज्ञकारिणोस्मान्ब्रह्मन्ब्रह्मणिअस्माभिःक्रियमाणेस्तोत्रेअविषः स्तोत्रविषयन्यूनातिरेकदोषोयथानभवतितथापालय किञ्च देवहूतमः देवानामाह्वातृतमस्त्वंउक्थेषुअस्माभिःक्रियमाणेषुआज्यप्रउगादिशस्त्रेषुअविषः गोपाय किञ्च मरुद्वृधः मरुद्भिर्वर्धमानः सहस्रसातमः सहस्रसंख्याकस्यधनस्यातिशयेनदातात्वंनोस्माकंशंऐहिकंआमुष्मिकंचसुखंशोच दीपय वर्धयेत्यर्थः ॥ अविषः अवरक्षणादिषुइत्यस्माल्लेटि सिब्बहुलमितिसिप् अस्यार्धधातुकत्वादिट् इतश्चलोपइतिसिपइकारलोपः लेटोडाटावित्यडागमः निघातः । उक्थेषु वचपरिभाषणे अस्मात्कर्मणिपातॄतुदिवचीत्यादिनाथक् किच्वात्सम्प्रसारणम् प्रत्ययस्वरः । देवहूतमः ह्वयतेःक्विप् बहुलंछन्दसीतिसम्प्रसारणपररूपत्वे हलइतिदीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम् । शोच शुचदीप्तौ अयमन्तर्भावितण्यर्थः निघातः । मरुद्वृधः वृधुवर्धने इगुपधलक्षणःकः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । सहस्रसातमः षणुदाने अस्यजनसनखनक्रमगमोविडितिविड्वनोरनुनासिकस्येत्याकारः कृदुत्तरपदप्रकृतिस्वरः ॥ ६ ॥

अथसप्तमी—

नूनोरास्वसहस्रवत्तोकवत्पुष्टिमद्वसु ।
द्युमदग्नेसुवीर्यंवर्षिष्ठमनुपक्षितम् ॥ ७ ॥ १३ ॥

नु । नः । रास्व । सहस्रऽवत् । तोकऽवत् । पुष्टिऽमत् । वसु ।
द्युऽमत् । अग्ने । सुऽवीर्यम् । वर्षिष्ठम् । अनुपऽक्षितम् ॥ ७ ॥ १३ ॥

Funding by IKS-MoE

अस्मिन्सूक्तेस्तूयमान हेअग्ने सहस्रवत्सहस्रसंख्योपेतं तोकवत्पुत्रपौत्रादिसहितं पुष्टिमत्पोषणकृत् अनेनशरीरस्यक्षीरादिद्वाराबलारोग्यप्रदंगवादिकमुपलक्ष्यते द्युमत्दीप्तिमत् अनेनरत्नकनकादिकंपरिगृह्यते सुवीर्यंशोभनसामर्थ्योपेतंतत्तत्कार्येषुव्यवहारयोग्यंवर्षिष्ठमतिशयेनवृद्धंप्रभूतंअतएवअनुपलक्षितंव्ययेक्रियमाणेप्यनुपक्षीणंएवंभूतंवसु रत्नकनकपश्वादिलक्षणंधनंनोस्मभ्यंनुक्षिप्रंअविलंबेनरास्वदत्स्व ॥ नूनः ऋचितुनुघमक्ष्वितिदीर्घः । रास्व रादाने अस्यलोटिरूपं व्यत्ययेनात्मनेपदम् अदादित्वाच्छपोलुक् निघातः । सहस्रवत् मादुपधायाइति मतुपोवत्वम् कर्दमादित्वान्मध्योदात्तःसहस्रशब्दः । पुष्टिमत् पुषपुष्टौ अस्मात्क्तिच् प्रत्ययस्वरेणान्तोदात्तः ह्रस्वनुड्भ्यामितिमतुपउदात्तत्वम् । वर्षिष्ठम् प्रियस्थिरेत्यादिनावृद्धस्यवर्षइत्यादेशः नित्स्वरः । अनुपक्षितम् क्षिक्षये इत्यस्यदीर्घाभावान्निष्ठानत्वंनभवति तत्पुरुषत्वादव्ययपूर्वपदप्रकृतिस्वरः ॥ ७ ॥

॥ इतितृतीयस्यप्रथमेत्रयोदशोवर्गः ॥ १३ ॥

आहोतेतिसप्तर्चंद्वितीयंसूक्तम् आहोतेत्यनुक्रमणिका ऋषभस्त्विति तुशब्दप्रयोगादस्यापिसूक्तस्यऋषभऋषिः अनुक्तत्वात्त्रिष्टुप् अग्निर्देवता एतदादीनिदशसूक्तानितृतीयाष्टमवर्जितानिप्रातरनुवाकेआश्विनशस्त्रेत्रैष्टुभेछन्दसिविनियुक्तानि अथैतस्याइतिखण्डेसूत्रितम्— आहोतेतिदशानांतृतीयाष्टमेउद्धरेदितित्रैष्टुभमिति ।

तस्मिन्सूक्तेप्रथमा—

आहोता॑म॒न्द्रोवि॒दथा॑न्यस्थात्स॒त्योयज्वा॑क॒वित॑मः॒सवे॒धाः ।
वि॒द्युद्र॑थः॒सह॑सस्पु॒त्रोअ॒ग्निःशो॒चिष्के॑शःपृथि॒व्यांपाजो॑अश्रेत् ॥ १ ॥

आ । होता॑ । म॒न्द्रः । वि॒दथा॑नि । अ॒स्था॒त् । स॒त्यः । यज्वा॑ ।
क॒विऽत॑मः । सः । वे॒धाः । वि॒द्युत्ऽर॑थः । सह॑सः । पु॒त्रः । अ॒ग्निः ।
शो॒चिःऽके॑शः । पृ॒थि॒व्याम् । पाजः॑ । अ॒श्रे॒त् ॥ १ ॥

ऋषभोग्निंस्तौति—होतादेवानामाह्वाता मन्द्रः स्तोतुर्मादयिता सत्यः सत्यकर्माकवितमः अतिशयेनमेधावी यज्वादेवानांयष्टा वेधाः सर्वस्यजगतोविधाता एवंविधमहिमोपेतः सोग्निः विदथानिअस्माभिःक्रियमाणान् यज्ञानास्थात् आतिष्ठति प्राप्नोति किञ्च विद्युद्रथः विद्योतमानयानोपेतः शोचिष्केशः शोचींषिज्वालाः केशायस्यसः ज्वालामयकेशोपेतः सह-

सः सूनुर्बलस्यपुत्रः एवंभूतः सोग्निः पृथिव्यांविस्तीर्णेअन्तरिक्षे पाजः तेजः स्वकीयांप्रभां अश्रेत् श्रयतेप्रापयति यद्वा पृथिव्यांभूमौ वर्तमानः पाजोबलंसेवते ॥ मन्द्रः मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु अस्मात्स्फायितंचीत्यादिनारक् इदित्त्वान्नुम्। अस्थात् ष्ठागतिनिवृत्तौ छन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङ् गातिस्थेतिसिचोलोपः निघातः । यज्वा यजदेवपूजासङ्गतिकरणदानेषु सुयजोर्ङ्वनिबितिङ्वनिप् तस्यपित्त्वादनुदात्तत्वेधातुस्वरः । कवितमः कुशब्दे कौतिकूयतेवा अचइरितिकर्तरिभावेवाइप्रत्ययः तमपःपित्त्वादनुदात्तत्वेप्रत्ययस्वरः । शोचिष्केशः शुचदीप्तौ अर्चिशुचिहुसृपिछदिछर्दिभ्यइसिरितीसिः प्रत्ययस्वरेणान्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । अश्रेत् श्रिञ्सेवायामित्यस्यछन्दसिवर्तमानेलङ् बहुलंछन्दसीतिशपोलुक् सार्वधातुकगुणः निघातः ॥ १ ॥

अथद्वितीया–

अया॑मिते॒नम॑उक्तिंजुषस्व॒ऋता॑व॒स्तुभ्यं॒चेत॑तेसहस्वः ।
वि॒द्वाँआव॑क्षिवि॒दुषो॒निष॑त्सि॒मध्य॒आब॒र्हिरू॒तये॑यजत्र ॥ २ ॥

अया॑मि । ते॒ । नम॑ःऽउक्तिम् । जुष॒स्व॒ । ऋत॑ऽवः । तुभ्य॑म् ।
चेत॑ते । स॒ह॒स्वः॒ । वि॒द्वान् । आ । व॒क्षि॒ । वि॒दुष॑ः । नि । स॒त्सि॒ ।
मध्ये॑ । आ । ब॒र्हिः । ऊ॒तये॑ । य॒ज॒त्र॒ ॥ २ ॥

ऋतावः ऋतंसत्यभूतोयज्ञः तद्वन् हेअग्ने तेत्वद्विषयांनमउक्तिंनमस्कारवाक्यमहंअयामि प्रेरयामिउच्चारयामि हेसहस्वः सहोबलंतद्वन्नग्नेचेततेचेतयित्रेकर्मणः प्रज्ञापकायतुभ्यंनमउक्तिः क्रियते तांजुषस्वअस्माभिः क्रियमाणांनमस्कारोक्तिंसेवस्व किञ्च विद्वान्आनुपूर्व्येणदेवाह्वानाभिज्ञः विदुषःकर्माभिज्ञान्देवानावक्षिआवह किञ्च यजत्रयष्टव्य हेअग्ने ऊतयेअस्माकं रक्षणायमध्येबर्हिःस्तीर्णस्यबर्हिषोमध्येआनिषत्सि आसमन्तान्निषीद ॥ अयामि इण्गतौ भौवादिकः पादादित्वादनिघातः । जुषस्व जुषीप्रीतिसेवनयोः तुदादिःलोटिरूपं निघातः । चेतते चितीसंज्ञाने शतुर्लसार्वधातुकस्वरेणानुदात्तत्वेततोन्तोदात्तताभावाच्छतुरनुमइतिविभक्तेरुदात्तताभावः धातुस्वरः । सहस्वः सहोस्येतिमतुप् सकारस्यतसौमत्वर्थेइतिभसंज्ञकत्वाद्रुर्न भवति मादुपधायाइतिमतुपोवत्वम् उगिदचामितिनुम् हल्ङ्यादिलोपेनकारस्यमतुवसोरुरितिरुत्वं आमन्त्रितनिघातः । विदुषः विदज्ञानेइत्येतस्मादुत्तरस्यशतुः विदेःशतुर्वसुरितिव-

स्वादेशः भसंज्ञायां वसोःसंप्रसारणं प्रत्ययस्वरः । सत्सि षद्लृविशरणादिषु लटि बहुलंछन्दसीतिशपोलुक् शित्प्रत्ययपरत्वाभावात्सीदादेशाभावः सदिरप्रतेरितिषत्वम् । यजत्र यजदेवपूजादिषु अमिनक्षियजीत्यादिनात्रन्प्रत्ययः आमन्त्रितनिघातः ॥ २ ॥

अथतृतीया–

द्रव॑तां॑तउ॒षसा॑वा॒जय॑न्ती॒अग्ने॒वात॑स्यप॒थ्या॑भि॒रच्छ॑ ।
यत्सी॑म॒ञ्जन्ति॑पू॒र्व्यं॑ह॒विर्भि॒राव॒न्धुरे॑वतस्थतु॒र्दुरो॒णे ॥ ३ ॥

द्रव॑ताम् । ते॒ । उ॒षसा॑ । वा॒जय॑न्ती॒ इति॑ । अग्ने॑ । वात॑स्य ।
प॒थ्या॑भिः । अच्छ॑ । यत् । सी॒म् । अ॒ञ्जन्ति॑ । पू॒र्व्यम् । ह॒विःऽभिः॑ ।
आ । व॒न्धुरा॑ऽइव । त॒स्थ॒तुः । दु॒रो॒णे ॥ ३ ॥

हेअग्ने वाजयन्तीवाजमन्नंकुर्वाणे उषासानक्तेअहोरात्रौतौत्वांद्रवतांअभिगच्छतम् त्वमपिवातस्यवायोःपथ्याभिर्मार्गैःअच्छ तावहोरात्रौशीघ्रमभिगच्छ यद्यस्मात्कारणादहोरात्राग्न्योः परस्पराभिगमनेनअन्योन्यसंबन्धः तस्मादहोरात्रयोःसायंप्रातःकालयोःपूर्व्यंपुरातनंत्वामृत्विजोहविर्भिराज्यादिभिःसींसर्वतोञ्जन्ति सिञ्चन्ति किञ्चवन्धुरेव यथाकूबरस्थानं परस्परसंसक्तेषाद्वयोपेतंतद्वत्संसक्तौतावहोरात्रौदुरोणेअस्माकंगृहेअग्निहोत्रादिकर्मसिद्ध्यर्थं आआवृत्यपुनःपुनरावर्तमानौ सन्तौतस्थतुः तिष्ठताम् ॥ द्रवतां द्रुगतौइत्यस्यलोटिरूपम् । पथ्याभिः पथिषुसाधवइत्यर्थे तत्रसाधुरितियत् नस्तद्धितेइतिटिलोपः तित्स्वरितइतिस्वरितः । तस्थतुः तिष्ठतेर्लिटचुसिरूपं निघातः ॥ ३ ॥

अथचतुर्थी–

मि॒त्रश्च॒तुभ्यं॒वरु॑णःसह॒स्वोग्ने॒विश्वे॑म॒रुतः॑सु॒म्नम॑र्चन् ।
यच्छो॒चिषा॑सहसस्पुत्र॒तिष्ठा॑अ॒भिक्षि॒तीःप्र॒थय॒न्तसूर्यो॒नॄन् ॥ ४ ॥

मि॒त्रः । च॒ । तुभ्य॑म् । वरु॑णः । स॒ह॒स्वः॒ । अग्ने॑ । विश्वे॑ । म॒रुतः॑ ।
सु॒म्नम् । अ॒र्च॒न् । यत् । शो॒चिषा॑ । स॒ह॒सः॒ । पु॒त्र॒ । तिष्ठाः॑ ।
अ॒भि । क्षि॒तीः । प्र॒थय॑न् । सूर्यः॑ । नॄन् ॥ ४ ॥

सहस्वःबलवन् हेअग्ने मित्रश्चवरुणश्चमित्रावरुणौ विश्वेमरुतः सर्वेदेवाश्चतुभ्यंत्वदर्थंसुम्नंस्तोत्रं अर्चन्वहन्ति यद्वा सर्वेदेवाःतुभ्यंत्वांसुम्नंसुखेनअर्चन्पूजयन्ति यद्यस्मात्कारणात्सहसस्पुत्र हेअग्ने सूर्यःसुष्ठुअर्यःस्वामी यद्वा सर्वान्तर्यामितयासुष्ठुप्रेरकः यद्वा सूर्यःशोभनवीर्यःअभिक्षितीः क्षितिशब्दोमनुष्यवाची विशःक्षितयइतितन्नामसुपाठात् मनुष्यानभिलक्ष्यनॄन्मार्गप्रदर्शकत्वेननेतॄन् आत्मनोरश्मीन्प्रथयन् सर्वतोविस्तारयंस्त्वंशोचिषादीप्त्यासमानःसन् तिष्ठाः तिष्ठसि तस्मार्दैतिदेवाःपूजयन्ति ॥ अर्चन् अर्चपूजायामित्यस्यलङिरूपम् अडभावश्छान्दसः । तिष्ठाः ष्ठागतिनिवृत्तावित्यस्यलेटिरूपम् यद्योगादनिघातः पाघ्रेत्यादिनातिष्ठादेशस्याद्युदात्तत्वेन निपातनादाद्युदात्तः । सूर्यः राजसूयसूर्येतिक्यबन्तत्वेननिपातनात्सर्वेर्थाःसिद्धाभवन्ति ॥ ४ ॥

अथपञ्चमी–

व॒यंते॑अ॒द्यर॑रि॒माहिकाम॑मुत्ता॒नह॑स्ता॒नम॑सोप॒सद्य॑ ।
यजि॑ष्ठेन॒मन॑सायक्षिदे॒वानस्रे॑धता॒मन्म॑ना॒विप्रो॑अग्ने ॥ ५ ॥

व॒यम् । ते॒ । अ॒द्य । र॒रि॒म । हि । काम॑म् । उ॒त्ता॒नऽह॑स्ताः ।
नम॑सा । उ॒प॒ऽसद्य॑ । यजि॑ष्ठेन । मन॑सा । य॒क्षि । दे॒वान् ।
अस्रे॑धता । मन्म॑ना । विप्रः॑ । अ॒ग्ने ॥ ५ ॥

हेअग्ने उत्तानहस्ताहविःस्वीकरणादुत्तानपाणयोवयंकामंकमनीयं पुरोडाशादिहविःतेतुभ्यं अद्येदानीमस्मिन्कर्मणिररिम दद्मः नमसानमस्कारेणउपसद्य प्रसन्नोभूत्वायजिष्ठनयष्टृतमेनयागेच्छावतामनसान्तःकरणेनदेवान्यक्षियजनीयान्देवान्यजपूजय किञ्च विप्रोमेधावीकर्माभिज्ञस्त्वंअस्रेधताअक्षीणेनप्रभूतेनमन्मनामन्तव्येन स्तोत्रेणदेवान्पूजय ॥ अद्य सद्यःपरुत्परार्यैषमइत्यादिनानिपातितः अन्तोदात्तश्च । ररिम रादानेइत्यस्यवर्तमानेलिटि परस्मैपदानांणलतुसित्यादिनामसोमादेशः क्रादिनियमादिडागमः आतोलोपइटिचेत्याकारलोपः हियोगादनिघातः आगमाअनुदात्ताइतीटोनुदात्तत्वात्प्रत्ययस्वरः । उपसद्य षद्लृविशरणगत्यवसादनेषु इत्यस्यक्त्वा समासेनञ्पूर्वेक्त्वोल्यबितिल्यप् लित्स्वरः । यक्षि यजदेवपूजासङ्गतिकरणदानेषु लोटिबहुलंछन्दसीतिशपोलुक् षत्वकत्वे सिपोह्यादेशाभावश्छान्दसः । अस्रेधता स्रिधिःक्षयार्थःतत्पुरुषेतिनञ्स्वरः ॥ ५ ॥

Funding by IKS-MoE

अथषष्ठी–

त्वद्धिपु॑त्रसहसो॒विपू॒र्वीर्दे॒वस्य॒यन्त्यू॒तयो॒विवाजाः॑ ।
त्वंदे॑हिसह॒स्रिणं॑र॒यिंनो॑द्रो॒घेण॒वच॑सास॒त्यम॑ग्ने ॥ ६ ॥

त्वत् । हि । पु॒त्र॒ । स॒ह॒सः॒ । वि । पू॒र्वीः । दे॒वस्य॑ । यन्ति॑ । ऊ॒तयः॑ ।
वि । वाजाः॑ । त्वम् । दे॒हि॒ । स॒ह॒स्रिण॑म् । र॒यिम् । नः॒ ।
अ॒द्रो॒घेण॑ । वच॑सा । स॒त्यम् । अ॒ग्ने॒ ॥ ६ ॥

सहसस्पुत्र बलस्यपुत्र हेअग्ने देवस्यदेवनशीलस्य कर्मकरणप्रवृत्तस्ययजमानस्य कृते त्वत् त्वत्तःसकाशात्पूर्वीः प्रभूताऊतयोविघ्नपरिहारेणकर्मपरिपालनादिरूपारक्षाः वियन्तिहि विविधंगच्छन्तिखलु तमिमंयजमानं प्राप्नुवन्ति तथा वाजाःअन्नानिवियन्ति एनंयजमानं प्राप्नुवन्ति किञ्च हेअग्ने त्वंसहस्रिणं सहस्रसंख्याकंरयिंधनं नोस्मभ्यं देहि तथा अद्रोघेण द्रोहरहितेन पापशून्येनवचसावाक्येनयुक्तं सत्यंसत्यशीलंसन्मार्गेप्रवर्तमानं पुत्रंचदेहिप्रयच्छ ॥ त्वत् युष्मच्छब्दस्य पञ्चम्येकवचनेत्वादेशः ङसेःएकवचनस्यचेत्यदादेशः एकादेशस्वरः । पुत्रसहसः परमपिछन्दसीतिपराङ्गवद्भावात् द्वयोःसर्वानुदात्तत्वम् । देहि डुदाञ्दाने इत्यस्यलोटिघ्वसोरेद्धावितिधातोरेत्वं अभ्यासलोपश्च निघातः । अद्रोघेण द्रुहजिघांसायां घञ् द्रोघः घकारश्छान्दसः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ॥ ६ ॥

अथसप्तमी–

तुभ्यं॑दक्षकविक्रतो॒यानी॒मादे॑व॒मर्ता॑सोअध्व॒रेअक॑र्म ।
त्वंविश्व॑स्यसु॒रथ॑स्यबोधि॒सर्वं॒तद॑ग्नेअमृतस्वदे॒ह ॥ ७ ॥ १४ ॥

तुभ्य॑म् । द॒क्ष॒ । क॒वि॒क्र॒तो॒ इति॑ कवि॑ऽक्रतो । यानि॑ । इ॒मा ।
देव॑ । मर्ता॑सः । अ॒ध्व॒रे । अक॑र्म । त्वम् । विश्व॑स्य । सु॒ऽरथ॑स्य ।
बो॒धि॒ । सर्व॑म् । तत् । अ॒ग्ने॒ । अ॒मृ॒त॒ । स्व॒द॒ । इ॒ह ॥ ७ ॥ १४ ॥

दक्ष अतिसमृद्धतयासामर्थ्योपेत कविक्रतो अतीन्द्रियविषयप्रज्ञोपेत सर्वज्ञ देवदीप्यमान हेअग्ने मर्तासोयजमानावयं तुभ्यंत्वदर्थंयानीमा यानिइमानिहवींषिअध्वरेयज्ञे अकर्म हविस्त्यागमकार्ष्म त्वंचसुरथस्य शोभनयानोपेतस्यविश्वस्यसर्वस्ययजमानस्य बोधि गोपायिताभवामीतिबुध्यस्व अमृत मरणधर्मरहिताग्ने इहास्मिन्कर्मणि अस्माभिर्दत्तंतत्सर्वंहविः स्वदआस्वादय ॥ अकर्म डुकृञ्करणे इत्यस्यलुङि छन्दस्युभयथेतिमसआर्धधातुकत्वेनङित्वाभावाद्गुणः यद्वृत्तयोगादनिघातः । बोधि बुधअवगमने छन्दसिलुङितिलोडर्थेलुङ् तिङांतिङोभवन्तीतिसिपस्तादेशः दीपजनबुधेत्यादिनाकर्तरिचिण् चिणोलुगितितत्प्रत्ययस्यलोपः अडभावश्छान्दसः । स्वद स्वदआस्वादने अन्तर्भावितण्यर्थः लोटिरूपं निघातः ॥ ७ ॥

॥ इतितृतीयस्यप्रथमेचतुर्दशोवर्गः ॥ १४ ॥

विपाजसापृथुनेतिसप्तर्चंतृतीयंसूक्तम् त्रैष्टुभमाग्नेयम् अत्रेयमनुक्रमणिका—विपाजसा कात्यउत्कीलस्त्विति । कतगोत्रोत्पन्नोत्कीलोनामऋषिः प्रातरनुवाकाश्विनशस्त्रयोराहोतेत्यादिसूक्तदशकंविनियुक्तं तत्रेदंचद्वितीयंसूक्तम् ।

तस्मिन्सूक्तेप्रथमा—

विपाज॑सापृ॒थुना॒शोशु॑चानो॒बाध॑स्वद्वि॒षोर॒क्षसो॒अमी॑वाः ।
सु॒शर्म॑णोबृह॒तःशर्म॑णिस्याम॒ग्नेर॒हंसु॒हव॑स्य॒प्रणी॑तौ ॥ १ ॥

वि । पाज॑सा । पृ॒थुना॑ । शोशु॑चानः । बाध॑स्व । द्वि॒षः । र॒क्षसः॑ ।
अमी॑वाः । सु॒ऽशर्म॑णः । बृ॒ह॒तः । शर्म॑णि । स्या॒म् । अ॒ग्नेः ।
अ॒हम् । सु॒ऽहव॑स्य । प्रऽनी॑तौ ॥ १ ॥

उत्कीलःस्तौति—हेअग्ने पृथुनाविस्तीर्णेनपाजसातेजसाशोशुचानः अत्यर्थंदीप्यमानस्त्वंद्विषः कर्मानुष्ठानविघ्नकारिणः शत्रून्विबाधस्व विशेषेणनाशय तथा अमीवाः रोगराहित्येनसामर्थ्योपेतानिरक्षसः उभयत्रसुब्व्यत्ययः तानिरक्षांसिबाधस्व कर्मविघ्नकारीणितान्यपनुदस्व यद्वा अमोवाः आभिमुख्येन आगमनपरागमनपराः पिशाचिकाश्चबाधस्व सुशर्मणः स्वर्गादिलक्षणशोभनसुखहेतोर्बृहतः महतः शत्रुविजयेनप्राप्तमहिम्नः सुवहस्यसुष्ठुआह्वानो-

Funding by IKS-MoE

पेतस्याग्नेःशर्मणिअस्माकं सुखहेतौप्रणीतौउत्तरवेद्यादिस्थानेषुप्रणयनेप्रकर्षेणनयनं तत्रतत्रानीयप्रक्षेपः एवंभूते तवप्रणयनेअहंस्यां अग्निप्रणयनपूर्वकेक्रत्वनुष्ठानेभवेयम् ॥ पाजसा पा रक्षणे असुन्नित्यनुवृत्तौ पातेर्बलेजुट्चेत्यसुन्जुडागमः नित्त्वादाद्युदात्तः। पृथुना प्रथप्रख्याने उदित्यनुवृत्तौ प्रथिम्रदिभ्रस्जांसम्प्रसारणमितिउप्रत्ययः तत्सन्नियोगेनसम्प्रसारणं प्रत्ययस्वरः। शोशुचानः शुचदीप्तावित्यस्ययङ्लुकि गुणोयङ्लुकोरित्यभ्यासस्यगुणः व्यत्ययेनशानच् चर्करीत्यस्यादादिवद्भावाच्छपोलुक् चित्त्वादन्तोदात्तत्वेप्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वम्। बाधस्व बाधृविलोडनेइत्यस्यलोटिरूपं पादादित्वान्निघाताभावः। सुशर्मणः शॄहिंसायाम् दुःखंशृणातीतिऔणादिकोमनिन् सोर्मनसीइत्युत्तरपदाद्युदात्तत्वम्। स्याम् असभुवीत्यस्यलिङि यासुट्परस्मैपदेष्वित्यादिनायासुट् लिङःसलोपइतिसलोपः यासुटोङित्त्वात्श्नसोरल्लोपः निघातः॥ १॥

अथद्वितीया—

त्वंनोअस्याउषसोव्युष्टौत्वंसूरउदितेबोधिगोपाः।
जन्मेवनित्यंतनयंजुषस्वस्तोमंमेअग्नेतन्वासुजात॥ २॥

त्वम्। नः। अस्याः। उषसः। विऽउष्टौ। त्वम्। सूरे। उत्ऽइते।
बोधि। गोपाः। जन्मऽइव। नित्यम्। तनयम्। जुषस्व।
स्तोमम्। मे। अग्ने। तन्वा। सुऽजात॥ २॥

हेअग्ने त्वंअस्याः अद्यवर्तमानायाउषसोव्युष्टौव्युच्छनेप्रकाशनेसूरेसूर्येउदितेचसतिनः अग्निहोत्रादिकर्मणिप्रवृत्तानामस्माकंगोपाः गोपायिताभवामीतिबोधिबुध्यस्व केचित्सूर्योदयात्प्रागग्निहोत्रंजुह्वति केचिदुदितेतस्मिञ्जुह्वति तेषामुभयेषांपालयिताभवेत्यर्थः तन्वासुजातज्वालापरिवृतेनशरीरेणसुष्ठुजात देदीप्यमान अथवा तन्वासुजात आत्मनैवसुजातःस्वयंभूरित्यर्थः तादृशस्त्वंमेमदीयंस्तोमंत्रिवृत्पञ्चदशादिलक्षणंस्तोत्रंनित्यं जुषस्व तत्रदृष्टांतः—जन्मेवेति यथा जन्म जनकः पिता औरसंतनयं पुत्रंपरिष्वङ्गादिभिःसेवतेतद्वदस्माभिःक्रियमाणमिमंसेवस्व॥ व्युष्टौ उच्छीविवासे तमोविवास्यतेनयेतिकरणेक्तिन् व्रश्चादिनाषत्वम् तादौचनिति

कृत्यताविति गतेः प्रकृतिस्वरत्वम् । गोपाः गुपूरक्षणे गुपूधूपविच्छिपणिपनिभ्यइतिआयप्रत्ययः तदन्ताद्धातोःक्विप् अतोलोपइत्यकारलोपः लोपोव्योरितियलोपः धातुस्वरः । जुषस्व जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपं निघातः ॥ २ ॥

अथतृतीया—

त्वं॑नृ॒चक्षा॑वृष॒भानु॑पू॒र्वीः॑कृ॒ष्णास्व॑ग्नेअरु॒षोविभा॑हि ।
वसो॒नेषि॑च॒पर्षि॒॑चात्यंहः॑कृ॒धीनो॑रा॒यउ॒शिजो॑यविष्ठ ॥ ३ ॥

त्वम् । नृ॒ऽचक्षाः॑ । वृ॒ष॒भ॒ । अनु॑ । पू॒र्वीः॑ । कृ॒ष्णासु॑ । अ॒ग्ने॒ ।
अ॒रु॒षः । वि । भा॒हि॒ । वसो॒ इति॑ । नेषि॑ । च॒ । पर्षि॑ । च॒ । अति॑ ।
अंहः॑ । कृ॒धि । नः॒ । रा॒ये । उ॒शिजः॑ । य॒वि॒ष्ठ॒ ॥ ३ ॥

वृषभ कामानांवर्षितः हेअग्ने नृचक्षाः नृणांमनुष्याणां शुभाशुभकर्मणोद्रष्टाकृष्णासुरात्रिषुअरुषः आरोचमानस्त्वंअनुअनुक्रमेणपूर्वीःबह्वीःज्वालाःविभाहिविशेषेणप्रकाशय वसोःसर्वस्य प्रकाशप्रदानेनस्वस्वस्थानेषुवासयितः अग्नेत्वंनोस्मान्नेषिकर्मानुरूपफलानिचप्रापय अंहः अस्माकंदारिद्र्यलक्षणंपापं अतिपर्षिच अतिपारय निवारयेतियावत् किञ्च यविष्ठ युवतम हेअग्ने नोस्मान्रायेधनायउशिजः कामयमानान्कृधिकुरु अभिलषितफलप्रदानेनप्राप्तकामान्कुर्वित्यर्थः ॥ नृचक्षाः चक्षिङ्व्यक्तायांवाचि अयमत्रदर्शनेवर्तते असुन्नित्यनुवृत्तौ चक्षेर्बहुलंशिच्चेत्यसुन् शिद्वद्भावात्ख्याञादेशाभावः कृदुत्तरपदप्रकृतिस्वरः । वृषभ वृषसेचने अभजित्यनुवृत्तौ ऋषिवृषिभ्यांकिदितिअभच् कित्त्वाद्गुणाभावः अपादादित्वान्निघातः । पूर्वीः पुरुशब्दस्य वोतोगुणवचनादितिङीष् आद्यस्योकारस्यदीर्घश्छान्दसः प्रत्ययस्वरेणान्तोदात्तः । भाहि भादीप्तौ अन्तर्भावितण्यर्थः लोटिरूपम् । वसो वसनिवासे उरित्यनुवृत्तौशृस्वृस्निहित्रप्यसिवसीत्यादिनाउप्रत्ययः पादादित्वान्ननिघातः षाष्ठिकमाद्युदात्तत्वम् । नेषि णीञ्प्रापणे छन्दसि लोडर्थेलट् बहुलंछन्दसीतिशपोलुक् आमन्त्रितंपूर्वमविद्यमानवदितिआमन्त्रितस्य अविद्यमानवत्त्वेनपादादित्वान्ननिघातः । पर्षि पृपालनपूरणयोः चादिषुचेतिननिघातः । कृधि डुकृञ्करणे इत्यस्यलोटि सेर्ह्यपिच्चेतिहिरादेशः तस्यश्रुशृणुपृकृवृभ्यश्छन्दसोतिधिरादेशः बहुलंछन्दसीत्युप्रत्ययस्यलुक् पादादित्वान्ननिघातः । राये रादाने रातेर्डैरितिडैप्रत्ययः ऊडिदमित्यादिना

Funding by IKS-MoE

विभक्तेरुदात्तत्वम्।उशिजः वशकान्तौ वशेःकिच्चेतीजिप्रत्ययः किच्वात्सम्प्रसारणम् प्रत्ययस्वरः।यविष्ठ युवशब्दादतिशायनेइष्ठन्प्रत्ययः स्थूलदूरयुवेत्यादिनायणादेःपरस्यलोपः पूर्वस्यचगुणः आमन्त्रितत्वान्निघातः ॥ ३ ॥

अथचतुर्थी—

अषा॑ह्लोअग्नेवृष॒भोदि॑दीहि॒पुरो॒विश्वाः॒सौभ॑गासं॑जिगी॒वान्।
य॒ज्ञस्य॑ने॒ताप्र॑थ॒मस्य॑पा॒योर्जात॑वेदोबृह॒तःसु॑प्रणीते ॥ ४ ॥

अषा॑ह्लः । अ॒ग्ने॒ । वृ॒ष॒भः । दि॒दी॒हि॒ । पुर॑ः । विश्वा॑ः । सौभ॑गा ।
स॒म्ऽजि॒गी॒वान् । य॒ज्ञस्य॑ । ने॒ता । प्र॒थ॒मस्य॑ । पा॒योः ।
जात॑ऽवेदः । बृह॒तः । सु॒ऽप्र॒नी॒ते ॥ ४ ॥

हेअग्ने अषाह्लःशत्रुभिरसोढः अपराजितःस्वयंशत्रून्जयतीत्यर्थः वृषभः कामानांवर्षिता एवंभूतस्त्वंविश्वाःसर्वाःपुरःशत्रूणांपुरीः सौभगा तत्रत्यानिशोभनान्युत्तमानिधनानिचसंजिगीवान् सम्यक्जयन्दिदीहि सर्वतोज्वालाभिर्दीप्यस्व सुप्रणीतेशोभनप्रणयन जातवेदः जातप्रज्ञ हेअग्ने बृहतःउपदिष्टातिदिष्टद्विविधेतिकर्तव्यताकलापेनमहतः पायोस्तत्फलप्रदानेनरक्षकस्यप्रथमस्यमुख्यतयाप्रथमंक्रियमाणस्य एषवावप्रथमोयज्ञोयज्ञानांयज्ज्योतिष्टोमइतिश्रुतेः । तादृशस्यज्योतिष्टोमाख्यस्यनेताहविर्वहनदेवताह्वानादिक्रिययायागनिर्वाहकोभव ॥ अषाह्लः षहमर्षणे इत्यस्यनिष्ठायांहोढइतिढकारः झषस्तथोर्धोधइतिक्तस्यधः ष्टुत्वेनढः ढलोपेकृते ढ्रलोपेपूर्वस्यदीर्घइतिदीर्घः ओत्वाभावश्छान्दसः सहेःसाडःसइतिसकारस्यमूर्धन्यादेशः अव्ययपूर्वपदप्रकृतिस्वरे नञ्स्वरः। वृषभः वृषसेचने ऋषिवृषिभ्यांकिदित्यभच् चित्स्वरः। दिदीहि दिवुक्रीडादावित्यस्य यङ्लुकिलोणमध्यमैकवचनेसंज्ञापूर्वकोविधिरनित्यइत्यभ्यासस्यगुणाभावः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिपूर्वत्रासिद्धमित्यस्याप्रवृत्तौपरत्वाद्धलिचेतिदीर्घत्वं पश्चाद्धलोपः । सौभगा सुभगान्मन्त्रेइतिउद्गात्रादिषुपाठाद्भावार्थेघञ् हृद्भगसिन्ध्वन्तेइतिपूर्वपदस्यवृद्धिः उत्तरपदस्यनवृद्धिर्भवति सर्वविधीनांछन्दसिविकल्पितत्वात् सुपांसुलुगितिसुपोडादेशः तेनचसौभाग्येनधनान्युपलक्ष्यन्ते ञित्त्वादाद्युदात्तः । संजिगीवान् जिजये छन्दसिलिट् तस्यक्कसुः सन्लिटोर्जेरितिकवर्गादेशः प्रत्ययस्वरः दीर्घश्छान्दसः। पायोः पारक्षणे कृवापाजिमीत्यादिनाउण्प्रत्ययः आतोयुक्चिण्कृतोरितियुगागमः प्रत्ययस्वरः ॥ ४ ॥

अथपञ्चमी—

अच्छि॑द्रा॒शर्म॑जरितःपु॒रूणि॑दे॒वाँअच्छा॒दीद्या॑नःसु॒मे॒धाः ।
रथो॒नसस्नि॑र॒भिव॑क्षि॒वाज॒मग्ने॒त्वंरोद॑सीनःसु॒मेके॑ ॥ ५ ॥

अच्छि॑द्रा । शर्म॑ । ज॒रि॒त॒रिति॑ । पु॒रूणि॑ । दे॒वान् । अच्छ॑ ।
दीद्या॑नः । सु॒ऽमे॒धाः । रथः॑ । न । सस्निः॑ । अ॒भि । व॒क्षि॒ । वाज॑म् ।
अग्ने॑ । त्वम् । रोद॑सी॒ इति॑ । नः॒ । सु॒मेके॒ इति॑ सु॒ऽमेके॑ ॥ ५ ॥

जरितः सर्वस्यजगतः अन्तकाले जरयितः हेअग्ने सुमेधाः शोभनप्रज्ञोपेतः दीद्यानः स्वतेजसाप्रकाशमानस्त्वं देवान्यष्टव्यान्देवान् अच्छाभिलक्ष्यतदुद्देशेन क्रियमाणानिपुरूणि बहूनिशर्मस्वर्गादिसुखसाधनभूतान्यग्निहोत्रादीनिकर्माणिअच्छिद्राअच्छिद्राणिकुरु कर्तृकर्मसाधनवैकल्यराहित्येन संपूर्णानिकुरु किञ्च हेअग्ने त्वंसस्निः संभक्तासंतर्जनीयोवा यद्वा सस्निःसंस्नातःसंनिरुद्धःस्वकीयंसततगमनं संनिरुध्य हविःप्रक्षेपपर्यन्तमत्रवर्तमानस्त्वंवाजंनोस्माभिर्दीयमानं हविर्लक्षणमन्नंअभि देवानभिलक्ष्यवक्षिवहप्रापय तत्रदृष्टान्तः—रथोन रथइव यथारथोधान्यादिकमूढ्वातत्स्वामिनं प्रापयतितद्वत् किञ्च त्वंइमेरोदसीद्यावापृथिव्यौ सुमेके शोभनरूपोपेते स्वकीयप्रभाभिःप्रकाशयुक्तेकुरु ॥ दीद्यानः दीदेतिर्दीप्तिकर्मा तस्मात्शानच् अभ्यस्तानामादिरित्याद्युदात्तत्वम् । सुमेधाः नित्यमसिच्प्रजामेधयोरित्यसिच्प्रत्ययः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सस्निः षसस्वप्ने अस्मादौणादिकोनिन् नित्त्वादाद्युदात्तः । वक्षि वहप्रापणे अस्यलोटःसिपिबहुलंछन्दसीतिशपोलुक् ढत्वकत्वे हिरादेशश्छान्दसत्वान्नभवति निघातः ॥ ५ ॥

अथषष्ठी—

प्रपी॑पयवृषभजिन्व॒वाजा॒नग्ने॒त्वंरोद॑सीनःसु॒दोघे॑ ।
दे॒वेभि॑र्दे॑वसु॒रुचा॑रुचा॒नोमानो॒मर्त॑स्यदुर्म॒तिःपरि॑ष्ठात् ॥ ६ ॥

प्र । पी॒प॒य॒ । वृ॒ष॒भ॒ । जिन्व॑ । वाजा॑न् । अग्ने॑ । त्वम् । रोद॑सी॒
इति॑ । नः॒ । सु॒दोघे॒ इति॑ सु॒ऽदोघे॑ । दे॒वेभिः॑ । दे॒व॒ । सु॒ऽरुचा॑ ।
रु॒चा॒नः । मा । नः॒ । मर्त॑स्य । दुः॒ऽम॒तिः परि॑ । स्था॒त् ॥ ६ ॥

वृषभ कामानांवर्षितः हेअग्ने त्वंनोस्माकं प्रपीपयअभिलषितफलानिप्रवर्धय वाजानन्नानिचजिन्वप्रयच्छ किञ्च देवदीप्यमानहेअग्ने सुरुचाशोभनदीप्त्यारुचानः शोभमानस्त्वं देवेभिर्यजनीयदेवैःसहितः अस्माकंरोदसी इमेद्यावापृथिव्यौ सुदोघेवृष्टिद्वाराअभिमतफलप्रदानेनसष्ठुदोग्ध्र्यौकुरु तथामर्तस्यमनुष्यस्यशत्रोर्दुर्मतिः दुष्टबुद्धिप्रयुक्तोभिभवः नोस्मान्मापरिष्ठात् परितोमागच्छतु ॥ पीपय प्यायतेर्यङ्लुगन्तस्य लोटिशपोलुगभावश्छान्दसः पाणाने इत्यस्यण्यन्तस्य लुङिचङिद्विर्वचनाभ्यासदीर्घौ सिपोलोपश्छान्दसः। जिन्व अविजिविधिविप्रीणनार्थाः एतस्य लोटिइदित्त्वान्नुम् शप् अतोहेरितिहेर्लुक् आमन्त्रितस्याविद्यमानवत्त्वेन अतिङउत्तरत्वाभावान्न निघातः। सुदोघे दोहनंदोघः भावेघञ् कुत्वंछान्दसम् आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । दुर्मतिः मनुअवबोधने मन्यतइतिमतिर्बुद्धिः कर्तरिक्तिच् दुष्टाबुद्धिः अव्ययपूर्वपदप्रकृतिस्वरत्वेप्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ६ ॥

अथसप्तमी—

इळा॑मग्नेपु॒रु॒दंसं॑स॒निंगोःश॑श्वत्त॒मंहव॑मानायसाध ।
स्यान्नः॑सू॒नुस्तन॑यो॒वि॒जावाग्ने॒सातें॑सु॒म॒तिर्भू॑त्व॒स्मे ॥ ७ ॥ १५ ॥

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् ।
हव॑मानाय । सा॒ध॒ । स्यात् । नः॒ । सू॒नुः । तन॑यः । वि॒जाऽवा॑ ।
अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ ७ ॥ १५ ॥

उतोपितृभ्यामित्यस्मिन्वर्गेव्याख्यातेयमृक् ॥ ७ ॥

॥ इतिद्वितीयस्यप्रथमेपञ्चदशोवर्गः ॥ १५ ॥

अयमग्निरितिचतुर्थंषळृचंसूक्तंआग्नेयम् अत्रानुक्रमणिका—अयमग्निःषट्प्रागाथमिति । उत्कीलस्त्वितितुशब्दप्रयोगादस्यापिसूक्तस्यसएवऋषिः अत्रविषमसंख्यानामृचांबृहतीछन्दः तृतीयपादस्यद्वादशाक्षरत्वात् समसंख्यानांतुसतोबृहतीप्रथमतृतीयपादयोर्द्वादशाक्षरत्वात् उक्तंच—अयुजौजागतौसतोबृहतीति ।

Funding by IKS-MoE

तस्मिन्सूक्तेप्रथमा—

अ॒यम॒ग्निःसु॒वीर्य॒स्येशे॑म॒हःसौभ॑गस्य ।
रा॒यई॑शेस्वप॒त्यस्य॒गोम॑त॒ईशे॑वृत्र॒हथा॑नाम् ॥ १ ॥

अ॒यम् । अ॒ग्निः । सु॒ऽवीर्य॑स्य । ईशे॑ । म॒हः । सौभ॑गस्य ।
रा॒यः । ई॒शे॒ । सु॒ऽअ॒प॒त्यस्य॑ । गोऽम॑तः । ईशे॑ । वृ॒त्र॒ऽहथा॑नाम् ॥ १॥

उत्कीलः स्तौति—अयंयजनीयत्वेनांगुल्यानिर्दिश्यमानोग्निः सुवीर्यस्यशोभनसामर्थ्योपेतस्य महोमहतःसौभगस्यसौभाग्यस्यईशे ईष्टे ईश्वरोभवति सर्वस्यबलारोग्यहेतुतयासौभाग्यकारित्वात् तथागोमतःगवादिपशुयुक्तस्यस्वपत्यस्य शोभनापत्यस्यरायोधनस्येशेईष्टे पुत्रपश्वाद्युद्देशेन क्रियमाणकर्मफलसम्पादकत्वेनतत्स्वामित्वात् तथा एवंभूतोग्निःवृत्रहथानां हननंहथः शत्रुभूतपापविनाशनानामपीशेईष्टे त्वयिसमर्पितकर्मणामस्माकं त्वत्प्रसादात्पापक्षयोभवतीतितस्यापिस्वामी॥ ईशे ईशऐश्वर्ये अदादित्वाच्छपोलुक् लोपस्तआत्मनेपदेष्वितितलोपः पादादित्वादनिघातः। सौभगस्य सुभगस्यभावःसौभगं उद्गात्रादित्वादञ् सर्वविधीनांछन्दसिविकल्पितत्वादन्नहृद्भगेत्यादिनाप्राप्तायाउत्तरपदवृद्धेरभावः । रायः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । ईशे निघातः । स्वपत्यस्य नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । वृत्रहथानां वृतुवर्तने अस्मात् स्फायितञ्चिवञ्चीत्यादिनारक्प्रत्ययः कित्त्वादगुणः हनहिंसागत्योरित्यस्मात् हनिकुषिनीरमिकाशिभ्यइतिक्थन् कित्त्वादनुनासिकलोपः कृदुत्तरपदप्रकृतिस्वरः । सुवीर्यस्य अधीगर्थेत्यादिनाकर्मणिषष्ठी ॥ १ ॥

अथद्वितीया—

इ॒मंन॑रोमरुतःसश्चता॒वृधं॒यस्मि॒न्राय॒ःशेवृ॑धासः ।
अ॒भियेसन्ति॒पृत॑नासुदू॒ढ्यो॑वि॒श्वाहा॒शत्रु॑माद॒भुः ॥ २ ॥

इ॒मम् । न॒रः॒ । म॒रु॒तः॒ । स॒श्च॒त॒ । वृध॑म् । यस्मि॑न् । राय॑ः ।
शेऽवृ॑धासः । अ॒भि । ये । सन्ति॑ । पृत॑नासु । दु॒ःऽध्य॑ः । वि॒श्वाहा॑ ।
शत्रु॑म् । आ॒ऽद॒भुः ॥ २ ॥

Funding by IKS-MoE

नरःकर्मणांनेतारः हेमरुतोदेवायूयंवृधंपशुपुत्रादिवर्धकंइममस्माभिःस्तूयमानमग्निंसश्चत हविरानयनार्थंसेवध्वं कीदृशोग्निः कीदृशास्तेमरुतश्चइत्याकांक्षायामाह—यस्मिन्देवेरायोधनानिशेवृधासः दानभोगाद्युपयोगेनसुखस्यवर्धकानिसन्ति येचदेवाः पृतनासुसेनासुसेनोपलक्षितेषुसंग्रामेषुदूढ्यः दुष्टध्यानोपेतानात्मनोहिंसकान्शत्रूनभिसन्ति अभिभवन्ति येचविश्वाहाविश्वान्यहानियस्मिन्नखण्डेकालेतस्मिन्सर्वदाशत्रुमात्मनोद्वेष्टारंआदभुः आदभ्नुवन्तिहिंसन्ति ॥ एवंभूतास्तेसर्वेमरुतोयूयंतमिममग्निंसेवध्वमितिपूर्वेणान्वयः ॥ सश्चत षश्चसङ्गे इत्यस्माल्लोटिरूपं जकारस्यव्यत्ययेनचकारः निघातः । शेवृधासः वर्णव्यत्ययः शंसुखंवर्धयतीत्यसुन्नित्यसुन् गुणाभावश्छान्दसः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वम्चेत्यौणादिकसूत्रात् पूर्वपदप्रकृतिस्वरः। सन्ति अस्भुवि । दूढ्यः ध्यैचिन्तायाम् अन्येभ्योपिदृश्यतइतिक्विप् दृशिग्रहणात्सम्प्रसारणं दुरोदाशनाशदभध्येषूत्त्वंवक्तव्यं उत्तरपदादेश्चष्टुत्वंचेतिऊत्वढत्वे छन्दस्युभयथेतिशसिइयङादेशंबाधित्वायणादेशः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः शसःसुप्त्वादनुदात्तत्वेकृतेउदात्तस्वरितयोर्यणइतिशसःस्वरितत्वम् । आदभुः दंभुदंभने अस्माल्लिट्युसिरूपम् श्रन्थिग्रन्थिदम्भिस्वञ्जीनामुपसङ्ख्यानमितिकिद्वद्भावादनुनासिकलोपः द्विर्वचनप्रकरणेछन्दसिवेतिवक्तव्यमितिद्विर्वचनाभावः यद्वृत्तयोगादनिघातः सतिशिष्टस्वरोबलीयानितिप्रत्ययस्वरः ॥ २ ॥

अथतृतीया—

सत्वंनो॑रा॒यःशि॑शीहि॒मीढ्वो॑अग्नेसु॒वीर्य॑स्य ।
तुवि॑द्युम्न॒वर्षि॑ष्ठस्यप्र॒जाव॑तोनमी॒वस्य॑शु॒ष्मिणः॑ ॥ ३ ॥

सः । त्वम् । न॒ः । रा॒यः । शि॒शी॒हि॒ । मीढ्वः॑ । अ॒ग्ने॒ । सु॒ऽवीर्य॑स्य ।
तुवि॑ऽद्युम्न । वर्षि॑ष्ठस्य । प्र॒जाऽव॑तः । अ॒न॒मी॒वस्य॑ । शु॒ष्मिणः॑ ॥ २ ॥

हेअग्ने सतथाविधस्त्वंनोस्मान्रायः तृतीयार्थेषष्ठी धनेनशिशीहि तीक्ष्णान्कुरु अस्मान्धनसमृद्धान्कुरु किञ्च तुविद्युम्नबहुधनोपेतअतएवमीढ्वःमीढ्वन्कामानांसेक्तः हेअग्ने त्वंवर्षिष्ठस्य वृद्धतमस्यप्रभूतस्यप्रजावतः अपत्ययुक्तस्यअनमीवस्यारोग्यहेतोः अतएवशुष्मिणः बलहेतोः सुवीर्यस्यशोभनसामर्थ्ययुक्तस्यान्नस्यसंबन्धिनोस्मान्कुरु यद्वा एतत्सर्वंविशेषणतयायोजनीयम् एताःषष्ठ्यस्तृतीयार्थे एतदुक्तंभवति धनेनापत्यारोग्यशरीरबलोपेतेनान्नेनचास्मान्त्समृद्धान्कुर्विति ॥ शिशीहि शिञ्निशाने इत्यस्यलोटिबहुलंछन्दसीतिविकरणस्यश्लुः वाछन्दसीति

विकल्पेनङित्त्वादङितश्चेतिहेर्धिरादेशोनभवति दीर्घश्छान्दसः निघातः । मीढ्वः मिहसेचनेइत्यस्यक्वसौ दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनाड्ढत्वम् उपधादीर्घश्च संबुद्धौनुमिकृतेहल्ङ्यादिलोपेसंयोगान्तलोपेचकृतेनकारस्यमतुवसोरुसंबुद्धौछन्दसीतिरुः पादादित्वादाद्युदात्तः ॥ ३ ॥

अथचतुर्थी–

चक्रिर्योविश्वाभुवनाभिसासहिश्चक्रिर्देवेष्वादुवः ।
आदेवेषुयततआसुवीर्यआशंसउतनृणाम् ॥ ४ ॥

चक्रिः । यः । विश्वा । भुवना । अभि । ससहिः । चक्रिः । देवेषु ।
आ । दुवः । आ । देवेषु । यतते । आ । सुऽवीर्ये । आ ।
शंसे । उत । नृणाम् ॥ ४ ॥

योयमग्निःचक्रिः सर्वस्यजगतःकर्ता सचविश्वाभुवनाविश्वानिभुवनानिअभिअभिविशति तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः । चक्रिःकर्तासोग्निः सासहिः पुरोडाशादिहविर्भारसहनशीलःसन् दुवः अस्माभिर्दत्तंहविर्देवेषुयजनीयदेवेषु आ आनयति सचाग्निः देवेषुदेवनशीलेषुस्तोतृषुआयततेआभिमुख्येनगच्छति उतापिच नृणांयज्ञस्यनेतॄणांशस्त्रिणांशंसे शंसनंशंसः शस्त्रंतस्मिन्सोग्निरागच्छति तथानृणांमनुष्याणांसुवीर्येशोभनवीर्योपेतेयुद्धेतद्रक्षणार्थमागच्छति अनेनाग्नेः सर्वव्यापकताप्रतिपादिताभवति यद्वा विश्वानिभुवनानिचक्रिःअभिसासहिरभिभवनशीलःआकारश्चार्थे देवेषुचदुवःपरिचरणंचक्रिः कर्तायएवंभूतः सआयततेइत्यादिपूर्ववत्॥ चक्रिःडुकृञ्करणे आदृगमहनजनःकिकिनौलिट्चेतिकिन्प्रत्ययः लिड्वद्भावात्द्विर्वचनम् कित्त्वाद्गुणाभावः नित्स्वरः । सासहिः षहमर्षणेइत्यस्माद्यङन्तात् सहिवहिचलिपतिभ्योयङन्तेभ्यःकिकिनाविति किः प्रत्ययस्वरः । यतते यतीप्रयत्ने यद्वृत्तयोगादनिघातः । शंसे भावेघञ् ञित्स्वरः । नृणां नृचेतिविकल्पेनदीर्घाभावः नामन्यतरस्यामितिविभक्तेरुदात्तत्वम् । विश्वेत्यादिषुनलोकाव्ययेतिषष्ठीप्रतिषेधः ॥ ४ ॥

अथपञ्चमी–

मानोअग्नेमतयेमावीरतायैरीरधः ।
मागोतायैसहसस्पुत्रमानिदेपद्वेषांस्याकृधि ॥ ५ ॥

Funding by IKS-MoE

मा । न॒ः । अ॒ग्ने॒ । अम॑तये । मा । अ॒वीर॑तायै । री॒र॒ध॒ः ।
मा । अ॒गोता॑यै । स॒ह॒स॒ः । पु॒त्र॒ । मा । नि॒दे । अप॑ ।
द्वेषां॑सि । आ । कृ॒धि॒ ॥ ५ ॥

सहसस्पुत्र बलस्यपुत्र हेअग्ने त्वंनोस्मान् अमतयेशत्रुभूतायदारिद्र्यायमारीरधः संसिद्धान्विषयभूतान्माकुरु तथाअवीरतायैअवीरशब्देनतद्वान्लक्ष्यते वीरस्यभावोवीरता नवीरता अवीरतातस्यै अस्मानपुत्रतायाविषयभूतान्माकुरु तथात्वमस्मान्अगोतायैगवादिपशुसंपत्त्यभावस्य विषयभूतान्माकुरु किञ्चास्मान्निदेनिन्दायाविषयभूतान्माविधेहि तथात्वंद्वेषांसिकर्मापराधनिमित्तान् द्वेषान् अपाकृधि अपाकुरु निवारय ॥ अवीरतायै वीराअस्यसन्तीतिवीरः अर्शआदित्वादच् तस्यभावःवीरता तस्यभावस्त्वतलावितितल् नवीरताअवीरता नञःस्वरेप्राप्ते परादिश्छन्दसिबहुलमितिनञउत्तरस्यादेरुदात्तता । रीरधः राधसाधसंसिद्धौअस्माण्ण्यन्ताच्छान्दसेलुङि णिश्रिद्रुस्रुभ्यइतिच्लेश्चङादेशः णेरनिटीतिणिलोपः णौचङ्युपधायाइत्युपधाह्रस्वः चङीतिद्विर्वचनं सन्वल्लघुनिचङ्परेइतिसन्वद्भावः सन्यतइत्यभ्यासस्येत्वम् तस्यदीर्घोलघोरिति दीर्घः नमाङ्योगेइत्यडभावः निघातः । अगोतायै गोशब्देनगोमान्लक्ष्यते नगौःअगौःअगोर्भावःअगोता तस्यभावइतितल् लित्स्वरः । सहसस्पुत्र सुबामन्त्रितेपराङ्गवत्स्वरेइतिपरांगवद्भावात्सहसस्पुत्रइत्येतयोःसर्वानुदात्तत्वम् । निदे णिदिकुत्सायांअस्मात्सम्पदादित्वाद्भावे क्विप् अनित्यमागमशासनमितिनुमभावः सावेकाचइतिविभक्तेरुदात्तता ॥ ५ ॥

अथषष्ठी—

श॒ग्धिवाज॑स्यसुभगप्र॒जाव॒तोग्ने॑बृह॒तोअ॑ध्व॒रे ।
संरा॒याभूय॑सासृजमयो॒भुना॒तुवि॑द्युम्न॒यश॑स्वता ॥ ६ ॥ १६ ॥

श॒ग्धि । वाज॑स्य । सु॒ऽभ॒ग॒ । प्र॒जाऽव॑तः । अग्ने॑ । बृ॒ह॒तः । अ॒ध्व॒रे ।
सम् । रा॒या । भूय॑सा । सृ॒ज॒ । म॒यः॒ऽभुना॑ । तुवि॑ऽद्युम्न ।
यश॑स्वता ॥ ६ ॥ १६ ॥

Funding by IKS-MoE

सुभग शोभनधनोपेत हेअग्ने त्वंअध्वरेअस्माभिःक्रियमाणेस्मिन्नग्निष्टोमादिकर्मणि बृहतोमृहतः प्रभूतस्यप्रजावतः अपत्योपेतस्यवाजस्यान्नस्यशग्धिईशिषे तादृशमन्नमस्मिन्नध्वरेअस्मभ्यंदेहि किञ्च तुविद्युम्नबहुधनयुक्तहेअग्ने मयोभुना मयइतिसुखनाम शेवृधंमयइतितन्नामसुपाठात् तव दानाद्युपयोगहेतुतयासुखस्यभावकेन अतएवयशस्वताकीर्तिमताभूयसाअतिप्रभूतेनराययाएवंविधेनधनेनास्मान्त्संसृज संयोजय ॥ शग्धि शकॢशक्तावित्यस्यलोटिबहुलंछन्दसीतिविकरणस्यलुक् हुझल्भ्योहेर्धिरितिधिरादेशः हेरपित्त्वादुदात्तता । राया ऊडिदमितिविभक्तेरुदात्तत्वम् । भूयसा बहुशब्दात् द्विवचनविभज्योपपदेइतिईयसुन् बहोर्लोपोभूचबहोरितिईयसुनःसर्वस्यलोपेप्राप्ते आदेःपरस्येतिप्रत्ययस्यादेर्लोपः बहोर्भूरादेशश्च नित्स्वरः । सृज सृजविसर्गे तुदादिः लोटिरूपं निघातः । मयोभुना भवतेरौणादिकोडुप्रत्ययः । तुविद्युम्न पादादित्वादनिघातः ॥ ६ ॥

॥ इतितृतीयस्यप्रथमेषोडशोवर्गः ॥ १६ ॥

समिध्यमानइतिपञ्चर्चंपञ्चमंसूक्तंआग्नेयंत्रैष्टुभं वैश्वामित्रस्यकतस्यार्षम् तदुक्तं—समिध्यमानःपञ्चकतोवैश्वामित्रस्त्विवति । आहोतेत्यादिसूक्तदशकस्यविनियोगउक्तः प्रातरनुवाकाश्विनशस्त्रयोरिति तत्रेदंचतुर्थम् वाजपेयेबार्हस्पत्येचरावग्निंसुदीतिमितिस्विष्टकृतोयाज्या वाजपेयेनेत्यादिखण्डेसूत्रितम्—अग्निंसुदीतिंसुदृशंगृणन्तइतिसंयाज्येइति ।

तस्मिन्सूक्तेप्रथमा—

स॒मि॒ध्यमा॑नःप्रथ॒मानु॒धर्मा॒सम॒क्तुभि॑रज्यतेवि॒श्ववा॑रः ।
शो॒चिष्के॑शोघृ॒तनि॑र्णिक्पाव॒कःसु॑य॒ज्ञोअ॒ग्निर्य॒जथा॑यदे॒वान् ॥१॥

स॒म्ऽइ॒ध्यमा॑नः । प्र॒थ॒मा । अनु॑ । धर्म॑ । सम् । अ॒क्तुऽभिः॑ ।
अ॒ज्य॒ते॒ । वि॒श्वऽवा॑रः । शो॒चिःऽके॑शः । घृ॒तऽनि॑र्निक् । पा॒व॒कः ।
सु॒ऽय॒ज्ञः । अ॒ग्निः । य॒जथा॑य । दे॒वान् ॥ १ ॥

कतःस्तौति—धर्म धारणाद्धर्मअग्नेःयज्ञनिर्वाहकतयातद्धारकत्वाद्धर्माग्निः तथाचमन्त्रः-धर्माणमग्निंविदथस्यसाधनमिति । तादृशोग्निः प्रथमाप्रथमंयज्ञोपक्रमेअनुअग्न्यायतनेष्वनुक्रमे-

णसमिध्यमानःसम्यक्प्रज्वाल्यमानः यद्वा अनुधर्मं धर्मसाधनभूतेषुयज्ञेषुप्रथमंसमिध्यमानःविश्ववारः विश्वैःसर्वैर्यजमानैर्यष्टव्यतयावरणीयःशोचिष्केशःशोचींषिज्वालाः केशायस्यसतथोक्तः घृतनिर्णिक्निर्णिगितिरूपनाम दीप्तिरूपः यद्वा घृतनिर्णिक् घृतस्यतापनद्वारा विलपनेनशोधकः पावकः अस्मदीयपापशोधकःसुयज्ञः शोभनयज्ञोपेतः एवंभूतोग्निः देवानस्माभिर्यजनीयान्देवान्यजथाययष्टुं अक्तुभिरंजनसाधनैर्घृतादिभिःसमज्यते सम्यक्सिच्यते ॥ प्रथमा सुपांसुलुगितिसुपोडादेशः । धर्म धृधारणेइत्यस्मादन्येभ्योपिदृश्यन्तइतिमनिन् ह्रस्वत्वंछान्दसं नित्स्वरः । अक्तुभिः अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु अज्यतेएभिरितिबाहुलकात्क्तुः करणे कित्वादुपधालोपः प्रत्ययस्वरः । अज्यते सएवधातुः कर्मणियक् अनिदितामित्युपधालोपः । विश्ववारः विश्वैर्यजमानैर्होतृद्वारावारोवारणंयस्येत्यत्रवृञ्वरणेइत्यस्यण्यन्तस्यरूपम् वारः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । घृतनिर्णिक् णिजिर्शौचपोषणयोः क्विप् घृतंनेनेक्तीतिद्वितीयातत्पुरुषत्वात्पूर्वपदस्वरः। यजथाय यजदेवपूजासंगतिकरणदानेषु अस्मादौणादिकोथप्रत्ययः तादर्थ्येचतुर्थी प्रत्ययस्वरः ॥ १ ॥

अथद्वितीया—

यथाय॑जोहो॒त्रम॑ग्नेपृथि॒व्यायथा॑दि॒वोजा॑तवेदश्चिकि॒त्वान् ।
ए॒वाने॑नह॒विषा॑यक्षिदे॒वान्म॑नु॒ष्वद्य॒ज्ञंप्रति॑रे॒मम॒द्य ॥ २ ॥

यथा॑ । अय॑जः । हो॒त्रम् । अ॒ग्ने॒ । पृ॒थि॒व्याः । यथा॑ । दि॒वः ।
जा॒त॒ऽवे॒दः॒ । चि॒कि॒त्वान् । ए॒व । अ॒नेन॑ । ह॒विषा॑ । य॒क्षि॒ ।
दे॒वान् । म॒नु॒ष्वत् । य॒ज्ञम् । प्र । ति॒र॒ । इ॒मम् । अ॒द्य ॥ २ ॥

हेअग्ने त्वंयथापृथिव्याः यजमानभूतायाः पृथिवीदेवतायाःपूर्वंहोतासन् होत्रंहोमसाधनं हविःअयजःअयाजीः जातवेदः जातप्रज्ञ हेअग्ने चिकित्वान्कर्मविषयज्ञानवान्त्वंयथादिवः यजमानभूतायाः द्युदेवतायाः होताभूत्वाहविरयजः एव एवंत्वंअस्मिन्कर्मणिहोतासन्अनेन अस्माभिर्दीयमानेनहविषादेवान्यक्षियज किञ्च त्वंअद्येदानीमस्माभिःक्रियमाणमिमंयज्ञंप्रतिर अनुष्ठानसंपूर्त्यापारंगमय तत्रदृष्टान्तः—मनुष्वदिति यथामनोर्यज्ञमनुष्ठानसंपूर्त्यापारमनैषीस्तद्वत् इमंयज्ञंपारंनयेत्यर्थः ॥ यथा प्रकारवचनेथालितिथाल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ।

Funding by IKS-MoE

अयजः यजेर्लङिरूपं यच्छब्दयोगादनिघातः। होत्रं हुदानादनयोः हुयामाशुभसिभ्यस्त्रन्निति त्रन्प्रत्ययेनान्तोदात्तः। दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् । चिकित्वान् कितज्ञानेइत्यस्य क्वसौरूपं प्रत्ययस्वरः । अनेन इदम्शब्दस्यतृतीयैकवचने अनाप्यकइत्यनादेशः। यक्षि यजेर्लेटिरूपम्। मनुष्वत् तत्रतस्येवेतिवतिः नभोङ्गिरोमनुषांवत्युपसंख्यानमितिभसंज्ञत्वादुत्वाभावः प्रत्ययस्वरः। तिरतेर्लोटिव्यत्ययेनशः ऋतइद्धातोरितीत्वं निघातः ॥ २ ॥

अथतृतीया—

त्रीण्या॑यूं॑षि॒तव॑जातवेदस्ति॒स्रआ॒जानी॑रु॒षस॑स्तेअग्ने ।
ताभि॑र्दे॒वाना॒मवो॑यक्षिवि॒द्वानथा॑भव॒यज॑मानाय॒शंयोः ॥ ३ ॥

त्रीणि॑ । आयूं॑षि । तव॑ । जा॒त॒ऽवे॒दः॒ । ति॒स्रः । आ॒ऽजानीः॑ ।
उ॒षसः॑ । ते॒ । अ॒ग्ने॒ । ताभिः॑ । दे॒वाना॑म् । अवः॑ । य॒क्षि॒ । वि॒द्वान् ।
अथ॑ । भ॒व॒ । यज॑मानाय । शम् । योः ॥ ३ ॥

हेजातवेदः जातप्रज्ञ तवत्रीण्यायूंषि त्रिविधानिआज्यौषधिसोमात्मकान्यन्नानिआहारतयाकल्पितानि हेअग्ने तिस्रउषसः एकाहाहीनसत्रगताउषोभिमानिन्यस्तिस्रोदेवताः तेतवआजानीर्जनयित्र्योमातरः यद्वा उषोभिमानिन्योदेवतास्तवआजानीः त्वामनुजाताःतिस्रःस्वसारः तथाचस्वसृःप्रकृत्यमन्त्रः—प्रजामेकारक्षत्यूर्जमेकाराष्ट्रमेकारक्षतीति। ताभिरुषोभिमानिनीभिः देवताभिःसहितस्त्वं अवः अस्माभिर्दीयमानंहविर्लक्षणमन्नंदेवानांयक्षि यष्टव्यदेवानांप्रयच्छ अथानन्तरंविद्वान्जानंस्त्वं यजमानायशंभव सुखहेतुर्भव योश्चसुखस्यमिश्रयिताचभव ॥ तव युष्मदस्मदोर्ङसीत्याद्युदात्तः। तिस्रः त्रिशब्दस्यरूपयर्थेत्रिचतुरोःस्त्रियामितितिसृइत्यादेशः अचिरऋतइतिरेफादेशः तिसृभ्योजसइतिविभक्तेरुदात्तत्वम्। आजानीः जनजनने जनिघसिभ्यामिणितिकर्तरिइण् णित्त्वादुपधावृद्धिः वाछन्दसीतिसवर्णदीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम्। अवः अवरक्षणे असुन्नित्यसुन् नित्स्वरः। यक्षि यजेर्दानार्थस्यलेटिरूपम् । यजमानाय पूङ्यजोः शानन्नितिशानन् नित्स्वरः । योः युमिश्रणेइत्यस्मादन्येभ्योपिदृश्यन्तइतिविच् आर्धधातुकलक्षणगुणः कृदुत्तरपदप्रकृतिस्वरः ॥ ३ ॥

Funding by IKS-MoE

अथचतुर्थी–

अग्निंसुदीतिंसुदृशंगृणन्तोनमस्यामस्त्वेड्यंजातवेदः ।
त्वांदूतमरतिंहव्यवाहंदेवाअकृण्वन्नमृतस्यनाभिम् ॥ ४ ॥

अग्निम् । सुऽदीतिम् । सुऽदृशम् । गृणन्तः । नमस्यामः । त्वा ।
ईड्यम् । जातऽवेदः । त्वाम् । दूतम् । अरतिम् । हव्यऽवाहम् ।
देवाः । अकृण्वन् । अमृतस्य । नाभिम् ॥ ४ ॥

जातवेदः जातस्यसर्वस्यवेदितः हेअग्नेगृणन्तः त्वद्विषयांस्तुतिंकुर्वाणाः वयंअग्निंअंगनादिगुणोपेतंसुदीप्तिंअतएवसुदृशं सर्वैःसुदर्शनंईड्यंस्तुत्यं एवंविधंत्वात्वांनमस्यामः हविर्भिःपूजयामः किंच देवाअस्माभिर्यजनीयाइन्द्रादयोदेवाः अरतिंनविद्यतेरतिर्विषयेषुप्रीतिर्यस्यासावरतिः विषयेष्वप्यसक्तं अतएवामृतस्यदेवान्नभूतायाःसुधायाः नाभिं नाभिस्थानंत्वांतादृशंहव्यवाहंदूतमकृण्वन् हविषांवोढारंतदूमकुर्वन् दूतोहिद्विविधः वार्ताहारीकार्यंकारीचेति तत्रत्वांकार्यकारिणंदूतमकार्षुरितिभावः ॥ सुदीतिं दीङ्क्षये दीयतेविनाश्यतेआभिस्तमइतिकरणेक्तिन् दीतयोदीप्तयः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सुदृशं दृशिर्प्रेक्षणे तस्माच्छक्यार्थे खल् संज्ञापूर्वकोविधिरनित्यइतिगुणाभावः लितीतिप्रत्यात्पूर्वस्योदात्तत्वम् । गृणन्तः गृणातिरर्चतिकर्मा । नमस्यामः नमस्पूजायां नमोवरिवश्चित्रङःक्यजितिक्यच् तदन्ताल्लटिरूपम् पादादित्वादनिघातः । दूतं टुदुउपतापे दुतनिभ्यांदीर्घश्चेतिक्तः तत्सन्नियोगेनधातोर्दीर्घः दूतः इतस्ततःसंचारीत्यर्थः प्रत्ययस्वरः । अरतिम् रमुक्रीडायां भावेक्तिन् । अकृण्वन् कृविर्हिंसाकरणयोरित्यस्यलङि धिन्विकृण्व्योरचेत्युप्रत्ययः अकारश्चान्तादेशः निघातः ॥ ४ ॥

अथपञ्चमी–

यस्त्वद्धोतापूर्वोअग्नेयजीयान्द्विताचसत्तास्वधयाचशंभुः ।
तस्यानुधर्मप्रयजाचिकित्वोथानोधाअध्वरंदेववीतौ ॥ ५ ॥ १७ ॥

यः । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । द्विता । च ।
सत्ता । स्वधया । च । शम्ऽभुः । तस्य । अनु । धर्म । प्र । यज ।
चिकित्वः । अथ । नः । धाः । अध्वरम् । देवऽवीतौ ॥ ५ ॥ १७ ॥

हेअग्ने त्वत् त्वत्तोपिपूर्वः प्रथमभावीयजीयान्अतिशयेनयष्टायोयःकश्चिद्धोताहोमनिष्पादकः द्विताद्वैधंमध्यमेचोत्तमस्थानेचस्वधयासोमाख्येनान्नेनसहसत्तानिषण्णःसन्शंभुः यष्टॄणांसुखभूरभूत् द्वितीयपादमेवं यास्कोव्याचख्यौ—द्विताचसत्तास्वधयाचशंभुः द्वैधंसत्तामध्यमेचस्थानउत्तमेचशंभुः सुखभूरिति¹ । चिकित्वः धर्मविषयचेतनावान् हेअग्ने तस्ययः त्वत्तोपिपूर्वंभावीहोतानिरूपितः तस्यहोतुः अनुधर्मंधर्माननुतेनानुष्ठितधर्मांनुपलक्ष्य प्रयज प्रकर्षेणदेवान्पूजय अथानन्तरं हेअग्नेत्वंनोस्माकं संबन्धिनमध्वरमिमंयज्ञंदेववीतौ देवानां प्रीत्यर्थं धाः विधेहि । यजीयान् यष्टृशब्दस्यतुश्छन्दसीतिईयसुन् तस्मिन् तुरिष्ठेमेयःस्वितितृलोपः नित्त्वादाद्युदात्तः । द्विता द्विशब्दात्संख्यायाविधार्थेधेतिधाप्रत्ययः धकारस्यतकारश्छान्दसः प्रत्ययस्वरः । सत्ता षद्लृविशरणगत्यवसादनेष्वित्यस्यताच्छीलिकस्तृन् नित्स्वरः । स्वधया स्वर्लोकंदधाति यजमानस्येतिस्वधा आतोनुपसर्गेकइतिकप्रत्ययः कृदुत्तरपदप्रकृतिस्वरः । शंभुः शंसुखं अस्माद्भवतीति भूसत्तायां विप्रसंभ्योड्वसंज्ञायामित्यत्रमितद्र्वादेरुपसंख्यानात् डुप्रत्ययः डित्वाट्टिलोपः । यज यजेर्लोटिरूपम् । चिकित्वः कितज्ञानेइत्यस्यक्वसौरूपं मतुवसोरुसंबुद्धौछन्दसीतिनकारस्यरुः । अथानः निपातस्यचेतिदीर्घः । धाः डुधाञ्धारणपोषणयोरित्यस्यछान्दसे लुङिरूपं अडभावश्छान्दसः । देववीतौ देवानांवीतिरशनंयत्रप्रीतौ साप्रीतिर्देववीतिः वीकान्त्यादिषु इत्यस्माद्भावेक्तिन् बहुव्रीहौपूर्वपदस्वरः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेसप्तदशोवर्गः ॥ १७ ॥

भवानोअग्नइतिपञ्चर्चंषष्ठंसूक्तम् भवानइत्यनुक्रमणिका कतोवैश्वामित्रस्त्वितितुशब्दप्रयोगादस्यापिवैश्वामित्रःकतऋषिः अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः प्रवर्ग्येभिष्टवेभवानोअग्नइतितृचोविनियुक्तः सूत्रितंच—भवानोअग्नेसुमनाउपेताविति तृचाइति ।

तस्मिन्सूक्तेप्रथमा—

भवा॑नोअग्नेसुमना॒उपे॑तौ॒सखे॑व॒सख्ये॑पि॒तरे॑वसा॒धुः ।
पु॒रु॒द्रुहो॒हिक्षि॒तयो॒जना॑नां॒प्रति॑प्रती॒चीर्दह॑ता॒दरा॑तीः ॥ १ ॥

भव॑ । न॒ः । अ॒ग्ने॒ । सु॒ऽमना॑ः । उप॑ऽइतौ । सखा॑ऽइव । सख्ये॑ ।
पि॒तरा॑ऽइव । सा॒धुः । पु॒रु॒ऽद्रुह॑ः हि । क्षि॒तय॑ः । जना॑नाम् ।
प्रति॑ । प्र॒ती॒चीः । द॒ह॒ता॒त् । अरा॑तीः ॥ १ ॥

Funding by IKS-MoE

हेअग्ने त्वं उपेतौअस्माभिः क्रियमाणप्रवर्ग्याख्यकर्मणः आभिमुख्येनागमनेसुमनाः तत्कर्मसिद्ध्यर्थमनुकूलमनस्कोभूत्वानः साधुर्भवअस्मत्संबन्धिकर्मसाधकोभव तत्रदृष्टान्तद्वयम्—सखेवसख्येपितरेवेति यथासखासुहृत्सख्येमित्रायहितोपदेशेनसाधुर्भवति यथाचपितरामातापितरौपुत्रायसन्मार्गोपदेशादिनासाधकौभवतः तद्वत् किंच जनानांमनुष्याणांक्षितयोमनुष्याः पुरुद्रुहोहिनानाविधद्रोहयुक्ताः हिशब्दःकारणपरः यस्माल्लोकेपरस्परमात्सर्यादिनान्योन्यमसहमानाजनावर्तंते तस्मात्त्वं प्रतीचीः प्रतीचः प्रतिकूलतयास्मदाभिमुख्येनागच्छतः अरातीः अरातीन्शत्रून्प्रतिदहतात् त्वंप्रतिकूलःसन्भस्मसात्कुरु॥ भवानः द्व्यचोतस्तिङइतिसंहितायांदीर्घः। उपेतौ इण्गतौ अयनमितिभावेक्तिन् प्रादिसमासः तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम्। सख्ये समानेख्यश्चोदात्तइतिइण् डित्त्वाट्टिलोपः तत्संनियोगेनयलोपः समानस्यच्छन्दसीत्यादिनासभावः उदात्तइत्युक्तत्वादुपपदस्योदात्तता । साधुः राधसाधसंसिद्धौ कृवापाजीत्यादिनाउण्प्रत्ययः प्रत्ययस्वरः। प्रतीचीः अञ्चुगतिपूजनयोः ऋत्विग्दधृगित्यादिनाक्विन् स्त्रियां उगितश्चेतिङीपिप्राप्ते पुनःधातोरुगितप्रतिषेधइतिप्रतिषिद्धे अञ्चतेश्चोपसंख्यानमितिप्रतिप्रसवात्ङीप् तस्मिन् भसंज्ञायां अचइत्यकारलोपः चावितिदीर्घः। दहतात् दहभस्मीकरणे इत्यस्य लोण्मध्यमैकवचनेहेःतुह्योस्तातङाशिषीतितातङादेशः निघातः।अरातीः प्रतीचीः उभयत्रलिङ्गव्यत्ययः ॥१॥

अथद्वितीया—

तपो॒ष्व॑ग्ने॒अन्त॑राँअ॒मित्रा॒न्तपा॒शंस॒मर॑रुष॒ःपर॑स्य ।
तपो॑वसोचिकिता॒नोअ॒चित्ता॒न्विते॑तिष्ठन्ताम॒जरा॑अ॒यास॑ः ॥ २ ॥

तपो॒ इति॑ । सु । अ॒ग्ने॒ । अन्त॑रान् । अ॒मित्रा॑न् । तप॑ । शंस॑म् ।
अर॑रुषः । पर॑स्य । तपो॒ इति॑ । व॒सो॒ इति॑ । चि॒कि॒ता॒नः ।
अ॒चित्ता॑न् । वि । ते॒ । ति॒ष्ठ॒न्ता॒म् । अ॒जरा॑ः । अ॒यास॑ः ॥ २ ॥

हेअग्ने अन्तरान्अभिभावुकानमित्रान्शत्रून्सुसुष्ठुयथाभवतितथातपोतपैवबाधस्व किञ्च अररुषः तुभ्यंहविरप्रयच्छतः अतएवपरस्यशत्रुभूतस्यस्वंशंसमभिलाषंतपक्षपय वसोसर्वस्यवासयितः हेअग्ने चिकितानः कर्माभिज्ञस्त्वं अचित्तान्सत्कर्मण्यनासक्तमनस्कान्पुरुषान्तपो

Funding by IKS-MoE

सन्तप यस्मादेवंतस्मात्तेतवरश्मयःअजराःजरारहिताःप्रतिबंधरहिता अतएवअयासः सर्वत्रगमनस्वभावाःसन्तोवितिष्ठन्तां विशेषेणतिष्ठन्तु॥ तपो तपउ गुणः उञमवलम्ब्यउञइतिप्रगृह्यसंज्ञा पादादित्वादनिघातः । तप तपसंतापेइत्यस्यलोटिरूपं द्व्यचोतस्तिङइतिसंहितायांदीर्घः । अररुषः रादानेइत्यस्यक्सौवस्वेकाजितिप्राप्तस्येटःसम्प्रसारणंसम्प्रसारणाश्रयंचबलीयइति सम्प्रसारणबलीयस्त्वान्निवृत्तिः वसोःसम्प्रसारणमितिसम्प्रसारणं समासेनञ्स्वरः । चिकितानः कितज्ञानेइत्यस्यछन्दसिलिट् तस्यलिटःकानज्वेतिकानजादेशः द्विर्वचनं कित्त्वाद्गुणाभावः चित्त्वादन्तोदात्तः । तिष्ठन्तां ष्ठागतिनिवृत्तौ विपूर्वात्तिष्ठतेःसमवप्रविभ्यःस्थइत्यात्मनेपदं निघातः । अयासः अयगतौ पचाद्यच् चित्स्वरः ॥ २ ॥

अथतृतीया—

इ॒ध्मेना॑ग्नइ॒च्छमा॑नोघृ॒तेन॑जु॒होमि॑ह॒व्यंतर॑से॒बला॑य ।
याव॒दीशे॒ब्रह्म॑णा॒वन्द॑मानइ॒मांधियं॑शत॒सेया॑यदे॒वीम् ॥ ३ ॥

इ॒ध्मेन॑ । अ॒ग्ने॒ । इ॒च्छमा॑नः । घृ॒तेन॑ । जु॒होमि॑ । ह॒व्यम् । तर॑से ।
बला॑य । याव॑त् । ईशे॑ । ब्रह्म॑णा । वन्द॑मानः । इ॒माम् । धिय॑म् ।
श॒त॒ऽसेया॑य । दे॒वीम् ॥ ३ ॥

हेअग्ने इच्छमानः धनंकामयमानोहंयजमानः इध्मेनसमिन्धनकारिसमित्समूहेनघृतेनआज्येनसहहव्यंहवनयोग्यंहविः पुरोडाशादिकंजुहोमि किमर्थंतरसेवेगायतवसततगमनसिद्ध्यर्थंबलायसामर्थ्यायपुरोडाशादिहविर्भारवहनसिद्ध्यर्थंत्वयिहविःप्रक्षिपामि किञ्च ब्रह्मणा स्तोत्रेणवन्दमानः त्वांस्तुवन्नहंयावदीशेयावद्धंदनंवोढुंशक्नोमितावद्देहि त्वंचइमांअस्माभिः क्रियमाणांधियंत्वद्विषयांस्तुतिंशतसेयायअपरिमितधनपर्यवसानायदेवींदीप्तांअतिप्रभूतांकुरु ॥ इध्मेन ञिइन्धीदीप्तौ इध्यतेनेनाग्निरितिइध्मःकाष्ठविशेषः इषियुधीन्धिदसिश्याधूसूभ्योमगितिकरणेमक् कित्त्वादनुनासिकलोपः प्रत्ययस्वरः । इच्छमानः इषइच्छायां व्यत्ययेन शानच् इषुगमियमांछइतिछकारः । जुहोमि हुदानादनयोरित्यस्यलटिरूपं पादादित्वादनिघातः । हव्यं हवमर्हतीतिछंदसिचेतियप्रत्ययः भसंज्ञायांयस्येतिलोपः प्रत्ययस्वरः । यावत् यच्छब्दाद्यत्तदेतेभ्यःपरिमाणेवतुबितिवतुप् आसर्वनाम्नइत्याकारःआद्युदात्तः । ईशे ईशऐश्वर्येइत्यस्यलडुत्तमैकवचने इटः टेरेत्वं अदादित्वाच्छपोलुक् । शतसेयाय षोन्तकर्मणि

आदेचउपदेशेइत्यात्वं अचोयदितिभावेयत् ईद्यतीतीत्वम् आर्धधातुकलक्षणोगुणः कृदुत्तरपदप्रकृतिस्वरः ॥ ३ ॥

अथचतुर्थी—

उच्छो॒चिषा॑सहसस्पुत्रस्तु॒तोबृ॒हद्वयः॑शशमा॒नेषु॑धेहि ।
रे॒वद॑ग्नेवि॒श्वामि॑त्रेषु॒शंयोर्म॑र्मृ॒ज्माते॑त॒न्वं१॒भूरि॒क्रत्वः॑ ॥ ४ ॥

उत् । शो॒चिषा॑ । स॒ह॒सः॒ । पु॒त्र॒ । स्तु॒तः । बृ॒हत् । वयः॑ ।
श॒श॒मा॒नेषु॑ । धे॒हि॒ । रे॒वत् । अ॒ग्ने॒ । वि॒श्वामि॑त्रेषु । शम् । योः ।
म॒र्मृ॒ज्म । ते॒ । त॒न्व॑म् । भूरि॑ । क्रत्वः॑ ॥ ४ ॥

सहसस्पुत्रहेअग्ने शोचिषास्वकीययादीप्त्याउत्उद्दीप्यस्व स्तुतः स्तोत्रशस्त्रसाधनभूतैर्मन्त्रैः स्तुतस्त्वं शशमानेषुशशमानःशंसमानइतियास्कः। त्वद्विषयशंसनंकुर्वाणेषुविश्वामित्रेषुविश्वामित्रगोत्रोत्पन्नेषुविश्वंमित्रमस्येतिविश्वामित्रः एकस्मिन्बहुवचनंपूजार्थम् तथाविधेष्वस्मासुरेवद्धनयुक्तं बृहत्प्रभूतं वयः वयःशब्दोन्नवाची अर्कः वयःक्षद्मेत्यन्ननामसुपाठात् तादृशंप्रभूतमन्नंधेहि विधेहि किञ्च शं रोगाणांशमनमस्मासुविधेहि योःभयानांयावनंअमिश्रणंचविधेहि शमनंचरोगाणांयावनंचभयानामितियास्कः । क्रत्वः अस्माभिःक्रियमाणस्यकर्मणः प्रयोजकत्वेनकर्तः हेअग्ने तेतवतन्वंतनुंभूरिबहुवारंमर्मृज्म पुनःपुनःसोमाज्यपयःप्रभृतिभिराहुतिभिर्वयंसिञ्चामः ॥ शशमानेषु शशप्लुतगतावित्ययंधातुरत्रस्तुत्यर्थः ताच्छील्यवयोवचनशक्तिष्वितिचानश् चितइत्यन्तोदात्तत्वम्। धेहि डुधाञ्धारणपोषणयोरित्यस्यलोटिरूपम् । रेवत् रयिरस्यास्तीति मतुप् ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वं छन्दसीरइतितस्यवत्वं रयेर्मतौबहुलंछन्दसीतिसम्प्रसारणंपरपूर्वत्वं गुणः । विश्वामित्रेषु मित्रेचर्षावितिपूर्वपदस्यदीर्घत्वं बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । मर्मृज्म मृजूष्शुद्धावित्यस्यवर्तमानेलिटिउत्तमबहुवचनेमसोमादेशः अनित्यमागमानुशासनमितीडभावः रेफश्छान्दसः पादादित्वादनिघातः प्रत्ययस्वरः।भूरि भूसत्तायां अदिशदिभूशुभिभ्यःक्रिन्नितिक्रिन् किच्चाद्गुणाभावः नित्स्वरः । क्रत्वः डुकृञ्करणे संपदादित्वाद्भावेक्विप् तदस्यास्तीतिमतुप् झयइतितस्यवत्वम् तसौमत्वर्थेइतिभसंज्ञायांतकारस्यजश्त्वाभावः मतुवसोरुरितितकारस्यरुत्वम् ॥ ४ ॥

अथपञ्चमी—

कृ॒धिरत्नं॑सुसनित॒र्धना॑नां॒सघेद॑ग्नेभव॑सि॒यत्समि॑द्धः ।
स्तो॒तुर्दु॑रो॒णेसु॒भग॑स्यरे॒वत्सृ॒प्राक॒रस्ना॑दधिषे॒वपूं॑षि ॥ ५ ॥ १८ ॥

कृ॒धि । रत्न॑म् । सु॒ऽस॒नि॒तः॒ । धना॑नाम् । सः । घ॒ । इत् । अ॒ग्ने॒ ।
भ॒व॒सि॒ । यत् । सम्ऽइ॑द्धः । स्तो॒तुः । दु॒रो॒णे । सु॒ऽभग॑स्य ।
रे॒वत् । सृ॒प्रा । क॒रस्ना॑ । द॒धि॒षे॒ । वपूं॑षि ॥ ५ ॥ १८ ॥

सुसनितः अभिलषितधनानांसुष्ठुदातः हेअग्ने धनानांकनकपश्वादीनांमध्येरत्नंउत्तमंकृधिविधेहि मह्यंदत्स्व यद्यदात्वंसमिद्धःसोमाज्यादिभिःसम्यगिद्धोदीप्तोवर्तसेतदासघइत्सताद्दशएवत्वंधनस्यदाताखलुभवसि किञ्च सुभगस्यत्वद्विषयस्तुत्याशोभनधनयुक्तस्यस्तोतुर्यजमानस्य दुरोणेगृहेसृप्रा प्रसर्पणशीलौकर्मकरणार्थंप्रसृतौकरस्नाकर्मणांप्रस्नातारौबाहू करस्नौबाहूकर्मणांप्रस्नातारावितियास्कः[1] । वपूंषिरूपाणिवर्पः वपुरितिरूपनामसुपठितत्वात् तादृशौबाहूभास्वराणिज्योतींषिच रेवत्धनयुक्तंयथाभवतितथादधिषेधारयसि ॥ सुसनितः षणुदानेइत्यस्यतृचिरूपम् आमन्त्रितनिघातः । सृप्रा सृप्लृगतौ अस्मात्स्फायितञ्चिवञ्चीत्यादिनारक् किच्त्वादगुणः प्रत्ययस्वरः । करस्ना करोतिफलमितिकरःकर्म पचाद्यजन्तः कर्मणिस्नाशोधनंययोस्तौ यद्वा कर्मणांशोधनंयाभ्यामितिबहुव्रीहौपूर्वपदस्वरः । दधिषे डुधाञ्धारणपोषणयोरित्यस्यलिटि छन्दस्युभयथेतिथासआर्धधातुकत्वादिट् अतोलोपः निघातः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेऽष्टादशोवर्गः ॥ १८ ॥

अग्निंहोतारमितिपञ्चर्चंपञ्चमंसूक्तंत्रैष्टुभमाग्नेयंगाथिनआर्षम् तथाचानुक्रान्तम्—अग्निंहोतारंगाथीहेति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तस्मिन्सूक्तेप्रथमा—

अ॒ग्निंहोता॑रं॒प्रवृ॑णेमि॒येधे॒गृत्सं॑क॒विंवि॑श्व॒विद॒ममू॑रम् ।
सनो॑यक्षद्दे॒वता॑ता॒यजी॑यान्रा॒येवाजा॑यवनतेम॒घानि॑ ॥ १ ॥

---

[1] नि० ४.१४.।

Funding by IKS-MoE

अ॒ग्निम् । होता॑रम् । प्र । वृ॒णे॒ । मि॒येधे॑ । गृत्स॑म् । क॒विम् ।
वि॒श्व॒ऽविद॑म् । अमू॑रम् । सः । न॒ः । य॒क्ष॒त् । दे॒वऽता॑ता ।
यजी॑यान् । रा॒ये । वाजा॑य । व॒न॒ते॒ । म॒घानि॑ ॥ १ ॥

गाथीस्तौति हेअग्ने गृत्संगृणंतंदेवानांस्तुतिंकुर्वंतंकविंमेधाविनंविश्वविदंसर्वविषयज्ञानोपेतंअमूरममूढंअग्निंअङ्गनादिगुणोपेतं त्वांमियेधे अस्माभिःक्रियमाणेस्मिन्यज्ञेहोतारंहोमनिष्पादकंदेवानामाह्वातारंवाहंप्रवृणेप्रकर्षेणसंभजे सतथाविधोग्निःयजीयान्यष्टृतमःसन्नोस्माकंदेवतातायष्टव्यतयासंबन्धिनोदेवान्यक्षत्यजतु किञ्च सोग्निः रायेधनायवाजायान्नायचमघानिमंहनीयानिअस्माभिर्दीयमानानिहवींषिवनतेसंभजताम् ॥ वृणे वृङ्संभक्तौ निघातः । मियेधे मकारैकारयोर्मध्येइयागमश्छान्दसः । गृत्सं गृधुअभिकांक्षायां गृधिपण्योर्दकौचेतिसप्रत्ययः अन्त्यस्यदकारः व्यत्ययेनाद्युदात्तत्वम् । अमूरं मुहवैचित्ये इत्यस्यनिष्ठायांरूपं रेफश्छान्दसः नञासमासेतस्यनञ्स्वरः । यक्षत् यजेर्लेटि सिब्बहुलंलेटीतिसिप् लेटोडाटावित्यडागमः इतश्चलोपइतीकारलोपः । देवताता देवशब्दात्स्वार्थेसर्वदेवात्तातिलितितातिल् सुपांसुलुगितिसुपोडादेशः लित्स्वरः । वनते वनषणसंभक्तावित्यस्यलटिव्यत्ययेनात्मनेपदं निघातः ॥ १ ॥

अथद्वितीया—

प्रते॑अग्नेह॒विष्म॑तीमि॒य॒र्म्यच्छा॑सु॒द्यु॒म्नांरा॒तिनीं॑घृ॒ताची॑म् ।
प्र॒द॒क्षि॒णिद्दे॒वता॑तिमु॒रा॒णःसंरा॒तिभि॒र्वसु॑भिर्य॒ज्ञम॑श्रेत् ॥ २ ॥

प्र । ते॒ । अ॒ग्ने॒ । ह॒विष्म॑तीम् । इ॒य॒र्मि॒ । अच्छ॑ । सु॒ऽद्यु॒म्नाम् ।
रा॒तिनी॑म् । घृ॒ताची॑म् । प्र॒ऽद॒क्षि॒णित् । दे॒वऽता॑तिम् । उ॒रा॒णः ।
सम् । रा॒तिऽभिः॑ । वसु॑ऽभिः । य॒ज्ञम् । अ॒श्रे॒त् ॥ २ ॥

हेअग्ने सुद्युम्नांसुतेजसंहविष्मतींपुरोडाशादिहविर्युक्तांरातिनीं हविर्दात्रीं घृताचीं घृताचितां जुहूमुपभृतंवा तेतवअच्छ त्वदाभिमुख्येन प्रेयर्मि प्रेरयामि देवतातिम् देवान्उराणः उरुबहुकुर्वाणः उराणउरुकुर्वाणइतियास्कः[1] । तादृशोभवान्रातिभिर्वसुभिः अस्मभ्यंदेयतयाप्राप्तैर्धनैः सह

---

[1] नि० ६. १७.

सन् प्रदक्षिणित् प्रादक्षिण्येनसमश्नेत् तमिमंयज्ञं सम्यक्सेवताम् ॥ हविष्मतीं हविरस्यास्तीतिमतुप् तसौमत्वर्थेइतिभसंज्ञायां सकारस्यरुर्नभवति उगितश्चेतिङीप् स्वरविधौव्यञ्जनमविद्यमानवदितिपरिभाषानाश्रयणान्मतुपउदात्तताभावः । इयर्मि ऋगतौ जुहोत्यादिः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं अभ्यासस्यासवर्णेइतीयङादेशः मिपःपित्त्वाद्गुणः निघातः । अच्छ निपातस्येतिसंहितायांदीर्घः । रातिनीं रादानेइत्यस्य नपुंसकेभावेक्तः रातमस्यास्तीतिअतइनिठनावितीनिः प्रत्ययस्वरः । घृताचीं घृतपूर्वादञ्चतेः ऋत्विग्दधृगित्यादिनाक्विन् अञ्चतेश्चोपसंख्यानमितिङीप् भसंज्ञायां अचइत्यकारलोपः चावितिदीर्घः उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वेप्राप्ते चावितिपूर्वपदान्तोदात्तः । प्रदक्षिणित् प्रदक्षिणंकरोतीतितत्करोतीतिणिजुत्पद्यमानोदक्षिणशब्दाद्भवतिसंग्रामयतेरेवसोपसर्गाण्णिजुत्पत्तिर्नान्यस्मादितितदन्तात्क्विप् ह्रस्वस्यपितीतितुक् णिचोलोपाभावश्छान्दसः णिच्स्वरः । देवतातिम् देवशब्दात्सर्वदेवात्तातिलितितातिल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । उराणः उरुकरोतीति तत्करोतीतिणिच् तदन्ताच्छन्दसिलिट् मन्त्रत्वादाम्नभवति तस्यकानच् णेरनिटीतिणिलोपः वरादेशाभावश्छान्दसः चित्त्वादन्तोदात्तः । अश्नेत् श्निञ्सेवायां इत्यस्यछान्दसेलङिबहुलंछन्दसीतिशपोलुक् निघातः ॥ २ ॥

अथतृतीया—

सतेजी॑यसा॒मन॑सा॒त्वोत॑उ॒तशि॑क्षस्वप॒त्यस्य॑शि॒क्षोः ।
अग्ने॑रा॒योनृत॑मस्य॒प्रभू॑तौभू॒याम॑तेसुष्टु॒तय॑श्च॒वस्वः॑ ॥ ३ ॥

सः । तेजी॑यसा । मन॑सा । त्वाऽऊ॑तः । उ॒त । शि॒क्ष॒ ।
सु॒ऽअ॒प॒त्यस्य॑ । शि॒क्षोः । अग्ने॑ । रा॒यः । नृऽत॑मस्य । प्रऽभू॑तौ ।
भू॒याम॑ । ते॒ । सु॒ऽस्तु॒तयः॑ । च॒ । वस्वः॑ ॥ ३ ॥

हेअग्ने त्वोतः यस्त्वयारक्ष्यमाणः सतेजीयसाअतिशयेनतीक्ष्णेनसत्कर्मविषयतीक्ष्णबुद्धियुक्तेनमनसान्तःकरणेनयुक्तोभवति उतापिच तस्मैस्वपत्यस्यद्वितीयार्थेषष्ठी शोभनापत्योपेतंधनंशिक्षप्रयच्छ शिक्षतिर्दानकर्मा दात्यादिषुदानकर्मसुपठितत्वात् हेअग्ने शिक्षोः अभिमतफलप्रदानेशक्तुमिच्छोः रायोनृतमस्यधनस्य अतिशयेननेतुर्दातुस्तेतवप्रभूतौप्रभावेमहिम्निऐश्वर्येवयंस्याम किञ्च सुष्टुतयः त्वद्विषयशोभनस्तुतिमन्तोवयंवस्वः वसुनोभाजनंभूयाम भूयास्म तेजीयसा तेजितृशब्दादतिशायने ईयसुन् तुरिष्ठेमेयःस्वितितृचोलोपः नित्स्वरः ।

त्वोतः अवरक्षणादिषु निष्ठायां ज्वरत्वरस्रिव्यविमवामुपधायाइत्यूठ् अल्लोपः त्वयाऊतः तृतीयेतियोगविभागात् समासः टेर्लोपश्छान्दसः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । शिक्ष शिक्ष विद्योपादाने इत्ययमत्रदानार्थः अस्माल्लोटिव्यत्ययेन परस्मैपदम् । शिक्षोः शकृशक्तावित्यस्य सनिएकाचउपदेशेइतीट्प्रतिषेधः सनिमीमाघुरभलभशकपतपदामचइसितिधातोरचइसादेशः अत्रलोपोभ्यासस्येत्यभ्यासलोपः सनाशंसभिक्षउरितिउप्रत्ययः प्रत्ययस्वरः । प्रभूतौ भूसत्तायामित्यस्यभावेक्तिन् तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् । भूयाम भूसत्तायामित्यस्याशीर्लिङि किदाशिषीतियासुट् छन्दस्युभयथेति तस्यसार्वधातुत्वात्सलोपः आगमस्वरः यद्वा तस्मात्प्रार्थनायांलिङि यासुट् बहुलंछन्दसीतिशपोलुक् अनदन्तत्वादियादेशोनभवति । सुष्टुतयः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । वस्वः आगमानुशासनस्यानित्यत्वान्नुमभावः संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावः यणादेशः ॥ ३ ॥

अथचतुर्थी—

भूरी॑णि॒हि॒त्वेद॑धि॒रे॑अनी॒काग्ने॑दे॒वस्य॒यज्य॑वो॒जना॑सः ।
सआव॑हदे॒वता॑तिंयविष्ठ॒शर्धो॒यद॒द्यदि॒व्यं॑यजां॑सि ॥ ४ ॥

भूरी॑णि । हि । त्वे इति॑ । द॒धि॒रे । अनी॑का । अग्ने॑ । दे॒वस्य॑ ।
यज्य॑वः । जना॑सः । सः । आ । व॒ह॒ । दे॒वऽता॑तिम् । य॒वि॒ष्ठ॒ ।
शर्धः॑ । यत् । अ॒द्य । दि॒व्यम् । यजां॑सि ॥ ४ ॥

हेअग्ने देवस्यद्योतमानस्य तवसंबन्धिनः यज्यवोयष्टारोध्वर्युप्रभृतयः जनासोजनाः भूरीणिबहूनिअनीकाअनीकानिसेनारूपतयासर्वत्रप्रसृतानिज्वालारूपाणितेजांसिआहुतिप्रक्षेपेण त्वेत्वयिदधिरेहि विदधिरेखलु चक्रुरितिप्रावत सताद्दशस्त्वंदेवतातिंयष्टव्यदेवानिहकर्मण्यावहआह्वय हेयविष्ठ युवतम यद्यस्मात्कारणात् अद्यास्मिन्कर्मणिदिव्यंदिविभवंदेवसम्बन्धिशर्धस्तेजस्त्वंयजासियजसि तस्माद्देवानाह्वयेतिशेषः ॥दधिरे दधातेर्लिटिरूपम् हियोगादनिघातः चित्त्वादन्तोदात्तः । यज्यवः यजदेवपूजादिषु यजिमनिशुन्धिदसिजनिभ्योयुजितियुच् व्यत्ययेनाद्युदात्तत्वम् । देवतातिं देवशब्दात्स्वार्थेसर्वदेवात्तातिलितितातिल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । यजासि यजेर्लेट्याडागमः यद्योगादनिघातः ॥ ४ ॥

अथपञ्चमी–

यत्त्वाहोतारमनजन्मियेधेनिषादयन्तोयजथायदेवाः ।
सत्वंनोअग्नेवितेहबोध्यधिश्रवांसिधेहिनस्तनूषु ॥ ५ ॥ १९ ॥

यत् । त्वा । होतारम् । अनजन् । मियेधे । निऽसादयन्तः ।
यजथाय । देवाः । सः । त्वम् । नः । अग्ने । अविता । इह ।
बोधि । अधि । श्रवांसि । धेहि । नः । तनूषु ॥ ५ ॥ १९ ॥

हेअग्ने यजथाययजनार्थंनिषादयन्तः निवसन्तः देवादीप्यमानाऋत्विजोमियेधे मेधे यज्ञेहोतारंदेवानामाह्वातारं त्वा त्वांयद्यस्मादनजन्घृताहुतिभिरौक्षन् यद्वा निषादयन्तः होतारं होमनिष्पादकंत्वांबर्हिषिउपवेशयन्तः ऋत्विजः घृतैरसिञ्चन् तस्मात्सतथाविधस्त्वंइहास्मिन्कर्मणि नोस्माकंअवितापालयिताभवामीतिबोधिबुध्यस्व किञ्च नस्तनूषुअस्माकंतनूजेष्वपत्येषुश्रवांस्यन्नानिअधिधेहिअधिकंनिधेहि॥अनजन् अञ्जूव्यक्तिम्रक्षणेषुअस्माल्लङि रुधादित्वात् श्नम् छान्दसत्वादल्लोपाभावः अनिदितामित्युपधालोपः । निषादयन्तः षद्लृविशरणगत्यवसादनेषु चुरादिः सदिरप्रतेरितिषत्वम् यद्वा हेतुमण्णिचूशतुर्लसार्वधातुकस्वरेणानुदात्तत्वेकृते णित्स्वरः । बोधि बुधअवगमने लोटि बहुलंछन्दसीतिशपोलुक् सेर्ह्यपिच्चेतिसिपोहिरादेशः वाछन्दसीति विकल्पेनंगित्त्वाद्गुणः हुझल्भ्योहेर्धिरितिहेर्धिरादेशः धकारलोपश्छान्दसः निघातः । धेहि दधातेर्लोटिरूपम् ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेएकोनविंशोवर्गः ॥ १९ ॥

अग्निमुषसमितिपञ्चर्चंअष्टमंसूक्तंत्रैष्टुभम् अत्रेयमनुक्रमणिका–अग्निमुषसमाद्यान्त्यौवैश्वदेव्याविति गाथीहेतिहशब्दप्रयोगादस्यापिसूक्तस्यगाथीऋषिः प्रथमापञ्चम्यौवैश्वदेवदेवताके शिष्टास्तिस्रआग्नेय्यः अस्यसूक्तस्योक्तोविनियोगः मरुत्वतीयशस्त्रेअग्निर्नेतेत्येषाधाय्या सूत्रितञ्च–अग्निर्नेतात्वंसोमक्रतुभिःपिन्वन्त्यपइतिधाय्याइति ।

तस्मिन्सूक्तेप्रथमा–

अग्निमुषसमश्विनादधिक्रांव्युष्टिषुहवतेवह्निरुक्थैः ।
सुज्योतिषोनःशृण्वन्तुदेवाःसजोषसोअध्वरंवावशानाः ॥ १ ॥

अ॒ग्निम् । उ॒षस॑म् । अ॒श्विना॑ । द॒धि॒ऽक्राम् । विऽउ॑ष्टिषु ।
ह॒व॒ते॒ । वह्निः॑ । उ॒क्थैः । सु॒ऽज्योति॑षः । नः॒ । शृ॒ण्व॒न्तु॒ ।
दे॒वाः । स॒ऽजोष॑सः । अ॒ध्व॒रम् । वा॒व॒शा॒नाः ॥ १ ॥

गाथीब्रूते वह्निः हविषांप्रापयिताग्निः व्युष्टिषुउषसांव्युच्छनेषुअग्निंयजनीयंदेवंउषसंउषोभिमानिनींदेवतांअश्विनाअश्विनौदेवौदधिक्रांदधिक्रावानामकश्चिद्देवः तंदधिक्रावाणंएतान्देवानुक्थैःशस्त्रैः शंसनसाधनैरप्रगीतमन्त्रात्मकैः सूक्तैर्हवतेआह्वयति सुज्योतिषः सुष्ठुद्योतमानानः अध्वरमस्मत्संबन्धिनमिमंयज्ञंवावशानः कामयमानाः सजोषसः परस्परंसङ्गताभूत्वासर्वेदेवाः तदाह्वानंशृण्वन्तु ॥ दधिक्रां क्रमुपादविक्षेपे दधीत्युपपदेजनसनखनक्रमइतिविट् विड्वनोरनुनासिकस्यादित्याकारः कृदुत्तरपदप्रकृतिस्वरः । व्युष्टिषु उच्छोविवासे भावेक्तिन् व्रश्चादिनाषत्वं तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् । हवते ह्वयतेर्बहुलंछन्दसीतिसम्प्रसारणम् । सुज्योतिषः सुष्ठुद्योतमानाइतिविग्रहे द्युतदीप्तावित्यस्यद्युतेरिसिन्नादेश्चजइतिइसिन्प्रत्ययः दकारस्यजकारः कृदुत्तरपदप्रकृतिस्वरः बहुव्रीहिपक्षेतु नञ्सुभ्यामित्युत्तरपदान्तोदात्ततास्यात् यथा सुज्योतिषोअक्तवस्तांअभिष्युरित्यत्रान्तोदात्तता तस्मादत्रनायंसमासः किंतु तत्पुरुषएव । शृण्वन्तु श्रुश्रवणेइत्यस्माच्छ्रुवःशृचेतिश्नुः तत्सन्नियोगेनधातोः शृइत्यादेशः निघातः । वावशानाः वशकान्तावित्यस्ययङ्लुकिरूपं अभ्यासस्यदीर्घोकितइतिदीर्घः व्यत्ययेनशानच् चित्स्वरः ॥ १ ॥

अथद्वितीया—

अग्ने॒त्रीते॒वाजि॑ना॒त्रीष॒धस्था॑ति॒स्रस्ते॑जि॒ह्वा॑ऋतजातपू॒र्वीः ।
ति॒स्र॑उतेत॒न्वो॑दे॒ववा॑ता॒स्ताभि॑र्नःपाहि॒गिरो॒अप्र॑युच्छन् ॥ २ ॥

अग्ने॑ । त्री । ते॒ । वाजि॑ना । त्री । स॒धऽस्था॑ । ति॒स्रः । ते॒ ।
जि॒ह्वाः । ऋ॒त॒ऽजा॒त॒ । पूर्वीः॑ । ति॒स्रः । ऊँ॒ इति॑ । ते॒ । त॒न्वः॑ ।
दे॒वऽवा॑ताः । ताभिः॑ । नः॒ । पा॒हि॒ । गिरः॑ । अप्र॑ऽयुच्छन् ॥ २ ॥

---

१ ऋ० सं० ८.४.१६.।

हेअग्ने तेतव त्रीवाजिना आज्यौषधिसोमात्मकानित्रीण्यन्नानि त्रीषधस्थात्रीणिआग्नीध्रीयादीनिधिष्ण्यानिस्थानानि यद्वा एकाहाहीनसत्राख्यानित्रीणिस्थानानि यद्वा त्रयोलोकाः ऋतजातऋतेषुसत्यभूतेषुयज्ञेषुसमुत्पन्न हेअग्ने तेतवपूर्वीःदेवानांजिह्वाःसात्विकादिभेदेनत्रिप्रकाराः यद्वा त्रयोवाअग्नयोहव्यवाहनोवैदेवानांकव्यवाहनःपितॄणांसहरक्षाअसुराणामितिश्रुतेरग्नित्रैविध्यात् जिह्वात्रैविध्यम् यद्वा देवानामुदरपूरयित्र्यस्तिस्रोसुरपित्र्यगार्हपत्याद्याजिह्वाः हेअग्ने तेतवदेववाताः देवैरभिलषितास्तिस्रस्तन्वः पवमानपावकशुच्यात्मकानित्रीणिशरीराणि एवंभूतस्त्वंअप्रयुच्छन्अप्रमाद्यन् सावधानोभूत्वाताभिस्तनूभिर्नोस्माकंस्तोतॄणांगिरः स्तोत्रशस्त्रादीनिवाक्यानिपाहिपालय ॥ तिस्रः तिसृभ्योजसइतिजसउदात्तत्वम् । जिह्वाः लिहआस्वादने लिहन्त्याभीरसानितिशेवयह्वजिह्वाग्रीवाप्वामीवाइतिनिपातनाद्वन् लकारस्यजकारः गुणाभावः व्यत्ययेनान्तोदात्तत्वम् । देववाताः वागतिगन्धनयोः अस्मात्कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । पाहि पारक्षणेइत्यस्यलोटिरूपं निघातः अप्रयुच्छन् युच्छप्रमादे नञ्स्वरः ॥ २ ॥

अथतृतीया—

अग्ने॒भूरी॑णि॒तव॑जातवेदो॒देव॑स्वधावो॒मृत॑स्य॒नाम॑ ।
याश्च॑मा॒यामा॒यिनां॑विश्वमिन्व॒त्वेपू॒र्वीःसं॑द॒धुःपृ॑ष्टबन्धो ॥ ३ ॥

अग्ने॑ । भूरी॑णि । तव॑ । जा॒त॒ऽवे॒दः॒ । देव॑ । स्व॒धा॒ऽवः॒ । अ॒मृत॑स्य ।
नाम॑ । याः । च॒ । मा॒याः । मा॒यिना॑म् । वि॒श्व॒म्ऽइ॒न्व॒ । त्वे
इति॑ । पू॒र्वीः । स॒म्ऽद॒धुः । पृ॒ष्ट॒ब॒न्धो॒ इति॑ पृष्टऽबन्धो ॥ २ ॥

हेदेव द्योतमान जातवेदः जातप्रज्ञ स्वधावःअन्नवन् हेअग्ने अमृतस्य मरणधर्मरहितस्य तवसंबन्धिनोदेवाः भूरिणिबहूनि नाम नामानितेजांसिसंदधुःसंदधिरे किञ्च विश्वमिन्व विश्वस्य संतर्पक पृष्टबन्धो अपेक्षितफलप्रश्नविषयाणांस्तोतॄणांबन्धो हेअग्ने मायिनामसुराणांपूर्वीःभूयसीःयाःमायाःदेवाः त्वेत्वयिसंदधुःसंयुयुजिरे तास्त्वयिसन्तितस्माद्यज्ञविघ्नकारिणांमायिनांमायाः परिहृत्यास्मदीयंयज्ञंपालयेतिभावः॥ स्वधावः स्वधास्यास्तीतिमतुप् मतुवसोरुरितिनकारस्यरुः। अमृतस्य नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्। नाम णमप्रह्वत्वे नामन्सीमन्नित्यादिनामन्निन्प्रत्ययान्तत्वेननिपातनान्मकारलोपःदीर्घश्च नमयन्तिसर्वानपिस्वाश्रयभूतान्पुरुषानितिनामा-

Funding by IKS-MoE

नितेजांसि सुपांसुलुगितिसुपोलुक् नित्त्वादाद्युदात्तः । मायिनां मायाएषांसन्तीतिव्रीह्यादित्वा- दिनिः यस्येतिलोपः प्रत्ययस्वरः । विश्वमिन्व इविव्याप्तिप्रीणनयोरित्यस्माद्विश्वशब्देउपपदेकर्मण्यणितिअण्प्रत्ययः धातूपदेशावस्थायामिदितोनुमितिनुमिप्राप्तेलघूपधगुणोनभवतिविश्वमिन्वतिप्रीणयतीतिविश्वमिन्वः तत्पुरुषेकृतिबहुलमितिद्वितीयायाअलुक् आमन्त्रितत्वान्निघातः । संदधुः डुधाञ्धारणपोषणयोरित्यस्यलिटिउसिरूपं यद्वृत्तयोगादनिघातः प्रत्ययस्वरः । पृष्टबन्धो प्रच्छज्ञीप्सायामित्यस्यकर्मणिनिष्ठायांग्रहिज्यावयीत्यादिनासंप्रसारणं व्रश्चादिनाषत्वम् बन्धबन्धनेइत्यस्मात् शृस्वृस्निहीत्यादिनाउप्रत्ययः षष्ठीसमासः आमन्त्रितत्वान्निघातः ॥ ३ ॥

अथचतुर्थी–

अ॒ग्निर्ने॒ताभग॑इवक्षिती॒नांदैवी॑नांदे॒वऋ॑तु॒पाऋ॒तावा॑ ।
सवृ॑त्र॒हास॒नयो॑वि॒श्ववे॑दाः॒पर्ष॒द्विश्वाति॑दुरि॒तागृ॒णन्त॑म् ॥ ४ ॥

अ॒ग्निः । ने॒ता । भगः॑ऽइव । क्षि॒ती॒नाम् । दैवी॑नाम् । दे॒वः । ऋ॒तु॒ऽपाः ।
ऋ॒तऽवा॑ । सः । वृ॒त्र॒ऽहा । स॒नयः॑ । वि॒श्वऽवे॑दाः । पर्ष॑त् ।
विश्वा॑ । अति॑ । दुः॒ऽइ॒ता । गृ॒णन्त॑म् ॥ ४ ॥

योयमग्निः क्षितीनांमनुष्याणांदैवीनांदेवसबन्धिनीनांविशांनेता अन्तर्यामितयानियामकः तत्रदृष्टान्तः–ऋतुपाः भगइव यथावसन्ताद्यृतूनांपालकःसूर्यः सर्वस्यप्रकाशप्रदानेनप्रवर्तकस्तद्वत् यश्चाग्निः ऋतावा सत्यकर्मा वृत्रहावृत्रस्यपापस्यहन्ता सनयः सनातनः पुराणः विश्ववेदाः सर्वविषयज्ञानवान्सर्वज्ञः देवोद्योतमानः सतथाविधोग्निः गृणन्तंतद्विषयांस्तुतिंकुर्वन्तंस्तोतारंविश्वादुरितासर्वाणिदुरितान्यतिअतिक्रम्यपर्षत् पारंनयतु ॥ नेता णीञ्प्रापणे इत्यस्यतृचिरूपं चित्स्वरः । क्षितीनां क्षिनिवासगत्योः क्तिच्क्तौचसंज्ञायामितिक्तिच् नामन्यतरस्यामित्यन्तोदात्तत्वम् । दैवीनां देवशब्दात्संबन्धार्थेदेवाद्यञञावित्यञ् अञि टिड्ढाणञितिङीप् ञित्त्वादाद्युदात्तः । ऋतुपाः पारक्षणेइत्यस्मादन्येभ्योपिदृश्यन्तइतिविच् ऋतून्पातीत्युपपदमतिङितिसमासः कृदुत्तरपदप्रकृतिस्वरः । वृत्रहा हनहिंसागत्योः ब्रह्मभ्रूणवृत्रेषुक्विबितिक्विप् । विश्ववेदाः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । पर्षत् पॄपालनपूरणयोरित्यस्यलेटिसिब्बहुलमितिसिप् अडागमः इतश्चलोपइतीकारलोपः पादादित्वादनिघातः । गृणन्तं गॄशब्दे लटः शतृ क्र्यादित्वात्श्ना प्वादित्वात्ह्रस्वः नुमिश्नाभ्यस्तयोरातइत्यकारलोपः शतृप्रत्ययः ॥ ४ ॥

Funding by IKS-MoE

अथपञ्चमी—

द॒धि॒क्राम॒ग्निमु॒षसं॑चदे॒वींबृह॒स्पतिं॑सवि॒तारं॑चदे॒वम् ।
अ॒श्विना॑मि॒त्रावरु॑णा॒भगं॑च॒वसू॑न्रु॒द्राँआ॑दि॒त्याँइ॒हहु॑वे ॥ ५ ॥ २० ॥

द॒धि॒ऽक्राम् । अ॒ग्निम् । उ॒षस॑म् । च॒ । दे॒वीम् । बृह॒स्पति॑म् ।
स॒वि॒तार॑म् । च॒ । दे॒वम् । अ॒श्विना॑ । मि॒त्रावरु॑णा । भग॑म् ।
च॒ । वसू॑न् । रु॒द्रान् । आ॒दि॒त्यान् । इ॒ह । हु॒वे॒ ॥ ५ ॥ २० ॥

हेदधिक्रावादयःसर्वेदेवाः होताहं दधिक्रांदधिक्रावाणं अग्निंउषसं देवींउषोभिमानिनींदेवतांचबृहस्पतिंदेवं द्योतमानं सवितारं सर्वस्यजगतःप्रेरकंदेवंच अश्विनाअश्विनौ देवौ मित्रावरुणौ भगंसूर्यंच वसून् अष्टौवसून् रुद्रानेकादशरुद्रान् आदित्यान् द्वादशादित्यान् एतान्सर्वान्हविर्भुजोयुष्मानिहास्मदीयेकर्मणिहवेहविःस्वीकरणार्थमाह्वयामि ॥ दधिक्रां दधातीतिदधिः आदृगमहनेत्यादिनाकिप्रत्ययः दधीत्युपपदेक्रमेर्जनसनेत्यादिनाविट् विड्वनोरित्यात्वम् । देवीं देवस्यपत्नीदेवी पुंयोगादाख्यायामितिङीष् यस्येतिलोपः प्रत्ययस्वरेणान्तोदात्तः । बृहस्पतिं तद्बृहतोःकरपत्योरितिसुट्तलोपश्चेति पतिशब्देपरतोबृहच्छब्दस्यतकारलोपः सुडागमश्च उभेवनस्पत्यादिषुयुगपदिति उभयपदाद्युदात्तत्वम् । सवितारम् षुप्रेरणेइत्यस्यतृचि आर्धधातुकस्येड्वलादेरितीडागमः चित्त्वादन्तोदात्तत्वम् । रुद्रानादित्यानित्यत्रसंहितायां शसोनकारस्य दीर्घादटिसमानपादे इतिरुत्वम् ततःपूर्वस्यावर्णस्यआतोटिनित्यमित्यनुनासिकत्वम् भोभगोअघोअपूर्वस्ययोशोतिरोर्यकारादेशः लोपःशाकल्यस्येतितस्यलोपः यलोपस्यासिद्धत्वात्स्वरसन्धिर्नभवति अतः रुद्राँ आदित्याँ इतिभवति एवमेकस्मिन्पादे आकारादटिपरतः नकारस्य रुत्वयत्वपूर्वसवर्णानुनासिकादेशाउन्नेयाः । हुवे ह्वयतेर्लटि बहुलंछन्दसीतिसंप्रसारणं इटः टितआत्मनेपदानामित्येत्वं उवङादेशः निघातः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेविंशोवर्गः ॥ २० ॥

इमंनइतिपञ्चर्चंनवमंसूक्तम् अत्रेयमनुक्रमणिका—इमंनउपाद्येअनुष्टुभौ विराड्रूपासतोबृहतीचान्त्येति । द्वितीयातृतीयेअनुष्टुभौ पञ्चमीविराड्रूपासतोबृहतीच अनुक्तत्वात्प्रथमा-

चतुर्थ्यौत्रिष्टुभौ अस्यापिगाथीऋषिः पशौस्तोकानुवचनमिदंसूक्तं सूत्रितंच— जुषस्वसप्रथस्तममिमंनोयज्ञमिति ।

तस्मिन्सूक्तेप्रथमा—

इमंनोयज्ञममृतेषुधेहीमाहव्याजातवेदोजुषस्व ।
स्तोकानामग्नेमेदसोघृतस्यहोतःप्राशानप्रथमोनिषद्य ॥ १ ॥

इमम् । नः । यज्ञम् । अमृतेषु । धेहि । इमा । हव्या । जातऽवेदः ।
जुषस्व । स्तोकानाम् । अग्ने । मेदसः । घृतस्य । होतरिति । प्र ।
अशान । प्रथमः । निऽसद्य ॥ १ ॥

गाथीप्रार्थयते—हेजातवेदः जातप्रज्ञाग्ने नोस्माकं संबन्धिनमिमंयज्ञं पशुयागं अमृतेषुमरणधर्मरहितेषु यष्टव्यदेवेषु धेही तदधीनतया समर्पय त्वंचइमा इमानिअस्माभिर्दीयमानानिहव्याहव्यानिहवींषि जुषस्व सेवस्व किञ्च होतः देवानामाह्वातः अग्निर्वैदेवानांहोतेत्याम्नानात् तादृश हेअग्ने निषद्यवेद्यामुपविश्य प्रथमः सर्वेषामृत्विजामादिमःसन् मेदसोवपाख्यस्यहविषः घृतस्याज्यस्यचस्तोकानां द्वितीयार्थेषष्ठी मेदोघृतयोर्येस्तोकाबिंदवोविद्यन्तेतान्प्रकर्षेण अशान भक्षय पिबेत्यर्थः ॥ धेहि दधातेर्लोटिरूपम् । जुषस्व जुषीप्रीतिसेवनयोरित्यस्य लोटयात्मनेपदिनोरूपम् । अशान अशभोजनेइत्यस्य लोटिहलः श्नःशानज्झाविति शानजादेशः पश्चात् अतोहेरितिहेर्लुक् निघातः । प्रथमः प्रथप्रख्याने प्रथंतेस्माद्द्वितीयादयइतिप्रथेरमजित्यमच् चित्त्वादन्तोदात्तः । निषद्य षद्लृविशरणगत्यवसादनेषुइत्यस्यल्यपिरूपम् सदिरप्रतेरितिषत्वम् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ॥ १ ॥

अथद्वितीया—

घृतवन्तःपावकतेस्तोकाश्चोतन्तिमेदसः ।
स्वधर्मन्देववीतयेश्रेष्ठंनोधेहिवार्यम् ॥ २ ॥

---

१ ऐ० ब्रा० २-१२. ।

घृ॒तऽव॑न्तः । पा॒व॒क॒ । ते॒ । स्तो॒काः । श्चो॒त॒न्ति॒ । मेद॑सः ।
स्वऽध॑र्मन् । दे॒वऽवी॑तये । श्रेष्ठ॑म् । नः॒ । धे॒हि॒ । वार्य॑म् ॥ २ ॥

पावक पापशोधक हेअग्ने स्वधर्मन् स्वायत्तधर्मकेसाङ्गेस्मिन्यज्ञे यद्वा स्वधर्मन्निति सम्बोधनं स्वयमेवधारक तेतवभक्षणार्थंदेववीतयेयजनीयदेवानांभक्षणार्थंचघृतवन्तः घृतोपेताःमेदसोमेदोरूपस्य हविषः स्तोकाबिन्दवश्चोतन्तिक्षरन्ति अथवा देववीतयेदेवस्यतववीतयेइतियोजनीयम् तस्मात्वार्यंवरणीयंसंभजनीयंश्रेष्ठमुत्तमंधनंनोस्मभ्यं धेहि प्रयच्छ॥श्चोतंति श्चुतिर्क्षरणेइत्यस्यलटिरूपम् स्वधर्मन् स्वेस्वीयाअङ्गभूताधर्माणोयस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरः सुपांसुलुगितिसप्तम्यालुक् । देववीतये देवानांवीतिः प्रीतीर्यस्यांभक्षणक्रियायां सा देववीतिः बहुव्रीहौपूर्वपदप्रकृतिस्वरः श्रेष्ठं प्रशस्यशब्दादतिशायनेइष्ठन् प्रशस्यस्यश्रइतिश्रादेशः गुणः एकादेशस्वरः । धेहि दधातेर्लोट् । वार्यं वृङ्संभक्तौ ऋहलोर्ण्यदितिण्यत् ईडवन्देत्यादिनाद्युदात्तत्वम् एतिस्तुशास्वित्यादिनाक्यप् वृणोतेरेव नवृङः । २ ॥

अथतृतीया—

तुभ्यं॑स्तो॒काघृ॑त॒श्चुतो॑ग्ने॒विप्रा॑यसन्त्य ।
ऋषि॒ःश्रेष्ठ॒ःसमि॑ध्यसेय॒ज्ञस्य॑प्रावि॒ताभ॑व ॥ ३ ॥

तुभ्य॑म् । स्तो॒काः । घृ॒त॒ऽश्चुत॑ः । अग्ने॑ । विप्रा॑य । स॒न्त्य॒ ।
ऋषि॑ः । श्रेष्ठ॑ः । सम् । इ॒ध्य॒से॒ । य॒ज्ञस्य॑ । प्र॒ऽअ॒वि॒ता । भ॒व॒ ॥ २ ॥

सन्त्य यष्टृभिःसंभजनीय यद्वा यष्टृभ्यःफलप्रद हेअग्ने विप्रायमेधाविनेतुभ्यं त्वदर्थंघृतश्चुतः घृतक्षरणयुक्ताः स्तोकाःसन्ति ऋषिः अतीन्द्रियार्थदर्शी अतएवश्रेष्ठः सर्वातिशायीत्वं समिध्यसेघृतयुक्तमेदोबिन्दुभिः सम्यक्प्रज्वाल्यसे सत्वंयज्ञस्य अस्माभिःक्रियमाणस्यपशुयागस्यप्राविताप्रकर्षेणपालकोभव ॥ तुभ्यंयुष्मच्छब्दस्यङयि तुभ्यमह्यौङयीतितुभ्यादेशः ङेप्रथमयोरमितिङेरमादेशः ङयिचेत्याद्युदात्तत्वम् । सन्त्य षणसंभक्तौ षणुदानेवा क्तिच्क्तौचसंज्ञायामितिक्तिच् नक्तिचिदीर्घश्चेतिदीर्घनलोपाभावः सन्तौभवः भवेछन्दसीतितत्रसाधुरितिवायत्प्रत्ययः यस्येतिलोपः आमन्त्रितत्वान्निघातः । इध्यसे ञिइन्धीदीप्तौ कर्मणियक् क्ङित्वादनुनासिकलोपः निघातः। प्राविता अवरक्षणादिषु तृचिरूपं समासस्वरः। भव निघातः ॥ ३ ॥

Funding by IKS-MoE

अथचतुर्थी–

तुभ्यँ॑श्चोतन्त्यध्रिगोशचीवःस्तो॒कासो॑अ॒ग्नेमेद॑सोघृ॒तस्य॑ ।
क॒वि॒श॒स्तोबृ॑ह॒ताभा॒नुनागा॑ह॒व्याजु॑षस्वमेधिर ॥ ४ ॥

तुभ्य॑म् । श्चो॒त॒न्ति॒ । अ॒ध्रि॒गो॒ इत्य॑ध्रिऽगो । श॒ची॒ऽव॒ः । स्तो॒कास॑ः ।
अ॒ग्ने॒ । मेद॑सः । घृ॒तस्य॑ । क॒वि॒ऽश॒स्तः । बृ॒ह॒ता । भा॒नुना॑ ।
आ । अ॒गा॒ः । ह॒व्या । जु॒ष॒स्व॒ । मे॒धि॒र॒ ॥ ४ ॥

अध्रिगो अधृतगमन सततगमनस्वभाव अतएवशचीवःशक्तिमन् हेअग्ने तुभ्यंत्वदर्थंमेदसोमेदोरूपस्यहविषः घृतस्यचस्तोकासोबिन्दवश्चोतंतिस्रवन्ति तस्मात्कविशस्तःकविभिः कर्माभिज्ञैर्होत्रादिभिः स्तुतस्त्वंबृहताप्रभूतेनभानुनातेजसासहितःसन् आगाः अस्मदीयंपशुयागमभ्यागच्छ आगत्यच मेधिर प्रज्ञावन्नग्ने हव्याअस्माभिर्दीयमानानिवपादीनिहवींषिजुषस्व सेवस्व ॥ अध्रिगो गमनंगौरितिगम्लृसृप्लृगतौइत्यस्यभावे गमेर्डोरितिडोः अधृतागौर्येनेत्यत्र गोस्त्रियोरुपसर्जनस्येतिगोशब्दस्यह्रस्वत्वं धृतशब्दस्यपृषोदरादित्वादध्रिभावः संबोधने संबुद्धौचेतिगुणः अपादादित्वान्निघातः । शचीवः मतुपोमतुवसोरुरितिरुत्वम् । कविशस्तः शंसुस्तुतावित्यस्यनिष्ठायामनुनासिकलोपः यस्यविभाषेतीट्प्रतिषेधः थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तत्वम् । भानुना भादीप्तौ दाभाभ्यांनुरितिकर्तरिनुः प्रत्ययस्वरः । अगाः इण्गतावित्यस्य छान्दसेलुङिइणोगेतिगादेशः गातिस्थेतिसिचोलोपः निघातः । मेधिर मेधारथाभ्यामिरन्निरचौ वक्तव्याविती्रन् आमन्त्रितत्वान्निघातः ॥ ४ ॥

अथपञ्चमी–

ओजि॑ष्ठंतेमध्य॒तोमेद॒उद्भृ॑तं॒प्रते॑व॒यंद॑दामहे ।
श्चोत॑न्तितेवसोस्तो॒काअधि॑त्व॒चिप्रति॒तान्दे॑व॒शोवि॑हि ॥ ५ ॥२१॥

ओजि॑ष्ठम् । ते॒ । म॒ध्य॒तः । मेद॑ः । उत्ऽभृ॑तम् । प्र । ते॒ । व॒यम् ।
द॒दा॒म॒हे॒ । श्चोत॑न्ति । ते॒ । व॒सो॒ इति॑ । स्तो॒काः । अधि॑ । त्व॒चि ।
प्रति॑ । तान् । दे॒व॒ऽशः । वि॒हि॒ ॥ ५ ॥ २१ ॥

Funding by IKS-MoE

हेअग्ने ओजिष्ठमतिशयेनसारयुक्तंमेदःवपाख्यंहविः मध्यतः पशोर्मध्यभागात् तेत्वदर्थंउद्भृतं उद्भृतं अध्वर्य्वादयोवयं अस्मिन्पशौ तेतुभ्यंप्रददामहे उद्भृतंतद्वपाख्यंहविःप्रयच्छामः वसो सर्वस्यजगतोवासयितः हेअग्ने त्वच्यधि वपायामुपरियेस्तोकाः घृतमिश्राबिंदवस्ते तेत्वदर्थंश्चोतन्तिस्रवन्ति यद्वा तेतवत्वच्यधि ज्वालाख्यशरीरस्योपरिश्चोतन्ति तान्स्तोकान्देवशः देवेषुप्रतिविहि प्रत्येकंविभजस्व ॥ मध्यतः मध्यशब्दात्पञ्चम्यास्तसिरितितसिः प्रत्ययस्वरः । उद्भृतम् हञ्हरणे कर्मणिक्तः हृग्रहोर्भश्छन्दसीतिहकारस्यभकारः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । ददामहे दददानेइत्यस्यलटि ङित्त्वादात्मनेपदम् अतोदीर्घोयञीतिदीर्घः निघातः । श्चोतन्ति श्चुतिर्क्षरणे पादादित्वादनिघातः अन्तेर्लसार्वधातुकस्वरेणानुदात्तत्वेकृते धातुस्वरः । त्वचि तनुविस्तारे तनोतेरनश्चवइतिकर्तरिकर्मणिवाचिक् अकारनकारयोर्वकादेशः तनोति तायते वा त्वक् सावेकाचइतिविभक्तेरुदात्तत्वम् । विहि वीकान्तिगत्यादिष्वित्यस्यलोटिअदादित्वाच्छपोलुक् ह्रस्वश्छान्दसः निघातः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेएकविंशोवर्गः ॥ २१ ॥

अयंसइतिपञ्चर्चंदशमंसूक्तम् अत्रेयमनुक्रमणिका—अयंसउपान्त्यानुष्टुप्पुरीष्येभ्योग्निभ्यइति ऋषिःकौशिकोगाथी पुरीष्यासइत्यस्याः पञ्चचितिरूपाअग्नयोदेवताः शिष्टाः केवलाग्नेय्यः चतुर्थीअनुष्टुप् शिष्टास्त्रिष्टुभः प्रातरनुवाकाश्विनशस्त्रयोरुक्तःसूक्तविनियोगः अग्निचयनेइष्टकाप्रणयनेपुरीष्यासइत्येषाअनुवचनीया प्रेषितःपुरीष्यचितयेन्वाहेत्युपक्रम्य पुरीष्यासोअग्नयइतित्रिरुपांशुसप्रणवमितिसूत्रितम् ।

तस्मिन्सूक्तेप्रथमा—

अ॒यंसोअ॒ग्निर्यस्मि॒न्त्सोम॒मिन्द्रः॑सु॒तंद॒धेज॒ठरे॑वावशा॒नः ।
स॒ह॒स्रिणं॒वाज॒मत्यं॒नसप्तिं॑सस॒वान्त्सन्त्स्तू॑यसेजातवेदः ॥ १ ॥

अ॒यम् । सः । अ॒ग्निः । यस्मि॑न् । सोम॑म् । इन्द्रः॑ । सु॒तम् । द॒धे ।
ज॒ठरे॑ । वा॒व॒शा॒नः । स॒ह॒स्रिण॑म् । वाज॑म् । अत्य॑म् । न ।
सप्ति॑म् । स॒स॒ऽवान् । सन् । स्तूय॒से॒ । जा॒त॒ऽवे॒द॒ः ॥ १ ॥

Funding by IKS-MoE

गाथीब्रूते अयमुत्तरवेद्यामाहुत्यधिकरणभूताहवनीयरूपतयादृश्यमानोग्निः सतथाविधः खलुवावशानः सोमंकामयमानइन्द्रोयंस्मिन्नग्नौसुतमभिषवादिसंस्कारोपेतंसोमंजठरेस्वोदरे दधे दधार तस्मात्तादृशमहिमोपेतः सोग्निरितिपूर्वेणान्वयः किञ्च हेजातवेदः सहस्रिणंसहस्रं नानारूपतांयुद्धेयोभजतिससहस्री तमत्यं वेगवशादतनशीलंसप्तिंन अश्वमिव यद्वा सहस्रिणमिति वाजविशेषणम् सहस्रसङ्ख्याकंवाजं आज्यौषधिसोमाद्यनेकप्रकारंहविर्लक्षणमन्नं ससवान् भेजिवान्सन् त्वंस्तूयते स्तोतृभिरस्माभिःस्तूयमानोवर्तसे ॥ दधे दधातेर्लिटि लिटस्तझयोरेशिरेजितितप्रत्ययस्यएशित्यादेशः यद्वृत्तयोगादनिघातः प्रत्ययस्वरः वावशानः वशकान्तावित्यस्ययङ्लुकिदीर्घोकितइत्यभ्यासस्यदीर्घः व्यत्ययेनशानच्चित्स्वरः । ससवान् षणसंभक्तौक्कसौइडभावः नलोपः प्रत्ययस्वरः स्तूयसे ष्टुञ्स्तुतौ कर्मणियक् अकृत्सार्वधातुकयोरितिदीर्घः निघातः ॥ १ ॥

अथद्वितीया—

अग्ने॒यत्ते॑दि॒विवर्चः॑पृथि॒व्यांयदोष॑धीष्व॒प्स्वाय॑जत्र ।
येना॒न्तरि॑क्षमु॒र्वा॑त॒तन्थ॑त्वे॒षःसभा॒नुर॑र्ण॒वोनृ॒चक्षाः॑ ॥ २ ॥

अग्ने॑ । यत् । ते॒ । दि॒वि । वर्चः॑ । पृ॒थि॒व्याम् । यत् ।
ओष॑धीषु । अ॒प्ऽसु । आ । य॒ज॒त्र॒ । येन॑ । अ॒न्तरि॑क्षम् । उ॒रु ।
आ॒ऽत॒तन्थ॑ । त्वे॒षः । सः । भा॒नुः । अ॒र्ण॒वः । नृ॒ऽचक्षाः॑ ॥ २ ॥

यजत्र यजनीय अग्ने दिविद्युलोकेयद्वर्चः आदित्याख्यंयज्ज्योतिः तत्तेतवैवज्योतिः पृथिव्यां आहवनीयादिरूपतया दाहपाकादिकर्तृतयाच वर्तमानंयत्तेजः तत्त्वदीयमेवप्रसिद्धंतेजोभिधायगूढंज्योतिरभिधत्ते यदोषधीष्वप्स्वितिओषधीषुअरणीप्रभृतिषुकाष्ठेषुयत्तेजः यद्वा ओषधीषुवनस्पत्यादिषुसोमाख्यंयत्तेजः अप्सुजलेषु यदौर्वाख्यंतेजः तत्सर्वंआसर्वत्रवर्तमानंतेजस्तावकमेव किञ्च त्वंयेनवायुरूपेणतेजसाअन्तरिक्षमाकाशंउरुआततन्थ आतेनिथ विस्तीर्णंकृतवानसि त्वेषः दीप्तिमान् अतएवभानुः भासमानः नृचक्षाः नृणांसाक्षितयाद्रष्टा अर्णवःसमुद्रवत्महान् सतादृशस्त्वंअन्तरिक्षमातेनिथेतिपूर्वेणान्वयः उक्तार्थेवाजसनेयकम्—अग्नेयत्तेदिविवर्चइत्यादित्योवास्यदिविवर्चःपृथिव्यामित्ययमग्निःपृथिव्यांयदोषधीष्वप्स्वायजत्रेतियएवौषधीषुचाप्सुचाग्निस्तमेतदाहयेनान्तरिक्षमुर्वाततन्थेतिवायुःसत्वेषःसभानुरर्णवोनृचक्षाइतिमहान्तसभानुरर्णवोनृचक्षाइत्येतदिति ॥ पृथिव्यां उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ।

Funding by IKS-MoE

ओषधीषु ओषधेश्चविभक्तावप्रथमायामितिदीर्घत्वम् । अप्सु सावेकाचइतिविभक्तेरुदात्तत्वम्। आततन्थ तनुविस्तारेइत्यस्यलिटिथलिबभूथाततन्थजगृभ्मववर्थेतिनिपातनादिडेत्वाभ्यासलोपानभवन्ति लितीतिप्रत्ययात्पूर्वस्योदात्तत्वं यद्वृत्तयोगादनिघातः । अर्णवः अर्णांस्यस्मिन्सन्तीतिमतुबर्थेवप्रकरणेअन्येभ्योपिदृश्यतइतिवप्रत्ययः अर्णसःसलोपश्चेतिसलोपः प्रत्ययस्वरः । नृचक्षाः चक्षिङ्व्यक्तायांचि अभिव्यक्तवाग्वाच्ययंधातुरत्राभिव्यक्तिमात्रेवर्तते चक्षेर्बहुलंशिच्चेत्यसुन् कृदुत्तरपदप्रकृतिस्वरः ॥ २ ॥

अथतृतीया—

अग्ने॑दि॒वोअर्ण॒मच्छा॑जिगा॒स्यच्छा॑दे॒वाँऊ॑चिषे॒धिष्ण्या॒ये ।
यारो॑च॒नेप॒रस्ता॒त्सूर्य॑स्य॒याश्चा॒वस्ता॑दुप॒तिष्ठ॑न्त॒आपः॑ ॥ ३ ॥

अग्ने॑ । दि॒वः । अर्ण॑म् । अच्छ॑ । जि॒गा॒सि॒ । अच्छ॑ । दे॒वान् । ऊ॒चि॒षे॒ ।
धिष्ण्याः॑ । ये । याः । रो॒च॒ने । प॒रस्ता॑त् । सूर्य॑स्य । याः ।
च॒ । अ॒वस्ता॑त् । उ॒प॒ऽतिष्ठ॑न्ते । आपः॑ ॥ ३ ॥

हेअग्ने त्वंदिवोअर्णंद्युलोकेवर्तमानमर्णः अंभः अच्छाभिलक्ष्यजिगासि धूमद्वाराप्राप्नोषि किञ्च धिष्ण्याः धियंबुद्ध्युपहितंदेहमुष्णन्ति उष्णीकुर्वन्तीतिधिष्ण्याःप्राणाः यद्वा धिषणा स्तुतिः तदर्हाःप्राणाःयेधिष्ण्याः प्राणाभिमानिनोदेवाः तान्प्राणाख्यान्देवानच्छानुक्रमेण ऊचिषे समवेतान्करोषि समवेताभवतेत्युक्तवानसीत्यर्थः किञ्च सूर्यस्यसूर्यलोकस्य परस्तादुपरिरोचनेरोचनोनामायंलोकः यत्राग्नेयंज्योतिस्तपतितस्मिन्भासमानेरोचनाख्येलोकेयाआपोविद्यन्ते अवस्तात्सूर्यलोकादधस्तादन्तरिक्षलोकेयाश्चापउपतिष्ठन्तेवर्तन्ते ताउभयीरपस्त्वं प्रेरयसि उक्तार्थोवाजसनेयिभिःस्पष्टमभिहितः—आपोवाअस्यदिवोअर्णस्ताएषधूमेनाच्छैत्यच्छादेवाँऊचिषेधिष्ण्यायइतिप्राणावैदेवाधिष्ण्यास्तेहिसर्वाधियइष्णन्तियारोचनेपरस्तात्सूर्यस्ययाश्चावस्तादुपतिष्ठन्तआपइतिरोचनोहनामैषलोकोयत्रैषएतत्तपतितद्याश्चैतंपरेणापोयाश्चावरेणताएतदाहेतिताउभयीरपस्त्वंप्रेरयसीति ॥ अर्ण ऋगतावित्यस्मात् उदकेनुट्चेत्यसुन्नुडागमश्च अर्यते प्रार्थ्यतेतपिपासुभिरित्यर्णः सकारलोपश्छान्दसः नित्त्वादाद्युदात्तः । जिगाति गास्तुतौ छन्दसीत्ययंधातुश्चकाराद्गमनेवर्तते जुहोत्यादिः बहुलंछन्दसीत्यभ्यासस्येत्वं निघातः । ऊचिषे ब्रूञ्व्यक्तायांवाचि इत्यस्यलिटआर्धधातुकत्वात् ब्रुवोवचिरितिवच्यादेशः

असंयोगाल्लिट्किदितिकिद्वद्भावाद्वचिस्वपीत्यादिनासम्प्रसारणं अभ्यासस्य लिटचभ्यासस्योभयेषामितिसम्प्रसारणम् आर्धधातुकइट् निघातः । धिष्ण्याः उषप्लुषदाहे धियःउष्णन्तीति सानसिर्धणसिपर्णसितंडुलांकुशचषालेल्वलपल्वलधिष्णयशल्याइतिनिपातनाद्यन्   नुडागमधात्वादिलोपोपपदह्रस्वादयःसर्वेसिद्धाभवन्ति नित्त्वादाद्युदात्तः । अवस्तात् अवरशब्दात्दिक्शब्देभ्यः सप्तमीपञ्चमीत्यादिनाअस्तातिः तस्मिन्विभाषावरस्येत्यवादेशः प्रत्ययस्वरः । उपतिष्ठन्ते छागतिनिवृत्तौ उपपूर्वात्तिष्ठतेरकर्मकाच्चेत्यात्मनेपदं यद्वृत्तयोगादनिघातः ॥ ३ ॥

अथचतुर्थी—

पु॒री॒ष्या॑सोअ॒ग्नयः॑प्राव॒णेभिः॑स॒जोष॑सः ।
जु॒षन्ताँ॑य॒ज्ञम॒द्रुहो॑नमी॒वाइषो॑म॒हीः ॥ ४ ॥

पु॒री॒ष्या॑सः । अ॒ग्नयः॑ । प्र॒व॒णेभिः॑ । स॒ऽजोष॑सः ।
जु॒षन्ता॑म् । य॒ज्ञम् । अ॒द्रुहः॑ । अ॒न॒मी॒वाः । इषः॑ । म॒हीः ॥ ४ ॥

पुरीष्यासः पुरीषमर्हन्तीति पुरीषेभवावापुरीष्याः सिकतासंमिश्राअग्नयः चित्याग्नयःप्रवणेभिः मृत्खननसाधनभूतैरभ्र्यादिभिःसहिताः सजोषसः परस्परसंगताःसन्तः यज्ञं अस्माभिः क्रियमाणमग्निचयनपूर्वकमिमंसोमयागं जुषन्तां सेवन्तां किञ्च अद्रुहः अद्रोग्धारोयूयं अनमीवाः रोगादिवर्जिताः महीर्महत्यः इषःऊर्जःरोगादिरहितानिप्रभूतान्यन्नान्यस्मभ्यंप्रयच्छताम् ॥ पुरीष्यासः पॄपालनपूरणयोः ईषन्नित्यनुवृत्तौ शॄपॄभ्यांकिदितीषन्प्रत्ययःकिच्च किच्चाद्गुणेप्रतिषिद्धे उदोष्ठ्यपूर्वस्येत्युत्वं रपरः पृणातिपूर्यतेवेतिपुरीषम् पुरीषंपृणातेःपूरयतेर्वेतियास्कः[१] । तस्माद्भवेछन्दसीतियत् तित्स्वरितः तदर्हन्तीतिपुरीष्याः छन्दसिचेतियप्रत्ययः यचिभमितिभसंज्ञायांयस्येतिलोपः प्रत्ययस्वरः । प्रवणेभिः वनषणसंभक्तावित्यस्मात्पुंसिसंज्ञायांघःप्रायेणेति करणे घप्रत्ययः   प्रकर्षेणवन्यतेसंभज्यतेसंश्लिष्यतेमृदेभिरितिप्रवणानिखनित्राणि प्रनिरन्तइत्यादिनाणत्वं वनं समासेइत्यन्तोदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वम् यद्वा प्रुङ्गतौ प्रवन्तेगच्छन्तिमृत्खननंप्रतीति चलनशब्दार्थादकर्मकादितियुच् चित्स्वरः पूर्वस्मिन्पक्षेअवग्रहाभावश्छान्दसइतिवक्तव्यम् । जुषन्तां जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपं पादादित्वादनिघातः । महीः महच्छब्दादुगितश्चेतिङीप् तकारलोपश्छान्दसः प्रत्ययस्वरेणान्तोदात्तः ॥ ४ ॥

---

[१] नि० २. २२ ।

Funding by IKS-MoE

अथपञ्चमी–

इळा॑मग्नेपुरु॒दंसं॑स॒निंगोः॑श॑श्वत्त॒मंहव॑मानायसाध ।
स्यान्नः॑सू॒नुस्तन॑योवि॒जावाग्ने॒साते॑सुम॒तिर्भू॑त्व॒स्मे ॥ ५ ॥ २२ ॥

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् ।
हव॑मानाय । सा॒ध॒ । स्यात् । न॒ः । सू॒नुः । तन॑यः । वि॒जाऽवा॑ ।
अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ ५ ॥ २२ ॥

एषाऋक्पूर्वमेवव्याख्यायि ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेद्वाविंशोवर्गः ॥ २२ ॥

निर्मथितःसुधितइतिपञ्चर्चमेकादशंसूक्तम् अत्रानुक्रमणिका–निर्मथितोदेवश्रवादेववातश्चभारतौतृतीयासतोबृहतीति भरतस्यपुत्रोदेवश्रवादेववातश्चेत्युभावस्यऋषी तृतीयासतोबृहती शिष्टास्त्रिष्टुभः अग्निर्देवता आहोतेत्यादिसूक्तदशकस्यउक्तोविनियोगः प्रातरनुवाकाश्विनशस्त्रयोः इळामग्नइत्यस्याविनियोगः सक्तदुपदिष्टः ।

तस्मिन्सूक्तेप्रथमा–

निर्म॑थित॒ःसु॒धित॒आस॒धस्थे॒युवा॑क॒विर॑ध्व॒रस्य॑प्रणे॒ता ।
जूर्य॑त्स्व॒ग्निर॒जरो॒वने॒ष्वत्रा॑दधेअ॒मृतं॑जा॒तवे॑दाः ॥ १ ॥

निःऽम॑थितः । सुऽधि॑तः । आ । स॒धऽस्थे॑ । युवा॑ । क॒विः ।
अ॒ध्व॒रस्य॑ । प्र॒ऽने॒ता । जूर्य॑त्ऽसु । अ॒ग्निः । अ॒जरः॑ । वने॑षु ।
अत्र॑ । द॒धे॒ । अ॒मृत॑म् । जा॒तऽवे॑दाः ॥ १ ॥

भारतावृषीस्तोत्रंकुर्वाते योग्निर्निर्मथितः अग्निष्टोमादिकर्मस्वरण्योर्नितरांमथितःसन् सधस्थेयजमानगृहेसुधितः गार्हपत्यादिषुकुण्डेषुत्रिषुसुष्ठुनिहितः निधायचकाष्ठप्रक्षेपेणप्रज्वाल्यमानोयुवा नित्यतरुणः प्रबुद्धः अतएवाध्वरस्यज्योतिष्टोमादेःप्रणेताप्रकर्षेणनेतानिर्वाहकः नेतृत्वादेवकविः क्रान्तदर्शी तथाविधोजातवेदाः सर्वविषयाभिज्ञानवान् सोग्निः वनेषुमहारण्येषु जूर्यत्सु दावाग्निसंबन्धाज्जूर्यमाणेषु जरांनाशंप्राप्नुवत्स्वपि स्वयं अजरः जरारहितः प्रत्युत दीप्यमानःसन् अत्र एवंस्तुतिंकुर्वाणेषु यजमानेषु अमृतंक्षयरहितंप्रभूतमन्नमादधेनिदधा-

Funding by IKS-MoE

ति ॥ सुधितः दधातेःकर्मणिनिष्ठायां सुधितवसुधितनेमधितेत्यादिनानिपातनाद्धिइत्यादेशः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । जूर्यत्सु जूरीघूरीहिंसावयोहान्योः व्यत्ययेनशतृप्रत्ययः दिवादित्वात्श्यन् नित्त्वादाद्युदात्तः । अजरः जृवयोहानावित्यस्माद्भावे ऋदोरबितिअप्प्रत्ययः गुणः नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् । दधे दधातेर्वर्तमानेलिटिरूपम् । जातवेदाः जनीप्रादुर्भावेइत्यस्यक्ते जनसनखनांसन्झलोरित्याकारः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥१॥

अथद्वितीया—

अम॑न्थिष्टां॒भार॑तारे॒वद॒ग्निंदे॒वश्र॑वादे॒ववा॑तःसु॒दक्ष॑म् ।
अग्ने॒विप॑श्यबृह॒ताभिरा॒येषां॑नो॑ने॒ताभ॑वता॒दनु॒द्यून् ॥ २ ॥

अम॑न्थिष्टाम् । भार॑ता । रे॒वत् । अ॒ग्निम् । दे॒वऽश्र॑वाः । दे॒वऽवा॑तः ।
सु॒ऽदक्ष॑म् । अग्ने॑ । वि । प॒श्य॒ । बृ॒ह॒ता । अ॒भि । रा॒या ।
इ॒षाम् । नः॒ । ने॒ता । भ॒व॒ता॒त् । अनु॑ । द्यून् ॥ २ ॥

हेअग्ने भारता भारतौ भरतस्यपुत्रौ देवश्रवाः देववातश्चेत्युभौसुदक्षंशोभनसामर्थ्योपेतं रेवत् रयिमन्तं अग्निं अङ्गनादिगुणोपेतंत्वां अमन्थिष्टां अग्निष्टोमादिकर्मप्राप्त्यर्थं अलूलुडतां मथनेनत्वामुत्पादितवन्तावित्यर्थः तादृशस्त्वंबृहताप्रभूतेनरायाधनेनसहितःसन्अभिअभिमुखोभूत्वाविपश्य अस्मान्विशेषेणानुग्रहदृष्ट्यावीक्षस्व किञ्च अनुद्युशब्दोहर्वाची वस्तोः द्युः इतितन्नामसुपाठात् द्यूननुसर्वेषुदिवसेषुनोस्माकंइषांअन्नानांनेता आनेताभवतात्भव ॥ अमन्थिष्टां मन्थविलोडने इत्यस्माल्लुङिसिच् वदव्रजहलंतस्याचइतिवृद्धौप्राप्तायांनेटीतिप्रतिषेधः तस्थस्थमिपामित्यादिनातसस्तामादेशः पादादित्वादनिघातः अट्स्वरः । भारता भरतस्यापत्यमित्यर्थेउत्सादित्वादञ्तद्धितेष्वचामादेरित्यादिवृद्धिः ञित्स्वरः । रेवत् रयिशब्दान्मतुप् वत्वोदात्तत्वसम्प्रसारणपरपूर्वत्वगुणसुब्लोपाः । देवश्रवाःश्रुश्रवणे असुन्नितिकर्मण्यसुन् देवैः श्रूयतेप्रख्याप्यतेसावितिदेवश्रवाः ऋषिः कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्तेगतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यौणादिकसूत्रात्पूर्वपदस्वरः । देववातः वागतिगन्धनयोरस्मात्कर्मणिक्तः देवैरिष्यमाणतयाप्राप्तः देववातऋषिः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । द्यून् द्युअभिगमने द्युतदीप्तौवा ङिच्चेत्यनुवृत्तौ द्युयुभ्यांचेतिभोजसूत्रेणडुप्रत्ययःङिच्च द्युतेःअश्वादयश्चेतिडुन्प्रत्ययः अभिगच्छन्त्यस्मिन्स्वंस्वमभिमतंदेशंप्रापितइतिद्योत्यते किरणसंबन्धादितिवा द्युः दिवसःप्रथमयोरितिपूर्वसवर्णदीर्घः तस्माच्छसोनःपुंसीतिसकारस्यनकारः एकादेशस्वरः ॥ २ ॥

Funding by IKS-MoE

BHARATIYA VIDYA LIBRARY
८७
S. N.........

अथतृतीया—

दश॒क्षिपः॑पू॒र्व्यं॑सी॑मजीजन॒न्त्सुजा॑तंमा॒तृषु॑प्रि॒यम् ।
अ॒ग्निं॑स्तु॑हिदैववा॒तं॑देवश्रवो॒योजना॑ना॒मस॑द्व॒शी ॥ ३ ॥

दश॑ । क्षि॒पः॑ । पू॒र्व्य॑म् । सी॒म् । अ॒जी॒ज॒न॒न् । सु॒ऽजा॑तम् ।
मा॒तृषु॑ । प्रि॒यम् । अ॒ग्निम् । स्तु॒हि॒ । दै॒व॒ऽवा॒तम् । दे॒व॒ऽश्र॒वः॒ ।
यः । जना॑नाम् । अस॑त् । व॒शी ॥ ३ ॥

हेअग्ने देववातस्य क्षिपः क्षिप्यंते कर्मकरणार्थमितिक्षिपोङ्गुलयः ताश्चदश बाहुद्वयस्य मथनसाधनत्वेनतत्रत्याअङ्गुलयोदशसङ्ख्याकाः तादृश्योङ्गुलयः पूर्व्यंपुरातनं सीमेनंत्वामजीजनन् उदपीपदन् हेदेवश्रवः मातृषुमातृभूतारण्योःसुजातंसुष्ठूत्पन्नं अतएव प्रियं कमनीयं दैववातं देववातेनममभ्रात्रामथितमेनमग्निंस्तुहि योग्निः जनानांस्तोतॄणांयजमानानां वशवर्ती कर्मणांस्वातंत्र्येणप्रवर्तकः असत् भवति तंस्तुहीतिपूर्वेणान्वयः ॥ दश दंशदशने कनिन्नित्यनुवृत्तौ नुदशोर्गुणश्चेतिकनिन् नित्स्वरः । क्षिपः क्षिपप्रेरणे औणादिकः-कर्मणिक्विप् क्षिप्यंते प्रेर्यन्ते कर्मस्वितिक्षिपोङ्गुलयः धातुस्वरः । अजीजनन् जनीप्रादुर्भावे हेतुमण्यन्तस्यलुङिचङि द्विर्वचनसन्वद्भावाभ्यासेत्वदीर्घाः निघातः । स्तुहि ष्टुञ्स्तुतावित्यस्यलोटिरूपं अदादित्वाच्छपोलुक् निघातः । दैववातम् देववातेन निर्वृत्तमित्यर्थे तेननिर्वृत्तमित्यण् प्रत्ययस्वरः । असत् असभुवीत्यस्य लेटचडागमः यद्वृत्तयोगादनिघातः ॥ ३ ॥

अथचतुर्थी—

नित्वा॑दधे॒वर॒आपृ॑थि॒व्याइळा॑यास्प॒देसु॑दिन॒त्वेअह्ना॑म् ।
दृ॒षद्व॑त्यां॒मानु॑षआप॒याया॒सर॑स्वत्यां॑रे॒वद॑ग्नेदिदीहि ॥ ४ ॥

नि । त्वा॒ । द॒धे॒ । वरे॑ । आ । पृ॒थि॒व्याः । इळा॑याः । प॒दे ।
सु॒दि॒न॒ऽत्वे । अह्ना॑म् । दृ॒षत्ऽव॑त्याम् । मानु॑षे । आ॒प॒याया॑म् ।
सर॑स्वत्याम् । रे॒वत् । अ॒ग्ने॒ । दि॒दी॒हि॒ ॥ ४ ॥

हेअग्ने इळायाः गोरूपधारिण्याः पृथिव्याः भूमेर्वरे वरिष्ठेश्रेष्ठेपदेनाभिस्थाने उत्तरवेद्यां अह्नांसुदिनत्वेयजनीयदिवसानांशोभनदिनत्वार्थंयेषुदिनेषु इन्द्रादयोवरीयांसोदेवाइज्य-

न्ते तानिसुदिनानि तदर्थंत्वात्वां आनिदधे आसमन्तान्निदधामि उत्तमानिस्थानानिदर्शयति दृषद्वत्यां दृषद्वतीनामकाचिन्नदी तस्यांमानुषेमनुष्यसञ्चारविषयेतीरे आपयायांआपयानामकाचिन्नदी तस्यांसरस्वत्यांनद्यांच एतेषूत्तमेषुस्थानेषु त्वंरेवत् धनयुक्तंयथाभवतितथादिदीहि दीप्यस्व महर्षयःसरस्वतीतीरेखलुयज्ञादिकर्माण्यकार्षुः तथाचब्राह्मणम्–ऋषयोवैसरस्वत्यांसत्रमासते[1]ति॥ दधे । दधातेर्लट्युत्तमैकवचनेरूपम् । वरे वृञ्वरणे ग्रहवृदृनिश्चिगमश्चेत्यप् पित्त्वादनुदात्तत्वेधातुस्वरः । दृषद्वत्यां दृविदारणे दृणातेः षुक्ह्रस्वश्चेत्यादिनाषुगागमः धातोर्ह्रस्वश्च दृषदउपलायस्यांसन्तीतिमतुप् झयइतितस्यवत्वम् स्वरविधौ व्यञ्जनमविद्यमानवदित्यस्याः परिभाषायाअनाश्रयणान्मतुपउदात्तताभावः अद्रिप्रत्ययस्वरः । सरस्वत्यां सरःशब्दःअसुन्नन्तत्वादाद्युदात्तः तदस्यास्तीतिमतुप् अदुपधत्वान्मस्यवत्वं उदित्वात्ङीप् । दिदीहि दिवुक्रीडादावित्यस्ययङ्लुकिरूपम् ॥ ४ ॥

अथपञ्चमी–

इळा॑मग्नेपु॒रु॒दंसं॑स॒निंगोःश॑श्व॒त्त॒मंहव॑मानायसाध ।
स्यान्नः॑सू॒नु॒स्तन॑योवि॒जावा॑ग्ने॒साते॑सु॒म॒तिर्भू॑त्व॒स्मे ॥ ५ ॥ २३ ॥

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् ।
हव॑मानाय । सा॒ध॒ । स्यात् । न॒ः । सू॒नुः । तन॑यः । वि॒जाऽवा॑ ।
अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ ५ ॥ २३ ॥

व्याख्यातेयमित्युपेक्षिता ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेत्रयोविंशोवर्गः ॥ २३ ॥

अग्नेसहस्वेतिपञ्चर्चं द्वादशंसूक्तं अत्रानुक्रमणिका–अग्नेसहस्वगायत्रमाद्यानुष्टुबिति ऋषिर्गाथिनोविश्वामित्रः अग्निर्देवता आद्यानुष्टुप् शिष्टागायत्र्यः सूक्तविनियोगोलैङ्गिकः प्रातरनुवाकाश्विनशस्त्रेचप्रथमावर्जितस्यसूक्तस्यविनियोगः अथैतस्याइतिखण्डेसूत्रितम्–अग्नइळेतिचतस्रइति । अभ्युदयेष्टावग्नेर्दातुरनुवाक्या अग्नेदाशुषइत्येषा अथाग्नेय्यइतिखण्डेसूत्रितम्–अग्नेदाशुषेरयिंसयन्ताविप्रएषामिति ।

---

[1] ऐ० ब्रा० २. १९. ।

तस्मिन्सूक्तेप्रथमा—

अ॒ग्ने॒सह॑स्व॒पृत॑नाअ॒भिमा॑ती॒रपा॑स्य ।
दु॒ष्टर॒स्तर॒न्नरा॑ती॒र्वर्चो॑धाय॒ज्ञवा॑हसे ॥ १ ॥

अग्ने॑ । सह॑स्व । पृत॑नाः । अ॒भिऽमा॑तीः । अप॑ । अ॒स्य॒ ।
दु॒स्तर॑ः । तर॑न् । अरा॑तीः । वर्च॑ः । धाः॒ । य॒ज्ञऽवा॑हसे ॥ १ ॥

विश्वामित्रःस्तौति—हेअग्ने पृतनाअभियोक्त्रीःसेनाः सहस्व अभिभव अभिमातीः अभिमानिनः कर्मविघ्नकारिणः शत्रूनपास्यअपनुद किञ्च दुष्टरः नकेनापितरितुंशक्यः अतएव अरातीः अरातीन् शत्रून्तरन्स्वतेजसातिरस्कुर्वन् त्वं यज्ञवाहसे यज्ञनिर्वाहकाययजमानायवर्चोधाः अन्नंधेहि कुरु ॥ सहस्व षहमर्षणेइत्यस्यलोटिरूपम् आमन्त्रितस्याविद्यमानत्वेनपादादित्त्वादनिघातः । अभिमातीःमाङ्माने मानंमातिः भावेक्तिन् अस्यालुग्विकरणत्वादीत्वेत्वे नभवतः अभितोमानंयेषांतेइतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अस्य असुक्षेपणे दिवादिः लोटि रूपम् । दुष्टरः तॄप्लवनतरणयोः अस्मादकृच्छ्रार्थेखल् सुषामादित्वाद्विसर्जनीयस्यसकारस्यषत्वं लित्स्वरः । तरन् तरतेःशतरिरूपम् अदुपदेशाल्लसार्वधातुकस्वरेणशतुरनुदात्तत्वेकृते धातुस्वरः । धाः दधातेश्छन्दसिलुङिरूपम् निघातः ॥ १ ॥

अथद्वितीया—

अग्न॑इ॒ळासमि॑ध्यसेवी॒तिहो॑त्रो॒अम॑र्त्यः । जु॒षस्व॒सूनो॑अ॒ध्व॒रम् ॥२॥

अग्ने॑ । इ॒ळा । सम् । इ॒ध्य॒से॒ । वी॒तिऽहो॑त्रः । अम॑र्त्यः ।
जु॒षस्व॑ । सु । नः॒ । अ॒ध्व॒रम् ॥ २ ॥

हेअग्ने वीतिहोत्रः वीतिःप्रीतिविषयंहोत्रमग्निहोत्रादिकंयस्यासौवीतिहोत्रः यज्ञेषुप्रीतिमानित्यर्थः अमर्त्यः मरणधर्मरहितस्त्वं इळा इळायां ईड्यायामुत्तरवेद्यांसमिध्यसे आज्याहुतिप्रक्षेपेणसम्यक्प्रज्वाल्यसे तादृशस्त्वं नोस्माकमध्वरमिमंयज्ञंसुसुष्ठुजुषस्व आहुतिस्वीकरणेनसेव-

स्व ॥ वीतिहोत्रः वीकान्त्यादिषु अस्मात्कर्मणि मन्त्रेवृषेषपचेत्यादिनाक्तिन्नुदात्तः बहुव्रीहौपूर्वपदस्वरः । जुषस्व जुषतेर्लोटिरूपम् शस्वरः । सु निपातस्यचेतिसंहितायांदीर्घः ॥ २ ॥

अथतृतीया—

अग्ने॑द्यु॒म्नेन॑जागृवे॒सह॑सःसूनवाहुत । एदं ब॒र्हिःस॑दो॒मम॑ ॥ ३ ॥

अग्ने॑ । द्यु॒म्नेन॑ । जा॒गृ॒वे॒ । सह॑सः । सू॒नो॒ इति॑ । आ॒ऽहु॒त॒ ।
आ । इ॒दम् । ब॒र्हिः । स॒दः॒ । मम॑ ॥ ३ ॥

द्युम्नेन स्वतेजसासह जागृवेजागर्तीतिजागृविः तस्यसंबुद्धिः लोकरक्षार्थंस्वतेजसा सहसर्वदाजागरणोपेत आहुत देवताह्वानार्थंअस्माभिराहूत सहसःसूनो बलस्यपुत्र हेअग्ने त्वं मम ममसंबंधिन्यस्मिन्यज्ञे यद्वेद्यामास्तीर्णमिदंबर्हिः तत्रआसदः आसीद ॥ जागृवे जागृनिद्राक्षये जॄशॄस्तॄजागृभ्यःक्विन्निति क्विन् किच्वादगुणः जागर्तीतिजागृविः जागृविर्जागरणादितियास्कः । संबुद्धौचेतिगुणः एङ्ह्रस्वादितिसोर्लोपः निघातः । सहसःसूनो सुपआमन्त्रितेपरांगवद्भावादनुदात्तत्वे पादादित्वादनिघातः । सदः षद्लृविशरणगत्यवसादनेषुइत्यस्यछान्दसेलुङि लृदित्त्वादङ् निघातः । मम अस्मच्छब्दस्यषष्ठ्येकवचनस्यममादेशः युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् ॥ ३ ॥

अथचतुर्थी—

अग्ने॒विश्वे॑भिर॒ग्निभि॑र्दे॒वेभि॑र्महया॒गिरः॑ । य॒ज्ञेषु॒यउ॑चा॒यवः॑ ॥ ४ ॥

अग्ने॑ । विश्वे॑भिः । अ॒ग्निऽभिः॑ । दे॒वेभिः॑ । म॒ह॒य॒ । गिरः॑ । य॒ज्ञेषु॑ ।
ये । ऊँ॒ इति॑ । चा॒यवः॑ ॥ ४ ॥

हेअग्ने देवेभिः द्योतमानैः विश्वेभिः सर्वैरग्निभिः यष्टव्यतयास्थितैरग्निभिः सहितस्त्वंचायवः उक्तविषयस्तुतिरूपाभिर्वाग्भिरनन्यमनस्कतयापूजकायेविद्यंते तेषां यज्ञेषुज्योतिष्टोमादिषु गिरःस्तोत्रशस्त्रादिलक्षणानिवाक्यानिमहयपूजय ॥ महय महपूजायां चुरादिः अदन्तत्वादुपधावृद्ध्यभावः निघातः । चायवः चायृपूजानिशामनयोः मृगय्वादयश्चेतिकुप्रत्ययः प्रत्ययस्वरः ॥ ४ ॥

Funding by IKS-MoE

अथपञ्चमी–

अग्ने॒दादा॒शुषे॑र॒यिंवी॒रव॑न्तं॒परी॑णसम् । शि॒शी॒हिनः॑सूनु॒मतः॑ ॥५॥२४॥

अग्ने॑ । दाः । दा॒शुषे॑ । र॒यिम् । वी॒रऽव॑न्तम् । परी॑णसम् । शि॒शी॒हि ।
न॒ः । सू॒नु॒ऽमतः॑ ॥ ५ ॥ २४ ॥

हेअग्ने दाशुषे हविर्दत्तवतेयजमानाय वीरवन्तं पुत्रयुक्तं परीणसं प्रभूतंरयिंधनं दाः देहि सूनुमतः पुत्रपौत्रादिसहितान्नोस्मान् शिशीहि धनप्रदानेनतीक्ष्णान्कुरु ॥ दाः डुदाञ् दानेइत्यस्यछान्दसेलुङिरूपं आमन्त्रितस्याविद्यमानत्वेनपादादित्वादनिघातः । दाशुषे दाशृदानेइत्यस्यक्वसौ दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनाद्द्विर्वचनाभावः इडभावश्च भसंज्ञायां संप्रसारणं प्रत्ययस्वरः । परीणसं परिपूर्वान्नसतेर्व्याप्त्यर्थात्क्विप् अन्येषामपिदृश्यतइतिदीर्घः । शिशीहि शिङ्निशाने व्यत्ययेनश्लुः दीर्घश्छान्दसः हेरपित्त्वादन्तोदात्तत्वम् ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेचतुर्विंशोवर्गः ॥ २४ ॥

अग्नेदिवइतिपञ्चर्चंत्रयोदशंसूक्तंवैश्वामित्रम् अत्रेयमनुक्रमणिका–अग्नेदिवोवैराजमुपान्त्याग्नेन्द्रीति विराट्छन्दः अग्नइन्द्रश्चेत्येषाइन्द्राग्नीदेवताका शिष्टाआग्नेय्यः अग्निष्टोमेआज्यशस्त्रेअग्नइन्द्रश्चेतियाज्या अग्नइन्द्रश्चदाशुषोदुरोणइतियाज्येतिसूत्रितत्वात् ।

तस्मिन्सूक्तेप्रथमा–

अग्ने॑दि॒वःसू॒नुर॑सि॒प्रचे॑ता॒स्तना॑पृथि॒व्याउ॒तवि॒श्ववे॑दाः ।
ऋध॑ग्दे॒वाँइ॒हय॑जाचिकित्वः ॥ १ ॥

अग्ने॑ । दि॒वः । सू॒नुः । अ॒सि॒ । प्रऽचे॑ताः । तना॑ । पृ॒थि॒व्याः ।
उ॒त । वि॒श्वऽवे॑दाः । ऋध॑क् । दे॒वान् । इ॒ह । य॒ज॒ । चि॒कि॒त्वः॒ ॥ १ ॥

विश्वामित्रःस्तौति–हेअग्ने विश्ववेदाः सर्वविषयज्ञानवान्प्रचेताः कर्मविषयज्ञानवान्त्वं दिवःद्युलोकाभिमानिदेवतायाःसूनुरसि पुत्रोभवसि उतअपिच पृथिव्याः पृथिव्यभिमानिदेवतायाः तना तनयोसि किञ्च चिकित्वः चेतनावन् हेअग्ने इहास्माभिः क्रियमाणेस्मिन्कर्मणि

Funding by IKS-MoE

देवान्यजनीयानिन्द्रादिदेवानृधक् पृथक्क्रमेणयज हविःप्रदानेनपूजय ॥ असि अस्भुवीत्यस्य लटि तासस्त्योर्लोपइतिसलोपः निघातः । विश्ववेदाः बहुव्रीहौविश्वंसंज्ञायामितिविश्वस्यान्तोदात्तत्वम् ॥ १ ॥

अथद्वितीया–

अ॒ग्निःसं॑नोतिवी॒र्या॑णिवि॒द्वान्त्स॒नोति॒वाज॑म॒मृता॑य॒भूष॑न् ।
सनो॑दे॒वाँएहव॑हापुरुक्षो ॥ २ ॥

अ॒ग्निः । स॒नो॒ति॒ । वी॒र्या॑णि । वि॒द्वान् । स॒नोति॑ । वाज॑म् ।
अ॒मृता॑य । भूष॑न् । सः । न॒ः । दे॒वान् । आ । इ॒ह । व॒ह॒ ।
पु॒रु॒क्षो॒ इति॑ पुरुऽक्षो ॥ २ ॥

विद्वान्कर्माभिज्ञोयोग्निःवीर्याणि पशुपुत्रादिसंपद्रूपाणिसामर्थ्यानि सनोति यजमानाय ददाति यश्चाग्निः भूषन् स्वतेजसासर्वंजगद्भूषयन् अलंकुर्वन् अमृताय मरणधर्मरहितायेन्द्रादिदेवाय वाजंहविर्लक्षणमन्नं सनोति प्रयच्छति पुरुक्षो पुरोडाशादिबहुविधान्नोपेत हेअग्ने सताद्दशस्त्वंनोस्माकंसंबन्धिनिइहास्मिन्यज्ञे देवान् यजनीयान्देवानावह आह्वय ॥ सनोति षणुदाने तनादित्वादुप्रत्ययः प्रत्ययस्वरः पादादित्वादनिघातः । भूषन् भूषअलंकारे अन्तर्भावितण्यर्थः शतुर्लसार्वधातुकस्वरेणानुदात्तत्वेधातुस्वरःशिष्यते । वह वहेर्लोटिरूपम् । पुरुक्षो पुरवःक्षुधोन्नानियस्येतिपुरुक्षुः अंत्यलोपश्छान्दसः संबुद्धौचेतिगुणः ॥ २ ॥

अथतृतीया–

अ॒ग्निर्द्यावा॑पृथि॒वीवि॒श्वज॑न्ये॒आभा॑तिदे॒वीअ॒मृते॒अमू॑रः ।
क्षय॒न्वाजैः॑पुरुश्च॒न्द्रोनमो॑भिः ॥ ३ ॥

अ॒ग्निः । द्यावा॑पृथि॒वी इति॑ । वि॒श्वज॑न्ये॒ इति॑ वि॒श्वऽज॑न्ये ।
आ । भा॒ति॒ । दे॒वी इति॑ । अ॒मृते॒ इति॑ । अमू॑रः । क्षय॑न् ।
वाजैः॑ । पु॒रु॒ऽच॒न्द्रः । नम॑ःऽभिः ॥ ३ ॥

Funding by IKS-MoE

अमूरः अमूढः सर्वज्ञः क्षयन् ईशानःसर्वस्यजगतः अतएवपुरुश्चन्द्रः पुरुचन्द्रः बहुहिरण्योपेतः यद्वा बहुदीप्तिस्वरूपः वाजैर्बलैर्नमोभिः अन्नैश्चसहितः सोग्निः विश्वजन्ये विश्वस्य जनयित्र्यौ यद्वा विश्वंजन्यमुत्पाद्यंयाभ्यांतेदेवी द्योतमाने अमृते मरणधर्मरहिते द्यावापृथिवीद्यावापृथिव्यौ आभाति आसमन्तात्प्रकाशयति ॥ द्यावापृथिवी दिवःशब्दस्यदिवोद्यावेतिद्यावादेशः आद्युदात्तः पृथिवीशब्दोङीषन्तत्वेनान्तोदात्तः देवताद्वन्द्वेचेत्युभयोःप्रकृतिस्वरत्वम् । विश्वजन्ये बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तः तत्पुरुषेतु स्वरश्चिंतनीयः । आभाति भादीप्तौ अन्तर्भावितण्यर्थः । क्षयन् क्षिऐश्वर्ये शतुर्लसार्वधातुकस्वरेणानुदात्तत्वेधातुस्वरः । पुरुश्चन्द्रः ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रेइतिसुडागमः श्चुत्वेनशकारः उत्तरपदान्तोदात्तप्रकरणे त्रिचक्रादीनांछन्दस्युपसंख्यानमितिउत्तरपदान्तोदात्तत्वम् यद्वा समासस्येत्यन्तोदात्तत्वम् ॥ ३ ॥

अथचतुर्थी–

अग्न॒इन्द्र॑श्चदा॒शुषो॑दुरो॒णेसु॒ताव॑तोय॒ज्ञमि॒होप॑यातम् ।
अम॑र्धन्तासोम॒पेया॑यदेवा ॥ ४ ॥

अग्ने॑ । इन्द्रः॑ । च॒ । दा॒शुषः॑ । दु॒रो॒णे । सु॒तऽव॑तः । य॒ज्ञम् ।
इ॒ह । उप॑ । या॒त॒म् । अम॑र्धन्ता । सो॒म॒ऽपेया॑य । दे॒वा ॥ ४ ॥

हेअग्ने त्वमिन्द्रश्चोभौ देवा देवौ युवां अमर्धंता अनागमनेनयज्ञाहिंसामकुर्वन्तौसन्तौ सुतवतः सोमाभिषवंकुर्वतः दाशुषः हविर्दत्तवतोयजमानस्येहदुरोणेगृहेक्रियमाणमिमंयज्ञमभिलक्ष्य सोमपेयाय सोमपानार्थं उपयातं उपसमीपे आगच्छतम् ॥ यातं याप्रापणेइत्यस्य लोटि रूपं निघातः । अमर्धन्ता मृधुहिंसायामित्यस्यशतरिरूपम् नञासमासः सुपोडादेशः तत्पुरुषे नञ्स्वरः । सोमपेयाय पापाने अचोयदितियत् ईद्यतीतीकारादेशः आर्धधातुकलक्षणोगुणः कृदुत्तरपदप्रकृतिस्वरः ॥ ४ ॥

अथपञ्चमी–

अग्ने॑अ॒पांसमि॑ध्यसेदुरो॒णेनित्यः॑सूनोसहसोजातवेदः ।
स॒धस्था॑निम॒हय॑मानऊ॒ती ॥ ५ ॥ २५ ॥

अग्ने॑ । अ॒पाम् । सम् । इ॒ध्य॒से॒ । दु॒रो॒णे । नित्य॑ः । सू॒नो॒ इति॑ ।
स॒ह॒स॒ः । जा॒त॒ऽवे॒द॒ः । स॒धऽस्था॑नि । म॒हय॑मानः । ऊ॒ती ॥ ५ ॥ २५ ॥

सहसःसूनो बलस्यपुत्र जातवेदः जातप्रज्ञ हेअग्ने नित्यः अविनाशी ऊती ऊत्या रक्षणेनसधस्थानि प्राणिनांनिवासभूतान्लोकान्महयमानः परिचरंस्त्वं अपांदुरोणे अपांस्थानेन्तरिक्षेसमिध्यसे सम्यग्दीप्यसे ॥ दुरोणे अवरक्षणेइत्यस्मादौणादिकोनक्प्रत्ययः ज्वरत्वरेत्यादिनाऊठ् गुणः दुरोणइतिगृहनाम दुरवाभवन्तीतियास्कः[1] प्रत्ययस्वरः । महयमानः महपूजायां व्यत्ययेनशानच् शानचोलसार्वधातुकस्वरेणानुदात्तत्वे णिचूस्वरः । ऊती अवरक्षणादिषु ऊतियूतीत्यादिनानिपातनादन्तोदात्तः सुपांसुलुगितितृतीयायाः सवर्णदीर्घः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेपञ्चविंशोवर्गः ॥ २५ ॥

वैश्वानरंमनसेतिनवर्चंचतुर्दशंसूक्तम् तत्रानुक्रमणिका—वैश्वानरंनव तृचौवैश्वानरीयमारुतौजागतौ द्व्यृचआत्मस्तुतिर्वा पूर्वात्मगीतान्त्योपाध्यायस्तुतिरिति वैश्वानरंमनसेत्याद्यौतृचौ जागतौ प्रथमस्य वैश्वानरोग्निर्देवता सप्तम्याद्यास्तिस्रस्त्रिष्टुभः अग्निरस्मीतिद्व्यृचस्याग्निः परंब्रह्मवादेवता नवम्यास्तु विश्वामित्रोपाध्यायस्यस्तुत्यत्वात्सएवदेवता सप्तमीवर्जितस्य सूक्तस्य विश्वामित्रऋषिः सप्तम्याः ब्रह्मवाक्यत्वाद्यस्यवाक्यंसऋषिरितिन्यायेनब्रह्मऋषिः वैश्वानरंमनसेत्याद्यस्तृचआभिप्लविकेचतुर्थेहनिआग्निमारुतेवैश्वानरीयेनिविद्धानेविनियुक्तः तृतीयस्येतिखण्डेसूत्रितम्—वैश्वानरंमनसेतितिस्रइति । अयमेवतृचोबृहस्पतिसवेप्याग्निमारुतेवैश्वानरीयनिविद्धानीयः प्रयन्तुवाजाइतिद्वितीयतृचोबृहस्पतिसवेमारुतनिविद्धानीयः उभयमपिउशनसःस्तोमेनेतिखण्डेसूत्रितम्—वैश्वानरंमनसाग्निंनिचाय्यप्रयन्तुवाजास्तविषीभिरग्नयइति । अग्निचयनेसञ्चिताग्न्यनुशंसने अग्निरस्मीत्येषा अथाग्निंसञ्चितमनुगीतमनुशंसेदित्युपक्रम्यसूत्रितम्—अग्निरस्मिजन्मनाजातवेदाइतित्रिर्मध्यमयावाचेति ।

तस्मिन्सूक्तेप्रथमा—

वै॒श्वा॒न॒रंमन॑सा॒ग्निंनि॒चाय्या॑ह॒विष्म॑न्तोअनुष॒त्यंस्व॒र्विद॑म् ।
सु॒दानुं॑दे॒वंर॑थि॒रंव॑सू॒यवो॑गी॒र्भीर॒ण्वंकु॑शि॒कासो॑हवामहे ॥ १ ॥

---

[1] नि० ४. ५.

वै॒श्वा॒न॒रम् । मन॑सा । अ॒ग्निम् । नि॒ऽचाय्य॑ । ह॒विष्म॑न्तः ।
अ॒नु॒ऽस॒त्यम् । स्व॒ःऽविद॑म् । सु॒ऽदानु॑म् । दे॒वम् । र॒थि॒रम् ।
व॒सु॒ऽयव॑ः । गी॒ःऽभिः । र॒ण्वम् । कु॒शि॒कास॑ः । ह॒वा॒म॒हे॒ ॥ १॥

विश्वामित्रःस्तौति—हेअग्ने हविष्मन्तःसंभृतहविष्काः वसूयवः धनमात्मनइच्छन्तः कुशिकासः कुशिकगोत्रोत्पन्नावयं वैश्वानरं विश्वेनराअग्निप्रणयनादिक्रियायाः नेतारोयस्येतिविश्वानरोग्निः तस्यसबन्धीवैश्वानरः अपत्यमितियावत् यद्वा विश्वानरएववैश्वानरः तद्धितोनन्यार्थः राक्षसवायसादिवत् तं अनुषत्यं सत्येनानुगतं कर्मानुरूपफलप्रदानेसत्यप्रतिज्ञं स्वर्विदं स्वर्गादिलक्षणफलस्यज्ञातारं अतएवसुदानुं सुष्ठुफलस्यदातारं रथिरं रथवन्तं अतएव रण्वं यज्ञान्गच्छन्तं देवंद्योतमानं तमिममग्निंमनसानिचाय्य अन्तःकरणेन एवंविधगुणविशिष्टस्त्वमितिज्ञात्वा गीर्भिःस्तुतिलक्षणाभिर्वाग्भिःहवामहे इहकर्मणित्वामाह्वयामः ॥ वैश्वानरं नरेसंज्ञायामितिपूर्वपदस्यदीर्घत्वं विश्वानरस्येदमित्यर्थे तस्येदमित्यण् प्रत्ययस्वरः। निचाय्य चायृपूजानिशामनयोरित्यस्यल्यपिरूपं लित्स्वरः। अनुषत्यं अनुगतंसत्येन अवादयः क्रुष्टाद्यर्थेतृतीययेतिसमासः सुषामादित्वात्षत्वं निरुदकादित्वादन्तोदात्तम् ॥ सुदानुं डुदाञ्दाने दाभाभ्यांनुरितिकर्तरिनुप्रत्ययः परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । रथिरं रथशब्दान्मतुबर्थे मेधारथाभ्यामिरन्निरचौवक्तव्यावितीरच् चित्स्वरः। वसूयवः वस्वात्मनइच्छन्तइति सुपआत्मनःक्यच् अकृत्सार्वधातुकयोरितिदीर्घः क्याच्छन्दसीत्युप्रत्ययः अतोलोपः प्रत्ययस्वरः। रण्वं रविर्गत्यर्थः रण्वतियज्ञान्गच्छतीतिरण्वः पचाद्यजन्तः चित्स्वरः। कुशिकासः कुशिकशब्दाद्गोत्रमित्यर्थेविदादित्वादञ् तस्यबहुषु यञञोश्चेतिलुक्। हवामहे ह्वयतेर्बहुलंछन्दसीतिसम्प्रसारणं निघातः ॥ १ ॥

अथद्वितीया—

तंशु॒भ्रम॒ग्निमव॑सेहवामहे॑वैश्वान॒रं॑मा॑त॒रिश्वा॑नमु॒क्थ्य॑म् ।
बृह॒स्पति॒मनु॑षोदे॒वता॑तये॒विप्र॒ंश्रोता॑र॒मति॑थिंरघु॒ष्यद॑म् ॥ २ ॥

तम् । शु॒भ्रम् । अ॒ग्निम् । अव॑से । ह॒वा॒म॒हे॒ । वै॒श्वा॒न॒रम् ।
मा॒त॒रिश्वा॑नम् । उ॒क्थ्य॑म् । बृ॒ह॒स्पति॑म् । मनु॑षः । दे॒वऽता॑तये ।
विप्र॑म् । श्रोता॑रम् । अति॑थिम् । र॒घु॒ऽस्यद॑म् ॥ २ ॥

Funding by IKS-MoE

योऽग्निःपूर्वमन्त्रेप्रतिपादितः तंशुभ्रं द्योतमानंवैश्वानरं विश्वानरसंबन्धिनं मातरिश्वानं मातर्यन्तरिक्षेश्वसितिविद्युदादिरूपतयाचेष्टतइतिमातरिश्वाग्निः तंउक्थ्यं उक्थैःशस्त्रैःशंसनीयं बृहस्पतिं बृहतोयज्ञस्यपतिं पालकतयास्वामिनं विप्रं मेधाविनंश्रोतारंस्तोत्रशस्त्रादिमन्त्रवाक्यंश्रृण्वन्तमतिथिं आतिथेयपूजार्हतयायदृच्छयाप्राप्तं रघुष्यदं लघुस्यदं रघुःलघुः स्यदोवेगोयस्येति क्षिप्रगन्तारम् यद्वा स्यदशब्देन अध्वालक्ष्यते रघुस्यदः क्षिप्रगन्तेत्यर्थः तमेवंविधगुणयुक्तमग्निंअवसे अस्माकंरक्षणाय हवामहे कुशिकगोत्रजावयमाह्वयामः किंच मनुषोमनुष्यस्यदेवतातये यज्ञार्थंत्वामाह्वयामः ॥ शुभ्रं शुभदीप्तावित्यस्मात् स्फायितञ्चिवञ्चीत्यादिनाकर्तरिरक् किच्त्वाद्गुणाभावः प्रत्ययस्वरः । मातरिश्वानं निर्माणहेतुत्वान्मातान्तरिक्षं तत्र श्वसितिप्राणितीतिमातरिश्वाग्निः श्वन्नुक्षन्नित्यादिनामातरिश्वन्शब्दः क्वन्प्रत्ययान्तत्वेननिपातनात्पूर्वपदान्तोदात्तत्वम् । उक्थ्यं उक्थेनस्तोत्रेणस्तुत्यः तत्रभवइत्यर्थे भवेच्छन्दसीतियत् तित्स्वरितमितिस्वरितः । देवतातये देवएवदेवतातिः स्वार्थिकस्तातिल् देवतातिशब्देनयज्ञोलक्ष्यते तत्संप्रदानकत्वाद्यज्ञस्य लित्स्वरः । रघुष्यदं स्यन्दूप्रस्रवणेइत्यस्माद्घञन्तः स्यदशब्दः स्यदोजवेइतिनिपातनादनुनासिकलोपः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ २ ॥

अथतृतीया—

अश्वो॒नक्रन्द॒ञ्जनि॑भि॒ःसमि॑ध्यतेवैश्वा॑न॒रःकु॑शि॒केभि॑र्यु॒गेयु॑गे।
सनो॑अ॒ग्निःसु॒वीर्यं॒स्वश्व्यं॒दधा॑तु॒रत्न॑म॒मृते॑षु॒जागृ॑विः ॥ ३ ॥

अश्वः॑ । न । क्रन्द॑न् । जनि॑ऽभिः । सम् । इ॒ध्य॒ते॒ ।
वै॒श्वा॒न॒रः । कु॒शि॒केभिः॑ । यु॒गेऽयु॑गे । सः । नः॒ । अ॒ग्निः ।
सु॒ऽवीर्य॑म् । सु॒ऽअश्व्य॑म् । दधा॑तु । रत्न॑म् ।अ॒मृते॑षु । जागृ॑विः ॥ २ ॥

योवैश्वानरोऽग्निःकुशिकेभिः स्तोत्रंकुर्वाणैर्होत्रादिभिर्युगेयुगेप्रतिदिनं समिध्यते आज्याद्याहुतिप्रक्षेपेणसम्यग्दीप्यते तत्रदृष्टान्तः—अश्वोनेति यथाजातोऽश्वः क्रंदन् हेषारवंकुर्वन् जनिभिर्जनयित्रीभिर्वडवाभिः स्तन्यप्रदानेनप्रतिदिनंसम्यक्पोष्यते तद्वत् अमृतेषु मरणधर्मरहितेषुदेवेषुमध्ये जागृविः ज्वालयाजाग्रद्दीप्यमानः सोऽग्निः सुवीर्यं शोभनापत्ययुक्तं स्वश्व्यं शोभनाश्वादिपशुयुक्तंरत्नमुत्तमंधनंनोस्माकंदधातुविदधातु प्रयच्छतु ॥ युगेयुगे नित्यवीप्सयोरि-

तिर्द्विर्वचनं परस्याम्रेडितत्वादनुदात्तत्वेपूर्वपदप्रकृतिस्वरत्वम् ॥ स्वश्व्यं अश्वशब्दः क्वन्प्रत्ययान्तआद्युदात्तः बहुव्रीहौ आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् यकारोपजनश्छान्दसः यद्वा अश्वेषुसाधवः अश्व्याः तत्रसाधुरितियत् यतोनावइत्याद्युदात्तत्वम् बहुव्रीहौपूर्वोक्तस्वरः । दधातु दधातेर्लोटिरूपम् । रत्नम् रमुक्रीडायामित्येतस्माद्रमेस्तचेति अधिकरणेनप्रत्ययः तकारश्चान्तादेशः रमन्तेस्मिन्निितिरत्नं निदित्यनुवृत्तौ आद्युदात्तः । जागृविः क्विन्प्रत्ययान्तः नित्त्वादाद्युदात्तः ॥ ३ ॥

अथचतुर्थी—

प्रयं॑न्तु॒वाजा॒स्तवि॑षीभिर॒ग्नय॑ःशु॒भेसंमि॑श्ला॒ःपृष॑तीरयुक्षत ।
बृ॒ह॒दु॒क्षोम॒रुतो॑वि॒श्ववे॑दस॒ःप्रवे॑पयन्ति॒पर्व॑ता॒ँअदा॑भ्याः ॥ ४ ॥

प्र । य॒न्तु॒ । वाजा॑ः । तवि॑षीभिः । अ॒ग्नय॑ः । शु॒भे ।
सम्ऽमि॑श्लाः । पृष॑तीः । अ॒यु॒क्ष॒त॒ । बृ॒ह॒त्ऽउ॒क्ष॑ः । म॒रुत॑ः ।
वि॒श्वऽवे॑दसः । प्र । वे॒प॒य॒न्ति॒ । पर्व॑तान् । अदा॑भ्याः ॥ ४ ॥

वाजाः वेगवन्तोग्नयः प्रयन्तु जलमभिलक्ष्यगच्छन्तु गताश्चतेग्नयः तविषीभिर्बलयुक्तैर्मरुद्भिः शुभेजलेसंमिश्राः परस्परंसंगताःसन्तः पृषतीःबिंदूनयुक्षत अयुक्षत् अयुञ्जन् जलबिन्दूनकुर्वन् यद्वा वाजावेगवन्तोग्नयःतविषीभिर्बलयुक्तैर्मरुद्भिः जलमनुलक्ष्यप्रयन्तुगच्छन्तु तेचमरुतः शुभेजलेसंमिश्राः अग्निभिःसंगताःसन्तः पृषतीश्चित्रवर्णावाहनरूपावडवाः अयुक्षत रथेमेघभेदनार्थे ताअयौक्षुः रथारूढास्तेविश्ववेदसः प्राणिकृतकर्माभिज्ञानयुक्ताः अदाभ्याः केनाप्यतिरस्कार्याः मरुतः एवंविधावायवः बृहदुक्षः प्रभूतजलसेक्तॄन् पर्वतान्मेघान्प्रवेपयन्ति यथाप्रभूतावृष्टिर्भवति तथामेघान्चालयन्ति ॥ तविषीभिः तवगताविति सौत्रोधातुः अस्मात्तवेर्णिद्वेतिटिषच्निच्च तवन्तिसंचरन्तिआकाशेइतितविषावायवः टिड्ढाणञितिङीप् अत्रलिङ्गव्यत्ययः नित्त्वादाद्युदात्तः । पृषतीः पृषुसेचने पृपालनपूरणयोरितिवा इत्यस्माद्वर्तमाने पृषद्बृहन्महदितिनिपातनादतिप्रत्ययःशतृवद्भवति उगितश्चेतिङीप् पर्षन्तीतिपृषतः शीकराः पृणन्ति पालयन्तीतिपृषत्योवडवाः । अयुक्षत युजिर्योगेइत्यस्यलुङिसिचिरूपं निघातः । बृहदुक्षः उक्षसेचनेइत्यस्मात्क्विप् कृदुत्तरपदप्रकृतिस्वरः । वेपयन्ति टुवेपृकम्पने निघातः ।

Funding by IKS-MoE

पर्वतान् पर्वपूरणेइत्यस्मात् भृमृदृशीत्यादिनाअतच् पर्वतिपूरयतिभूमिमुदकेनेतिपर्वतोमेघः व्यत्ययेनाद्युदात्तः ॥ ४ ॥

अथपञ्चमी–

अ॒ग्नि॒श्रियो॑म॒रुतो॑वि॒श्वकृ॑ष्टय॒आत्वे॒षमु॒ग्रमव॑ईमहे॒व॒यम् ।
तेस्वा॒निनो॑रु॒द्रिया॑व॒र्षनि॑र्णिजः॒सिं॒हानहे॒षक्र॑तवः॒सु॒दान॑वः ॥ ५ ॥२६॥

अ॒ग्नि॒ऽश्रियः॑ । म॒रुतः॑ । वि॒श्वऽकृ॑ष्टयः । आ । त्वे॒षम् ।
उ॒ग्रम् । अवः॑ । ई॒म॒हे॒ । व॒यम् । ते । स्वा॒निनः॑ । रु॒द्रियाः॑ ।
व॒र्षऽनि॑र्निजः । सिं॒हाः । न । हे॒षऽक्र॑तवः । सु॒ऽदान॑वः ॥ ५ ॥ २६ ॥

अग्निश्रियः वैद्युतमग्निंश्रयन्तोविश्वकृष्टयः विश्वस्यवृक्षादेः कृष्टिराकर्षणंनमनोन्नमनादिलक्षणंकर्मयेभ्योभवतितेविश्वकृष्टयः एवंविधायेमरुतोविद्यंते तेषांचमरुतां त्वेषं दीप्तं उग्रं उद्गूर्णं अवोरक्षणं आईमहे कुशिकावयमासमंतात्याचामहे ते मरुतः रुद्रियारुद्रपुत्राः वर्षनिर्णिजः निर्णिक्शब्दोरूपवाची निर्णिक्वव्रिरितितन्नामसुपाठात् वर्षणरूपंस्वभावोयेषांतेवर्षनिर्णिजोवर्षकाः हेषक्रतवः हेषारवस्यक्रतुःकरणंयेषांते कृतहेषारवाः सिंहान सिंहाइव स्वानिनः शब्दवन्तः एवंविधास्तेमरुतः सुदानवः सुष्ठुजलस्यदातारोभवन्ति ॥ अग्निश्रियः श्रिञ् सेवायां वचिप्रच्छीत्यादिनाक्विप् सम्प्रसारणाभावः धातोर्दीर्घश्च जसि इयङादेशः कृत्स्वरः । उग्रं गम्लृगतौ उत्पूर्वः ऋज्रेंद्राग्रेतिनिपातनाद्रन्प्रत्ययः मकारलोपः उपसर्गस्यान्तलोपश्च उद्गच्छतीत्युग्रः प्रत्ययस्वरः । ईमहे ईकान्त्यादिषु व्यत्ययेनात्मनेपदम् अदादित्वाच्छपोलुक् निघातः । स्वानिनः स्वानःघञन्तः तद्वन्तः अतइनिठनावितीनिः प्रत्ययस्वरः । रुद्रियाः रुद्रशब्दाच्छान्दसोघः तस्येयादेशः प्रत्ययस्वरः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेषड्विंशोवर्गः ॥ २६ ॥

अथषष्ठी–

व्रातं॑व्रातंग॒णंग॑णंसुश॒स्तिभि॑र॒ग्नेर्भामं॑म॒रुता॒मोज॑ईमहे ।
पृष॑दश्वासोअनव॒भ्रराधसो॒गन्ता॑रोय॒ज्ञंवि॒दथे॑षु॒धीराः॑ ॥ ६ ॥

व्रातं॑म्ऽव्रातम् । ग॒णम्ऽग॑णम् । सु॒श॒स्तिऽभिः॑ । अ॒ग्नेः ।
भाम॑म् । म॒रुता॑म् । ओजः॑ । ई॒म॒हे॒ । पृष॑त्ऽअश्वासः ।
अ॒न॒व॒भ्रऽरा॑धसः । गन्ता॑रः । य॒ज्ञम् । वि॒दथे॑षु । धीराः॑ ॥ ६ ॥

कुशिकावयं अग्नेर्भामंभासकंमरुतामोजस्तेजः व्रातंव्रातं व्रातेव्रातेप्रतिसमूहं गणंगणंगणेगणे महतिसमूहे क्रियमाणाभिःसुशस्तिभिःशोभनाःशस्तयः स्तुतयोयैर्मन्त्रैःक्रियन्तेतेसुशस्तयः तैर्मन्त्रैरीमहे तादृशंमारुतंतेजोयाचामहे यद्वा व्रातंव्रातंवारकंगणंगणंमरुतांसप्तगणान् ओजोबलं याचामहे पृषदश्वासः पृषत्यश्चित्रवर्णाः अश्वायेषांतेतादृशाः अनवभ्रराधसः नविद्यतेअवभ्रंशोयस्यतदनवभ्रं अनवभ्रंराधोधनंयेषांतेअनवभ्रष्टधनाः संपूर्णधनाइतियावत् धीराः कर्माभिज्ञास्ते मरुतःविदथेषुयज्ञेषुयज्ञंयजनीयंहविरभिलक्ष्यगन्तारोगमनशीलाभवन्ति ॥ गणंगणं गणसंख्याने पचाद्यच् नित्यवीप्सयोरितिद्विर्वचनम् परस्याम्रेडितत्वादनुदात्तत्वेपूर्वपदस्वरः । सुशस्तिभिः बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । भामं भादीप्तावित्यस्मादर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन्- इत्यादिनामन् नित्स्वरः । ओजः उब्जआर्जवे उब्जेर्बलेबलोपश्चेत्यसुन् तत्सन्नियोगेनवकारलोपः आर्धधातुकलक्षणोगुणः नित्स्वरः । ईमहे ईकान्त्यादिषु निघातः । अनवभ्रराधसः अनवभ्रं नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् उत्तरपदबहुव्रीहौपूर्वपदस्वरः । गन्तारः ताच्छीलिकस्तृन् । विदथेषु विदज्ञाने रुदिविदिभ्यांकिदित्यथप्रत्ययः कित्त्वादगुणः विदन्त्यस्मिन्कर्मजातमध्वर्य्वादयइति विदथोयज्ञः प्रत्ययस्वरः ॥ ६ ॥

अथसप्तमी—

अ॒ग्निर॑स्मि॒जन्म॑नाजा॒तवे॑दाघृ॒तं॑मे॒चक्षु॑र॒मृतं॑मआ॒सन् ।
अ॒र्कस्त्रि॒धातू॒रज॑सोवि॒मानो॒जस्रो॑घ॒र्मो॑ह॒विर॑स्मि॒नाम॑ ॥ ७ ॥

अ॒ग्निः । अ॒स्मि॒ । जन्म॑ना । जा॒तऽवे॑दाः । घृ॒तम् । मे॒ ।
चक्षुः॑ । अ॒मृत॑म् । मे॒ । आ॒सन् । अ॒र्कः । त्रि॒ऽधातुः॑ । रज॑सः ।
वि॒ऽमानः॑ । अज॑स्रः । घ॒र्मः । ह॒विः । अ॒स्मि॒ । नाम॑ ॥ ७ ॥

साक्षात्कृतपरतत्त्वस्वरूपोग्निः द्वृचेनस्वात्मनः सर्वात्मकत्वानुभवमाविष्करोति हेकुशिकाः भोक्तृभोग्यभावेनद्विविधंहीदंसर्वंजगदेतावद्वाइदमन्नंचैवान्नादश्च सोमएवान्नमग्निरन्नादइतिश्रुतेः ।

तत्रसकलभोक्तृवर्गरूपेणान्नादोग्निः सचअग्निवाय्वादित्यभेदेनत्रिधाभूत्वापृथिव्यन्तरिक्षद्युलोकानधितिष्ठति तदुक्तंवाजसनेयके—सत्रेधात्मानंव्यभजत् आदित्यंतृतीयंवायुंतृतीयमिति । तत्रसोग्निरहंजन्मनैवजातवेदाअस्मि श्रवणमननादिसाधननिरपेक्षेणस्वभावतएवसाक्षात्कृतपरतत्त्वस्वरूपोस्मि घृतंमेचक्षुः यदेतद्विश्वस्यविभासकंममस्वभावभूतप्रकाशात्मकंचक्षुस्तत्घृतं इदानीमत्यन्तंदीप्तंयदेतदमृतंकर्मफलंदिव्यादिव्यविविधविषयोपभोगात्मकंतन्मेमम आसन्नास्येवर्तते सकलभोक्तृवर्गात्मनास्वयमेवावस्थानात् एवंस्वात्मनःपृथिव्यधिष्ठातृरूपतामभिधायवाय्वात्मनांतरिक्षाधिष्ठातृतामाह—अर्कोजगत्स्रष्टाप्राणः सोर्चन्नचरत् तस्यार्चतआपोजायन्तअर्चतेवैमेकमभूदिति तदेवार्कस्यार्कत्वमितिश्रुतेः सप्राणोहंत्रिधातुःत्रेधात्मानंविभज्यतत्रवाय्वात्मनारजसोन्तरिक्षस्यविमानःविमाताअधिष्ठातास्मि तथाआदित्यरूपेणद्युलोकाधिष्ठातृतामाह—अजस्रोघर्मइति अजस्रःअनुपक्षीणोघर्मः प्रकाशात्माद्युलोकाधिष्ठाताआदित्योप्यहमस्मि एवंभोक्तृरूपमात्मनोनुसंधायभोग्यरूपतामप्यनुसंधत्ते यद्धविर्भोग्यंप्रसिद्धमस्तितदप्यहमेवास्मि यद्वा अहमग्निरस्मिदेवानांहविःप्रापणादंगनादिगुणयुक्तोस्मि किञ्च जन्मनाउत्पत्त्याजातवेदाः जातज्ञानोस्मि उत्पत्तिलक्षणएवसर्वज्ञोहमस्मि अथवा जातंसर्वंस्वात्मरूपतयावेत्तीतिजातवेदाः सर्वात्मकइत्यर्थः तत्कथमित्युच्यते—घृतंमेचक्षुः यदेतत्घृतंप्रसिद्धमस्तितन्मेचक्षुःस्थानीयं यथालोके चक्षुर्भासकं एवंघृतंमयिप्रक्षिप्तंज्वालामुत्पादयत् ममभासकं अमृतंप्रभारूपंयदमृतमविनाशिज्योतिःमेममआसन् आस्येवर्तते त्रिधातुः प्राणापानव्यानात्मनात्रिधावर्तमानःअर्कोर्चनीयोयःप्राणोस्तिसोप्यहमस्मि तथारजसोन्तरिक्षस्यविमानःविशेषेणमातापरिच्छेत्तावायुश्चाहमस्मि किञ्च अजस्रोघर्मः नैरन्तर्येणसन्तापकारीसूर्यश्चाहमस्मि किंबहुना आज्यपुरोडाशादिरूपंयदेतद्धविरस्तितदुपलक्षितंसर्वमप्यहमस्मि सर्वंखल्विदंब्रह्मेतिश्रुतेः । नामशब्दः प्रसिद्धौ नदनेनाग्नेःसर्वात्मकत्वप्रतिपादनेनपरब्रह्मत्वमुक्तंभवति ॥ चक्षुः चक्षिङ्व्यक्तायांवाचि उसिन्नित्यनुवृत्तौ चक्षेःसिच्चेत्यसुन् शिद्वद्भावात्ख्याञादेशाभावः नित्स्वरः । आसन् आस्यशब्दस्य पद्दन्नोमासित्यादिनाआसन्नादेशः सुपांसुलुगितिसप्तम्यालुक् । विमानः माङ्माने कृत्यल्युटोबहुलमितिकर्तरिल्युट् लित्स्वरः अजस्रः जसुमोक्षणे नञ्पूर्वः नमिकंपिस्म्यजसकमहिंसदीपोरइतिताच्छीलिकोरप्रत्ययः नञ्पूर्वोजसिर्नैरन्तर्येवर्तते नञ्स्वरः जसउपक्षयेवा ॥ ७ ॥

अथाष्टमी—

त्रि॒भिःप॒वित्रै॒रपु॑पो॒द्ध्य१॒र्कं॑हृ॒दाम॒तिं॑ज्योति॒रनु॑प्रजा॒नन् ।
वर्षि॑ष्ठं॒रत्न॑मकृतस्व॒धाभि॒रादिद्द्यावा॑पृथि॒वीपर्य॑पश्यत् ॥ ८ ॥

Funding by IKS-MoE

त्रि॒ऽभिः । प॒वित्रैः॑ । अपु॑पोत् । हि । अ॒र्कम् । हृ॒दा । म॒तिम् ।
ज्योतिः॑ । अनु॑ । प्र॒ऽजा॒नन् । वर्षि॑ष्ठम् । रत्न॑म् । अ॒कृ॒त॒ ।
स्व॒धाभिः॑ ।आत् । इत् । द्यावा॑पृथि॒वी इति॑ । परि॑ । अ॒प॒श्य॒त् ॥८॥

सर्वात्मकोग्निः हृदा अन्तःकरणवृत्त्या मतिंमननीयंज्योतिः स्वप्रकाशरूपंपरब्रह्माख्यंतेजः अनुप्रजानन् श्रवणमननादिक्रमेणप्रकर्षेणसंशयविपर्यासभावनाबुद्धिनिरासेनस्वात्मरूपतयाजानानःसन् पवित्रैःपावनैस्त्रिभिरग्निवायुसूर्यैरर्कमर्चनीयंनिरतिशयानन्दलक्षणंस्वात्मानंअपुपोद्धि तेभ्योपिनिर्मलतयापावनंपरिचिच्छेदखलु यथादशापवित्रेणसोमंपावयतितद्वत् एवंजानानोग्निः वर्षिष्ठंउत्तमंस्वात्मानंस्वधाभिः स्वेनलोकान्दधातीतिस्वधाः तैरग्निवायुसूर्यैः रत्नंरमणीयं अकृत अकार्षीत् आदित् अनन्तरमेवमात्मनिविज्ञातेसति द्यावापृथिवीतत्रपरिकल्पिते द्यावापृथिव्यौतदुपलक्षितंसर्वंजगच्चपर्यपश्यत् परितःसर्वतःस्वात्मतयादर्शत् आत्मनिविज्ञातेसर्वमिदंविज्ञातंभवतीतिश्रुतेः ॥ पवित्रैः पूञ्पवनेइत्यस्मात्कर्तरिचर्षिदेवतयोरितिदेवतायामभिधेयायांकर्तरि इत्रप्रत्ययः पुनन्तीतिपवित्राअग्निवायुसूर्याः प्रत्ययस्वरः । अपुपोत् पूञ्पवनेइत्यस्य यङ्लुगन्तस्यरूपं संज्ञापूर्वकस्यविधेरनित्यत्वादभ्यासस्यगुणाभावः यद्धितुपरंछन्दसीतिननिघातः । अर्कं अर्चपूजायां कृदाधारार्चिकलिभ्यःकइतिकप्रत्ययः । हृदा हृदयशब्दस्यपद्दन्नोमासित्यादिनाहृत्आदेशः । मतिं मनज्ञानेइत्यस्मान्मन्त्रेवृषेषपचेत्यादिनाकर्मणिक्तिन्उदात्तः । अकृत करोतेर्लुङिसिच् तस्यह्रस्वादङ्गादितिलोपः । द्यावापृथिवी देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरः ॥ ८ ॥

अथनवमी—

श॒तधा॑र॒मुत्स॒मक्षी॑यमाणंविप॒श्चितं॑पि॒तरं॒वक्त्वा॑नाम् ।
मे॒ळिंमद॑न्तंपि॒त्रोरु॒पस्थे॒तंरोद॑सीपिपृतंस॒त्य॒वाच॑म् ॥ १ ॥ २७ ॥

श॒त॒ऽधा॑रम् । उत्स॑म् । अक्षी॑यमाणम् । वि॒पः॒ऽचित॑म् । पि॒तर॑म् ।
वक्त्वा॑नाम् । मे॒ळिम् । मद॑न्तम् । पि॒त्रोः । उ॒पऽस्थे॑ । तम् ।
रो॒द॒सी॒ इति॑ । पि॒पृ॒तम् । स॒त्य॒ऽवाच॑म् ॥ १ ॥ २७ ॥

Funding by IKS-MoE

यस्मादुपाध्यायाद्विश्वामित्रोवैश्वानराख्यंपरब्रह्माज्ञासीत् तमिममुपाध्यायमनयर्चास्तौतिहेरोदसी द्यावापृथिव्यौ शतधारं अपरिमितजलधारायुक्तं अक्षीयमाणं नकदापिविच्छिन्नप्रवाहं उत्सं लुप्तोपममेतत् उत्समिवसततप्रवाहोपेतं स्रोतइवाविच्छिन्नवाक्सरणीसमेतं विपश्चितंमेधाविनं सकलशास्त्राभिज्ञं पितरंशिष्याणांविद्योपदेशेनपालकं वक्त्वानांवक्तव्यानां वेदवाक्यानांमेळिंमेलकंनानाशाखागतानांवाक्यानांएकस्मिन्नर्थेसंकलय्यवक्तारं पित्रोर्द्यावापृथिव्योरुपस्थेसमीपेमदन्तंज्ञानातिशयेनहृष्यन्तं अतएवसत्यवाचं अज्ञातार्थाभावात्परप्रतारणे च कारणाभावात्सत्यवादिनं तमिममुपाध्यायंपिपृतं अपेक्षितफलप्रदानेनसंपूर्णंकुरुतम् यद्वा पालयतम् ॥ उत्सं उन्दीक्लेदने अस्मादुन्द्यमिगुधिकुषिभ्यःकिदितिसप्रत्ययः कित्त्वान्नकारलोपः उनत्तीत्युत्सः व्यत्ययेनाद्युदात्तः । विपश्चितं विशेषेणपातीतिविपा वाक् विपोवाचश्चिनोतीति क्विप् ह्रस्वस्यपितीतितुक् तत्पुरुषेकृतिबहुलमितिबहुलवचनाद्द्वितीयायाअलुक् कृदुत्तरपदस्वरः । वक्त्वानां वचपरिभाषणेइत्यस्मात्कृत्यार्थेतवैकेन्केन्यत्वनइतित्वन्प्रत्ययः चोःकुरितिकुत्वम् नित्स्वरः । मेळिम् मिलिःसंपर्कार्थोधातुः अस्मादौणादिकइप्रत्ययः । रोदसी आमन्त्रितत्वान्निघातः । पिपृतम् पृपालनपूरणयोः छान्दसोजुहोत्यादिः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् निघातः ॥ ९ ॥

॥ इतितृतीयस्यप्रथमेसप्तविंशोवर्गः ॥ २७ ॥

प्रवोवाजाइतिपञ्चदशर्चंपञ्चदशंसूक्तं अत्रानुक्रमणिका—प्रवःपञ्चोनागायत्रंत्वृतव्यावाद्याइति विश्वामित्रऋषिः छन्दोगायत्री अग्निर्देवता आद्याऋतुदेवत्यावा प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रेछन्दस्यस्यसूक्तस्यविनियोगः प्रवोवाजाउपसद्यायेतिसूत्रितम् । आभिप्लविकेषूक्थ्येषु प्रवोवाजाइतिवैकल्पिकःस्तोत्रियस्तृचः सूत्रितम्—प्रवोवाजाअभिद्यवोभिप्रयांसिवाहसेति । सूक्तस्याद्यासामिधेनी सूत्रितञ्च—प्रवोवाजाअभिद्यवोग्नआयाहिवीतयइति । सामिधेनीषुसमिध्यमानइत्येका सूत्रितञ्च—समिध्यमानोअध्वरेसमिद्धोअग्नआहुतेतिद्वेइति । आधाने तृतीयायामिष्टौ सामिधेनीषु इध्यमानेद्धवत्योर्मध्येपृथुपाजाइतिद्वेधाय्ये सूत्रितञ्च—प्रागुपोत्तमायाःपृथुपाजाअमर्त्यइतिद्वेइति । एवमन्यत्रापि यत्रयत्रसप्तदशसामिधेन्यः तत्रतत्रैतेधाय्येइतिद्रष्टव्यम् । विषुवतिएकविंशतिःसामिधेन्यः तत्रपृथुपाजाअमर्त्यइतिषळृचोधाय्याः पृथुपाजाअमर्त्यइतिषट्धाय्याःसामिधेनीनामितिसूत्रम् महाव्रतेपिपञ्चविंशतिसंख्याकाःसामिधेन्यः तत्राप्येताःषळृचोद्रष्टव्याः अग्नीषोमप्रणयनेहोतादेवोअमर्त्यइतितृचः सूत्रितञ्च—होतादेवोअमर्त्यः

पुरस्तादुपत्वाग्नेदिवेदिवइति । ईळेन्योनमस्यस्तिरइतितिस्रःसामिधेन्यः सूत्रितश्च—ईळेन्योनमस्यस्तिरोग्निंदूतंवृणीमहइति ।

तस्मिन्सूक्तेप्रथमा—

प्रवो॒वाजाँ॑अ॒भिद्य॑वोह॒विष्म॑न्तोघृ॒ताच्या॑ । दे॒वाँजि॑गातिसुम्न॒युः ॥ १॥

प्र । व॒ः । वाजा॑ः । अ॒भिऽद्य॑वः । ह॒विष्म॑न्तः । घृ॒ताच्या॑ ।
दे॒वान् । जि॒गा॒ति॒ । सु॒म्न॒ऽयुः ॥ १ ॥

हेऋतवःवाजाःवाजन्तिगच्छन्तीतिवाजाःमासाः अभिद्यवः अभितोद्यवोदिवसायेषुइति अभिद्यवोर्धमासाश्च हविष्मन्तोहविर्भाजोदेवाः घृताच्या घृतमञ्चतिक्षारयतीतिघृताचीगौः तथाचतैत्तिरीयकम्—देवाहविष्मन्तोगौर्घृताचीति । यद्वा हविष्मन्तःहविषःक्षीरादेःप्रदातारःपशवः घृताच्याघृतमञ्चतिप्राप्नोतीतिघृताचीस्रुक् तथावाजसनेयकम्—पशवोहविष्मन्तःस्रुग्घृताचीति। तयाघृताच्यासहिताहविष्मन्तोदेवाःपशवश्चमासाअर्धमासाश्चैतेसर्वेवोयुष्माकंयजमानार्थं प्र प्रभवन्ति तेषुवाजादिषुप्रभवत्सुसत्सु सुम्नयुः सुखमात्मनइच्छन् यजमानोदेवान्जिगाति यज्ञद्वारादेवान्प्राप्नोति उक्तार्थेतैत्तिरीयकब्राह्मणम्—प्रवोवाजाइत्यन्वाहमासावैवाजाअर्धमासाअभिद्यवोदेवाहविष्मन्तोगौर्घृताचीयज्ञोदेवाञ्जिगातियजमानःसुम्नयुरिति[2] । आग्नेयपक्षे हेअग्ने वः त्वदर्थमभिद्यवोभिगतदीप्तयोहविष्मन्तआसादितैश्चरुपुरोडाशादिभिःसहितावाजाअन्नानि समिल्लक्षणानिघृताच्या जुह्वासहप्रक्रम्यन्ते प्रवोवाजाइत्यन्वाहान्नंवैवाजइति देवान्देवत्वं समानमन्यत् ॥ अभिद्यवः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । घृताच्या घृक्षरणदीप्त्योरित्यस्मादञ्जिघृषिभ्यःक्तइतिकर्मणिक्तः घृतमाज्यमञ्चतीतिऋत्विग्दधृगित्यादिनाक्विन् अनिदितामित्युपधालोपः अञ्चतेश्चोपसंख्यानमितिङीप् चावितिपूर्वपदांतोदात्तत्वम् । जिगाति गातिर्गत्यर्थः छांदसोजुहोत्यादिः निघातः। सुम्नयुः सुम्नंसुखमात्मनइच्छन्नितिसुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः प्रत्ययस्वरः ॥ १ ॥

अथद्वितीया—

ई॑ळेअ॒ग्निंवि॑प॒श्चितं॑गि॒राय॒ज्ञस्य॒साध॑नम् । श्रु॒ष्टी॒वानं॑धि॒तावा॑नम् ॥ २ ॥

---

१ तै० सं० २. ५. ७.। तै० सं० २. ५. ७.।

Funding by IKS-MoE

ईळे॑ । अ॒ग्निम् । वि॒पः॒ऽचित॑म् । गि॒रा । य॒ज्ञस्य॑ ।
साध॑नम् । श्रु॒ष्टी॒ऽवान॑म् । धि॒तऽवा॑नम् ॥ २ ॥

विपश्चितंमेधाविनंयज्ञस्यसाधनंनिर्वाहकं श्रुष्टीवानं सुखवन्तम् यद्वा वेगवन्तं धितावानं वानंवननीयंधनंधितं निहितं धनंयस्यतंनिहितधनं तमिममग्निंगिरास्तुतिलक्षणयावाचाईळे विश्वामित्रोहं स्तौमि ॥ ईळे ईडस्तुतौ । श्रुष्टीवानं वनसंभक्तावित्यस्माद्विच् श्रुष्टीवनतीतिश्रुष्टीवा कृदुत्तरपदस्वरः । धितावानं दधातेर्निष्ठायांधिरादेशश्छान्दसः वनसंभक्तौकर्मणिघञ् बहुव्रीहौ निष्ठेतिधितशब्दस्यपूर्वनिपातः पूर्वपदप्रकृतिस्वरः यद्वा उभयत्रछन्दसीवनिपातिवनिप् ॥ २ ॥

अथतृतीया—

अग्ने॑श॒केम॑तेव॒यंयमं॑दे॒वस्य॑वा॒जिन॑ः । अति॒द्वेषां॑सितरेम ॥ ३ ॥

अग्ने॑ । श॒केम॑ । ते॒ । व॒यम् । यम॑म् । दे॒वस्य॑ । वा॒जिन॑ः ।
अति॑ । द्वेषां॑सि । त॒रे॒म॒ ॥ ३ ॥

हेअग्ने वाजिनःसंभृतहविष्काः वयंदेवस्यद्योतमानस्यते तवयमंयमनंआयज्ञसमाप्तेरत्रावस्थानंकर्तुंशकेम शक्याःस्म वाजिनोवेगवतोदेवस्येतिवायोजनीयम् ततःकारणाद्द्वेषांसि अस्मदीयानिपापानि अतितरेम पापेभ्यउत्तीर्णाभवेम ॥ शकेम शकॢशक्तावित्यस्मादाशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्ययः किदाशिषीतियासुट् सलोपेयादेशयलोपगुणसलोपाः आमन्त्रितस्याविद्यमानत्वेनपादादित्वादनिघातः उदात्तनिवृत्तिस्वरः। यमं यमउपरमइत्यस्मात्भावेघञ् यमउपरमेइतिनिपातनाद्वृद्ध्यभावः ञित्स्वरः।तरेम तॄप्लवनतरणयोरिति प्रार्थनेलिङिरूपं निघातः ॥३॥

अथचतुर्थी—

स॒मि॒ध्यमा॑नोअध्व॒रे॒३॒॑ग्निःपा॑व॒कईड्य॑ः ।शो॒चिष्के॑श॒स्तमी॑महे ॥४॥

स॒म्ऽइ॒ध्यमा॑नः । अ॒ध्व॒रे । अ॒ग्निः । पा॒व॒कः । ईड्य॑ः ।
शो॒चिःऽके॑शः । तम् । ई॒म॒हे॒ ॥ ४ ॥

Funding by IKS-MoE

योग्निःअध्वरेयज्ञेसमिध्यमानःघृताद्याहुतिभिःसम्यक्प्रज्वाल्यमानः अतएवशोचिष्केशः ज्वालाकेशः पावकः शोधकः ईड्यःस्तोतृभिःप्रशस्योभवति तमिममभिमतफलार्थं ईमहे वयं याचामहे ॥ ईड्यः ईडस्तुतावित्यस्मात्ण्यत् अस्यतित्स्वरितमितिस्वरितत्वेप्राप्ते ईडवन्देत्यादिनाद्युदात्तत्वम् । ईमहे ईकान्त्यादिष्वित्ययंधातुरत्रयाञ्चार्थः निघातः ॥ ४ ॥

अथपञ्चमी–

पृ॒थु॒पाजा॒अम॑र्त्योघृ॒तनि॑र्णि॒क्स्वा॑हुतः।अ॒ग्निर्य॒ज्ञस्य॑हव्य॒वाट्॥५॥२८॥

पृ॒थु॒ऽपाजाः॑ । अम॑र्त्यः । घृ॒तऽनि॑र्निक् । सुऽआ॑हुतः ।
अ॒ग्निः । य॒ज्ञस्य॑ । ह॒व्य॒ऽवाट् ॥ ५ ॥ २८ ॥

पृथुपाजाः प्रभूततेजोरूपः अमर्त्यःमरणधर्मरहितः घृतनिर्णिक् घृतस्यविलपनद्वारा शोधनंयेनेतिघृतनिर्णिक् स्वाहुतः सुष्ठु होत्रादिभिःसम्यगिष्टः एवंभूतोग्निः यज्ञस्यज्योतिष्टोमादेर्हव्यवाट् हव्यानांवोढाभवति ॥ पृथुपाजाः कृदुत्तरपदस्वरः स्वाहुतः जुहोतेःकर्मणिक्तः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । हव्यवाट् वहश्चेतिण्विः ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेष्टाविंशोवर्गः ॥ २८ ॥

अथषष्ठी–

तंस॒बाधो॑य॒तस्रु॑चइ॒त्थाधि॒याय॒ज्ञव॑न्तः। आच॑क्रुर॒ग्निमू॒तये॑ ॥ ६ ॥

तम् । स॒ऽबाधः॑ । य॒तऽस्रु॑चः । इ॒त्था । धि॒या । य॒ज्ञऽव॑न्तः ।
आ । च॒क्रुः । अ॒ग्निम् । ऊ॒तये॑ ॥ ६ ॥

सबाधःरक्षोघ्नमन्त्रोच्चारणेनतद्विषयबाधासहवर्तन्तइतिसबाधःयज्ञवन्तः यजनीयहविर्युक्ताः यतस्रुचः यताः संयताः स्रुचोजुह्वाद्यायैस्तेयतस्रुचऋत्विजः इत्था इत्थमनेनप्रकारेणक्रियमाणयाधियास्तुत्यातमेवंभूतमग्निं ऊतयेराक्षसवधाद्रक्षणाय आ अभिमुखंचक्रुः कुर्वन्ति ॥ सबाधःबाधृविलोडनेइत्यस्मात्क्विप् कृदुत्तरपदस्वरः । इत्था इदम्शब्दात्प्रकारार्थेइदमस्थमुः त-

Funding by IKS-MoE

स्यसुपांसुलुगितिडादेशः उदात्तनिवृत्तिस्वरेणान्तोदात्तः। चक्रुः डुकृञ्करणेइत्यस्यलिटचुसि यणादेशेकृते तस्यद्विर्वचनेचीतिस्थानिवद्भावात्द्विर्वचनं निघातः॥ ६॥

अथसप्तमी—

होता॑दे॒वोअम॑र्त्यःपु॒रस्ता॑दे॒तिमा॒यया॑। वि॒दथा॑निप्रचो॒दय॑न्॥७॥

होता॑। दे॒वः। अम॑र्त्यः। पु॒रस्ता॑त्। ए॒ति॒। मा॒यया॑।
वि॒दथा॑नि। प्र॒ऽचो॒दय॑न्॥ ७॥

होताहोमनिष्पादकः अमर्त्योमरणधर्मरहितःदेवोद्योतमानःविदथानिवेदितव्यानिकर्माणिप्रचोदयन् प्रकर्षेणप्रेरयन् सोग्निःमाययाकर्मविषयाभिज्ञानेनयुक्तःसन् पुरस्तात्कर्मप्रारंभकालेएव एति अस्मानागच्छति॥ एति इण्गतौ। मायया माङ्मानेशब्देचेत्यस्मान्माच्छाससिसूभ्योयइतिकर्तरिकर्मणिवायप्रत्ययः मिमीतेजानीते कर्म मीयतेनयेतिवामाया कर्मविषयज्ञानं प्रत्ययस्वरः। विदथानि विद्ज्ञानेइत्यस्मात् रुदिविदिभ्यांकिदितिकर्मण्यथप्रत्ययः कित्वादगुणः प्रत्ययस्वरः॥ ७॥

अथाष्टमी—

वा॒जीवाजे॑षुधीयतेध्व॒रेषु॒प्रणी॑यते। विप्रो॑य॒ज्ञस्य॒साध॑नः॥ ८॥

वा॒जी। वाजे॑षु। धी॒य॒ते॒। अ॒ध्व॒रेषु॑। प्र। नी॒य॒ते॒। विप्रः॑।
य॒ज्ञस्य॑। साध॑नः॥ ८॥

वाजीबलवानग्निःवाजेषुयुद्धेषुधीयतेदेवैःशत्रुहननार्थंनिधीयते किञ्च अध्वरेषुअग्निहोत्रादिषुप्रणीयतेध्वर्य्वादिभिःप्रकर्षेणाहवनीयादिस्थानेषुप्रक्षिप्यते अतएवविप्रोमेधावीसन्नग्निः यज्ञस्याग्निहोत्रादेःसाधनःसाधकोभवति॥ धीयते डुधाञ्धारणपोषणयोरित्यस्मात्कर्मणियक् घुमास्थागापेत्यादिनाईत्वं निघातः। नीयते णीञ्प्रापणेइत्यस्यकर्मणियकिरूपं उपसर्गादसमासेपिणोपदेशस्येतिणत्वम्। साधनः साधसंसिद्धौ नन्द्यादित्वात्कर्तरिल्युः लित्स्वरः॥ ८॥

अथनवमी–

धि॒याच॑क्रे॒वरे॑ण्योभू॒ताना॒ंगर्भ॒माद॑धे । दक्ष॑स्यपि॒तरं॑त॒ना॑ ॥ ९ ॥

धि॒या । च॒क्रे॒ । वरे॑ण्यः । भू॒ताना॑म् । गर्भ॑म् । आ । द॒धे॒ ।
दक्ष॑स्य । पि॒तर॑म् । तना॑ ॥ ९ ॥

योग्निर्धिया आधानपवमानेष्टिरूपेणकर्मणाचक्रे आहवनीयरूपतयाकृतोभूत् अतएववरेण्यःसर्वैर्यजमानैःकर्माङ्गत्वेनवरणीयः यश्चाग्निः भूतानांस्थावरजङ्गमात्मकानांभूतजातानामन्तर्गर्भंस्वात्मानमेवगर्भरूपतयाआदधे सर्वत्रदधार पितरं सर्वस्यजगतःपालकं तमिममग्निंदक्षस्यदक्षप्रजापतेःतना तनया वेदिरूपाभूमिः दर्शपूर्णमासाग्निहोत्रादिकर्मसिद्ध्यर्थंधारयति भूमेर्दक्षदुहितृत्वेनमन्त्रवर्णः—अदितिर्ह्यजनिष्टदक्षयादुहितातवेति ॥ चक्रे करोतेःकर्मणिलिटिरूपम् । गर्भं गॄनिगरणेइत्यस्मादर्तिगृभ्यांभन्नितिभन् गिरतिगीर्यतेवागर्भः नित्त्वादाद्युदात्तः । दधेदधातेर्लिटिरूपम् । पितरं पारक्षणे नप्तृनेष्टृइत्यादिनातृजन्तत्वेननिपातनादित्वं पातिपालयतीति पितापालकः चित्स्वरः । तना यलोपश्छान्दसः ॥ ९ ॥

अथदशमी–

नित्वा॑द॒धे॒वरे॑ण्यं॒दक्ष॑स्ये॒ळास॑हस्कृत । अग्ने॑सुदी॒तिमु॒शिज॑म् ॥१०॥२९॥

नि । त्वा॒ । द॒धे॒ । वरे॑ण्यम् । दक्ष॑स्य । इ॒ळा । स॒ह॒ःऽकृ॒त॒ ।
अग्ने॑ । सु॒ऽदी॒तिम् । उ॒शिज॑म् ॥ १० ॥ २९ ॥

उक्तोर्थोनयर्चाविव्रियते सहस्कृत मथनाख्येनबलेननिष्पन्न हेअग्ने सुदीतिंशोभनदीप्तियुक्तं उशिजं पुरोडाशादिहविःकामयमानं यद्वा कर्मार्थिभिःकाम्यमानं अतएव वरेण्यं तैर्वरणीयं त्वा एवंविधंत्वां दक्षस्यदुहिताइळावेद्यादिलक्षणाभूमिः निदधे अग्निहोत्रादिकर्मसमृद्ध्यर्थंनितरांदधार ॥ इळा ईडस्तुतौ पुंसिसंज्ञायामित्यत्रप्रायिकवचनात्स्त्र्यर्थेपिघप्रत्ययः ह्रस्वश्छान्दसः संज्ञापूर्वकस्यविधेरनित्यत्वादगुणः यद्वा घञर्थेकविधानमित्यधिकरणेकः ईडच-

---

१ ऋ० सं० ८. ३. १. ।

न्तेस्तूयन्तेस्यांयजमानैर्देवाइतीळाभूमिः उदात्तनिवृत्तिस्वरेणान्तोदात्तः प्रत्ययस्वरः । उशिजं वशकान्तावित्यस्माद्वशःकिच्चेतीजिप्रत्ययः किच्वात्सम्प्रसारणम् । वष्टि हविःकामयते उश्यते काम्यतेकर्मार्थिभिरितिवाउशिगग्निः प्रत्ययस्वरः ॥ १० ॥

॥ इतितृतीयस्यप्रथमेएकोनत्रिंशोवर्गः ॥ २९ ॥

अथैकादशी–

अ॒ग्निंय॒न्तुरं॑मप्तु॒रं॑मृ॒तस्य॒योगे॑व॒नुषः॑ । विप्रा॒वाजैः॒समि॑न्धते ॥११॥

अ॒ग्निम् । य॒न्तुर॑म् । अ॒प्ऽतुर॑म् । ऋ॒तस्य॑ । योगे॑ । व॒नुषः॑ ।
विप्राः॑ । वाजैः॑ । सम् । इ॒न्ध॒ते॒ ॥ ११ ॥

वनुषः कर्मसिद्ध्यर्थं संभजमानाः विप्रामेधाविनोध्वर्य्वादयः यन्तुरंसर्वस्यनियन्तारं यद्वा क्षिप्रंगन्तारं अप्तुरं अपांप्रेरकंतमिममग्निं ऋतस्यसत्यभूतस्य ज्योतिष्टोमादेः योगे प्रयोगार्थं वाजैर्हविर्लक्षणैरन्नैः समिन्धते सम्यग्दीपयन्ति ॥ यन्तुरं वर्णव्यत्ययः यन्तारमित्यर्थः अप्तुरं तुरत्वरणे अपस्तुतोर्तित्वरयतीतिक्विप् कृदुत्तरपदप्रकृतिस्वरः । योगे युजिर्योगे भावेघञ् चजोःकुघिण्ण्यतोरितिकुत्वं ञित्स्वरः। वनुषः वनषणसंभक्तौ जनेरुसिरित्यधिकारे बहुलवचनादस्मादप्युसिःप्रत्ययः प्रत्ययस्वरः । इन्धते ञिइन्धीदीप्तौ निघातः ॥ ११ ॥

अथद्वादशी–

ऊ॒र्जोनपा॑तमध्व॒रेदी॑दि॒वांस॒मुप॒द्यवि॑ । अ॒ग्निमी॑ळेक॒विक्र॑तुम्॥१२॥

ऊ॒र्जः । नपा॑तम् । अ॒ध्व॒रे । दी॒दि॒ऽवांस॑म् । उप॑ । द्यवि॑ ।
अ॒ग्निम् । ई॒ळे॒ । क॒विऽक्र॑तुम् ॥ १२ ॥

ऊर्जोनपातंहविर्लक्षणैरन्नैःसमिध्यमानत्वेनान्नस्यपुत्रम् यद्वान्नस्यचतुर्थं यथान्नादाहुतिःआहुतेरादित्यआदित्यादग्निरिति उपद्यवि अन्तरिक्षसमीपे दीदिवांसमतिशयेनदीप्यमानंकविक्रतुं कवयोमेधाविनोध्वर्य्वादयोमथनेनक्रतवःकर्तारोयस्येति अध्वर्य्वादिभिर्निष्पाद्यमानंतमिममग्निं अध्वरेस्मिन्यज्ञेईळेस्तुतिलक्षणाभिर्गीर्भिरहंस्तौमि ऊर्जः ऊर्जबलेइत्यस्माद्भ्राजभासेत्यादिना

Funding by IKS-MoE

ताच्छीलिकःक्विप्प्रत्ययः ऊर्जयतिशरीरमितिऊर्क्अन्नं सावेकाचइतिविभक्तेरुदात्तत्वम् । घवि द्युतदीप्तावित्यस्मादौणादिकोडुन्प्रत्ययः द्योततेकिरणसंबन्धादितिद्युरन्तरिक्षं ञित्स्वरः । ईळे ईडस्तुतावित्यस्यलटिरूपम् ॥ १२ ॥

अथत्रयोदशी—

ई॒ळेन्यो॑नम॒स्य॑स्ति॒रस्तमां॑सिदर्श॒तः । सम॒ग्निरि॑ध्यते॒वृषा॑ ॥ १३ ॥

ई॒ळेन्यः॑ । न॒म॒स्यः॑ । ति॒रः । तमां॑सि । द॒र्श॒तः । सम् ।
अ॒ग्निः । इ॒ध्य॒ते॒ । वृषा॑ ॥ १३ ॥

ईळेन्यः स्तोतृभिरीड्यः अतएवनमस्यःसर्वैर्नमस्कार्यःतमांसितिरः ध्वान्तानिस्वप्रभाभिस्तिरस्कुर्वन् दर्शतःकमनीयतयासर्वैर्दर्शनीयः तादृशोग्निः वृषा यजमानस्यकामानांवर्षितासमिध्यते आहुतिप्रक्षेपेणप्रज्वाल्यते उक्तार्थंवाजसनेयकम्—ईडेन्योह्येषनमस्योह्येषस्तिरस्तमांसिददृशेसमिद्धइति ॥ ईळेन्यः ईडस्तुतौ कृत्यार्थेतवैकेन्केन्यत्वनइतिकेन्यप्रत्ययः प्रत्ययस्वरः । नमस्यः नमस्यतेरचोयदितियत् अतोलोपयलोपौ तित्स्वरितमितिस्वरितः । दर्शतः दृशिर्प्रेक्षणे इत्यस्मात् भृमृदृशीत्यादिनाकर्मण्यतच्प्रत्ययः चित्स्वरः । वृषा वृषुसेचनेइत्यस्मात् कनिन्युवृषीत्यादिनाकनिन् किच्वादगुणः निच्वादाद्युदात्तः ॥ १३ ॥

अथचतुर्दशी—

वृषो॑अ॒ग्निःसमि॑ध्य॒तेश्वो॒नदे॑व॒वाह॑नः । तंह॒विष्म॑न्तईळते ॥१४॥

वृषो॒ इति॑ । अ॒ग्निः । सम् । इ॒ध्य॒ते॒ । अश्वः॑ । न । दे॒व॒ऽवाह॑नः ।
तम् । ह॒विष्म॑न्तः । ई॒ळ॒ते॒ ॥ १४ ॥

वृषोवृषैवकामानांवर्षितादेववाहनः देवान्हवींषिवाहयतिप्रापयतीतिदेववाहनः तत्रदृष्टान्तः—अश्वोनेति यथाश्वोराजानंवाहयतिस्वपुरंप्रापयतीतिवाहनमश्वः तद्वत्वाहनभूतोयोग्निः समिध्यते आहुतिप्रदानेनसम्यग्दीप्यते तं तादृशमग्निंहविष्मंतः संभृतहविष्कायजमानाईळतेकर्मसिद्ध्यर्थंस्तुवन्ति । वृषा उ गुणः उञमवलंब्यप्रगृह्यसंज्ञा देववाहनः वहप्रापणेइत्यस्माण्ण्यन्तान्नन्द्यादित्वात्कर्तरिल्युःलित्स्वरः समासेकृदुत्तरपदस्वरः ॥ ईळते ईडस्तुतौ ॥ १४ ॥

अथपञ्चदशी–

वृष॑णंत्वाव॒यंवृ॑ष॒न्वृष॑णः॒समि॑धीमहि । अग्ने॒दीद्य॑तंबृ॒हत् ॥१५॥३० ॥

वृष॑णम् । त्वा॒ । व॒यम् । वृ॒ष॒न् । वृष॑णः । सम् । इ॒धी॒म॒हि॒ ।
अग्ने॑ । दीद्य॑तम् । बृ॒हत् ॥ १५ ॥ ३० ॥

वृषन्कामानांवर्षितः हेअग्ने वृषणःघृताद्याहुतीनांसेक्तारोवयंवृषणमाहुतिद्वाराउदकस्य सेक्तारं तदाहस्मृतिः–अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नं ततःप्रजाःइति । दीद्यतं दीप्यमानं बृहत् अतएवमहान्तमिममग्निंसमिधीमहि सम्यग्दीपयामः ॥ इधीमहि ञिइन्धीदीप्तावित्यस्यप्रार्थनेलिङिनकारलोपश्छान्दसः निघातः ॥ दीद्यतं दीदेतिर्दीप्तिकर्मा तस्यशतरिरूपं अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ १५ ॥

इतितृतीयस्यप्रथमेत्रिंशोवर्गः ॥ ३० ॥

अग्नेजुषस्वेतिषळृचंषोडशंसूक्तंवैश्वामित्रमाग्नेयम् अत्रानुक्रमणिका–अग्नेजुषस्वषट् तृतीयाद्युष्णिक्त्रिष्टुप्जगत्यइति पूर्वसूक्तेगायत्रंत्वित्युक्तत्वादेतदपिगायत्रं तृतीयातूष्णिक् चतुर्थीत्रिष्टुप् पञ्चमीजगती अग्नेजुषस्वेतिसवनीयपुरोडाशेस्विष्टकृतः प्रातःसवनीयानुवाक्या सूत्रितञ्च–अथस्विष्टकृतोग्नेजुषस्वनोहविरिति । अतिरात्रेआश्विनशस्त्रेपरिहितेसतिचमसगणैः सहाश्विनोर्द्विकपालःपुरोडाशःसर्वहुतोहोतव्यः यदिपुरोडाशमवशेष्यस्विष्टकृतंकुर्युस्तस्यस्विष्टकृतः पुरोळाअग्नइत्येषायाज्या यद्येतस्यपुरोळाशस्यस्विष्टकृतंचरेयुः पुरोळाअग्नेपचतइतिसूत्रितम् माध्यंदिनेसवनेसवनीयपुरोडाशेस्विष्टकृतोनुवाक्या माध्यंदिनेसवनइत्येषा सूत्रितञ्च–अग्नेजुषस्वनोहविर्माध्यंदिनेसवनेजातवेदइति । तृतीयसवने सवनीयपुरोडाशस्यस्विष्टकृतोनुवाक्या अग्नेतृतीयेसवनेइत्येषा सूत्रितञ्च–अग्नेतृतीयेसवनेहिकानिषइत्यनुसवनमनुवाक्येति आश्विनपुरोडाशस्यस्विष्टकृतोयाज्याअग्नेवृधानइत्येषा सूत्रितञ्च–अग्नेवृधानआहुतिमितिसंयाज्येइति ।

तस्मिन्सूक्तेप्रथमा–

अग्ने॑जु॒षस्व॑नोह॒विःपु॑रो॒ळाशं॑जातवेदः । प्रा॒तः॒सा॒वेधि॑यावसो ॥१॥

अग्ने॑ । जु॒षस्व॑ । नः॒ । ह॒विः । पु॒रो॒ळाश॑म् । जा॒त॒ऽवे॒दः॒ ।
प्रा॒तः॒ऽसा॒वे । धि॒या॒व॒सो॒ इति॑ धिया॒ऽवसो ॥ १ ॥

Funding by IKS-MoE

विश्वामित्रःस्तौति—जातवेदः जातप्रज्ञ धियावसो धियास्तोत्रेणवसुधनंयस्माद्भवतिसोयं धियावसुः तस्यसंबुद्धिः कर्मानुरूपधनप्रद हेअग्ने प्रातःसावे अग्निष्टोमेप्रातःसवनेनोस्मत्संबन्धिपुरोळाशं पुरोडाशाख्यंहविःजुषस्वसेवस्व ॥ जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपम् आमन्त्रितस्याविद्यमानवत्त्वेनपादादित्वादनिघातः । प्रातःसावे षुञ्अभिषवेसवनंसावः भावेघञ् थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तत्वम् । धियावसो विभक्त्यलोपश्छान्दसः आमन्त्रितत्वान्निघातः ॥ १ ॥

अथद्वितीया—

पु॒रो॒ळाअ॑ग्नेपच॒तस्तुभ्यं॑वाघा॒परि॑ष्कृतः । तंजु॑षस्वयविष्ठ्य ॥ २ ॥

पु॒रो॒ळाः । अ॒ग्ने॒ । प॒च॒तः । तुभ्य॑म् । वा॒ । घ॒ । परि॑ऽकृतः ।
तम् । जु॒ष॒स्व॒ । य॒वि॒ष्ठ्य॒ ॥ २ ॥

यविष्ठ्य युवतम हेअग्ने यःपुरोळाः पुरोडाशन्तेध्वर्य्वादयएनमितिपुरोळाः पुरोडाशः पचतःकपालयोःपक्वोस्तिसच्चतुभ्यंत्वदर्थंपरिष्कृतोवाघ पर्यग्निकरणादिभिरलङ्कृतःखलु तमिमंपुरोडाशंजुषस्वसेवस्व ॥ पुरोळाः दाशृदाने इत्यस्मात्पुरस्पूर्वान्मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्निति कर्मणिण्विनिकृतेश्वेतवहादीनांडस्पदस्यइतिडस्प्रत्ययेकृते अवयाःश्वेतवाःपुरोडाश्चेतिनिपातनाद्दकारस्यडत्वं पुरोळाशंतएनमितिपुरोळाः पुरोडाशः डकारस्यळकारोबह्वृचसांप्रदायिकः कृदुत्तरपदप्रकृतिस्वरः । पचतः डुपचष्पाकेइत्यस्माद्भृमृदृशीत्यादिनाकर्मण्यतच्प्रत्ययः पच्यतेसाविति पचतःपक्वः चित्स्वरः । घ ऋचितुनुघेत्यादिनासंहितायांदीर्घः । परिष्कृतः संपर्युपेभ्यःकरोतौभूषणेइतिकरोतेःसुडागमः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । यविष्ठ्य यविष्ठएवयविष्ठ्यः पादार्घाभ्यांचेत्यत्रचकारेणवस्वादीनांस्वार्थेयत्प्रत्ययस्योपादानाद्यविष्ठ्येत्यत्रस्वार्थिकोयत्प्रत्ययः आमन्त्रितत्वान्निघातः ॥ २ ॥

अथतृतीया—

अग्ने॑वी॒हिपु॑रो॒ळाश॒माहु॑तंति॒रोअ॑ह्न्यम् । सह॑सःसू॒नुर॑स्यध्व॒रेहि॒तः ॥ ३ ॥

अग्ने॑ । वी॒हि । पु॒रो॒ळाश॑म् । आऽहु॑तम् । ति॒रःऽअ॑ह्न्यम् ।
सह॑सः । सू॒नुः । अ॒सि॒ । अ॒ध्व॒रे । हि॒तः ॥ ३ ॥

Funding by IKS-MoE

हेअग्ने तिरोअह्न्यं अह्निनिरोहितेसति आहुतंआसमन्ताद्धुतंपुरोळाशंपुरोडाशाख्यंहविः वीहि भक्षय अध्वरेस्मिन्यज्ञेसहसःसूनुःबलस्यपुत्रस्त्वंहितोसि आहवनीयादिस्थानेष्वस्माभिर्निहितोसि तस्माद्वीहीतिशेषः ॥ वीहि वीकान्त्याष्वित्यस्यलोटिरूपंहेरपित्त्वादन्तोदात्तत्वम् । आहुतम् जुहोतेःकर्मणिक्के गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । तिरोअह्न्यं अह्निभवमह्न्यं भवेछंदसीतियत् तिरोभूतमह्न्यंयस्मिन्कालेसतिरोअह्न्यःरात्रिकालइत्यर्थः कालाध्वनोरत्यन्तसंयोगेइतिद्वितीया प्रकृत्यान्तःपादमित्येङःप्रकृतिभावः बहुव्रीहौपूर्वपदस्वरः ॥ ३ ॥

अथचतुर्थी—

माध्यंदिनेसवनेजातवेदःपुरोळाशमिहकवेजुषस्व ।
अग्नेयह्वस्यतवभागधेयंनप्रमिनन्तिविदथेषुधीराः ॥ ४ ॥

माध्यंदिने । सवने । जातऽवेदः । पुरोळाशम् । इह । कवे । जुषस्व । अग्ने । यह्वस्य । तव । भागऽधेयम् । न । प्र । मिनन्ति । विदथेषु । धीराः ॥ ४ ॥

कवे मेधाविन् हेजातवेदः इहास्मिन्नग्निष्टोमाख्येकर्मणितत्रचमाध्यंदिनेमध्यंदिनसम्बन्धिनिसवनेपुरोडाशंमाध्यंदिनसवनीयपुरोडाशंजुषस्वसेवस्व हेअग्ने विदथेषुयज्ञेषुधीराःकर्मकुशलाःअध्वर्य्वादयः यह्वस्य यान्तिप्राप्नुवन्तिदेवाहवींष्यनेनेतियह्वोमहानग्निः यह्वस्यमहतस्तवभागधेयंभागतयापरिकल्पितमिमंपुरोडाशंनप्रमिनन्ति नहिंसन्ति किन्तु तुभ्यंप्रयच्छन्तितंजुषस्वेतिशेषः ॥ माध्यंदिने मध्यंदिनस्येदमित्यर्थेउत्सादित्वादञ् ञित्त्वादादिवृद्धिः ञित्त्वादेवाद्युदात्तत्वम् । यह्वस्य याप्रापणेइत्यस्मात्शेवयह्वजिह्वेतिनिपातनात्करणेवन्प्रत्ययः हुगागमधातुह्रस्वौ यान्त्यनेनेतियह्वोग्निः व्यत्ययेनान्तोदात्तः । भागधेयं भागशब्दात्स्वार्थे भागरूपनामभ्योधेयप्रत्ययोवक्तव्यइतिधेयप्रत्ययः प्रत्ययस्वरः । मिनन्ति मीञ्हिंसायामित्यस्यक्र्यादित्वात्श्ना तस्मिन्मीनातेर्निगमेइतिह्रस्वत्वम् हिनुमीनेतिणत्वंनभवति सर्वविधीनांछन्दसि विकल्पितत्वादिति ॥ ४ ॥

अथपञ्चमी—

अग्नेतृतीयेसवनेहिकानिषःपुरोळाशंसहसःसूनवाहुतम् ।
अथादेवेष्वध्वरंविपन्ययाधारत्नवन्तममृतेषुजागृविम् ॥ ५ ॥

अग्ने॑ । तृ॒तीये॑ । सव॑ने । हि । कानि॑षः । पु॒रो॒ळाश॑म् । स॒ह॒सः॒ ।
सू॒नो॒ इति॑ । आऽहु॑तम् । अथ॑ । दे॒वेषु॑ । अ॒ध्व॒रम् । वि॒प॒न्यया॑ ।
धाः । रत्न॑ऽवन्तम् । अ॒मृते॑षु । जागृ॑विम् ॥ ५ ॥

सहसःसूनो बलस्यपुत्र हेअग्ने त्वंतृतीयेसवनेआहुतंहूयमानंपुरोळाशं कानिषःकामयसे अथानन्तरं अध्वरं अविनाशिनं रत्नवन्तं रत्नशब्देनस्वर्गादिलक्षणमुत्तमंफलमभिधीयते तद्वन्तं फलप्रदं जागृविं जागरणकारिणं प्रातःसोमोजागृविर्भवतिस्वप्ननिवारकइति तमिमंसोमं विपन्यया स्तुतिलक्षणयावाचा स्तुतस्त्वं अमृतेषुमरणधर्मरहितेषुदेवेष्विन्द्रादिषु धाः धेहि ॥ तृतीये त्रिशब्दात्पूरणार्थेत्रेःसंप्रसारणमितीयप्रत्ययः तत्संनियोगेनसंप्रसारणं हलइतिदीर्घोनभवति अन्वितितत्रनानुवर्तनात् प्रत्ययस्वरः । कानिषः कनीकान्त्यादिष्वित्यस्यलेटिसिब्बहुलमिति सिप् तस्यआर्धधातुकत्वादिडागमः कांतिरभिलाषः अकारस्याकारोव्यत्ययेन हियोगादनिघातः धातुस्वरः । विपन्यया पनस्तुतौ भावेक्विप् विपनंयातीतिकप्रत्ययः प्रत्ययस्वरः । धाः दधातेश्छान्दसेलुङिरूपम् पादादित्वादनिघातः । जागृविं क्विन्प्रत्ययान्तोजागृविशब्दःनित्स्वरः ॥ ५ ॥

अथषष्ठी—

अग्ने॑वृधा॒नआहु॑तिंपुरो॒ळाशं॑जातवेदः । जु॒षस्वं॑ति॒रोअ॑ह्न्यम् ॥६॥३१॥

अग्ने॑ । वृ॒धा॒नः । आऽहु॑तिम् । पु॒रो॒ळाश॑म् । जा॒त॒ऽवे॒दः॒ ।
जु॒षस्व॑ । ति॒रःऽअ॑ह्न्यम् ॥ ६ ॥ ३१ ॥

जातवेदः जातप्रज्ञ हेअग्ने वृधानःआहुतिभिर्वर्धमानस्त्वंतिरोअह्न्यं अह्निभवमह्न्यं दिवसकृत्यं तिरोभूतमह्न्यंयस्मिन्कालेसतिरोअह्न्यःरात्रिकालः तस्मिन्काले आहुतिं आहुतंपुरोळाशंपुरोडाशाख्यंहविर्जुषस्वसेवस्व ॥ आहुतिं जुहोतेःकर्मणिक्तिन् तादौचनितिकृत्यताविति गतेःप्रकृतिस्वरत्वम् । जुषस्व जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपम् ॥ ६ ॥

॥ इतितृतीयस्यप्रथमेएकात्रिंशोवर्गः ॥ ३१ ॥

अस्तीदमितिषोडशर्चंसप्तदशंसूक्तंवैश्वामित्रम् अत्रानुक्रमणिका—अस्तीदंषोळशाद्याचतुर्थीदशमीद्वादश्योनुष्टुभः षष्ठ्येकादश्युपान्त्येचजगत्यः पञ्चम्यृत्विग्भ्योवेति आद्याचतुर्थीद-

शमीद्वादश्योनुष्टुभः षष्ठीएकादशीचतुर्दशीपंचदशीजगत्यः शिष्टाअष्टौत्रिष्टुभः पञ्चमीमन्थतानरइत्येषाऋत्विग्देवताका अग्निदेवताकावा शिष्टाअग्निदेवताकाः सूक्तविनियोगोलैङ्गिकः वरुणप्रघासेष्वग्निप्रणयनेइळायास्त्वापदइत्येषा सूत्रितश्च—इळायास्त्वापदेवयमग्नेविश्वेभिःस्वनीकदेवैरित्यर्धर्चआरमेदिति । तत्रैवाग्निप्रणयनेउत्तरवेद्यामग्नौस्थापितेसतिसीदहोतरित्येषा । निहितेग्नौसीदहोतःस्वउलोकेचिकित्वानितिसूत्रितम् । अरण्यामग्निसमारोपणेअयन्तेयोनिरित्येषासूत्रितश्च—अयन्तेयोनिर्ऋत्वियइत्यरणीगार्हपत्येप्रतितपेत्पाणीवेति ।

तस्मिन्सूक्तेप्रथमा—

अस्ती॒दम॑धि॒मन्थ॑न॒मस्ति॑प्र॒जन॑नंकृ॒तम् ।
ए॒तांवि॒श्पत्नी॒माभ॑रा॒ग्निंम॑न्थामपू॒र्वथा॑ ॥ १ ॥

अस्ति॑ । इ॒दम् । अ॒धि॒ऽमन्थ॑नम् । अस्ति॑ । प्र॒ऽजन॑नम् । कृ॒तम् ।
ए॒ताम् । वि॒श्पत्नी॑म् । आ । भ॒र॒ । अ॒ग्निम् । म॒न्था॒म॒ । पू॒र्वऽथा॑ ॥१॥

यजमानोध्वर्य्वादीन्प्रतिब्रूते । इदमग्न्यर्थंयूपशकलमस्ति अधिमन्थनमरण्याउपरिनिधेयंमन्थनसाधनभूतंदंडरज्ज्वादिकमस्ति प्रजननमग्निजननसाधनभूतंदर्भपिञ्जूलंकृतंसंपादितमस्ति यद्वा प्रजननंमन्थनदंडस्यविन्यासविशेषः यस्मादेतानियूपशकलादीन्यग्निमन्थनसाधनान्याहृतानिसन्ति तस्माद् विश्पत्नीं विशांप्रजानामग्निसाध्याग्निहोत्रद्वारास्वर्गादिफलसंपादनेनपालयित्रीमेतामरणीमाभर हेअध्वर्यो आहर तस्यामाहृतायांपूर्वथा यथा वयमाधानकालेअग्निममथ्नीम यथावा पूर्वेमहर्षयोग्निममन्थिषुः तद्वद्वयमेनमग्निमस्मिन्कर्मणिमन्थाम मन्थनेननिष्पन्नंकरवाम ॥ अस्तीतिपदद्वयस्यपादादित्वादनिघातः । विश्पत्नीं पतिशब्दस्यविभाषासपूर्वस्येतिङीप् नकारश्चान्तादेशः परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । भर हृञ् हरणे इत्यस्य लोटि हृग्रहोर्भश्छन्दसीतिभकारः । मन्थाम मन्थविलोडनेइत्यस्यलोटिरूपं निघातः । पूर्वथा पूर्वशब्दादिवार्थेप्रत्नपूर्वविश्वेमात्थाल्छन्दसीतिथाल्प्रत्ययः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ॥ १ ॥

अथद्वितीया—

अ॒रण्यो॒र्निहि॑तोजा॒तवे॑दा॒गर्भ॑इव॒सुधि॑तोग॒र्भिणी॑षु ।
दि॒वेदि॑व॒ईड्यो॑जागृ॒वद्भि॑र्ह॒विष्म॑द्भिर्मनु॒ष्ये॑भिर॒ग्निः ॥ २ ॥

अ॒रण्योः॑ । निऽहि॑तः । जा॒तऽवे॑दाः । गर्भः॑ऽइव । सुऽधि॑तः ।
ग॒र्भिणी॑षु । दि॒वेऽदि॑वे । ईड्यः॑ । जा॒गृ॒वत्ऽभिः॑ । ह॒विष्म॑त्ऽभिः ।
म॒नु॒ष्ये॑भिः । अ॒ग्निः ॥ २ ॥

जातवेदाःसर्वविषयज्ञानवानयमग्निःअरण्योर्निहितःदेवैर्यज्ञार्थंनितरांस्थापितोस्ति । अत्रदृष्टान्तः—गर्भइवेति यथागर्भोगर्भिणीषुस्त्रीषुसुधितःसुष्ठुनिहितोवर्ततेतद्वत् सताद्दशोग्निः हविष्मद्भिःसंभृतहविष्कैः अतएवजागृवद्भिः कर्मणिजागरूकैर्मनुष्येभिर्मनुष्यैरस्माभिर्दिवेदिवेप्रत्यहमुत्पत्त्यर्थमीड्यः स्तुतिरूपाभिर्गीर्भिःस्तोतव्यः ॥ अरण्योः ऋगतौ अर्तिसृधृधमीत्यादिनानिप्रत्ययः प्रत्ययस्वरः । निहितः दधातेःकर्मणिनिष्ठायां दधातेर्हिरितिहिरादेशः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । सुधितः दधातेःकर्मणिनिष्ठा तस्मिन्त्सुधितवसुधितेत्यादिनानिपातनाद्धिइत्यादेशः । दिवेदिवे दिवुक्रीडादौ इगुपधलक्षणःकः नित्यवीप्सयोरितिद्विर्वचनम् तस्याम्रेडितत्वादनुदात्तत्वेपूर्वपदस्वरः । जागृवद्भिः जागृनिद्राक्षयेइत्यस्यक्वसौरूपं द्विर्वचनप्रकरणेछन्दसिवेतिवक्तव्यमितिविकल्पितत्वाद्विर्वचनाभावः वसुस्रंसुध्वंस्वनडुहांदइतिवसोःसकारस्यदत्वं प्रत्ययस्वरः ॥ २ ॥

अथतृतीया—

उ॒त्ता॒नाया॒मव॑भराचिकि॒त्वान्त्स॒द्यःप्रवी॑ता॒वृष॑णंजजान ।
अ॒रु॒षस्तू॑पो॒रुश॑दस्य॒पाज॒इळा॑यास्पु॒त्रोव॒युने॑जनिष्ट ॥ ३ ॥

उ॒त्ता॒नाया॑म् । अव॑ । भ॒र॒ । चि॒कि॒त्वान् । स॒द्यः । प्रऽवी॑ता ।
वृष॑णम् । ज॒जा॒न॒ । अ॒रु॒षऽस्तू॑पः । रुश॑त् । अ॒स्य॒ । पाजः॑ ।
इळा॑याः । पु॒त्रः । व॒युने॑ । अ॒ज॒नि॒ष्ट॒ ॥ ३ ॥

चिकित्वान् ज्ञानवानध्वर्युस्त्वं उत्तानायामधरारण्यां उत्तानशयायामुत्तरारणिं अवभर अधोमुखांधारय अनन्तरंसाधरारणिःसद्यःप्रवीतातदानीमेवनिषिक्तरेतस्कासती वृषणं कामानांवर्षकमग्निंजजान जनयतु अथास्याग्नेःरुशत् तमोविनाशयत् पाजस्तेजोमात्रंतत्राभूत् अनन्तरंअरुषस्तूपःआरोचमानतेजःसंघोपेतःइळायास्पुत्रःउत्तरवेद्याउत्पन्नोग्निःवयुनेअरण्यांयोनिस्थाने अजनिष्ट अजनि ॥ जजान जनजननेइत्यस्यलोडर्थेलिटिबहुलमन्यत्रापिसंज्ञाछन्दसोरितिणिलोपः प्रत्ययान्तत्वाभावादाम्नभवति निघातः । अरुषस्तूपः नविद्यतेरुषः

Funding by IKS-MoE

क्रोधोयस्येत्यरुषः क्रोधराहित्येनरोचमानइत्यर्थः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ष्टुञ्स्तुतौ स्तौतेर्दीर्घश्चेतिपप्रत्ययःकिच्चधातोर्दीर्घश्च स्तूयतेइतिस्तूपस्तेजःसंघःअरुषआरोचमानस्तेजःसंघोयस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरः । रुशत् रुशहिंसायांशतरिरूपम् । वयुने अजगतिक्षेपणयोरित्यस्मादजियमिशीङ्भ्यश्चेत्युनन् चित्संज्ञकःअजतिवीयतेवावयुनमंगं प्रत्ययस्यव्यत्ययेनाद्युदात्तत्वम् । अजनिष्ट जनीप्रादुर्भावेइत्यस्यलुङिसिचिरूपम् निघातः ॥ ३ ॥

अथचतुर्थी–

इळा॑यास्त्वाप॒देव॒यंनाभा॑पृथि॒व्याअधि॑ ।
जात॑वेदो॒निधी॑म॒ह्यग्ने॑ह॒व्याय॒वोळ्ह॑वे ॥ ४ ॥

इळा॑याः । त्वा॒ । प॒दे । व॒यम् । नाभा॑ । पृ॒थि॒व्याः । अधि॑ ।
जात॑ऽवेदः । नि । धी॒म॒हि॒ । अग्ने॑ । ह॒व्याय॑ । वोळ्ह॑वे ॥ ४ ॥

जातवेदः जातप्रज्ञ हेअग्ने अध्वर्य्वादयोवयंपृथिव्याअधिभूमेरुपर्युत्तरवेद्यां नाभा नाभौ तस्यानाभिस्थानेमध्यप्रदेशे तदेवस्थानंविशेष्यते इळायाःपदे मानव्याइळायागोःपदे इडापदरूपेउत्तरवेद्यात्मकेस्थाने त्वात्वांहव्याय वोळ्हवे पुरोडाशादिलक्षणंहविर्वोढुंनिधीमहि निदधीमहि उक्तार्थेब्राह्मणम्[1]–इळायास्त्वापदेवयंनाभापृथिव्याअधीत्येतद्वाइळायास्पदंयदुत्तरवेदीनाभिर्जातवेदोनिधीमहीतिनिधास्यन्तोह्येनंभवन्त्यग्नेहव्यायवोळ्हवइतिहव्यंहिवक्ष्यन्भवतीति॥ नाभा णहबन्धने इञित्यनुवृत्तौनहोभश्चेतीञ् भकारश्चान्तादेशः ञित्त्वादुपधावृद्धिः नह्यतीतिनाभिः मध्यस्थानं सुपांसुलुगितिसप्तम्याडादेशः ञित्स्वरः । धीमहि दधातेर्लिङि रूपम् लिङःसीयुडितिसीयुट् द्विर्वचनाभावश्छान्दसःनिघातः । वोळ्हवे वहप्रापणेइत्यस्मात्तुमर्थेतवेन् सहिवहोरोदवर्णस्येतिधात्वकारस्यौत्वम् ढत्वधत्वष्टुत्वढलोपाः नित्त्वादाद्युदात्तः ॥ ४ ॥

अथपञ्चमी–

मन्थ॑तानरःक॒विमद्व॑यन्तं॒प्रचे॑तसम॒मृतं॑सु॒प्रती॑कम् ।
य॒ज्ञस्य॑के॒तुंप्र॑थ॒मंपु॒रस्ता॑द॒ग्निंनरो॑जनयतासु॒शेव॑म् ॥ ५ ॥ ३२ ॥

---

[1] ऐ० ब्रा० १. २८.

Funding by IKS-MoE

मन्थ॑त । न॒र॒ः । क॒विम् । अद्व॑यन्तम् । प्र॒ऽचे॑तसम् । अ॒मृत॑म् ।
सु॒ऽप्रती॑कम् । य॒ज्ञस्य॑ । के॒तुम् । प्र॒थ॒मम् । पु॒रस्ता॑त् । अ॒ग्निम् ।
न॒र॒ः । ज॒न॒य॒त॒ । सु॒ऽशेव॑म् ॥ ५ ॥ ३२ ॥

नरः कर्मणांनेतारो हेअध्वर्य्वादयः कविंक्रान्तदर्शिनंअद्वयन्तं द्वयमनाचरन्तं अद्वैतंकुर्वाणंमनसावाचाचएकविधमेवकर्मकुर्वाणं अतएवप्रचेतसं प्रकृष्टज्ञानोपेतंअमृतंमरणधर्मरहितं सुप्रतीकंशोभनैरङ्गैर्ज्वालाभिः समेतंतमिममग्निंमन्थतमन्थनेननिष्पादयत किञ्च हेनरः कर्मणांनेतारोध्वर्य्वादयः यूयं यज्ञस्यज्योतिष्टोमादेःकेतुंप्रज्ञापकं प्रथमंमुख्याङ्गभूतं अग्निपूर्वकत्वात्सर्वेषामुत्तरक्रतूनां सुशेवं शोभनसुखोपेतं तादृशमग्निंपुरस्तात्कर्मणःप्रारंभेजनयत तमिममग्निमेवंविधगुणयुक्तंकुरुतेतिभावः ॥ मन्थत मन्थविलोडनेइत्यस्यलोटिरूपं पादादित्वादनिघातः । नरः णीञ्प्रापणेइत्यस्मात्नयतेर्डिच्चेतिऋप्रत्ययः डित्त्वाट्टिलोपः नयन्तिकर्माणिनीयन्तेकर्माण्येभिरितिवानरः आमन्त्रितत्वान्निघातः । अद्वयन्तं द्वयमिवाचरतीत्यर्थे सर्वप्रातिपदिकेभ्यःक्विब्वक्तव्यइत्याचारार्थेक्विप् द्वयति तस्यशतरिरूपंद्वयन्निति नद्वयन्अद्वयन् तं तत्पुरुषेनञ्स्वरः । सुप्रतीकम् बहुव्रीहौक्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम् । जनयत जनीप्रादुर्भावेइत्यस्यणिच् अतउपधायाइतिवृद्धौप्राप्तायां जनीजृष्क्नसुरञ्जोमन्ताश्चेतिमित्त्वाद्भावान्मितांह्रस्वइतिह्रस्वः निघातः । सुशेवम् शेवशब्दोवन्प्रत्ययान्तआद्युदात्तः बहुव्रीहौ आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् ॥ ५ ॥

॥ इतितृतीयस्यप्रथमेद्वात्रिंशोवर्गः ॥ ३२ ॥

अथषष्ठी–

यदी॒मन्थ॑न्तिबा॒हुभि॒र्वि॑रो॑च॒तेश्वो॒नवा॒ज्य॑रु॒षोवने॒ष्वा ।
चि॒त्रोनयाम॑न्न॒श्विनो॒रनि॑वृत॒ःपरि॑वृण॒क्त्यश्म॑न॒स्तृणा॒दह॑न् ॥ ६ ॥

यदि॑ । मन्थ॑न्ति । बा॒हुऽभि॑ः । वि । रो॒च॒ते॒ । अश्व॑ः । न । वा॒जी ।
अ॒रु॒षः । वने॑षु । आ । चि॒त्रः । न । याम॑न् । अ॒श्विनो॑ः । अनि॑ऽवृतः ।
परि॑ । वृ॒ण॒क्ति॒ । अश्म॑नः । तृणा॑ । दह॑न् ॥ ६ ॥

Funding by IKS-MoE

यद्यध्वर्य्वादयःबाहुभिःस्वकीयैर्हस्तैरग्निंमन्थन्तिमथ्नन्ति ततःसजातोग्निःवनेषुकाष्ठेषु वाजी शीघ्रगमनवान् अरुषआरोचमानः सर्वेषांप्रीतिकरःसन् आविरोचते आसमन्ताद्विशेषेणदीप्यते तत्रदृष्टान्तः—अश्वोनेति यथाश्वोवनेषुवननीयेषुवाह्यालीस्थानेषुवेगवान् आरोचमानोवर्ततेतद्वत् तत्रैवदृष्टान्तान्तरम्—चित्रोनेति यथायामन्यामनिवेगगमने अश्विनोर्देवभिषजोश्चित्रोनानाविधवर्णोरथआरोचमानोवर्ततेतद्वत् अनिवृतः केनाप्यप्रतिबद्धगमनः सोयमग्निःअश्मनःउपलान्तृणानिचदहन्भस्मसात्कुर्वन्परिवृणक्ति दग्धस्थानानिपरित्तोवर्जयति तादृशोग्निःआविरोचतइतिपूर्वेणान्वयः ॥ मन्थन्ति मन्थविलोडने अस्यलटिरूपं यदियोगादनिघातः। रोचते रुचदीप्तौ भौवादिकः लटिरूपं निघातः। यामन् याप्रापणे आतोमनिन्क्वनिब्वनिपश्चेतिमनिन् सुपांसुलुगितिसप्तम्यालुक् नित्स्वरः। अनिवृतः वृञ्वरणेइत्यस्यनिष्ठायां यस्यविभाषेतीट्प्रतिषेधः निपूर्वोवृणोतिर्निवारणेवर्तते ननिवृतःअनिवृतःनञ्स्वरः। वृणक्ति वृजीवर्जने रुधादिः चोःकुरितिकुत्वं निघातः। तृणा तृहहिसिहिंसायाम् तृहेःक्तःकित्त्वादगुणःहलोपश्च तृह्यतेतद्भवादिभिरितितृणं नित्स्वरः ॥ ६ ॥

अथसप्तमी—

जा॒तोअ॒ग्नीरो॑चते॒चेकि॑तानोवा॒जीविप्रः॑कविश॒स्तःसु॒दानुः॑ ।
यं॑दे॒वास॒ईड्यं॑विश्व॒विदं॑हव्य॒वाह॒मद॑धुरध्व॒रेषु॑ ॥ ७ ॥

जा॒तः । अ॒ग्निः । रो॒च॒ते॒ । चेकि॑तानः । वा॒जी । विप्रः॑ । क॒वि॒ऽश॒स्तः ।
सु॒ऽदानुः॑ । यम् । दे॒वासः॑ । ईड्य॑म् । वि॒श्व॒ऽविद॑म् ।
ह॒व्य॒ऽवाह॑म् । अद॑धुः । अ॒ध्व॒रेषु॑ ॥ ७ ॥

जातःमन्थनानन्तरमुत्पन्नःसचचेकितानःसर्वंजानानःसन्वाजीसततगमनस्वभावःविप्रःकर्माभिज्ञःअतएवकविशस्तः कविर्भिर्मेधाविभिर्होतृभिःस्तुतः सुदानुः सुष्ठुकर्मफलस्यदाता एवंविधोग्नीरोचतेदीप्यते देवासोदेवाइन्द्रादयः ईड्यंहोत्रादिभिःस्तुत्यं विश्वविदं सर्वस्यजगतोवेदितारं यमग्निमध्वरेषुज्योतिष्टोमादियज्ञेषु हव्यवाहं हव्यानांवोढारं अदधुःव्यदधुः सोग्निर्दीप्यतइतिपूर्वेणान्वयः ॥ चेकितानः कितज्ञानेइत्यस्ययङ्लुकि गुणोयङ्लुकोरित्यभ्यासस्यगुणः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। कविशस्तः थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तत्वम्। अदधुः दधातेर्लङि झेः सिजभ्यस्तविदिभ्यश्चेतिजुस् यद्वृत्तयोगादनिघातः अडागमस्वरः ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी–

सीद॑होत॒ःस्वउ॑ल्लो॒के॑चि॑कि॒त्वान्त्सा॒दया॑य॒ज्ञंसु॑कृ॒तस्य॒योनौ॑ ।
दे॒वा॒वीर्दे॒वान्ह॒विषा॑यजा॒स्यग्ने॑बृ॒हद्यज॑माने॒वयो॑धाः ॥ ८ ॥

सीद॑ । हो॒त॒रिति॑ । स्वे । ऊँ॒ इति॑ । लो॒के । चि॒कि॒त्वान् ।
सा॒दय॑ । य॒ज्ञम् । सु॒ऽकृ॒तस्य॑ । योनौ॑ । दे॒व॒ऽअ॒वीः । दे॒वान् । ह॒विषा॑ ।
य॒जा॒सि॒ । अग्ने॑ । बृ॒हत् । यज॑माने । वयः॑ । धा॒ः ॥ ८ ॥

यजमानोब्रूते होतः होमनिष्पादक हेअग्ने स्वेस्वकीयेलोकेउत्तरवेद्यां नाभौसीद त्वंहोमनिमित्तमुपविशैव तथा चिकित्वान् ज्ञानवांस्त्वंसुकृतस्य सुकृतजन्योपभोगस्ययोनौस्थाने उत्तमलोके यज्ञंयज्ञस्यकर्तारं यजमानं सादय स्थापय किञ्च देवावीः देवान्हविःप्रदानेनअवतीतिदेवावीः तादृशस्त्वं हविषापुरोडाशादिलक्षणेनहव्येनदेवान्यजासि यज अथत्वं यजमानेयागंकुर्वाणेमयिबृहत्प्रभूतं पशुपुत्रादिसमेतंवयोन्नंधाः विधेहि ॥ सीद सदेर्लोटिरूपम् । सादय सदेर्ण्यन्तस्यलोटिरूपं णिचूस्वरः । देवावीः अवरक्षणादिषु अवितॄस्तृतंत्रिभ्यईरितीप्रत्ययः कृदुत्तरपदस्वरः । यजासि यजेर्लेटचाडागमः । धाः दधातेश्छान्दसेलुङिरूपम् ॥ ८ ॥

अथनवमी–

कृ॒णोत॑धू॒मंवृष॑णंसखा॒योस्रे॑धन्तइतन॒वाज॒मच्छ॑ ।
अ॒यम॒ग्निःपृ॑तना॒षाट्सु॒वीरो॒येन॑दे॒वासो॒अस॑हन्त॒दस्यू॑न् ॥ ९ ॥

कृ॒णोत॑ । धू॒मम् । वृष॑णम् । स॒खा॒यः॒ । अस्रे॑धन्तः । इ॒त॒न ।
वाज॑म् । अच्छ॑ । अ॒यम् । अ॒ग्निः । पृ॒त॒ना॒षाट् । सु॒ऽवीरः॑ । येन॑ ।
दे॒वासः॑ । अस॑हन्त । दस्यू॑न् ॥ ९ ॥

यजमानोध्वर्य्वादीन्प्रतिब्रूते हेसखायः कर्मसहकारिणोध्वर्य्वादयोयूयंवृषणंकामानां वर्षितारं धूमं धुनोतिकम्पयतीतिधूमोग्निः एवंविधमग्निंकृणोतकुरुत मन्थनेनोत्पादयत यद्यग्निर्नजायतेतदानीमाह अस्रेधन्तः अक्षीणाः अनुपरतसामर्थ्याः सन्तोयूयं वाजंमन्थनलक्षणंयुद्धं अच्छाद्भ्याभिमुख्येन इतन प्राप्नुत सुवीरः शोभनसामर्थ्योपेतोयमग्निः पृतनाषाट्

पृतनोपलक्षितंयुद्धं सहमानोभवति येनयुद्धंसहमानेनाग्निना देवासोदेवाः दस्यून् उपक्षपयितॄनसुरान् असहन्त अभ्यभवन् तस्मादक्षीणबलायूयं मन्थनं कुरुतेतिभावः ॥ कृणोत कृविर्हिंसाकरणयोरित्यस्यलोटि तप्रत्ययस्य तप्तनप्तनथनाश्चेतितबादेशः पित्त्वाद्गुणः पादादित्वादनिघातः उप्रत्ययस्वरः । धूमं धूञ्कम्पने इत्यस्मादिषियुधीन्धिदसिइत्यादिनामक् कित्त्वाद्गुणाभावः धुनोतिकम्पयतिदाह्यानीतिधूमोऽग्निः प्रत्ययस्वरः । इतन इण्गतावित्यस्यलोटि तप्रत्ययस्यतनादेशः निघातः । पृतनाषाट् षहमर्षणेइत्यस्मात् छन्दसिसहइतिण्विः णित्त्वादुपधावृद्धिः सहेःसाडःसइतिषत्वम् कृदुत्तरपदस्वरः । असहन्त षहमर्षणेइत्यस्यलङि रूपम् यद्योगादनिघातः । दस्यून् दसुउपक्षये यजिमनिशुन्धिदसिजनिभ्योयुजितियुच् दस्यन्तीतिदस्यवः शत्रवः व्यत्ययेनाद्युदात्तत्वम् ॥ ९ ॥

अथदशमी–

अ॒यन्ते॒योनि॑र्ऋ॒त्वियो॒यतो॑जा॒तोअरो॑चथाः ।
तंजा॒नन्न॑ग्न॒आसी॒दाथा॑नोवर्ध॑या॒गिरः॑ ॥ १० ॥ २३ ॥

अ॒यम् । ते॒ । योनिः॑ । ऋ॒त्वियः॑ । यतः॑ । जा॒तः । अरो॑चथाः । तम् ।
जा॒नन् । अ॒ग्ने॒ । आ । सी॒द॒ । अथ॑ । न॒ः । व॒र्ध॑य॒ । गिरः॑ ॥१०॥ २३॥

हेअग्ने ऋत्वियः वसंताद्यृतौभवः अयमङ्गुल्यानिर्दिश्यमानःपलाशाश्वत्थादिमयः काष्ठविशेषोरणिः तेतवयोनिरुत्पत्तिस्थानं यतोरणेर्जातस्त्वंअरोचथाः अशोभथाः जानंस्त्वंतंअरणिरूपंकाष्ठविशेषंआसीद तस्यामरण्यामारोपितःसन्नैरन्तर्येणतिष्ठ अथानन्तरंनोस्माकंगिरः स्तुतिलक्षणावाचःवर्धय यद्वा गीःशब्देनतद्वन्तो लक्ष्यन्ते तथास्तोतॄनस्मान्वर्धय पशुपुत्रादिभिः समृद्धान्कुरु ॥ योनिः युमिश्रणे वहिश्रीत्यादिनानिप्रत्ययः निदित्युक्तत्वादाद्युदात्तः । ऋत्वियः छन्दसिघसितिऋतुशब्दात्प्राप्तार्थेघस्प्रत्ययः घस्यइयादेशः सितीतिपदसंज्ञायांओर्गुणइतिभसंज्ञाधीनोगुणोनभवति प्रत्ययस्वरः । अरोचथाः रुचदीप्तावित्यस्यलङिरूपम् यद्वृत्तयोगादनिघातः । सीद षद्लृविशरणादिषु लोटि पाघ्रेत्यादिनासीदादेशः निघातः । अथ निपातस्यचेतिसांहितिकोदीर्घः । वर्धय वृधुवर्धने हेतुमतिणिच् निघातः ॥ १० ॥

॥ इतितृतीयस्यप्रथमेत्रयस्त्रिंशोवर्गः ॥ ३३ ॥

Funding by IKS-MoE

अथैकादशी—

त॒नू॒नपा॑दुच्यते॒गर्भ॑आसु॒रोन॒रा॒शंसो॑भवति॒यद्वि॒जाय॑ते ।
मा॒त॒रिश्वा॒यदमि॑मीतमा॒त॒रि॒वात॑स्य॒सर्गो॑अभव॒त्सरी॑मणि ॥ ११ ॥

तनू॒१ऽनपा॑त् । उ॒च्य॒ते॒ । गर्भ॑ः । आ॒सु॒रः । न॒रा॒शंस॑ः । भ॒व॒ति॒ ।
यत् । वि॒ऽजाय॑ते । मा॒त॒रिश्वा॑ । यत् । अमि॑मीत । मा॒तरि॑ ।
वात॑स्य । सर्ग॑ः । अ॒भ॒व॒त् । सरी॑मणि ॥ ११ ॥

योऽग्निर्यदागर्भः अरणीषु गर्भरूपतयावर्तते तदासोऽग्निस्तनूनपादुच्यते यष्टॄणांतनूःशरीराणिनपातयतिनदहतीतिव्युत्पत्तेः यद्वा तनूशब्देनापोधीयन्ते नपाच्छब्देनैकान्तरिताःप्रजाः तथाचापांनप्ताकथमेतदापःतताअन्तरिक्षेताभ्यओषधिवनस्पतयोजायंते तेभ्योऽह्येषइतियत्यदाविजायतेविशेषेणप्रत्यक्षतयाजायतेतदाआसुरः कर्मविघ्नकारिणामसुराणांहन्ता अतएवनराशंसः नरैः कर्मणांनेतृभिरध्वर्य्वादिभिःशंसनीयोभवति यद्यदामातर्यन्तरिक्षेस्वंतेजःअमिमीत निर्मिमीते तदामातरिश्वाभवति मातर्यन्तरिक्षेश्वसितिचेष्टतइतिव्युत्पत्तेः एवंविधस्याग्नेःसरीमणिसरणे शीघ्रगमनेवातस्यवायोःसर्गःसृष्टिरभवद्भवति एतदुक्तंभवति यदाग्निररणीषुगर्भरूपतयावर्ततेतदातनूनपान्नामकोभवति यदाजायतेतदानराशंसनामकोभवति यदान्तरिक्षेविद्योततेतदामातरिश्वनामकोभवति ॥ तनूनपात् तनुविस्तारेइत्यस्मात्कृषिचमितनिधनिसर्जिखर्जिभ्यऊरित्यूप्रत्ययः व्यत्ययेनाद्युदात्तः । नपात् पारक्षणे पतॢगतौ वाण्यन्तःक्विप् नपातिनपातयतीतिवानपात् नभ्राण्नपान्नवेदाइत्यादिनानिपातनान्नञःप्रकृतिभावः नञ्स्वरः तनूर्नपातीतितनूनपात् कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते उभेवनस्पत्यादिषुयुगपदिति उभयपदप्रकृतिस्वरत्वम् । आसुरः असुरस्यायमासुरः अहितकारित्वेनसंबन्धी तस्येदमित्यण् प्रत्ययस्वरः । नराशंसः नॄनयेइत्यस्मात्ऋदोरबित्यप्प्रत्ययः प्रत्ययस्यपित्त्वान्नरशब्दआद्युदात्तः शंसुस्तुतावित्यस्माद्घञन्तआद्युदात्तः नरशब्दस्यान्येषामपिदृश्यतइतिदीर्घः वनस्पत्यादित्वादुभयोःप्रकृतिस्वरत्वम् । विजायते जनीप्रादुर्भावे दिवादित्वात्श्यन् धातुस्वरः । अमिमीत माङ्मानेशब्देच जुहोत्यादिः भृञामिदित्यभ्यासस्येत्वं यद्योगादनिघातः । सरीमणि सृगतौ हृभृसृस्तृसूभ्यइतिइमनिन्प्रत्ययः नित्स्वरः ॥ ११ ॥

Funding by IKS-MoE

अथद्वादशी—

सु॒नि॒र्म॑था॒निर्म॑थितःसुनि॒धानिहि॑तःक॒विः ।
अग्ने॑स्वध्व॒राकृ॑णुदे॒वान्दे॑वय॒तेय॑ज ॥ १२ ॥

सु॒नि॒ःऽमथा॑ । निःऽम॑थितः । सु॒ऽनि॒धा । निऽहि॑तः । क॒विः ।
अग्ने॑ । सु॒ऽअ॒ध्व॒रा । कृ॒णु॒ । दे॒वान् । दे॒व॒ऽय॒ते । य॒ज॒ ॥ १२ ॥

हेअग्ने कविर्मेधावी सुनिर्मथा शोभनेनमन्थनेननिर्मथितः नितरांमथितोसि तथा सुनिधा शोभनेननिहितोसि उत्तरवेद्यादिस्थानेषुनितरांप्रक्षिप्तोसि किञ्च स्वध्वरा अस्माभिःक्रियमाणानिकर्माणिसुष्ठुहिंसारहितानि कृणु कुरु तथा देवयते देवान्कामयमानाययजमानायदेवान्यजनीयानिन्द्रादीन् यज पूजय ॥ सुनिर्मथा मथेविलोडनेअस्मात्सम्पदादिलक्षणोभावेक्विप् प्रादिसमासः कृदुत्तरपदस्वरः । निर्मथितः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । सुनिधा निपूर्वस्यदधातेर्भावेआतश्चोपसर्गेइत्यङ् सुपांसुलुगितितृतीयायाअलुक् कृदुत्तरपदस्वरः । कृणु कृविहिंसाकरणयोरित्यस्यलोटि धिन्विकृण्व्योरचेत्युप्रत्ययः उतश्चप्रत्ययादितिहेर्लुक् निघातः ॥ १२ ॥

अथत्रयोदशी—

अजी॑जनन्न॒मृतं॒मर्त्या॑सोस्रे॒माणं॑त॒रणिं॑वी॒ळुजं॑म्भम् ।
दश॒स्वसा॑रोअ॒ग्रुवः॑समी॒चीःपुमां॑संजा॒तम॒भिसं॑रभन्ते ॥ १३ ॥

अजी॑जनन् । अ॒मृत॑म् । मर्त्या॑सः । अ॒स्रे॒माण॑म् । त॒रणि॑म् ।
वी॒ळुऽज॑म्भम् । दश॑ । स्वसा॑रः । अ॒ग्रुवः॑ । स॒म्ऽई॒चीः ।
पुमां॑सम् । जा॒तम् । अ॒भि । सम् । र॒भ॒न्ते॒ ॥ १३ ॥

मर्त्यासोमर्त्याऋत्विजः अमृतंमरणधर्मरहितं अतएवास्रेमाणं क्षयरहितं वीळुजंभंहविर्भक्षणार्थंदृढदन्तं तरणिं तरन्तियजमानाःपापमनेनेतितरणिरग्निः तमजीजनन् मन्थनेनोदपीपदन् अथ जातंतमग्निमभिलक्ष्य स्वसारःस्वयंसरन्त्यःदशदशसंख्याकाः अग्रुवः कर्मकरणा-

र्थमग्रंअंगन्तीतिअग्रुवोङ्गुलयः तादृशाङ्गुलयःसमीचीः परस्परंसंगताःसत्यः संरभन्ते शब्दंकुर्वते जातमग्निंदृष्ट्वाध्वर्य्वादयोहर्षाद्धस्तद्वयसम्पुटेनशब्दंकुर्वन्तीत्यर्थः तत्रदृष्टान्तः—पुमांसमिति यथाजातंपुत्रमुपलभ्यतत्रत्याःपित्रादयोहर्षादुद्घोषंतितद्वत् ॥ अजीजनन् जनीप्रादुर्भावेइत्यस्यण्यन्तस्यलुङिचङिरूपम् । अस्रेमाणम् स्रिवुगतिशोषणयोरित्यस्माद्धावेमनिन्निति मनिन्प्रत्ययः लघूपधगुणोलोपोव्योर्वलीतिवलोपः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । तरणिं तॄप्लवनतरणयोः अर्तिसृधृधम्यम्यश्यवितॄभ्योनिरित्यनिप्रत्ययः गुणः प्रत्ययस्वरः । स्वसारः असुक्षेपणेइत्यस्मात्सुन्यसेर्ऋन्निति ऋन्प्रत्ययः सुष्ठुअस्यन्तिकर्मसुपदार्थानितिस्वसारः नषट्स्वस्रादिभ्यइतिङीपःप्रतिषेधः नित्त्वादाद्युदात्तः । अग्रुवः अगिगतौ जत्वादयश्चेतिरुप्रत्ययः निपातनान्नलोपः जसि तन्वादित्वादुवङादेशः प्रत्ययस्वरः । समीचीः इण्गतौइत्यस्मात्समीणइतिचट्प्रत्ययः धातोर्दीर्घश्च टित्त्वाट्टिड्ढाणञित्यादिनाङीप् संयन्तीतिसमीच्यः यद्वा संपूर्वस्याञ्चतेःक्विप् समःसमीतिसमिइत्यादेशः अञ्चतेश्चोपसंख्यानमितिङीप् अचइत्यकारलोपः चावितिदीर्घः वाछन्दसीतिसवर्णदीर्घः एकादेशस्वरः । पुमांसं पारक्षणेइत्यस्मात् पातेर्डुम्सुन्निति डुम्सुन्प्रत्ययः पुंसोसुङितिअसुङादेशः पातिकुलमितिपुमान् नित्स्वरः । रभन्ते रभशब्देइत्यस्य लटिरूपं निघातः ॥ १३ ॥

अथचतुर्दशी—

प्रसप्तहोतासनकादरोचतमातुरुपस्थेयदशोचदूधनि ।
ननिमिषतिसुरणोदिवेदिवेयदसुरस्यजठरादजायत ॥ ३४ ॥

प्र । सप्तऽहोता । सनकात् । अरोचत । मातुः । उपऽस्थे ।
यत् । अशोचत् । ऊधनि । न । नि । मिषति । सुऽरणः ।
दिवेऽदिवे । यत् । असुरस्य । जठरात् । अजायत ॥ १४ ॥

सनकात् सनातनोग्निः सप्तहोता सप्तहोतारोहोत्रकायस्यासौसप्तहोतासन् प्रारोचत गार्हपत्यस्थानेअदीप्यत यद्यदामातुःपृथिव्याउपस्थेउत्सङ्गे तत्रापिऊधनिऊधःस्थाने उत्तरवेद्यांअशोचत् अशोभत तदासोग्निःसुरणःसुष्ठुरणतिशब्दयतीतिसुरणः सर्वैःकमनीयतयादृश्यमानःसन् दिवेदिवे प्रतिदिनंननिमिषति ननिद्राति किंतुसर्वदायज्ञार्थंजागर्त्येव यद्यस्मादसुरस्याग्नेः

प्रेरकस्यारणीरूपस्यकाष्ठस्यजठरादुदरादजायत कर्मार्थमुदपद्यत तस्मान्ननिमिषतीतिपूर्वेणान्वयः॥ अरोचत रुचदीप्तावित्यस्यलङिरूपं निघातः। अशोचत् शुचदीप्तौ। ऊधनि सकारस्यनकारश्छान्दसः। मिषति मिषुसेचनेइत्यस्यलटिरूपम्। सुरणः रणशब्दे तत्करोतीतिणिच् तस्मादरुच्छ्रार्थेखल् लित्स्वरः। असुरस्य असुक्षेपणेइत्यस्मादसेरुरन्नितिउरन्प्रत्ययः अस्यतीत्यसुरः नित्स्वरः। जठरात् जनीप्रादुर्भावेइत्यस्मात् जनेररष्ठचेत्यरप्रत्ययःठकारश्चान्तादेशः प्रत्ययस्वरः। अजायत जनीप्रादुर्भावेइत्यस्यलङि श्यनि ज्ञाजनोर्जेतिधातोर्जादेशः यद्योगादनिघातः॥ १४ ॥

अथपञ्चदशी—

अ॒मि॒त्रा॒यु॒धो॑म॒रुतां॑मिवप्र॒याः प्र॑थम॒जाब्रह्म॑णो॒विश्व॒मिद्वि॑दुः ।
द्यु॒म्नव॒द्ब्रह्म॑कुशि॒कास॒एरि॑र॒एक॑एको॒दमे॑अ॒ग्निंसमी॑धिरे ॥ १५ ॥

अ॒मि॒त्र॒ऽयु॒धः॑ । म॒रुता॑म्ऽइव । प्र॒ऽयाः । प्र॒थ॒म॒ऽजाः । ब्रह्म॑णः । विश्व॑म् ।
इत् । वि॒दु॒ः । द्यु॒म्नऽव॑त् । ब्रह्म॑ । कु॒शि॒कासः॑ । आ । ई॒रि॒रे॒ ।
एकः॑ऽएकः । दमे॑ । अ॒ग्निम् । सम् । ई॒धि॒रे॒ ॥ १५ ॥

अमित्रायुधः अमित्रैः कर्मविघ्नकारिभिरसुरैःसहयोद्धारः यद्वा अमित्राणिपापानितैः सहयोद्धारः तत्रदृष्टान्तः—मरुतामिवप्रयाइति यथामरुतांदेवानांप्रयाः प्रकर्षेणशत्रूनभियान्तीतिप्रयाःबलानिशत्रूणांहन्तॄणितद्वत् कर्मविघ्नकारिणांपापानांचहन्तारः ब्रह्मणःसर्वस्यजगतः स्रष्टुः प्रथमजाःप्रथममुत्पन्नाः कुशिकासः कुशिकगोत्रोत्पन्नाःऋषयः विश्वंस्थावरजङ्गमात्मकंसर्वंजगद्विदुरित् जानन्त्येव तेअमी कुशिकाःद्युम्नवत्हविर्युक्तंब्रह्मस्तोत्रमेरिरे अग्नयेआसमन्तात्प्रेरयन्ति तेच दमेस्वेस्वेगृहे एकएकः एकैकोभूत्वा अग्निंसमीधिरे आज्याद्याहुतिभिः सम्यग्दीपयन्ति॥ अमित्रायुधः युधसम्प्रहारे क्विप् कृदुत्तरपदप्रकृतिस्वरः संहितायांपूर्वपदस्यदीर्घश्छान्दसः। प्रयाः याप्रापणे अन्येभ्योपिदृश्यन्तइतिविच्। प्रथमजाः जनीप्रादुर्भावे जनसनेत्यादिनाविट् विड्वनोरित्यात्वम्। विदुः विदेर्लटि विदोलटोवेतिझेरुसादेशः। ईरिरे ई रगतावित्यस्यलिटिरूपं मन्त्रत्वादाम्नभवति। दमे दमुउपशमने करणेघञ् नोदात्तोपदेशस्येतिवृद्धिप्रतिषेधः ञित्स्वरः। ईधिरे ञिइन्धीदीप्तौ इत्यस्यलिटि इन्धिभवतिभ्यांचेतिकिद्वद्भावान्नकारलोपः निघातः॥ १५ ॥

Funding by IKS-MoE

अथषोडशी–

यदद्यत्वाप्रयतियज्ञेअस्मिन्होतश्चिकित्वोवृणीमहीह ।
ध्रुवमयाध्रुवमुताशमिष्ठाःप्रजानन्विद्वाँउपयाहिसोमम् ॥ १६ ॥ ३४॥

यत् । अद्य । त्वा । प्रऽयति । यज्ञे । अस्मिन् । होतरिति ।
चिकित्वः । अवृणीमहि । इह । ध्रुवम् । अयाः । ध्रुवम् । उत ।
अशमिष्ठाः । प्रऽजानन् । विद्वान् । उप । याहि । सोमम्॥ १६॥ ३४॥

होतः होमनिष्पादक चिकित्वःकर्मविषयज्ञानवन् हेअग्ने अद्येदानीं प्रयति प्रवर्तमानेस्मिञ्ज्योतिष्टोमादौयज्ञे त्वा त्वां यद्यस्मात्कारणात् अवृणीमहि त्वद्विषयंवरणमकुर्म तस्मात्तादृशस्त्वंइहकर्मणिदेवान्ध्रुवमयाः ध्रुवंयथाभवतितथाअस्माभिर्दत्तानिहवींषिप्रापय उतापिच अशमिष्ठाः हविःस्वीकरणात्तृप्तैर्देवैःशान्तस्त्वं अकरिष्ठाः अथ प्रजानन्इमंयज्ञंसम्यक्जानन् विद्वान्यत्किञ्चित्सर्वंजानानःत्वंसोमंअस्माभिः क्रियमाणमिमं अभिषुतंसोममभिलक्ष्य उपयाहि समीपेआगच्छ ॥ प्रयति इण्गतावित्यस्यशतरिरूपम् शतुरनुमइतिविभक्तेरुदात्तत्वम् । अवृणीमहि वृञ्वरणे क्र्यादित्वात्श्ना लटयुत्तमबहुवचने ईहल्यघोरितीत्वम् आमन्त्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः । अयाः याप्रापणेइत्यस्यलङिसिपिरूपं निघातः । अशमिष्ठाः शमुउपशमने इत्यस्यण्यन्तस्यकर्मणिलुङि स्यसिच्सीयुडितिविकल्पेनेडागमः तस्यासिद्धत्वात्णेरनिटीति णिलोपः निघातः । प्रजानन् ज्ञाअवबोधने शतरिरूपम् । याहि यातेर्लोटिरूपम् ॥ १६ ॥

॥ इतितृतीयस्यप्रथमेचतुस्त्रिंशोवर्गः ॥ ३४॥

॥ इतितृतीयेमंडलेद्वितीयोनुवाकः ॥ २ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेप्रथमोध्यायः ॥ १ ॥

Funding by IKS-MoE

॥ श्रीगणेशायनमः ॥

॥ यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत्॥निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥१॥

तृतीयेनुवाकेनवसूक्तानि तत्रेच्छन्तित्वेतिद्वाविंशत्यृचंप्रथमंसूक्तम् तत्रेयमनुक्रमणिका—इच्छन्तिद्व्यधिकैन्द्रमितिमण्डलद्रष्टाविश्वामित्रऋषिः इन्द्रोदेवता अनुक्तत्वात्त्रिष्टुप् आभिप्लविकेप्रथमेहनिदशरात्रेप्रथमेहनिचमाध्यंदिनेसवनेअच्छावाकशस्त्रेऽहीनसूक्तस्थानेद्वितीयमिदंसंपातसूक्तम् अभिप्लवपृष्ठ्याहानीतिखण्डेसूत्रितम्—इमामूष्विच्छन्तित्वाशासद्वह्निरितिसंपाताइति इन्द्रस्यवृत्रघ्नःसंबन्धिनिपशौसहदानुमितिवपायायाज्या सहदानुंपुरुहूतक्षियन्तंस्तुतइन्द्रोमघवायद्धवृत्रेतिसूत्रितम् स्वस्तयेवाजिभिश्चैषाऐन्द्रेपशौहविषोयाज्या सूत्रितंच—स्वस्तयेवाजिभिश्चप्रणेतःशुचीवोहव्यामरुतःशुचीनामिति शुनासीरीयेवैकल्पिकस्येन्द्रस्यशुनस्यशुनंहुवेमेत्यनुवाक्या सूत्रितंच—शुनंहुवेममघवानमिन्द्रमश्वायन्तोगव्यन्तोवाजयन्तइति ।

तस्मिन्सूक्तेप्रथमामृचमाह—

ॐम् इ॒च्छन्ति॑त्वासो॒म्यासः॒सखा॑यःसु॒न्वन्ति॒सो॒मं॒दध॑ति॒प्रयां॑सि ।
तिति॑क्षन्तेअ॒भिश॑स्तिं॒जना॑ना॒मिन्द्र॒त्वदाकश्च॒नहिप्र॑के॒तः ॥ १ ॥

इ॒च्छन्ति॑ । त्वा॒ । सो॒म्यासः॑ । सखा॑यः । सु॒न्वन्ति॑ । सोम॑म् ।
दध॑ति । प्रयां॑सि । तिति॑क्षन्ते । अ॒भिऽश॑स्तिम् । जना॑नाम् ।
इन्द्र॑ । त्वत् । आ । कः । च॒न । हि । प्र॒ऽके॒तः ॥ १ ॥

विश्वामित्रःस्तौति हेइन्द्र सोम्यासः सोमार्हाः ब्राह्मणाःत्वात्वां शंसितुमिच्छन्ति अतएवसखायस्तेब्राह्मणाः त्वदर्थंसोमंसुन्वन्ति अभिषुण्वन्ति प्रयांसि इतराण्यपिहवींषिदधति त्वदर्थंधारयन्ति त्वयाप्रेरिताःसंतः जनानांसपत्नानांअभिशस्तिंतत्कृतांहिंसांतितिक्षन्ते सहन्ते एवमनुग्राहकः त्वत्त्वत्तोऽन्यःकश्चनहि कोनामपुरुषःखलु आप्रकेतः सर्वतोजगतिप्रकेत्यतेज्ञाप्यतेइतिप्रकेतः प्रज्ञापितोविद्यते ॥ सोम्यासः सोममर्हतीत्यर्थेसोममर्हतियइतियः प्रत्ययस्वरः । सुन्वंति षुञ्अभिषवे स्वादित्वात्श्नुप्रत्ययः सतिशिष्टस्वरोबलीयानितिझिप्रत्ययस्वरः । दधति दधातेर्लटिरूपम् समानवाक्येयुष्मदस्मदादेशानिघाताइति सोम

पदस्योत्तरवाक्येनान्वयान्ननिघातः अभ्यस्तानामादिरित्युदात्तत्वम् । तितिक्षन्ते तिजनिशाने क्षमायांचेत्यस्य गुप्तिज्किद्भ्यःसन्नितिसन्प्रत्ययः अभ्यस्तस्वरः । अभिशस्तिं शसुहिंसायामित्यस्माद्भावेक्तिन् तादौचनितिकृत्यताविति गतेःप्रकृतिस्वरत्वं । प्रकेतः कितज्ञाने कर्मणि घञंतः थाथघञ्क्तेत्यंतोदात्तत्वम् ॥ १ ॥

अथद्वितीयामृचमाह—

नते॑दू॒रेप॑र॒माचि॒द्रजां॒स्यातुप्रया॑हिहरिवो॒हरि॑भ्याम् ।
स्थि॒राय॒वृष्णे॒सव॑नाकृ॒तेमायु॒क्ताग्रावा॑णःसमिधा॒नेअ॒ग्नौ ॥ २ ॥

न । ते॒ । दू॒रे । प॒र॒मा । चि॒त् । रजाँसि । आ । तु । प्र । या॒हि॒ ।
ह॒रि॒ऽव॒ः । हरि॑ऽभ्याम् । स्थि॒राय॑ । वृष्णे॑ । सव॑ना । कृ॒ता । इ॒मा ।
यु॒क्ताः । ग्रावा॑णः । स॒म्ऽइ॒धा॒ने । अ॒ग्नौ ॥ २ ॥

हरिवः हरिद्वर्णावश्वौयस्यसोयंहरिवानिन्द्रः हेहरिवः परमाचित् परमाणिदूरेवर्तमानान्यपिरजांसिस्थानानि ते तव दूरेनभवन्ति यस्मात्तस्मात् हरिभ्यांअश्वाभ्यामुपेतस्त्वंतु क्षिप्रंआप्रयाहि अस्मदीयंयज्ञमभिलक्ष्यागच्छ स्थिरायफलदानेदृढचित्ताय अवएववृष्णे कामानांवर्षित्रे तुभ्यं इमा इमानि सवना सवनानिप्रातरादीनि कृता कृतानि किंच अग्नावाहवनीयेसमिधानेआहुत्यधिकरणतयासम्यग्दीप्यमानेसति ग्रावाणउपलायुक्ताःसोमाभिषवार्थमुद्युक्ताः अतस्त्वं क्षिप्रमागच्छेतिभावः ॥ याहि याप्रापणेइत्यस्यलोटिरूपम् । हरिवः हरीअस्यस्तइतिमतुप् छन्दसीरइतितस्यवत्वं आमन्त्रितत्वान्निघातः । स्थिराय ष्ठागतिनिवृत्तावित्यस्मादजिरशिशिरेत्यादिनाकिरच्प्रत्ययांतत्वेननिपातनादाकारलोपः चित्स्वरः । सवना षुञ् अभिषवेइत्यस्मादधिकरणेल्युट्चेतिल्युट् सूयतेसोमोयत्रेतिसवनानिप्रातरादीनि नित्स्वरः । समिधाने ञिइन्धीदीप्तावित्यस्य कानचिरूपं कित्त्वान्नकारलोपः चित्स्वरः ॥ २ ॥

अथतृतीया—

इन्द्रः॑सु॒शिप्रो॑म॒घवा॒तरु॑त्रोम॒हाव्रा॑तस्तुविकू॒र्मिरृघा॑वान् ।
यदु॒ग्रोधा॑बाधि॒तोमर्त्ये॑षुक्व१॒॑त्याते॑वृषभवी॒र्या॑णि ॥ ३ ॥

इन्द्र॑ः । सु॒ऽशिप्र॑ः । म॒घऽवा॑ । तरु॑त्रः । म॒हाऽव्रा॑तः । तु॒वि॒ऽकू॒र्मि॑ः ।
ऋघा॑वान् । यत् । उ॒ग्रः । धाः । बा॒धि॒तः । मर्त्ये॑षु । क्व॑ ।
त्या । ते॒ । वृ॒ष॒भ॒ । वी॒र्या॑णि ॥ ३ ॥

वृषभ कामानांवर्षक हेइन्द्र यस्त्वंइन्द्रः परमैश्वर्यसंपन्नः सुशिप्रः शिप्रशब्देन शिरस्त्राणमभिधीयते शोभनशिरस्त्राणोपेतः यद्वा शोभनहनुमान् शिप्रेहनूनासिकेवेतियास्कः । मघवा धनवान् तरुत्रः तरंत्यनेनशत्रून्देवाइतितरुत्रइन्द्रः महाव्रातः मरुद्भिर्महान्व्रातःसमूहोयस्यसतथोक्तः तुविकूर्मिः संग्रामेनानाविधकर्मणांकर्ता ऋघावान् शत्रुविषयहिंसावान् अतएव उग्रः शत्रूणांभयंकरः सतादृशस्त्वंबाधितः असुरैःसंग्रामेबाधितःसन् मर्त्येषु मारयितृष्वसुरेषु यत्रयानिवीर्याणिधाः व्यधाः इदानीं ते तव त्या तानि वीर्याणिक्व क्वासते वद ॥ सुशिप्रः सृप्लृगतौ औणादिकोरन्प्रत्ययः बाहुलकात्सृइत्यस्यशिइत्यादेशः बहुव्रीहौ आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । तरुत्रः तरतेरशित्रादिभ्यइत्रोत्रावित्युत्रप्रत्ययः व्यत्ययेनाद्युदात्तः । महाव्रातः आन्महतइत्याकारादेशोमहतस्तकारस्य । तुविकूर्मिः करोतेरौणादिकोमिप्रत्ययः गुणेकृते करोतेरकारस्यउत्वंछान्दसं हलिचेतिदीर्घः । ऋघावान् ऋन्हन्तीतिऋघाः अन्येभ्योपिदृश्यन्तइतिविच् दृशिग्रहणान्नलोपोहकारस्यघत्वं तदस्यास्तीतिमत्वर्थे छन्दसीवनिपावितिवनिप् व्यत्ययेनाद्युदात्तः । क्व किन्शब्दस्यसप्तम्यर्थेकिमोदित्यत्प्रत्ययः तस्मिन्क्वातीतिक्वादेशः तित्स्वरः ॥ ३ ॥

अथचतुर्थी—

त्वं॑हिष्मा॑च्या॒वय॒न्नच्यु॑ता॒न्येको॑वृ॒त्राचर॑सि॒जिघ्न॑मानः ।
तव॒द्यावा॑पृथि॒वीपर्व॑ता॒सोनु॑व्र॒ताय॒निमि॑तेवतस्थुः ॥ ४ ॥

त्वम् । हि । स्म॒ । च्य॒वय॑न् । अच्यु॑तानि । एक॑ः । वृ॒त्रा ।
चर॑सि । जिघ्न॑मानः । तव॑ । द्यावा॑पृथि॒वी इति॑ । पर्व॑तासः ।
अनु॑ । व्र॒ताय॑ । निमि॑ताऽइव । त॒स्थुः ॥ ४ ॥

Funding by IKS-MoE

हेइन्द्र त्वमेकः असहायएव अच्युतानि च्युतिरहितानि दृढमूलान्यपि तवप्रतिपक्षभूतानि रक्षांसिच्यावयन् स्वस्वस्थानात्पातयन् तथा वृत्रा वृत्राणि पापानिजिघ्नमानःहिंसन्चरसि हिस्म वर्तसेखलु किंच एवंविधसामर्थ्योपेतस्यतवव्रतायकर्मणे आज्ञायै द्यावापृथिवी द्यावापृथिव्यौ पर्वतासः पर्वताश्च निमितेव निखातानिश्चलाइवानुतस्थुः तिष्ठन्ति ॥ स्म चादित्वादनुदात्तः । च्यावयन् च्युङ्गतावित्यस्यण्यंतस्यशतरिरूपं णिच्स्वरः । चरसि चरगतिभक्षणयोः हियोगादनिघातः । जिघ्नमानः हनहिंसागत्योरित्यस्यघञर्थेकविधानमितिकप्रत्ययः तस्य छन्दस्युभयथेतिसार्वधातुकत्वाच्छप् तस्यश्लुः बहुलंछन्दसीत्यभ्यासस्यइत्वं जिहन्तीतिजिघ्नः आचारार्थेक्विप् अस्मात्ताच्छील्यार्थेचानश् शप् व्यत्ययेनाद्युदात्तत्वम् । द्यावापृथिवी देवताद्वंद्वेचेत्युभयपदप्रकृतिस्वरत्वम् । निमितेव डुमिञ्प्रक्षेपणेइत्यस्यकर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वं सुपांसुलुगितिसुपोडादेशः इवेनविभक्त्यलोपइत्युक्तत्वात्पूर्वपदस्वरः । तस्थुः ष्ठागतिनिवृत्तौइत्यस्यलिट्युसिआतोलोपेकृते तस्यद्विर्वचनेचीतिस्थानिवद्भावाद्द्विर्वचनं निघातः ॥ ४ ॥

अथपञ्चमी—

उ॒ताभ॑येपुरुहू॒त॒श्रवो॑भि॒रेको॑दृ॒ळ्हम॑वदोवृत्र॒हासन् ।
इ॒मेचि॑दि॒न्द्र॒रोद॑सीअपा॒रेयत्सं॑गृभ्णाम॑घवन्का॒शिरित्ते॑ ॥ ५ ॥ १ ॥

उ॒त । अभ॑ये । पु॒रु॒ऽहू॒त॒ । श्रवः॑ऽभिः । एकः॑ । दृ॒ळ्हम् । अ॒व॒दः॒ । वृ॒त्र॒ऽहा । सन् । इ॒मे इति॑ । चि॒त् । इ॒न्द्र॒ । रोद॑सी॒ इति॑ । अ॒पा॒रे इति॑ । यत् । स॒म्ऽगृ॒भ्णाः । म॒घ॒ऽव॒न् । का॒शिः । इत् । ते॒ ॥ ५ ॥ १ ॥

उतेत्यामंत्रणे हेइन्द्र पुरुहूत पुरुभिर्बहुभिर्यज्वभिराहूत यद्वा देवैरसुरेभ्योरक्षार्थंबहुवारमाहूत श्रवोभिःवीर्यैरुपेत एकः असहायस्त्वं वृत्रहा वृत्रस्यशत्रोर्हन्तासन् अभये असुरेभ्यःसकाशान्माबिभीतेतिदेवान्प्रतियद्वाक्यमवदः अवोचः तद्वाक्यं दृह्ळं दृढं सत्यमेव किंच मघवन्निन्द्र त्वं अपारेचित् दूरपारेअपि इमे रोदसी द्यावापृथिव्यौयद्यस्मात्कारणात्संगृभ्णाः संगृह्णासि परस्परमधरोत्तरभावेनसंयोजितेकरोषीतियावत् एषतेतवमहिमाकाशिरित् प्रकाशोलोकेप्रसिद्धएव यद्वा यत्येनतेरोदसीसंगृह्णासितेतव

काशिर्मुष्टिर्महान् काशिर्मुष्टिरितियास्कः[1] ॥ अभये ञिभीभयेइत्यस्माद्भावेएरजित्यच्प्रत्ययः नञासमासेतस्यस्वरः । अवदः वद्व्यक्तायांवाचि लङिरूपं निघातः । अपारे बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । संगृभ्णाः ग्रहउपादाने क्र्यादित्वात्श्ना ग्रहिज्यावयीत्यादिनासंप्रसारणं ह्यग्रहोर्भश्छन्दसीतिहकारस्यभकारः इतश्चेतिसिपइकारलोपः बहुलंछन्दसीत्यडभावः समासस्वरः । काशिः काशृदीप्तौ औणादिकइप्रत्ययः प्रत्ययस्वरः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी–

प्रसू॒त॑इन्द्रप्र॒वता॒हरि॑भ्यां॒प्रते॒वज्रः॑प्रमृ॒णन्नै॑तु॒शत्रू॑न् ।
ज॒हिप्र॑ती॒चोअ॑नू॒चः॒परा॑चो॒विश्वँ॑स॒त्यंकृ॑णु॒हिवि॒ष्टम॑स्तु ॥ ६ ॥

प्र । सु । ते॒ । इ॒न्द्र॒ । प्र॒ऽवता॑ । हरि॑ऽभ्याम् । प्र । ते॒ । वज्रः॑ ।
प्र॒ऽमृ॒णन् । ए॒तु॒ । शत्रू॑न् । ज॒हि । प्र॒ती॒चः । अ॒नू॒चः । परा॑चः ।
विश्व॑म् । स॒त्यम् । कृ॒णु॒हि॒ । वि॒ष्टम् । अ॒स्तु॒ ॥ ६ ॥

हेइन्द्र तेतव हरिभ्यामश्वाभ्यांयुक्तोरथः शत्रूनभिलक्ष्य प्रवता प्रवणेनमार्गेण सुसुष्ठुप्रैतु शीघ्रंगच्छतु तथाते वज्रः अशनिः शत्रूनसुरान्प्रमृणन्हिंसन्प्रैतु त्वंच प्रतीचः त्वदाभिमुख्येनागच्छतःशत्रून्जहि मारय तथा अनूचः अनुगच्छतःपार्ष्णिग्राहानसुरान्पराचः पलायनपरांश्चजहि एवंशत्रुषुबाधितेषुसत्सु विश्वं जगत्सत्यंकृणुहि सत्यभूताग्निहोत्रादिकर्मपरंकुरु एवंविधंसामर्थ्यंत्वयिविष्टंनिविष्टमस्तु ॥ प्रवता प्रशब्दादुपसर्गाच्छन्दसिधात्वर्थेइतिवतिप्रत्ययः प्रत्ययस्वरः । प्रमृणन् मृणहिंसायां । जहि हनहिंसागत्योरित्यस्यलोटिसिपोहिरादेशः तस्मिन्हन्तेर्जइतिजादेशः अतोहेरितिलुकिप्राप्ते आभाच्छास्त्रस्यासिद्धत्वान्निवृत्तिः हेर्ङित्त्वादन्तोदात्तः । प्रतीचः अंचुगतिपूजनयोः अंचेश्छंदस्यसर्वनामस्थानमितिविभक्तेरुदात्तत्वम् । पराचः अनिगन्तोञ्चतावप्रत्ययेइतिगतेःप्रकृतिस्वरत्वम् । कृणुहि कृविहिंसाकरणयोः । अस्तु अस्भुवि ॥६॥

अथसप्तमी–

यस्मै॒धायु॒रद॑धा॒मर्त्या॒याभ॑क्तंचिद्भजतेगे॒ह्यं॑१॒सः ।
भ॒द्रात॑इन्द्रसु॒म॒तिर्घृ॒ताची॑स॒हस्र॑दानापुरुहूतरा॒तिः ॥ ७ ॥

---

[1] नि० ६. १.

यस्मै । धायुः । अदधाः । मर्त्याय । अभक्तम् । चित् ।
भजते । गेह्यम् । सः । भद्रा । ते । इन्द्र । सुऽमतिः । घृताची ।
सहस्रऽदाना । पुरुऽहूत । रातिः ॥ ७ ॥

हेइन्द्र धायुः निरंतरमैश्वर्यंदधानस्त्वं यस्मैमर्त्यायमनुष्यायअदधाः वीर्यंदधासि समर्त्यः अभक्तंचित् पूर्वमप्राप्तमपि गेह्यं गृहेषुभवं कनकपश्वादिकं भजतेप्राप्नोति किंच हेपुरुहूत बहुभिराहूतेन्द्र घृताची घृतशब्दोहविर्मात्रमुपलक्षयति तथाच सोमाज्यपुरोडाशादिलक्षणंहविरंचति प्राप्नोतीतिघृताची तेतवसुमतिः शोभनाबुद्धिः भद्रा कल्याणकरी तथा तव रातिर्दानशक्तिः सहस्रदानाअपरिमितधनदानसमेता इन्द्रस्य बहुदातृत्वेमंत्रवर्णः—भूरिदाभूरिदेहिनोमादभ्रंभूर्याभरेति ॥ धायुः दधातेरौणादिकउण्प्रत्ययः । अदधाः दधातेर्लङिरूपं यद्वृत्तयोगादनिघातः । मर्त्याय मर्तएवमर्त्यः वस्वादिषुपाठात्स्वार्थिकोयत् यतोनावइत्याद्युदात्तः । गेह्यं गेहशब्दात्तत्रभवइत्यर्थे भवेछंदसोतियत् तित्स्वरितः । सुमतिः मंत्रेवृषेत्यादिनामतिशब्दोऽन्तोदात्तः समासेकृदुत्तरपदस्वरः । रातिः रादाने मंत्रेवृषेत्यादिनाक्तिन्नुदात्तः ॥ ७ ॥

अथाष्टमी—

सहदानुंपुरुहूतक्षियन्तंमहस्तमिन्द्रसंपिणक्कुणारुम् ।
अभिवृत्रंवर्धमानंपियारुमपादमिन्द्रतवसाजघन्थ ॥ ८ ॥

सहऽदानुम् । पुरुऽहूत । क्षियन्तम् । अहस्तम् । इन्द्र । सम् ।
पिणक् । कुणारुम् । अभि । वृत्रम् । वर्धमानम् । पियारुम् ।
अपादम् । इन्द्र । तवसा । जघन्थ ॥ ८ ॥

हेपुरुहूत इन्द्र त्वं सहदानुं दानुर्दानवीवृत्रमाता तयासहवर्तमानं तथाच मंत्रवर्णः—दानुःशयेसहवत्सेति[2] । यद्वा सहदानुं दानुभिर्दानवैःसहवर्ततइतिसहदानुः तं क्षियंतं बाधमानं कुणारुं क्वणनशीलं कंचिदसुरं अहस्तं हस्तहीनंकृत्वासंपिणक् सम्यक्चूर्णीकुरु किंच हेइन्द्र वर्धमानं सर्वतः इषुमात्रंवर्धमानं सइषुमात्रमिषुमात्रंविष्वङ्वर्धतेतिश्रुतेः[3] । पियारुं हिंस्रं वृत्रंवृत्रासुरं अपादं पादहीनंकृत्वा तवसाबलेनअभिजघंथ हतवानसि यद्वा सहदानुंउदक-

---

१ ऋ० सं० ३.६.३०. ।　२ ऋ० सं०१, २, ३७. ।　३ तै० सं० २. ४. १२. ।

दानोपेतं क्षियन्तमाकाशेनिवसंतं कुणारुं गर्जन्तं वृत्रं वृणोत्याच्छादयतिनभइतिवृत्रोमेघः तमिमंवर्धमानंमेघंहस्तपादशून्यंकृत्वासंपिणक् संपिंढि तथाचयास्कः—अहस्तमिन्द्रकृत्वासंपिंढिपरिक्कणनंमेघमिंति ॥ सहदानुं दोअवखण्डने दाभाभ्यांनुरितिनुप्रत्ययः द्यतीतिदानुर्दानवः यद्वा दानुर्दानं बहुव्रीहौपूर्वपदप्रकृतिस्वरः । क्षियंतं क्षिनिवासगत्योः तुदादित्वाच्छः प्रत्ययस्वरः । पिणक् पिष्लृसंचूर्णने रुधादित्वात्श्नम् हेर्लुक् षकारस्यककारश्छांदसः । कुणारुं कुणशब्दने बाहुलकाद्रूपसिद्धिः आद्युदात्तः ।जघंथ हनहिंसागत्योरित्यस्यलिटिथलिरूपं अभ्यासाच्चेतिधातुहकारस्यघत्वं निघातः उपदेशेत्वतइतिईंट्प्रतिषेधः ॥ ८ ॥

अथनवमी—

निसा॑म॒नामि॑षि॒रामि॑न्द्र॒भूमि॑म॒हीम॑पा॒रांसद॑नेससत्थ ।
अस्त॑भ्ना॒द्यांवृ॑ष॒भोअ॒न्तरि॑क्ष॒मर्ष॑न्त्वाप॒स्त्वये॒हप्रसू॑ताः ॥ ९ ॥

नि । सा॒म॒नाम् । इ॒षि॒राम् । इ॒न्द्र॒ । भूमि॑म् । म॒हीम् । अ॒पा॒राम् ।
सद॑ने । स॒स॒त्थ॒ । अस्त॑भ्नात् । द्याम् । वृ॒ष॒भः । अ॒न्तरि॑क्षम् ।
अर्ष॑न्तु । आप॑ः । त्वया॑ । इ॒ह । प्रऽसू॑ताः ॥ ९ ॥

हेइन्द्र महीं महतीं अतएवापारां पुरुपारां इषिरां स्थानाभावेनचलंतीं एवंविधांभूमिं सामनां समानां तथाचमंत्रवर्णः—गावौतेसामनावितई[2]ति । यद्वा समएवसाम शतपथेश्रूयते—यदेवसमःप्लुषिणासमोमशकेनसमोनागेनसमएतैस्त्रिभिर्लोकैरतस्मादेवसामेति । तदस्यारतीतिसामना तां साम्यवतींकृत्वा सदने स्वेस्थानेनिषसत्थ निवेशयामासिथ तथा वृषभः अभिमतफलानांवर्षकःइन्द्रः द्यां द्युलोकं अस्तभ्नात् यथानपततितथाअधारयत् तथा अंतरिक्षं एवंद्यावापृथिव्योरवस्थितौसत्यांत्वयाप्रसूताः मेघभेदनेनप्रेरिताआपः इहभूमौ अर्षंतु आगच्छन्तु तथाचमंत्रवर्णः—यःपृथिवींव्यथमानामदृंहं[3]दिति ॥ सामनां समएवसामः तदस्यास्तीतिमतुबर्थेपामादित्वान्नप्रत्ययः प्रत्ययस्वरत्वं । इषिरां इषगतौ इषिमदिमुदीत्यादिनाकिरच्प्रत्ययः । कित्त्वादगुणः चित्स्वरः । ससत्थ षद्लृविशरणगत्यवसादनेषुइत्यंतर्भावितण्यर्थस्यलिटिथलि उपदेशेत्वतइतीट्प्रतिषेधः निघातः । अस्तभ्नात् स्तंभुस्तंभनेइतिसौत्रोधातुः स्तंभु-

---

१ नि० ६. १. । २ ऋ० सं० ८. ३. २२. । ३ ऋ० सं० २. ६. ७. ।

स्तुंभ्वित्यादिनाश्नाप्रत्ययः श्नान्नलोपइतिधातुनकारस्यलोपः अडागमस्वरः। अर्षंतु ऋषीगतौ व्यृत्ययेनशप्रत्ययः गुणः पादादित्वादनिघातः। आपः आप्लृव्याप्तौ क्विप् धातोर्ह्रस्वश्च जसि अप्तृन्नित्यादिनादीर्घः जसःसुप्त्वादनुदात्तत्वेधातुस्वरः। प्रसूताः षूप्रेरणेइत्यस्यकर्मणि निष्ठा गतिरनंतरइतिगतेःप्रकृतिस्वरत्वम् ॥ ९ ॥

अथदशमी—

अलांतृणोवलइंन्द्रव्रजोगोःपुराहन्तोर्भयंमानोव्यांर।
सुगान्पथोअंकृणोन्निरजेगाःप्रावन्वाणींःपुरुहूतंधमंन्तीः॥१०॥२॥

अलातृणः। वलः। इन्द्र। व्रजः। गोः। पुरा। हन्तोः। भयंमानः।
वि। आर। सुऽगान्। पथः। अकृणोत्। निःऽअजे। गाः।
प्र। आवन्। वाणींः। पुरुऽहूतम्। धमंन्तीः॥ १० ॥ २ ॥

हेइन्द्र अलातृणः बहूदकतयाअलमत्यर्थमातृद्यतेहिंस्यतेइत्यलातृणः गोर्माध्यमिकायावाचोव्रजोगोष्ठभूतोवलःवृणोत्याकाशमितिवलोमेघः पुराहन्तोःतववज्रप्रहारात्प्राक्भयमानःबिभ्यत् व्यार विश्लिष्टोबभूव अनंतरं सइन्द्रः गाअपोनिरजेनिर्गमयितुं सुगान्सुगमनान्पथोमार्गानकृणोत् अकरोत् अतः वाणीःवननीयाःधमंतीःशब्दायमानाः ताआपःपुरुहूतंबहुभिराहूतंपार्थिवमुदकंप्रतिप्रावन् अभ्यागच्छन् एतामृचंयास्कएवंव्याख्यत्—अलातृणोबलइंद्रव्रजेगोः अलातृणोलमातर्दनोमेघोवलोवृणोतेर्व्रजोव्रजत्यंतरिक्षेगोरेतस्यामाध्यमिकायावाचःपुराहननाद्भयमानोव्यारसुगान्पथोअकृणोन्निरजेगाःसुगमनान्पथोकरोन्निर्गमनायगवांप्रावन्वाणीःपुरुहूतंधमंतीःआपोवावहनाद्वाचोवावदनाद्बहुभिराहूतमुदकंभवतिधमतिर्गतिकर्मा॥ अलातृणः तृहिहिंसायां अलंपूर्वात्तृहेर्घञर्थेकविधानमितिकर्मणिकप्रत्ययः अलमोमकारस्याकारः समासस्वरः। वलः वलसंवरणे वल्यतेआच्छाद्यतेनभोनेनेतिवलोमेघः पुंसिसंज्ञायामितिघः प्रत्ययस्वरः। व्रजः व्रजगतौ गोचरसंचरेत्यादिनाघप्रत्ययांतत्वेननिपातनात्कुत्वाभावः व्रजत्यंतरिक्षेइतिप्रत्ययस्वरः। भयमानः ञिभीभये व्यत्ययेनशप्। आर ऋगतावित्यस्यलिटिणलिरूपं निघातः। सुगान् गम्लृगतावित्यस्मादधिकरणेसुदुरोरधिकरणेइतिडप्रत्ययः डित्त्वाट्टिलोपः कृत्स्वरः। अकृणोत् कृविहिंसाकरणयोरित्यस्यलङिरूपं। निरजे अजगतिक्षेपणयोरित्यस्मात्संपदादिलक्षणोभावेक्विप् कृदुत्तरपदस्वरः। आवन् अवरक्षणगत्यादिष्वित्यस्यलङिरूपं। पुरुहूतं ह्वयतेर्निष्ठायांयजा-

---

१ नि० ६. २.

दित्वात्संप्रसारणं हलइतिदीर्घः थाथादिस्वरः । धमंतीः ध्माशब्दे शपि पाघ्रेत्यादिनाधमादेशः वाछंदसीतिजसःसवर्णदीर्घः शतुर्लसार्वधातुकस्वरेकृतेधातुस्वरः ॥ १० ॥

॥ इतितृतीयस्यद्वितीयेद्वितीयोवर्गः ॥ २ ॥

अथैकादशी—

ए॒को॒द्वेवसु॑मतीस॒मी॒चीइन्द्र॒आप॑प्रौपृथि॒वीमु॒तद्याम् ।
उ॒तान्तरि॑क्षाद॒भिन॑ःसमी॒कइ॒षोर॒थीःस॒युज॑ःशूर॒वाजा॑न् ॥ ११ ॥

एक॑ः । द्वे इति॑ । वसु॑मती॒ इति॒ वसु॑ऽमती । स॒मी॒ची इति॑ स॒म्ऽई॒ची । इन्द्र॑ः । आ । प॒प्रौ॒ । पृथि॒वीम् । उ॒त । द्याम् । उ॒त । अ॒न्तरि॑क्षात् । अ॒भि । न॒ः । स॒म्ऽई॒के । इ॒षः । र॒थीः । स॒ऽयुज॑ः । शूर॒ । वाजा॑न् ॥ ११ ॥

योयमिंद्रःएकःअसहायएवसन्पृथिवींउतापिचद्यांद्वेएतेद्यावापृथिव्यौसमीची परस्परसंगते वसुमती धनयुक्तेसत्यौ आपप्रौ समंतात्पूरयामास उतापिच हेशूर सामर्थ्योपेत तादृशस्त्वं रथीःरथवान् सनोऽस्माकं समीकेसमीपे इषःस्थातुमिच्छन् सयुजः संगतान्वाजान् वजंतिगच्छंतीतिवाजाअश्वाः तानश्वान्अंतरिक्षादंतरिक्षसकाशादभिप्रेरय रथारूढस्त्वमस्मत्समीपंशीघ्रमागच्छेतिभावः ॥ वसुमती वाछन्दसीतिपूर्वसवर्णदीर्घः । पप्रौ प्रापूरणेइत्यस्यलिटिणलि आतऔणलइत्यौकारः निघातः । इषः इषुइच्छायां अस्मादिगुपधलक्षणःकः कित्त्वादगुणः प्रत्ययस्वरः । रथीः रथोऽस्यास्तीतिरथीः मत्वर्थेछन्दसीवनिपाविति ईप्रत्ययः प्रत्ययस्वरः ॥ ११ ॥

अथद्वादशी—

दि॒श॒ःसू॒र्यो॑नमि॑ना॒ति॒प्रदि॑ष्टादि॒वेदि॑वे॒हर्य॑श्वप्रसूताः ।
संयदा॒नळध्व॑न॒आदिद॑श्वै॒र्वि॒मोच॑नंकृणु॒ते॒तत्त्व॑स्य ॥ १२ ॥

दिश॑ः । सूर्य॑ः । न । मि॒ना॒ति॒ । प्रऽदि॑ष्टाः । दि॒वेऽदि॑वे । हर्य॑श्वऽप्रसूताः । सम् । यत् । आन॑ट् । अध्व॑नः । आत् ।
इत् । अश्वै॑ः । वि॒ऽमोच॑नम् । कृ॒णु॒ते॒ । तत् । तु । अ॒स्य॒ ॥ १२ ॥

Funding by IKS-MoE

हर्यश्वप्रसूताः हरीअश्वौयस्यासावितिहर्यश्वइन्द्रः तेनप्रेरितादिशःप्रागादयः दिवेदिवे प्रतिदिवसंप्रदिष्टाःसूर्यस्यगमनार्थंदत्ताःयादिशोविद्यंते ताःसूर्योनमिनाति नहिनस्ति किंतु ताभिरेवव्रजति यद्यदासूर्यः अध्वनोगन्तव्यान्प्रदेशान् अश्वैर्गमनसाधनभूतैः समानट् सम्यगश्नुते आदिदनंतरमेव विमोचनंकृणुते अश्वानांविमोचनंकुरुते तदेतत्सर्वंकर्म अस्य तवैवखलु तुप्रसिद्धौ ॥ सूर्यः षूप्रेरणेइत्यस्मात्सुसूधागृधिभ्यःक्रन्नितिक्रन्प्रत्ययः सुवति प्रेरयतीतिसूरआदित्यः सूरएवसूर्यः वस्वादित्वात्स्वार्थिकोयत् यतोनावइत्याद्युदात्तत्वम् । मिनाति मीञ्हिंसायां मीनातेर्निगमेइतिह्रस्वः । हर्यश्वप्रसूताः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वं । आनट् अशूव्याप्तावित्यस्यबहुलंछंदसीतिलङःश्लुः अश्नोतेश्चेतिनुडागमः व्रश्चादिनाषत्वं यद्योगादनिघातः ॥ १२ ॥

अथत्रयोदशी–

दिदृ॑क्षन्तउ॒षसो॒याम॑न्न॒क्तोर्वि॒वस्व॑त्या॒महि॑चि॒त्रमनी॑कम् ।
विश्वे॑जानन्तिमहि॒नायदागा॒दिन्द्र॑स्य॒कर्म॒सुकृ॑तापु॒रूणि॑ ॥ १३ ॥

दिदृ॑क्षन्ते । उ॒षसः॑ । याम॑न् । अ॒क्तोः । वि॒वस्व॑त्याः । महि॑ ।
चि॒त्रम् । अनी॑कम् । विश्वे॑ । जा॒न॒न्ति॒ । म॒हि॒ना । यत् । आ ।
अगा॑त् । इन्द्र॑स्य । कर्म॑ । सुऽकृ॑ता । पु॒रूणि॑ ॥ १३ ॥

विश्वे सर्वेजनाः विवस्वत्याः विवासनवत्याः निर्गमनपरायाः अक्तोरात्रेःसंबंधिन्याःउषसोयामन्यामनि निर्गमनेसति महिमहत् चित्रंचायनीयं अनीकं सौरंतेजः दिदृक्षंते द्रष्टुमिच्छंति यद्यदाआगात् उषःकालःसमंतादागात् व्यपैति तदा तेजोदिदृक्षमाणाःसर्वेजनाः महिना महनीयान्यग्निहोत्रादीनिकर्माणिजानंति कर्तव्यतयावबुध्यंते हेइंद्र पुरूणिबहूनिसुकृता सुकृतानि कर्म कर्माणि इंद्रस्यतवैव ॥ दिदृक्षंते दृशिर्प्रेक्षणेइत्यस्यसनि ज्ञाश्रुस्मृदृशांसनइत्यात्मनेपदं अभ्यस्तस्वरः । विवस्वत्याः विवासतेःसंपदादिलक्षणःक्विप् व्यत्ययेनोपधाह्रस्वत्वं तस्मात्तदस्यास्तीतिमतुप् मादुपधायाइतितस्यवत्वं मतुपःपित्त्वादनुदात्तत्वेधातुस्वरः । जानंति ज्ञाअवबोधने ज्ञाजनोर्जेतिजादेशः निघातः । अगात् इण्गतावित्यस्यलुङिरूपं यद्योगादनिघातः । सुकृता गतिरनंतरइतिगतेःप्रकृतिस्वरत्वम् ॥ १३ ॥

Funding by IKS-MoE

अथचतुर्दशी—

म॒हिज्योति॒र्निहि॑तंव॒क्षणा॑स्वा॒माप॒क्वंच॑रति॒बिभ्र॑ती॒गौः ।
विश्वं॒स्वाद्म॒संभृ॑तमु॒स्रिया॑यां॒यत्सी॒मिन्द्रो॒अद॑धा॒द्भोज॑नाय ॥१४॥

महि॑ । ज्योति॑ः । निऽहि॑तम् । व॒क्षणा॑सु । आ॒मा । प॒क्वम् ।
च॒र॒ति॒ । बिभ्र॑ती । गौः । विश्व॑म् । स्वाद्म॑ । सम्ऽभृ॑तम् ।
उ॒स्रिया॑याम् । यत् । सी॒म् । इन्द्र॑ः । अद॑धात् । भोज॑नाय ॥ १४ ॥

वक्षणासु वक्ष्यंतेयासूदकानीतिवक्षणानद्यः तासु महि महत्ज्योतिः ज्योतिष्मदुदकंनिहितमिंद्रेण आमा नवसूतिकागौः पक्कंक्षीरादिकंबिभ्रती दधानासती चरति सर्वत्रवर्तते यद्यस्मादुदकात्स्वाद्म स्वादुतरंसंभृतंस्वेनसंपादितंदधिघृतक्षीरादिकं सीमेतद्विश्वंसर्वं उस्रियायांगविभोजनायेंद्रोऽदधात्न्यधात् तस्मात्क्षीरादिकंबिभ्रतीगौश्चरतीतिपूर्वेणान्वयः ॥ वक्षणासु वक्षरोषे अस्मात्करणाधिकरणयोश्चेतिकरणेल्युट् लित्स्वरः । पक्कं पचतेर्निष्ठातकारस्यपचोवइतिवत्वं प्रत्ययस्वरः । चरति चरतिर्गत्यर्थः । बिभ्रती डुभृञ्धारणपोषणयोः जुहोत्यादिः शतुरुगित्त्वादुगितश्चेतिङीप् अभ्यस्तानामादिरित्याद्युदात्तत्वं । उस्रियायां वसनिवासे स्फायितंचीत्यादिनाधिकरणेरक्प्रत्ययः यजादित्वात्संप्रसारणं शासिवसिघसीनांचेतिषत्वाभावश्छान्दसः स्वार्थिकोघप्रत्ययः प्रत्ययस्वरः ॥ १४ ॥

अथपञ्चदशी—

इन्द्र॒दृह्य॑यामको॒शाअ॑भूवन्य॒ज्ञाय॑शिक्षगृण॒तेसखि॑भ्यः ।
दु॒र्मा॒यवो॑दु॒रेवा॒मर्त्या॑सोनिष॒ङ्गिणो॑रि॒पवो॒हन्त्वा॑सः ॥ १५ ॥ ३ ॥

इन्द्र॑ । दृह्य॑ । या॒म॒ऽको॒शाः । अ॒भू॒व॒न् । य॒ज्ञाय॑ । शि॒क्ष॒ । गृ॒ण॒ते ।
सखि॑ऽभ्यः । दुः॒ऽमा॒यवः॑ । दुः॒ऽएवाः॑ । मर्त्या॑सः । नि॒ष॒ङ्गिणः॑ ।
रि॒पवः॑ । हन्त्वा॑सः ॥ १५ ॥ ३ ॥

Funding by IKS-MoE

हेइन्द्र दृह्य दृढोभव यतः यामकोशाः यांत्यस्मिन्नितियामोमार्गः तस्यकोशाः कोशवदाच्छादकाः मार्गप्रतिबंधकाराक्षसाः अभूवन् त्वं यज्ञाय यज्ञकर्त्रेगृणते स्तोत्रंकुर्वते यजमानाय सखिभ्यः पुत्रादिभ्यश्चशिक्ष अपेक्षितंफलंदत्स्व दुर्मायवः दुष्टमायुधानिमिन्वंतिप्रक्षिपंतीतिदुर्मायवः दुरेवाः दुष्टंगच्छंतः मर्त्यासोमारयितारः निषंगिणः निषंगशब्देनइषुधिरभिधीयते तद्वंतः एवंविधसामर्थ्योपेतारिपवः शत्रवोराक्षसाः हंत्वासः त्वयाहननीयाः ॥ दृह्य दृहदृहिवृहवृंहिवृद्धौ व्यत्ययेनश्यन् लोटिरूपं नित्स्वरः । अभूवन् भूसत्तायां अस्य लुङिरूपं गातिस्थेतिसिचोलुक् भूसुवोस्तिङीतिगुणेप्रतिषिद्धे भुवोवुग्लुङ्लिटोरितिवुगागमः निघातः । शिक्ष शिक्षविद्योपादाने अयंधातुरत्रदानेवर्तते व्यत्ययेनपरस्मैपदं निघातः । दुर्मायवः मिनोतेः कृवापाजिमीत्यादिनाउण्प्रत्ययः कृदुत्तरपदस्वरः । दुरेवाः इण्गतौ इण्शीङ्भ्यांवन्नितिकर्तरिवन्प्रत्ययः । रिपवः रपेरिच्चोपधायाइत्युप्रत्ययः उपधायाइत्वं प्रत्ययस्वरः । हंत्वासः हनहिंसागत्योः कृत्यार्थेतवैकेन्केन्यत्वनइतित्वन्प्रत्ययः नित्त्वादाद्युदात्तः ॥ १५ ॥

॥ इतितृतीयस्यद्वितीयेतृतीयोवर्गः ॥ ३ ॥

अथषोडशी—

संघोष॑ःशृण्वेव॒मैर॒मित्रै॑र्ज॒हीन्ये॒ष्व॑शनिं॒तपि॑ष्ठाम् ।
वृ॒श्चेम॒धस्ता॒द्विरु॑जा॒सह॑स्वज॒हिरक्षो॑मघवन्र॒न्धय॑स्व ॥ १६ ॥

सम् । घोष॑ः । शृ॒ण्वे॒ । अ॒व॒मैः । अ॒मित्रैः॑ । ज॒हि । नि । ए॒षु॒ ।
अ॒शनि॑म् । तपि॑ष्ठाम् । वृ॒श्च । ई॒म् । अ॒धस्ता॑त् । वि । रु॒ज॒ ।
सह॑स्व । ज॒हि । रक्षः॑ । म॒घ॒ऽव॒न् । र॒न्धय॑स्व ॥ १६ ॥

हेइन्द्र अवमैःसमीपेवर्तमानैरमित्रैः शत्रुभिरसुरैरुत्सृष्टोयोशनिर्घोषः घुष्यमाणः संशृण्वे सम्यगस्माभिःश्रूयते तपिष्ठामतिशयेनतापिकां तामशनिं एषुशत्रुष्वेव नि निधाय जहि मारय तैःप्रयुक्तामशनिंतानेवप्रापयेतिभावः ईमेनान्शत्रूनधस्तान्मूलतोवृश्चछिंधि किंच विरुज तान्विशेषेणबाधस्व सहस्व अभिभवच हेमघवन्निंद्र रक्षःकर्मविघ्नकारीणि

Funding by IKS-MoE

रक्षांसि जहि मारय अनंतरमिमंयज्ञंरंधयस्व पारंनय ॥ शृण्वे निघातः । जहि हनहिंसागत्योरस्यलोटिरूपम् । अशनिं अशूव्याप्तौ अश्यवितृभ्योनिरित्यनिप्रत्ययः प्रत्ययस्वरः । तपिष्ठां तप्तशब्दादिष्ठन्प्रत्ययः नित्स्वरः । वृश्च व्रश्चूछेदने तुदादिः ग्रहिज्यादिनासंप्रसारणं । सहस्व वाक्यभेदादनिघातः । रंधयस्व रधहिंसासंराध्योरित्यस्यण्यंतस्यलोटि रधिजभोरचीतिनुडागमः वाक्यभेदादनिघातः ॥ १६ ॥

अथसप्तदशी–

उद्वृ॑ह॒रक्षः॑स॒हमू॑लमिन्द्रवृ॒श्चामध्यं॒प्रत्यग्रं॑शृणीहि ।
आकीव॑तःसल॒लूकं॑चकर्थ॑ब्रह्म॒द्विषे॒तपु॑षिं॑हे॒तिम॑स्य ॥ १७ ॥

उत् । वृ॒ह॒ । रक्षः॑ । स॒हऽमू॑लम् । इ॒न्द्र॒ । वृ॒श्च॒ । मध्य॑म् ।
प्रति॑ । अग्र॑म् । शृ॒णी॒हि॒ । आ । कीव॑तः । स॒ल॒लूक॑म् । च॒क॒र्थ॒ ।
ब्र॒ह्म॒ऽद्विषे॑ । तपु॑षिम् । हे॒तिम् । अ॒स्य॒ ॥ १७ ॥

हेइन्द्र रक्षःकर्मविघ्नकारिरक्षःकुलं सहमूलं मूलसहितंयथाभवतितथा उद्वृह उद्धर किंच मध्यं तस्यमध्यभागंवृश्च छिंधि प्रत्यग्रं अग्रमग्रंप्रत्यागतंतत्शृणीहि जहि तस्यरक्षःकुलस्यमध्ये सललूकं सरणशीलंरक्षः आकीवतः आङ्मर्यादायां कियतोनिर्ज्ञायमानपरिमाणादतिदूराद्देशाच्चकर्थ कुरु कृत्वाच ब्रह्मद्विषेब्राह्मणद्वेषकारिणेतस्मैरक्षसे तपुषिं तापकंहेतिं घातकमायुधमस्य क्षिप उक्तमर्थंयास्कोब्रवीत्–उद्धररक्षःसहमूलमिंद्रमूलंमोचनाद्वामोषणाद्वामोहनाद्वावृश्चमध्यंप्रतिश्शृणीह्यग्रमग्रमागतंभवत्याकियतोदेशात्सललूकंसंलुब्धंभवतिपापकमितिनैरुक्ताः सररूकंवास्यात्सर्तेरभ्यस्तात्तपुषिस्तपतेर्हेतिर्हंतेरिति॥ वृह वृहू उद्यमनेइत्यस्यलोटिरूपम् । शृणीहि शृहिंसायां अस्यलोटि हौ ईहल्यघोरितीत्वं निघातः । कीवतः किंशब्दात्किंपरिमाणमस्येत्यर्थे किमिदंभ्यांवोघइतिकिंशब्दाद्वतुबस्तीतिज्ञापितत्वाद्वतुप् घादेशाभावश्छान्दसः इदंकिमोरीश्कीइतिकीइत्यादेशः । सललूकं सृगतौ छांदसीरूपसिद्धिः । चकर्थ डुकृञ्करणेइत्यस्यलिटि थलिरूपं क्रादित्वादिडभावः निघातः ॥ तपुषिं तपसंतापेइत्यस्मादर्तिपृवपियजितनिधनितपिभ्योनिदित्युसिप्रत्ययः निच्च अकारस्यइकारश्छांदसः नित्स्वरः । हेतिं हनहिंसागत्योः ऊतियूतिजूतिसातीत्यादिनानिपातनादंतोदात्तः । अस्य असुक्षेपणे लोटिरूपम् ॥ १७ ॥

अथाष्टादशी—

स्वस्तयेवाजिभिश्चप्रणेतःसंयन्महीरिषआसत्सिपूर्वीः ।
रायोवन्तारोबृहतःस्यामास्मेअस्तुभर्गइन्द्रप्रजावान् ॥ १८ ॥

स्वस्तये । वाजिऽभिः । च । प्रनेतरिति प्रऽनेतः । सम् ।
यत् । महीः । इषः । आऽसत्सि । पूर्वीः । रायः । वन्तारः ।
बृहतः । स्याम । अस्मे इति । अस्तु । भर्गः । इन्द्र । प्रजाऽवान् ॥१८॥

प्रणेतः प्रकर्षेणजगतोनिर्वाहक हेइन्द्र अस्मान्वाजिभिरश्वैःसहितान्कुरु स्वस्तयेचाविनाशायकुरु यद्यदात्वं समासत्सि अस्माकंसमीपेयज्ञनिर्वाहार्थमासीदसि तदावयंमहीर्महांतीरिषोन्नानि पूर्वीःप्रभूतानिरायोधनानि वंतारः तेषांसंभक्तारःसंतः बृहतोमहांतः स्याम भवेम किंच प्रजावान् अपत्योपेतंभर्गोधनं अस्मे अस्मास्वस्तु भवतु ॥ आसत्सि षद्लृविशरणादिषु बहुलंछन्दसीतिशपोलुक् यद्योगादनिघातः । इषोरायइतिचद्वेषष्ठ्यर्थेद्वितीये । वंतारः वनषणसंभक्तावित्यस्य तृचिआगमानुशासनस्यानित्यत्वादिडभावः चित्स्वरः । स्याम असूभुवीत्यस्यलिङिरूपं । अस्मे अस्मच्छब्दस्यसप्तम्याः सुपांसुलुगितिशेइत्यादेशः ॥ १८ ॥

अथैकोनविंशी—

आनोभरभर्गमिन्द्रद्युमन्तंनितेदेष्णस्यधीमहिप्ररेके ।
ऊर्वइवपप्रथेकामोअस्मेतमापृणवसुपतेवसूनाम् ॥ १९ ॥

आ । नः । भर । भर्गम् । इन्द्र । द्युऽमन्तम् । नि । ते । देष्णस्य ।
धीमहि । प्रऽरेके । ऊर्वःइव । पप्रथे । कामः । अस्मे इति ।
तम् । आ । पृण । वसुऽपते । वसूनाम् ॥१९॥

हेइंद्र नोऽस्मदर्थं द्युमंतं दीप्तियुक्तं भर्गं धनंआभर आसमंतात्संभर देष्णस्यदानशीलस्यतेतवसंबंधिनोधनस्यप्ररेके प्ररेचनेदानेनिधीमहि धनदानस्यवयंपात्रभूताआस्मइत्यर्थः कुतइत्यतआह—अस्मे अस्माकंकामोभिलाषःऊर्वइव अनवाप्तकामावडवानलइव पप्रथे प्रभूतोवर्तते वसूनां वसुपते धनानांमध्यमोत्तमधनानामधिपते हेइंद्र तंमहांतंकामं आपृण बहुधनप्रदा-

Funding by IKS-MoE

नेनापूरय ॥ भर भृञ्भरणेइत्यस्यलोटिरूपम् । देष्णस्य डुदाञ्दाने गादाभ्यामिष्णजितिइष्णच्प्रत्ययः अत्यर्थंददातीतिदेष्णः चित्स्वरः । धीमहि दधातेर्लिङिबहुलंछन्दसीतिशपोलुक् छन्दस्युभयथेतिमहिङःसार्वधातुकत्वात्सीयुटःसलोपः आर्धधातुकत्वादातोलोपः निघातः । ऊर्वइव पूर्वपदस्वरः । पप्रथे प्रथप्रख्यानेइत्यस्यलिटिरूपम् । पृण पृणप्रीणनेइत्यस्यलोटि सोर्हिः तुदादिः अतोहेरितिहेर्लुक् । वसूनां नित्त्वादाद्युदात्तः ॥ १९ ॥

अथविंशी–

इ॒मंकामं॑मन्दया॒गोभि॒रश्वै॑श्च॒न्द्रव॑ता॒राध॑साप॒प्रथ॑श्च ।
स्व॒र्य॑वो॑म॒तिभि॒स्तुभ्यं॒विप्रा॒इन्द्रा॑य॒वाहः॑कुशि॒कासो॑अक्रन् ॥२०॥

इ॒मम् । काम॑म् । म॒न्द॒य॒ । गोभिः॑ । अश्वैः॑ । च॒न्द्रऽव॑ता । राध॑सा । प॒प्रथः॑ । च॒ । स्व॒ःऽयवः॑ । म॒तिऽभिः॑ । तुभ्य॑म् । विप्राः॑ । इन्द्रा॑य । वाहः॑ । कु॒शि॒कासः॑ । अ॒क्र॒न् ॥ २० ॥

हेइन्द्र इमंधनादिविषयंकाममस्मदीयमभिलाषं गोभिःअग्निहोत्रादिकर्मसाधनभूतैर्गवादिभिर्वाहनसाधनभूतैरश्वैश्च चंद्रवतादीप्तियुक्तेनराधसाधनेनचमंदय एतानिदत्त्वा इममभिलाषंपूरय किंच एतैरस्मान्पप्रथः प्रथितांश्चकुरु पश्चात्स्वर्यवःस्वर्गादिसुखमात्मनइच्छन्तः विप्राःकर्मकुशलाः कुशिकासःकुशिकाः मतिभिर्मननीयैर्मंत्रैः वाहः स्तोत्रंइन्द्रायतुभ्यमक्रन्नकार्षुः ॥ मंदय मदिस्तुत्यादिष्वित्यस्यलोटिरूपम् । गोभिः सावेकाचइतिविभक्तेरुदात्तत्वेप्राप्ते नगोश्वन्त्साववर्णेत्यादिनाप्रतिषेधः प्रकृतिस्वरः । पप्रथः प्रथप्रख्याने क्विप् छन्दस्युभयथेतितस्यसार्वधातुकत्वाच्छप् तस्यबहुलंछन्दसीतिश्लुः धातुस्वरः । अक्रन् करोतेर्लुङि मंत्रेघसेत्यादिनाच्लेर्लुक् निघातः ॥ २० ॥

अथैकविंशी–

आनो॑गो॒त्राद॑र्दृहिगोपते॒गाःसम॒स्मभ्यं॑स॒नयो॑यन्तु॒वाजाः॑ ।
दि॒वक्षा॑असिवृषभस॒त्यशु॑ष्मो॒ऽस्मभ्यं॒सुम॑घवन्बोधिगो॒दाः ॥ २१॥

Funding by IKS-MoE

आ । न॒ः । गो॒त्रा । द॒र्दृ॒हि॒ । गो॒ऽप॒ते॒ । गाः । सम् । अ॒स्मभ्य॑म् ।
स॒नयः॑ । य॒न्तु॒ । वाजाः॑ । दि॒वक्षाः॑ । अ॒सि॒ । वृ॒ष॒भ॒ । स॒त्यऽशु॑ष्मः ।
अ॒स्मभ्य॑म् । सु । म॒घ॒ऽव॒न् । बो॒धि॒ । गो॒ऽदाः ॥ २१ ॥

गोपते गवांपते स्वर्गाधिपते हेइन्द्र नोऽस्मदर्थंगोत्रागोत्राण्यभ्राणि गाःअपःप्रति आदर्दृहि आद्रियस्व अभ्राणिविदार्यजलानिप्रापयेत्यर्थः ततः सनयःसंभजनीयानिवाजा अन्नानि अस्मभ्यमस्मदर्थंसंयंतु समागच्छन्तु वृषभ कामानांवर्षितः हेइंद्र त्वं दिवक्षाअसि दिवंव्याप्यवर्तमानत्वेनमहानसि अतएवसत्यशुष्मःसत्यसामर्थ्यः मघवन् धनवन् हेइंद्र अस्मभ्यंगोदाः गवांप्रदाताभवामीति सुबोधि सुष्ठुबुध्यस्व ॥ दर्दृहि दृङ्आदरे यङ्लुकि लोटिरूपं ऋतश्चेत्यभ्यासस्यरुगागमः निघातः । गाः औतोम्शसोरित्योकारस्याकारः एकादेशस्वरः । अस्मभ्यं भ्यसोभ्यमितिचतुर्थीबहुवचनस्यभ्यमादेशः । यन्तु इण्गतौ लोटिरूपं । दिवक्षाः अक्षूव्याप्तौ असुन् दिवंव्याप्नोतीतिदिवक्षाः कृदुत्तरपदस्वरः । गोदाः डुदाञ्दाने अस्माद्विच् कृदुत्तरपदप्रकृतिस्वरः ॥ २१ ॥

अथद्वाविंशी—

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ २२ ॥ ४ ॥

शु॒नम् । हु॒वे॒म॒ । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ ।
घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ २२ ॥ ४ ॥

हेइन्द्र वाजसातौ वाजस्यान्नस्यसातिर्लाभोयस्मिन्सोयंवाजसातिः तस्मिन्भरे बिभ्रति जयलक्ष्मीमनेनयोद्धारइतिभरःसंग्रामः तस्मिन्संग्रामेशुनंशूनमुत्साहेनप्रवृद्धं यद्वा शुनमितिसुखनाम सुखकरंमघवानंधनवन्तं अतएवइन्द्रं निरतिशयैश्वर्यसंपन्नं नृतमं सर्वस्यजगतोतिशयेन नेतारं त्वां हुवेम कुशिकावयंयज्ञार्थमाह्वयेम तथा शृण्वन्तं अस्माभिःक्रियमाणांस्तुतिंशृण्वंतं उग्रं शत्रूणांभयंकरं समत्सु संग्रामेषु वृत्राणिवृत्रोपलक्षितानिसर्वाणिरक्षांसिघ्नंतंहिंसन्तं धनानांशत्रुसंबंधिधनानांसंजितंसम्यग्जेतारंत्वामूतयेरक्षणायवयमाह्वयेम । शुनं टुओश्विगतिवृद्ध्योरि-

त्यस्यनिष्ठायांयस्यविभाषेतीट्प्रतिषेधः यजादित्वात्संप्रसारणं दीर्घाभावश्छांदसः प्रत्ययस्वरः । हुवेम ह्वयतेर्बहुलंछन्दसीतिसंप्रसारणेकृते शपोलुकिकृतेच लिङिरूपं निघातः । भरे भृञ्भरणे घः वृषादित्वादाद्युदात्तः । वाजसातौ षणुदाने भावेक्तिन् जनसनेत्यादिनानुनासिकस्यात्वं बहुव्रीहौपूर्वपदस्वरः । समत्सु अदभक्षणे संपूर्वात्क्विप् संभक्षयंतियोद्धृणामायूंषीतिसमदःसंग्रामाः कृदुत्तरपदस्वरः । घ्नंतं हनहिंसागत्योरित्यस्यशतरि गमहनेत्यादिनोपधालोपः होहन्तेरितिकुत्वम् । संजितं जिजये क्विप् तुक् ॥ २२ ॥

॥ इतितृतीयस्यद्वितीयेचतुर्थोवर्गः ॥ ४ ॥

शासद्वह्निरितिद्वाविंशत्यृचंद्वितीयंसूक्तं अत्रानुक्रमणिका—शासत्कुशिकोविश्वामित्रएववाश्रुतेरिति इषीरथस्यपुत्रःकुशिकोविश्वामित्रएववाऋषिः इंद्रोदेवता त्रिष्टुप्छन्दः चातुर्विंशिकेहनिमाध्यंदिनेसवनेच्छावाकशस्त्रे आरंभणीयायाऊर्ध्वमहीनसूक्तसंज्ञकमेतत्सूक्तंशंसनीयं सूत्रितंच—अस्माइदुप्रतवसेशासद्वह्निरितीतरावहीनसूक्तेइति पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिमाध्यंदिनेसवनेच्छावाकशस्त्रे अहीनसूक्तस्यस्थानेत्रीणिसंपातसूक्तानि तत्रेदंतृतीयं संपातसूक्तं सूत्रितंच—इमामूष्विच्छंतित्वाशात्सद्वह्निरितिसंपाताइति ।

तस्मिन्सूक्तेप्रथमा—

शा॒सद्वह्नि॑र्दुहि॒तुर्न॒प्त्यं॑गा॒द्वि॒द्वाँऋ॒तस्य॒दीधि॑तिंसप॒र्यन् ।
पि॒तायत्र॑दुहि॒तुःसेक॑मृ॒ञ्जन्त्संश॒ग्म्ये॑न॒मन॑सादध॒न्वे ॥ १ ॥

शास॑त् । वह्निः॑ । दु॒हि॒तुः । न॒प्त्य॑म् । गा॒त् । वि॒द्वान् । ऋ॒तस्य॑ ।
दीधि॑तिम् । स॒प॒र्यन् । पि॒ता । यत्र॑ । दु॒हि॒तुः । सेक॑म् ।
ऋ॒ञ्जन् । सम् । श॒ग्म्ये॑न । मन॑सा । द॒ध॒न्वे ॥ १ ॥

कुशिकःप्रसंगात्किंचिच्छास्त्रार्थंब्रूते—अपुत्रोयःपिताकन्यामन्यकुलंप्रापयतिसवह्निरित्युच्यते सपिता शासत् अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृताम् । अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदितिस्मृत्युक्तमनुशासनंकुर्वन् दुहितुःपुत्रिकायानप्त्यंनप्तृभवंपिण्डदानादिकंकर्तव्यतयागात् गच्छति किंकुर्वन् विद्वानस्यांदुहितरिजातःपुत्रोममस्वधाकरोभविष्यतीतिजानन् ऋतस्यसत्य-

स्यपुत्रोत्पादनसमर्थस्यरेतसः दीधितिंधर्तारंजामातरंतत्पतिंसपर्यन् वस्त्रालंकारादिनापूजयन् पितानप्तृभावंगच्छति यत्रयस्यादुहितुःपितापालकः पतिर्जामातासेकं तस्यांरेतःसेकंऋंजन् प्रसाधयन् यःशग्म्येनकेवलंसुखनिमित्तेनमनसातस्यांस्वशरीरंसंदधन्वेसंधत्ते नतुपुत्रनिमित्तेनमनसा एतमर्थंयास्कोप्याह—प्रशास्तिवोह्ळासंतानकर्मणेदुहितुःपुत्रभावंदुहितादुर्हितादूरेहितादोग्धेर्वानप्तारमुपागमद्दौहित्रंपौत्रमिति[1] । विद्वान्प्रजननयज्ञस्यरेतसोवांगादंगात्संभूतस्यहृदयादधिजातस्यमातरिप्रत्बृतस्यविधानंपूजयन्नित्यादिना ॥ शासत् शासेःशतरिअभ्यस्तत्वान्नुमभावः । दुहितुः दुहप्रपूरणे नप्तृनेष्टृइत्यादिनातृचिनिपातनादिडागमः चित्स्वरः । नप्त्यं नप्तरिभवं भवेछंदसीतियत् रीङ्ऋतइतिरीङादेशः यस्येतिलोपः रेफलोपश्छान्दसः तित्स्वरितः । गात् इण्गतावित्यस्यछान्दसेलुङिरूपम् । ऋञ्जन् ऋंजतिःप्रसाधनकर्मा । शग्म्येन शंसुखंगच्छतीतिगमेरौणादिकः कप्रत्ययः कित्त्वाद्गमहनेत्यादिनोपधालोपः । शग्मेसाधुरिति तत्रसाधुरितियत्प्रत्ययः वीरवीर्यौचेत्यत्रयतोनावइत्यस्यानित्यत्वस्यज्ञापितत्वादत्रतित्स्वरः । दधन्वे धविइतिसौत्रोधातुः लिटि रूपं प्रत्ययस्वरः यद्योगादनिघातः ॥ १ ॥

अथद्वितीया—

नजा॒मये॒तान्वो॑रि॒क्थमा॑रैक्च॒कार॒गर्भं॑सनि॒तुर्नि॒धान॑म् ।
यदीं॑मा॒तरो॑ज॒नय॑न्त॒वह्नि॑म॒न्यःक॒र्तासु॒कृतो॑र॒न्यऋ॒न्धन् ॥ २ ॥

न । जा॒मये॑ । तान्वः॑ । रि॒क्थम् । अ॒रै॒क् । च॒कार॑ । गर्भ॑म् ।
स॒नि॒तुः । नि॒ऽधान॑म् । यदि॑ । मा॒तरः॑ । ज॒नय॑न्ता । वह्नि॑म् ।
अ॒न्यः । क॒र्ता । सु॒ऽकृतोः॑ । अ॒न्यः । ऋ॒न्धन् ॥ २ ॥

अभ्रातृकायाद्दुहितुःपुत्रिकाकरणात्सारिक्थभागित्युक्तं भ्रातृमत्यास्तस्यारिक्थभाक्त्वं नास्तीतिब्रूते तान्वः तनूजःऔरसःपुत्रोजामयेभगिन्यैरिक्थंपित्र्यंधनंनारैक् नप्ररेचयति नप्रददाति किंतर्हिसनितुरेनांसंभजमानस्यभर्तुःगर्भं षष्ठ्यर्थेद्वितीया गर्भस्यनिधानंरेतःसेकनिधानीमेनांचकार पाणिग्रहणेनसंस्कृतामेनांकरोति नतुतस्यैरिक्थंददातीत्यभिप्रायः असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैः । भगिन्यश्चनिजादंशाद्दत्त्वांशंतुतुरीयकमितियाज्ञवल्क्यस्मरणात् । स्त्रीपुंसलक्षणस्यापत्यस्यैकोत्पाद्यत्वाविशेषात्पुमपत्यस्यकोविशेषइत्याशंक्यविशेषंदर्श-

---

[1] नि० ३. ४. ।

Funding by IKS-MoE

यति—यदि यद्यपिमातरौमातापितरौवह्निं अवह्निःस्त्री वह्निःपुमान्स्वभार्यायावोढृत्वात् अवह्निश्चवह्निः तादृशंस्त्रीपुंसलक्षणमपत्यंजनयन्तजनयत तथापितयोर्मध्येअन्यःपुंल्लक्षणःसुक्रतोःशोभनस्यपिण्डदानादेःकर्मणःकर्ताभवति अन्यःस्त्रीलक्षणःऋंधन् वस्त्रालंकारादिनाऋध्यमानएवभवति पिण्डदानादिकर्तृत्वात्पुत्रोदायार्हः दुहितातथानेतिनदायार्हा सातुकेवलंपरस्मैदीयते तथाच निरुक्तम्—नजामयेभगिन्यैजामिरन्येस्यांजनयन्तिजामपत्यंजमतेर्वास्याद्गतिकर्मणोनिर्गमनप्राया भवतितान्वआत्मजःपुत्रोरिक्थंप्रारिचत्प्रादाच्चकारैनांगर्भनिधानींसनितुर्हस्तग्राहस्ययदिहमातरोजनयन्तवह्निंपुत्रमवह्निंचस्त्रियमन्यतरःसंतानकर्ताभवतिपुमान्दायादोन्यतरोर्धयित्वाजामिःप्रदीयतेपरस्मा[2]इति ॥ तान्वः तन्वाःप्राणाधिष्ठितत्वात्तनूःप्राणवती तद्विकारइत्यर्थे प्राणिरजतादिभ्योञित्यत्र संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावः । रिक्थं रिचिर्विरेचने पातृतुदिवचिरिचिभ्यस्थक् प्रत्ययस्वरः । अरैक् रिचिर्विरेचने इत्यस्यलुङिसिचि वदव्रजेत्यादिनावृद्धिः बहुलंछन्दसीतीडभावः हल्ङ्याब्भ्यादिसंयोगान्तलोपौ निघातः । सनितुः षणसंभक्ताविस्यस्यतृचिरूपम् । निधानं दधातेर्ल्युटिरूपं लित्स्वरः । मातरः पितामात्रेतिपितुःशेषेप्राप्तेमातुःशेषश्छान्दसः द्विर्वचनस्यबहुवचनंपूजार्थम् । जनयन्त जनेर्णिचिरूपं । वह्निं पुमान्स्त्रियेतिवह्नेःशेषः । सुक्रतोः करोतेरौणादिकःक्रुप्रत्ययः । ऋंधन् ऋधुवृद्धौ व्यत्ययेनश्नम् ॥ २ ॥

अथतृतीया—

अ॒ग्निर्ज॑ज्ञेजु॒ह्वा॒३॒रेज॑मानोम॒हस्पु॒त्राँअ॑रु॒षस्य॑प्र॒यक्षे॑ ।
म॒हान्गर्भो॒मह्याजा॒तमे॑षांम॒हीप्र॒वृद्धर्य॑श्वस्यय॒ज्ञैः ॥ ३ ॥

अ॒ग्निः । ज॒ज्ञे॒ । जु॒ह्वा॑ । रेज॑मानः । म॒हः । पु॒त्रान् । अ॒रु॒षस्य॑ ।
प्र॒ऽयक्षे॑ । म॒हान् । गर्भः॑ । महि॑ । आ । जा॒तम् । ए॒षा॒म् ।
म॒ही । प्र॒ऽवृत् । हरि॑ऽअश्वस्य । य॒ज्ञैः ॥ ३ ॥

हेइंद्र अरुषस्य रोचमानस्यतवप्रयक्षेयज्ञार्थंजुह्वा ज्वालाभीरेजमानःकंपमानोग्निः महःप्रभूतान्पुत्रान्रश्मीन्जज्ञे उत्पादयामास एषांरश्मीनांगर्भोजलात्मनाक्रोडीकारः महानासीत् किंच एषां रश्मीनांमेलनं आजातं सर्वतओषध्यात्मनाजातं महि महदभूत् किंच एषांरश्मीनांप्रवृत् अनेनप्रकारेणप्रवृत्तिः हर्यश्वस्येंद्रस्ययज्ञैर्यजनार्हैःसोमाज्याहुतिभिर्महीमहतीभवति ॥

---

२ नि० ३. ६.।

Funding by IKS-MoE

जज्ञे जनीप्रादुर्भावेइत्यस्यलिटिरूपं अंतर्भावितण्यर्थः । जुह्वा जुहोतेर्द्वेदीर्घश्चेतिक्विप् द्विर्वचनं दीर्घश्चधातोः उदात्तस्वरितयोरितिस्वरितत्वं । हर्यश्वस्य हरीअश्वौयस्येतिबहुव्रीहौपूर्वपदस्वरः ॥ ३ ॥

अथचतुर्थी—

अभिजैत्रीरसचन्तस्पृधानंमहिज्योतिस्तमसोनिरजानन् ।
तंजानतीःप्रत्युदायन्नुषासःपतिर्गवामभवदेकइन्द्रः ॥ ४ ॥

अभि । जैत्रीः । असचन्त । स्पृधानम् । महि । ज्योतिः ।
तमसः । निः । अजानन् । तम् । जानतीः । प्रति । उत् ।
आयन् । उषसः । पतिः । गवाम् । अभवत् । एकः । इन्द्रः ॥ ४ ॥

जैत्रीःजित्वर्योविशोमरुतःस्पृधानंवृत्रेणसहस्पर्धमानमिन्द्रं अभ्यसचंत सर्वतःसमगच्छन् तेचमरुतः तस्मिन्वृत्रेहते महि महत्ज्योतिःसूर्याख्यंतेजः तमसस्तमोरूपाद्वृत्रान्निरजानन् निर्गतमज्ञासिषुः ततः इंद्रंवृत्रहंतारमुदितंसूर्यंजानतीर्जानानाउषसः तंप्रत्युत अभिलक्ष्यैवआयन् प्राप्नुवन् अथ तत्रोद्भूतानांगवांरश्मीनामेकोऽद्वितीयएवेन्द्रः पतिरभवत् ॥ जैत्रीः जयतेस्तृनिरूपं गुणस्यस्थानेव्यत्ययेनवृद्धिः नित्स्वरः । असचन्त षचसमवायेइत्यस्यलङि रूपं । स्पृधानं स्पर्धसंघर्षे छन्दसिकानजादेशः छंदसिद्विर्वचनस्यविकल्पितत्वाद्द्विर्वचनाभावः चित्स्वरः । अजानन् ज्ञाअवबोधनेइत्यस्यलङिरूपं निघातः आयन् । अयगतावित्यस्यलङि रूपम् ॥ ४ ॥

अथपञ्चमी—

वीळौसतीरभिधीरामतृन्दन्प्राचाहिन्वन्मनसासप्तविप्राः ।
विश्वामविन्दन्पथ्यामृतस्यप्रजानन्नित्तानमसाविवेश ॥ ५॥५ ॥

Funding by IKS-MoE

वी॒ळौ । स॒तीः । अ॒भि । धीरा॑ः । अ॒तृ॒न्द॒न् । प्रा॒चा । अ॒हि॒न्व॒न् ।
मन॑सा । स॒प्त । विप्रा॑ः । विश्वा॑म् । अ॒वि॒न्द॒न् । प॒थ्या॑म् । ऋ॒तस्य॑ ।
प्र॒ऽजा॒नन् । इत् । ता । नम॑सा । आ । वि॒वे॒श॒ ॥ ५ ॥ ५ ॥

पुराकिलांगिरसांगावःपणिनामकैरसुरैरपहृत्य निगूढेकस्मिंश्चित्पर्वतेस्थापितास्तेचांगिरसस्तत्प्राप्त्यर्थमिन्द्रंतुष्टुवुः स्तुतश्चसइन्द्रोगवान्वेषणायदेवशुनींप्राहिणोत् साचगवांगवेषणपरासती तत्स्थानमलभत तयाविज्ञापितइन्द्रस्तागाआनीयांगिरोभ्यःप्रादादित्यैतिहासिकीकथा तथाचास्याऋचोयमर्थः—धीराःधीमंतःसप्तविप्रामेधाविनःसप्तसंख्याकाअंगिरसः वीळौदृढेपर्वतेसतीः निगूढाःसतीर्गाअभि अभिलक्ष्यअतृन्दन् निधानमपावृण्वन् उपेक्षामकुर्वन् ततस्तेंगिरसःपर्वतबिलेगावःसंतीतिमनसानिश्चित्यप्राचा येनमार्गेणप्रविष्टास्तेनैवप्राचीनेनमार्गेणतागाअहिन्वन् निरगमयन् यद्वा प्राचाप्रकर्षेणेन्द्रमंचतिप्राप्नोतीतिप्राक् तेनेंद्रविषयेणमनसा मन्यतइतिमनः स्तोत्रं तेनस्तोत्रेणाहिन्वन् अवर्धयन् इंद्रंतुष्टमकुर्वन् स्तुत्वाचऋतस्यपथ्यांयज्ञस्यमार्गेसाधुभूतां विश्वांसर्वामपहृतांगामविन्दन्नलभंत ततःसइंद्रः ता तान्यंगिरसांकर्माणिप्रजानन्नित्प्रकर्षेणजानन्नेव नमसानमस्कारेणांगिरसःसंभावयन्तैरधिष्ठितंपर्वतमाविवेश ॥ अतृन्दन् उतृदिर्हिंसानादरयोरित्यस्यलङि रुधादित्वात्श्नम् तस्यश्नसोरित्यल्लोपः निघातः । प्राचा अंचेश्छदस्यसर्वनामस्थानमितिविभक्तेरुदात्तत्वं । अहिन्वन् । हिगतिवर्धनयोरित्यस्यलङिरूपं । अविंदन् विद्लृलाभेइत्यस्यलङिमुचादित्वान्नुम् निघातः । पथ्यां पथिसाधुरित्यर्थे तत्रसाधुरितियत्प्रत्ययः यचिभमितिभसंज्ञायांनस्तद्धितेइतिटिलोपः यतोनावइत्यस्यानित्यत्वात्तित्स्वरितइतिस्वरितः । विवेश विशप्रवेशनेइत्यस्यलिटिरूपम् ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेपञ्चमोवर्गः ॥ ५ ॥

अथषष्ठी—

वि॒दद्यदी॑स॒रमा॑रु॒ग्णमद्रे॒र्महि॒पाथः॑पू॒र्व्यं॑स॒ध्र्य॑क्कः ।
अ॒ग्रं॑नयत्सु॒पद्यक्ष॑राणा॒मच्छा॒रवं॑प्रथ॒माजा॑न॒तीगा॑त् ॥ ६ ॥

वि॒दत् । यदि॑ । स॒रमा॑ । रु॒ग्णम् । अद्रेः॑ । महि॑ । पाथः॑ ।
पू॒र्व्य॑म् । स॒ध्र्य॑क् । क॒रिति॑ कः । अग्र॑म् । न॒य॒त् । सु॒ऽपदी॑ ।
अक्ष॑राणाम् । अच्छ॑ । रव॑म् । प्र॒थ॒मा । जा॒न॒ती । गा॒त् ॥ ६ ॥

Funding by IKS-MoE

यदि यदासरमाइंद्रेणगवान्वेषणार्थंप्रेषिता सरमानामदेवशुनी अद्रेःपर्वतस्यरुग्णंभग्नं द्वारंविदत् अलभत तदानीमिंद्रोमहि महत्पूर्व्यंपूर्वंप्रेषणकालेअन्नादिनींतेप्रजांकरिष्यामीति प्रतिज्ञातं सध्र्यक् इतरैरपिभोज्यैःसध्रीचीनंपाथोगव्यादिलक्षणंअन्नं कःअकार्षीत् तस्यैदत्तवान् ततःसुपदी शोभनपादयुक्ता सा सरमा अक्षराणांक्षयरहितानांगवामग्रंप्रांतंनयत् प्राप्नोत् कुतइत्यतआह—यतःरवंतेषांहंभारवंप्रथमाप्रथमंजानतीसती अच्छ शब्दाभिमुख्येनगात् जगाम ॥ विदत् विदॢलाभेइत्यस्यलुङि ऌदित्त्वात्च्लेरङादेशः तस्यस्वरः । सरमा सृगतौ औणादिकोमप्रत्ययः सरतीतिसरमा सरमासरणादितियास्कः । प्रत्ययस्वरः । रुग्णं रुजोभंगेइत्यस्यनिष्ठायामोदितश्चेतिनत्वं प्रत्ययस्वरः । पाथः पारक्षणे अन्नेचेत्यसुन्प्रत्ययः थुडागमः पातीतिपाथोन्नं नित्स्वरः । सध्र्यक् अंचुगतिपूजनयोः ऋत्विगित्यादिनाक्विन् सहअंचतीतिसहस्यसध्रिरितिसध्र्यादेशः क्विन्प्रत्ययस्यकुत्वं अद्रिसध्र्योरन्तोदात्तत्वनिपातनंकृत्स्वरनिवृत्त्यर्थमितिसध्रिइत्यादेशोंतोदात्तः यणादेशेकृते उदात्तस्वरितयोर्यणःस्वरितइति यणःस्वरितत्वं । कः करोतेर्लुङिसिपि च्लेः मंत्रेघसह्वरेत्यादिनालुक् गुणेकृते हल्ङ्यादिनासिलोपः विसर्जनीयः निघातः । नयत् नयतेर्लङिरूपं । सुपदी पादोऽन्यतरस्यामितिङीप् । गात् इणोलुङिरूपं ॥ ६ ॥

अथसप्तमी—

अगच्छदुविप्रतमःसखीयन्नसूदयत्सुकृतेगर्भमद्रिः ।
ससानमर्योयुवभिर्मखस्यन्नथाभवदङ्गिराःसद्योअर्चन् ॥ ७ ॥

अगच्छत् । ऊँ इति । विप्रऽतमः । सखिऽयन् । असूदयत् ।
सुऽकृते । गर्भम् । अद्रिः । ससान । मर्यः । युवऽभिः । मखस्यन् ।
अथ । अभवत् । अङ्गिराः । सद्यः । अर्चन् ॥ ७ ॥

विप्रतमः अतिशयेनमेधावी सखीयन् अंगिरोभिःसाकमात्मनःसखित्वमिच्छन् इंद्रोगच्छद् गोभिरधिष्ठितंपर्वतमगमदेव सोद्रिः सखित्वमिच्छन्सुकृतेसुष्ठुयुद्धकर्त्रेइन्द्राय गर्भं गवात्मकंगर्भमसूदयत् निरगमयत् युवभिर्नित्यतरुणैर्मरुद्भिःसह मखस्यन् गोधनमंगिरसामिच्छन् मर्यः असुराणांमारयिताइन्द्रः ससान असुरैरपहृताः तागाभेजे अथानंतरमंगिराःसप्ता-

Funding by IKS-MoE

नामंगिरसांमध्येवरिष्ठोंगिराऋषिःइंद्रात्तागालब्ध्वा सद्यस्तदानीमेव अर्चन् इंद्रंपूजयन्नभवत् ॥ अगच्छत् गमेर्लङिरूपं । सखीयन् सुपआत्मनःक्यच् । असूदयत् षूदनिरासेइत्यस्यण्यंतस्यलङिरूपं । ससान षणसंभक्तावित्यस्यलिटिणलिरूपं लित्स्वरः । मखस्यन् छंदसिपरेच्छायामपिक्यच् सर्वप्रातिपदिकेभ्योलालसायांसुग्वक्तव्यइतिसुगागमः एकादेशस्वरः । अंगिराः सृगतौ अंगारशब्देउपपदे सर्तेर्धातोरसुन्प्रत्ययः उपपदेगकारात्परस्याकारस्येत्वं अंत्यलोपश्च धातोर्लोपश्च अंगिराइतिसूत्रेणनिपात्यते भूतकालेअंगारेभ्यःसृतइतिअंगिराऋषिः अंगारेष्वंगिराइतियास्कः[1] । नित्स्वरः ॥ ७ ॥

अथाष्टमी–

सतःसंतःप्रतिमानँपुरोभूर्विश्वावेदजनिमाहन्तिशुष्णंम् ।
प्रणोदिवःपदवीर्गव्युरर्चन्त्सखासखीँरमुञ्चन्निरवद्यात् ॥ ८ ॥

सतःऽसंतः । प्रतिऽमानंम् । पुरःऽभूः । विश्वा । वेद । जनिम ।
हन्ति । शुष्णंम् । प्र । नः । दिवः । पदऽवीः । गव्युः । अर्चन् । सखा ।
सखीन् । अमुञ्चत् । निः । अवद्यात् ॥ ८ ॥

योयमिंद्रः सतःसतःउत्तमस्यवसुनःप्रतिमानं प्रतिमीयतउपमीयतेऽनेनसर्वमितिप्रतिमानंप्रतिनिधिः यद्वा सतःसतोजातस्यसर्वस्यप्रतिमानंस्वस्यमहत्त्वेनप्रतिमाइतिइयत्तयासर्वंपरिच्छिनत्तीत्यर्थः पुरोभूः युद्धेपुरतःशत्रूनवाप्नोतीतिपुरोभूश्च विश्वाजनिमसर्वाणिजातानिवेदजानाति शुष्णं शुष्णनामानमसुरंहंति पदवीःकवितमः गव्युःगोधनमंगिरसामिच्छन् अस्माकंसखाइंद्रःसखीन्नोऽस्मान्दिवःद्युलोकादागत्यप्रार्चन् प्रकर्षेणपूजयन् अवद्यात् वृत्रबाधरूपाद्दोषान्निरमुंचत् नितरांमुंचतु ॥ प्रतिमानं मातीतिमानं औणादिकोनन्प्रत्ययः यद्वा करणेल्युट् । पुरोभूः भूप्राप्तौ क्विप् । वेद वेत्तेर्लटिरूपं । जनिम जनीप्रादुर्भावे जनिहृभ्यामिमनिन्नितिइमनिन्प्रत्ययः भूतकालेजातानीतिजनिम सुपांसुलुगितिसुपोलुक् नित्स्वरः । हन्ति हंतेर्लटिरूपं वाक्यभेदादनिघातः । शुष्णं शोषयतीतिशुष्णः । प्रणः उपसर्गाद्बहुलमितिसंहितायांणत्वं । पदवीः वीकान्त्यादिषु क्विप् पदानिवेत्तिपरस्परसंगतानिकरोतीतिपदवीः कविः । गव्युः गोशब्दात्परेच्छायांछंदसिक्यच् वांतोयिप्रत्ययेइतिवांतादेशः क्याच्छंदसीत्युप्रत्ययः प्रत्ययस्वरः ।

---

[1] नि० ३. १७.।

अर्चन् अर्चतेःशतरिरूपं । सखीन् संहितायांनकारस्यदीर्घादटीतिरुः पूर्वस्यवर्णस्यअत्रानुनासिकेत्यनुनासिकादेशः । अमुंचत् मुचॢमोक्षणेइत्यस्यलङि शेमुचादीनामितिनुमागमः निघातः । अवद्यात् वदव्यक्तायांवाचीत्यस्यनञ्पूर्वस्यगर्ह्यार्थे अवद्यपण्यवर्याइतिनिपातनाद्यत्प्रत्ययः॥८॥

अथनवमी—

नि॒ग॑व्य॒तामन॑सासेदु॒र॒र्कैःकृ॑ण्वा॒नासो॑अमृत॒त्वाय॑गा॒तुम् ।
इ॒दं॑चि॒न्नुसद॑नं॒भूर्ये॑षां॒येन॒मासाँ॒असि॑षासन्नृ॒तेन॑ ॥ ९ ॥

नि । ग॒व्य॒ता । मन॑सा । से॒दुः॒ । अ॒र्कैः । कृ॒ण्वा॒नासः॑ । अ॒मृ॒त॒ऽत्वाय॑ ।
गा॒तुम् । इ॒दम् । चि॒त् । नु । सद॑नम् । भूरि॑ । ए॒षा॒म् । येन॑ ।
मासा॑न् । असि॑सासन् । ऋ॒तेन॑ ॥ ९ ॥

गव्यता गाइच्छतामनसायुक्ताः अर्कैरर्चनीयैःस्तोत्रैः अमृतत्वाय देवत्वप्राप्त्यर्थंगातुं गच्छन्त्यनेनेतिगातुर्मार्गः अमृतत्वप्राप्त्युपायभूतंमार्गंकृण्वानासः कुर्वाणास्तेंगिरसःनिषेदुः सत्राख्येकर्मण्यासीदन् एषामंगिरसांइदंचित्सदनं इदमेवसत्राख्येकर्मण्यासदनंभूरिनुप्रभूतंअमृतत्वप्राप्त्यर्थंमहानुपायःखलु कुतइत्यतआह—ऋतेनसत्यभूतेनयेनसत्रकर्मणातेंगिरसोमासानभिप्लवपृष्ठ्यषळहैः कल्पितान्मासान् असिसासन् संभक्तुमैच्छन् ॥ गव्यता गोशब्दात्क्यचिरूपं वांतोयिप्रत्ययेइतिवांतादेशः एकादेशस्वरः । सेदुः सदेर्लिटि अतएकहल्मध्येनादेशादेर्लिटीत्येत्वाभ्यासलोपौ निघातः । कृण्वानासः कृविहिंसाकरणयोरित्यस्यताच्छीलिकश्चानश् धिन्विकृण्व्योरचेत्युप्रत्ययः चित्स्वरः । गातुं गाङ्गतौ कमिनमिजनिगाभापायाहिभ्यइतिकरणेतुप्रत्ययः प्रत्ययस्वरः । असिषासन् षणसंभक्तावित्यस्य सनि जनसनखनांसञ्झलोरित्यात्वं अभ्यासस्य सन्यतइतीत्वं सनोतेरनइतिसंहितायांषत्वं तदंताल्लङिरूपं यद्वृत्तयोगादनिघातः ॥ ९ ॥

अथदशमी—

सं॒पश्य॑मानाअमदन्न॒भिस्वं॑पयः॑प्र॒त्नस्य॒रेत॑सो॒दुघा॑नाः ।
विरोद॑सीअतप॒द्घोष॑एषांजा॒तेनि॒ष्ठामद॑धु॒र्गोषु॑वी॒रान् ॥ १० ॥ ६ ॥

Funding by IKS-MoE

सम्ऽपश्यमानाः । अमदन् । अभि । स्वम् । पयः । प्रत्नस्य ।
रेतसः । दुघानाः । वि । रोदसी इति । अतपत् । घोषः । एषाम् ।
जाते । निःऽस्थाम् । अदधुः । गोषु । वीरान् ॥ १० ॥ ६ ॥

स्वंस्वकीयंगोधनं अभि अभिलक्ष्य संपश्यमानाः मदीयाएतागावइत्यात्मीयतयाजानानास्तेंगिरसः प्रत्नस्य पुराजातस्यरेतसस्तदुपलक्षितस्यपुत्रस्यधारणार्थंपयोदुघानास्तागाः पयोदुहंतःसंतः अमदन् अहृष्यन् एषामंगिरसांघोषः हर्षादुत्पन्नोमहाध्वनिःस्तुतिजातोवारोदसीद्यावापृथिव्यौव्यतपत् तेव्याप्यातपिष्ट ततस्तेंगिरसः जातेआत्मीयतयासंपन्नेचराचरात्मकेवस्तुनिनिष्ठामदधुः यथापूर्वंस्थितिमकार्षुः तथा गोषुआहृतासुवीरान्रक्षाकर्मण्यतिशूरान्पुरुषानदधुः स्थापयामासुः ॥ संपश्यमानाः संपूर्वस्यदृशेः दृशेश्चेतिवक्तव्यमित्यात्मनेपदं शानचोलसार्वधातुकस्वरेणानुदात्तत्वेकृतेधातुस्वरः । अमदन् मदीहर्षेइत्यस्यलुङि णिच्यङिरूपं निघातः । दुघानाः दुहप्रपूरणेइत्यस्मात्शानच् अदादित्वाच्छपोलुक् घत्वंछान्दसं वृषादित्वादाद्युदात्तः । अतपत् विपूर्वस्यतपतेरत्रसकर्मकत्वादात्मनेपदाभावः लङिरूपं । घोषः घुषसंशब्दने घञंतः ञित्स्वरः । निष्ठां ष्ठागतिनिवृत्तौ स्थःकचेतिक्विप् कृदुत्तरपदस्वरः । अदधुः दधातेर्लङि झेः सिजभ्यस्तेतिजुसादेशः वाक्यभेदान्निघाताभावः । गोषु सावेकाचइतिविभक्तेरुदात्तत्वेप्राप्ते नगोश्वन्निितिप्रतिषिद्धत्वात्प्रातिपदिकस्वरः ॥ १० ॥

॥ इतितृतीयस्यद्वितीयेषष्ठोवर्गः ॥ ६ ॥

अथैकादशी—

सजातेभिर्वृत्रहासेदुहव्यैरुदुस्रियाअसृजदिन्द्रोअर्कैः ।
उरूच्यस्मैघृतवद्भरन्तीमधुस्वाद्मदुदुहेजेन्यागौः ॥ ११ ॥

सः । जातेभिः । वृत्रऽहा । सः । इत् । ऊम् इति । हव्यैः । उत् ।
उस्रियाः । असृजत् । इन्द्रः । अर्कैः । उरूची । अस्मै । घृतऽवत् ।
भरन्ती । मधु । स्वाद्म । दुदुहे । जेन्या । गौः ॥ ११ ॥

सइन्द्रः जातेभिःसहायतयासंपन्नैर्मरुद्भिःसहितःसन् वृत्रहा वृत्रस्यासुरस्यहंताभवति सेदु सएवेंद्रः अर्कैरर्चनीयैः अतएव हव्यैर्होतव्यैर्मरुद्भिःसहितःसन् उस्रियाःऊर्ध्वंवसत्यासु-

क्षीरादिरूपंहविरित्युस्रियागावः यद्वा ऊर्ध्वंक्षीरदधिनवनीतादिक्रमेणासुवसतीति उस्रियेति गोनाम उत्स्राविणोस्यांभोगाइतियास्कः[1]। तागाउदसृजत् यज्ञार्थंसम्यक्ससर्ज यस्मादेवंतस्मात् घृतवद्घृतोपेतंक्षीरादिकंहविः भरंती बिभ्राणा अतएव उरूची उरुप्रभूतमग्निहोत्रादिकमंचति हविः प्रदातुंप्राप्नोतीत्युरूची जेन्या जेतव्या प्रशस्तागौरस्मैयजमानायस्वाद्म स्वादुतरं मधुमधुरंक्षीरादिदुदुहे दुह्यतेस्म ॥ उस्रियाः वसनिवासेइत्यस्मात्स्फायितंचीत्यादिनारक्प्रत्ययः उस्रशब्दात्स्वार्थेपृषोदरादित्वाद्घप्रत्ययः प्रत्ययस्वरः यद्वा सृगतौ उत्पूर्वस्यसरतेःकप्रत्ययः पूर्वपदस्यांत्यलोपश्छान्दसः अत्रापिस्वार्थिकोघप्रत्ययः । असृजत् सृजविसर्गे इत्यस्यलङिरूपं । उरूची उरुअंचतीतिक्विन् अंचतेश्चोपसंख्यानमितिङीप् उदात्तनिवृत्तिस्वरेणान्तोदात्तः । दुदुहे दुहप्रपूरणेइत्यस्यलिटिरूपं । जेन्या जयतेःकृत्यार्थेकेन्यप्रत्ययः इकारलोपश्छान्दसः प्रत्ययस्वरः ॥ ११ ॥

अथद्वादशी—

पि॒त्रेचि॑च्च॒क्रुःसद॑नं॒सम॑स्मै॒महि॒त्विषी॑मत्सु॒कृतो॒विहिख्यन् ।
वि॒ष्क॒भ्नन्त॒ःस्कम्भ॑नेना॒जनि॑त्री॒आसी॑नाऊ॒र्ध्वंर॑भ॒संविमि॑न्वन् ॥१२॥

पि॒त्रे । चि॒त् । च॒क्रुः । सद॑नम् । सम् । अ॒स्मै॒ । महि॑ । त्विषि॑ऽमत् ।
सु॒ऽकृत॑ः । वि । हि । ख्यन् । वि॒ऽस्क॒भ्नन्त॑ः । स्कम्भ॑नेन ।
जनि॑त्री॒ इति॑ । आसी॑नाः । ऊ॒र्ध्वम् । र॒भ॒सम् । वि । मि॒न्व॒न् ॥ १२ ॥

सत्रमनुतिष्ठन्तोंगिरसः पित्रेचित्पालकायास्माइंद्रायमहिमहत्त्विषीमद्दीप्तिमत्सदनमुत्तमंस्थानंसंचक्रुः कथमितितदुच्यते—यतःसुकृतःसमुपार्जितकर्माणस्तेंगिरसःतादृशंइंद्रस्योचितंस्थानं विख्यन्हि विशेषेणादर्शयन्खलु कुतइत्यतआह—आसीनाः सत्रमुपतिष्ठन्तः तेंगिरसःजनित्रीसर्वस्यजगतोजनयित्र्यौद्यावापृथिव्यौस्कंभनेनस्तंभनसाधनेनांतरिक्षेणविष्कभ्नंतः यथातेरोदस्यावधोनपततः तथाविष्टब्धेकुर्वंतःसंतः रभसंवेगवंतंतमिंद्रंऊर्ध्वंद्युलोकेविमिन्वन् हविःस्वीकरणार्थंविशेषेणास्थापयन् ॥ चक्रुः करोतेर्लिटच्युसिरूपं निघातः । ख्यन् ख्याप्रकथने अस्यलुङिच्लेरस्यतिवक्तिख्यातिभ्योङित्यङादेशः आतोलोपइटीत्याकारलोपः हियोगादनिघातः । विष्कभ्नंतः स्कंभुरोधने सौत्रोधातुः तस्माच्छतरिरूपं वेःस्कभ्नातेर्नित्य-

---

[1] नि० ४. १९।

मितिषत्वं शतृप्रत्ययस्वरः । जनित्री ऋन्नेभ्योङीप् जनितामंत्रेइतिनिपातनाण्णिलोपः वाछंदसीतिसवर्णदीर्घः । आसीनाः आसउपवेशनेइत्यस्माच्छानच् ईदासइतीकारः शानचोलसार्वधातुकस्वरेकृतेधातुस्वरः । मिन्वन् डुमिञ्प्रक्षेपणेइत्यस्यलङिरूपं निघातः ॥ १२॥

अथत्रयोदशी–

म॒हीयदि॑धि॒षणा॑शि॒श्नथे॒धात्स॑द्यो॒वृधं॑वि॒भ्वं१॒रोद॑स्योः ।
गिरो॒यस्मि॑न्ननव॒द्याःस॑मी॒चीर्विश्वा॒इन्द्रा॑य॒तवि॑षी॒रनु॑त्ताः ॥ १३ ॥

म॒ही । यदि॑ । धि॒षणा॑ । शि॒श्नथे॑ । धात् । स॒द्य॒ःऽवृध॑म् । वि॒ऽभ्व॑म् ।
रोद॑स्योः । गिरः॑ । यस्मि॑न् । अ॒न॒व॒द्याः । स॒म्ऽई॒चीः । विश्वाः॑ ।
इन्द्रा॑य । तवि॑षीः । अनु॑त्ताः ॥ १३ ॥

महीमहतीधिषणाअस्माभिःक्रियमाणेंद्रविषयास्तुतिः रोदस्योःशिश्नथे द्यावापृथिव्योरन्योन्यविश्लेषाय सद्योवृधंतदानीमेववर्धमानंविभ्वं विभुं तयोर्धारणसमर्थंसाधनंयदिधात् अकरोत् ततस्तत्रवर्तमानेयस्मिन्निंद्रे अनवद्याः दोषरहितागिरः स्तुतिलक्षणावाचः समीचीः संगताभवंति इंद्रायेतिविभक्तिव्यत्ययः तादृशस्येंद्रस्यविश्वास्तविषीःसर्वाणिबलानि अनुत्ताः अपरप्रेषितानिस्वभावसिद्धान्येव ॥ धिषणा ञिधृषाप्रागल्भ्ये धृषेर्धिषचसंज्ञायामितिक्युप्रत्ययः धातोर्धिषादेशः धृष्णोत्यनयेतिधिषणास्तुतिः प्रत्ययस्वरः । शिश्नथे श्नथहिंसार्थः अस्मात्क्विप् छंदस्युभयथेतितस्यसार्वधातुकत्वाच्छप् तस्य बहुलंछंदसीतिश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वं धातुस्वरः । धात् दधातेश्छान्दसेलुङिरूपं यद्योगादनिघातः । विभ्वं भवतेःक्विप् छन्दस्युभयथेतियणादेशः उदात्तस्वरितयोर्यणइतिस्वरितत्वम् । अनुत्ताः णुदप्रेरणेइत्यस्य नञ्पूर्वस्यनिष्ठायां नसत्तनिषत्तेत्यादिनानिपातनान्निष्ठातकारस्यनत्वाभावः नञ्स्वरः ॥ १३ ॥

अथचतुर्दशी–

मह्याते॑स॒ख्यंव॑श्मिश॒क्तीरावृ॑त्र॒घ्नेनि॒युतो॑यन्तिपू॒र्वीः ।
महि॑स्तो॒त्रमव॒आग॑न्मसू॒रेर॒स्माकं॒सुम॑घवन्बोधिगो॒पाः ॥ १४ ॥

Funding by IKS-MoE

महि॑ । आ । ते॒ । स॒ख्यम् । व॒श्मि॒ । श॒क्तीः । आ । वृ॒त्र॒ऽघ्ने ।
नि॒ऽयुतः॑ । य॒न्ति॒ । पू॒र्वीः । महि॑ । स्तो॒त्रम् । अवः॑ । आ । अ॒ग॒न्म॒ ।
सू॒रेः॑ । अ॒स्माक॑म् । सु । म॒घ॒ऽव॒न् । बो॒धि॒ । गो॒पाः ॥ १४

हेइंद्र ते तव महि महत्सख्यमावश्मि आकामये शक्तीः त्वत्संबंधीनिदानानिवाकामये वृत्रघ्ने वृत्रासुरस्यहंत्रेतुभ्यंपूर्वीर्बह्वयोनियुतोवडवाआयंति वहनार्थमागच्छन्ति सूरेःविदुषस्तवमहि महत्स्तोत्रं अवः हविर्लक्षणमन्नंच आगन्म प्रापयामः हेमघवन्निंद्र तादृशस्त्वं अस्माकं सुसुष्ठुगोपाः पालयिताभवामीतिबोधिबुध्यस्व ॥ सख्यं सख्युर्यइतिभावार्थेयप्रत्ययः प्रत्ययस्वरः । वश्मि वशकांतौ लटिरूपं । नियुतः युमिश्रणे क्विप् नितरांयुवन्तिमिश्रयन्त्यात्मानंरथेष्वितिनियुतोवडवाः । अगन्म गमेर्लङ्युत्तमबहुवचनेबहुलंछन्दसीतिशपोलुक् म्वोश्चेतिमकारस्यनकारः निघातः । बोधि बुधेर्लोटि हेर्धौरूपं निघातः । गोपाः गुपूरक्षणे गुपूधूपेत्यादिनाआयप्रत्ययः तदन्तात्क्विप् अतोलोपयलोपौ प्रत्ययस्वरः ॥ १४ ॥

अथपञ्चदशी—

महि॒क्षेत्रं॑पु॒रुश्च॒न्द्रंवि॑वि॒द्वानादित्सखि॑भ्यश्च॒रथं॒समै॑रत् ।
इन्द्रो॒नृभि॑रजन॒द्दीद्या॑नःसा॒कंसूर्य॑मु॒षसं॑गा॒तुम॒ग्निम् ॥ १५ ॥ ७ ॥

महि॑ । क्षेत्र॑म् । पु॒रु । च॒न्द्रम् । वि॒वि॒द्वान् । आत् । इत् । सखि॑ऽभ्यः ।
च॒रथ॑म् । सम् । ऐ॒र॒त् । इन्द्रः॑ । नृऽभिः॑ । अ॒ज॒न॒त् । दीद्या॑नः ।
सा॒कम् । सूर्य॑म् । उ॒षस॑म् । गा॒तुम् । अ॒ग्निम् ॥ १५ ॥ ७ ॥

योयमिंद्रः महिमहत्क्षेत्रं केदारादि पुरुप्रभूतंचंद्रंहिरण्यंचविविद्वानर्थिभ्यःसखिभ्योऽस्मभ्यंलंभयन् आदिदनंतरंचरथंचरात्मकंगवादिकंचसमैरत् सम्यक्प्रैरयत् दत्तवानित्यर्थः दीद्यानोदीप्यमानःसोयमिंद्रः नृभिर्नेतृभिःकर्मसहायभूतैर्मरुद्भिःसाकंसहितःसन्सूर्यंकालस्यनिर्वाहकमादित्यं उषसं उषःकालंगातुं गायन्ति स्तुवन्त्यस्यामिंद्रादिदेवानितिगातुःपृथिवी तां अग्निमग्निहोत्रादिकर्मसाधनभूतमाहवनीयादिलक्षणमग्निंचअजनत्अजनयत् ॥ पुरुचंद्रं संहितायांह्रस्वाच्चंद्रोत्तरपदेमंत्रेइतिसुडागमः तस्यश्चुत्वेनशकारः पदकालेनास्तिसुडागमः पुरु

कुप्रत्ययस्वरः चंद्रं रक्प्रत्ययस्वरः । चरथं चरतिर्गत्यर्थः अस्मादौणादिकस्थप्रत्ययः प्रत्ययस्वरः । ऐरत् ईरगतावित्यस्यलङि आडजादीनामित्याडागमः निघातः । अजनत् जनेर्ण्यन्तस्यलङिरूपं बहुलमन्यत्रापिसंज्ञाछन्दसोरितिणिलुक् । गातुं गैशब्दे गापायाहिभ्यइतितुप्रत्ययः प्रत्ययस्वरः ॥ १५ ॥

॥ इतितृतीयस्यद्वितीयेसप्तमोवर्गः ॥ ७ ॥

अथषोडशी—

अ॒पश्चि॑दे॒षवि॒भ्वो॒३॑दमू॑ना॒ःप्रस॒ध्रीची॑रसृजद्वि॒श्वश्च॑न्द्राः ।
मध्वः॑पु॒ना॒नाःक॒विभिः॑प॒वित्रै॒र्द्यु॑भि॑र्हिन्वन्त्य॒क्तुभि॒र्धनु॑त्रीः ॥ १६ ॥

अ॒पः । चि॒त् । ए॒षः । वि॒ऽभ्वः॑ । दमू॑नाः । प्र । स॒ध्रीचीः॑ । अ॒सृ॒ज॒त् ।
वि॒श्वऽच॑न्द्राः । मध्वः॑ । पु॒ना॒नाः । क॒विऽभिः॑ । प॒वित्रैः॑ ।
द्युऽभिः॑ । हि॒न्व॒न्ति॒ । अ॒क्तुऽभिः॑ । धनु॑त्रीः ॥ १६ ॥

दमूनाः दांतंमनोयस्यासौदमूनादांतमनाः यद्वा दाम्यतीतिदमूनाः उपरतइत्यर्थः सएषएवेंद्रः विभ्वः व्याप्ताः सध्रीचीः परस्परसंगताः विश्वश्चंद्राः विश्वस्याह्लादयित्रीः विश्वस्याह्लादोयाभ्यस्ताइतिवा एवंभूताः अपश्चित् अपोपिप्रासृजत् सृष्टवान् सृष्टाश्चताआपः मध्वः माधुर्योपेतान्सोमान्कविभिःपवित्रैः अग्निवायुसूर्यैः पुनानाः शोधयित्र्यः धनुत्रीः सर्वस्यजगतःप्रीणयित्र्यःसत्यः द्युभिर्दिवसैरक्तुभीरात्रिभिर्हिन्वन्तिरात्रिंदिवंसर्वंजगत्स्वस्वव्यापारप्रवणंकुर्वन्तीत्यर्थः ॥ दमूनाः दमुउपरमे दमेरूनसिरित्यूनसिप्रत्ययः दाम्यतीतिदमूनाः यद्वा दान्तशब्दस्यदभावःमनसोमकारात्परस्याकारस्यऊकारश्छान्दसः । असृजत् सृजविसर्गे । हिन्वंति हिगतौ निघातः । धनुत्रीः धनधान्येइत्यस्मादशित्रादिभ्यउत्रप्रत्ययः शार्ङ्गरवाद्यञोङीन्द्रष्टव्यः नित्स्वरः ॥ १६ ॥

अथसप्तदशी—

अनु॑कृ॒ष्णेवसु॑धितीजिहातेउ॒भेसूर्य॑स्यमं॒हना॒यज॑त्रे ।
परि॒यत्ते॑महि॒मानं॑वृ॒जध्यै॒सखा॑यइन्द्र॒काम्या॑ऋजि॒प्याः ॥ १७ ॥

Funding by IKS-MoE

अनु। कृष्णे इति। वसुधिती इति वसुऽधिती। जिहाते
इति। उभे इति। सूर्यस्य। मंहना। यजत्रे इति। परि।
यत्। ते। महिमानम्। वृजध्यै। सखायः। इन्द्र। काम्याः।
ऋजिप्याः ॥ १७ ॥

हेइंद्र सूर्यस्यसुष्ठुजगतःप्रेरकस्यतव मंहना महत्त्वेनसामर्थ्येन वसुधितीवस्तव्यपदार्थधारणोपेते यजत्रे यजनार्हे ते उभे कृष्णे अहोरात्रे अनुजिहाते पुनःपुनरावृत्त्य वर्तेते किंच ऋजिप्याः ऋजुगतयः सखायस्तेमित्रभूताःकाम्याःकमनीयामरुतः वृजध्यैकर्मविघ्नकारिणामसुराणांवर्जनायपरिभवाय यद्यस्यतेतवमहिमानंसामर्थ्यमनुसृत्य परि परितःप्रभवन्ति ॥ जिहाते ओहाङ्गतौ जुहोत्यादिः भृञामिदित्यभ्यासस्येत्वं निघातः। मंहना महिवृद्धौ ल्युट् लित्स्वरः। वृजध्यै वृजीवर्जने तुमर्थेकध्यैप्रत्ययः कित्त्वाद्गुणाभावः प्रत्ययस्वरः। काम्याः कमेर्ण्यन्तस्याचोयदितियत्प्रत्ययः यतोनावइत्याद्युदात्तत्वं। ऋजिप्याः ओप्यायीवृद्धौ क्विप् लोपोव्योर्वलीतियलोपः पूर्वपदस्योकारस्येकारोव्यत्ययेन बहुवचनस्यैकवचनंछान्दसं कृदुत्तरपदप्रकृतिस्वरः ॥ १७ ॥

अथाष्टादशी–

पतिर्भववृत्रहन्त्सूनृतानांगिरांविश्वायुर्वृषभोवयोधाः।
आनोगहिसख्येभिःशिवेभिर्महान्महीभिरूतिभिःसरण्यन् ॥१८॥

पतिः। भव। वृत्रऽहन्। सूनृतानाम्। गिराम्। विश्वऽआयुः।
वृषभः। वयःऽधाः। आ। नः। गहि। सख्येभिः। शिवेभिः।
महान्। महीभिः। ऊतिऽभिः। सरण्यन् ॥ १८ ॥

हेवृत्रहन्निंद्र विश्वायुः विश्वंसंपूर्णमायुर्यस्यासौविश्वायुरविनाशी वृषभःकामानांवर्षिता वयोधाः अन्नस्यदाता तादृशस्त्वं सूनृतानांगिरां अस्माभिःक्रियमाणानां प्रियतमानांवाचांपतिः स्वामीभव तथा सरण्यन्सरणंयज्ञार्थंगमनमिच्छन् महान्महीभिर्महतीभिरूतिभिः रक्षाभिःशिवेभिः कल्याणैःसख्येभिःफलदानरूपोपकारलक्षणैःसख्यैश्चसहितस्त्वंनोऽस्मान्प्रत्यागहि यज्ञार्थमागच्छ ॥ सूनृतानां ऊनपरिहाणे सुतरांऊनयत्यप्रियमितिसूनितिप्रियमुच्यते तच्चतदृतंसत्यंचे-

Funding by IKS-MoE

तिसूनृतं परादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वं । वयोधाः वयस्युपपदेदधातेर्विच् । गहि गमेर्लोटि बहुलंछन्दसीतिशपोलुक् सेर्हिरादेशः अपिच्च तस्यङित्त्वादनुदात्तोपदेशेत्यादिनामलोपः तस्यासिद्धत्वादतोहेरितिहेर्लुङ्नभवति निघातः । सरण्यन् सरणशब्दात्क्यच् एकादेशस्वरः ॥ १८ ॥

अथैकोनविंशी–

तमङ्गिरस्वन्नमसासपर्यन्नव्यंकृणोमिसन्यसेपुराजाम् ।
द्रुहोवियाहिबहुलाअदेवीःस्वश्चनोमघवन्त्सातयेधाः ॥ १९ ॥

तम् । अङ्गिरस्वत् । नमसा । सपर्यन् । नव्यम् । कृणोमि ।
सन्यसे । पुराऽजाम् । द्रुहः । वि । याहि । बहुलाः । अदेवीः ।
स्व१रिति स्वः । च । नः । मघऽवन् । सातये । धाः ॥ १९ ॥

हेइंद्र अंगिरस्वत् अंगिरसइवनमसास्तोत्रेणसपर्यन्पूजयन्विश्वामित्रोहं तंतादृशमहिमोपेतं पुराजां पुरातनंत्वांसन्यसे संभजनायनव्यंकृणोमि स्तोतव्यतयाभिनवंकरोमि अदेवीः तमोरूपत्वेनाद्योतमानान्बहुलाबहून्द्रुहः द्रोग्धॄन्शत्रुभूतान्राक्षसान्वियाहि विशेषेणमृतिंप्रापय हेमघवन्निन्द्र नोऽस्मभ्यं स्वः स्वंधनंच सातयेसंभजनार्थंधाःधेहि ॥ अंगिरस्वत् अंगिरसइव तेनतुल्यमितिवतिप्रत्ययः नभोंगिरोमनुषांवत्युपसंख्यानमिति भसंज्ञायांसकारस्यरुत्वाभावः । सपर्यन् सपरशब्दःकण्ड्वादिः । नव्यं णुस्तुतावित्यस्मादचोयदितियत्प्रत्ययः धातोस्तन्निमित्तस्यैवेतिवांतादेशः यतोनावइत्याद्युदात्तत्वं । कृणोमि कृवेर्लटिरूपं । संन्यसे सनतेर्भावेक्विप् यसुप्रयत्ने अस्मात्क्विप् सनःसंभजनस्ययसेयत्नायसंभजनार्थमित्यर्थः । पुराजां जनेर्विट् आत्वेरूपं । याहि यातेर्लोटिरूपं । स्वः स्वरादिनिपातमव्ययमित्यव्ययसंज्ञायां अव्ययादाप्सुपइतिसुपोलुक् । सातये षणसंभक्तौ भावेक्तिन् जनसनेत्यादिना आत्वं ऊतियूतीत्यादिना निपातनादुदात्तः ॥ १९ ॥

अथविंशी–

मिहःपावकाःप्रतताअभूवन्त्स्वस्तिनःपिपृहिपारमासाम् ।
इन्द्रत्वंरथिरःपाहिनोरिषोमक्षूमक्षूकृणुहिगोजितोनः ॥ २० ॥

मिहः । पावकाः । प्रऽतताः । अभूवन् । स्वस्ति । नः । पिपृहि ।
पारम् । आसाम् । इन्द्र । त्वम् । रथिरः । पाहि । नः । रिषः ।
मक्षुऽमक्षु । कृणुहि । गोऽजितः । नः ॥ २० ॥

हेइन्द्र तेपावकाःपापानांशोधयितृभ्यः मिहः सेचनसाधनान्यापः प्रतताः लोकेप्रकर्षेणविस्तृताअभूवन् आसामपांस्वस्तिविनाशरहितंपारंतीरंनोस्मदर्थंपिपृहिजलैःसंपूर्णंकुरु जलमवारपारीणंकुर्वित्यर्थः रथिरोरथवांस्त्वंरिषोहिंसकाच्छत्रोःसकाशान्नोस्मान्पाहिपालय अनन्तरं नोऽस्मान्मक्षुमक्षु अतिशीघ्रं गोजितः गवादिपशूनांजेतॄन्कृणुहिकुरु सुवृष्टिप्रदानेनतडागादिजलाशयान्संपूर्णान्कृत्वागवादिधनयुक्तान्कुर्विति भावः ॥ अभूवन् भूसत्तायामित्यस्यलुङि रूपं निघातः । पिपृहि पृपालनपूरणयोः जुहोत्यादिः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं हेर्ङित्त्वादगुणः निघातः । रथिरः मत्वर्थे मेधारथाभ्यामिरन्निरचाविति इरच्प्रत्ययः । रिषः रिषहिंसायां क्विप् सावेकाचइतिविभक्तेरुदात्तत्वं । मक्षुमक्षु नित्यवीप्सयोरितिद्विर्वचनं संहितायां ऋचितुनुघमक्षुतङितिदीर्घः ॥ २० ॥

अथैकविंशी–

अदेदिष्टवृत्रहागोपतिर्गाअन्तःकृष्णाँअरुषैर्धामभिर्गात् ।
प्रसूनृतादिशमाननृतेनदुरश्चविश्वाअवृणोदपस्वाः ॥ २१ ॥

अदेदिष्ट । वृत्रऽहा । गोऽपतिः । गाः । अन्तरिति । कृष्णान् ।
अरुषैः । धामऽभिः । गात् । प्र । सूनृताः । दिशमानः । ऋतेन ।
दुरः । च । विश्वाः । अवृणोत् । अप । स्वाः ॥ २१॥

वृत्रहा वृत्रस्यहन्ता गोपतिर्गवांस्वामीसन् इन्द्रः गाः अदेदिष्ट अस्मभ्यंदिशतु तथा कृष्णान्कर्मविघ्नकारिणोसुरानरुषैरारोचमानैर्धामभिस्तेजोभिरन्तः अन्तर्धानंविनाशंगात्गमयतु तथा सूनृताःप्रियतमाःगाः ऋतेनप्रतारणवर्जितेनसत्येनवाक्येनप्रदिशमानःअंगिरोभ्यःप्रदिशन्निन्द्रःविश्वाःसर्वाणिदुरःगवांस्वेच्छयानिर्गमनद्वाराणि स्वाः स्वकीयागाश्चापावृणोत् व्रजेगाः स्थापयित्वा तानिद्वाराणिआच्छादितवानित्यर्थः ॥ अदेदिष्ट दिशअतिसर्जनेइत्यस्माद्यङ्लुकि लङि व्यत्ययेनात्मनेपदं अडागमस्वरः । गोपतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरः । गात् इ-

Funding by IKS-MoE

णूगतौ अन्तर्भावितण्यर्थः। दिशमानः दिशेर्व्यत्ययेनशानच् तस्यलसार्वधातुकस्वरेणानुदात्तत्वेशस्वरः। अवृणोत् वृञ्वरणेइत्यस्यलङिरूपम् ॥ २१ ॥

अथद्वाविंशी—

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ २२ ॥८॥

शु॒नम् । हु॒वे॒म॒ । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् । वाज॑सातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ । घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ २२ ॥ ८ ॥

व्याख्यातेयमृक् ॥ २२ ॥

॥ इतितृतीयस्यद्वितीयेष्टमोवर्गः ॥ ८ ॥

इन्द्रसोमंसोमपतइतिसप्तदशर्चंतृतीयंसूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रं अनुक्रान्तंच—इन्द्रसोमंत्र्यूनेति । पृष्ठ्याभिप्लवषडहयोः द्वितीयेहनिमरुत्वतीयेइन्द्रसोममितीदंसूक्तंनिविद्धानीयं द्वितीयस्येतिखण्डेसूत्रितम्—इन्द्रसोमंयातऊतिरवमेतिमध्यन्दिनइति गोसवविवधयोरपिमरुत्वतीयशस्त्रेएतत्सूक्तम्। सूत्रितञ्च—इन्द्रसोममेतायामेतिमध्यन्दिनइति । उद्भिद्वलभिदोरपिमरुत्वतीयएतत्सूक्तम्। सूत्रितञ्च—इन्द्रसोममिन्द्रःपूर्भिदितिमध्यन्दिनइति ।

तस्मिन्सूक्तेप्रथमा—

इन्द्र॒सोमं॒सोम॑पते॒पिबे॒मंमाध्यं॑न्दिनं॒सव॑नं॒चारु॒यत्ते॑ ।
प्र॒प्रुथ्या॒शिप्रे॑मघवन्नृजीषिन्वि॒मुच्या॒हरी॑इ॒हमा॑दयस्व ॥ १ ॥

इन्द्र॑ । सोम॑म् । सो॒म॒ऽप॒ते॒ । पिब॑ । इ॒मम् । माध्यं॑न्दिनम् । सव॑नम् । चारु॑ । यत् । ते॒ । प्र॒ऽप्रुथ्य॑ । शिप्रे॒ इति॑ । म॒घ॒ऽव॒न् । ऋ॒जी॒षि॒न् । वि॒ऽमुच्य॑ । हरी॒ इति॑ । इ॒ह । मा॒द॒य॒स्व॒ ॥ १ ॥

Funding by IKS-MoE

विश्वामित्रोब्रूते—सोमपते सोमस्याधिपते हेइन्द्र इममस्माभिर्माध्यन्दिनेसवनेक्रियमाणंसोमं सोमरसंपिब यद्यस्मात्तेत्वदर्थंक्रियमाणमिमंमाध्यन्दिनं मध्यदिनसंबन्धिसवनंनिष्केवल्याख्यं शस्त्रंचारुरमणीयंवर्तते मघवन्धनवन्नृजीषिन्नृजीषशब्देनगतसारंसोमद्रव्यमुच्यते तद्वन् हेइन्द्र हरी रथेयोजितावश्वौ रथाद्विमुच्य शिप्रेहनू प्रपुथ्य अत्रत्येनग्रासेनपूरयित्वा इह देवयजनदेशेमादयस्व तावश्वौहर्षय ॥ प्रपुथ्य प्रोथृपर्याप्ताविस्यस्यल्यपिरूपं ह्रस्वश्छान्दसः लित्स्वरः । ऋजीषिन् अर्जषर्जअर्जनेइत्यस्मादर्जेश्चऋजिचेतिइषन्प्रत्ययः ऋजिइत्यादेशश्चधातोः अर्ज्यतइत्यृजीषं तदस्यास्तीतीनिप्रत्ययः आमन्त्रितत्वान्निघातः । मादयस्व मदि स्तुत्यादिषु हेतुमण्णिच् निघातः ॥ १ ॥

अथद्वितीया—

गवा॑शिरंम॒न्थिनं॑मिन्द्रशुक्रंपिबा॒सोमं॑ररि॒माते॒मदा॑य ।
ब्र॒ह्म॒कृता॒मारु॑तेनाग॒णेन॑स॒जोषा॑रु॒द्रैस्तृ॒पदावृ॑षस्व ॥ २ ॥

गोऽआ॑शिरम् । म॒न्थिन॑म् । इ॒न्द्र॒ । शु॒क्रम् । पिब॑ । सोम॑म् ।
र॒रि॒म । ते॒ मदा॑य । ब्र॒ह्म॒ऽकृता॑ । मारु॑तेन । ग॒णेन॑ ।
स॒ऽजोषा॑ः । रु॒द्रैः । तृ॒पत् । आ । वृ॒ष॒स्व॒ ॥ २ ॥

हेइन्द्र गवाशिरं गव्यस्यपयसआशीर्मिश्रणंयस्मिन्तंसोमं अपिच मन्थिनंमन्थसंयुक्तं शुक्रं अभिनवं यद्वा शुक्रं शुक्रामन्थिग्रहेवर्तमानं एवंत्रिषुसवनेषुवर्तमानमिमंसोमंपिब ते तवमदायहर्षायररिम तंसोमंवयंप्रयच्छामः मारुतेन मरुतांगणःमारुतः सचब्रह्मकृता ब्रह्म स्तोत्रंकरोतीतिब्रह्मकृत् इन्द्रविषयस्तोत्रंकुर्वाणेनमारुतेनगणेन रुद्रैरेकादशसंख्याकैरुद्रैश्चसजोषाःसंगतस्त्वंतृपत् सोमपानेनतृप्यन् आवृषस्व तमिमंसोमंसर्वतोजठरेसिञ्च धारय ॥ गवाशिरं श्रिणातेराङ्पूर्वात्क्विपि अपस्पृधेथामानृचुरित्यादिनानिपातनादाशिरादेशः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । पिब द्व्यचोतस्तिङइतिसंहितायांदीर्घः । ररिम रातेश्छान्दसेवर्तमानेलिटि रूपं असमानवाक्यत्वान्निघाताभावः आगमाअनुदात्ताइतिइटोनुदात्तत्वात्प्रत्ययस्वरः । तृपत् तृपप्रीणने तुदादिः आगमानुशासनस्यानित्यत्वान्नुमभावः । वृषस्व वृषसेचने व्यत्ययेनशः ॥ २ ॥

अथतृतीया—

येते॒शुष्मं॒येतवि॑षी॒मव॑र्ध॒न्नर्च॑न्तइन्द्रम॒रुत॑स्त॒ओजः॑ ।
माध्य॑न्दिने॒सव॑नेवज्रहस्त॒पिबा॑रु॒द्रेभिः॒सग॑णःसु॒शिप्र ॥ ३ ॥

ये । ते॒ । शुष्म॑म् । ये । तवि॑षीम् । अव॑र्धन् । अर्च॑न्तः । इ॒न्द्र॒ ।
म॒रुतः॑ । ते॒ । ओजः॑ । माध्य॑न्दिने । सव॑ने । व॒ज्र॒ऽह॒स्त॒ । पिब॑ ।
रु॒द्रेभिः॑ । सऽग॑णः । सु॒ऽशि॒प्र ॥ ३ ॥

हेइन्द्र येमरुतः ते तव शुष्मंशत्रूणांशोषकंतेजः येचमरुतः तविषींबलंचावर्धन् युद्धसहकारितयाअवर्धयन् तेमरुतः अर्चन्तस्त्वांस्तुवन्तःसन्तः तेतव ओजोयुद्धसामर्थ्यंअवर्धयन् वज्रहस्त वज्रयुक्तौहस्तौयस्येतितादृश सुशिप्र शोभनहनो शिप्रेहनूनासिकेतियास्कः । हेइन्द्र रुद्रेभिःरोदयन्तिशत्रूनितिरुद्रामरुतः तैःसगणस्त्वंमाध्यंदिनेसवनेसोमंपिब ॥ अवर्धन् वृधुवर्धने अन्तर्भावितण्यर्थः यद्वृत्तयोगादनिघातः । माध्यन्दिने उत्सादित्वादञ् ञित्त्वादाद्युदात्तः ॥३॥

अथचतुर्थी—

तइन्न्व॑स्य॒मधु॑मद्विविप्र॒इन्द्र॑स्य॒शर्धो॑म॒रुतो॒यआस॑न् ।
येभि॑र्वृ॒त्रस्ये॑षि॒तोवि॒वेदा॑म॒र्मणो॒मन्य॑मानस्य॒मर्म॑ ॥ ४ ॥

ते । इत् । नु । अ॒स्य॒ । मधु॑ऽमत् । वि॒वि॒प्रे॒ । इन्द्र॑स्य । शर्धः॑ ।
म॒रुतः॑ । ये । आस॑न् । येभिः॑ । वृ॒त्रस्य॑ । इ॒षि॒तः । वि॒वेद॑ । अ॒म॒र्मणः॑ ।
मन्य॑मानस्य । मर्म॑ ॥ ४ ॥

हेमरुतः इन्द्रस्यशर्धोबलभूताआसन तइत् तएवमरुतः अस्य द्वितीयार्थेषष्ठी इममिन्द्रं मधुमत्तवसहायायवयमास्महे त्वंयुद्धमभिगच्छेतिमाधुर्योपेतंवाक्यंयथाभवतितथाविविप्रेनुक्षिप्रंप्रैरयन् येभिर्यैर्युद्धसहायैर्मरुद्भिःइषितःप्रेरितःइन्द्रःअमर्मणः परैरविदितमर्मस्थानस्य अतएवमन्यमानस्यनकोपिममहन्तेत्यभिमन्यमानस्यवृत्रस्यासुरस्यमर्मयस्मिन्स्थानेप्रहृतौसत्यां समरिष्यति तादृशंस्थानंविवेदाज्ञासीत् ॥ विविप्रे विपक्षेपणेइत्यस्यलिटि व्यत्ययेनात्मनेपदं इरेचः इरयोरेइतिरेइत्यादेशः निघातः।आसन् अस्भुवीत्यस्यलङिरूपं यद्वृत्तयोगान्निघाताभावः।

Funding by IKS-MoE

विवेद विदज्ञाने इत्यस्यलिटिरूपं लित्स्वरः । मर्म मृङ्प्राणत्यागेइत्यस्मादौणादिकोमनिन् नित्स्वरः ॥ ४ ॥

अथपञ्चमी–

मनुष्वदिन्द्रसवनंजुषाणःपिबासोमंशश्वतेवीर्याय ।
सआववृत्स्वहर्यश्वयज्ञैःसरण्युभिरपोअर्णासिसर्षि ॥ ५ ॥ ९ ॥

मनुष्वत् । इन्द्र । सवनम् । जुषाणः । पिब । सोमम् । शश्वते ।
वीर्याय । सः । आ । ववृत्स्व । हरिऽअश्व । यज्ञैः । सरण्युऽभिः ।
अपः । अर्णा । सिसर्षि ॥ ५ ॥ ९ ॥

हेइन्द्र मनुष्वन्मनोर्यज्ञमिवममेदंसवनंयज्ञंजुषाणःसेवमानस्त्वं शश्वते शाश्वतायवीर्याय परपरिभवलक्षणायसामर्थ्याय इमंसोमंपिब हेहर्यश्व सताद्दशस्त्वंयज्ञैर्यजनीयैर्मरुद्भिःसाकमाववृत्स्व आगच्छ किंच सरण्युभिः एकश्रुतिमन्मन्त्रानात्मनइच्छद्भिः यद्वा सरण्युभिः सरणशीलैर्मरुद्भिःसहितस्त्वं अपोन्तरिक्षस्थितान्युदकानि अर्णा पार्थिवान्युदकानिचसिसर्षि प्रापय यद्वा अपःपंचम्यन्तमेतत्पदं अपोव्याप्तादन्तरिक्षात्सकाशादर्णांसिप्रापय ॥ ववृत्स्व वृतुवर्तने व्यत्ययेनशपःश्लुः लोटिरूपं । सरण्युभिः रणशब्दार्थः क्विप् समानोरणःध्वनिर्येषांतेसरणामन्त्राः तानिच्छन्तः सुपःक्यच् क्यादित्युप्रत्ययः यद्वा सृगतौ सृयुवचिभ्योन्युजागूचक्नुचइतिअन्युच्प्रत्ययः रषाभ्यामितिणत्वं चित्त्वादन्तोदात्तः । अपः आप्लृव्याप्तौ आप्नोतेःक्विप् ह्रस्वश्चेतिक्विप्धातोर्ह्रस्वश्च सावेकाचइतिविभक्तेरुदात्तत्वम् । सिसर्षि सृगतौ छान्दसोजुहोत्यादिः बहुलंछन्दसीत्यभ्यासस्येत्वम् ॥ ६ ॥

॥ इतितृतीयस्यद्वितीयेनवमोवर्गः ॥ ९ ॥

अथषष्ठी–

त्वमपोयद्धवृत्रंजघन्वाँअत्याँइवप्रासृजःसर्तवाजौ ।
शयानमिन्द्रचरतावधेनंवव्रिवांसंपरिदेवीरदेवम् ॥ ६ ॥

Funding by IKS-MoE

अथनवमी–

अद्रो॑घस॒त्यंतव॒तन्म॑हि॒त्वंस॒द्योयज्जा॒तोअपि॑बोह॒सोम॑म् ।
नद्याव॑इन्द्रत॒वस॑स्त॒ओजो॒नाहा॒नमासाः॑श॒रदो॑वरन्त ॥ ९ ॥

अद्रो॑घ । स॒त्यम् । तव॑ । तत् । म॒हि॒ऽत्वम् । स॒द्यः । यत् । जा॒तः ।
अपि॑बः । ह॒ । सोम॑म् । न । द्याव॑ः । इ॒न्द्र॒ । त॒वस॑ः । ते॒ ।
ओज॑ः । न । अहा॑ । न । मासाः॑ । श॒रद॑ः । व॒र॒न्त॒ ॥ ९ ॥

अद्रोघ द्रोहवर्जित हेइन्द्र तेतव तन्महित्वं तादृशंमाहात्म्यं सत्यंयथार्थं यद्यस्माज्जात- उत्पन्नः सद्यस्तदानीमेवसोममस्माभिर्दीयमानसोमरसमपिबः हप्रसिद्धौ किञ्च तवसोबलवतः तेतवओजःसामर्थ्यंद्यावः दिवोपलक्षिताःसर्वेलोकाः नवरन्त नवारयन्ति किंच अहा प्रतिपदादीन्यहानिनवारयन्ति तथामासाश्चैत्राद्याः शरदःसंवत्सराश्च तवसामर्थ्यंनवारयन्ति किंतु तवसामर्थ्यमनुसृत्य सर्वेवर्तन्तइतिभावः ॥ अद्रोघ आमन्त्रितस्यचेतिषाष्ठिकमाद्युदात्तत्वम् । अपिबः यद्योगादनिघातः । मासाः मसीपरिमाणे मस्यतेपरिमीयतेत्रिंशतादिनैरितिमासः कर्मणिघञ् ञित्वादाद्युदात्तः । शरदः शॄहिंसायामित्यस्मात्शॄदृभसोदिरित्यधिकरणेअदिप्रत्ययः शीर्यन्तेस्यांतृणगुल्मवनस्पतीनांतेजांसिइतिशरत् प्रत्ययस्वरः। वरन्त वृञ्वरणे अन्तर्भावितण्यर्थोत्रातिवारणेवर्तते भौवादिकः छान्दसेलङिरूपं निघातः ॥ ९ ॥

सद्यस्क्रीनाम्न्येकाहेनिष्केवल्यशस्त्रे त्वंसद्योअपिबइतिसूक्तमुखीया सूत्रितञ्च—त्वंसद्योअपिबोजातइन्द्रानुत्वाहिघ्नेअधदेवदेवाइति ।

अथदशमी–

त्वं॑स॒द्योअ॑पिबोजा॒तइ॑न्द्र॒मदा॑य॒सोमं॑पर॒मेव्यो॑मन् ।
यद्ध॒द्यावा॑पृथि॒वीआवि॑वेशी॒रथा॑भवःपू॒र्व्यः॑का॒रुधा॑याः ॥ १० ॥ १० ॥

त्वम् । स॒द्यः । अ॒पि॒ब॒ः । जा॒तः । इ॒न्द्र॒ । मदा॑य । सोम॑म् । प॒र॒मे ।
विऽओ॑मन् । यत् । ह॒ । द्यावा॑पृथि॒वी इति॑ । आ । अवि॑वेशीः ।
अथ॑ । अ॒भ॒व॒ः । पू॒र्व्यः॑ । का॒रुऽधा॑याः ॥ १० ॥ १० ॥

Funding by IKS-MoE

हेइन्द्र सद्यस्तदानीमेवजातःपरमेव्योमन्नुत्तमेस्थानेस्थितस्त्वं मदायहर्षायसोमममपिबः यद्यदात्वंद्यावापृथिवीद्यावापृथिव्यौ आविवेशीर्ह आसमन्ताद्भृशंप्रविष्टोसिखलु अथानन्तरं पूर्व्यःपुरातनःसन्कारुधायाःकर्मणांविधाताभवःखलु ॥ व्योमन् अवरक्षणगत्यादिषु निपूर्वस्यावतेर्नामन्सामन्नित्यादिनामनिन् ज्वरत्वरेत्यादिनाऊठ् विशेषणओमव्याप्तिर्यस्यतत् सुपांसुलुगित्यादिनासुपोलुक् बहुव्रीहौपूर्वपदप्रकृतिस्वरः । आविवेशीः विशप्रवेशनेइत्यस्ययङ्लुकि लङिसिपियङोर्वेतीडागमः इतश्चेतिसिपइकारलोपः यद्योगादनिघातः । कारुधायाः कारुः करोतेःकृवापाजिमिस्वदिसाध्यशूभ्यउण्प्रत्ययः णित्त्वाद्वृद्धिः । दधातेर्वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेः आतोयुक्चिण्कृतोरितियुगागमः । समासेगतिकारकोपपदादितिपूर्वपदप्रकृतिस्वरत्वंचेतिसूत्रात्पूर्वपदप्रकृतिस्वरः ॥ १० ॥

॥ इतितृतीयस्यद्वितीयेदशमोवर्गः ॥ १० ॥

अथैकादशी–

अह॒न्नहिं॑परि॒शया॑न॒मर्ण॑ओजा॒यमा॑नंतुविजात॒तव्या॑न् ।
नते॑महि॒त्वमनु॑भू॒दध॒द्यौर्यद॒न्यया॑स्फि॒ग्या॒३॒क्षामव॑स्थाः ॥ ११ ॥

अह॑न् । अहि॑म् । प॒रि॒ऽशया॑नम् । अर्णः॑ । ओ॒जा॒यमा॑नम् ।
तु॒वि॒ऽजा॒त॒ । तव्या॑न् । न । ते॒ । म॒हि॒ऽत्वम् । अनु॑ । भू॒त् । अध॑ ।
द्यौः । यत् । अ॒न्यया॑ । स्फि॒ग्या॑ । क्षाम् । अव॑स्थाः ॥ ११ ॥

तुविजात बहूनिजातानिपृथिव्यादीनियस्मात्सोयंतुविजातः हेतुविजात इन्द्र तव्यानतिशयेनप्रवृद्धांस्त्वं अर्णःपरिशयानमुदकं परितःशयानमुदकमन्तःकृत्वा परितोवर्तमानं अतएवौजायमानं बलमाचरन्तं अहि आसमन्ताद्धंत्यपहरत्युदकमित्यहिर्मेघः तमिमंमेघं अहन्नुदकप्रेरणायहतवानसि अध अथ तेमहित्वंमहिमानंद्यौर्नानुभून्नानुभवति नजानाति यद्यस्मात्त्वं अन्ययैकतरयास्फिग्या कट्या क्षांभूमिं अवस्थाः अवच्छाद्यतिष्ठसि ॥ अहन् हन्तेर्लङि सिब्लोपेरूपं । अहिं हनहिंसागत्योः आङि श्रिहनिभ्यांह्रस्वश्चेतिइण्प्रत्ययः ङिच्च पूर्वपदस्य ह्रस्वः वृषादित्वादाद्युदात्तः । ओजायमानं ओजःशब्दादाचारार्थे कर्तुःक्यङ्सलोपश्चेतिक्यङ्प्रत्ययः सलोपश्च ङित्त्वादात्मनेपदं प्रत्ययस्वरः । तव्यान् तुइतिसौत्रोधातुः अस्मात्तृजन्तात्तुश्छन्द-

सीतीय सुन् तुरिष्ठेमेयःस्वितितृचोलोपः भसंज्ञायामोर्गुणः इकारलोपश्छान्दसः नित्स्वरः । भूत् भवतेर्लङिरूपम् । स्फिग्या यचिभमितिभसंज्ञांबाधित्वास्वादिष्वसर्वनामस्थानेइतिपदसंज्ञायांजश्त्वं तृतीयायाःपूर्वसवर्णः । क्षां क्षिनिवासगत्योः अन्येभ्योपिदृश्यतइतिनिरुपपदादपि डप्रत्ययः ततष्टाप् । क्षियन्ति निवसंत्यस्यांप्राणिनइतिक्षाभूमिः उदात्तनिवृत्तिस्वरेणान्तोदात्तः । अवस्थाः वसआच्छादनेइत्यस्य लङि अनुदात्तत्वादात्मनेपदं थासि अदादित्वाच्छपोलुक् यद्योगादनिघातः अडागमस्वरः ॥ ११ ॥

अथद्वादशी—

य॒ज्ञोहित॑इन्द्र॒वर्ध॑नो॒भूदु॒तप्रि॒यःसु॒तसो॑मोमि॒येधः॑ ।
य॒ज्ञेन॑य॒ज्ञम॑वय॒ज्ञियः॒सन्य॒ज्ञस्ते॒वज्र॑महि॒हत्य॑आवत् ॥ १२ ॥

य॒ज्ञः । हि । ते॒ । इ॒न्द्र॒ । वर्ध॑नः । भूत् । उ॒त । प्रि॒यः ।
सु॒तऽसो॑मः । मि॒येधः॑ । य॒ज्ञेन॑ । य॒ज्ञम् । अ॒व॒ । य॒ज्ञियः॑ । सन् ।
य॒ज्ञः । ते॒ । वज्र॑म् । अ॒हि॒ऽहत्ये॑ । आ॒व॒त् ॥ १२ ॥

हेइन्द्र अस्मदीयोयज्ञस्तेतववर्धनोहविःप्रदानेनवर्धयिताभूत्हि भवतिखलु उतापिच सुतसोमः अभिषुतसोमवान्मियेधःसारभूतोयंयज्ञः तेतवप्रियः सत्वंयज्ञियःयज्ञार्हःसन् यज्ञंयज्ञस्यकर्तारंयजमानं यज्ञेनानुष्ठीयमानेनाव फलप्रदानेनरक्ष किंचायंयज्ञस्तेतववज्रमहिहत्ये वृत्रहननेकर्मण्यावत् रक्षतु ॥ वर्धनः वृधुवर्धनेइत्यस्य ण्यन्तस्य नंद्यादित्वाल्ल्युप्रत्ययः लित्स्वरः । भूत् हियोगादनिघातः । अव अवतेर्लोटिरूपं निघातः । सन् असेःशतरिरूपं प्रत्ययस्वरः । अहिहत्ये हनहिंसागत्योरित्यस्यभावे हनस्तचेतिक्यप् तकारश्चान्तादेशः कृदुत्तरपदस्वरः । आवत् अवतेश्छान्दसेलङिरूपं निघातः ॥१२॥

अथत्रयोदशी—

य॒ज्ञेनेन्द्र॒मव॒साच॑क्रेअ॒र्वागै॑नंसु॒म्नाय॒नव्य॑सेववृ॒त्याम् ।
यःस्तोमे॑भिर्वावृ॒धेपू॒र्व्येभि॒र्योम॑ध्य॒मेभि॑रु॒तनूत॑नेभिः ॥ १३ ॥

य॒ज्ञेन॑ । इन्द्र॑म् । अव॑सा । आ । च॒क्रे॒ । अ॒र्वाक् । आ । ए॒न॒म् ।
सु॒म्नाय॑ । नव्य॑से । व॒वृ॒त्या॒म् । यः । स्तोमे॑भिः । व॒वृ॒धे । पू॒र्व्येभिः॑ ।
यः । म॒ध्य॒मेभिः॑ । उ॒त । नूत॑नेभिः ॥ १३ ॥

Funding by IKS-MoE

हेइन्द्र सर्वोयजमानः अवसास्वरक्षकेणयज्ञेनइन्द्रं त्वामर्वांगाचक्रे हविःप्रदानेनाभिमुखं करोति तथाहं नव्यसेनवतरायसुम्नायधनाय एनंत्वामाववृत्यांयज्ञेनावृतंमदभिमुखंकुर्याम् कीदृशस्त्वं यःपूर्व्येभिःपुरातनैःस्तोमभिःस्तोत्रैःववृधेप्रवृद्धोबभूव तथायइन्द्रोमध्यमेभिःमध्येभवैः स्तोत्रैः उतापिच नूतनेभिरस्माभिःक्रियमाणैः अधुनातनैःस्तोत्रैर्वर्धते ॥ चक्रे करोतेर्लिटिरूपं । नव्यसे नवशब्दादीयसुनि भसंज्ञायामकारलोपः ईकारलोपश्छान्दसः नित्त्वादाद्युदात्तः । ववृत्यां वृतुवर्तने, लिङि बहुलंछन्दसीसिशपःश्लुः व्यत्ययेनपरस्मैपदं निघातः । ववृधे वृधुवर्धनेइत्यस्यलिटिरूपं प्रत्ययस्वरः । मध्यमेभिः मध्यशब्दाच्छैषिकार्थेमध्यान्मइतिमप्रत्ययः प्रत्ययस्वरः । नूतनेभिः नवशब्दस्य त्नप्तनप्खाश्चप्रत्ययावक्तव्यानूइत्यादेशश्चेतितनप्प्रत्ययःनूइत्यादेशश्च ॥१३॥

अथचतुर्दशी—

वि॒वेष॒यन्मा॑धि॒षणा॑ज॒जान॒स्तवै॑पु॒रापार्या॒दिन्द्र॒मह्नः॑ ।
अंह॑सो॒यत्र॑पी॒पर॒द्यथा॑नोना॒वेव॒यान्त॑मु॒भये॑हवन्ते ॥ १४ ॥

वि॒वेष॑ । यत् । मा॒ । धि॒षणा॑ । ज॒जान॑ । स्तवै॑ । पु॒रा । पार्या॑त् ।
इन्द्र॑म् । अह्नः॑ । अंह॑सः । यत्र॑ । पी॒पर॑त् । यथा॑ । नः॒ । ना॒वाऽइ॑व ।
यान्त॑म् । उ॒भये॑ । ह॒व॒न्ते॒ ॥ १४ ॥

यद्यदाधिषणा इन्द्रंस्तवानीतिमदीयाबुद्धिर्मा मां विवेष व्याप्नोत् तदाहंस्तोत्रंजजान करोमि बुद्धेःस्वरूपंदर्शयति—अहंपार्यात्पारेभवादतिदूरवर्तिनोविघ्नकारिणोऽह्नः पुरापूर्वंइन्द्र स्तवैस्तवानियत्रयस्यांधिषणायामेवजातायांसत्यांसइन्द्रःनोऽस्मानंहसःपापरूपाद्दारिद्र्याद्यथापीपरत् यथापारंनयेत् तथास्मदुभयपार्श्ववर्तिधनार्थिनोजनाः हवन्तआह्वयन्ति तत्रदृष्टान्तमाह—नावेवयान्तं यथानद्यादिषुनौकयायान्तंगच्छन्तंपुरुषं उभयेउभयपार्श्ववर्तिनोजनाःहवन्ते आह्वयन्ति तद्वत् ॥ विवेष विष्लृव्याप्तावित्यस्यलिटिणलिरूपं लित्स्वरः । जजान जनजननेइत्यस्य लिटयुत्तमेणलिरूपं वाक्यभेदादनिघातः । अंहसः अमगत्यादिषु अमेर्हुक्चेत्यसुन्प्रत्ययः हुगागमश्च नित्स्वरः । पीपरत् पॄपालनपूरणयोरित्यस्यलुङिचङि ह्रस्वाभ्यासेत्वदीर्घगुणाः यथायोगादनिघातः लित्स्वरः । नावेव णुदप्रेरणेइत्यस्मात्ग्लानुदिभ्यांडावितिडौप्रत्ययः नुद्यतइतिनौः प्लवः सावेकाचस्तृतीयायाउदात्तत्वं इवेननित्यसमासोविभक्त्यलोपश्च-

त्यादि । उभये उभयशब्दात्परस्यतयपउभादुदात्तोनित्यमितिअयजादेशः वचनसामर्थ्यादादेरुदात्तत्वं । हवन्ते ह्वयतेर्लेटिरूपम् ॥ १४ ॥

माध्यन्दिनेसवनेआग्नीध्रीयस्यआपूर्णोअस्येतिप्रस्थितयाज्या सूत्रितश्च—आपूर्णोअस्यकलशःस्वाहेतिमाध्यन्दिनइति ।

अथपञ्चदशी—

आपू॑र्णोअस्यक॒लश॒ःस्वाहा॒सेक्ते॑व॒कोशं॑सिसि॒चे॒पिब॑ध्यै ।
समु॑प्रि॒याआव॑वृत्र॒न्मदा॑यप्रद॒क्षि॒णिद॒भिसोमा॑स॒इन्द्र॑म् ॥ १५ ॥

आऽपू॑र्णः । अ॒स्य॒ । क॒लशः॑ । स्वाहा॑ । सेक्ता॑ऽइव । कोश॑म् ।
सि॒सि॒चे॒ । पिब॑ध्यै । सम् । उँ॒ इति॑ । प्रि॒याः । आ । अ॒व॒वृ॒त्र॒न् ।
मदा॑य । प्र॒ऽद॒क्षि॒णित् । अ॒भि । सोमा॑सः । इन्द्र॑म् ॥ १५ ॥

हेइन्द्र अस्य तवपानार्थं कलशः द्रोणकलशः सोमेनापूर्णःस्वाहा स्वाहाकृतोदत्तश्च सोमसहितःकलशःपिबध्यै तवपानार्थंसिसिचे तंसोमंचोदिताधारेसिंचामि तत्रदृष्टान्तः—कोशंसेक्तेव यथासेक्तोत्सेचकः जलपूर्णात्कोशात्दृतेःसकाशाज्जलंपात्रान्तरेसिञ्चतितद्वत् प्रियाः स्वादुतमाःसोमासोदत्तास्तेसोमाः इन्द्रंत्वामभि अभिलक्ष्यैव मदाय तवहर्षार्थं प्रदक्षिणित् प्रादक्षिण्येनसमाववृत्रन् सम्यगावृत्यवर्ततां उःपूरणः ॥ आपूर्णः पॄपालनपूरणयोरित्यस्यकर्मणिनिष्ठा रदाभ्यामितितस्यनत्वं गतिरनन्तरइतिगतिस्वरः । स्वाहा निपातत्वादाद्युदात्तः । सेक्तेवकोशं नलोकाव्ययेतिषष्ठीप्रतिषेधः । सिसिचे षिचक्षरणेइत्यस्यलिटिरूपम् । पिबध्यै पापानेइत्यस्यतुमर्थेशध्यैन्प्रत्ययः शित्त्वात्पिबादेशः नित्त्वादाद्युदात्तः । आववृत्रन् वृतुवर्तनेइत्यस्यलङिशप् बहुलंछन्दसीतितस्यशपःश्लुः व्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिझेरुडागमः ॥ १५ ॥

अथषोडशी—

नत्वा॑गभी॒रःपु॑रुहू॒त॒सिन्धु॒र्नाद्र॑य॒ःपरि॒षन्तो॑वरन्त ।
इ॒त्थासखि॑भ्यइषि॒तोयदि॒न्द्रादृ॒ह्लं॑चि॒दरु॑जो॒गव्यं॑मू॒र्वम् ॥ १६ ॥

Funding by IKS-MoE

न । त्वा । गभीरः । पुरुऽहूत । सिन्धुः । न । अद्रयः । परि ।
सन्तः । वरन्त । इत्था । सखिऽभ्यः । इषितः । यत् । इन्द्र ।
आ । दृळ्हम् । चित् । अरुजः । गव्यम् । ऊर्वम् ॥ १६ ॥

हेपुरुहूतेन्द्र गभीरोगंभीरः सिन्धुःसमुद्रःत्वात्वांनवारयति ततःपरि परितोवर्तमानाःसन्तोद्रयःशैलाःत्वांनवरन्त नवारयन्ति किन्तु त्वामनुसृत्यवर्तन्ते यद्यस्मादित्था इत्थमनेनप्रकारेण सखिभ्यः सखिभिर्देवैरिषितः प्रार्थितस्त्वं दृह्ळंचिदतिप्रबलमपि गव्यं गविभवमवटेवर्तमानमूर्वमूर्वानलमारुजः सम्यगभांक्षीः ॥ गभीरः गाधृप्रतिष्ठालिप्सयोर्ग्रन्थेच अस्मादीरट्प्रत्ययः धकारस्यभकारः आकारस्यह्रस्वश्च गभीरगंभीरावित्यनेननिपात्यते चित्स्वरः । सिन्धुः स्यन्दूप्रस्रवणे स्यन्देःसंप्रसारणंधश्चेत्युप्रत्ययः संप्रसारणं दकारस्यधकारः निदित्यनुवृत्तेराद्युदात्तः । परिषन्तः सन्तः अस्तेःशतरिरूपं उपसर्गप्रादुर्भ्यामस्तिर्यच्परइतिषत्वं केचित्परेःक्रियान्वयमिच्छन्ति तदा षत्वमनुपपन्नं । परि निपातस्वरः । सन्तः प्रत्ययस्वरः । वरन्त वृञ्वरणे भौवादिः लङिरूपं निघातः । अरुजः रुजोभङ्गेइत्यस्य लङिरूपं ॥ गव्यं गोर्विकारइत्यर्थेगोपयसोर्यदितियत् यतोनावइत्याद्युदात्तत्वम् ॥ १६ ॥

अथसप्तदशी—

शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ ।
शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ॥ १७ ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् ।
वाजऽसातौ । शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् ।
वृत्राणि । सम्ऽजितम् । धनानाम् ॥ १७ ॥ ११ ॥

एषाऋक्पूर्वमेवव्याख्याता ॥ १७ ॥

॥ इतितृतीयस्यद्वितीयेएकादशोवर्गः ॥ ११ ॥

प्रपर्वतानामितित्रयोदशर्चंचतुर्थंसूक्तम् अत्रेयमनुक्रमणिका—प्रपर्वतानांसप्तोनासंवादोनदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्रनदीवाक्यं चतुर्थीषष्ठ्यष्टमीदशम्यः षष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टुबिति । अत्रचतुर्थीषष्ठ्यष्टमीदशमोनांनदीवाक्यत्वान्नद्यएवऋषयः शिष्टानांविश्वा-

मित्रवाक्यत्वात्सएवऋषिः अन्त्यानुष्टुप् शिष्टास्त्रिष्टुभः इन्द्रोदेवता यद्यपि षष्ठ्यांसप्तम्यांच मिश्वामित्रेणनद्यःस्तूयन्ते तथापि इन्द्रएवदेवता सूक्तविनियोगोलैङ्गिकः । पुराकिलविश्वामित्रःपैजवनस्यसुदासोराज्ञःपुरोहितोबभूव सचपौरोहित्येनलब्धधनः सर्वंधनमादायविपाट्छुतुद्र्योःसंभेदमाययावनुययुरितरे अथोत्तितीर्षुर्विश्वामित्रोगाधजले तेनद्यौ दृष्ट्वोत्तरणार्थमाद्याभिस्तिसृभिस्तुष्टाव ।

सैषासूक्तेप्रथमा–

प्रपर्व॑तानामुश॒तीउ॒पस्था॒दश्वे॑इव॒विषि॑ते॒हास॑माने ।
गावे॑वशु॒भ्रेमा॒तरा॑रिहा॒णेविपा॑ट्छुतु॒द्रीपय॑साजवेते ॥ १ ॥

प्र । पर्व॑तानाम् । उ॒श॒ती इति॑ । उ॒पऽस्था॑त् । अश्वे॑ इ॒वेत्यश्वे॑ऽइव । वि॒सि॑ते॒इति॒ विऽसि॑ते । हास॑माने॒ इति॑ । गावा॑ऽइव । शु॒भ्रे इति॑ । मा॒तरा॑ । रि॒हा॒णे इति॑ । विऽपा॑ट् । शु॒तु॒द्री । पय॑सा । ज॒वे॒ते॒ इति॑ ॥१॥

पर्वतानांशैलानामुपस्थादुत्सङ्गान्निर्गत्योशती समुद्रगमनंकामयमाने गमनेदृष्टान्तः–अश्वेइववडवे यथाविषिते मन्दुरातोविमुक्तेहासमानेअन्योन्यंजवेनस्पर्धमाने यद्वा हृष्यन्त्यौ अश्वेइव वडवेइव त्वरयागच्छन्त्यौ परस्परंहृष्यन्त्यौ तथा गावेवशुभ्रे यथा द्वेगावौ शोभमानेवर्तेते तद्वच्छुभ्रेशोभमाने किञ्च मातरा यथामातरौधेनूरिहाणे अन्तर्णीतसनर्थोलिहिः वत्सं जिह्वयालेढुमिच्छन्त्यौशीघ्रंगच्छतः तद्वत्समुद्रंगन्तुंजवाद्गच्छन्त्यौपयसासंयुक्ते विपाट्कूलविपाटनाद्विपाशनाच्छतपुत्रमरणोद्भूततमोवृतेर्मुमूर्षोर्वसिष्ठस्यपाशाअस्यांव्यपास्यन्त विमोचनाद्वाविपाट्शुतुद्री शुक्षिप्रंतुन्नातुन्नेव द्रवतिगच्छतीतिशुतुद्री एतन्नामकेनद्यौ प्रजवेते समुद्रंप्रति शीघ्रंगच्छतः अत्रनिरुक्तं–पर्वतानामुपस्थादुपस्थानादुशत्यौकामयमानेअश्वेइवविमुक्तेइतिवाविषण्णेइतिवाहासमानेहासतिस्पर्धायांहर्षमाणेवागावाविवशुभ्रेशोभनेमातरौसंरिहाणेविपाट्छुतुद्र्यौपयसाप्रजवेतेइति । उशती वशकान्तौ अस्यशतुर्ङित्त्वाद्ग्रहिज्यावयीत्यादिनासंप्रसारणं । विषिते षिञ्बन्धनेइत्यस्यकर्मणिनिष्ठा संहितायांपरिनिविभ्यःसेवसितसयसिवुसहेत्यादिना षत्वं गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वं । हासमाने हासतिःस्पर्धाकर्मा हसेहसने वाशानच् तस्य लसार्वधातुकस्वरेकृतेधातुस्वरः । रिहाणे लिहआस्वादने स्वरितेत्त्वादुभयपदीशानच् अदादित्वाच्छपोलुक् लकारस्यरेफश्छान्दसः रेफमवलम्ब्यणत्वं चित्त्वादन्तोदात्तः । विपाट् पटगतौ पश-

---

१ नि० ९. ३९. ।

Funding by IKS-MoE

बाधनस्पर्शनयोरितिवाण्यन्तावेतौविपूर्वौ शकारस्यव्रश्चादिनाषत्वं। शुतुद्री छान्दसीरूपसिद्धिः। जवेते जुङ्गतौ भौवादिः ङित्त्वादात्मनेपदं आतोङितइतियादेशः निघातः॥ १ ॥

अथद्वितीया–

इन्द्रेषितेप्रसवंभिक्षमाणेअच्छासमुद्रंरथ्येवयाथः।
समाराणेऊर्मिभिःपिन्वमानेअन्यावामन्यामप्येतिशुभ्रे ॥ २ ॥

इन्द्रेषिते इतीन्द्रऽइषिते। प्रऽसवम्। भिक्षमाणे इति। अच्छ।
समुद्रम्। रथ्याऽइव। याथः। समाराणे इति सम्ऽआराणे।
ऊर्मिऽभिः। पिन्वमाने इति। अन्या। वाम्। अन्याम्। अपि।
एति। शुभ्रे इति॥ २ ॥

हेनद्यौ इन्द्रेषिते इन्द्रेणप्रेषिते प्रसवंतस्येन्द्रस्यानुज्ञांभिक्षमाणेप्रार्थयमाने युवांसमुद्रमच्छाभिमुख्येनयाथोगच्छथः तत्रदृष्टान्तः–रथ्येवेति यथारथिनौलक्ष्यंदेशमभिगच्छतःतद्वत् किंकुर्वत्यौ समाराणे परस्परंसंगच्छन्त्यौ तथा ऊर्मिभिस्तरङ्गैःपिन्वमानेपरिसरप्रदेशंसन्तर्पयन्त्यौ शुभ्रे शोभमाने युवांसमुद्रंगच्छथइतिपूर्वेणान्वयः तथा वांयुवयोर्मध्ये अन्याएकाअन्यामपरांनदीमप्येति अपिगच्छति परस्परमैक्यमापद्यतेइत्यर्थः॥ इन्द्रेषिते इषगतावित्यस्यकर्मणिनिष्ठायास्तीषसहेत्यादिनाइडागमः तृतीयाकर्मणीतिपूर्वपदस्वरः। प्रसवं षूप्रेरणेइत्यस्य अप् थाथादिस्वरः। भिक्षमाणे भिक्षयाञ्चायां आत्मनेपदी शानचोलसार्वधातुकस्वरेणानुदात्तत्वेधातुस्वरः। रथ्येव रथस्येमौ तस्येदमित्यर्थे रथाद्यदितियत्प्रत्ययः तित्स्वरः इवेनविभक्त्यलोपइत्यादि। याथः यातेर्लटिरूपं।समारणे ऋगतावित्यस्यलिट् संपूर्वस्यार्तेःसमोगमीत्यादिनात्मनेपदत्वात्तस्यकानजादेशः ऋच्छत्यृतामितिगुणः। पिन्वमाने पिविसेचने भूवादिः लसार्वधातुकस्वरेणशानचोनुदात्तत्वेधातुस्वरः ॥ २ ॥

अथतृतीया–

अच्छासिन्धुंमातृतमामयासंविपाशमुर्वींसुभगामगन्म।
वत्समिवमातरासंरिहाणेसमानंयोनिमनुसंचरन्ती ॥ ३ ॥

अच्छ । सिन्धुम् । मातृऽतमाम् । अयासम् । विऽपाशम् । उर्वीम् ।
सुऽभगाम् । अगन्म । वत्सम्ऽइव । मातरा । संरिहाणे इति सम्ऽरिहाणे ।
समानम् । योनिम् । अनु । सञ्चरन्तीइति सम्ऽचरन्ती ॥ ३ ॥

हेनद्यौ मातृतमां अतिशयेनमातरंसिंधुंस्रवन्तीं शुतुद्रीं त्वामच्छाभिमुख्येनायासं विश्वामित्रोऽहंप्राप्तोऽभूवं तथा उर्वीमहतींसुभगांसौभाग्यवतींविपाशंत्वामगन्म वसंप्राप्ताःस्म किं कुर्वत्यौ मातरा मातरौद्वेधेनूवत्समिवसंरिहाणे अन्तर्णीतसनर्थोलिहिः जिह्वयालेढुमिच्छन्त्यौ यथावत्समनुगच्छतःतद्वत समानमेकंयोनिंस्थानंसमुद्रमनुअभिलक्ष्यसञ्चरन्तीसम्यक्चरन्त्यौ युवामयासमितिपूर्वेणान्वयः ॥ अयासं याप्रापणेइत्यस्यरूपम् इडभावश्छान्दसः । अगन्म गमेर्लङि बहुलंछन्दसीतिशपोलुक् म्वोश्चेतिमकारस्यनकारः निघातः । सञ्चरन्ती चरतिर्गत्यर्थः तृतीयायुक्तत्वाभावादात्मनेपदाभावः शतुर्लसार्वधातुकस्वरेणानुदात्तत्वेकृतेधातुस्वरः ॥३॥

अथचतुर्थी–

एनावयंपयसापिन्वमानाअनुयोनिंदेवकृतंचरन्तीः ।
नवर्तवेप्रसवःसर्गतक्तःकिंयुर्विप्रोनद्योजोहवीति ॥ ४ ॥

एना । वयम् । पयसा । पिन्वमानाः । अनु । योनिम् ।
देवऽकृतम् । चरन्तीः । न । वर्तवे । प्रऽसवः । सर्गऽतक्तः ।
किम्ऽयुः । विप्रः । नद्यः । जोहवीति ॥ ४ ॥

एवंस्तुतेनद्यौ विश्वामित्रंप्रत्यूचतुः एना एनेनपयसापिन्वमानाः संतर्पयन्त्यः देवकृतं देवेनेन्द्रेणकृतं संदिष्टं योनिं स्थानं समुद्रमनु अनुलक्षीकृत्य चरन्तीर्गच्छन्त्योवयमास्महे द्वयोर्बहुवचनंपूजार्थं तासामस्माकंसर्गतक्तः सर्गेगमनेप्रवृत्तः प्रसवउद्योगः नवर्तवेनिवर्तनायनभवति किंयुः किमिच्छन्नसौविप्रोब्राह्मणोनद्योनदीरस्मान्जोहवीति भृशमाह्वयति ॥ एना इदम्शब्दस्यतृतीयायाएनादेशः सुपांसुलुगितितृतीयायाआजादेशः ऊडिदमितिविभक्तेरुदात्तत्वं । पिन्वमानाः पिविसेचने । देवकृतं तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । वर्तवे वृतुवर्तने तुमर्थेतवेन्प्रत्ययः नित्स्वरः । सर्गतक्तः क्तेचेतिपूर्वपदप्रकृतिस्वरः । किंयुः किमिच्छन् क्यचोमान्ताव्ययप्रतिषेधइतिछान्दसत्वादत्रप्रतिषेधोनभवतीतिक्यच् क्या-

Funding by IKS-MoE

च्छन्दसीत्युप्रत्ययः प्रत्ययस्वरः । नद्यः छान्दसोयणादेशः । जोहवीति ह्वयोयङ्लुकि अभ्यस्तस्यचेतिसंप्रसारणेकृते गुणोयङ्लुकोरित्यभ्यासस्यगुणः यङोवेतितिपइडागमः । गुणः निघातः ॥ ४ ॥

अथपञ्चमी–

रमध्वंमेवचसेसोम्यायऋतावरीरुपमुहूर्तमेवैः ।
प्रसिन्धुमच्छाबृहतीमनीषावस्युरह्वेकुशिकस्यसूनुः ॥ ५ ॥ १२ ॥

रमध्वम् । मे । वचसे । सोम्याय । ऋतऽवरीः । उप । मुहूर्तम् ।
एवैः । प्र । सिन्धुम् । अच्छ । बृहती । मनीषा । अवस्युः ।
अह्वे । कुशिकस्य । सूनुः ॥ ५ ॥ १२ ॥

विश्वामित्रोनदीःप्रतिब्रूते–ऋतावरीः ऋतमुदकंतद्वत्योहेनद्यः यूयंमेविश्वामित्रस्यममसोम्याय उत्तीर्याहंसोमंसंपादयामीत्येवंसोमसंपादिनेवचसेतदर्थं एवैःपञ्चम्यर्थेतृतीया शीघ्रगमनेभ्यः मुहूर्तं मुहूर्तमात्रमुपरमध्वं उपपूर्वोरमिरुपसंहारेवर्तते क्षणमात्रंशीघ्रगमनात्उपरताभवत सामान्येननदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीपुरोवर्तिनींशुतुद्रींप्रतिब्रूते कुशिकस्यराजर्षेःसूनुर्विश्वामित्रोऽहंबृहतीमहत्यामनीषयास्तुत्याअवस्युः आत्मनोरक्षणमिच्छन्सन् सिन्धुंशुतुद्रींत्वामिच्छामि मुख्येनप्राह्वे प्रकर्षेणाह्वयामि अत्रनिरुक्तम्–उपरमध्वंमेवचसेसोम्यायसोमसंपादिनऋतावरीर्ऋतवत्यऋतमित्युदकनामप्रत्यृतंभवतिमुहूर्तमेवैरयनैरवनैर्वाप्राभिह्वयामिसिन्धुंबृहत्यामहत्यामनीषयामनसईषयास्तुत्याप्रज्ञयावावनायकुशिकस्यसूनुःकुशिकोराजाबभू[१]वेति ॥ रमध्वं रमुउपरमे उपपूर्वाद्रमतेर्विभाषाकर्मकादित्यात्मनेपदम् । ऋतावरीः ऋतशब्दान्मत्वर्थेछन्दसीवनिपाविति वनिप् वनोरचेतिङीप् रेफश्चान्तादेशः वाछन्दसीतिसवर्णदीर्घः आमन्त्रितस्यपादादित्वात्षाष्ठिकमाद्युदात्तत्वम् । एवैः इण्गतौ इण्शीङ्भ्यांवन् आर्धधातुकलक्षणोगुणः नित्स्वरः । बृहती मनीषा उभयत्रतृतीयायाःपूर्वसवर्णदीर्घः । अवस्युः अवोरक्षणमिच्छन् सुपआत्मनःक्यच् नःक्यइतिनकारान्तस्यपदसंज्ञायानियमितत्वादत्रसकारस्यरुर्नभवति क्याच्छन्दसीत्युप्रत्ययः । अह्वे ह्वयतेर्लुङि सिचआत्मनेष्वन्यतरस्यामित्यङादेशः गुणः निघातः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेद्वादशोवर्गः ॥ १२ ॥

---

[१] नि० २. २५ ।

अथषष्ठी–

इन्द्रोअस्माँअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनाम् ।
देवोनयत्सवितासुपाणिस्तस्यवयंप्रसवेयामउर्वीः ॥ ६ ॥

इन्द्रः । अस्मान् । अरदत् । वज्रऽबाहुः । अप । अहन् ।
वृत्रम् । परिऽधिम् । नदीनाम् । देवः । अनयत् । सविता ।
सुऽपाणिः । तस्य । वयम् । प्रऽसवे । यामः । उर्वीः ॥ ६ ॥

नद्यःप्रत्यूचुः हेविश्वामित्र वज्रबाहुः वज्रयुक्तोबाहुर्यस्यासौवज्रबाहुः तादृशोबलवानिन्द्रः नदीरस्मानरदत् रदतिःखनतिकर्मा अखनत् कथमखनत् उच्यते–नदीनांशब्दकारिणीनामपांपरिधिं परितोनिहितमुदकमन्तःकृत्वा परितोवर्तमानमित्यर्थः तादृशंवृत्रं वृणोत्याकाशमितिवृत्रोमेघः तंमेघमपाहन् जघान तस्मिन्हतेआपःपतिताः ताभिर्गच्छन्तीभिर्वयं खाताः एवंमेघहननद्वारेणाखनत् नकेवलमखनत् किंतर्हि सवितासर्वस्यजगतःप्रेरकः सुपाणिःशोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात् तादृशोदेवोद्योतमानइन्द्रः अस्माननयत् मेघभेदनंकृत्वोदकप्रेरणेनसमुद्रमपूरयत् तस्यतादृशसामर्थ्योपेतस्येन्द्रस्य प्रसवेऽभ्यनुज्ञायांवर्तमानाउर्वीः उदकैःप्रभूतावयंयामोगच्छामः नतववचनादुपरमामहे उक्तार्थंयास्कोब्रवीति–इन्द्रोअस्मानरदद्वज्रबाहुरदतिःखनतिकर्मापाहन्वृत्रंपरिधिंनदीमितिव्याख्यातंदेवोनयत्सवितासुपाणिःकल्याणपाणिःपाणिःपणायतेःपूजाकर्मणःप्रगृह्यपाणीदेवान्पूजयन्तितस्यवयंप्रसवेयामउर्वीः उर्व्यइति ॥ अरदत् रदतेर्लङिरूपं । वज्रबाहुः बहुव्रीहौपूर्वपदस्वरः । अहन् हन्तेर्लङिरूपं निघातः । परिधिं डुधाञ्धारणपोषणयोरित्यस्मात्कर्मण्युपसर्गेघोःकिरितिकिप्रत्ययः आतोलोपः कृदुत्तरपदस्वरः । अनयत् नयतेर्लङिरूपं । सुपाणिः पणव्यवहारेस्तुतौच अशिपणाय्योरुडायलुकौचेतीण् आयलुक् बहुव्रीहौनञ्सुभ्यामितिस्वरः । प्रसवे षूप्रेरणे ऋदोरबितिभावेअप्प्रत्ययः थाथघञ्क्तेत्युत्तरपदान्तोदात्तत्वम् । यामः याप्रापणेइत्यस्यलटिरूपं निघातः । उर्वीः उरुशब्दाद्वोतोगुणवचनादितिङीष् वाछन्दसीतिसवर्णदीर्घः । प्रत्ययस्वरः॥६॥

अथसप्तमी–

प्रवाच्यंशश्वधावीर्यं१तदिन्द्रस्यकर्मयदहिंविवृश्चत् ।
विवज्रेणपरिषदोजघानायन्नापोयनमिच्छमानाः ॥ ७ ॥

नि० २. २६. ।

Funding by IKS-MoE

प्रऽवाच्यम् । शश्वधा । वीर्यम् । तत् । इन्द्रस्य । कर्म । यत् ।
अहिम् । विऽवृश्चत् । वि । वज्रेण । परिऽसदः । जघान । आयन् ।
आपः । अयनम् । इच्छमानाः ॥ ७ ॥

योऽयमिन्द्रोऽहिंमेघंविवृश्चत् उदकप्रेरणार्थंजघानेतियत्कर्मछेदनरूपं तदिदंतस्येन्द्रस्यवीर्यंसामर्थ्यं शश्वधासर्वदाप्रवाच्यं प्रकर्षेणवचनीयं तथासइन्द्रः परितःसीदतःआसीनान्प्रतिबन्धकारिणोसुरान्वज्रेणविजघान अथायनंस्थानमिच्छमानाइच्छन्त्यआपआयन्यान्ति ॥ प्रवाच्यं वचपरिभाषणेइत्यस्मादृहलोर्ण्यदितिण्यत् णित्त्वादुपधावृद्धिः वचोशब्दसंज्ञायामितिकुत्वाभावः व्यत्ययेनाद्युदात्तत्वं यद्वा वाचयतेरचोयत् यतोनावइतिस्वरः । शश्वधा शश्वच्छब्दात्स्वार्थेधाप्रत्ययः तकारलोपश्चद्रष्टव्यः । विवृश्चत् ओव्रश्चूछेदने तुदादिः लङि ग्रहिज्यावयीत्यादिनासंप्रसारणं सहसुपेत्यत्रसहेतियोगविभागात्समासः समासस्वरः । परिषदः क्विप् संहितायांसदिरप्रतेरितिषत्वम् । जघान हन्तेर्लिटिणलिरूपं निघातः । आयन् अयगतावित्यस्यलङिरूपं पादादित्वादनिघातः । इच्छमानाः इषुइच्छायामित्यस्माद्व्यत्ययेनशानच् तस्यलसार्वधातुकस्वरेकृतेप्रत्ययस्वरः ॥ ७ ॥

अथाष्टमी—

एतद्वचोजरितर्मापिमृष्ठाआयत्तेघोषानुत्तरायुगानि ।
उक्थेषुकारोप्रतिनोजुषस्वमानोनिकःपुरुषत्रानमस्ते ॥ ८ ॥

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते ।
घोषान् । उत्ऽतरा । युगानि । उक्थेषु । कारो इति । प्रति । नः ।
जुषस्व । मा । नः । नि । करिति कः । पुरुषऽत्रा । नमः । ते ॥ ८ ॥

नद्यःप्रसङ्गादिन्द्रस्तोत्रंकृत्वाविश्वामित्रंप्रत्यूचुः—जरितः स्तोतर्हेविश्वामित्र तेत्वदीयंयत्संवादात्मकंवचः त्वंनोऽभीत्याघोषानुद्घोयषन्वर्तसे एतद्वचोमापिमृष्ठाः माविस्मार्षीः किंकारणं उत्तरायुगानि उत्तरेषुयाज्ञिकेषुयुगेष्वहःसुउक्थेषु कारोशस्त्राणांकर्तस्त्वं नोऽस्मान्प्रतिजुषस्व संवादात्मकेनतेनवाक्येनप्रतिसेवस्व इदानींनोऽस्मान्पुरुषत्रापुरुषेषुमानिकः उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेननितरांपुंवत्प्रागल्भ्यंमाकार्षीः तेतुभ्यंनमः ॥ मृष्ठाः मृजूष्शुद्धावित्य-

स्यलङि व्यत्ययेनात्मनेपदं अदादित्वाच्छपोलुक् व्रश्चादिनाषत्वं निघातः। घोषान् घुषिर्संशब्दनेइत्यस्यशतरि सर्वविधीनांछन्दसिविकल्पितत्वादतोगुणेइतिपररूपत्वाभावः सवर्णदीर्घः शतुर्लसार्वधातुकस्वरेकृतेधातुस्वरः । युगानि युजिर्योगे उंछादिषुघञंतत्वेननिपातनादगुणत्वं विशिष्टविषयंचनिपातनमिष्यते कालविशेषेरथाद्युपकरणेचेतितत्रपाठादेवान्तोदात्तत्वं कालाध्वनोरत्यन्तसंयोगेइतिद्वितीया । कारो करोतेः कृवापाजिमीत्यादिनाउण्प्रत्ययः आमन्त्रितत्वान्निघातः। कः करोतेर्लुङि च्लेः मन्त्रेघसेत्यादिनालुक् हल्ङ्यादिनासिचोलोपः नमाङ्योगेइत्यडभावः । पुरुषत्रा देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलमितिसप्तम्यर्थेत्राप्रत्ययः प्रत्ययस्वरः ॥ ८ ॥

अथनवमी—

ओषुस्व॑सारःका॒रवे॑शृणोतय॒यौवो॑दू॒राद॑न॑सा॒रथे॑न ।
निषून॑मध्व॒ंभव॑तासुपा॒राअ॑धोअ॒क्षाःसि॑न्धवःस्रो॒त्याभिः॑ ॥ ९ ॥

ओ इति॑ । सु । स्व॒सा॒रः॒ । का॒रवे॑ । शृ॒णो॒त॒ । य॒यौ । वः॒ । दू॒रात् ।
अन॑सा । रथे॑न । नि । सु । न॒म॒ध्व॒म् । भव॑त । सु॒ऽपा॒राः ।
अ॒ध॒ःऽअ॒क्षाः । सि॒न्ध॒वः॒ । स्रो॒त्याभिः॑ ॥ ९ ॥

विश्वामित्रोनदीःप्रत्युवाच स्वसारोभगिन्यःसिन्धवोहेनद्यः कारवे स्तोत्रंकुर्वाणस्यममवचनं सुसुष्ठुओशृणोत शृणुतैव अनसाशकटेनरथेनचसहदूराद्विप्रकृष्टाद्देशाद्वोयुष्मान्ययौ प्राप्तोऽस्मि यूयं सु सुष्ठुनिनमध्वं आत्मनास्वयंप्रह्वाभवत तथासुपाराःरथादीनांतीरात्सुखेनावरोहणारोहणेयथास्यातांतथाशोभनरोधसश्चभवत किंच यूयंस्रोत्याभिः स्रवणशीलाभिरद्भिःअधोअक्षाः रथाङ्गस्याक्षस्याधस्ताद्भवत यदा आपोऽक्षस्याधस्ताद्भवन्तितदारथादीनिनेतुंशक्यन्ते तस्मात्तत्परिमाणोदकाभवतेत्यभिप्रायः ॥ ओइतिप्रगृह्यसंज्ञा । शृणोत श्रुश्रवणेइत्यस्यलोटितप्रत्ययस्यतप्तनप्तनथनाश्चेतितबादेशः पित्त्वाद्गुणः निघातः। ययौ याप्रापणेइत्यस्य भूतमात्रेलिट्युत्तमे णलिआतऔणलइत्यौकारः एकादेशस्वरः। वः युष्मच्छब्दस्यद्वितीयायाबहुवचनस्यवस्नसावितिवसादेशः। सु निपातस्येतिसंहितायांदीर्घः । नमध्वं णमुप्रह्वत्वेशब्देइत्यस्यकर्मकर्तरिनदुहस्नुनमांयक्चिणावितिप्रतिषेधाद्यगभावः। अधोअक्षाः अधरशब्दस्यपूर्वाधरावराणामसिपुरधवश्चैषामित्यसिप्रत्ययः अधादेशश्च अक्षशब्दोऽशूव्याप्तावित्यस्मादशे-

देवनइतिसप्रत्ययान्तः कृदुत्तरपदप्रकृतिस्वरः । सिन्धवः आमन्त्रितत्वान्निघातः । स्रोत्याभिः स्रोतःशब्दात्स्रोतसोविभाषाड्यड्यावितिड्यप्रत्ययः डित्त्वाट्टिलोपः प्रत्ययस्वरः ॥ ९ ॥

अथदशमी–

आ ते॑ कारो शृणवामा॒ वचां॑सि य॒याथ॑ दू॒राद॑नसा॒ रथे॑न ।
नि ते॑ नंसै पी॒प्या॒नेव॒ यो॒षा॒ मर्या॑येव क॒न्या॑ शश्व॒चै ते॑ ॥ १० ॥ १३ ॥

आ । ते॒ । का॒रो॒ इति॑ । शृ॒ण॒वा॒म॒ । वचां॑सि । य॒याथ॑ । दू॒रात् ।
अनं॑सा । रथे॑न । नि । ते॒ । नं॒सै॒ । पी॒प्या॒नाऽइ॑व । योषा॑ ।
मर्या॑यऽइव । क॒न्या॑ । श॒श्व॒चै । त॒ इति॑ ते ॥ १० ॥ १३ ॥

नद्यःपूर्वंविश्वामित्रवाक्यंप्रत्याख्यायानयर्चातस्यवाक्यमाशुश्रुवुः कारोस्तोत्रंकुर्वाण हेविश्वामित्र ते तव वचांसि इमानिवाक्यानि आशृणवाम कार्त्स्न्येनशृणुमः तवसमीहितं प्रयोजनंकुर्मइत्यर्थः अनसाशकटेनरथेनचसहययाथ यतोदूरादागतोसि वयंचतेत्वदर्थंनिनंसैनीचैर्नमाम प्रत्येकविवक्षयात्रैकवचनं रथेनगन्तुंगाधोदकाभवामेत्यर्थः तत्रदृष्टान्तः–पीप्यानेवयोषा पीप्यानापुत्रंस्तनंपाययन्तीयोषामातायथाप्रह्वीभवति दृष्टान्तान्तरं–यथाकन्या युवतिर्मर्यायेवमनुष्यायपित्रेभ्रात्रेवाशश्वचैपरिष्वजनायनम्राभवतितद्वत् तेत्वदर्थंप्रह्वीभवामः तेइतिपुनरुक्तिरादरार्था एतामृचंयास्कएवंव्याचष्टे–आशृणवामतेकारोवचनानियाहिदूरादनसाचरथेनचनिनमामतेपाययमानेवयोषापुत्रंमर्यायेवकन्यापरिष्वजनायनिनमाइति[1] वेति ॥ कारो संबुद्धौशाकल्यस्येतावितिप्रगृह्यसंज्ञा । शृणवाम श्रुश्रवणेइत्यस्यलोटि आडुत्तमस्यपिच्चेत्याडागमः पित्त्वाद्गुणः निघातः । ययाथ याप्रापणेइत्यस्यभूतमात्रेलिटिथलि एकाचउपदेशेनुदात्तादितीट्प्रतिषेधः लित्स्वरः । अनसा सहार्थेतृतीया । नंसै णमुप्रह्वत्वेइत्यस्यलेट्युत्तमे लेटिसिब्बहुलमितिसिप् वैतोन्यत्रेतिएकारादेशः निघातः । पीप्यानेव पीङ्पानेइत्यस्यान्तर्भावितण्यर्थस्यलिटिकानचिरूपं चित्स्वरः । योषा युमिश्रणे वृतॄवदिहनीत्यादिना सप्रत्ययः यौतीतियोषा वृषादित्वादाद्युदात्तः । शश्वचै ष्वंजपरिष्वङ्गेइत्यस्मात्संपदादिलक्षणोभावेक्विप् पृषोदरादित्वादिष्टरूपसिद्धिः अन्तोदात्तश्च ॥ १० ॥

॥ इतितृतीयस्यद्वितीयेत्रयोदशोवर्गः ॥ १३ ॥

---

[1] नि० २. २७. ।

अथैकादशी—

यदङ्गत्वांभरताःसंतरेयुर्गव्यन्ग्रामंइषितइन्द्रंजूतः ।
अर्षादहंप्रसवःसर्गतक्तआवोंवृणेसुमतिंयज्ञियानाम् ॥ ११ ॥

यत् । अङ्ग । त्वा । भरताः । सम्ऽतरेयुः । गव्यन् । ग्रामः ।
इषितः । इन्द्रऽजूतः । अर्षात् । अह । प्रऽसवः । सर्गऽतक्तः ।
आ । वः । वृणे । सुऽमतिम् । यज्ञियानाम् ॥ ११ ॥

विश्वामित्रोनदीःप्रत्युवाच अङ्गेत्यामन्त्रणे हेनद्यः यद्यस्माद्युष्माभिरुत्तितीर्षोर्ममोत्तरणमभ्यनुज्ञातं तस्माद्भरताःभरतकुलजामदीयाः सर्वेत्वापरस्परमेकतामापन्नांनदींत्वांसन्तरेयुः सम्यगुत्तीर्णाभवेयुः तदेवविशिनष्टि—गव्यन्गाउदकानितरीतुमिच्छन् इषितस्त्वयाभ्यनुज्ञातः इन्द्रजूतः युष्माकंप्रवर्तकेनेन्द्रेणचप्रेरितोग्रामोभरतानांसंघः अर्षात्संतरेत् यतः सर्गतक्तः गमनायप्रवृत्तः प्रसवस्तेषामुद्योगोऽहपूर्वंयुष्माभिरनुज्ञातः अहंतुयज्ञियानांयज्ञार्हाणांवोयुष्माकंसुमतिंशोभनांस्तुतिमावृणे सर्वतःसंभजे ॥ भरताः भरतशब्दादुत्सादित्वादञ् तस्ययञञोश्चेतिलुक् अतच् प्रत्ययस्वरः । संतरेयुः । तरतेर्लिङिझुसिरूपं झेर्लसार्वधातुकस्वरे धातुस्वरः तिङिचोदात्तवतीतिगतेर्निघातः । गव्यन् गाआत्मनइच्छन् सुपःक्यच् एकादेशस्वरः । ग्रामः ग्रसतेराचइतिमन्प्रत्ययःआकारादेशश्च नित्स्वरः । इन्द्रजूतः जूइतिसौत्रोधातुर्गत्यर्थः श्र्युकःकितीतिनिष्ठायामितीट्प्रतिषेधः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । अर्षात् ऋषीगतावित्यस्य लेटि तिपि सिब्बहुलमितिसिप् लेटोडागमः एकाचइतीट्प्रतिषेधः गुणः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः । वृणे वृङ्संभक्तावित्यस्यलटिरूपम् । यज्ञियानां यज्ञर्त्विग्भ्यांघखञावितिघप्रत्ययः प्रत्ययस्वरः ॥ ११ ॥

अथद्वादशी—

अतारिषुर्भरतागव्यवःसमभक्तविप्रःसुमतिंनदीनाम् ।
प्रपिन्वध्वमिषयन्तीःसुराधाआवक्षणाःपृणध्वंयातशीभम् ॥१२॥

अतारिषुः । भरताः । गव्यवः । सम् । अभक्त । विप्रः । सुऽमतिम् ।
नदीनाम् । प्र । पिन्वध्वम् । इषयन्तीः । सुऽराधाः । आ ।
वक्षणाः । पृणध्वम् । यात । शीभम् ॥ १२ ॥

Funding by IKS-MoE

गव्यवः गाआत्मनइच्छन्तः भरताः भरतकुलजाः सर्वेंअतारिषुः तांनदींसमतरन् विप्रोमेधावीविश्वामित्रोनदीनांसुमतिंशोभनांस्तुतिंसमभक्त समभजत यूयंतुयथापूर्वंइषयन्तीः कुल्यादिद्वारान्नंकुर्वाणाअतएवसुराधाःशोभनधनोपेताः यूयंवक्षणाः कृत्रिमसरितः कुल्याः प्रपिन्वध्वं प्रकर्षेणतर्पयत आपृणध्वं ताःसर्वतःपूरयतच शीभंशीघ्रंयात गच्छतच । अतारिषुः तॄप्लवनतरणयोरित्यस्यलुङि सिचिवृद्धिःपरस्मैपदेष्वितिवृद्धिः अडागमस्वरः । गव्यवः सुपःक्यच् क्याच्छन्दसीत्युप्रत्ययः तस्यस्वरः । अभक्त भजसेवायामित्यस्यलुङिसिचोझलोझलीतिलोपः पादादित्वादनिघातः । पिन्वध्वं पिविसेचनेइत्यस्यलोटिरूपं निघातः । इषयन्तीः इषंकुर्वत्यः तत्करोतीतिणिच् णाविष्ठवत्प्रातिपदिकस्येतीष्ठवद्भावाट्टेरितिटिलोपः वाछन्दसीति सवर्णदीर्घः प्रत्ययस्वरः । पृणध्वं पृणप्रीणने लोटिरूपं व्यत्ययेनात्मनेपदं वाक्यभेदादनिघातः। यात याप्रापणेइत्यस्यलोटिरूपं अत्रापिननिघातः। शीभं शीभृकत्थने श्लाघ्यतेनेनतद्वानितिकरणेघञ् ञित्स्वरः ॥ १२ ॥

अथत्रयोदशी—

उद्वऊर्मिःशम्याहन्त्वापोयोक्त्राणिमुञ्चत ।
मादुष्कृतौव्येनसाघ्न्यौशूनमारताम् ॥ १३ ॥ १४ ॥

उत् । वः । ऊर्मिः । शम्याः । हन्तु । आपः । योक्त्राणि । मुञ्चत ।
मा । अदुःऽकृतौ । विऽएनसा । अघ्न्यौ । शूनम् । आ । अरताम् ॥१३॥१४॥

पूर्वमुत्तीर्णोविश्वामित्रोनदीरुक्त्वाधुनोत्तितीर्षुःपुनराह हेनद्यःवोयुष्माकंऊर्मिस्तरङ्गः शम्यायुगकीलाः युग्यकण्ठपार्श्वादिःसंलग्नारज्जवः उदूर्ध्वंयथाभवन्तितथाहंतुगच्छतु सतरङ्गोरज्जूनामधोगच्छत्वित्यभिप्रायः तथा हेआपःयूयं योक्त्राणि तारज्जूर्मुञ्चत यथा नस्पृशन्ति तथा यान्त्वित्यभिप्रायः व्येनसा विगतपापे अतएवादुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्यौअघ्न्येनकेनापितिरस्करणीयेविपाट्शुतुद्र्यौ रथानां शूनं समृद्धिमारतां आगच्छताम् एवंविश्वामित्रोनदीःस्तुत्वाताभिरनुज्ञातोतरदिति ॥ ऊर्मिः ऋगतौ अर्तेरूच्चेतिमिप्रत्ययः ऊरित्ययमादेशोधातोः ऋच्छतीत्यूर्मिः प्रत्ययस्वरः । शम्याः शमुउपशमे पोरदुपधादितियत्प्रत्ययः यतोनावइत्याद्युदात्तत्वम् । हन्तु हनहिंसागत्योरित्यस्यलोटिरूपं निघातः । योक्त्राणि युजिर्योगेकरणेदाम्नीशसयुयुजेत्यादिनाष्ट्रन्प्रत्ययः नित्स्वरः । मुञ्चत मुच्लृमोक्षणे निघातः ।

अदुष्कृतौ इसुसोःसामर्थ्येइतिविसर्जनीयस्यषत्वम् । व्येनसा बहुव्रीहौपूर्वपदस्वरः सुपोडादेशः । अघ्न्यौ हनहिंसागत्योरित्यस्य नञ्पूर्वस्य अघ्न्यादयश्चेतिनिपातनाद्यक् किच्चादुपधालोपः होहन्तेरितिघत्वं सर्वविधीनांछन्दसिविकल्पितत्वादत्रऔङःशीभावाभावः एकादेशस्वरः। शूनं शयतेर्नपुंसकेभावेक्तइतिक्तः यजादित्वात्संप्रसारणं हलइतिदीर्घत्वं ओदितश्चेतिनिष्ठानत्वं निष्ठाचद्व्यजनादित्याद्युदात्तः। अरतां ऋगतावित्यस्यलुङि च्लेःसर्तिशास्त्यर्तिभ्यश्चेत्यङादेशः ऋदृशोङिगुणः नमाङ्योगेइत्यडभावः निघातः ॥ १३ ॥

॥ इतितृतीयस्यद्वितीयेचतुर्दशोवर्गः ॥ १४ ॥

इन्द्रःपूर्भिदित्येकादशर्चंपंचमंसूक्तम् वैश्वामित्रं त्रैष्टुभं ऐन्द्रं अत्रानुक्रमणिका—इन्द्रःपूर्भिदेकादशेतिअग्निष्टोमेमाध्यंदिनसवनेब्राह्मणाच्छंसिशस्त्रेइन्द्रःपूर्भिदितिसूक्तम् । होत्रकाणामितिखण्डेसूत्रितम्—इन्द्रःपूर्भिदुदुब्रह्माणीति । पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिमाध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रेचातुर्विंशिकातिदिष्टस्याहीनसूक्तस्यस्थानेत्रीणिसंपातसूक्तानि तत्रेदंप्रथमं सूत्रितंच—इन्द्रःपूर्भिद्यएकइद्यस्तिग्मशृङ्गइति । उद्भिद्बलभिदोर्निष्केवल्येएतत्सूक्तंनिविद्धानीयं सूत्रितंच—इन्द्रसोममिन्द्रःपूर्भिदितिमध्यंदिनइति ।

तस्मिन्सूक्तेप्रथमा—

इन्द्रः॑पू॒र्भिदाति॑र॒द्दास॑म॒र्कैर्वि॒दद्व॑सु॒र्दय॑मानो॒विशत्रू॑न् ।
ब्रह्म॑जूतस्त॒न्वा॑वावृधा॒नोभूरि॑दात्र॒आपृ॑ण॒द्रोद॑सीउ॒भे ॥ १ ॥

इन्द्रः॑ । पूः॒ऽभित् । आ । अ॒ति॒र॒त् । दास॑म् । अ॒र्कैः । वि॒दत्ऽव॑सुः ।
दय॑मानः । वि । शत्रू॑न् । ब्रह्म॑ऽजूतः । त॒न्वा॑ । व॒वृ॒धा॒नः । भूरि॑ऽदात्रः ।
आ । अ॒पृ॒ण॒त् । रोद॑सी॒ इति॑ । उ॒भे इति॑ ॥ १ ॥

विश्वामित्रःस्तौति—पूर्भिदसुरपुरांभेत्ता अतएवविदद्वसुः वेदयद्भिःस्वमहिमप्रख्यापकैर्वसुभिर्युक्तः शत्रूनसुरान्विदयमानःविशेषेणहिंसन् तथाचयास्कः—विदद्वसुर्दयमानोविशत्रूनितिहिंसाकर्मेति[1] । तादृशइन्द्रोदासंदस्यतेनेनतमइतिदासोवासरस्तमर्कैरर्चनीयैःस्वतेजोभिरातिरत् समन्तादवर्धयत् इन्द्रस्यसूर्यात्मकत्वात् तथाचस्मृतिः—चैत्रमासेतपेदिन्द्रइति किञ्च

---

[1] नि० ४. १७. ।

Funding by IKS-MoE

ब्रह्मजूतःब्रह्मणास्तोत्रेणाकृष्टः यद्वा ब्रह्मणा जगत्स्रष्ट्राप्रेरितः तन्वा स्वशरीरेणवावृधानोवर्धमानः भूरिदात्रोदायतेलूयतेनेनशत्रुशिरइतिदात्रमायुधं बहुविधायुधोपेतः तादृशइन्द्रः उभे रोदसी द्यावापृथिव्यौ आपृणत् सर्वतोतर्पयत् ॥ पूर्भित् भिदिर्विदारणे क्विप् । अतिरत् तरतेर्व्यत्ययेनशः ऋतइद्धातोरितीत्वं निघातः । दासं करणेघञ् ञित्स्वरः । विदद्वसुः विदेरन्तर्भावितण्यर्थस्यशतरि अदादित्वाच्छपोलुकिसति प्रत्ययस्वरेणशतुरुदात्तत्वं बहुव्रीहौ पूर्वपदस्वरः । दयमानः दयदानगतिरक्षणहिंसाग्रहणेषु आत्मनेपदी लटःशानच् नलोकाव्ययेतिषष्ठीप्रतिषेधः । वावृधानः वृधुवर्धने कानचिरूपं संहितायामभ्यासस्य तुजादित्वाद्दीर्घः । भूरिदात्रः दाप्लवने करणे दाम्नीत्यादिनाष्ट्रन्प्रत्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरः। अपृणत् पृणप्रीणनेइत्यस्यलङ्ङितुदादित्वाच्छः निघातः । रोदसी रुदेरसुनिरूपं नित्स्वरः ॥ १ ॥

अथद्वितीया—

म॒खस्य॑तेतवि॒षस्य॒प्रजू॒तिमिय॑र्मि॒वाच॑म॒मृता॑य॒भूष॑न् ।
इन्द्र॑क्षिती॒नाम॑सि॒मानु॑षीणांवि॒शां॑दैवी॑नामु॒तपू॑र्व॒यावा॑ ॥ २ ॥

म॒खस्य॑ । ते॒ । त॒वि॒षस्य॑ । प्र । जू॒तिम् । इय॑र्मि । वाच॑म् ।
अ॒मृता॑य । भूष॑न् । इन्द्र॑ । क्षि॒ती॒नाम् । अ॒सि॒ । मानु॑षीणाम् ।
वि॒शाम् । दैवी॑नाम् । उ॒त । पू॒र्व॒ऽयावा॑ ॥ २ ॥

हेइन्द्र भूषन्त्वामलंकुर्वन् अहंमखस्य मंहनीयस्य स्तुत्यस्य तविषस्य बलवतस्तेतव जूतिंमनसाप्रेरितांवाचं स्तुतिलक्षणाममृतायान्नार्थंप्रेयर्मि प्रकर्षेणोच्चारयामि मानुषीणांक्षितीनांमनोर्जातानांमनुष्याणां उतापिच दैवीनांदेवसंबन्धिनीनांविशांप्रजानांपूर्वयावा अग्रतोगन्तात्वमसि । मखस्य महपूजायां महेर्हल्लोपश्चेतिहल्लोपइत्यनुवृत्तौमहेश्चेतिखप्रत्ययः हल्लोपश्च मह्यतेपूज्यतेसर्वैरितिमखः खान्तस्याश्मादेरित्यन्तोदात्तत्वं यद्यपिमकारादिर्भवति तथापि वचनसामर्थ्याद्भवति । तविषस्य तवतेष्टिषच्प्रत्ययः चित्स्वरः । जूतिं ऊतियूतीत्यादिनाक्तिनउदात्तत्वम् । इयर्मि अर्तिजुहोत्यादिः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं अभ्यासस्येतीयङादेशः पादादित्वान्ननिघातः अभ्यस्तस्वरः । भूषन् भूषअलङ्कारेइत्यस्यशतरिरूपं शतुर्लसार्वधातुकस्वरेधातुस्वरः । असि अस्तेर्लटिरूपं निघातः । मानुषीणां मनोर्जातावित्यञ् षुगागमः टिड्ढाणञितिङीप् ञित्स्वरः । दैवीनां देवाद्यञञावित्यञ् अत्रापिपूर्ववत्ङीप् ञित्स्वरः । पूर्वयावा याप्रापणेइत्यस्मादातोमनिन्क्वनिप्वनिपश्चेतिवनिप् कृदुत्तरपदस्वरः ॥ २ ॥

अथतृतीया–

इन्द्रो॑वृ॒त्रम॑वृणो॒च्छर्ध॑नीतिः॒प्रमा॒यिना॑ममिना॒द्वर्प॑णीतिः ।
अह॒न्व्यं॑समु॒शध॒ग्वने॑ष्वा॒विर्धेना॑अकृणोद्रा॒म्याणा॑म् ॥ ३ ॥

इन्द्र॑ः । वृ॒त्रम् । अ॒वृ॒णो॒त् । शर्ध॑ऽनीतिः । प्र । मा॒यिना॑म् ।
अ॒मि॒ना॒त् । वर्प॑ऽनीतिः । अह॑न् । विऽअं॑सम् । उ॒शध॑क् । वने॑षु ।
आ॒विः । धेना॑ः । अ॒कृ॒णो॒त् । रा॒म्याणा॑म् ॥ ३ ॥

शर्धनीतिः नयनंनीतिःकर्म शर्धप्रवृद्धंनीतिःकर्मयस्यसतथोक्तः सइंद्रोवृत्रमसुरं अवृणोद्बलेनारुधत् तथावर्पणीतिः युद्धेपरप्रहाराणांनिवारककर्माइन्द्रः मायिनां द्वितीयार्थेषष्ठी मायिनोऽसुरान्प्रामिनात् प्रकर्षेणावधीत् उशधक् शत्रुवधंकामयमानइन्द्रः वनेषुगूढचारिणमसुरंव्यंसं विगतांसंयथाभवतितथाहन् जघान अथ तस्मिन्रात्रिचरेगवामपहर्तरिहतेसति राम्याणांरमणंस्त्रीभिः सहक्रीडारामः तमर्हतीतिराम्याराात्रयः तासांरात्रीणामन्तःस्थिताः धेनाःगाः आविरकृणोत् प्रकटाअकरोत् रात्रीणामसुराक्रान्तत्वेतैत्तिरीयकम्–अहर्देवानामासीद्रात्रिरसुराणांतेसुरायद्देवानांवित्तंवेद्यमासीत्तेनसहरात्रिंप्राविशन्निति येदिवास्तोतारोराम्यास्तेषांवाचोधेनाइति ॥अवृणोत् वृञ्वरणेइत्यस्यलङिरूपं निघातः । शर्धनीतिः शर्धतिरुत्साहार्थः अस्मात्कर्मणिघञ् बहुव्रीहौपूर्वपदस्वरः । अमिनात् मीञ्हिंसायामित्यस्यलङि मीनातेर्निगमेइतिह्रस्वः निघातः । अहन् हन्तेर्लङिरूपम् । उशधक् वशकान्तौ पृषोदरादित्वाद्रूपसिद्धिः । आविः स्वरादिष्वन्तोदात्तत्वेनपठितत्वादन्तोदात्तः । धेनाः धेट्पाने धेटइच्चेतिनप्रत्ययः ईकारश्चान्तादेशः गुणः धयन्तितामितिधेनावाक् धेनाजिगातीत्यत्रप्रत्ययस्वरेणान्तोदात्तः अत्र व्यत्ययेनाद्युदात्तत्वम् । अकृणोत् कृविहिंसाकरणयोः निघातः । राम्याणां रमुक्रीडायां राममर्हतीत्यर्थे छन्दसिचेतियप्रत्ययः तस्यस्वरः यद्वा रमेरन्तर्णीतण्यर्थाद्घ्यादयश्चेतियक्प्रत्ययः प्ररमयतिभूतानि नक्तंचारीण्युपरमयतीतराणीतियास्कः[1] । वर्णव्यत्ययः ॥ ३ ॥

अथचतुर्थी–

इन्द्र॑ःस्व॒र्षाज॒नय॒न्नहा॑निजि॒गायो॒शिग्भिः॒पृत॑नाअभि॒ष्टिः ।
प्रारो॑चय॒न्मन॑वेके॒तुमह्ना॒मवि॑न्द॒ज्ज्योति॑र्बृह॒तेरणा॑य ॥ ४ ॥

---

[1] नि० २. १८. ।

Funding by IKS-MoE

इन्द्रः । स्वःऽसाः । जनयन् । अहानि । जिगाय । उशिक्ऽभिः ।
पृतनाः । अभिष्टिः । प्र । अरोचयत् । मनवे । केतुम् । अह्नाम् ।
अविन्दत् । ज्योतिः । बृहते । रणाय ॥ ४ ॥

स्वर्षाः स्वर्गप्रदः इंद्रःअहानि स्वतेजोभिर्जनयन् उशिग्भिः युद्धंकामयमानैरंङ्गिरोभिः सहपृतनाःपरकीयाःसेनाअभिष्टिरभिभावुकःसन् जिगाय शत्रूनजैषीत् शत्रुवधानन्तरंमनवेमनुष्यायकर्मकर्त्रेयजमानायतदर्थं तथा अह्नांकेतुंप्रज्ञापकंसूर्यंप्रारोचयत् तथाचतमोरूपासुरवधात्मकर्षेणादीपयत् ततोबृहतेमहतेरणाययुद्धप्रकाशनायज्योतिःप्रकाशमविन्दत् अलभत ॥

स्वर्षाः षणुदाने क्विप् जनसनखनांसञ्झलोरित्यात्वं सनोतेरनइतिषत्वं अहरादीनांपत्यादिषूपसंख्यानमितिविसर्जनीयस्यरुत्वम्। जिगाय जिजयेइत्यस्यलिटि सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः लित्स्वरः। पृतनाः पृङ्व्यायामे कुपृभ्यांकिदितितनन्प्रत्ययः व्याप्रियन्तेऽत्रयोद्धारइतिपृतनाःसेनाः नित्त्वादाद्युदात्तः। अभिष्टिः अभिगन्ता इषुगतौ मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः सहिभावपरोऽपिभवितारंलक्षयति तितुत्रतथेत्यादिनेट्प्रतिषेधः शकंध्वादित्वात्पररूपत्वं कृदुत्तरपदस्वरः । अरोचयत् रुचदीप्तावित्यस्यलङिरूपम् । मनवे मनज्ञाने शृस्वृस्निहीत्यादिनाउप्रत्ययः निदनुवृत्तेराद्युदात्तः । अविन्दत् विदिॢलाभेइत्यस्यशेमुचादीनामितिनुम् पादादित्वादनिघातः। रणाय क्रियाग्रहणंकर्तव्यमितिसंप्रदानसंज्ञा रणतिःशब्दार्थः वशिरण्योरुपसंख्यानमित्यप्प्रत्ययः रणन्तिशब्दंकुर्वन्ति परस्परंयोद्धारोऽत्रेतिरणःसंग्रामः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः ॥ ४ ॥

अथपञ्चमी—

इन्द्रस्तुजोबर्हणाआविवेशनृवद्दधानोनर्यापुरूणि ।
अचेतयद्धियइमाजरित्रेप्रेमंवर्णमतिरच्छुक्रमासाम् ॥ ५ ॥ १५ ॥

इन्द्रः । तुजः । बर्हणाः । आ । विवेश । नृऽवत् । दधानः ।
नर्या । पुरूणि । अचेतयत् । धियः । इमाः । जरित्रे । प्र ।
इमम् । वर्णम् । अतिरत् । शुक्रम् । आसाम् ॥ ५ ॥ १५ ॥

Funding by IKS-MoE

सतादृशइन्द्रस्तुजोबाधिकाः बर्हणाः युद्धोत्साहेनवर्धमानाःपरकीयाःसेनाः नृवन्मनुष्यवदाविवेश प्रकाशंलब्ध्वाप्राविशत् किंकुर्वन् पुरूणिबहूनि नर्या युद्धनयनकारिणांयोग्यानि धनानिदधानः प्रयच्छन्नाविवेश सइन्द्रोजरित्रेस्तोत्रे इमादृश्यमानाधियउषसोध्यायन्त्यासुमनुष्याइतिताधियोचेतयत्अज्ञापयत् अथासामुषसामिमंशुक्रंवर्णप्रकाशेनयुक्तंप्रातिरत् स्वतेजसा प्रकर्षेणवर्धयतिस्म धीशब्दस्योषःपरत्वेमन्त्रवर्णः—शुक्रवर्णामृदुनोयंसतेधियमिति । तुजः तुजहिंसायां क्विप् धातुस्वरः । बर्हणाः बृहिवृद्धौ अस्माद्युच्बहुलमितिकर्तरियुच् व्यत्ययेनाद्युदात्तत्वम् । विवेश विशतेर्लिटिरूपं निघातः । नृवत् नृशब्दात्तेनतुल्यमितिवतिप्रत्ययः तस्यस्वरः । दधानः दधातेःशानचिरूपं अभ्यस्तानामादिरित्याद्युदात्तत्वम् । नर्या नरेषुसाधूनिइत्यर्थेतत्रसाधुरितियत् यतोनावइत्याद्युदात्तत्वम् । अचेतयत् चितीसंज्ञानेइत्यस्यण्यन्तस्यलङिरूपं अडागमस्वरः । धियः ध्यैचिन्तायां अन्येभ्योऽपिदृश्यतइतिक्विप् दृशिग्रहणात्संप्रसारणं धातुस्वरः । इमाः दृश्चेतिदकारस्यमकारः एकादेशस्वरः । अतिरत् तरतेर्व्यत्ययेनशः निघातः । आसां इदमोन्वादेशेशिति अशादेशोऽनुदात्तश्च प्रत्ययः सुप्त्वादनुदात्तः अतःसर्वानुदात्तः ॥५॥

॥ इतितृतीयस्यद्वितीयेपञ्चदशोवर्गः ॥ १५ ॥

अथषष्ठी—

म॒होम॒हानि॑पनयन्त्य॒स्येन्द्र॑स्य॒कर्म॒सुकृ॑तापु॒रूणि॑ ।
वृ॒जने॑नवृजि॒नान्त्संपि॑पेषमा॒याभि॒र्दस्यूँ॑र॒भिभू॑त्योजाः ॥ ६ ॥

म॒हः । म॒हानि॑ । प॒न॒य॒न्ति॒ । अ॒स्य॒ । इन्द्र॑स्य । कर्म॑ । सुऽकृ॑ता ।
पु॒रूणि॑ । वृ॒जने॑न । वृ॒जि॒नान् । सम् । पि॒पे॒ष॒ । मा॒याभिः॑ । दस्यू॑न् ।
अ॒भिभू॑तिऽओजाः ॥ ६ ॥

महोमहतः अस्यैतादृशसामर्थ्यस्य इन्द्रस्य महानिमंहनीयानिपुरूणिसुकृतासुष्ठुकृतानि कर्मवृत्रहननादीनिकर्माणि पनयन्तिस्तुवन्ति इन्द्रस्यकर्मसुकृतापुरूणीत्येतत्पदकदम्बकं अत्रअर्थभेदात्पदकालेनोत्सृज्यते तादृशइन्द्रःवृजनेन वर्ज्यन्तेशत्रवोऽनेनेतिवृजनंबलं तेनबलेन वृजिनान्पापरूपानसुरान्संपिपेष सम्यक्चूर्णीचकार तथाभिभूत्योजाः अभिभूतिःशत्रुविषयोभिभवः तत्रओजोबलमस्येतिअभिभूत्योजाः शत्रूणांपराभवेसमर्थः तादृशइन्द्रोदस्यूनुपक्षपयितॄनसुरान्मायाभिःकपटैःसंपिपेष ॥ पनयन्ति पनतेःस्तुत्यर्थस्यगुपूधूपविच्छिपणिपनिभ्यइत्यायप-

---

१ ऋ० सं०२. २. १२.।

Funding by IKS-MoE

त्ययः ह्रस्वश्छान्दसः निघातः । वृजनेन वृजीवर्जने कृपृवृजिमन्दिनिधाञ्भ्यःक्युरितिक्युप्रत्ययः किच्वादगुणः प्रत्ययस्वरः । वृजिनान् वृजीवर्जने वृजेःकिच्चेतीनच्प्रत्ययः वृजिनंपापं तद्वन्तः अर्शआदित्वादच् एकादेशस्वरः । पिपेष पिषृसंचूर्णनेइत्यस्य लिटि णलिरूपं निघातः । अभिभूत्योजाः भूतिर्भवनं भावेक्तिन् तादौचनितीत्यभेःप्रकृतिस्वरत्वं अभिभूतौ ओजोयस्येतिसप्तम्युपमानपूर्वपदस्यबहुव्रीहिरितिसमासः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ६ ॥

अथसप्तमी—

यु॒धेन्द्रो॑म॒ह्नावरि॑वश्चकारदे॒वेभ्य॒:सत्प॑तिश्चर्षणि॒प्राः ।
वि॒वस्व॑त॒:सद॑नेअस्य॒तानि॒विप्रा॑उ॒क्थेभि॑:क॒वयो॑गृणन्ति ॥ ७ ॥

यु॒धा । इन्द्र॑ः । म॒ह्ना । वरि॑वः । च॒का॒र । दे॒वेभ्य॑ः । सत्ऽप॑तिः ।
च॒र्ष॒णि॒ऽप्राः । वि॒वस्व॑तः । सद॑ने । अ॒स्य॒ । तानि॑ । विप्रा॑ः ।
उ॒क्थेभि॑ः । क॒वय॑ः । गृ॒ण॒न्ति॒ ॥ ७ ॥

सत्पतिः सतांदेवानांपतिः चर्षणिप्राः चर्षणीनांमनुष्याणां अपेक्षितफलप्रदानेनकामपूरकः सइन्द्रःमह्नामहतायुद्धेन वरिवः भृशंव्रियतेर्थिभिरितिवरिवोधनं तादृशंधनंयुद्धेनलब्ध्वादेवेभ्योदेवनशीलेभ्यःस्तोतृभ्यश्चकार दत्तवान् विप्रामेधाविनः कवयःस्तोतारः विवस्वतःविषेशेणाग्निहोत्रादिकर्मार्थेवसतोयजमानस्यसदनेगृहे अस्येन्द्रस्य तानिवृत्रहननबहुप्रदानादीनिकर्माणिउक्थेभिःस्तोत्रैःगृणन्तिस्तुवन्ति ॥ युधा युधसंप्रहारे भावेसंपदादिलक्षणःक्विप् सावेकाचइतिविभक्तेरुदात्तता । वरिवः वृञ्वरणेइत्यस्य यङ्लुकि ऋतश्चेत्यभ्यासस्यरिगागमः तदन्तादसुन् बाहुलकाट्टिलोपः नित्स्वरः । चकार करोतेर्लिटिरूपं निघातः । सत्पतिः अस्तेःशतरिरूपम् सदिति पत्यावैश्वर्यइतिपूर्वपदप्रकृतिस्वरत्वम् । चर्षणिप्राः प्रापूरणे विच् । विवस्वतः विपूर्वाद्वसनिवासेइत्येतस्मात्संपदादिलक्षणोभावेक्विप् तदस्यास्त्यस्मिन्नितिमतुप् मादुपधायाइतितस्यवत्वं प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः । गृणन्ति गृशब्देइत्यस्यलटिरूपं निघातः ॥ ७ ॥

अथाष्टमी—

स॒त्रा॒साहं॒वरे॑ण्यंसहो॒दांस॑स॒वांसं॒स्व॑र॒पश्च॑दे॒वीः ।
स॒सान॒यःपृ॑थि॒वींद्यामु॒तेमामिन्द्रं॑मद॒न्त्यनु॒धीर॑णासः ॥ ८ ॥

स॒त्रा॒ऽसह॑म् । वरे॑ण्यम् । स॒हः॒ऽदाम् । स॒स॒ऽवांस॑म् । स्वः॑ । अ॒पः ।
च॒ । दे॒वीः । स॒सान॑ । यः । पृ॒थि॒वीम् । द्याम् । उ॒त । इ॒माम् ।
इन्द्र॑म् । म॒द॒न्ति॒ । अनु॑ । धीऽर॑णासः ॥ ८ ॥

धीरणासोधियास्तुत्यारणयन्तःस्तोतारःसत्रासाहंमहतोवृत्रादेरभिभवितारं अतएववरेण्यं सर्वैर्वरणीयं सहोदां दुर्बलस्यार्थिनोबलप्रदं देवीर्देवनशीलाअपःस्वश्चस्वर्लोकंच ससवांसं भजमानमिन्द्रं अनुमदन्ति हृष्यन्ति इन्द्रहर्षमनुस्वयंहृष्यन्तीत्यर्थः यइन्द्रः पृथिवीं उतापिचद्यां द्युलोकमिमामिममन्तरिक्षलोकंचैतांस्त्रीन्लोकान्ससान तत्तल्लोकवासिभ्योददौ तमनुमदन्तीत्यन्वयः ॥ सत्रासाहं षहमर्षणे छन्दसिसहइतिण्विः णित्त्वादुपधावृद्धिः । ससवांसं षणसंभक्तावित्यस्यक्वसौ इडभावेनकारलोपेरूपं प्रत्ययस्वरः । ससान षणुदानेइत्यस्यलिटिरूपं नित्स्वरः । मदन्ति मदिस्तुत्यादिष्वित्यस्यव्यत्ययेनपरस्मैपदं निघातः । धीरणासः रणतीतिरणावाक् धियास्तुत्यारणायेषांतेधीरणाः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ८ ॥

अथनवमी—

स॒सानात्याँ॑उ॒तसूर्यं॑ससा॒नेन्द्रः॑ससानपु॒रु॒भोज॑सं॒गाम् ।
हि॒र॒ण्यय॑मु॒तभोगं॑ससानह॒त्वीदस्यू॒न्प्रार्यं॒वर्ण॑मावत् ॥ ९ ॥

स॒सान॑ । अत्या॑न् । उ॒त । सूर्य॑म् । स॒सा॒न॒ । इन्द्रः॑ । स॒सा॒न॒ ।
पु॒रु॒ऽभोज॑सम् । गाम् । हि॒र॒ण्यय॑म् । उ॒त । भोग॑म् । स॒सा॒न॒ ।
ह॒त्वी । दस्यू॑न् । प्र । आर्य॑म् । वर्ण॑म् । आ॒व॒त् ॥ ९ ॥

पूर्वमन्त्रेप्रतिपादितःसइन्द्रः अत्यानश्वान्ससान युद्धार्थंमरुद्भ्योददौ उतापिच सूर्यं जगत्प्रकाशकमादित्यंससान प्राणिनांव्यवहारनिर्वाहायतेभ्योददौ तथा पुरुभोजसं पुरुभिः सर्वैर्जनैःक्षीरादिद्वारेणोपभुज्यतइतिपुरुभोजाः क्षीरादिरूपबहुविधान्नोपेतंगामग्निहोत्रादिसिद्ध्यर्थंससान तेभ्योददौ उतापिच हिरण्ययं सुवर्णमयंभोगंधनंभुज्यतेऽस्मिन्नितिभोगोगृहंवा ससान अर्थिभ्योददौ ततोदस्यून्बाधकानसुरान्हत्वी हत्वाआर्यमुत्तमंवर्णंत्रैवर्णिकंप्रावत् यथा कर्मविघ्नोनभवेत्तथापालयत् ॥ ससान षणुदानेइत्यस्यलिटिणलिरूपं नित्स्वरः । हिरण्ययं हिरण्यशब्दाद्विकारार्थेमयड्वैतयोरितिविहितस्यछन्दसिविषयेऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसीतिनिपातनान्मयटोमकारलोपः प्रत्ययस्वरः। हत्वी हन्तेःक्त्वार्थेस्नात्व्यादयश्चेति निपातितः प्रत्ययस्वरः । आवत् अवतेर्लङिरूपम् ॥ ९ ॥

Funding by IKS-MoE

अथदशमी-

इन्द्रओषधीरसनोदहानिवनस्पतीँरसनोदन्तरिक्षम् ।
बिभेदवलंनुनुदेविवाचोथाभवद्दमिताभिक्रतूनाम् ॥ १० ॥

इन्द्रः । ओषधीः । असनोत् । अहानि । वनस्पतीन् । असनोत् ।
अन्तरिक्षम् । बिभेद । वलम् । नुनुदे । विऽवाचः । अथ ।
अभवत् । दमिता । अभिऽक्रतूनाम् ॥ १० ॥

तादृशइन्द्रःओषधीःपक्वफलसंयुक्तास्तृणगुल्मादिकाअसनोत् प्राणिनामुपभोगार्थंप्रादात् तथाहानिदिवसांश्चआयुःपरिक्लृप्त्यर्थंप्रायच्छत् किञ्च वनस्पतीन्यज्ञार्थंखदिरपलाशादिलक्षणान्वृक्षानसनोत् तथान्तरिक्षंसंचारार्थंप्रादात् तथावलंसंव्रियतेऽनेनाकाशमितिवलोमेघः तंमेघं बिभेद उदकप्रेरणार्थमभिन्दत् विवाचोविरुद्धवाचःप्रतिकूलानसुरान्नुनुदे प्राणिनांरक्षार्थं तान्बबाध अथानन्तरमभिक्रतूनां क्रतुःकर्मअभिआभिमुख्येनयुद्धार्थंकर्मयेषांतेअभिक्रतवोबलीयांसःशत्रवस्तेषामपिदमिताउपशमयिताभवत् एवंहितकरणाहितपरिहाराभ्यांसर्वाःप्रजाः पालयतिस्मेतिभावः ॥ असनोत् षणुदानेइत्यस्यलङिरूपम् । वनस्पतीन् पारस्करप्रभृतित्वात्सुडागमः वनशब्दोनब्विषयस्येत्याद्युदात्तः पतिशब्दःप्रत्ययस्वरेणाद्युदात्तः उभेवनस्पत्यादिषुयुगपदित्युभयपदप्रकृतिस्वरत्वं । बिभेद भिदिर्विदारणेइत्यस्यलिटिरूपं लित्स्वरः । नुनुदे णुदप्रेरणेइत्यस्यलिटिरूपं वाक्यभेदादनिघातः प्रत्ययस्वरः । दमिता दमुउपशमेइत्यस्यतृचिरूपं चित्स्वरः । अभिक्रतूनां बहुव्रीहौपूर्वपदस्वरः ॥ १० ॥

अथैकादशी-

शुनंहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ ।
शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसंजितंधनानाम् ॥ ११ ॥ १६ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् ।
वाजऽसातौ । शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् ।
वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ११ ॥ १६ ॥

एषाऋक्पूर्वमेवव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यद्वितीयेषोडशोवर्गः ॥ १६ ॥

Funding by IKS-MoE

तिष्ठाहरीत्येकादशर्चंषष्ठंसूक्तम् वैश्वामित्रं त्रैष्टुभमैन्द्रं तिष्ठाहरीइत्यनुक्रमणिका । अग्निष्टुतिमरुत्वतीयशस्त्रेनिविद्धानंसूक्तं सूत्रितंच—तिष्ठाहरीयोजातएवेतिमाध्यन्दिनइति इन्द्राग्न्योःकुलायनाम्न्येकाहेप्येतन्मरुत्वतीयनिविद्धानं । सूत्रितंच—तिष्ठाहरीतमुष्टुहीतिमध्यंदिनइति । समूढदशरात्रेतृतीयेछन्दोमेमरुत्वतीयशस्त्रेएतत्सूक्तं । सूत्रितंच—तिष्ठाहरीप्रमन्दिनइमाउत्वेतिमरुत्वतीयमिति । अतिरात्रेतृतीयेपर्यायेहोतुःशस्त्रेपरिहितेसत्याद्यातिष्ठाहरीत्येषाशस्त्रयाज्या । सूत्रितंच—विश्वजितेतिष्ठाहरीरथआयुज्यमानेतियाज्येति ।

अस्मिन्नसूक्तेप्रथमा—

तिष्ठा॒हरी॒रथ॒आयु॒ज्यमा॑नाया॒हिवा॒युर्न॑नि॒युतो॑नो॒अच्छ॑ ।
पिबा॒स्यन्धो॑अ॒भिसृ॑ष्टोअ॒स्मेइन्द्र॒स्वाहा॑ररि॒माते॒मदा॑य ॥ १ ॥

तिष्ठ॑ । हरी॒ इति॑ । रथे॑ । आ । यु॒ज्यमा॑ना । या॒हि । वा॒युः ।
न । नि॒ऽयुतः॑ । नः॒ । अच्छ॑ । पिबा॑सि । अन्धः॑ । अ॒भिऽसृ॑ष्टः ।
अ॒स्मे इति॑ । इन्द्र॑ । स्वाहा॑ । र॒रि॒म । ते॒ । मदा॑य ॥ १ ॥

विश्वामित्रःस्तौति—हेइन्द्र रथेस्यन्दनेयुज्यमानासंयुज्यमानौहरी अश्वौ अभिलक्ष्य कंचित्कालमातिष्ठ तत्रदृष्टान्तः—वायुर्नेतियथावायुःरथेनियुज्यमानानियुतोवडवाअभिलक्ष्यकंचित्कालंतिष्ठतितद्वत् अथरथारूढस्त्वंनोऽस्मानच्छाभिलक्ष्यायाहि शीघ्रमागच्छ आगत्यच अस्मे अस्माभिरभिसृष्टोऽनुज्ञातस्त्वंअन्धःसोमलक्षणमन्नंपिबासिपिब स्वाहादत्तश्चायंसोमः वयंतेतवमदायहर्षायस्वाहाकृतमिमंररिम ददाम अत्रयाहिवायुर्ननियुतोनोअच्छेत्यत्ररथेनायाहीत्यर्थः आपश्चित्पिप्युस्तर्योनगावइत्यत्रतन्न तथेतिपदकालेनोत्सृज्यते ॥ तिष्ठ तिष्ठतेर्लोटिरूपं तिष्ठादेशस्याद्युदात्तत्वम् । याहि यातेर्लोटिरूपं हेर्ङित्त्वादन्तोदात्तः । वायुः वागतिगन्धनयोरित्यस्मात्कृवापेत्यादिनाउण् आतोयुक् प्रत्ययस्वरः । पिबासि पातेर्लेटचाडागमः आगमानुदात्तत्वाद्धातुस्वरः । अन्धः अदभक्षणे अदेर्नुम्धश्चेति असुन्नुमागमोधकारश्चान्तादेशः अद्यतेप्राणिभिस्तद्वास्वयमत्तीति तथाचश्रुतिः—अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यतइति । नित्स्वरः । अस्मे सुपांसुलुगितितृतीयायाःशेइत्यादेशः । ररिम रातेर्लिटिरूपं वाक्यभेदादनिघातः प्रत्ययस्वरः ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

उपा॑जि॒रापु॑रुहू॒ताय॒सप्ती॒हरी॒रथ॑स्यधू॒र्ष्वायु॑नज्मि ।
द्र॒वद्य॒थासंभृ॑तंवि॒श्वत॑श्चि॒दुपे॒मंय॒ज्ञमाव॑हात॒इन्द्र॑म् ॥ २ ॥

उप॑ । अ॒जि॒रा । पु॒रु॒ऽहू॒ताय॑ । सप्ती॒ इति॑ । हरी॒ इति॑ । रथ॑स्य ।
धूः॒ऽसु । आ । यु॒न॒ज्मि॒ । द्र॒वत् । यथा॑ । सम्ऽभृ॑तम् । वि॒श्वत॑ः ।
चि॒त् । उप॑ । इ॒मम् । य॒ज्ञम् । आ । व॒हा॒त॒ः । इन्द्र॑म् ॥ २ ॥

हेइन्द्र पुरुहूताय पुरुभिर्बहुभिर्यजमानैर्यज्ञार्थमाहूतायतुभ्यं अजिरा शीघ्रगमनशीलौसप्ती सर्पणशीलौहरी हरिनामकावश्वौ रथस्यधूर्षुयुगप्रान्तेषु उपायुनज्मि अहंतथासंयोजयामि द्रवत्सरथोयथागच्छेत्तथेतिशेषः विश्वतश्चित्सर्वतःसंभृतंअग्निर्यजुर्भिः सवितास्तोमैरित्यादियज्ञसंभारैःसंपूर्णमिमंयज्ञंप्रति इन्द्रंत्वामुपावहातः तावश्वौसम्यगावहताम् ॥ धूर्षु धुर्वीहिंसार्थः क्विप् राल्लोपइतिवकारलोपः र्वोरुपधायाइतिदीर्घः सावेकाचइतिविभक्तेरुदात्तता । युनज्मि युजिर्योगे रुधादिः लटिरूपं निघातः । द्रवत् द्रुगतावित्यस्यछान्दसेलङिरूपं व्यत्ययेनान्तोदात्तत्वम् । वहातः वहेर्लेट्याडागमेरूपम् ॥ २ ॥

अथतृतीया—

उपो॑नयस्व॒वृष॑णातपु॒ष्पोतेम॑व॒त्वंवृ॑षभस्वधावः ।
ग्रसे॑ता॒मश्वा॒विमु॑चे॒हशोणा॑दि॒वेदि॑वेस॒दृशी॑रद्धिधा॒नाः ॥ ३ ॥

उपो॒ इति॑ । न॒य॒स्व॒ । वृष॑णा । त॒पु॒ःऽपा । उ॒त । ई॒म् । अ॒वा॒त्वम् ।
वृ॒ष॒भ॒ । स्व॒धा॒ऽव॒ः । ग्रसे॑ताम् । अश्वा॑ । वि । मु॒च॒ । इ॒ह ।
शोणा॑ । दि॒वेऽदि॑वे । स॒ऽदृशीः॑ । अ॒द्धि॒ । धा॒नाः ॥ ३ ॥

वृषभ कामानांवर्षक स्वधावःअन्नवन् हेइन्द्र वृषणा सेचनसमर्थौ तपुष्पातापकेभ्यःशत्रुभ्योरक्षकावश्वावुपोनयस्व अस्मत्समीपंप्रापय उतापिच त्वंईमेनंयजमानमवपालय शोणा शोणवर्णौतावश्वौ इहास्मिन्देवयजनेविमुच विमुञ्च विमुक्तौतावश्वौ ग्रसेतां वि-

घसंभक्षयतां त्वंतुसदृशीरेकरूपान्धानाःभृष्टयवान्दिवेदिवे प्रतिदिवसमद्धि भक्षय ॥ नयस्व नयतेर्लोटिरूपं । तपुष्पा पारक्षणे आतोनुपसर्गेकः सुपांसुलुगितिडादेशः इसुसोःसामर्थ्येइतिसंहितायांविसर्जनीयस्यषत्वं कृदुत्तरपदप्रकृतिस्वरः । अव अवतेर्लोटिरूपम् । स्वधावः मतुवसोरितिनकारस्यरुत्वं निघातः । ग्रसेतां ग्रसुअदनेइत्यस्यलोटचातामिरूपं पादादित्वादनिघातः आतामोलसार्वधातुकस्वरेधातुस्वरः । मुच मुञ्चतेर्लोटिरूपं आगमानुशासनस्यानित्यत्वान्नुमभावः । सदृशीः समानशब्दउपपदे दृशिर्प्रेक्षणेइत्यस्मात्समानान्ययोश्चेतिकञ्प्रत्ययः समानस्यदृक्दृशवतुष्वितिसभावः टिड्ढाणञित्यादिनाङीप् तस्यपित्त्वादनुदात्तत्वेधातुस्वरः । अद्धि अदभक्षणेइत्यस्यलोटि अदादित्वाच्छपोलुक् हुझल्भ्योहेर्धिरितिध्यादेशः निघातः । धानाः डुधाञ्धारणपोषणयोः धापॄवस्यज्यतिभ्योनइतिनप्रत्ययः प्रत्ययस्वरः ॥ ३ ॥

चातुर्विंशिकेऽहनिमाध्यंदिनेसवने ब्राह्मणाच्छंसिशस्त्रे ब्रह्मणातइत्यारंभणीया सूत्रितश्च— ब्रह्मणातेब्रह्मयुजायुनज्म्युरुंनोलोकमनुनेषिविद्वानिति ।

अथचतुर्थी—

ब्रह्म॑णातेब्रह्म॒युजा॑युनज्मि॒हरी॒सखा॑यासध॒माद॑आ॒शू ।
स्थि॒रंरथं॑सु॒खमि॑न्द्राधि॒तिष्ठ॑न्प्रजा॒नन्वि॒द्वाँउप॑याहि॒सोम॑म् ॥ ४ ॥

ब्रह्म॑णा । ते॒ । ब्र॒ह्म॒ऽयुजा॑ । यु॒नज्मि॒ । हरी॒ इति॑ । सखा॑या ।
स॒ध॒ऽमादे॑ । आ॒शू इति॑ । स्थि॒रम् । रथ॑म् । सु॒ऽखम् । इ॒न्द्र॒ ।
अ॒धि॒ऽतिष्ठ॑न् । प्र॒ऽजा॒नन् । वि॒द्वान् । उप॑ । या॒हि॒ । सोम॑म् ॥ ४ ॥

हेइन्द्र ब्रह्मयुजा ब्रह्मणामन्त्रेणयोक्तव्यौ सधमादे सहमाद्यन्तियोद्धारोऽत्रेतिसहमादोयुद्धं सहमादः सधमादः तस्मिन्युद्धे सखायावेगबलयोःसमानप्रसिद्धी अतएव आशू क्षिप्रगमनोपेतौ तेतवहरी अश्वौ ब्रह्मणास्तोत्रेणयुनज्मि रथेसंयोजयामि स्थिरंसुदृढंसुखंसुष्टूद्धारंतादृशंरथं अधितिष्ठन्नारूढस्त्वंसोमपानार्थमायाहि प्रजानन्नित्याद्यगमत् ॥ ब्रह्मयुजा युजेरौणादिकःकर्मणिक्विप् । युनज्मि युजेर्लटिरूपं निघातः । सधमादे मदीहर्षे अधिकरणेघञ् सधमादस्थयोश्छन्दसीतिसहस्यसधादेशः कृदुत्तरपदप्रकृतिस्वरः । रथं अधिशीङ्स्थासांकर्मेतिकर्मसंज्ञा । सुखं खनुविदारणे अन्येभ्योपिदृश्यतइतिडः कृदुत्तरपदस्वरः ॥ ४ ॥

BHARATIYA VID
१११
S. N.........
LIBRARY.

अथपञ्चमी–

माते॒हरी॒वृष॑णावी॒तपृ॑ष्ठा॒निरी॑रम॒न्यज॑मानासोअ॒न्ये ।
अ॒त्याया॑हि॒शश्व॑तोव॒यंतेरं॑सु॒तेभिः॑कृणवाम॒सोमैः॑ ॥ ५ ॥ १७ ॥

मा । ते॒ । हरी॒ इति॑ । वृष॑णा । वी॒तऽपृ॑ष्ठा । नि । री॒र॒म॒न् ।
यज॑मानासः । अ॒न्ये । अ॒ति॒ऽआया॑हि । शश्व॑तः । व॒यम् ।
ते॒ । अर॑म् । सु॒तेभिः॑ । कृ॒ण॒वा॒म॒ । सोमैः॑ ॥ ५ ॥ १७ ॥

हेइन्द्र वृषणा कामानांसेचकौ वीतपृष्ठा कमनीयपृष्ठभागौ ते तव हरी अन्ये अस्मदन्येयजमानासोयजमानामानिरीरमन् माहर्षयन् वयन्तु सुतेभिरभिषुतैःसोमैस्तेतव अरंपर्याप्तंकृणवाम यथातवतृप्तिर्भवतितथाकुर्मइत्यर्थः त्वंतु अत्यायाहि शश्वतः बहूनन्यानतिक्रम्यसोमपानार्थंशीघ्रमागच्छ ॥ वीतपृष्ठा वीकान्त्यादिषु अस्मात्क्तप्रत्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । रीरमन् रमुक्रीडायामित्यस्यण्यन्तस्यलुङिचङिरूपं नमाङ्योगेइत्यडभावः निघातः । अत्यायाहि यातेर्लोटिरूपं गतिर्गतावितिपूर्वस्यनिघातः । कृणवाम कृणोतेर्लोटिरूपं निघातः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेसप्तदशोवर्गः ॥ १७ ॥

तवायंसोमइतिमाध्यंदिनेसवनेनेष्टुःप्रस्थितयाज्या सूत्रितश्च–तवायंसोमस्त्वमेह्यर्वाङिन्द्रायसोमाःप्रदिवइति ।

अथषष्ठी–

तवा॒यंसोम॒स्त्वमेह्य॒र्वाङ्श॑श्वत्त॒मंसु॒मना॑अ॒स्यपा॑हि ।
अ॒स्मिन्य॒ज्ञेब॒र्हिष्यानि॒षद्या॑दधि॒ष्वेमंज॒ठर॒इन्दु॑मिन्द्र ॥ ६ ॥

तव॑ । अ॒यम् । सोमः॑ । त्वम् । आ । इ॒हि॒ । अ॒र्वाङ् । श॒श्व॒त्ऽत॒मम् ।
सु॒ऽमनाः॑ । अ॒स्य । पा॒हि॒ । अ॒स्मिन् । य॒ज्ञे । ब॒र्हिषि॑ । आ ।
नि॒ऽसद्य॑ । द॒धि॒ष्व । इ॒मम् । ज॒ठरे॑ । इन्दु॑म् । इ॒न्द्र॒ ॥ ६ ॥

Funding by IKS-MoE

हेइन्द्र अयंसोमः तव त्वदर्थंअभिषुतः त्वं अर्वाङ् सोमाभिमुख्येन एहि आयाहि आगत्यच सुमनाःशोभनमनस्कोभूत्वा शश्वत्तमं भूयांसं अस्येमंसोमं पाहि पिब बर्हिषिप्रवृद्धे अस्मिन्यज्ञेनिषद्योपविश्येन्दुंक्लेदनशीलं इमंसोमंजठरे आदधिष्व धारय यथानाभेरधस्तान्नगच्छतितथाधारय [1]अङ्गिरोभिरागहियज्ञियेभिरित्यत्रनयज्ञविशेषणं बर्हिः किंतुभिन्नरूपंतदित्यतोनोत्सृज्यते ॥ इणूगतौ अस्यलोटिरूपं निघातः । शश्वत्तमं उञ्छादित्वादन्तोदात्तत्वम् । पाहि पापानेइत्यस्य लोटिरूपं बहुलंछन्दसीतिशपोलुक् निघातः । निषद्य सदेर्ल्यपि सदिरप्रतेरितिषत्वं लित्स्वरः । दधिष्व दधातेर्लोटि छन्दस्युभयथेतिथासआर्धधातुकत्वादिडागमः प्रत्ययस्वरः । इन्दुं उंदीक्लेदने उन्देरिच्चादेरित्युप्रत्ययः धातोरादेरिकारादेशः निदित्यनुवृत्तेराद्युदात्तः ॥ ६ ॥

अथसप्तमी–

स्ती॒र्णंते॑ब॒र्हिःसु॒तइ॑न्द्र॒सोमः॑कृ॒ताधा॒नाअत्त॑वेते॒हरि॑भ्याम् ।
तदो॑कसेपुरु॒शाका॑य॒वृष्णे॑म॒रुत्व॑ते॒तुभ्यं॑रा॒ताह॒वींषि॑ ॥ ७ ॥

स्ती॒र्णम् । ते॒ । ब॒र्हिः । सु॒तः । इ॒न्द्र॒ । सोमः॑ । कृ॒ताः । धा॒नाः ।
अत्त॑वे । ते॒ । हरि॑ऽभ्याम् । तत्ऽओ॑कसे । पु॒रु॒ऽशाका॑य ।
वृष्णे॑ । म॒रुत्व॑ते । तुभ्य॑म् । रा॒ता । ह॒वींषि॑ ॥ ७ ॥

हेइन्द्र तेतवोपवेशनार्थं बर्हिःस्तीर्णंविस्तृतं तथा सोमश्च त्वदर्थंसुतोऽभिषुतः ते तव हरिभ्यामत्तवे भक्षणार्थं धानाभृष्टयवाः कृताः संपादिताः तदोकसे तद्बर्हिरोकोनिलयोयस्य तस्मै पुरुशाकाय बहुभिःस्तुत्याय यद्वा बहुसहायाय वृष्णेकामानांवर्षित्रे मरुत्वते मरुतोदेवविशस्तद्वते एवंभूताय तुभ्यं हवींषिसोमाज्यादीनिराता अस्माभिर्दत्तानितानिसेवस्वेतिभावः ॥ स्तीर्णं स्तृञ्आच्छादनेइत्यस्य ऋतइद्धातोरितीत्वं रदाभ्यामितिनिष्ठानत्वं प्रत्ययस्वरः । अत्तवे अदभक्षणेइत्यस्मात्तुमर्थेतवेन्प्रत्ययः नित्स्वरः । तदोकसे बहुव्रीहौपूर्वपदस्वरः । पुरुशाकाय शचव्यक्तायांवाचीति अस्मात्कर्मणिघञ् चजोःकुघिण्ण्यतोरितिकुत्वं कृदुत्तरपदस्वरः । मरुत्वते तसौमत्वर्थेइतिभसंज्ञायांतकारस्यजश्त्वाभावः प्रत्ययस्यपित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः । राता रादानेइत्यस्मात्कर्मणिक्तः प्रत्ययस्वरः ॥ ७ ॥

---

[1] ऋ० सं० ७. ६. १४. ।

अथाष्टमी—

इ॒मंनर॒ःपर्व॑ता॒स्तुभ्य॒माप॒ःसमि॑न्द्र॒गोभि॒र्मधु॑मन्तमक्रन् ।
तस्या॒गत्या॑सु॒मना॑ऋष्वपाहिप्रजा॒नन्वि॒द्वान्प॒थ्या॒३अनु॒स्वाः ॥८॥

इ॒मम् । नर॑ः । पर्व॑ताः । तुभ्य॑म् । आप॑ः । सम् । इ॒न्द्र॒ । गोभि॑ः ।
मधु॑ऽमन्तम् । अ॒क्र॒न् । तस्य॑ । आ॒ऽगत्य॑ । सु॒ऽमना॑ः । ऋ॒ष्व॒ ।
पा॒हि॒ । प्र॒ऽजा॒नन् । वि॒द्वान् । प॒थ्या॑ः । अनु॑ । स्वाः ॥ ८ ॥

हेइन्द्र नरः कर्मणांनेतारोध्वर्य्वादयः पर्वताः ग्रावाणः आपश्चैतेसर्वेसंभूय तुभ्यंत्वदर्थमिमंसोमं गोभिःपयोभिर्मधुमन्तंमाधुर्योपेतंसमक्रन् सम्यगकार्षुः ऋष्व दर्शनीय हेइन्द्र सुमनाःशोभनमनस्कः विद्वान्कर्माभिज्ञः स्वाःस्वकीयाः पथ्याःवैदिकेपथिसाधुभूताःस्तुतीः अनुप्रजानन् त्वमागत्य तस्यास्यपाहि इममभिषुतंसोमंपिब ॥ अक्रन् करोतेर्लुङिरूपं निघातः आगत्य गमेर्ल्यपिरूपं लित्स्वरः। पाहि पातेर्लोटिरूपम् ॥ ८ ॥

अथनवमी—

याँआभ॑जोम॒रुत॑इन्द्र॒सोमे॒येत्वामव॑र्ध॒न्नभ॑वन्ग॒णस्ते॑ ।
तेभि॑रे॒तंस॒जोषा॑वावशा॒नो॒३ग्नेःपिबजि॒ह्वया॒सोम॑मिन्द्र ॥ ९ ॥

यान् । आ । अभ॑जः । म॒रुत॑ः । इ॒न्द्र॒ । सोमे॑ । ये । त्वाम् ।
अव॑र्धन् । अभ॑वन् । ग॒णः । ते॒ । तेभि॑ः । ए॒तम् । स॒ऽजोषा॑ः ।
वा॒व॒शा॒नः । अ॒ग्नेः । पि॒ब॒ । जि॒ह्वया॑ । सोम॑म् । इ॒न्द्र॒ ॥ ९ ॥

हेइन्द्र यान्मरुतःसोमेसोमपानविषये आभजः समभावयः येचमरुतः त्वामवर्धन् प्रोत्साहोत्पादनेनयुद्धेअवर्धयन् येचमरुतस्तेतवगणोभवन् सहायाअभूवन्नित्यर्थः हेइन्द्र एवंविधैःतेभिःतैर्मरुद्भिःसजोषाःसंगतःसन् एतमभिषुतंसोमं वावशानःकामयमानस्त्वं अग्नेराहुत्यधिकरणभूतस्याहवनीयस्यज्वालारूपयाजिह्वयाइमंपिब ॥ अभजः भजसेवायामित्यस्य लङि रूपं यद्वृत्तयोगादनिघातः। अवर्धन् वृधुवर्धनेइत्यस्यण्यन्तस्यलङिरूपं छन्दस्युभयथेतिझे-

Funding by IKS-MoE

रार्धधातुकत्वात्णेरनिटीतिणिलोपः अत्रापियद्योगादनिघातः । अभवन् वाक्यभेदादनिघातः । वावशानः वशकान्तावित्यस्य यङ्लुकि चानशिरूपं चित्स्वरः । पिब पापाने निघातः ॥ ९ ॥

अथदशमी–

इन्द्र॒पिब॑स्व॒धया॑चित्सु॒तस्या॒ग्नेर्वा॑पाहि॒जि॒ह्वया॑यजत्र ।
अ॒ध्व॒र्योर्वा॒प्रय॑तंशक्र॒हस्ता॒द्धोतु॑र्वा॑य॒ज्ञंह॒विषो॑जुषस्व ॥ १० ॥

इन्द्र॑ । पिब॑ । स्व॒धया॑ । चि॒त् । सु॒तस्य॑ । अ॒ग्नेः । वा॒ । पा॒हि॒ ।
जि॒ह्वया॑ । य॒ज॒त्र॒ । अ॒ध्व॒र्योः । वा॒ । प्रऽय॑तम् । श॒क्र॒ । हस्ता॑त् ।
होतुः॑ । वा॒ । य॒ज्ञम् । ह॒विषः॑ । जु॒ष॒स्व॒ ॥ १० ॥

हेइन्द्र स्वधयास्वमात्मानंदधातिपोषयतीति स्वधा बलं तेन बलादपहृत्यसुतस्यसुतमभिषुतंहुतंवासोमंपिब चित्पूरणः यजत्र यष्टव्य हेइन्द्र अग्नेर्ज्वालारूपयाजिह्वयावा हुतंसोमं पाहि पिब हेशक्र समर्थेन्द्र अध्वर्योर्हस्ताद्वाप्रयतंदातुमुपक्रान्तंसोमंपिब अथवा होतुर्यज्ञंयजनीयंवषट्कारोपेतंहविषोभागं जुषस्व सेवस्व सर्वथापित्वमत्रागत्यास्माभिर्दीयमानंसोमंपिबेतिभावः ॥ पिब आमंत्रितस्याविद्यमानत्वेनपादादित्वादनिघातः । अध्वर्योः अध्वरंकामयतीतिक्यच् कव्यध्वरेत्यकारलोपः प्रत्ययस्वरः ततएकादेशस्वरः । प्रयतं यमउपरमेइत्यस्य कर्मणि निष्ठा । शक्रशकॢशक्तौ स्फायितंचीत्यादिनारक् । हस्तात् असिहसीत्यादिनातन् नित्स्वरः । होतुः जुहोतेस्ताच्छीलिकस्तृन् नित्स्वरः । जुषस्व जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपं निघातः ॥ १० ॥

अथैकादशी–

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भ॒रेनृत॑मं॒वाज॑मातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं᳚वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ ११ ॥ १८ ॥

शु॒नम् । हु॒वे॒म॒ । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ ।
घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ११ ॥ १८ ॥

व्याख्यातेयमृक् ॥ ११ ॥

॥ इतितृतीयस्यद्वितीयेऽष्टादशोवर्गः ॥ १८ ॥

इमामूष्वेकादशर्चंसप्तमंसूक्तं त्रैष्टुभमैन्द्रं अत्रानुक्रमणिका—इमामूषूपान्त्यांघोरोपश्यत्सा-निर्दहेच्छस्यमानेतिश्रूयतइति । दशम्याआङ्गिरसोघोरऋषिः शिष्टानांविश्वामित्रः अग्निष्टोमे माध्यंदिनसवने अच्छावाकशस्त्रे दशमीवर्जितंइमामूष्वितिसूक्तं सूत्रितश्च—इमामूष्वित्युपोत्त-मामुद्धरेत्सर्वत्रेति ।पृष्ठ्याभिप्लवषडहयोर्मध्यंदिनेसवनेऽच्छावाकशस्त्रेचातुर्विंशिकादिष्टस्याही-नसूक्तस्यस्थाने त्रीणिसंपातसूक्तानि तत्रोपोत्तमावर्जमेतत्प्रथमंसूक्तं सूत्रितश्च—इमामूष्विच्छ-न्तित्वेति ।

तस्मिन्सूक्तेप्रथमा—

इ॒मामू॒षुप्रभृ॑तिंसा॒तये॑धा॒ःशश्व॑च्छश्वदू॒तिभि॒र्याद॑मानः ।
सु॒तेसु॑तेवावृ॒धेवर्ध॑नेभि॒र्यः॑कर्म॑भिर्म॒हद्भि॒ःसुश्रु॑तो॒भूत् ॥ १ ॥

इ॒माम् । ऊँ॒ इति॑ । सु । प्रऽभृ॑तिम् । सा॒तये॑ । धा॒ः । शश्व॑त्ऽशश्वत् ।
ऊ॒तिऽभि॑ः । याद॑मानः । सु॒तेऽसु॑ते । व॒वृ॒धे॒ । वर्ध॑नेभिः ।
यः । कर्म॑ऽभिः । म॒हत्ऽभि॑ः । सुऽश्रु॑तः । भूत् ॥ १ ॥

विश्वामित्रइन्द्रंस्तौति—हेइन्द्र ऊतिभिरवन्तिरक्षन्तिसर्वमितिऊतयोमरुतः तैःशश्वच्छश्व-त्सर्वदा यादमानः संगतिंयाचमानस्त्वं प्रभृतिं प्रकर्षेणभ्रियतेधार्यतेयज्ञार्थमितिप्रभृतिःसोमः स्तुतिर्वा इमामिमंसोमं इमांस्तुतिंवा सातये अस्माकंधनलाभार्थंसुधाः सुष्ठुसंपादय उःपूरणः तथा सइन्द्रः सुतेसुते सोमेऽभिषुतेसति वर्धनेभिः वर्धनकारिभिः सोमाज्यादिभिर्हविर्भि-र्वावृधे वर्धते यइन्द्रोमहद्भिःकर्मभिः असुरवधमेघभेदनादिलक्षणैर्व्यापारैःसुश्रुतोलोकेप्रसि-द्धोऽभूत् सइन्द्रइतिपूर्वेणान्वयः ॥ प्रभृतिं तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् । धाः दधातेश्छान्दसेलुङिरूपं निघातः । शश्वच्छश्वत् नित्यवीप्सयोरितिद्विर्वचनं । यादमानः याचृयाञ्चायां शानचिरूपं चकारस्यदकारश्छान्दसः । वावृधे वृधुवर्धनेइत्यस्माल्लिटिरूपं तुजादित्वादभ्यासदीर्घः संहितायांनिघातः । वर्धनेभिः वर्धतेर्ण्यन्तस्यनन्द्यादित्वाल्ल्युट् नि-त्स्वरः । सुश्रुतः श्रुश्रवणेइत्यस्मात्कर्मणिक्तः गतिरनन्तरइतिगतिस्वरः । भूत् भवतेर्लुङि रूपम् ॥ १ ॥

माध्यन्दिनसवनेच्छावाकस्यप्रस्थितयाज्येन्द्रायसोमाःप्रदिवइत्येषा सूत्रितश्च—इन्द्राय-सोमाःप्रदिवोविदानाआपूर्णोअस्येति ।

अथद्वितीया—

इन्द्रा॑य॒सोमाः॑प्र॒दिवो॒विदा॑नाऋ॒भुर्ये॑भि॒र्वृष॑पर्वा॒विहा॑याः ।
प्र॒य॒म्यमा॑ना॒न्प्रति॒षूगृ॑भा॒येन्द्र॒पिब॒वृष॑धूतस्य॒वृष्णः॑ ॥ २ ॥

इन्द्रा॑य । सोमाः॑ । प्र॒ऽदिवः॑ । विदा॑नाः । ऋ॒भुः । येभिः॑ ।
वृष॑ऽपर्वा । विऽहा॑याः । प्रऽय॒म्यमा॑नान् । प्रति॑ । सु ।
गृ॒भा॒य॒ । इन्द्र॑ । पिब॑ । वृष॑ऽधूतस्य । वृष्णः॑ ॥ २ ॥

हेइन्द्र इन्द्रायतुभ्यं सोमाःप्रदिवः प्रगतेषुपूर्वेष्वहःसुविदानाअस्माभिर्लंभिताः वृषपर्वा वृषाणःफलस्यवर्षकाःपर्वाणिकालावयवावर्षाद्यायस्यसतथोक्तः कालात्मकइत्यर्थः अतएवविहायाः विजहात्युत्सृजत्यर्थानर्थिभ्यइतिविहायामहान् तादृशइन्द्रः येभिर्यैर्दत्तैःसोमैर्ऋभुर्दीप्तोवर्तते हेइन्द्र त्वंप्रयम्यमानान्प्रकर्षेणमन्त्रैरुपयम्यमानानिमान्सोमान्सु सुष्ठु प्रतिगृभाय प्रतिगृहाण गृहीत्वाच वृषधूतस्यवृषभिर्ग्रावभिरभिषुतं वृष्णः स्वर्गादिफलवर्षकमिमंसोमंपिब ॥ प्रदिवः दिवुक्रीडादौ क्विप् कालाध्वनोरत्यन्तसंयोगेइतिद्वितीया दिवशब्दोदिवसवाची कृदुत्तरपदस्वरः । विदानाः विद्लृलाभेइत्यस्यव्यत्ययेनशानच् बहुलंछन्दसीतिविकरणस्यलुक् । विहायाः ओहाक्त्यागे वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेरातोयुक्चिण्कृतोरितियुगागमः गतिकारकयोरितिपूर्वपदप्रकृतिस्वरत्वम् । गृभाय ग्रहउपादानेइत्यस्यलोटि हौ श्नाप्रत्ययस्यछन्दसिशायजपीतिशायजादेशः हृग्रहोर्भइतिभत्वं अतोहेरितिहेर्लुक् निघातः ॥२॥

माध्यंदिनेसवनेऽच्छावाकशस्त्रेयाज्यापिबावर्धस्वेत्येषा सूत्रितञ्च—पिबावर्धस्वतवघासुतासइतियाज्येति ।

अथतृतीया—

पिबा॒वर्ध॑स्व॒तव॑घासु॒तास॒इन्द्र॒सोमा॑सःप्रथ॒माउ॒तेमे ।
यथापि॑बःपू॒र्व्याँइन्द्र॒सोमाँ॑ए॒वापा॑हि॒पन्यो॑अ॒द्यानवी॑यान् ॥ ॥

पिब॑ । वर्ध॑स्व । तव॑ । घ॒ । सु॒तासः॑ । इन्द्र॑ । सोमा॑सः । प्र॒थ॒माः ।
उ॒त । इ॒मे । यथा॑ । अपि॑बः । पू॒र्व्यान् । इ॒न्द्र॒ । सोमा॑न् । ए॒व ।
पा॒हि॒ । पन्यः॑ । अ॒द्य । नवी॑यान् ॥ ३ ॥

Funding by IKS-MoE

हेइन्द्र सोमंपिब ततोवर्धस्व शरीरेणपुष्टोभव तव त्वदर्थं प्रथमाःपुरातनाः उतापिच इमे अभिनवाःउभयविधाःसोमासःसोमाः सुतासोघ ग्रावभिरभिषुताःखलु हेइन्द्र पूर्व्यान् पुरातनान्सोमान्यथात्वमपिबः एवएवं अद्याधुनापन्यःस्तुत्यः अतएवनवीयान् अतिशयेनाभिनवस्त्वं इमानभिनवान्सोमान्पाहिपिब ॥ पिब पातेर्लोटिरूपं । वर्धस्व तिङउत्तरत्वान्निघाताभावः । अपिबः यथायोगादनिघातः । पाहि पातेर्लोटि बहुलंछन्दसीतिशपोलुक् निघातः । पन्यः॰ पनतेःस्तुत्यर्थस्य अघ्न्यादित्वाद्यत् यतोनावइत्याद्युदात्तत्वम् । नवीयान् नवशब्दादीयसुनिरूपं नित्स्वरः ॥ ३ ॥

अथचतुर्थी–

महाँअम॑त्रोवृजने॑विरप्श्यु१ग्रंशवः॑पत्यतेधृष्ण्वोजः॑ ।
नाह॑विव्याचपृथिवीचनैनं॑यत्सोमा॑सोहर्य॑श्वमम॑न्दन् ॥ ४ ॥

महान् । अम॑त्रः । वृजने॑ । विऽरप्शी । उग्रम् । शवः॑ । पत्यते ।
धृष्णु । ओजः॑ । न । अह॑ । विव्याच । पृथिवी । चन । एनम् ।
यत् । सोमा॑सः । हरि॑ऽअश्वम् । अम॑न्दन् ॥ ४ ॥

योयमिन्द्रोमहान् अतिशयितसामर्थ्यवान् वृजने बलोपलक्षितेयुद्धे अमत्रः शत्रूणामभिभविता अतएवविरप्शी विरपणशीलः भुजास्फालनेनयुद्धार्थंशत्रूणामाह्वानकारी यद्वा विविधंरपणंस्तुतिलक्षणंयस्येति सर्वैःस्तुत्यइत्यर्थः तादृशस्येन्द्रस्यउग्रमुद्गूर्णंशवोबलंधृष्णु धर्षणशीलंओजःपराक्रमलक्षणंतेजः पत्यते सर्वत्रप्रसरति एनमेतादृशमहिमोपेतमिन्द्रं पृथिवी विस्तीर्णाभूमिः नविव्याच नव्याप्नोति अहशब्दएवार्थे चनेत्यप्यर्थे द्यौरपिनैवव्याप्नोतीत्यर्थः यद्यदासोमासःस्वाहाकृताःसोमाःहर्यश्वमिन्द्रममन्दन्नमादयन् तदातमेनंद्यावापृथिव्यौव्याप्तुंनशक्नुतइत्यर्थः ॥ अमत्रःअमगत्यादिषु अमिनक्षियजीत्यादिनात्रन्प्रत्ययः नित्स्वरः । विरप्शी रपलपव्यक्तायांवाचि औणादिकःशप्रत्ययः विविधंरपन्तीतिविरप्शाःस्तोतारः तेऽस्य सन्तीति अतइनिः यद्वा विविधंरपणंविरप्शंतदस्यास्तीति प्रत्ययस्वरः । पत्यते व्यत्ययेन यक् कर्तरिनिघातः । धृष्णु ञिधृषाप्रागल्भ्ये त्रसिगृधिधृषिक्षिपेःक्नुरितिक्नुप्रत्ययः रषाभ्यामितिणत्वं प्रत्ययस्वरः । विव्याच व्यचेर्लिटिणलि लिट्यभ्यासस्योभयेषामित्यभ्यासस्यसंप्रसारणं निघातः । चनेतिनिपातसमुदायश्चार्थेवर्तते एवमादित्वादन्तोदात्तः । अमन्दन् मदिस्तुत्यादिष्वित्यस्य लङिरूपं यद्योगादनिघातः ॥ ४ ॥

Funding by IKS-MoE

अथपञ्चमी–

म॒हाँउ॒ग्रोवा॑वृधेवी॒र्या॑यस॒माच॑क्रेवृष॒भःकाव्ये॑न ।
इन्द्रो॒भगो॑वाज॒दाअ॑स्य॒गाव॒ःप्रजा॑यन्ते॒दक्षि॑णाअस्यपू॒र्वीः ॥५॥१९॥

म॒हान् । उ॒ग्रः । व॒वृ॒धे॒ । वी॒र्या॑य । स॒म्ऽआच॑क्रे । वृ॒ष॒भः ।
काव्ये॑न । इन्द्रः॑ । भगः॑ । वा॒ज॒ऽदाः । अ॒स्य॒ । गावः॑ । प्र ।
जा॒य॒न्ते॒ । दक्षि॑णाः । अ॒स्य॒ । पू॒र्वीः ॥ ५ ॥ १९ ॥

महान्युद्धकर्मणिबलवानुग्रःशत्रूणांभयंकरः इन्द्रोवीर्याय वीर्यकरणाय वावृधे वर्धते वृषभःफलस्याभिवर्षकः भगः सर्वैर्भजनीयःसइन्द्रःकाव्येन कवयःस्तोतारःतत्कर्मस्तोत्रं तेन स्तोत्रेणसमाचक्रे संगच्छते तादृशस्यास्येन्द्रस्यगावः वाजदाः क्षीरादिलक्षणान्नप्रदाः प्रजायन्ते तथास्यपूर्वीर्बह्व्यस्तागावोदक्षिणाःप्रजायन्ते ॥ वावृधे वर्धतेर्लिटिरूपं निघातः । वीर्याय वीरेभवंवीर्यं भवेछन्दसीतियत् वीरवीर्यौचेत्यत्रयतोनावइत्यस्यानित्यत्वस्यज्ञापितत्वात्तित्स्वरितः । समाचक्रे करोतेर्लिटिरूपं गतिर्गतावितिपूर्वपदस्य गतेर्निघातः । काव्येन कवेःकर्मकाव्यं ब्राह्मणादित्वात्ष्यञ् ञित्त्वादुपधावृद्धिः ञित्स्वरः । वाजदाः ददातेरातोनुपसर्गेकः । जायन्ते जनीप्रादुर्भावेइत्यस्यलटिरूपं । दक्षिणाः दक्षवृद्धावित्यस्मात् द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः नित्त्वादाद्युदात्तः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी–

प्रय॑त्सिन्ध॑वःप्रस॒वं॑यथाय॒न्नापः॑समु॒द्रंर॒थ्ये॑वजग्मुः ।
अत॑श्चि॒दिन्द्रः॒सद॑सो॒वरी॑या॒न्यदीं॒सोमः॑पृ॒णाति॑दु॒ग्धोअं॒शुः ॥ ६ ॥

प्र । यत् । सिन्ध॑वः । प्र॒ऽस॒वम् । यथा॑ । आय॑न् । आपः॑ ।
स॒मु॒द्रम् । र॒थ्या॑ऽइव । ज॒ग्मुः । अतः॑ । चि॒त् । इन्द्रः॑ । सद॑सः ।
वरी॑यान् । यत् । ई॒म् । सोमः॑ । पृ॒णाति॑ । दु॒ग्धः । अं॒शुः ॥ ६ ॥

Funding by IKS-MoE

सिन्धवोनद्यः यथाप्रसवं प्रकर्षेणसूयतइतिप्रसवःकामः तमनुसृत्य यद्यदाप्रायन् प्रकृष्टमतिदूरंसमुद्रंगच्छन्ति तदा आपोमहान्तंसमुद्रं रथ्येव रथिनइवजग्मुः प्रीणनार्थंगच्छन्ति तद्वत् अतश्चित्सदसः अस्मादप्यन्तरिक्षादसाविन्द्रोवरीयानुरुतरःखलु यदीयमेनमिन्द्रंदुग्धोभिषुतः अंशुः लताखण्डरूपोल्पःसोमः पृणतिप्रीणयति यथाल्पानद्योल्पीयांसिचजलानिमहान्तंसमुद्रंप्रीणयन्तितद्वत् अल्पतरोंशुभूतःसोमोवरीयांसमिन्द्रंप्रीणयति ॥ प्रसवं सुवतेःकर्मण्यप् थाथादिस्वरः । आयन् अयतेर्लङिरूपं यद्योगादनिघातः । रथ्येव रथस्येमेरथ्याः रथाद्यदितियत् सुपांसुलुगितिसुपोडादेशः तित्स्वरितः इवेनविभक्तेरलोपः पूर्वपदप्रकृतिस्वरः । जग्मुः गमेर्लिटि गमहनेत्यादिनाउपधालोपः निघातः । वरीयान् उरुशब्दादीयसुनि प्रियस्थिरेत्यादिनावरादेशः नित्त्वादाद्युदात्तः । पृणति पृणप्रीणने तुदादिः यद्योगादनिघातः । दुग्धः दुहेःक्तः एकाचइतीट्प्रतिषेधः दादेर्धातोर्घइतिहकारस्यघत्वं झषस्तथोर्धोधः प्रत्ययस्वरः॥ ६ ॥

अथसप्तमी–

स॒मु॒द्रेण॒सिन्ध॑वो॒याद॑माना॒इन्द्रा॑य॒सोमं॒सुषु॑तं॒भर॑न्तः ।
अं॒शुंदु॑हन्तिह॒स्तिनो॑भ॒रित्रै॒र्मध्वः॑पुनन्ति॒धार॑याप॒वित्रैः॑ ॥ ७ ॥

स॒मु॒द्रेण॑ । सिन्ध॑वः । याद॑मानाः । इन्द्रा॑य । सोम॑म् । सुऽसु॑तम् ।
भर॑न्तः । अं॒शुम् । दु॒ह॒न्ति॒ । ह॒स्तिनः॑ । भ॒रित्रैः॑ । मध्वः॑ ।
पु॒न॒न्ति॒ । धार॑या । प॒वित्रैः॑ ॥ ७ ॥

समुद्रेण संहतानद्यादिरूपेणापोभिद्रवंत्येनमितिसमुद्रः तेन यादमानाः तेन सहसंगतिं याचमानाःसिन्धवोनद्योयथातंपूरयन्तितद्वत् हस्तिनोहस्तवन्तोध्वर्य्वादयः इन्द्रायतुभ्यं सुषुतं सुष्ठु अभिषुतंसोमंभरन्तःसंपादयन्तः अंशुंदुहन्तिलताखण्डमभिषुण्वंति तथातेऽध्वर्य्वादयःस्रवतोरसस्यधारया पवित्रैःपावनैर्भरित्रैः कर्मकरणार्थंपदार्थान्बिभ्रतीतिभरित्राबाहवः तैर्मध्वः माधुर्योपेतान्सोमान्पुनन्तिशोधयन्ति ॥ समुद्रेण समुत्पूर्वाद्द्रवतेरन्येभ्योपिदृश्यतइतिडः डित्त्वाट्टिलोपः यद्वा उंदीक्लेदने संपूर्वस्यस्फायितंचीत्यादिनारक् किरत्त्वादुपधालोपः उभयत्र प्रत्ययस्वरः सुपासहैकादेशेकृते एकादेशउदात्तएव । यादमानाः याचृयाञ्चायां शानच् व्यत्ययेनचकारस्यदकारः शानचोलसार्वधातुकस्वरेधातुस्वरः । दुहन्ति दुहप्रपूरणेइत्यस्यलटिरू-

Funding by IKS-MoE

पं । भरित्रैः डुभृञ्धारणपोषणयोरित्यस्मादशित्रादिभ्यइत्रोत्राविती त्रप्रत्ययः प्रत्ययस्वरः । पुनन्ति पूञ्पवनेइत्यस्यलटिरूपम् ॥ ७ ॥

अथाष्टमी–

ह्र॒दाइ॑वकु॒क्षय॑ःसोम॒धाना॒ःसंमी॑वि॒व्याच॒सव॑नापु॒रूणि॑ ।
अ॒न्ना॒यदिन्द्र॑ःप्र॒थ॒मा॒व्याश॑वृ॒त्रंज॑घ॒न्वाँअ॑वृणीत॒सोम॑म् ॥ ८ ॥

ह्र॒दाःऽइ॑व । कु॒क्षय॑ः । सो॒म॒ऽधाना॑ः । सम् । ई॒मिति॑ । वि॒व्या॒च॒ ।
सव॑ना । पु॒रूणि॑ । अन्ना॑ । यत् । इन्द्र॑ः । प्र॒थ॒मा । वि । आश॑ ।
वृ॒त्रम् । ज॒घ॒न्वान् । अ॒वृ॒णी॒त॒ । सोम॑म् ॥ ८ ॥

इन्द्रस्यकुक्षयः उदराणि सोमधानाः सोमोनिधीयतेष्विति सोमधानाः तत्रदृष्टान्तः—ह्रदाइव यथाह्रदाजलाधाराभवन्तितद्वत् ईंसोयमिन्द्रः पुरूणिसवना त्रीणिसवनानिसंविव्याच सम्यग्व्याप्नोति इन्द्रः प्रथमाप्रथमानि अन्ना भक्षणीयानि सोमादीन्यन्नानि यद्यस्माद्व्याश विशेषेणजघास ततोवृत्रंजघन्वान् वृत्रस्यहन्ताइन्द्रः सोमंमाध्यंदिनेसवने देवेभ्यःअवृणीत समभजत ॥ कुक्षयः कुषनिष्कर्षे प्लुषिशुषिकुषिभ्यःक्सिः कुष्यतइतिकुक्षिः प्रत्ययस्वरः । सोमधानाः दधातेरधिकरणेल्युट् लित्स्वरः । विव्याच व्यचेर्लिटिरूपम् । अन्ना अदभक्षणे अद्यतइत्यन्नं । आश अशभोजनेइत्यस्यलिटिणलिरूपं अतआदेरित्यभ्यासस्यदीर्घः यद्योगादनिघातः लित्स्वरः । वृत्रं नलोकाव्ययेतिषष्ठीप्रतिषेधः । जघन्वान् हन्तेःक्वसाविडभावेरूपं प्रत्ययस्वरः । अवृणीत वृङ्संभक्ताविर्त्यस्यलङिरूपम् ॥ ८ ॥

अथनवमी–

आतू॑भ॑र॒माकि॑रे॒तत्परि॑ष्ठाद्वि॒द्माहि॒त्वा॒वसु॑पतिं॒वसू॑नाम् ।
इन्द्र॒यत्ते॒माहि॑नं॒दत्र॒मस्त्य॒स्मभ्यं॒तद्ध॑र्यश्व॒प्रयं॑न्धि ॥ ९ ॥

आ । तु । भ॒र॒ । माकि॑ः । ए॒तत् । परि॑ । स्था॒त् । वि॒द्म । हि ।
त्वा॒ । वसु॑ऽपतिम् । वसू॑नाम् । इन्द्र॑ । यत् । ते॒ । माहि॑नम् ।
दत्र॑म् । अस्ति॑ । अ॒स्मभ्य॑म् । तत् । ह॒रि॒ऽअ॒श्व॒ । प्र । य॒न्धि॒ ॥ ९ ॥

Funding by IKS-MoE

6981

हेइन्द्र तु क्षिप्रं धनमाभर एतत्त्वयादीयमानंधनंमाकिः कोवापरिष्ठात् प्रतिबध्यतिष्ठेत् त्वात्वांवसूनांधनानांवसुपतिमुत्तमस्यधनस्यस्वामिनंविद्महि जानीमःखलु तेतव माहिनं मंहनीयं यद्दत्रंधनं अस्ति हेहर्यश्व तद्धनंअस्मभ्यंप्रयन्धि प्रयच्छ ॥ तु ऋचितुनुघेत्यादिनासंहितायांदीर्घः । भर भरतेर्लोटिरूपं । माकिः निपातः । स्थात् तिष्ठतेश्छान्दसेलुङिरूपं उपसर्गात्सुनोतीत्यादिनासंहितायांषत्वं निघातः । विद्म वेत्तेर्लटि विदोलटोवेतिमसोमादेशः प्रत्ययस्वरः संहितायांद्व्यचोऽतस्तिङइतिदीर्घः । वसुपतिं पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरः । माहिनं महेरिनण्चेतिइनणप्रत्ययः णित्त्वादुपधावृद्धिः ग्रामादित्वादाद्युदात्तः । यन्धि यमुउपरमे लोटि बहुलंछन्दसीतिशपोलुक् सेर्हिः तस्यवाछन्दसीतिपित्त्वस्यविकल्पितत्वादत्राङित्त्वादङितश्चेतिहेर्ध्यादेशः निघातः ॥ ९ ॥

जातकर्मण्यंसाभिमर्शनेअस्मेप्रयन्धिइत्येषा यद्यपिसानिर्दहेदितिवचनेनशंसनेनिषिद्धा तथाप्यभिमर्शनस्यशंसनेचोदितत्वान्नोक्तदोषः ।

अथदशमी–

अ॒स्मेप्रय॑न्धिमघवन्नृजीषि॒न्निन्द्र॑रा॒योवि॒श्ववा॑रस्य॒भूरे॑ः ।
अ॒स्मेश॒तंश॒रदो॑जी॒वसे॑धाअ॒स्मेवी॒रा॑ञ्छश्व॑तइन्द्रशिप्रिन् ॥ १०॥

अ॒स्मे इति॑ । प्र । य॒न्धि॒ । म॒घ॒ऽव॒न् । ऋ॒जी॒षि॒न् । इन्द्र॑ । रा॒यः ।
वि॒श्वऽवा॑रस्य । भूरे॑ः । अ॒स्मे इति॑ । श॒तम् । श॒रद॑ः । जी॒वसे॑ ।
धा॒ः । अ॒स्मे इति॑ । वी॒रान् । शश्व॑तः । इ॒न्द्र॒ । शि॒प्रि॒न् ॥ १० ॥

मघवन्धनवन्नृजीषिन्गतसार सोमवन् हेइन्द्र विश्ववारस्य विश्वैःसर्वैः संभजनीयतयावरणंयस्यतत् भूरेःभूरिबहुरायोधनं द्वितीयार्थेषष्ठी अस्मे अस्मभ्यंप्रयन्धिप्रयच्छ किंच अस्मे अस्माकं जीवसे जीवनाय शतं शरदः संवत्सरान्धाः देहि शिप्रिन् शोभनहनो हेइन्द्र अस्मे अस्माकंशश्वतः शश्वदितिबहुनाम बहून्वीरान्पुत्रान्देहि ॥ जीवसे जीवप्राणधारणेइत्यस्य तुमर्थेअसेप्रत्ययः प्रत्ययस्वरः । शश्वतः टुओश्विगतिवृद्ध्योः अस्मात्संश्वद्वेहदित्यादिनातिप्रत्ययान्तत्वेननिपातनादिष्टरूपसिद्धिः ॥ १० ॥

Funding by IKS-MoE

अथैकादशी–

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥११॥२०॥

शु॒नम् । हु॒वे॒म । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ । घ्नन्त॑म् ।
वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ११ ॥ २० ॥

शुनंहुवेमेतिव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यद्वितीयेविंशोवर्गः ॥ २० ॥

वार्त्रहत्यायेत्येकादशर्चमष्टमंसूक्तं एकादशी अनुष्टुप् शिष्टागायत्र्यः इन्द्रोदेवता तथाचानुक्रान्तम्–वार्त्रहत्यायगायत्रमन्त्यानुष्टुबिति । अतिरात्रेप्रथमेपर्यायेब्राह्मणाच्छंसिशस्त्रेवार्त्रहत्यायेत्युत्तमावर्जंसूक्तंशंसनीयम् सूत्रितंच–वार्त्रहत्यायेत्युत्तमामुद्धरेदिति । महाव्रतेगायत्रीतृचाशीतावुत्तमावर्जमिदंसूक्तं पंचमारण्यकेसूत्रितम्–वार्त्रहत्यायशवसइत्युत्तमामुद्धरतीति ।

तस्मिन्सूक्तेप्रथमा–

वार्त्र॑हत्याय॒शव॑सेपृतना॒षाह्या॑यच । इन्द्र॒त्वाव॑र्तयामसि ॥ १ ॥

वार्त्र॑ऽहत्याय । शव॑से । पृ॒त॒ना॒ऽसह्या॑य । च॒ ।
इन्द्र॑ । त्वा॒ । आ । व॒र्त॒या॒म॒सि॒ ॥ १ ॥

विश्वामित्रःस्तौति–हेइन्द्र वार्त्रहत्याय वृत्रहननिमित्ताय शवसे बलाय अपिच पृतनाषाह्याय परकीयसेनाभिभवाय त्वा त्वां आसर्वतोवर्तयामसि प्रवर्तयामः ॥ वार्त्रहत्याय वृत्रघ्नः कर्मेत्यर्थे ब्राह्मणादित्वात्ष्यञ् हनस्तोचिण्णलोरितितकारः नित्त्वादाद्युदात्तः । पृतनाषाह्याय षहमर्षणेइत्यस्माद्भावे शकिसहोश्चेतियत् संहितायांसहेःपृतनर्ताभ्यांचेतिषत्वं दीर्घश्छान्दसः । वर्तयामसि वृतुवर्तनेइत्यस्यण्यन्तस्यमसः इदन्तोमसिइत्यादेशः निघातः ॥ १ ॥

अथद्वितीया–

अ॒र्वा॒ची॒नंसु॒ते॒मन॑उ॒तचक्षुः॑शतक्रतो । इन्द्र॑कृ॒ण्वन्तु॑वा॒घतः॑ ॥ २ ॥

अ॒र्वा॒चीन॑म् । सु । ते॒ । मन॑ः । उ॒त । चक्षु॑ः । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ।
इन्द्र॑ । कृ॒ण्वन्तु॑ । वा॒घत॑ः ॥ २ ॥

हेशतक्रतो शतंक्रतवोयस्यासौशतक्रतुः हेइन्द्र वाघतः वहन्तियज्ञियांधुरमितिवाघतःस्तोतारः ते तव सु अस्मदभिमतफलसंपादनेनशोभनंमनः अर्वाचीनमस्मदभिमुखंकृण्वन्तु कुर्वन्तु उतापिच चक्षुःत्वदीयंदर्शनमस्मास्वनुग्रहदृष्टिंकुर्वंतु ॥ अर्वाचीनं विभाषांचेरदिक्स्त्रियामिति खप्रत्ययः खस्येनादेशः । चक्षुः चक्षेःशिच्चेत्युसिप्रत्ययः शिद्वद्भावात्ख्याञादेशाभावः निदित्यनुवृत्तेराद्युदात्तश्च । कृण्वन्तु कृविहिंसाकरणयोरित्यस्यलोटिरूपं आमन्त्रितस्याविद्यमानवत्त्वेनपादादित्वादनिघातः प्रत्ययस्वरः । वाघतः वहप्रापणे संश्चद्वेहदित्यादिनाअतिप्रत्ययान्तत्वेननिपातनादुपधावृद्धिः हकारस्यघत्वं प्रत्ययस्वरः ॥ २ ॥

अथतृतीया—

नामा॑नितेशतक्र॒तो॒विश्वा॑भिर्गी॒र्भिरी॑महे । इन्द्रा॑भिमाति॒षाह्ये॑ ॥३॥

नामा॑नि । ते॒ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो । विश्वा॑भिः ।
गी॒ःऽभिः । ई॒म॒हे॒ । इन्द्र॑ । अ॒भि॒मा॒ति॒ऽसह्ये॑ ॥ ३ ॥

शतक्रतो हेइन्द्र अभिमातिषाह्ये मातिर्मानोगर्वः अभितोमानोयेषांते अभिमातयःशत्रवः तेषां सहनमेवसह्यंयस्मिन्तस्मिन्युद्धेऽस्माकमुपस्थितेसति ते तव नामानि शक्रवज्रहस्तादीनिनामधेयानि यद्वा तदुपलक्षितानिबलानि विश्वाभिर्गीर्भिः सर्वाभिःस्तुतिलक्षणाभिर्वाग्भिरीमहे वयंयाचामहे ॥ ईमहे ईकान्त्यादिषु व्यत्ययेनात्मनेपदं अदादित्वाच्छपोलुक् निघातः ॥ ३ ॥

अथचतुर्थी—

पु॒रु॒ष्टु॒तस्य॒धाम॑भिःश॒तेन॑महयामसि । इन्द्र॑स्यचर्षणी॒धृत॑ः ॥ ४ ॥

पु॒रु॒ऽस्तु॒तस्य॑ । धाम॑ऽभिः । श॒तेन॑ । म॒ह॒या॒म॒सि॒ ।
इन्द्र॑स्य । च॒र्ष॒णि॒ऽधृत॑ः ॥ ४ ॥

हेइन्द्र पुरुष्टुतस्य पुरुभिःबहुभिःस्तोतृभिः स्तुतस्य शतेन अपरिमितसंख्याकैर्धामभिस्तेजोभिर्युक्तस्य चर्षणीधृतः चर्षणीनांमनुष्याणांकर्मानुष्ठातॄणां अभिमतफलसंपादनेनधारकस्येन्द्रस्य यद्वा आकृषन्तिसर्वमनेनेतिचर्षणि बलं तद्धारकस्य तव महयामसि महयामः स्तोत्रंकुर्मः ॥ पुरुष्टुतस्य ष्टुञ्स्तुतौ कर्मणिक्तः थाथादिस्वरः संहितायांस्तुतस्तोमयोश्छन्दसीतिषत्वम् । महयामसि महपूजायामित्यस्यलटि इदन्तोमसिः निघातः । चर्षणिधृतः कृषआकर्षणे कृषेरादेश्चचेत्यनिप्रत्ययः ककारस्यचकारादेशः यद्वा कृषविलेखने कर्षन्तीतिचर्षणयोमनुष्याः धृतः धृधारणे क्विप् कृदुत्तरपदस्वरः ॥ ४ ॥

अथपञ्चमी–

इन्द्रं॑वृ॒त्राय॒हन्त॑वेपुरुहू॒तमुप॑ब्रुवे । भरे॑षु॒वाज॑सातये ॥ ५ ॥ २१ ॥

इन्द्र॑म् । वृ॒त्राय॑ । हन्त॑वे । पु॒रु॒ऽहू॒तम् । उप॑ ।
ब्रु॒वे॒ । भरे॑षु । वाज॑ऽसातये ॥ ५ ॥ २१ ॥

हेइन्द्र वृत्रायहन्तवे वृत्रनामकमसुरंहन्तुं भरेषु युद्धेषु वाजसातये अन्नोपलक्षितधनलाभायच पुरुहूतं बहुभिराहूतमिन्द्रं बलवन्तं त्वामुपब्रुवे सोमपानार्थंविश्वामित्रोहमाह्वयामि वृत्रायक्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानम् ॥ हन्तवे हन्तेस्तुमर्थेतवेन्प्रत्ययः नित्स्वरः । ब्रुवे ब्रूञ्व्यक्तायांवाचीत्युत्तमस्यलटचुत्तमइटिरूपं निघातः । वाजसातये सननंसातिः वाजस्यसातिर्वाजसातिःदासीभारादित्वात्पूर्वपदप्रकृतिस्वरः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी–

वाजे॑षुसास॒हिर्भ॑व॒त्वामी॑महेशतक्रतो । इन्द्र॑वृ॒त्राय॒हन्त॑वे ॥ ६ ॥

वाजे॑षु । स॒स॒हिः । भ॒व॒ । त्वाम् । ई॒म॒हे॒ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ।
इन्द्र॑ । वृ॒त्राय॑ । हन्त॑वे ॥ ६ ॥

शतक्रतो हेइन्द्र वाजेषुसंग्रामेषुसासहिः शत्रूणामभिभविताभव वृत्रायहन्तवेवृत्रंहन्तुं त्वामीमहे प्रार्थयामहे ॥ सासहिः सहिवहिचलिपतिभ्योयङन्तेभ्यःकिकिनौवक्तव्याविति किप्रत्ययः तस्यस्वरः । वृत्राय कर्मणःसंप्रदानं । हन्तवे तुमर्थेतवेन्प्रत्ययः ॥ ६ ॥

Funding by IKS-MoE

अथसप्तमी–

द्यु॒म्नेषु॑पृत॒नाज्ये॑पृत्सु॒तूर्षु॒श्रवः॑सुच । इन्द्र॒साक्ष्वा॒भिमा॑तिषु ॥ ७ ॥

द्यु॒म्नेषु॑ । पृ॒त॒नाज्ये॑ । पृ॒त्सु॒तूर्षु॑ । श्रवः॑ऽसु । च॒ ।
इन्द्र॑ । साक्ष्व॑ । अ॒भिऽमा॑तिषु ॥ ७ ॥

द्युम्नेषुद्योतमानेषुधनेषुप्राप्तव्येषु अभिमानिनोयेसपत्नाःपृतनाज्ये पृतनानामजनंगमनंयस्मिन्निति पृतनाज्यं संग्रामः तस्मिन्संग्रामेच पृत्सुतूर्षु पृतनासुतरणशीलेषुशूरेषु श्रवःसु बलेषुच येअभिमानिनःसपत्नाःसन्ति तान्साक्ष्वाभिभव तथा हेइन्द्र अभिमातिषु सर्वतोगर्वयुक्तेषु शत्रुषुपुरुषेषुयेसपत्नास्तांश्चाभिभव ॥ पृतनाज्ये अजगतिक्षेपणयोरित्यस्यण्यन्तस्यअचोयत् पृतनानामाज्यंपृतनाज्यं एकादेशस्वरः । पृत्सुतूर्षु पृतनाशब्दस्यसौपरतः मांस्पृत्स्नूनामुपसंख्यानमितिपृदादेशः ञित्वरासंभ्रमे ताच्छीलिकःक्विप् ज्वरत्वरेत्यादिनाऊठ् तत्पुरुषेकृतिबहुलमिति पूर्वपदस्यसप्तम्याअलुक् कृदुत्तरपदस्वरः । साक्ष्व षहमर्षणेइत्यस्य लोटि बहुलंछन्दसीतिशपो लुक् ढत्वकत्वे दीर्घश्छान्दसः ॥ ७ ॥

चातुर्विंशिकेहनिमाध्यन्दिनेसवनेब्राह्मणाच्छंसिशस्त्रे शुष्मिन्तमन्नऊतयइतितृचोवैकल्पिकोनुरूपः । सूत्रितम्–शुष्मिन्तमन्नऊतयेश्चायन्तइवसूर्यमिति ।

अथाष्टमी–

शु॒ष्मिन्त॑मंनऊ॒तये॑द्यु॒म्निनं॑पाहि॒जागृ॑विम् । इन्द्र॒सोमं॑शतक्रतो ॥ ८ ॥

शु॒ष्मिन्ऽत॑मम् । न॒ः । ऊ॒तये॑ । द्यु॒म्निन॑म् । पा॒हि॒ । जागृ॑विम् ।
इन्द्र॑ । सोम॑म् । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ॥ ८ ॥

शतक्रतो हेइन्द्र शुष्मिन्तमं बलवतांमध्येअतिशयेनबलवन्तं द्युम्निनं दीप्तिमन्तं यद्वा शुष्मिन्तमं शत्रूणांशोषकतमं द्युम्निनं यशस्विनं जागृविं जागरणशीलं पीतःसोमोजागृविः स्वमनिवारकइतिताद्दृशंनोऽस्माकंसंबंधिनंसोमं ऊतयेस्माकंरक्षणायपाहि अत्रागत्यपिब । शुष्मिन्तमं तमपःपित्त्वादनुदात्तत्वेप्रत्ययस्वरः । पाहि पातेर्लोटि बहुलंछन्दसीतिशपोलुक् निघातः । जागृविः क्विन्प्रत्ययान्तः नित्त्वादाद्युदात्तः ॥ ८ ॥

अथनवमी–

इ॒न्द्रि॒याणि॑शतक्रतो॒याते॒जने॑षुप॒ञ्चसु॑ । इन्द्र॒तानि॑त॒आवृ॑णे ॥ ९ ॥

इ॒न्द्रि॒याणि॑ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो । या । ते॒ ।
जने॑षु । प॒ंचऽसु॑ । इन्द्र॑ । तानि॑ । ते॒ । आ । वृ॒णे॒ ॥ ९ ॥

शतक्रतो हेइन्द्र तेतवसंबन्धिषुपञ्चसुजनेषु गन्धर्वाःपितरोदेवाअसुरारक्षांसीत्येतेषु या यानीन्द्रियाणि रूपग्रहणादिसामर्थ्यानिस्थितानि तेत्वदीयानितानीन्द्रियाण्यहमावृणे संभजे यद्वा पञ्चजनेषु निषादपञ्चमेषुचतुर्षुजनेषु यानीन्द्रियाणिसामर्थ्यानितानि त्वदीयान्यहमावृणे ॥ इन्द्रियाणि इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिंद्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमितिवेँतिघञ्प्रत्ययान्तत्वेननिपातनादन्तोदात्तः । वृणे वृङ्संभक्तावित्यस्यलटिरूपं निघातः ॥ ९ ॥

अथदशमी–

अग॑न्निन्द्र॒श्रवो॑बृ॒हद्द्यु॒म्नंद॑धिष्वदु॒ष्टर॑म् । उत्ते॒शुष्मं॑तिराम॑सि ॥ १० ॥

अग॑न् । इ॒न्द्र॒ । श्रवः॑ । बृ॒हत् । द्यु॒म्नम् । द॒धि॒ष्व॒ । दु॒स्तर॑म् ।
उत् । ते॒ । शुष्म॑म् । ति॒रा॒म॒सि॒ ॥ १० ॥

हेइन्द्र बृहन्महच्छ्रवःसोमलक्षणमस्माभिर्दीयमानमन्नं अगन् त्वांगच्छतु त्वं दुष्टरं दुस्तरं शत्रुभिस्तरीतुमशक्यं द्युम्नं धनं दधिष्वास्मभ्यंप्रयच्छ वयंतु ते त्वदीयं शुष्मं बलंउत् उत्कृष्टंतिरामसि सोमाज्यादिभिर्वर्धयामः ॥ अगन् गमेर्लङि बहुलंछन्दसीतिशपोलुक् हल्ङ्यादिनातिलोपः मोनोधातोः अडागमस्वरः । दधिष्व दधातेर्लोटि छन्दस्युभयथेति थासआर्धधातुकत्वादिडागमः निघातः । दुस्तरं तरतेःकृच्छ्रार्थेखल् सुषामादित्वात्संहितायां षत्वं लित्स्वरः । तिरामसि इदन्तोमसि निघातः ॥ १० ॥

अथैकादशी–

अ॒र्वा॒वतो॑न॒आग॒ह्यथो॑शक्रपरा॒वतः॑ ।
उ॒लो॒कोयस्ते॑अद्रिव॒इन्द्रे॒हतत॒आग॑हि ॥ ११ ॥ २२ ॥

अ॒र्वा॒ऽवतः॑ । न॒ः । आ । ग॒हि॒ । अथो॒ इति॑ । श॒क्र॒ । प॒रा॒ऽवतः॑ ।
उँ॒ इति॑ । लो॒कः । यः । ते॒ । अ॒द्रि॒ऽव॒ः । इन्द्र॑ । इ॒ह ।
ततः॑ । आ । ग॒हि॒ ॥ ११ ॥ २२ ॥

शक्र बलवन्हेइन्द्र अर्वावतः अर्वाचीनात्समीपाद्देशात् अथो अपिच परावतोतिदूराद्देशान्नोस्मानभिलक्ष्यागहि आगच्छ अद्रिवः अत्तिभक्षयतिशत्रूनितिअद्रिर्वज्रः तद्वन् हेइन्द्र ते तव यउलोकउत्तमोलोकोऽस्ति ततस्तस्मादपिलोकादिहास्मिन्देवयजनदेशे सोमपानार्थमागहि आगच्छ ॥ गहि गमेर्लोटिरूपम् । परावतः उपसर्गाच्छन्दसिधात्वर्थेइतिवतिः प्रत्ययस्वरः । अद्रिवः मतुवसोरुरितिवः ततःपञ्चम्यास्तसिलितितसिल् लित्स्वरः ॥११॥

॥ इतितृतीयस्यद्वितीयेद्वाविंशोवर्गः ॥ २२ ॥

अभितष्टेवेतिदशर्चंनवमंसूक्तं अत्रानुक्रमणिका—अभितष्टेवदशप्रजापतिःसवैश्वामित्रोवाच्योवाद्वौवातौनवैकोपीति विश्वामित्रगोत्रःप्रजापतिःवाचःपुत्रःप्रजापतिर्वाऋषिः तावुभावपि समुच्चितावस्यसूक्तस्यऋषी इतिद्वितीयःपक्षः अथवानोभावपि किंतु विश्वामित्रएवेतितृतीयःपक्षः त्रिष्टुप्छन्दः इन्द्रोदेवता चातुर्विंशिकेहनिमाध्यंदिनेसवने अच्छावाकशस्त्रे अभितष्टेवेत्यहरहःशस्यनामकंसूक्तम् । सूत्रितश्च—उदुब्रह्माण्यभितष्टेवेतीतरावहरहःशस्येइति एवंसर्वत्राहर्गणेषुद्वितीयादिष्वहःसुमाध्यंदिनसवनेऽच्छावाकशस्त्रेएतत्सूक्तम् ।

अथतस्मिन्सूक्तेप्रथमा—

अ॒भितष्टे॑वदीधयामनी॒षामत्यो॒नवा॒जीसु॒धुरो॒जिहा॑नः ।
अ॒भिप्रि॒याणि॒मर्मृ॑श॒त्परा॑णिक॒वीँरि॑च्छामिसं॒दृशे॑सुमे॒धाः ॥ १ ॥

अ॒भि । तष्टा॑ऽइव । दी॒ध॒य॒ । म॒नी॒षाम् । अत्यः॑ । न । वा॒जी ।
सु॒ऽधुरः॑ । जिहा॑नः । अ॒भि । प्रि॒याणि॑ । मर्मृ॑शत् । परा॑णि ।
क॒वीन् । इ॒च्छा॒मि॒ । स॒म्ऽदृशे॑ । सु॒ऽमे॒धाः ॥ १ ॥

यजमानःस्तोतारंप्रतिब्रूते—हेस्तोतः मनीषामिन्द्रविषयांस्तुतिं अभिदीधय सर्वतोदीप्तां कुरु तत्रदृष्टान्तः—तष्टेव यथातष्टातक्षणेनकाष्ठंसंस्करोतितद्वत् सुधुरः शोभनयाधुरान्वितो वाजीवेगवानत्योन अश्वइव जिहानःकर्मणिप्रवर्तमानः पराण्युत्तमानिप्रियाणीन्द्रस्यप्रियतमानि यद्वा पराण्युत्तरेष्वहःसुक्रियमाणानिकर्माणि अभिमर्मृशत् अत्यर्थमभिमृशन् सुमेधाः शोभनमेधावानहं कवीन्येपूर्वमनुष्ठितयज्ञाद्देवभूयमगमन् तेकवयः तान्संदृशे संद्रष्टुमिच्छामि उक्तार्थेब्राह्मणम्—अभितष्टेवदीधयामनीषामित्यच्छावाकोहरहःशंसत्यभिवत्तत्यैरूपमभिप्रियाणिमर्मृशत्पराणीतियान्येवपराण्यहानितानिप्रियाणितान्येवतदभिमर्मृशतोयन्त्यभ्यारभमाणाः

परोवाअस्माँल्लोकात्स्वर्गोलोकस्तमेवतदभिवदतिकवीँ रिच्छामिसंदृशेसुमेधाइतियेवैतेनऋषयःपूर्वेप्रेतास्तेवैकवयस्तानेवतदभ्यतिवदतीति ॥ तष्टेव तक्षूत्वक्षूतनूकरणेइत्यस्यतृचिरूपं नित्स्वरः। दीधय दीधीङ्दीप्तिदेवनयोरित्यस्यअन्तर्भावितण्यर्थस्यलोटिशपोबहुलंछन्दसीतिलुगभावः व्यत्ययेनपरस्मैपदम्। सुधुरः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। जिहानः ओहाङ्गतावित्यस्यशानचिभृञामिदित्यभ्यासस्येत्वं चित्त्वादन्तोदात्तत्वेप्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वम्।मर्मृशत् मृशआमर्शनेइत्यस्ययङ्लुकि रुग्रिकौचलुकीत्यभ्यासस्यरुगागमः तदन्ताच्छतरिरूपं नाभ्यस्ताच्छतुरितिनुमभावः अभ्यस्तस्वरः। संदृशे दृशिर्प्रेक्षणेइत्यस्मात्तुमर्थे दृशेविख्येचेतिकेन्प्रत्ययान्तत्वेननिपातनादाद्युदात्तः समासेकृदुत्तरपदस्वरः। सुमेधाः नित्यमसिच्प्रजामेधयोरित्यसिच्प्रत्ययः चित्स्वरः ॥ १ ॥

अथद्वितीया—

इनोतपृच्छजनिमाकवीनांमनोधृतःसुकृतस्तक्षतद्याम् ।
इमाउतेप्रण्योइवर्धमानामनोवाताअधनुधर्मणिग्मन् ॥ २ ॥

इना । उत । पृच्छ । जनिम । कवीनाम् । मनःऽधृतः । सुऽकृतः ।
तक्षत । द्याम् । इमाः । ऊँ इति । ते । प्रऽन्यः । वर्धमानाः ।
मनःऽवाताः । अध । नु । धर्मणि । ग्मन् ॥ २ ॥

उतेत्यामन्त्रणे हेइन्द्र कवीनां सुकृतकर्मणांदेवभूयंगतानांजनिम जन्म केनकर्मणादिवं गताः कुतोवातेषामुत्पत्तिरिति एतमर्थमिनाईश्वरान्गुरून्पृच्छ तेकवयोमनोधृतःसंयतमनस्काः अतएवसुकृतः शोभनकर्माणःसन्तः द्यांदिवंतक्षताकुर्वन् अध अथेदानीं धर्मण्यस्मिन्यज्ञे तेत्वदर्थंप्रण्यः प्रणीयमानामनोवाताः मनोवेगाः वर्धमानास्त्वां वर्धयन्त्यइमाअस्माभिःक्रियमाणस्तुतयोनुक्षिप्रंग्मन् त्वांगच्छन्तु उसर्वत्रप्रसिद्ध्यर्थः ॥ पृच्छ प्रच्छज्ञीप्सायामित्यस्यलोटि तुदादित्वाच्छः तस्यङित्त्वाद्ग्रहिज्यादिनासंप्रसारणं निघातः। प्रण्यः णीञ्प्रापणेइत्यस्मादौणादिकःकर्मणिक्विप् सर्वविधीनांछन्दसिविकल्पितत्वादियङादेशंबाधित्वायणादेशः उदात्तस्वरितयोरितिस्वरितत्वम् । ग्मन् गमेर्लङिबहुलंछन्दसीतिशपोलुक् झेर्ङित्त्वाद्गमहनेत्यादिनोपधालोपःनिघातः ॥ २ ॥

---

१ ऐ० ब्रा० ६. २० ।

अथतृतीया—

नि॒षी॒मिद॒त्र॒गुह्या॒दधा॑नाउ॒तक्ष॒त्राय॒रोद॑सी॒सम॑ञ्जन् ।
संमात्रा॑भिर्ममि॒रेये॒मुरु॒र्वीअ॒न्तर्म॒हीसमृ॑ते॒धाय॑सेधुः ॥ ३ ॥

नि । सी॒म् । इत् । अत्र॑ । गुह्या॑ । दधा॑नाः । उ॒त । क्ष॒त्राय॑ ।
रोद॑सी॒ इति॑ । सम् । अ॒ञ्ज॒न् । सम् । मात्रा॑भिः । म॒मि॒रे । ये॒मुः ।
उ॒र्वी इति॑ । अ॒न्तः । म॒ही इति॑ । समृ॑ते॒ इति॒ सम्ऽऋ॑ते ।
धाय॑से । धु॒रिति॑ धुः ॥ ३ ॥

अत्रभूर्लोके गुह्या गूढानिकर्माणि सीमित् सर्वतएवनिदधानाःकुर्वाणाएतेकवयः उतापिच क्षत्रायबलाय धनायवा रोदसीद्यावापृथिव्यौ समञ्जन् ओषधीभिःपृथिवीं देवैश्चदिवंसंगतामकार्षुः किञ्च तेमात्राभिर्मीयन्तेमान्तीतिवामात्राःशिलोच्चयाः ताभिर्मात्राभिःसंममिरे तेरोदस्यावियत्तयापरिच्छिन्नेचक्रुश्च समृतेपरस्परंसंगते उर्वी विस्तीर्णे मही महत्यौ ते द्यावापृथिव्यौयेमुः विष्टंभकेणान्तरिक्षेण अन्तःउदयच्छन् तथा धायसेतयोर्धारणार्थं अंतरिक्षं धुः व्यधुः ॥ इदवधारणार्थे । गुह्या गुहायांभवानि भवार्थेयत् यतोनावइत्याद्युदात्तत्वम् । दधानाः दधातेःशानचिरूपं अभ्यस्तस्वरः । अञ्जन् अञ्जूव्यक्तिम्रक्षणगतिष्वित्यस्य लङि श्नसोरल्लोपः निघातः । मात्राभिः मामानेमाङ्मानेवा हुयामेत्यादिनात्रन्प्रत्ययः नित्स्वरः । ममिरे माङ्मानेइत्यस्यलिटिरूपं चादिलोपेविभाषेतिननिघातः । येमुः यमउपरमे इत्यस्यलिट्युसिरूपं तिङउत्तरादनिघातः । धायसे वहिहाधाञ्भ्यश्छन्दसीत्यसुन् नित्स्वरः । धुः दधातेर्लुङिरूपम् ॥ ३ ॥

अथचतुर्थी—

आ॒तिष्ठ॑न्तं॒परि॒विश्वे॑अभूष॒ञ्छ्रियो॒वसा॑नश्चरति॒स्वरो॑चिः ।
म॒हत्तद्वृष्णो॒असु॑रस्य॒नामावि॒श्वरू॑पोअ॒मृता॑नितस्थौ ॥ ४ ॥

आ॒ऽतिष्ठ॑न्तम् । परि॑ । विश्वे॑ । अ॒भू॒ष॒न् । श्रियः॑ । वसा॑नः । च॒र॒ति॒ ।
स्वऽरो॑चिः । म॒हत् । तत् । वृष्णः॑ । असु॑रस्य । नाम॑ । आ ।
वि॒श्वऽरू॑पः । अ॒मृता॑नि । त॒स्थौ॒ ॥ ४ ॥

Funding by IKS-MoE

विश्वे सर्वेकवयःरथमातिष्ठन्तमिन्द्रंपर्यभूषन् परितोलमकुर्वन् स्वरोचिः स्वमेवरोचिर्यस्यासौस्वरोचिः स्वप्रभयैवदीप्यमानइत्यर्थः अतएव श्रियोदीप्तीर्वसानः आच्छादयन् सोऽयमिन्द्रश्चरति सर्वत्रवर्तते वृष्णः कामानांवर्षितुः असुरस्य अस्यतिप्रेरयतिसर्वानन्तर्यामितयेत्यसुरः तस्येन्द्रस्यतत्तादृशमनुभूतपूर्वं नाम नामयतिसर्वान्शत्रूनितिनाम कर्म यद्वा नम्यतेसर्वैर्नमस्क्रियतइतिनामेन्द्रस्यशरीरं कर्मवा महदाश्चर्योपेतंवर्तते तथा विश्वरूपोनानाविधरूपतांभजमानःसइन्द्रोवरुणात्मना अमृतानिजलानि आतस्थौ अधितिष्ठति ॥ विश्वे जसःशी । अभूषन् भूषअलङ्कारेइत्यस्यलङिरूपं । वसानः वसआच्छादनेइत्यस्य शानचिरूपं तस्यलसार्वधातुकस्वरेधातुस्वरः । नाम णमुप्रह्वत्वेइत्यस्मान्नामन्सीमन्नित्यादिनामनिन्प्रत्ययान्तत्वेननिपातनादाद्युदात्तः । विश्वरूपइतितस्यसंज्ञा बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । अमृतानि कालाध्वनोरत्यन्तसंयोगेइतिद्वितीया । तस्थौ तिष्ठतेर्लिटिणलिरूपम् ॥ ४ ॥

अथपञ्चमी–

असू॑त॒पूर्वो॑वृष॒भोज्याया॑नि॒माअ॑स्यशु॒रुधः॑सन्तिपू॒र्वीः ।
दिवो॑नपातावि॒दथ॑स्यधी॒भिःक्ष॒त्रंरा॑जानाप्र॒दिवो॑दधाथे ॥५॥२३॥

असू॑त । पूर्वः॑ । वृ॒ष॒भः । ज्याया॑न् । इ॒माः । अ॒स्य॒ । शु॒रुधः॑ ।
स॒न्ति॒ । पू॒र्वीः । दिवः॑ । न॒पा॒ता॒ । वि॒दथ॑स्य । धी॒भिः ।
क्ष॒त्रम् । रा॒जा॒ना॒ । प्र॒ऽदिवः॑ । द॒धा॒थे॒ इति॑ ॥ ५ ॥ २३ ॥

वृषभःकामानांवर्षकः पूर्वश्चिरन्तनः अतएव ज्यायानिन्द्रोऽसूत अपःससर्ज पूर्वीर्बह्व्यः इमाअनेनसृष्टाआपः अस्यजगतःशुरुधःसन्ति शुचःपिपासायारोधयित्र्योभवन्ति दिवः द्युलोकस्य नपाता नपातयितारौ हेराजानाविन्द्रावरुणौ युवांप्रदिवःप्रकर्षेणद्योतमानस्यविदथस्य यज्ञकारिणःस्तोतुर्धीभिःस्तुतिभिःक्षत्रंधनंदधाथे अस्मभ्यंदातुंधारयेथे ॥ असूत षूङ्प्राणिगर्भविमोचनेइत्यस्यलङिरूपं अडागमस्वरः । ज्यायान् प्रशस्यशब्दादीयसुनि ज्यचेतिज्यादेशः ज्यादादीयसइतीयसआदेराकारादेशः नित्त्वादाद्युदात्तः । शुरुधः पृषोदरादिः । नपाता नभ्राण्नपादितिनिपातनान्नञःप्रकृतिभावः आमन्त्रितत्वान्निघातः । धीभिः सावेकाचइतिविभक्तेरुदात्तत्वम् । राजाना आमन्त्रितत्वान्निघातः । दधाथे दधातेर्लटिरूपं निघातः ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेत्रयोविंशोवर्गः ॥ २३ ॥

अथषष्ठी—

त्रीणि॑राजाना॑वि॒दथे॑पु॒रूणि॒परि॒विश्वा॑निभूषथ॒ःसदां॑सि ।
अप॑श्य॒मत्र॒मन॑साजग॒न्वान्व्र॒तेग॑न्ध॒र्वाँ अपि॑वा॒युके॑शान् ॥ ६ ॥

त्रीणि॑ । रा॒जा॒ना॒ । वि॒दथे॑ । पु॒रूणि॑ । परि॑ । विश्वा॑नि ।
भू॒ष॒थ॒ः । सदां॑सि । अप॑श्यम् । अत्र॑ । मन॑सा । ज॒ग॒न्वान् ।
व्र॒ते । ग॒न्ध॒र्वान् । अपि॑ । वा॒युऽके॑शान् ॥ ६ ॥

हेराजानाविन्द्रावरुणौ विदथेऽस्मिन्यज्ञे विश्वानिव्याप्तानि पुरूणियजनीयैःसोमादिभिः पूर्णानि त्रीणिसदांसि सवनानि परिभूषथःसर्वतोलंकुरुथः हेइन्द्र त्वं जगन्वान्यज्ञंप्रतिगतवानसि अपिःसंभावनायां यतोहमत्रव्रतेयज्ञे वायुकेशान् वायुवच्चञ्चलरश्मीन्गन्धर्वान्सोमरक्षकान् स्वानभ्राजादीन्मनसापश्यं तेच स्वानभ्राजादयस्तैत्तिरीयकेस्पष्टमभिहिताः—स्वानभ्राजांघारेबंभारेहस्तसुहस्तकृशानेवेतेवःसोमक्रयणास्तान्रक्षध्वंमावोदभन्निति ॥ भूषथः भूषअलंकारेइत्यस्यलटिरूपम् । अपश्यं दृशिर्प्रेक्षणेइत्यस्यलङिरूपं पादादित्वादनिघातः । जगन्वान् गमेः क्वसौ विभाषागमहनविदविशामितिइटोविकल्पितत्वादत्रेडभावः मोनोधातोः म्वोश्चेतिमकारस्यनकारः प्रत्ययस्वरः । गन्धर्वान् धृञ्धारणेइत्यस्यगोशब्दउपपदे गविगन्धृञोवइतिवप्रत्ययः तत्संनियोगेनगोशब्दस्यगनादेशः प्रत्ययस्वरः ॥ ६ ॥

अथसप्तमी—

तदिन्न्व॑स्यवृष॒भस्य॑धे॒नोरानाम॑भिर्म॑मिरे॒सक्म्यं॒गोः ।
अ॒न्यद॑न्यदसु॒र्यं१॒॑वसा॑ना॒निमा॒यिनो॑ममिरेरू॒पम॑स्मिन् ॥ ७ ॥

तत् । इत् । नु । अ॒स्य॒ । वृ॒ष॒भस्य॑ । धे॒नोः । आ । नाम॑ऽभिः ।
म॒मि॒रे॒ । सक्म्य॑म् । गोः । अ॒न्यत्ऽअ॑न्यत् । अ॒सु॒र्य॑म् । वसा॑नाः ।
नि । मा॒यिन॑ः । म॒मि॒रे॒ । रू॒पम् । अ॒स्मिन् ॥ ७ ॥

येयजमानाः वृषभस्य अभिमतफलप्रदस्यास्येन्द्रस्यार्थं धेनोर्गोर्नामभिर्विश्वायुर्विश्वव्यचाइत्यादिभिरुपलक्षितांगांसक्म्यं संभजनार्हं तत्क्षीरादिकंहविः नुक्षिप्रमाममिरे आदुहन्ति

---

१ तै० सं० १. २. ७. ।

Funding by IKS-MoE

धातूनामनेकार्थत्वात् तेनचहविषायज्ञमनुष्ठाय देवभूयंप्राप्तास्तेकवयः अन्यदन्यन्नूतनं असुर्यमसुराणांबलंवसानाआच्छादयन्त अतएवमायिनः माययास्वीकृतकामरूपाः यद्वा मायिनः प्रज्ञावन्तःसन्तः अस्मिन्निन्द्रे रूपं स्वंस्वंरूपंनिममिरे इयत्तयापरिच्छिद्यनिदधुः ॥ इत्पूरणम् । ममिरे माङ्माने लिटिरूपं निघातः।सक्म्यं युजिरुचितिजांकुश्चेत्यत्रचकारस्यानुक्तसमुच्चयार्थत्वात्सचतेर्मक्प्रत्ययः कुत्वंच सचनंसक्मः तत्रभवइत्यर्थे भवेछन्दसीतियत् यतोनावइत्याद्युदात्तः । गोः एकादेशस्वरः । असुर्यं असुरस्यस्वमित्यर्थे असुरस्यस्वमितियत् तित्स्वरितः । रूपं रूपरूपक्रियायांण्यन्तः खष्पशिल्पशष्पबाष्परूपपर्पतल्पाइतिपप्रत्ययान्तत्वेननिपातनात्पकारलोपोगुणत्वंच रूपयतिरूप्यतेवेतिरूपं प्रत्ययस्वरः ॥ ७ ॥

अथाष्टमी—

तदिन्न्वंस्यसवितुर्नकिर्मेहिरण्ययीममतिंयामशिश्रेत् ।
आसुष्टुतीरोदसीविश्वमिन्वेअपीवयोषाजनिमानिवव्रे ॥ ८ ॥

तत् । इत् । नु । अस्य । सवितुः । नकिः । मे । हिरण्ययीम् ।
अमतिम् । याम् । अशिश्रेत् । आ । सुऽस्तुती । रोदसी इति ।
विश्वमिन्वे इति विश्वम्ऽइन्वे । अपिऽइव । योषा ।
जनिमानि । वव्रे ॥ ८ ॥

तत्तस्मात्सवितुः सर्वस्यजगतोन्तर्यामितयाप्रेरयितुः अस्येन्द्रस्य मेमम हिरण्ययीं सुवर्णमयीं अमतिं कान्तिं नकिरित् कोवापरिच्छिनत्तिखलु यां मदीयांदीप्तिं अशिश्रेत् यआश्रयति ससुष्टुती शोभनयास्तुत्यास्तुतःसन् विश्वमिन्वे सर्वस्यसन्तर्पयित्र्यौ रोदसी द्यावापृथिव्यौ आवव्रे स्वकीयतयासर्वतोवृणुते तत्रदृष्टान्तः—अपीवयोषाजनिमानि यथा योषास्त्री जनिमानि जातान्यपत्यानि आवृणोति तद्वत् ॥ नुः पूरणः । नकिः निपातः । हिरण्ययीं हिरण्यस्यविकारार्थेमयड्वैतयोरितिमयट् ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसीतिनिपातनान्मयटोमकारलोपः । टिड्ढाणञितिङीप् प्रत्ययस्वरः । अमतिं अमगत्यादिषु अमेरतिरित्यतिप्रत्ययः प्रत्ययस्वरः । अशिश्रेत् श्रयतेर्लङि बहुलंछन्दसीतिशपःश्लुः यद्वृत्तयोगादनिघातः । सुष्टुती सुपांसुलुगितितृतीयायाःसवर्णदीर्घः । विश्वमिन्वे इविव्याप्तिप्रीणनयोरित्यस्मात्कर्मण्यण् इदित्त्वान्नुम् तत्पुरुषेकृतिबहुलमितिद्वितीयायाअलुक् कृदुत्तरपदस्वरः । योषा यौतेर्मिश्रीभावकर्मणः

वृतृवदिहनिकमिकषियुमुचिभ्यःसइतिसप्रत्ययः ग्रामादित्वादाद्युदात्तः । जनिमानि जनीप्रादुर्भावे हृजनिभ्यामिमनिन्नितीमनिन्प्रत्ययोभूतकालेनित्त्वादाद्युदात्तः । वव्रे वृञ्वरणेइत्यस्य लिटिरूपम् ॥ ८ ॥

अथनवमी—

यु॒वं प्र॒त्नस्य॑ साधथो म॒हो यद्दैवी॑ स्व॒स्तिः परि॑ णः स्यातम् ।
गो॒पाजि॑ह्वस्य त॒स्थुषो॒ विरू॑पा॒ विश्वे॑ पश्यन्ति मा॒यिनः॑ कृ॒तानि॑ ॥ ९ ॥

यु॒वम् । प्र॒त्नस्य॑ । सा॒ध॒थ॒ः । म॒हः । यत् । दैवी॑ । स्व॒स्तिः ।
परि॑ । न॒ः । स्या॒त॒म् । गो॒पाजि॑ह्वस्य । त॒स्थुषः॑ । विऽरू॑पा ।
विश्वे॑ । प॒श्य॒न्ति॒ । मा॒यिनः॑ । कृ॒तानि॑ ॥ ९ ॥

हेइन्द्रावरुणौ युवं युवां प्रत्नस्य पुरातनस्यस्तोतुः महस्तादृशंश्रेयः साधथः साधयथः कीदृशंतदित्यतआह—यद्दैवीस्वस्तिः यदिदंदेवसंबन्धिश्रेयः स्वराज्यलक्षणं किञ्च युवांनोऽस्मान्परिपरितः स्यातं रक्षकौभवतं विश्वेसर्वे मायिनोदेवाः गोपाजिह्वस्य गोस्त्रीजिह्वामाबिभीतेत्येतादृशीवाग्यस्यसतथोक्तः तस्थुषः स्थिरतरस्येन्द्रस्य विरूपानानाविधानिवृत्रहननादीनिकृतानिकर्माणिपश्यन्ति एवमिन्द्रस्य विश्वरूपत्वमुक्तं ॥ युवं युष्मच्छब्दस्य द्विवचने युवावौद्विवचनेइतियुवादेशः ङेप्रथमयोरमितिसुपोमादेशः । साधथः साधसंसिद्धावित्यस्यण्यन्तस्यलटिरूपं बहुलमन्यत्रापीतिणेर्लुक् निघातः । दैवी देवाद्यञञावित्यञ्प्रत्ययः ञित्स्वरः । स्यातं अस्तेर्लिङिरूपम् । गोपाजिह्वस्य गुपूरक्षणेइत्यस्यायप्रत्ययान्तस्य क्विपि आतोलोपयलोपयोःकृतयोरूपम् गोपाइतिबहुव्रीहौपूर्वपदस्वरः । तस्थुषः ष्ठागतिनिवृत्तावित्यस्य क्वसौ वस्वेकाजाद्धसामितिप्राप्तस्येटःसंप्रसारणं संप्रसारणाश्रयंचबलीयइति संप्रसारणस्यबलीयस्त्वान्निवृत्तिः वसोःसंप्रसारणं प्रत्ययस्वरः । पश्यन्ति दृशिर्प्रेक्षणे निघातः ॥ ९ ॥

अथदशमी—

शु॒नं हु॑वेम म॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नाम् ॥ १० ॥ २४ ॥

Funding by IKS-MoE

शु॒नम् । हु॒वे॒म॒ । म॒घ॒ऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाजे॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ । घ्नन्त॑म् ॥
वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ १० ॥ २४ ॥

व्याख्यातेयम् ॥ १० ॥

॥ इतितृतीयस्यद्वितीयेचतुर्विंशोवर्गः ॥२४॥

॥ इतितृतीयेमण्डलेतृतीयोऽनुवाकः ॥ ३ ॥

अथचतुर्थेऽनुवाकेपञ्चदशसूक्तानि तत्रेन्द्रंमतिरितिनवर्चंप्रथमंसूक्तम् वैश्वामित्रंत्रैष्टुभमैन्द्रं इन्द्रंमतिर्नवेत्यनुक्रान्तं । सूक्तविनियोगोलिङ्गादवगन्तव्यः ।

तत्रप्रथमा—

इन्द्रं॑म॒तिर्हृ॒दआव॒च्यमा॒नाच्छा॒पतिं॒स्तोम॑तष्टाजिगाति ।
याजागृ॑विर्वि॒दथे॑श॒स्यमा॒नेन्द्र॒यत्ते॒जाय॑तेवि॒द्धितस्य॑ ॥ १ ॥

इन्द्र॑म् । म॒तिः । हृ॒दः । आ । व॒च्यमा॑ना । अच्छ॑ । पति॑म् ।
स्तोम॑ऽतष्टा । जि॒गा॒ति॒ । या । जागृ॑विः । वि॒दथे॑ । श॒स्यमा॑ना ।
इन्द्र॑ । यत् । ते॒ । जाय॑ते । वि॒द्धि । तस्य॑ ॥ १ ॥

विश्वामित्रःस्तौति—हेइन्द्रहृदोहृदयात्वच्यमानोच्यमानास्तोमतष्टास्तोमकारिभिस्तोतृभिः कृतामतिःस्तुतिःपतिंसर्वस्यजगतःस्वामिनं इन्द्रं त्वामच्छाभिलक्ष्याजिगाति समन्ताद्गच्छतु याममदीयास्तुतिःजागृविःस्तुत्यस्यतवजागरणंकुर्वाणा विदथेयज्ञेशस्यमानाभवति हेइन्द्र तेत्वदर्थंयत्स्तोत्रंमत्तोजायतेतस्यतद्विद्धिजानीहि तस्येतिद्वितीयार्थेषष्ठी ॥ मतिः मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः । हृदः हृदयशब्दस्यपद्दन्नोमासित्यादिनाहृदादेशः ऊडिदमितिविभक्तेरुदात्तत्वं । वच्यमाना वचपरिभाषणेइत्यस्यकर्मणियक् संप्रसारणाभावश्छान्दसः प्रत्ययस्वरः । स्तोमतष्टा तक्षूत्वक्षू तनूकरणेइत्यस्यकर्मणिनिष्ठा तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वं । जिगाति गास्तुतौ छन्दसीतिजुहोत्यादिः बहुलंछन्दसीत्यभ्यासस्येत्वं निघातः ॥ जायते जनीप्रादुर्भावेइत्यस्यलटिरूपं यद्वृत्तयोगादनिघातः । विद्धि विदज्ञानेइत्यस्यलेटि हेहुंझल्भ्योहेर्धिरितिध्यादेशः वाक्यभेदादनिघातः ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

दि॒वश्चि॒दापू॒र्व्याजाय॑माना॒विजागृ॑वि॒र्वि॒दथे॑श॒स्यमा॑ना ।
भ॒द्रावस्त्रा॒ण्यर्जु॑ना॒वसा॑ना॒सेयम॒स्मेस॑न॒जापित्र्या॒धीः ॥ २ ॥

दि॒वः । चि॒त् । आ । पू॒र्व्या । जाय॑माना । वि । जागृ॑विः ।
वि॒दथे॑ । श॒स्यमा॑ना । भ॒द्रा । वस्त्रा॑णि । अर्जु॑ना । वसा॑ना ।
सा । इ॒यम् । अ॒स्मे इति॑ । स॒न॒ऽजा । पित्र्या॑ । धीः ॥ २ ॥

हेइन्द्र दिवश्चित् द्योतमानात्सूर्यादपि पूर्व्यापूर्वेभवाउषःकालसंबन्धिन्याजायमानायास्तुतिलक्षणावाक् विभवति सेयंवाग्विदथेयज्ञेशस्यमाना जागृविःस्तुत्यस्यतवजागरणंकुर्वाणा भद्रा कल्याणानि अर्जुनाशुक्लवर्णानि वस्त्राणि योग्यतयातेजांसिवसाना अस्मे अस्माकं पित्र्या पितृक्रमागता अतएवसनजापुरातनीसतीधीस्तवस्तुतिर्भवति ॥ दिवः दिवेःक्विप् ऊडिदमितिविभक्तेरुदात्तत्वम् । अर्जुना अर्जेर्णिलुक्चेत्युनन् नित्स्वरः । सनजा जनेरन्येभ्योपिदृश्यतइतिडः प्रत्ययस्वरः । पित्र्या पितृशब्दात्ततआगतइत्यर्थेपितुर्यच्चेतियत्प्रत्ययः रीङृतइतिरीङादेशः यस्येतिलोपः यतोनावइत्याद्युदात्तत्वम् ॥ २ ॥

अथतृतीया—

य॒माचि॒दत्र॑यम॒सूर॑सूतजि॒ह्वाया॒अग्रं॒पत॒दाह्यस्था॑त् ।
वपूं॑षिजा॒तामि॑थु॒नास॑चेतेतमो॒हना॒तपु॑षोबु॒ध्नएता॑ ॥ ३ ॥

य॒मा । चि॒त् । अत्र॑ । य॒म॒ऽसूः । अ॒सू॒त॒ । जि॒ह्वायाः॑ । अग्र॑म् ।
पत॑त् । आ । हि । अस्था॑त् । वपूं॑षि । जा॒ता । मि॒थु॒ना ।
स॒चे॒ते॒ इति॑ । त॒मः॒ऽहना॑ । तपु॑षः । बु॒ध्ने । आऽई॑ता ॥ ३ ॥

प्रसङ्गादुषःकालंप्रशंसति—यमसूः यमौयमलौसूतइतियमसूरुषोभिमानीदेवता सायमा यमलावश्विनौ अत्रोषःकाले असूत अश्विनोस्तत्रशस्यमानत्वात्तावश्विनौस्तोतुंममजिह्वाया अग्रं पतच्चञ्चलमास्थाद्धि तिष्ठतिखलु चित्पूरणः तमोहना तमसोहन्तारौ तपुषः तपत्यस्मिन्सूर्यइति तपुर्दिवसस्तस्यबुध्नेमूलेएताएतावागतौ मिथुना परस्परंसङ्गतौ तावश्विनौजातावुत्पन्नानिवपूंषि

Funding by IKS-MoE

उप्यन्तेनिधीयन्तेइतिवपूंषि उषःकालेक्रियमाणानिशस्त्रादीनिकर्माणिसचेते संगच्छतः ॥ यमसूः षूङ्प्राणिगर्भविमोचनेइत्यस्यक्विप् कृदुत्तरपदस्वरः । असूत तस्यैवधातोर्लङि अदादित्वाच्छपोलुक् निघातः। पतत् पतॢगतौ शतुर्लसार्वधातुकस्वरेधातुस्वरः । अस्थात् ष्ठागतिनिवृत्तौ लुङिरूपं हियोगादनिघातः । वपूंषि टुवपूबीजसंताने अर्तिपॄवपियजितनिधनितपिभ्योनिदित्युसिप्रत्ययः निच्चेत्युक्तत्वादाद्युदात्तः । सचेते षचसमवायेइत्यस्यलटिरूपं । तपूंषि तपसन्तापे अर्तिपॄवपीत्यादिनाउसिः । बुध्ने बंधबन्धने बन्धेर्ब्रधिबुधीचेतिनक्प्रत्ययः ब्रधिबुधीएतावादेशौधातोः प्रत्ययस्वरः । एता इण्गतावित्यस्यकर्मणिनिष्ठा गतिरनन्तरइतिगतेःस्वरः ॥ ३ ॥

अथचतुर्थी–

नकि॑रेषां॑निन्दि॒तामर्त्ये॑षु॒येअ॒स्माकं॑पि॒तरो॒गोषु॑यो॒धाः ।
इन्द्र॑एषां॑दृंहि॒तामाहि॑नावा॒नुद्गो॒त्राणि॑ससृजेदं॒सनां॑वान् ॥ ४ ॥

नकि॑ः । ए॒षा॒म् । नि॒न्दि॒ता । मर्त्ये॑षु । ये । अ॒स्माक॑म् । पि॒तर॑ः ।
गोषु॑ । यो॒धाः । इन्द्र॑ः । ए॒षा॒म् । दृं॒हि॒ता । माहि॑नऽवान् । उत् ।
गो॒त्राणि॑ । स॒सृ॒जे॒ । दं॒सना॑ऽवान् ॥ ४ ॥

हेइन्द्र सत्रेप्रवृत्तानामस्माकंयेपितरोङ्गिरसः गोषुपणिभिरपहृतेषु योधाः योद्धारोवर्तन्ते तेषामेषांमर्त्येषुनिन्दितादूषकोनकिः नकश्चिदस्ति कुतइत्यतआह–माहिनावान् महिमोपेतोदंसनावान् वृत्रहननादिकर्मवानिन्द्रः एषामङ्गिरसां दृंहितादृंहितानि समृद्धानिगोत्राणिगवांवृन्दानि उत्ससृजे तेभ्योङ्गिरोभ्योददौ ॥ निंदिता णिदिकुत्सायामित्यस्यतृचिरूपम् । मर्त्येषु वस्वादित्वात्स्वार्थिकोयत् यतोनावइत्याद्युदात्तत्वम् । योधाः युधसंप्रहारेइत्यस्यपचाद्यचिरूपम् । दृंहिता दृहदृहिवृद्धावित्यस्यनिष्ठायांरूपम् । माहिनावान् महेरिनण्चेतीनण्प्रत्ययः तदस्यास्तीतिमतुप् माहिनावानितितस्यसंज्ञा मतौबह्वचोनजिरादीनामितिसंहितायांदीर्घः । गोत्राणि गवांसमूहइत्यर्थे खलगोरथादित्यनुवृत्तौ इनित्रकट्यचश्चेतिगोशब्दात्त्रप्रत्ययः प्रत्ययस्वरः । ससृजे सृजविसर्गेइत्यस्यलिटिरूपम् ॥ ४ ॥

दशपेयेनिष्केवल्येनिविद्धानीयस्यपुरस्तात्सखाहयत्रेत्येषा सूत्रितश्च–सखाहयत्रसखिभिर्नवग्वैरितिनिविद्धानीययोराद्यइति ।

अथपञ्चमी–

सखा॑ह॒यत्र॒सखि॑भि॒र्नव॑ग्वैरभि॒ज्ञ्वासत्व॑भि॒र्गाअ॑नु॒ग्मन् ।
स॒त्यंतदिन्द्रो॑द॒शभि॒र्दश॑ग्वै॒ःसूर्यं॑विवेद॒तम॑सिक्षि॒यन्त॑म् ॥ ५ ॥२५॥

सखा॑ । ह॒ । यत्र॑ । सखि॑ऽभिः । नव॑ऽग्वैः । अ॒भि॒ऽज्ञु । आ ।
सत्व॑ऽभिः । गाः । अ॒नु॒ऽग्मन् । स॒त्यम् । तत् । इन्द्रः॑ । द॒शऽभिः॑ ।
दश॑ऽग्वैः । सूर्य॑म् । वि॒वे॒द॒ । तम॑सि । क्षि॒यन्त॑म् ॥ ५ ॥ २५ ॥

सखिभिःसमानख्यानैःसत्वभिरिन्द्रमभितःसीदद्भिःनवग्वैर्मेधातिथिप्रभृतयोङ्गिरसःकेचिन्नवमासान्सत्रमनुष्ठायफलंलेभिरे केचिद्दशमासाननुष्ठायेति तत्र येनवमासान्सत्रमनुष्ठायलब्धफलाउदतिष्ठन्तेनवग्वाःतैःसत्वभिरङ्गिरोभिःसखासमानख्यानइन्द्रः यत्रयस्मिन्बिलेपणिभिर्निरुद्धागाः आअभिलक्ष्य अभिज्ञ्वा अभिगतजानुकंयथाभवतितथाअनुग्मन् अनुगच्छन्निन्द्रः तत्तत्रबिलेदशग्वैः येदशमासान्सत्रमनुष्ठायलब्धफलाउदतिष्ठन्तेदशग्वाःतैर्दशभिर्दशसंख्याकैरङ्गिरोभिःसहितःसन् तमसिबिलवर्तिन्यन्धकारेक्षियन्तंनिवसन्तंसत्यंयथार्थप्रकाशंसूर्यंविवेदलेभेहेतिप्रसिद्ध्यर्थः ततोलब्धप्रकाशःसइन्द्रस्तागाआनीयाङ्गिरोभ्यःप्रादादितिभावः ॥ सखा ख्याप्रकथने समानेख्यश्चोदात्तइतिइण्प्रत्ययः ङिच्चसमानस्यछन्दसीतिसमानस्यसभावःउदात्तइत्युक्तत्वेनसामर्थ्यादुपपदस्येतिगम्यते आद्युदात्तः । नवग्वैः गमेरौणादिकोड्वप्रत्ययः बहुव्रीहौपूर्वपदस्वरः । अभिज्ञु प्रसंभ्यांजानुनोर्ज्ञुरितिविधीयमानोज्ञुरभेरुत्तरस्यव्यत्ययेनभवति । सत्वभिः षद्लृविशरणगत्यवसादनेष्वित्यस्मात्प्रईरसद्योस्तुट्चेतिवनिप्प्रत्ययः तुडागमः नित्त्वादाद्युदात्तः । अनुग्मन् गमेःशतरि बहुलंछन्दसीतिशपोलुकिकृते गमहनेत्युपधालोपः प्रादिसमासःशतृस्वरः । विवेद विदज्ञानेइत्यस्माल्लिटिणलिरूपं । क्षियन्तं क्षिनिवासगत्योरित्यस्यशतरिरूपम् ॥ ५ ॥

॥ इतितृतीयस्यद्वितीयेपंचविंशोवर्गः ॥ २५ ॥

अथषष्ठी–

इन्द्रो॒मधु॒संभृ॑तमु॒स्रियाया॑ंप॒द्वद्वि॑वेद॒श॒फव॒न्नमे॒गोः ।
गुहा॑हि॒तंगुह्यं॑गू॒ळ्हम॒प्सुहस्ते॑दधे॒दक्षि॑णे॒दक्षि॑णावान् ॥ ६ ॥

Funding by IKS-MoE

इन्द्रः । मधु । सम्ऽभृतम् । उस्रियायाम् । पत्ऽवत् । विवेद ।
शफऽवत् । नमे । गोः । गुहा । हितम् । गुह्यम् । गूळ्हम् ।
अप्ऽसु । हस्ते । दधे । दक्षिणे । दक्षिणऽवान् ॥ ६ ॥

इन्द्रः उस्रियायांक्षीरदध्यादिक्रमेणोत्स्राविण्यांभोगवत्यांगवि संभृतंसंपादितंमधु मधुरक्षीरादिविवेदाज्ञासीत् ततस्तदर्थंपद्वत्पादयुक्तंशफवत्खुरोपेतंगोधनं विवेद लेभे कथंलब्धवानितितदुच्यते—नमेगोः गोरितिद्वितीयार्थेषष्ठी पणिनामकैरसुरैरुपद्रुतांगांनमेआनीतामकरोत् तथादक्षिणावानौदार्यवान्समर्थः सइन्द्रः गुहा गुहायांहितंगुह्यं प्रच्छन्नं अतएवाप्सु अन्तरिक्षेगूळ्हंगूढचारिणंमायिनमसुरंदक्षिणेहस्तेदधेदधार अग्रहीदित्यर्थः द्वितीयाष्टकेश्रुधीहवमित्यस्मिन्वर्गेगुहाहितमित्येतत्सम्यगभ्यधायि ॥ उस्रियायां प्रक्रियासम्यक्पूर्वमेवावादि । विवेद विदज्ञाने विद्लृलाभे एतयोर्लिटिरूपं । शफवत् शफोस्यास्तीतिमतुप् ह्रस्वनुड्भ्यांमतुबिति मतुपउदात्तत्वम् । नमे णमुप्रह्वत्वेशब्दे इत्यस्यलिटिरूपं द्विर्वचनस्य छन्दसिविकल्पितत्वादत्र द्विर्वचनाभावः वाक्यभेदादनिघातः । गुह्यं गुहूसंवरणेइत्यस्माच्छन्दसि गुहिदुहिभ्योवेतिवक्तव्यमितिक्यप् कित्त्वादगुणः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः । दधे दधातेर्लिटिरूपम् । दक्षिणावान् दक्षवृद्धौ द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः तदस्यास्तीतिमतुप् संहितायामन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घः नित्स्वरः ॥ ६ ॥

अथसप्तमी—

ज्योतिर्वृणीततमसोविजानन्नारेस्यामदुरितादभीके ।
इमागिरःसोमपाःसोमवृद्धजुषस्वेन्द्रपुरुतमस्यकारोः ॥ ७ ॥

ज्योतिः । वृणीत । तमसः । विऽजानन् । आरे । स्याम ।
दुःऽइतात् । अभीके । इमाः । गिरः । सोमऽपाः । सोमऽवृद्ध ।
जुषस्व । इन्द्र । पुरुऽतमस्य । कारोः ॥ ७ ॥

तमसोरात्रेःसकाशाद्विजानन्विशेषेणजानन्प्रादुर्भवन्सूर्यात्मकइन्द्रःज्योतिर्वृणीत जगद्व्यवहारनिर्वाहकंप्रकाशंसमभक्त यद्वा तमसस्तमोरूपाद्वृत्रादेर्विजानन्प्रादुर्भवन् वृत्रंहत्वाप्रकाशमवृ-

णीतं वयंदुरितात्पापादारेदूरेपापवर्जिताःसन्तः अभीकेभयरहितेस्थानेस्यामभवेम सोमपाःसोमस्यपातः अतएवसोमवृद्ध सोमपानेषुवृद्ध हेइन्द्र पुरुतमस्य पुरून्शत्रून्कामयतिग्लापयतिइतिपुरुतमः तादृशस्यतव कारोःस्तोत्रंकुर्वाणस्यऋत्विजः इमाः स्तुतिलक्षणागिरोवाचःजुषस्वसेवस्व ॥ वृणीत वृङ्संभक्तावित्यस्यलिङिरूपम्। विजानन् ज्ञाअवबोधने विशेषेणज्ञानंप्रकाशः प्रत्ययस्वरः। अभीके नविद्यंतेभीर्यस्मिन्ततःशेषाद्विभाषेतिकप्रत्ययः नञ्सुभ्यामित्यन्तोदात्तत्वेप्राप्तेकपिपूर्वस्यान्तोदात्तत्वम् । पुरुतमस्य तमुग्लाने इत्यस्माण्ण्यन्तात्पचाद्यचिपरादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वम् ॥ ८ ॥

अथाष्टमी–

ज्योति॒र्य॒ज्ञाय॒रोद॑सी॒अनु॑ष्यादा॒रेस्या॑मदुरि॒तस्य॒भूरेः॑ ।
भूरि॑चि॒द्धितु॑ज॒तोमर्त्य॑स्यसुपा॒रासो॑वसवोब॒र्हणा॑वत् ॥ ९ ॥

ज्योतिः॑ । य॒ज्ञाय॑ । रोद॑सी॒ इति॑ । अनु॑ । स्या॒त् । आ॒रे । स्या॒म॒ ।
दुः॒ऽइ॒तस्य॑ । भूरेः॑ । भूरि॑ । चि॒त् । हि । तु॒ज॒तः । मर्त्य॑स्य ।
सु॒ऽपा॒रासः॑ । व॒स॒वः॒ । ब॒र्हणा॑ऽवत् ॥ ८ ॥

हेइन्द्र ज्योतिः जगत्प्रकाशकःसूर्यः यज्ञायाग्निहोत्रादिकरणायरोदसी द्यावापृथिव्यावनुष्यात् अनुभवतु प्रकाशयतु वयंभूरेःप्रभूतस्यदुरितस्यपापस्यारेदूरेस्यामभवेम । हेवसवः सर्वस्यवासयितारइन्द्रादयः सुपारासः सुपाराःशोभनपाराः स्तुत्याभिमुखीकर्तुंशक्यायूयंभूरिचिदतिप्रभूतंबर्हणावत्समृद्धियुक्तंधनंतुजतोभूरिप्रदस्यमर्त्यस्यप्रयच्छथ हिपूरणः अत्रयोग्यक्रियाध्याहारः ॥ स्यात् अस्तेर्लिङिरूपं संहितायां मनोरुत्तरस्यास्तेरुपसर्गप्रादुर्भ्यामस्तिर्यच्परइतिषत्वं निघातः । तुजतः तुजिपिजिलजिहिंसादाननिकेतनेषु शतुरनुमइतिविभक्तेरुदात्तत्वम् । बर्हणावत् बृहिवृद्धावित्यस्यभावेऔणादिकोयुप्रत्ययः प्रत्ययस्वरः ॥ ॥ ८ ॥

अथनवमी–

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ ९॥२६॥

शु॒नम् । हु॒वे॒म॒ । म॒घ॒ऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाज॑ऽसातौ॑ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ । घ्नन्त॑म् ।
वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ९ ॥ २६ ॥

व्याख्यातेयम् ॥ ९ ॥

॥ इतितृतीयस्यद्वितीयेषड्विंशोवर्गः ॥ २६ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेद्वितीयोध्यायः ॥ २ ॥

Funding by IKS-MoE

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥
अथतृतीयाध्यायआरभ्यते इन्द्रत्वेतिनवर्चंद्वितीयंसूक्तम् वैश्वामित्रंगायत्रमैन्द्रं तथाचानुक्रान्तम्—इन्द्रत्वागायत्रंहीति । अग्निष्टोमेप्रातःसवनेब्राह्मणाच्छंसिशस्त्रेइदंसूक्तं सूत्रितञ्च—इन्द्रत्वावृषभमुद्धेदभीतितिस्रइति । आद्याप्रातःसवनेब्राह्मणाच्छंसिनःप्रस्थितयाज्या सूत्रितंच—इन्द्रत्वावृषभंमरुतोयस्येति ।

तत्रैषासूक्तेप्रथमा—

ॐम् इन्द्रं॑त्वावृष॒भंव॒यंसु॒तेसोमे॑हवामहे । सपा॑हि॒मध्वो॒अन्ध॑सः ॥ १ ॥

इन्द्रं॑ । त्वा॒ । वृ॒ष॒भम् । व॒यम् । सु॒ते । सोमे॑ ।
ह॒वा॒म॒हे॒ । सः । पा॒हि॒ । मध्वः॑ । अन्ध॑सः ॥ १ ॥

इन्दौ स्रवति सोमरसेरमतेक्रीडतीतीन्द्रः यद्वा इदंसर्वंजगत्साक्षाद्दर्शयतीतीन्द्रः तस्यसंबुद्धिः हेइन्द्र वृषभं कामानांवर्षकं त्वा त्वां सुते ग्रावभिरभिषुतेसोमे वयंहवामहे सोमपानार्थमाह्वयामः सत्वं मध्वः मदकरं अन्धसः अन्नलक्षणंसोमंपाहि पिब इन्द्रशब्दंयास्कोबहुधानिर्विवेच—इन्द्रइरांदृणातीतिवेरांददातीतिवेरांदधातीतिवेरांदारयतीतिवेरांधारयतीतिवेन्दवेद्रवदितिवेन्दौरमतइतिवेन्धेभूतानीतिवातद्यदेनंप्राणैःसमैन्धंस्तदिन्द्रस्येन्द्रत्वमिति । यत्रयत्रयोऽर्थोनुगुणस्तत्रसोऽर्थःस्वीकार्यः इदंदर्शनादित्यौपमन्यवः इदंब्रह्मसाक्षात्पश्यतीतीन्द्रः तथाचारण्यकेश्रूयते—सएतमेवपुरुषंब्रह्मततमपश्यदिदमदर्शमिती ३ तस्मादिदंद्रोनामेदंद्रोहवैनामतमिदंद्रंसन्तमिन्द्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवा[2]इति ॥ इन्द्र इदिपरमैश्वर्येइतिधातुः । स्वमाययाजगद्रूपत्वंपरमैश्वर्यं अनेनाभिप्रायेणश्रूयते—इन्द्रोमायाभिःपुरुरूपईयते[3]इति इन्दुशब्देउपपदे रमतेरन्येभ्योऽपिदृश्यतइतिडःपूर्वपदस्योकारलोपः इदिपरमैश्वर्यइत्यस्माद्दज्रेन्द्राग्रइत्यादिनारन्प्रत्ययान्तत्वेननिपातितः एवमेतानिनिर्वचनानिद्रष्टव्यानि आमन्त्रिताद्युदात्तत्वम् । हवामहे ह्वयतेर्बहुलंछन्दसीतिसंप्रसारणे लटिरूपं । मधुः मधुशब्दःफलिपाटीत्यादिनाउन्प्रत्ययान्तः आगमानुशासनस्यानित्यत्वान्नुमभावः संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावः यणादेशः । अन्धसः अदेर्नुमधश्चेत्यसुन् नित्स्वरः ॥ १ ॥

---

१ नि० १०।८। २ ऐ० आ० ३. ४.। ३ ऋ. सं. ४. ७. ३३।

Funding by IKS-MoE

ब्राह्मणाच्छंसिनःप्रातःसवनेइन्द्रक्रतुविदमितिशस्त्रयाज्या सूत्रितश्च—इन्द्रक्रतुविदंसुतमितियाज्येति ।

अथद्वितीया—

इन्द्रक्रतुविदंसुतंसोमंहर्यपुरुष्टुत । पिबावृषस्वतातृपिम् ॥ २ ॥

इन्द्र । क्रतुऽविदम् । सुतम् । सोमम् । हर्य । पुरुऽस्तुत ।
पिब । आ । वृषस्व । ततृपिम् ॥ २ ॥

हेइन्द्र क्रतुविदं क्रतोःप्रज्ञायाःलंभकं सुतमभिषुतमिमंसोमंहर्य पातुंकामयस्व हेपुरुष्टुत पुरुभिर्बहुभिःस्तुतेन्द्र तातृपिं तर्पकमाप्यायनकारिणमिमंसोमंपिब पीतमिमंसोममावृषस्व जठरेसिञ्च यथानाभेरधोनपतति तथा धारयेतिभावः ॥ हर्य हर्यगतिकान्त्योरित्यस्यलोटिरूपं निघातः । पुरुष्टुत स्तुतस्तोमयोश्छन्दसीतिसंहितायांषत्वम् । वृषस्व वृषसेचनेइत्यस्यलोटिरूपं आङ्उत्तरत्वान्निघातः । तातृपिं तृपप्रीणनेइत्यस्माच्छन्दसि सदादिभ्योदर्शनादितिकिन् तस्यलिड्वद्भावाद्द्विर्वचनादि संहितायामन्येषामपीत्यभ्यासस्यदीर्घः नित्त्वादाद्युदात्तः ॥ २ ॥

अथतृतीया—

इन्द्रप्रणोधितावानंयज्ञंविश्वेभिर्देवेभिः । तिरःस्तवानविश्पते ॥ ३ ॥

इन्द्र । प्र । नः । धितऽवानम् । यज्ञम् । विश्वेभिः ।
देवेभिः । तिरः । स्तवान । विश्पते ॥ ३ ॥

हेस्तवान स्तोतृभिःस्तूयमान विश्पते विशांमरुतांपते हेइन्द्र विश्वेभिर्देवेभिः सर्वैर्यजनीयैर्देवैःसहितस्त्वं धितावानं वन्यतेसंभज्यतइतिवानंहविः धितंनिहितंहविर्यस्यतं संभृतहविष्कमित्यर्थः अस्मदीयमिमंयज्ञंप्रतिरः प्रकर्षेणवर्धय हविःस्वीकरणेनसंपूर्णंकुर्वितिभावः ॥ नः उपसर्गाद्बहुलमितिसंहितायांणत्वम् । धितावानं डुधाञ्धारणपोषणयोरित्यस्मात् निष्ठा बहुव्रीहौपूर्वपदस्वरः । तिरः तरतेर्व्यत्ययेनशः प्रत्ययस्वरः । स्तवान ष्टुञ्स्तुतौ सम्यानच्स्तुवइत्युपपदाभावेपि कर्मण्यानच्प्रत्ययः आमन्त्रितत्वान्निघातः ॥ ३ ॥

Funding by IKS-MoE

अथचतुर्थी—

इन्द्र॒सोमाः॑सु॒ताइ॒मेतव॒प्रयं॑न्तिसत्पते । क्षयँ॑च॒न्द्रास॒इन्द॑वः ॥४॥

इन्द्र॑ । सोमाः॑ । सु॒ताः । इ॒मे । तव॑ । प्र । य॒न्ति॒ ।
स॒त्ऽप॒ते॒ । क्षय॑म् । च॒न्द्रासः॑ । इन्द॑वः ॥ ४ ॥

हेसत्पते इन्द्र चन्द्रासःआह्लादयितारः इन्दवोदीप्ताः सुताअभिषुताइमे अस्माभिर्दत्ताःसोमाः क्षयं क्षियन्तिनिवसन्त्यन्नादीन्यत्रेतिक्षयोजठरं प्रयन्ति प्रकर्षेणगच्छन्ति तान्धारयेतिभावः ॥ क्षयं क्षिनिवासगत्योरित्यस्मादधिकरणेघप्रत्ययः प्रत्ययस्वरेणान्तोदात्तत्वेप्राप्ते क्षयोनिवासेइत्याद्युदात्तत्वम्। चन्द्रासः चदिआह्लादनेदीप्तौच अस्मात्स्फायितंचीत्यादिनारक्प्रत्ययः। आज्जसेरसुगित्यसुक् प्रत्ययस्वरः । इन्दवः उन्देरिच्चादेरित्युप्रत्ययः भिदित्यनुवृत्तेराद्युदात्तः ॥ ४ ॥

अथपञ्चमी—

द॒धि॒ष्वाज॒ठरे॑सु॒तंसोम॑मिन्द्र॒वरे॑ण्यम् । तव॑द्यु॒क्षास॒इन्द॑वः ॥ ५ ॥ १ ॥

द॒धि॒ष्व । ज॒ठरे॑ । सु॒तम् । सोम॑म् । इ॒न्द्र॒ । वरे॑ण्यम् ।
तव॑ । द्यु॒क्षासः॑ । इन्द॑वः ॥ ५ ॥ १ ॥

हेइन्द्र वरेण्यं सर्वैर्वरणीयं सुतमभिषुतंसोमं जठरेदधिष्व धारय इन्दवोदीप्ताइमेसोमाः तव द्युक्षासः दिविक्षियन्तिवसन्तीतिद्युक्षासः अतस्त्वंतान्धारयेतिभावः ॥ दधिष्व दधातेर्लोटिरूपं आगमाअनुदात्ताइतीटोनुदात्तत्वात्प्रत्ययस्वरः। वरेण्यं वृङ्संभक्तौ वृङएण्यप्रत्ययः वृषादित्वादाद्युदात्तः । द्युक्षासः क्षियतेरन्येभ्योपिदृश्यतइतिडप्रत्ययः कृदुत्तरपदस्वरः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी—

गिर्व॑णःपा॒हिनः॑सु॒तंमधो॒र्धारा॑भिरज्यसे । इन्द्र॒त्वादा॑त॒मिद्यशः॑ ॥५॥

Funding by IKS-MoE

गिर्व॑णः । पा॒हि । न॒ः । सु॒तम् । मधो॑ः । धारा॑भिः ।
अ॒ज्य॒से॒ । इन्द्र॑ । त्वाऽदा॑तम् । इत् । यश॑ः ॥ ६ ॥

गिर्वणः गीर्भिर्वननीय तथाचयास्कः—गिर्वणोदेवोभवतिगीर्भिरेनंवनयन्तीति । तादृशइन्द्र नोऽस्मदीयं सुतमभिषुतमिमंसोमंपाहि पिब यतोमधोर्मदकरस्यसोमस्यधाराभिरज्यसे हेइन्द्र त्वादातमित् त्वयाशोधितंविशदीकृतमेवयशोन्नमस्मासुभवति ॥ गिर्वणः वनसंभक्तावित्यस्मादसुन् गिरउपधायादीर्घाभावश्छान्दसः आमन्त्रितस्येतिषाष्ठिकमाद्युदात्तत्वम् । पाहि पापानेइत्यस्माल्लोटिरूपं आमन्त्रितस्याविद्यमानत्वेनपादादित्वादनिघातः प्रत्ययस्वरः । त्वादातं दैप् शोधने सत्यपिपकारे नानुबन्धकृतमनेजंतत्वमित्येजन्तएवायं ततआदेचइत्यात्वं अस्मात्कर्मणिक्तः दाधाघ्वदाबित्यत्रादाबितिप्रतिषेधेन घुसंज्ञायाअभावाद्दोदद्धोरितिददादेशोनभवति । त्वेति युष्मच्छब्दस्यतृतीयाकर्तृकरणेकृताबहुलमितिसमासः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । यशः अशूव्याप्तौ अशेर्युट्चेत्यसुन् तत्संनियोगेनधातोर्युडागमः नित्त्वादाद्युदात्तः ॥६॥

अथसप्तमी—

अ॒भिद्यु॒म्नानि॑व॒निन॒इन्द्रं॑सचन्ते॒अक्षि॑ता ।
पी॒त्वीसोम॑स्यवावृधे ॥ ७ ॥

अ॒भि । द्यु॒म्नानि॑ । व॒निन॑ः । इन्द्र॑म् । स॒च॒न्ते॒ । अक्षि॑ता ।
पी॒त्वी । सोम॑स्य । व॒वृ॒धे॒ ॥ ७ ॥

वनिनः वनंदेवताविषयंसंभजनमस्यास्तीतिवनी तस्य देवान्संभजमानस्ययजमानस्य द्युम्नानि द्योतमानानि अक्षिता क्षयरहितानि संपूर्णानि सोमादीनिहवींषिइन्द्रमभि अभितःसचन्ते समवयन्ति तेषुमध्येसोमस्यपीत्वी सोमंपीत्वावावृधे सइन्द्रोवर्धते ॥ वनिनः अतइनिठनावितीनिप्रत्ययः तस्यस्वरः । सचन्ते षचसमवायेइत्यस्यलटिरूपम् । अक्षिता क्षिक्षये इत्यस्यनिष्ठा अत्रण्यदर्थइतिदीर्घाभावः तस्मादेवक्षियोदीर्घादितिनिष्ठानत्वाभावः नञासमासेतस्यस्वरः । पीत्वी पापानेइत्यस्मात्क्त्वाप्रत्ययस्य स्नात्व्यादयश्चेतिनिपातनात्त्वीइत्यादेशः प्रत्ययस्वरः घुमास्थागापेत्यादिनाईत्वम् ॥ ७ ॥

---

१ नि० ६. १४. ।

Funding by IKS-MoE

अथाष्टमी–

अ॒र्वा॒वतो॑न॒आग॑हिपरा॒वत॑श्चवृत्रहन् ।
इ॒माजु॑षस्वनो॒गिरः॑ ॥ ८ ॥

अ॒र्वा॒ऽवतः॑ । न॒ः । आ । ग॒हि॒ । प॒रा॒ऽवतः॑ । च॒ ।
वृ॒त्र॒ऽह॒न् । इ॒माः । जु॒ष॒स्व॒ । न॒ः । गिरः॑ ॥ ८ ॥

हेवृत्रहन्निन्द्र अर्वावतः अर्वाचीनात्समीपाद्देशात्परावतोतिदूराद्देशाद्वा नोऽस्मानभिलक्ष्य आगहि आगच्छ आगत्यच नोऽस्मदीयाइमाःस्तुतिलक्षणागिरोवाचोजुषस्व सेवस्व ॥ परावतः उपसर्गाच्छन्दसिधात्वर्थेइतिवतिः प्रत्ययस्वरः ॥ ८ ॥

अथनवमी–

यद॑न्त॒राप॑रा॒वत॑मर्वा॒वतं॑चहू॒यसे॑ ।
इन्द्रे॒हतत॒आग॑हि ॥ ९ ॥ २ ॥

यत् । अ॒न्त॒रा । प॒रा॒ऽवत॑म् । अ॒र्वा॒ऽवत॑म् । च॒ ।
हू॒यसे॑ । इन्द्र॑ । इ॒ह । तत॑ः । आ । ग॒हि॒ ॥ ९ ॥ २ ॥

हेइन्द्र यद्यस्मिन्परावतमतिविप्रकृष्टस्यदेशस्य अर्वावतं सन्निकृष्टस्यदेशस्यचान्तरा तयोर्मध्यदेशेहूयसे सम्यगिज्यसे तत्तस्माद्देशादिहास्मिन्यज्ञेआगहि सोमपानार्थमागच्छ ॥ परावतं अर्वावतं अन्तरान्तरेणयुक्तेइतिद्वितीया ततःपञ्चम्यास्तसिल् लित्स्वरः ॥ ९ ॥

॥ इतितृतीयस्यतृतीयेद्वितीयोवर्गः ॥ २ ॥

आतूनइन्द्रेतिनवर्चंतृतीयंसूक्तं वैश्वामित्रंगायत्रमैन्द्रं आतूनइत्यनुक्रान्तं–अतिरात्रे द्वितीयेपर्याये ब्राह्मणाच्छंसिशस्त्रे एतदादिकेद्वेसूक्ते सूत्रितञ्च–आतूनइन्द्रमद्र्यगितिसूक्तेइति ।

तस्मिन्सूक्तेप्रथमा–

आतूनइ॑न्द्रम॒द्र्य॑ग्घुवा॒नःसोम॑पीतये ।
हरि॑भ्यांयाह्यद्रिवः ॥ १ ॥

Funding by IKS-MoE

आ । तु । नः । इन्द्र । मद्र्यक् । हुवानः । सोमऽपीतये ।
हरिऽभ्याम् । याहि । अद्रिऽवः ॥ १ ॥

अद्रिवः वज्रिन् हेइन्द्र हुवानः होतृभिराहूयमानस्त्वं मद्र्यक् मदभिमुखःसन्नोऽस्मदीयेयज्ञे सोमपीतये सोमपानार्थं हरिभ्यामश्वाभ्यांसह तु क्षिप्रमायाहि ॥ तु ऋचितुनुघेत्यादिनासंहितायांदीर्घः । मद्र्यक् मामञ्चतीति ऋत्विग्दधृगित्यादिनाक्विन् प्रत्ययोत्तरपदयोश्चेत्यस्मच्छब्दस्यैकवचने मपर्यन्तस्यमादेशः विष्वग्देवयोश्चटेरद्र्यञ्चतौवप्रत्ययेइतिटेरद्रिइत्यादेशः अद्रिसध्र्योरन्तोदात्तत्वनिपातनंकृत्स्वरनिवृत्त्यर्थं इतिवचनादद्र्यादेशःअन्तोदात्तः यणादेशेकृते उदात्तस्वरितयोर्यणइतियणःस्वरितत्वं क्विन्प्रत्ययस्यकुरितिकुत्वं । सोमपीतये दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । अद्रिवः मतुवसोरितिरुत्वं आमन्त्रितत्वान्निघातः ॥ १ ॥

अथद्वितीया—

सत्तोहोतांनऋत्वियंस्तिस्तिरेबर्हिरांनुषक् । अयुंज्रन्प्रातरद्रंयः ॥ २ ॥

सत्तः । होता । नः । ऋत्वियः । तिस्तिरे । बर्हिः ।
आनुषक् । अयुंज्रन् । प्रातः । अद्रंयः ॥ २ ॥

हेइन्द्र नोऽस्मदीयेयज्ञे होता ऋत्विक् तवाह्वानार्थं ऋत्वियः प्राप्तकालःसन् सत्तोनिषण्णोवर्तते तथा बर्हिःआनुषक् अनुषक्तंपरस्परसंबद्धंयथाभवतितथातिस्तिरे हविष्वासन्नेषुस्तीर्णमभूत् तथा प्रातःसवने सोमाभिषवार्थमद्रयोग्रावाणः अयुज्रन् परस्परंसंगताअभूवन् तस्मात्सोमपानार्थंत्वमागच्छेतिभावः ॥ सत्तः षद्लृविशरणादिष्वित्यस्माद्गत्यर्थाकर्मकश्लिषेत्यादिनाकर्तरिक्तः सर्वविधीनांछंदसिविकल्पितत्वादत्र निष्ठातकारस्यनत्वाभावः । ऋत्वियः ऋतुशब्दाच्छन्दसिघसितिघस्प्रत्ययः घस्येयादेशः सितीतिपदसंज्ञायामोर्गुणइतिभसंज्ञाधीनोगुणोनभवति यणादेशः प्रत्ययस्वरः । तिस्तिरे स्तृञ्आच्छादनेइत्यस्य कर्मणिलिटि ऋतइद्धातोरितीत्वं द्विर्वचने शर्पूर्वाःखयइतितकारशेषः लिटस्तझयोरेशिरेजितितप्रत्ययस्यैशित्यादेशः पादादित्वादनिघातः प्रत्ययस्वरः । आनुषक् षंजसङ्गे क्विप् अनिदितामितिनलोपः आङन्वोरुपसर्गयोःप्राक्प्रयोगः गतिसमासः कृदुत्तरपदस्वरः । अयुज्रन् युजिर्योगे इत्यस्यलुङि च्लेरिरितोवेत्यङादेशः बहुलंछन्दसीतिरुडागमः पादादित्वादनिघातः अडागमस्वरः ॥ २ ॥

Funding by IKS-MoE

अथतृतीया–

इमाब्रह्मंब्रह्मवाहःक्रियन्तआबर्हिःसीद । वीहिशूरपुरोळाशम् ॥ ३ ॥

इमा । ब्रह्म । ब्रह्मऽवाहः । क्रियन्ते । आ । बर्हिः ।
सीद । वीहि । शूर । पुरोळाशम् ॥ ३ ॥

ब्रह्माणिस्तोत्राणिस्तुत्यतयावहतीतिब्रह्मवाहः ब्रह्मणास्तोत्रेणप्राप्यतइतिवा हेब्रह्मवाह इन्द्र तुभ्यं इमा इमानि ब्रह्म ब्रह्माणिस्तोत्राणि अस्माभिःक्रियन्ते अतः बर्हिरासीद स्तुत्यतयाबर्हिषियज्ञेउपविश हेशूर समर्थेन्द्र अस्माभिर्दीयमानमिमंपुरोळाशं पुरोडाशाख्यंहविःवीहि भक्षय॥ ब्रह्मवाहः वहप्रापणेइत्यस्माद्वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेरुपधावृद्धिः आमन्त्रितत्वान्निघातः । क्रियन्ते करोतेःकर्मणियक् रिङ्शयग्लिङ्क्षिवतिरिङादेशः प्रत्ययस्वरः पादादित्वादनिघातः । बर्हिः कालाध्वनोरत्यन्तसंयोगेद्वितीया । वीहि वीकान्त्यादिषु लोटिरूपं हेर्ङित्त्वादुदात्तः । पुरोडाशं दाशृदानेइत्यस्मात्पुरस्पूर्वान्मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन् पुरोडाशंतएनमितिनिपातनाद्दकारस्यलकारः कृदुत्तरपदस्वरः ॥ ३ ॥

अथचतुर्थी–

रारन्धिसवनेषुणएषुस्तोमेषुवृत्रहन् । उक्थेष्विन्द्रगिर्वणः ॥ ४ ॥

ररन्धि । सवनेषु । नः । एषु । स्तोमेषु । वृत्रऽहन् ।
उक्थेषु । इन्द्र । गिर्वणः ॥ ४ ॥

हेगिर्वणः गीर्भिःस्तुतिभिर्वननीय वृत्रहन् वृत्रस्यहन्तः हेइन्द्र नोऽस्माकंसंबन्धिषुत्रिषुसवनेषु एषुक्रियमाणेषुस्तोमेषुस्तोत्रेषु उक्थेषु शस्त्रेषुचररन्धि रमस्व ॥ ररन्धि रमतेर्लोटि बहुलंछन्दसीतिशपःश्लुः छन्दस्युभयथेतिहेरार्धधातुकत्वेनाङित्त्वादङितश्चेतिहेर्धिः । सवनेषु सूयते सोमोयेष्विति अधिकरणेसुनोतेर्ल्युट् लित्स्वरः । नः जसोनकारस्य नश्चधातुस्थोरुषुभ्यइति संहितायांणत्वम् ॥ ४ ॥

अथपञ्चमी–

मतयःसोमपामुरुंरिहन्तिशवसस्पतिम् । इन्द्रंवत्संनमातरः ॥ ५ ॥ ३॥

म॒तय॑ः । सो॒म॒ऽपाम् । उ॒रुम् । रि॒हन्ति॑ । शव॑सः ।
पति॑म् । इन्द्र॑म् । व॒त्सम् । न । मा॒तर॑ः ॥ ५ ॥ ३ ॥

हेइन्द्र मतयोऽस्माभिःक्रियमाणास्तुतयः उरुंमहान्तंसोमपां सोमस्यपातारंशवसोबलस्यपतिमिन्द्रंत्वां रिहन्ति लिहन्ति तत्रदृष्टान्तः—वत्संन यथावत्संमातरोधेनवोलिहन्तितद्वत् ॥ मतयः मनज्ञानेइत्यस्मात्कर्मणि मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः । उरुं ऊर्णुञ्आच्छादनेइत्यस्मान्महत्यर्थेगम्यमाने महतिह्रस्वश्चेतिकुप्रत्ययः धातोर्ह्रस्वश्च प्रत्ययस्वरः । रिहन्ति लिहआस्वादनेइत्यस्माल्लटिरूपम् रलयोरभेदः प्रत्ययस्वरः । शवसस्पतिमितिसंहितायांषष्ठ्याः पतिपुत्रपृष्ठेत्यादिनाविसर्जनीयस्यसत्वम् । वत्सं वदव्यक्तायांवाचि अस्माद्वृतॄवदिहनीत्यादिनासप्रत्ययः वदत्यभीक्ष्णंमातरमितिवत्सोगोबालः प्रत्ययस्वरः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेतृतीयोवर्गः ॥ ३ ॥

अथषष्ठी—

सम॑न्दस्वा॒ह्यन्ध॑सो॒राध॑सेत॒न्वा॑म॒हे । नस्तो॒तारं॑नि॒देक॑रः ॥ ६ ॥

सः । म॒न्द॒स्व॒ । हि । अन्ध॑सः । राध॑से । त॒न्वा॑ ।
म॒हे । न । स्तो॒तार॑म् । नि॒दे । क॒र॒ः ॥ ६ ॥

हेइन्द्र सतथाविधस्त्वं महे महते राधसे धनाय अन्धसःअस्माभिर्दीयमानस्यसोमस्य पानेन तन्वाशरीरेणसहमन्दस्व हृष्टोभव हिरत्रसमुच्चयार्थः किञ्च त्वंस्तोतारंमांनिदेनिन्दायै विषयभूतं नकरः माकार्षीः ॥ मन्दस्व मदिस्तुत्यादिष्वित्यस्यलोटिरूपं हिचेतिनिघातप्रतिषेधेनभवितव्यमितिचेन्न तत्राप्रातिलोम्येइतिवर्तते अत्रहेःसमुच्चयार्थत्वान्निघातः । तन्वा उदात्तस्वरितयोरितिस्वरितत्वम् । महे तकारलोपश्छान्दसः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । निदे णिदिकुत्सायामित्यस्मात्संपदादिलक्षणोभावेक्विप् आगमानुशासनस्यानित्यत्वान्नुमभावः सावेकाचइतिविभक्तेरुदात्तत्वम् । करः करोतेर्लुङि च्लेः कृमृदृरुहिभ्यश्छन्दसीत्यङादेशः निघातः ॥ ६ ॥

अथसप्तमी—

व॒यमि॑न्द्रत्वा॒यवो॑ह॒विष्म॑न्तोजरामहे । उ॒तत्वम॑स्म॒युर्व॑सो ॥ ७ ॥

Funding by IKS-MoE

व॒यम् । इ॒न्द्र॒ । त्वा॒ऽयवः॑ । ह॒विष्म॑न्तः । ज॒रा॒म॒हे॒ ।
उ॒त । त्वम् । अ॒स्म॒ऽयुः । व॒सो॒ इति॑ ॥ ७ ॥

हेइन्द्र त्वायवोयज्ञार्थंत्वामात्मनइच्छन्तः त्वत्कामाःसन्तोहविष्मन्तः संभृतहविष्कावयं जरामहे त्वांस्तुमः हेवसो सर्वस्यवासक इन्द्र उत त्वमपि अस्मयुःहविःस्वीकरणार्थं अस्मानात्मनइच्छन्भव ॥ त्वायवः त्वामिच्छन्तीत्यर्थेसुपआत्मनःक्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्य त्वादेशः क्याच्छन्दसीत्युप्रत्ययः त्वद्यवइतिप्राप्तौ युष्मदस्मदोरनादेशेइतिअविभक्तावपि हलादौव्यत्ययेनात्वं प्रत्ययस्वरः । हविष्मन्तः तसौमत्वर्थेइतिभसंज्ञायांसकारस्यरुत्वाभावः स्वरविधौव्यञ्जनमविद्यमानवदितिपरिभाषानाश्रयणान्मतुपउदात्तताभावः सिप्रत्ययस्वरः । जरामहे जरतिःस्तुतिकर्मेति[1]यास्कः । अस्मयुः अस्मानिच्छतीत्यर्थेसुपःक्यच् तस्मादुप्रत्ययः पूर्वपदान्तलोपश्छान्दसः प्रत्ययस्वरः ॥ ७ ॥

अथाष्टमी—

मारेअ॒स्मद्विमु॑मुचो॒हरि॑प्रिया॒र्वाङ्या॑हि । इन्द्र॑स्वधावो॒मत्स्वे॒ह ॥ ८ ॥

मा । आ॒रे । अ॒स्मत् । वि । मु॒मु॒चः॒ । ह॒रि॑ऽप्रिय । अ॒र्वाङ् ।
या॒हि॒ । इन्द्र॑ । स्व॒धा॒ऽवः॒ । मत्स्व॑ । इ॒ह ॥ ८ ॥

हेहरिप्रिय हरीअश्वौप्रियौयस्यतादृशहेइन्द्र अस्मदस्मत्तः आरेदूरेरथेयोजितावश्वौ माविमुमुचः माविमोचय ताभ्यामुपेतएवार्वाङ्अस्मदाभिमुख्येनयाहि आगच्छ हेस्वधावः सोमलक्षणान्नवन् हेइन्द्र इहास्मिन्देवयजनेमत्स्व सोमंपीत्वाहृष्टोभव ॥ अस्मत् अस्मच्छब्दस्य पञ्चमीबहुवचनस्य पञ्चम्याअदित्यदादेशः । मुमुचः मुच्लृमोक्षणेइत्यस्यण्यन्तस्य छान्दसेलुङिचङिरूपं अभ्यासस्यदीर्घाभावश्छान्दसः नमाङ्योगेइत्यडभावः निघातः । हरिप्रिय आमन्त्रितस्यपादादित्वात्षाष्ठिकमाद्युदात्तत्वम् । मत्स्व मदिस्तुत्यादिष्वित्यस्यलोटि बहुलंछन्दसीतिविकरणस्यलुक् आमन्त्रितस्याविद्यमानत्वेनपादादित्वादनिघातः ॥ ८ ॥

अथनवमी—

अ॒र्वाञ्चं॑त्वासु॒खेरथे॒वह॑तामिन्द्र॑के॒शिना॑ । घृ॒तस्नू॑ब॒र्हिरा॒सदे॑ ॥ ९ ॥ ४ ॥

---

[1] नि० १०. ८ ।

Funding by IKS-MoE

अर्वाञ्चम् । त्वा । सुऽखे । रथे । वहताम् । इन्द्र । केशिना ।
घृतस्नूइतिघृतऽस्नू । बर्हिः । आऽसदे ॥ ९ ॥ ४ ॥

हेइन्द्र घृतस्नू श्रमजनितजलप्रस्रवणयुक्तौ केशिना केशिनौ स्कन्धप्रदेशेलंबमानकेशयुक्तौ हरी आसदे आसदनीयंबर्हिरभिलक्ष्य सुखे सुखकरेरथे अर्वांचंअस्मदभिमुखं त्वा त्वां वहतां ॥ अर्वाञ्चं अञ्चतेःक्विनि उगिदचामितिनुम् । वहतां वहेर्लोटिरूपं तसोलसार्वधातुकस्वरेकृतेधातुस्वरः । आसदे सदेःकृत्यार्थेकेन्प्रत्ययः नित्स्वरः कृदुत्तरपदप्रकृतिस्वरः ॥ ९ ॥

॥ इतितृतीयस्यद्वितीयेचतुर्थोवर्गः ॥ ४ ॥

उपनःसुतमितिनवर्चंचतुर्थंसूक्तं वैश्वामित्रं गायत्रमैन्द्रं उपनइत्यनुक्रमणिका । पूर्वसूक्तेनसहोक्तोविनियोगः ।

तत्रप्रथमा—

उपनःसुतमागहिसोममिन्द्रगवाशिरम् । हरिभ्यांयस्तेअस्मयुः ॥ १ ॥

उप । नः । सुतम् । आ । गहि । सोमम् । इन्द्र । गोऽआशिरम् ।
हरिऽभ्याम् । यः । ते । अस्मऽयुः ॥ १ ॥

हेइन्द्र नोऽस्मदीयंसुतमभिषुतं गवाशिरं पयसामिश्रितंसोमंप्रतिउपागहि समीपेआगच्छ यतः हरिभ्यामश्वाभ्यांयुक्तस्तवरथोस्मयुरस्मान्कामयमानोवर्तते ॥ गवाशिरं अङ्पूर्वस्यश्रीणातेःक्विपि अपस्पृधेथामानृचुरित्यादिनाशिरइत्यादेशः बहुव्रीहौपूर्वपदस्वरः ॥ १ ॥

अथद्वितीया—

तमिन्द्रमदमागहिबर्हिःष्ठांग्रावभिःसुतम् । कुविन्न्वस्यतृप्णवः ॥ २ ॥

तम् । इन्द्र । मदम् । आ । गहि । बर्हिःऽस्थाम् । ग्रावऽभिः ।
सुतम् । कुवित् । नु । अस्य । तृप्णवः ॥ २ ॥

हेइन्द्र ग्रावभिःसुतमभिषुतं बर्हिष्ठां बर्हिषिस्थितं मदं मद्यतेऽनेनेतिमदःसोमः तमिमं सोममागह्यागच्छ कुवित् प्रभूतंयथाभवतितथा अस्यसोमस्यपाने नुक्षिप्रंतृप्णवः तृप्तोभव॥

मदं मदीहर्षे मदोनुपसर्गेइत्यप्प्रत्ययः तस्यपित्त्वादनुदात्तत्वेधातुस्वरः। बर्हिष्ठां ष्ठागतिनिवृत्तौ क्विप् संहितायांपूर्वपदसकारस्यादेशप्रत्यययोरितिषत्वं कृदुत्तरपदस्वरः। तृप्णवः तृपप्रीणनेइत्यस्य लेट्यडागमः कुविद्योगादनिघातः क्षुभ्नादिषुनृमनतृप्नोतीतिपठितं तथापि सर्वविधीनांछन्दसिविकल्पितत्वादत्रणत्वप्रतिषेधोनभवति प्रत्ययस्वरः ॥ २ ॥

अथतृतीया—

इन्द्रमित्थागिरोममाच्छागुरिषिताइतः । आवृतेसोमपीतये ॥ ३ ॥

इन्द्रम् । इत्था । गिरः । मम । अच्छ । अगुः । इषिताः ।
इतः । आऽवृते । सोमऽपीतये ॥ ३ ॥

हेइन्द्र इषितास्त्वदर्थंप्रेरिताइत्था इत्थमनेनप्रकारेणोच्यमानाममगिरः स्तुतिलक्षणावाचः इन्द्रंत्वामितोस्माद्देवयजनदेशात् अच्छागुः आभिमुख्येनगच्छन्तु किमर्थं सोमपीतये सोमपानार्थं आवृतेत्वामावर्तयितुम् ॥ इत्था इदम्शब्दात्थाहेतौचच्छन्दसीतिव्यत्ययेनथाप्रत्ययः इदमएतेतौरथोरितिइदित्यादेशः प्रत्ययस्वरः। अच्छ अच्छगत्यर्थवदेष्वितिगतिसंज्ञा। अगुः इण्गतावित्यस्य लुङिरूपं निघातः ॥ ३ ॥

अथचतुर्थी—

इन्द्रंसोमस्यपीतयेस्तोमैरिहहवामहे । उक्थेभिःकुविदागमत् ॥ ४ ॥

इन्द्रम् । सोमस्य । पीतये । स्तोमैः । इह । हवामहे । उक्थेभिः ।
कुवित् । आऽगमत् ॥ ४ ॥

स्तोमैस्त्रिवृत्पञ्चदशादिस्तोमसाध्यैःस्तोत्रैःउक्थेभिःउक्थैःशस्त्रैश्च इहकर्मणिसोमस्यपीतयेसोमपानार्थंइन्द्रंहवामहे वयमाह्वयामः कुविद्बहुवारंआहूतःसइन्द्रःआगमत् यज्ञंप्रत्यागच्छतु ॥ आगमत् गमेर्लेट्यडागमः आगमाअनुदात्ताइत्यटोनुदात्तत्वाद्धातुस्वरः तिङिचोदात्तवतीतिगतेर्निघातः कुविद्योगादनिघातः ॥ ४ ॥

अथपञ्चमी—

इन्द्रसोमाःसुताइमेतान्दधिष्वशतक्रतो । जठरेवाजिनीवसो ॥ ५॥५॥

Funding by IKS-MoE

इन्द्र॑ । सोमा॑ः । सु॒ताः । इ॒मे । तान् । द॒धि॒ष्व॒ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ।
ज॒ठरे॑ । वा॒जि॒नी॒व॒सो॒ इति॑ वाजिनीऽवसो ॥ ५ ॥ ५ ॥

हेशतक्रतो इन्द्र इमे सोमाःसुताः ग्रावभिस्त्वदर्थमभिषुताः हेवाजिनीवसो अन्नधन यद्वा वाजोन्नमाशुफलत्वेनास्तीतिवाजिन्यःक्रियाः तासांवासक हेइन्द्र तान्सोमरसान्जठरेदधिष्व धारय ॥ वाजिनीवसो वाजशब्दान्मत्वर्थे अतइनिठनावितोनिप्रत्ययः ऋन्नेभ्योङीबितिङीप् तासांवसो संबुद्धौचेतिगुणः आमन्त्रितत्वादाष्टमिकमनुदात्तत्वम् ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेपञ्चमोवर्गः ॥ ५ ॥

अथषष्ठी—

वि॒द्माहित्वा॑धनंज॒यंवाजे॑षुद॒धृ॒षं॑क॑वे । अधा॑तेसु॒म्नमी॑महे ॥ ६ ॥

वि॒द्म । हि । त्वा॒ । ध॒न॒म्ऽज॒यम् । वाजे॑षु । द॒धृ॒षम् ।
क॒वे॒ । अध॑ । ते॒ । सु॒म्नम् । ई॒म॒हे॒ ॥ ६ ॥

हेकवे क्रान्तदर्शिन्निन्द्र वाजेषुयुद्धेषुदधृषंशत्रूणामभिभवितारं अतएवधनंजयं धनंजयतीतिधनंजयः तादृशं त्वात्वां विद्महि जानीमःखलु अथानन्तरं तेतवसुम्नंधनमीमहेयाचामहे ॥ विद्म विदेर्लटि विदोलटोवेतिमसोमादेशः पादादित्वादनिघातः । धनंजयं जिजयेइत्यस्माद्धनउपपदे संज्ञायांभृतॄवृजिधारिसहितपिदमइतिखच्प्रत्ययः अरुर्द्विषदजन्तस्यमुमितिपूर्वपदस्यमुमागमः चित्त्वादन्तोदात्तः । दधृषं ञिधृषाप्रागल्भ्येइत्यस्ययङ्लुकि अभ्यासस्यरीगागमाभावश्छान्दसः तदन्तात्पचाद्यचि यङोचिचेतियङोलुक् लघूपधगुणेप्राप्ते नधातुलोपइतितस्यप्रतिषेधः चित्त्वादन्तोदात्तः ॥ ६ ॥

अथसप्तमी—

इ॒ममि॑न्द्र॒गवा॑शिरं॒यवा॑शिरं॑चनःपिब । आ॒गत्या॒वृष॑भिःसु॒तम् ॥ ७ ॥

इ॒मम् । इ॒न्द्र॒ । गोऽआ॑शिरम् । यव॑ऽआशिरम् । च॒ ।
न॒ः । पि॒ब॒ । आ॒ऽगत्य॑ । वृष॑ऽभिः । सु॒तम् ॥ ७ ॥

Funding by IKS-MoE

हेइन्द्र गवाशिरं गव्यमिश्रणोपेतंसोमं तथा यवाशिरं यवमिश्रणोपेतं वृषभिर्ग्रावभिः सुतमभिषुतंनोऽस्मदीयमिमंसोमं देवयजनमागत्यपिब ॥ गवाशिरं यवाशिरमित्यत्र आङ्पूर्वस्यश्रीणातेःक्विपि अपस्पृधेथामानृचुरित्यादिनाशिरआदेशः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ७ ॥

अथाष्टमी–

तुभ्येदि॑न्द्र॒स्वओ॒क्ये॒३॑सोमं॑चोदामिपी॒तये॑ । ए॒षरा॑रन्तुतेहृ॒दि ॥ ८ ॥

तुभ्य॑ । इत् । इ॒न्द्र॒ । स्वे । ओ॒क्ये॑ । सोम॑म् ।
चो॒दा॒मि॒ । पी॒तये॑ । ए॒षः । र॒र॒न्तु॒ । ते॒ । हृ॒दि ॥ ८ ॥

हेइन्द्र तुभ्येत्तुभ्यमेव पीतये पानार्थं स्वेस्वकीयेओक्ये स्थाने जठरे अभिषुतमिमंसोमं चोदामि प्रेरयामि एषपीतःसोमस्तेतवहृदिहृदयेररन्तु अत्यर्थंरमताम् ॥ तुभ्य युष्मच्छब्दस्यचतुर्थ्येकवचनेतुभ्यमह्याविति तुभ्यादेशः सुपांसुलुगितिसुपोलुक् ङयिचेत्याद्युदात्तः । ओक्ये वस्वादित्वात्स्वार्थिकोयत्प्रत्ययः तित्स्वरितः । चोदामि चुदप्रेरणे ण्यन्तस्यलटिरूपं बहुलमन्यत्रापीतिणेर्लुक् निघातः । ररन्तु रमुक्रीडायामित्यस्य यङ्लुकि लोटि सर्वविधीनांछन्दसिविकल्पितत्वादत्राभ्यासस्यनुमभावः संहितायामन्येषामपीति अभ्यासस्यदीर्घः निघातः । हृदि हृदयशब्दस्य पद्दन्नोमासहृदित्यादिनाहृदादेशः ऊडिदमितिविभक्तेरुदात्तत्वम् ॥ ८ ॥

अथनवमी–

त्वांसु॒तस्य॑पी॒तये॑प्र॒त्नमि॑न्द्रहवामहे । कु॒शि॒कासो॑अव॒स्यवः॑ ॥९॥६॥

त्वाम् । सु॒तस्य॑ । पी॒तये॑ । प्र॒त्नम् । इ॒न्द्र॒ ।
ह॒वा॒म॒हे॒ । कु॒शि॒कासः॑ । अ॒व॒स्यवः॑ ॥ ९ ॥ ६ ॥

हेइन्द्र अवस्यवः त्वत्तोरक्षणमिच्छन्तः कुशिकासः कुशिकगोत्रोत्पन्नावयं सुतस्य ग्रावभिरभिषुतस्य सोमस्य पीतये पानार्थं प्रत्नं पुरातनं त्वांहवामहे स्तुतिलक्षणाभिर्गीर्भिराह्वयामः ॥ पीतये स्थागापापचोभावइतिक्तिन् हिष्ठवत्सरतिशत्थान्तानामित्यन्तोदात्तत्वम् । हवामहे ह्वयतेर्लटि बहुलंछन्दसीतिसंप्रसारणेरूपं । अवस्यवः अवइच्छन्तीत्यत्रार्थेसुपः

३०

Funding by IKS-MoE

क्यच् क्याच्छन्दसीत्युप्रत्ययः । कुशिकासोअवस्यवइत्यत्र संहितायामव्यादवद्यादित्यादिना एङःप्रकृतिभावः ॥ ९ ॥

॥ इतितृतीयस्यतृतीयेषष्ठोवर्गः ॥ ६ ॥

आयाह्यर्वाङित्यष्टर्चंपंचमंसूक्तंवैश्वामित्रं त्रैष्टुभमैन्द्रं आयाह्यष्टावित्यनुक्रमणिका । दशरात्रेचतुर्थेहनिस्तोमवृद्धौमाध्यन्दिनेसवनेऽच्छावाकशस्त्रेस्तोमातिशंसनार्थं इदंसूक्तं सूत्रितंच —आयाह्यर्वाङित्यष्टर्चान्यावपेरन्निति महाव्रतेप्यावपनीयम् ।

सूक्तेप्रथमा—

आया॑ह्य॒र्वाङु॒प॑वन्धुरे॒ष्ठास्तवेदनु॑प्र॒दिवः॑सोम॒पेय॑म् ।
प्रि॒यासखा॑या॒विमु॒चोप॑ब॒र्हिस्त्वामि॒मेह॑व्य॒वाहो॑हवन्ते ॥ १ ॥

आ । या॒हि॒ । अ॒र्वाङ् । उप॑ । व॒न्धु॒रे॒ऽस्थाः । तव॑ । इत् ।
अनु॑ । प्र॒ऽदिवः॑ सो॒म॒ऽपेय॑म् । प्रि॒या । सखा॑या । वि । मु॒च॒ ।
उप॑ । ब॒र्हिः । त्वाम् । इ॒मे । ह॒व्य॒ऽवाहः॑ । ह॒व॒न्ते॒ ॥ १॥

हेइन्द्र वन्धुरेष्ठाः वन्धुरशब्देन ईषाद्वयसंबन्धस्थानमभिधीयते तेनतद्विशिष्टोरथोलक्ष्यते तंस्मिन्रथेतिष्ठन्त्वं अर्वाङस्मदभिमुखःसन् आ अभिलक्ष्यउपयाहि समीपेआगच्छ प्रदिवः प्रत्नं पूर्वक्रमगतं तवेत्तवैवसंबन्धिसोमपेयंसोमपानं त्वं अनु अनुद्दिश्यप्रिया तवप्रियतमौ सखाया समानख्यानावश्वौबर्हिरुप बर्हिषःसमीपे विमुच विमुञ्च हव्यवाहः हव्यंवहंतीतिहव्यवाहः इमे ऋत्विजः त्वां हवन्ते सोमपानार्थमाह्वयन्ति तस्मादागच्छेतिभावः ॥ वन्धुरेष्ठाः तिष्ठतेर्विच् तत्पुरुषेकृतिबहुलमितिसप्तम्याअलुक् । प्रदिवः सकारान्तमव्ययम् । सोमपेयं पापानेइत्यस्यभावे अचोयदितियत्प्रत्ययः ईद्यतीतीत्वं आर्धधातुकलक्षणोगुणः यतोनावइत्याद्युदात्तत्वं समासेकृदुत्तरपदस्वरः । मुच मुञ्चतेर्लोटि आगमानुशासनस्यानित्यत्वान्नुमभावः ॥ १ ॥

अथद्वितीया—

आया॑हिपू॒र्वीरति॑चर्ष॒णीराँअ॒र्यआ॒शिष॒उप॑नो॒हरि॑भ्याम् ।
इ॒माहित्वा॑म॒तयः॒स्तोम॑तष्टा॒इन्द्र॒हव॑न्तेस॒ख्यंजु॑षा॒णाः ॥ २ ॥

Funding by IKS-MoE

आ। याहि। पूर्वीः। अति। चर्षणीः। आ। अर्यः। आऽशिषः।
उप। नः। हरिऽभ्याम्। इमाः। हि। त्वा। मतयः।
स्तोमऽतष्टाः। इन्द्र। हवन्ते। सख्यम्। जुषाणाः॥ २॥

हेइन्द्र पूर्वीः पुरातनीः सर्वाश्चर्षणीःप्रजाः अत्यायाहि अतिक्रम्यागच्छ द्वितीयआङ्पूरणः अर्यः अस्माकंस्वामी त्वं नः आशिषः त्वमत्रागत्यसोमंपिबेत्येवमादिकाः अस्माकंप्रार्थना हरिभ्यामश्वाभ्यांयुक्तःसन्नुपागच्छ किञ्च ते तव सख्यंजुषाणाःसेवमानाः स्तोमतष्टाः स्तोमकारिभिःस्तोतृभिःकृताइमाःमतयःस्तुतयः हवन्ते सोमपानार्थंत्वामाह्वयन्ति॥ हिप्रसिद्धौ करणेकर्तृव्यापारः काष्ठानिपचन्तीतिवत्। आ संहितायामाङोनुनासिकश्छन्दसीत्यनुनासिकः। अर्यः ऋगतौ अर्यःस्वामिवैश्ययोरितिनिपातनाद्यत्प्रत्ययः यतोनावइत्याद्युदात्तत्वेप्राप्ते अर्यस्यस्वाम्याख्याचेत्यन्तोदात्तत्वम्। आशिषः क्विपि शासइदङ्हलोरित्युपधायाइत्वं शासिवसीतिषत्वम्। स्तोमतष्टाः तक्षूत्वक्षूतनूकरणेइत्यस्मात्कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः॥ २॥

अथतृतीया—

आनोयज्ञंनमोवृधंसजोषाइन्द्रदेवहरिभिर्याहितूयम्।
अहंहित्वांमतिभिर्जोहवीमिघृतप्रयाःसधमादेमधूनाम्॥ ३॥

आ। नः। यज्ञम्। नमःऽवृधम्। सऽजोषाः। इन्द्र। देव।
हरिऽभिः। याहि। तूयम्। अहम्। हि। त्वा। मतिऽभिः।
जोहवीमि। घृतऽप्रयाः। सधऽमादे। मधूनाम्॥ ३॥

देव द्योतमान हेइन्द्र नोऽस्माकं नमोवृधं नमसोन्नस्यवर्धकमिमंयज्ञं हरिभिरश्वैःसजोषाः सहप्रीतिस्त्वंतूयं क्षिप्रमायाहि घृतप्रयाः घृतसहितानिप्रयांस्यन्नरूपाणिहवींषियस्यसतथोक्तः तादृशोहं मधूनांसोमानांसधमादे सहमाद्यन्तियत्रसोमेइतिसधमादः तस्मिन्स्थाने मतिभिःस्तुतिभिः त्वा त्वां जोहवीमिहि भृशमाह्वयामिखलु॥ जोहवीमि यङ्लुकि अभ्यस्तस्यचेतिसंप्रसारणं गुणोयङ्लुकोरित्यभ्यासस्यगुणः यङोवेतीडागमः हियोगादनिघातः अभ्यस्तानामादिरित्याद्युदात्तः। घृतप्रयाः घृक्षरणदीप्त्योरित्यस्मादंजिघृषिभ्यःक्तइतिक्तप्रत्ययः बहुव्रीहौपूर्वपदस्वरः॥ ३॥

अथचतुर्थी–

आच॒त्वामे॒तावृष॑णा॒वहा॑तो॒हरी॒सखा॑यासु॒धुरा॒स्वङ्गा॑ ।
धा॒नाव॒दिन्द्र॒ःसव॑नंजु॒षा॒णःसखा॒सख्यु॑ःशृणव॒द्वन्द॑नानि ॥ ४ ॥

आ । च॒ । त्वाम् । ए॒ता । वृष॑णा । वहा॑तः । हरी॒ इति॑ ।
सखा॑या । सु॒ऽधुरा॑ । सु॒ऽअङ्गा॑ । धा॒नाऽव॑त् । इन्द्र॑ः । सव॑नम् ।
जु॒षा॒णः । सखा॑ । सख्यु॑ः । शृ॒ण॒व॒त् । वन्द॑नानि ॥ ४ ।

हेइन्द्र वृषणा सेचनसमर्थौ सुधुरा शोभनयाधुरान्वितौ स्वंगा शोभनावयवोपेतौ सखाया शोभनख्यानावेताएतौहरी त्वामावहातः यज्ञंप्रत्यागमनायरथेत्वामावहतः अथ धानावत् भृष्टयवोपेतंसवनंजुषाणः सेवमानःसखा सखिभूतःसइन्द्रः सख्युःस्तोतुर्ममवन्दनानिस्तोत्राणिशृणवच्च शृणुयात् ॥ वहातः वहेर्लेट्याडागमेरूपं चवायोगेप्रथमेतिननिघातः । शृणवत् श्रुश्रवणेइत्यस्यलेट्यडागमेरूपं निघातः ॥ ४ ॥

अथपञ्चमी–

कु॒विन्मा॑गो॒पांकर॑से॒जन॑स्यकु॒विद्राजा॑नंमघवन्नृजीषिन् ।
कु॒विन्म॒ऋषिं॑पपि॒वांसं॑सु॒तस्य॑कु॒विन्मे॒वस्वो॑अ॒मृत॑स्य॒शिक्षा॑ः ॥ ५ ॥

कु॒वित् । मा॒ । गो॒पाम् । कर॑से । जन॑स्य । कु॒वित् । राजा॑नम् ।
म॒घ॒ऽव॒न् । ऋ॒जी॒षि॒न् । कु॒वित् । मा॒ । ऋषि॑म् । प॒पि॒ऽवांस॑म् ।
सु॒तस्य॑ । कु॒वित् । मे॒ । वस्व॑ः । अ॒मृत॑स्य । शिक्षा॑ः ॥ ५ ॥

हेइन्द्र कुविदपिच मामांजनस्यगोपांगोप्तारं करसे कुरु तथा हेमघवन् धनवन्नृजीषिन्सोमवन् हेइन्द्र मां राजानं सर्वस्यस्वामिनंकुरु कुविच्चमामामृषिं अतीन्द्रियार्थद्रष्टारंकुरु । ऋषिर्दर्शनादितियास्कः[1] ।तथा सुतस्याभिषुतस्यसोमस्यपपिवांसंपातारंकुरु । अपिच मे मह्यं अमृतस्य क्षयरहितंवस्वोवसु शिक्षाः प्रयच्छ ॥ करसे डुकृञ्करणे लेट्यडागमेरूपं कुविद्योगादनिघातः । मऋषिमित्यत्र संहितायामृत्यकइतिप्रकृतिभावः ह्रस्वश्च । पपिवांसं पापा-

---

[1] नि० २. ११.।

नेइत्यस्यक्सौवस्वेकाजाद्धसामितीडागमः प्रत्ययस्वरः । शिक्षाः शिक्षतिर्दानकर्मा अस्माल्लेट्याडागमेरूपं कुविद्योगादनिघातः आगमाअनुदात्ताइत्याटोनुदात्तत्वेधातुस्वरः ॥ ५ ॥

अथषष्ठी–

आत्वा॑बृ॒हन्तो॒हर॑योयुजा॒नाअ॒र्वाँगिन्द्रसध॒मादो॑वहन्तु॒ ।
प्रये॑द्वि॒तादि॒वऋ॒ञ्जन्त्याता॒ःसु॒सँ॑मृष्टासो॒वृष॒भस्य॑मू॒राः ॥ ६ ॥

आ । त्वा॒ । बृ॒हन्तः॑ । हर॑यः । यु॒जा॒नाः । अ॒र्वाक् । इ॒न्द्र॒ ।
स॒ध॒ऽमादः॑ । व॒ह॒न्तु॒ । प्र । ये । द्वि॒ता । दि॒वः । ऋ॒ञ्जन्ति॑ ।
आताः॑ । सु॒ऽसँ॑मृष्टासः । वृ॒ष॒भस्य॑ । मू॒राः ॥ ६ ॥

हेइन्द्र त्वा त्वां बृहन्तोमहान्तोयुजानाः रथेयुज्यमानाहरयोश्वाः सधमादः सहमादयन्तः सन्तः अर्वागस्मदभिमुखमावहन्तु वृषभस्यकामानांवर्षितुरिन्द्रस्यमूराः शत्रूणांमारकाः सुसंमृष्टासः इन्द्रस्यहस्ताभ्यांपृष्ठभागे सुष्ठुसंस्पृष्टाः दिवोनभसःसकाशादागच्छन्तोयेऽश्वाः आताः आभिमुख्येनगम्यन्तेप्राणिभिस्तत्तत्कार्यंप्रतीतिआतादिशःसर्वादिशः द्विता द्विविधंयथाभवतितथाप्रऋञ्जति प्रकर्षेणसाधयन्ति ॥ युजानाः युजिर्योगे युजिबुधिदृशःकिच्चेतिकित्त्वादानच् चित्त्वादन्तोदात्तः । सधमादः मदीहर्षेइत्यस्मात्ण्यन्तात्क्विप् कृदुत्तरपदस्वरः । द्विता द्विशब्दात्संख्यायाविधार्थेधेतिधाप्रत्ययः धकारस्यतकारश्छान्दसः प्रत्ययस्वरः । दिवः ऊडिदमिति विभक्तेरुदात्तत्वम् । आताः अतसातत्यगमनेइत्यस्मात्कर्मणिघञ् व्यत्ययेनाद्युदात्तः ॥ ६ ॥

अथसप्तमी–

इन्द्र॒पिब॒वृष॑धूतस्य॒वृष्ण॒आयन्ते॑श्ये॒नउ॑श॒तेज॒भार॑ ।
यस्य॒मदे॑च्या॒वय॑सि॒प्रकृ॒ष्टीर्यस्य॒मदे॒अप॑गो॒त्राव॒वर्थ॑ ॥ ७ ॥

इन्द्र॑ । पिब॑ । वृष॑ऽधूतस्य । वृष्णः॑ । आ । यम् । ते॒ । श्ये॒नः ।
उ॒श॒ते । ज॒भार॑ । यस्य॑ । मदे॑ । च्य॒वय॑सि । प्र । कृ॒ष्टीः ।
यस्य॑ । मदे॑ । अप॑ । गो॒त्रा । व॒वर्थ॑ ॥ ७ ॥

Funding by IKS-MoE

हेइन्द्र वृषधूतस्य ग्रावभिरभिषुतं वृष्णः अभिमतफलसेचकंसोमंपिब श्येनः शंसनीयगतिः छन्दोरूपःसुपर्णः उशते सोमंकामयमानाय ते तुभ्यं यंसोममाजभार आजहार यस्यसोमस्यमदेहर्षेसंजातेसति कृष्टीः आकर्षन्तिवशीकुर्वन्तिकर्मणासर्वानितिकृष्टयोमनुष्याः तान्सपत्नभूतान्मनुष्यान्प्रच्यावयसि प्रकर्षेणपातयसि यस्यसोमस्यमदेसंजातेसति गोत्रागामुदकंरश्मिभिरावृतंवर्षासु ऋतुषुत्रायन्तेपालयन्तीतिगोत्रामेघाः तानपववर्थापवृणोषि ॥ वृषधूतस्य धूञ्कंपनेइत्यस्यनिष्ठायां यस्यविभाषेतीट्प्रतिषेधः तृतीयाकर्मणीतिपूर्वपदस्वरः। श्येनः श्यैङ्गतौ स्यास्त्याहृञ्विभ्यइनजितिइनच्प्रत्ययः श्यायतइतिश्येनः चित्त्वादन्तोदात्तः। जभार हरतेर्लिटिणलिरूपं हृग्रहोर्भश्छन्दसीतिभकारः यद्वृत्तयोगादनिघातःलित्स्वरः । मदे मदीहर्षे मदोनुपसर्गेइत्यप्प्रत्ययः तस्यपित्त्वादनुदात्तत्वेधातुस्वरः। गोत्रा त्रैङ्पालनेइत्यस्य आतोनुपसर्गेकइतिकः सुपोडादेशः एकादेशस्वरः ॥ ववर्थ वृञ्वरणेइत्यस्य लिटिथलि ऋतोभारद्वाजस्येतीट्प्रतिषेधः गुणः लित्स्वरः ॥ ७ ॥

अथाष्टमी—

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ ८ ॥ ७ ॥

शु॒नम् । हु॒वे॒म । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ ।
नृऽत॑मम् । वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ ।
घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ८ ॥ ७ ॥

व्याख्यातेयमृक् ॥ ८ ॥

॥ इतितृतीयस्यतृतीयेसप्तमोवर्गः ॥ ७ ॥

अयन्तेअस्त्विति पञ्चर्चंषष्ठंसूक्तं वैश्वामित्रं बार्हतमैन्द्रं अत्रानुक्रमणिका—अयन्तेपञ्चबार्हतंत्विति महाव्रतेबार्हत्यांतृचाशीताविदंसूक्तं षोडशिशस्त्रे अयन्तेअस्तुहर्यतइत्याद्यस्तृचोविनियुक्तः। सूत्रितञ्च—अयन्तेअस्तुहर्यतइत्यौष्णिहबार्हतौतृचाविति ।

तस्मिन्सूक्तेप्रथमा—

अ॒यंते॑अस्तुहर्य॒तःसोम॒आहरि॑भिःसु॒तः ।
जु॒षा॒णइ॑न्द्र॒हरि॑भिर्न॒आग॒ह्याति॑ष्ठ॒हरि॑तं॒रथ॑म् ॥ १ ॥

Funding by IKS-MoE

अ॒यम् । ते॒ । अ॒स्तु॒ । ह॒र्य॒तः । सोमः॑ । आ । हरि॑ऽभिः । सु॒तः ।
जु॒षा॒णः । इ॒न्द्र॒ । हरि॑ऽभिः । न॒ः । आ । ग॒हि॒ । आ । ति॒ष्ठ॒ ।
हरि॑तम् । रथ॑म् ॥ १ ॥

हेइन्द्र हरिभिः हरंतिसोमरसानेभिरितिहरयोग्रावाणः तैरासुतः सर्वतोऽभिषुतः हर्यतः कमनीयोजुषाणःप्रीतिविषयोयंसोमः तेतुभ्यमस्तु त्वंहरिभिरश्वैर्युक्तंहरितंहरिद्वर्णंरथं आतिष्ठ अधितिष्ठ ततोनोऽस्मानभिलक्ष्यागह्यागच्छ ॥ हर्यतः हर्यगतिकान्त्योरित्यस्मात् भृमृदृशीत्यादिनातच्प्रत्ययः चित्त्वादन्तोदात्तः । हरितं हृञ्हरणे हृश्याभ्यामितनितिइतन्प्रत्ययः नित्त्वादाद्युदात्तः। रथं रमुक्रीडायां हनिकुषिनीत्यादिनाक्थन्प्रत्ययः कित्त्वादनुनासिकलोपः नित्स्वरः॥ १॥

अथद्वितीया—

ह॒र्यन्नु॒षसं॑मर्च॑य॒ःसूर्यं॑ह॒र्यन्न॑रोचयः ।
वि॒द्वाँश्चि॑कि॒त्वान्ह॑र्यश्ववर्ध॑स॒इन्द्र॒विश्वा॑अ॒भिश्रियः॑ ॥ २॥

ह॒र्यन् । उ॒षस॑म् । अ॒र्च॑य॒ः । सूर्य॑म् । ह॒र्यन् । अ॒रो॒च॒य॒ः ।
वि॒द्वान् । चि॒कि॒त्वान् । ह॒रि॒ऽअ॒श्व॒ । व॒र्ध॑से॒ । इन्द्र॑ । विश्वाः॑ ।
अ॒भि । श्रियः॑ ॥ २ ॥

हेइन्द्र हर्यन्सोमंकामयमानस्त्वं उषसं उषःकालं अर्चयः पूजयसि तथा हर्यन् उदिते सूर्येसोमंकामयमानस्त्वंसूर्यमरोचयः दीपयसि हेहर्यश्वेन्द्र विद्वानेतत्सर्वंजानानश्चिकित्वानस्मदभिलषितफलविषयज्ञानवांस्त्वं विश्वाः सर्वाःश्रियः नः संपदः अभिवर्धसेभिमतफलप्रदानेनाभितोवर्धयसि ॥ चिकित्वान् कितज्ञानेइत्यस्य क्वसौरूपं प्रत्ययस्वरः । वर्धसे वृधुवर्धने इत्यस्यान्तर्भावितण्यर्थस्यलटिरूपं निघातः ॥ २ ॥

अथतृतीया—

द्यामिन्द्रो॒हरि॑धायसंपृथि॒वींहरि॑वर्पसम् ।
अधा॑रयद्ध॒रितो॒र्भूरि॒भोज॑नं॒ययो॑र॒न्तर्हरि॒श्चर॑त् ॥ ३ ॥

Funding by IKS-MoE

द्याम् । इन्द्र॑ः । हरि॑ऽधायसम् । पृ॒थि॒वीम् । हरि॑ऽवर्पसम् ।
अधा॑रयत् । ह॒रितो॑ः । भूरि॑ । भोज॑नम् । ययो॑ः । अ॒न्तः ।
हरि॑ः । चर॑त् ॥ ३ ॥

सोऽयमिन्द्रोहरिधायसं हरितोहरितवर्णाधायसोधारकारश्मयोयस्याःसा तांद्यामधारयत् तथा हरिवर्पसं ओषधीभिर्हरितवर्णांपृथिवीं अधारयत् हरितोर्हरितवर्णयोर्द्यावापृथिव्योर्मध्येस्वकीययोरश्वयोर्भूरिप्रभूतंभोजनं भुज्यतइतिभोजनं यवसादिलभ्यते ययोर्द्यावापृथिव्योरन्तर्मध्ये हरिरिन्द्रश्चरत् चरति तेद्यावापृथिव्याविन्द्रोधारयदित्यर्थः ॥ हरिधायसं डुधाञ्धारणपोषणयोरित्यस्मात् वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेरातोयुक् बहुव्रीहौपूर्वपदस्वरः । पृथिवीं प्रथेःषिवन्संप्रसारणंचेतिषिवन्प्रत्ययः षिद्गौरादिभ्यश्चेति ङीष् प्रत्ययस्वरेणान्तोदात्तः । हरिवर्पसं वृङ्संभक्तौ वृङ्शीङ्भ्यांरूपस्वाङ्गयोरित्यसुन्प्रत्ययः षुगागमश्च संभज्यतेतदितिवर्पोरूपं बहुव्रीहौपूर्वपदस्वरः । हरितोः हृञ्हरणेइत्यस्मात्हृसृरुहियुषिभ्यइतिरितोतिप्रत्ययः प्रत्ययस्वरः । भोजनं भुजपालनाभ्यवहारयोरित्यस्मात्कृत्यल्युटोबहुलमितिकर्मणिल्युट् लित्स्वरः । अन्तः स्वरादिष्वन्तोदात्तत्वेनपठितत्वादन्तोदात्तः । चरत् चरतिर्गत्यर्थः लेटिरूपं यद्वृत्तयोगादनिघातः ॥ ३ ॥

अथचतुर्थी–

ज॒ज्ञा॒नोहरि॑तो॒वृषा॒विश्व॒माभा॑तिरोच॒नम् ।
हर्य॑श्वो॒हरि॑तंधत्त॒आयु॑ध॒मावज्रं॑बा॒ह्वोर्हरि॑म् ॥ ४ ॥

ज॒ज्ञा॒नः । हरि॑तः । वृषा॑ । विश्व॑म् । आ । भा॒ति॒ । रो॒च॒नम् ।
हरि॑ऽअश्वः । हरि॑तम् । ध॒त्ते॒ । आयु॑धम् । आ । वज्र॑म् ।
बा॒ह्वोः । हरि॑म् ॥ ४ ॥

वृषा कामानांवर्षकः हरितोहरिद्वर्णोपेतः जज्ञानः जातइन्द्रोविश्वंसर्वंरोचनंदीप्यमानं लोकमाभाति सर्वतःप्रकाशयति तथा हर्यश्वः इन्द्रोहरितंहरिद्वर्णोपेतमायुधं बाह्वोर्धत्ते तथा हरिं शत्रूणांप्राणहारकंवज्रं बाह्वोर्धत्ते ॥ जज्ञानः जनीप्रादुर्भावेइत्यस्यलिटःकानच् गमहनेत्यादिनोपधालोपः चित्त्वादन्तोदात्तः । भाति भादीप्तावित्यस्यान्तर्भावितण्यर्थस्य लटिरूपम् ।

Funding by IKS-MoE

रोचनं रुचदीप्तावित्यस्मादनुदात्तेतश्चहलादेरितियुच् चित्त्वादन्तोदात्तः । बाह्वोः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ॥ ४ ॥

अथपञ्चमी–

इन्द्रोहर्यन्तमर्जुनंवज्रंशुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिःसुतमुद्गाहरिभिराजत ॥५॥८॥

इन्द्रः । हर्यन्तम् । अर्जुनम् । वज्रम् । शुक्रैः । अभिऽवृतम् ।
अप । अवृणोत् । हरिऽभिः । अद्रिऽभिः । सुतम् । उत् ।
गाः । हरिऽभिः । आजत ॥ ५ ॥ ८ ॥

सोयमिन्द्रः हर्यन्तं कमनीयमर्जुनंशुभ्रं शुभ्रत्वमुपपादयति शुक्रैःशुभ्रैः क्षीरादिभिरभिवृतंव्याप्तंवज्रंवेगवन्तं हरिभिः हरन्त्येभिः सोमरसानितिहरयः तैरद्रिभिर्ग्रावभिःसुतमभिषुतंसोमं अपावृणोत् आवरणरहितमकरोत् तथाचमंत्रवर्णः–पूषाराजानमाघृणिरपगूह्ळंगुहाहितं अविन्ददिति । तथा गाः पणिभिरपहृतागाः हरिभिरश्वैरूपेतः सइन्द्रः उदाजत बिलान्निरगमयत् ॥ अर्जुनं अर्जसर्जअर्जनेइत्यस्मादर्जेर्णिलुक्चेतिउनन् नित्स्वरः । अभिवृतं गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । आजत अजगतिक्षेपणयोर्लङि व्यत्ययेनात्मनेपदं निघातः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेष्टमोवर्गः ॥ ८ ॥

आमन्द्रैरितिपञ्चर्चंसप्तमंसूक्तं वैश्वामित्रं बार्हतमैन्द्रं आमन्द्रैरित्यनुक्रमणिका पूर्वसूक्तेबार्हतंत्वित्युक्तत्वादस्यापिबार्हतत्वं विशेषविनियोगस्तुयत्रश्रुत्यानसूत्रितः । स्मार्ततत्रविजानीयादृग्विधानादिशास्त्रतः ।

तत्रप्रथमा–

आमन्द्रैरिन्द्रहरिभिर्याहिमयूररोमभिः ।
मात्वाकेचिन्नियमन्विंनपाशिनोतिधन्वेवताँइहि ॥ १ ॥

---

१ ऋ० सं०१. २. १०.।

Funding by IKS-MoE

आ । मन्द्रैः । इन्द्र । हरिऽभिः । याहि । मयूररोमऽभिः ।
मा । त्वा । के । चित् । नि । यमन् । विम् । न । पाशिनः ।
अति । धन्वऽइव । तान् । इहि ॥ १ ॥

हेइन्द्र मन्द्रैर्मादयितृभिर्मयूररोमभिः मयूररोमसदृशरोमयुक्तैः हरिभिरश्वैरुपेतस्त्वमायाहि यज्ञंप्रत्यागच्छ केचिदपिजनाः त्वात्वांमानियमन्मानियच्छन्तु गमनप्रतिबंधंमाकुर्वन्त्वित्यभिप्रायः प्रतिबन्धेदृष्टान्तः—विंन यथापाशिनः पाशहस्ताव्याधाविंगच्छन्तंपक्षिणंनियच्छन्ति तद्वन्मानियच्छन्तु किंच धन्वेव यथा पान्थाः धन्वमरुदेशंशीघ्रमतिगच्छन्ति तद्वद्गमनप्रतिबन्धकानतीत्यशीघ्रमिहि आगच्छ ॥ मन्द्रैः मदिस्तुत्यादिष्वित्यस्य स्फायितंचीत्यादिनारक्प्रत्ययः इदित्त्वान्नुम् प्रत्ययस्वरः । मयूररोमभिः मयूररोमवद्रोमाणियेषामितिसप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चेतिसमासः उत्तरपदलोपश्च मयूरशब्दोमीनातेरूरन्नितिऊरन्प्रत्ययान्तः मीनातिसर्पानितिमयूरोबर्हीं नित्त्वादाद्युदात्तत्वेप्राप्ते मादीनामितिसूत्रेणमध्योदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । यमन् यमुउपरमेइत्यस्यलेटचडागमेरूपम् । इहि इण्गतावित्यस्यलोटिरूपम् ॥ १ ॥

अथद्वितीया—

वृत्रखादोवलंरुजःपुरांदर्मोअपामजः ।
स्थातारथस्यहर्योरभिस्वरइन्द्रोदृह्ळाचिदारुजः ॥ २ ॥

वृत्रऽखादः । वलम्ऽरुजः । पुराम् । दर्मः । अपाम् । अजः ।
स्थाता । रथस्य । हर्योः । अभिऽस्वरे । इन्द्रः ।
दृह्ळा । चित् । आऽरुजः ॥ २ ॥

सोऽयमिन्द्रोवृत्रखादः वृत्रंखादतिहिनस्तीतिवृत्रखादः वलंरुजः वृणोत्याकाशमिति वलोमेघः तस्यभञ्जकः तथाचमन्त्रवर्णः—बिभेदवलमिति । ततोऽपामजः मेघभेदनद्वारापांप्रेरकः पुरांशत्रुसंबंधिनीनांपुरीणांदर्मःदारकः तथाहर्योरश्वयोरभिस्वरे अस्मदाभिमुख्येनप्रेरणेनिमित्तभूतेसति रथस्यस्थाता रथमधिष्ठाता तथा दृह्ळाचित् दृढानामतिबलवतांशत्रू-

---

१ ऋ० सं० ३. २. १६. ।

Funding by IKS-MoE

णामपि आरुजः समन्ताद्भञ्जकोभवति ॥ वृत्रखादः खादृभक्षणेइत्यस्मात्कर्मण्यण् कृदुत्तरपदस्वरः । वलंरुजः रुजोभङ्गे कर्मण्युपपदे मूलविभुजादित्वात्कप्रत्ययः तत्पुरुषेकृतिबहुलमितिद्वितीयायाअलुक् थाथादिस्वरः । आरुजः रुजोभङ्गेइत्यस्मादिगुपधलक्षणःकः समासे थाथादिस्वरः ॥ २ ॥

अथतृतीया–

गंभीराँउदधीँरिवक्रतुंपुष्यसिगाइंव ।
प्रसुंगोपायवंसंधेनवोंयथाह्रदंकुल्याइंवाशत ॥ ३ ॥

गंभीरान् । उदधीन्ऽइंव । क्रतुंम् । पुष्यसि । गाःऽइंव ।
प्र । सुऽगोपाः । यवंसम् । धेनवंः । यथा ।
ह्रदम् । कुल्याःऽइंव । आशत ॥ ३ ॥

हेइन्द्र त्वं गंभीरान्महावकाशानुदधीन्समुद्रान् उदकैर्यथापोषयसि तद्वत् क्रतुं यज्ञस्यकर्तारमिमंयजमानमभिमतफलप्रदानेनपुष्यसि पोषयसि अत्रदृष्टान्तः–यथासुगोपाः समीचीनोगोपालः यवसेन गाःपोषयतितद्वत् यथा धेनवोयवसंतृणादिकंप्राप्नुवन्ति तद्वत्त्वंसोमान्प्राप्नोषि तेचसोमाः कुल्याइव कृत्रिमसरितोह्रदंमहाजलाशयंयथाप्राप्नुवन्तितद्वत्त्वामाशत व्याप्नुवन्ति ॥ गंभीरान् गाधृप्रतिष्ठालिप्सयोर्ग्रन्थेचेत्यस्माद्गभीरगंभीरावित्यनेनसूत्रेणइरच्प्रत्ययः नुमागमोपधाह्रस्वभकाराःसर्वेनिपात्यन्ते चित्त्वादन्तोदात्तः । उदधीनिव उदकशब्दउपपदे दधातेरधिकरणेर्थे कर्मण्यधिकरणेचेतिकिप्रत्ययः उदकशब्दस्यपेषं वासवाहनधिषुचेत्युदभावः कृत्स्वरः इवेनविभक्त्यलोपः । पुष्यसि पुषपुष्टावित्यस्यान्तर्णीतण्यर्थस्यलटिरूपं निघातः । सुगोपाः गोपायतेःक्विपिरूपम् । यथा यथेतिपादान्तेइतिनिघातः । आशत अशूव्याप्तावित्यस्माल्लुङि बहुलंछन्दसीतिविकरणस्यलुक् निघातः ॥ ३ ॥

अथचतुर्थी–

आनस्तुजंरयिंभराशंनप्रंतिजानते ।
वृक्षंपक्वंफलमंकीवंधूनुहीन्द्रंसंपारंणंवसुं ॥ ४ ॥

Funding by IKS-MoE

आ । नः । तुजम् । रयिम् । भर । अंशम् । न । प्रतिऽजानते ।
वृक्षम् । पक्वम् । फलम् । अङ्कीऽइव । धूनुहि ।
इन्द्र । सम्ऽपारणम् । वसु ॥ ४ ॥

हेइन्द्र नोऽस्माकंशत्रूणांबाधकंरयिंधनेनोपलक्षितंपुत्रमाभर संपादय तत्रदृष्टान्तः—अंशंन यथा पिताप्रतिजानते व्यवहारज्ञायपुत्रायस्वकीयस्यधनस्यभागंददाति तद्वत् किंच पक्वंफलंप्रतिवृक्षमङ्कीव अंकुशी यथा धूनोति तथा त्वंसंपारणं अस्मदिच्छायाःसम्यक्पूरकं वसु धनं धूनुहि चालय प्रयच्छेत्यर्थः ॥ प्रतिजानते ज्ञाअवबोधनेइत्यस्यशतरिरूपं प्रादिसमासः शतुरनुमइतिविभक्तेरुदात्तत्वम् । धूनुहि धूञ्कंपनेइत्यस्यलोटिरूपं । संपारणं पॄपालनपूरणयोरित्यस्य ण्यन्तस्य करणेल्युट् समासेकृत्स्वरः ॥ ४ ॥

अथपञ्चमी—

स्वयुरिन्द्रस्वराळसिस्मद्दिष्टिःस्वयशस्तरः ।
सवावृधानओजसापुरुष्टुतभवानःसुश्रवस्तमः ॥ ५ ॥९॥

स्वऽयुः । इन्द्र । स्वऽराट् । असि । स्मत्ऽदिष्टिः ।
स्वयशःऽतरः । सः । ववृधानः । ओजसा । पुरुऽस्तुत ।
भव । नः । सुश्रवःऽतमः ॥ ५ ॥ ९ ॥

हेइन्द्र स्वयुर्धनवानसि तथा स्वराट् स्वर्गस्यराजासि स्मद्दिष्टिः भद्रवाक्यः स्वयशस्तरः अतिशयेनप्रभूतकीर्तिरसि हेपुरुष्टुत बहुभिराहूतेन्द्र सत्वमोजसाबलेनवावृधानोवर्धमानःसन् नोऽस्मदर्थंसुश्रवस्तमः अतिशयेनशोभनान्नोपेतोभव ॥ स्वयुः स्वशब्दान्मत्वर्थीयोयुः । स्वराट् राजृदीप्तौ क्विप् व्रश्चादिनाषत्वम् । स्मद्दिष्टिः स्मत्सुमदित्यर्थेउकारलोपश्छान्दसः बहुव्रीहौपूर्वपदस्वरः । पुरुष्टुत संहितायां स्तुतस्तोमयोश्छन्दसीतिषत्वम् । भव भवतेर्लोटिरूपम् द्व्यचोतस्तिङइतिसंहितायांदीर्घः । सुश्रवस्तमः श्रवःशब्दोसुनन्तः बहुव्रीहौ आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वं तदन्तादतिशायनेतमप् तस्यपित्त्वादनुदात्तत्वे बहुव्रीहिस्वरः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेनवमोवर्गः ॥ ९ ॥

युध्मस्यतइतिपञ्चर्चमष्टमंसूक्तं वैश्वामित्रमैन्द्रं युध्मस्येत्यनुक्रमणिका दशरात्रेचतुर्थेहनिनिष्केवल्येयुध्मस्यतइतिसूक्तंनिविद्धानं सूत्रितञ्च—कुहश्रुतइन्द्रोयुध्मस्यतइतिनिष्केवल्यमिति । ऋषभनाम्येकाहेपिनिष्केवल्यइदंसूक्तंनिविद्धानं सूत्रितञ्च—युध्मस्यतइतिमध्यंदिनइति ।

तत्रप्रथमा—

यु॒ध्मस्य॑तेवृष॒भस्य॑स्व॒राज॑उ॒ग्रस्य॒यून॒ःस्थवि॑रस्य॒घृष्वे॑ः ।
अजू॑र्य॑तोव॒ज्रिणो॑वी॒र्या॒३॒॑णीन्द्र॑श्रु॒तस्य॑मह॒तोम॒हानि॑ ॥ १ ॥

यु॒ध्मस्य॑ । ते॒ । वृ॒ष॒भस्य॑ । स्व॒ऽराज॑ः । उ॒ग्रस्य॑ ।
यून॑ः । स्थवि॑रस्य । घृष्वे॑ः । अजू॑र्यतः । व॒ज्रिण॑ः ।
वी॒र्या॑णि । इन्द्र॑ । श्रु॒तस्य॑ । म॒ह॒तः । म॒हानि॑ ॥ १ ॥

हेइन्द्र युध्मस्ययोधनशीलस्यवृषभस्याभिमतफलसेचकस्यस्वराजःधनाधिपतेः उग्रस्य समर्थस्ययूनोनित्यतरुणस्य स्थविरस्यचिरन्तनस्य घृष्वेः शत्रूणांसंघर्षकस्य अजूर्यतःजरारहितस्य वज्रिणःश्रुतस्यत्रिषुलोकेषुप्रसिद्धस्य अतएव महतस्तेतववीर्याणिमहानिमहान्तिखलु ॥ युध्मस्य युधसंप्रहारे इषियुधीन्धिदसिइत्यादिनामक्प्रत्ययः । यूनः यौतेःकनिन्युवृषीत्यादिनाकनिन् श्वयुवमघोनामतद्धितेइतिसंप्रसारणं नित्स्वरः । स्थविरस्य अजिरशिशिरशिथिलेत्यादिनाकिरन्प्रत्ययान्तोनिपातितः । घृष्वेः घृषुसंघर्षे कुष्विच्छवीत्यादिनाक्विन्प्रत्ययान्तोनिपात्यते नित्त्वादाद्युदात्तः ॥ १ ॥

अथद्वितीया—

म॒हाँअ॑सिमहिष॒वृष्ण्ये॑भिर्धन॒स्पृदु॑ग्र॒सह॑मानोअ॒न्यान् ।
एको॒विश्व॑स्य॒भुव॑नस्य॒राजा॒सयो॒धया॑चक्ष॒यया॑च॒जना॑न् ॥ २ ॥

म॒हान् । अ॒सि॒ । म॒हि॒ष॒ । वृष्ण्ये॑भिः । ध॒न॒ऽस्पृत् । उ॒ग्र॒ ।
सह॑मानः । अ॒न्यान् । एक॑ः । विश्व॑स्य । भुव॑नस्य । राजा॑ ।
सः । यो॒धय॑ । च॒ । क्ष॒यय॑ । च॒ । जना॑न् ॥ २ ॥

हेमहिष महनीय उग्र इन्द्र त्वं महानसि धनस्पृत् धनानि दानभोगत्यागैःपारंनयंस्त्वंवृष्ण्येभिर्वीर्यैरन्यान्शत्रून्सहमानोऽभिभवन्वर्तसे तथा विश्वस्यसर्वस्य भुवनस्य एकःअसहायो-

राजासत्वंयोधयच सपत्नान्प्रहर जनान्क्षययच निवासय बाधकान्हत्वासाधुजनान्स्वस्थानेस्थापयेत्यभिप्रायः ॥ महिष महपूजायां अविमह्योष्टिषजितिटिषच्प्रत्ययः आमन्त्रितत्वान्निघातः । वृष्ण्येभिः वृष्णिभवानि भवेछन्दसीतियत् यतोनावइत्याद्युदात्तः । योधय युधसंप्रहारेइत्यस्यण्यन्तस्यलोटिरूपं चादिषुचेतिनिघातः णित्स्वरः । क्षयय क्षिनिवासगत्योरित्यस्यण्यन्तस्य लोटिरूपं अत्रापिपूर्ववदनिघातः ॥ २ ॥

अथतृतीया—

प्रमात्रा॑भीरिरिचे॒रोच॑मान॒ःप्रदे॒वेभि॑र्वि॒श्वतो॒अप्र॑तीतः ।
प्रम॒ज्मना॑दि॒वइन्द्र॑ःपृथि॒व्याःप्रोरोर्म॒होअ॒न्तरि॑क्षादृजी॒षी ।। ३ ॥

प्र । मात्रा॑भिः । रि॒रि॒चे॒ । रोच॑मानः । प्र । दे॒वेभि॑ः । वि॒श्वत॑ः ।
अप्र॑तिऽइतः । प्र । म॒ज्मना॑ । दि॒वः । इन्द्र॑ः । पृ॒थि॒व्याः ।
प्र । उ॒रोः । म॒हः । अ॒न्तरि॑क्षात् । ऋ॒जी॒षी ॥ ३ ॥

रोचमानोदीप्यमानःविश्वतःसर्वैरप्रतीतः एतावदस्यसामर्थ्यमित्यपरिच्छिद्यमानः ऋजीषीसोमवानिन्द्रः मात्राभिः मीयन्तेपरिच्छिद्यन्तइतिमात्राःशिलोच्चयाः तेभ्योपिप्ररिरिचे प्रकर्षेणमहत्तयातिरिक्तोभूत् तथा देवेभिर्देवेभ्योपि मज्मना मज्जयतिशत्रून्दुःखसागरेइतिमज्म बलं तेन बलेनप्ररिरिचे तथा दिवःपृथिव्याः द्यावापृथिवीभ्यांचप्ररिरिचे तथा उरोर्विस्तीर्णात्महोमहतोंतरिक्षादपिप्ररिरिचे ॥ मात्राभिः माङ्मानेशब्देचेत्यस्मात् हुयामाश्रुभसिभ्यस्त्रन्नितित्रन्प्रत्ययः नित्त्वादाद्युदात्तः ढ्रलोपेपूर्वस्यदीर्घोणइतिसंहितायांदीर्घः । रोचमानः रुचदीप्तावित्यस्मात्शानचिरूपं तस्यलसार्वधातुकस्वरेधातुस्वरः । अप्रतीतः इण्गतौ कर्मणिक्तः प्रादिसमासः नञासमासेतस्यस्वरः । मज्मना टुमस्जोशुद्धौ औणादिकोमनिन्प्रत्ययः झलांजश्झशीतिजश्त्वं चित्त्वादन्तोदात्तः । पृथिव्याः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वं॥३॥

अथचतुर्थी—

उ॒रुंग॑भी॒रंज॒नुषा॒भ्यु॑१॒ग्रंवि॒श्वव्य॑चसमव॒तंम॑ती॒नाम् ।
इन्द्रं॒सोमा॑सःप्र॒दिवि॑सु॒तासः॑समु॒द्रंनस्र॒वत॒आवि॑शन्ति ।। ४ ॥

उरुम् । गभीरम् । जनुषा॑ । अभि । उग्रम् । विश्वऽव्यंचसम् ।
अवतम् । मतीनाम् । इन्द्रम् । सोमा॑सः । प्रऽदिवि॑ । सुतासः॑ ।
समुद्रम् । न । स्रवतः॑ । आ । विशन्ति ॥ ४ ॥

उरुंमहान्तं अतएव गभीरंमहावकाशं जनुषा जन्मना स्वभावतएवोग्रं शत्रूणांभयंकरं गभीरत्वमेवोच्यते विश्वव्यचसं विश्वव्याप्तमतीनांस्तुतीनांस्तोतॄणांवा अवतंरक्षकं तादृशमिन्द्रं प्रदिवि पूर्वेष्वहःसु सुतासोग्रावभिरभिषुताःसोमासः सोमाः अभ्याभिमुख्येनाविशन्ति तत्रदृष्टान्तः—समुद्रंन यथास्रवतःस्रवन्त्योनद्यःसमुद्रमाविशन्तितद्वत् ॥ जनुषा जनीप्रादुर्भावे इत्यस्माज्जनेरुसिरित्युसिप्रत्ययः । विश्वव्यचसं व्यचव्याजीकरणेइत्यस्मादसुन् व्यचेःकुटादित्वमनसीतिवक्तव्यमित्यत्रानसीतिपर्युदासात्ङित्त्वाभावः विश्वव्यचाइतीन्द्रस्यनाम बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदस्यान्तोदात्तत्वम् ॥ अवतं अवरक्षणादिषु औणादिकोतच्प्रत्ययः चित्त्वादन्तोदात्तः ॥ ४ ॥

अथपञ्चमी—

यंसोमंमिन्द्रपृथिवीद्यावागर्भंनमाताबिभृतस्त्वाया ।
तंतेहिन्वन्तितमुतेमृजन्त्यध्वर्यवोवृषभपातवाउ ॥ ५ ॥ १० ॥

यम् । सोम॑म् । इन्द्र । पृथिवी । द्यावा॑ । गर्भ॑म् । न । माता ।
बिभृतः । त्वाऽया । तम् । ते । हिन्वन्ति । तम् । ऊँ इति॑ । ते ।
मृजन्ति । अध्वर्यवः॑ । वृषभ । पातवै॑ । ऊँ इति॑ ॥ ५ ॥ १० ॥

हेइन्द्र पृथिवी द्यावा द्यावापृथिव्यौ त्वया त्वत्कामतयायंसोमंबिभृतः अन्तर्धारयतः अत्रदृष्टान्तः—गर्भंन यथा मातागर्भंबिभर्तितद्वत् हेवृषभ कामानांवर्षक हेइन्द्र अध्वर्यवः अध्वरंयजमानायइच्छन्तः ऋत्विजः तेत्वदर्थं तं सोमं हिन्वन्ति प्रेरयन्ति किञ्च ते तव पातवै पानायतंसोमंमृजन्तिशोधयन्ति उ प्रसिद्धौ ॥ पृथिवीद्यावा दिवोद्यावेतिद्यावादेशः आद्युदात्तः नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमन्थिष्वित्यत्रपर्युदासात् देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरः कृतसमासस्यविपर्यासश्छान्दसः । बिभृतः डुभृञ्धारणपोषणयोरित्यस्माल्लटि भृञामिदित्यभ्यासस्येत्वं यद्वृत्तयोगादनिघातः अजादिप्रत्ययपरत्वाभावादत्राभ्यस्तानामादिरितिस्वरोनभवति प्रत्ययस्वरः । त्वाया त्वामिच्छतीत्यर्थेसुपःक्यच् पूर्वपददकारस्याकारश्छान्दसः अप-

त्ययादितिभावेऽप्रत्ययः सुपांसुलुगितितृतीयायाःसवर्णदीर्घः एकादेशस्वरः । अध्वर्यवः अध्वरमिच्छन्तः सुपआत्मनःक्यच् कव्यध्वरपृतनस्यर्चिलोपइत्याकारलोपः क्याच्छन्दसीत्युप्रत्ययः प्रत्ययस्वरः । पातवै पापानेइत्यस्मात्तुमर्थे तवैप्रत्ययः अन्तश्चतवैयुगपदितिधात्वंतस्यप्रत्ययस्य चोदात्तत्वम् उञइतिप्रगृह्यसंज्ञा ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेदशमोवर्गः ॥ १० ॥

मरुत्वानितिपञ्चर्चंनवमंसूक्तं वैश्वामित्रंत्रैष्टुभमैन्द्रं मरुत्वानित्यनुक्रमणिका । दशरात्रेचतुर्थेहनिमरुत्वतीयशस्त्रेएतत्सूक्तंनिविद्धानीयं सूत्रितश्च—श्रुधीहवमिन्द्रमरुत्वाँइन्द्रेतिमरुत्वतीयमिति । ऋषभनाम्न्येकाहेपिमरुत्वतीयशस्त्रेएतन्निविद्धानं । सूत्रितश्च—मरुत्वाँइन्द्रयुध्मस्यतइतिमध्यंदिनइति ।

तत्रप्रथमा—

म॒रुत्वाँ॑इन्द्रवृष॒भोरणा॑य॒पिबा॒सोम॑मनु॒ष्व॒धंमदा॑य ।
आसि॑ञ्चस्वज॒ठरे॒मध्वं॑ऊ॒र्मिं॑त्वंराजा॑सिप्र॒दिवः॑सु॒ताना॑म् ॥ १ ॥

म॒रुत्वा॑न् । इ॒न्द्र॒ । वृ॒ष॒भः । रणा॑य । पिब॑ । सोम॑म् । अ॒नु॒ऽस्व॒धम् ।
मदा॑य । आ । सि॒ञ्च॒स्व॒ । ज॒ठरे॑ । मध्वः॑ । ऊ॒र्मिम् । त्वम् ।
राजा॑ । अ॒सि॒ । प्र॒ऽदिवः॑ । सु॒ताना॑म् ॥ १ ॥

हेइन्द्र यो वृषभः अपांवर्षिता मरुत्वान् मरुतोदेवविशस्तद्वान् सत्वं अनुष्वधं स्वधया सवनीयपुरोडाशादिरूपेणान्नेनानुगतंसोमंरणायरमणीयसंग्रामार्थं मदाय हर्षायच तंसोमंपिब किंच मध्वः मदकरस्यसोमस्य ऊर्मिंसंघातंबहुरसंजठरे जग्धमन्नमस्मिंस्तिष्ठतीतिजठरमुदरं तस्मिन्नुदरे आसिञ्चस्व सर्वतःक्षालय यतस्त्वंप्रदिवः पूर्वेष्वहःसुसुतानामभिषुतानांसोमानां राजासि ईशितासि नकेवलमधुनातनानामितिभावः उक्तमर्थंयास्कोब्रवीति—मरुत्वानिन्द्रमरुद्भिस्तद्वान्वृषभोवर्षितापांरणायरमणीयायसंग्रामायपिबसोममनुष्वधमन्वन्नंमदायमदनीयायजैत्रायासिञ्चस्वजठरेमधुनऊर्मिंमधुसोममित्यौपमिकंमाद्यतेरिदमपीतरन्मध्वेतस्मादेवत्वंराजासिपूर्वेष्वप्यहःसुसुतानामिति ॥ अनुष्वधं स्वधामनुगम्यवर्तमानं अत्यादयःक्रान्तार्थेद्वितीययेतिस-

---

१ नि० ४.।८.।

मासः संहितायांपूर्वपदादितिषत्वं निरुदकादित्वादन्तोदात्तत्वम् । ऊर्मिम् अर्तेरूच्चेतिमिप्रत्ययः धातोरूइत्यादेशोरपरः प्रत्ययस्वरः ॥ १ ॥

सजोषाइन्द्रेतिमरुत्वतीयग्रहस्ययाज्या सूत्रितश्च—सजोषाइन्द्रसगणोमरुद्भिरितिभक्षयित्वैतत्पात्रमिति ।

अथद्वितीया—

स॒जोषा॑इन्द्र॒सग॑णोम॒रुद्भिः॒सोमं॑पिबवृत्र॒हाशू॑रवि॒द्वान् ।
ज॒हिशत्रूँ॒रप॒मृधो॑नुद॒स्वाथाभ॑यंकृणुहिवि॒श्वतो॑नः ॥ २ ॥

स॒ऽजोषाः॑ । इ॒न्द्र॒ । सऽग॑णः । म॒रुत्ऽभिः॑ । सोम॑म् । पि॒ब॒ ।
वृ॒त्र॒ऽहा । शू॒र॒ । वि॒द्वान् । ज॒हि । शत्रू॑न् । अप॑ । मृधः॑ ।
नु॒द॒स्व॒ । अथ॑ । अभ॑यम् । कृ॒णु॒हि॒ । वि॒श्वतः॑ । न॒ः ॥ २ ॥

हेशूर बलवन् हेइन्द्र सजोषाः संगतोदेवैर्मरुद्भिःसगणोमरुद्भिरेववृत्रहा वृत्रस्यहंता विद्वान् कर्मविषयाभिज्ञस्त्वंसोमंपिब ततोनःशत्रून्जहि मृधः हिंसकान्शत्रूनपनुदस्व यद्वा मृधः हिंस्यंतेत्रप्राणिनइतिमृधःसंग्रामाः तत्रवर्तमानान्शत्रूनपनुदस्व अथानन्तरंनोऽस्माकंविश्वतःसर्वतः अभयंकृणुहि कुरु सर्वतोभयरहितानस्मान्कुर्वित्यर्थः ॥ वृत्रहा ब्रह्मभ्रूणवृत्रेषुक्विप् । अभयं ञिभीभयेइत्यस्मादेरच् नञासमासेतस्यस्वरः । विश्वतः पञ्चम्यास्तसिल् लित्स्वरः ॥ २ ॥

अथतृतीया—

उ॒तक्र॒तुभि॑र्क्रतुपाःपाहि॒सोम॒मिन्द्र॑दे॒वेभिः॒सखि॑भिःसु॒तंनः॑ ।
याँआभ॑जोम॒रुतो॒येत्वान्वह॑न्वृ॒त्रमद॑धुस्तुभ्य॒मोजः॑ ॥ ३ ॥

उ॒त । क्र॒तुऽभिः॑ । क्र॒तु॒ऽपाः॒ । पा॒हि॒ । सोम॑म् । इन्द्र॑ । दे॒वेभिः॑ ।
सखि॑ऽभिः । सु॒तम् । न॒ः । यान् । आ । अभ॑जः । म॒रुतः॑ । ये । त्वा॒ ।
अनु॑ । अह॑न् । वृ॒त्रम् । अद॑धुः । तुभ्य॑म् । ओजः॑ ॥ ३ ॥

Funding by IKS-MoE

उतापिच हेऋतुपाः कालनिर्वाहकतयाऋतूनांपातः ऋतुषुसोमंपिबतीतिवाऋतुपाः यद्वा ऋतुभिर्मरुद्भिःसहसोमंपिबतीतिऋतुपाः तादृश हेइन्द्र सखिभिः समानख्यानैर्ऋतुभिर्मरुद्भिः देवेभिर्देवैःसहितस्त्वंनःसंबन्धिनंसुतमभिषुतंसोमंपाहि पिब किंच यान्मरुतः आभजः युद्धसहायार्थमसेवथाः येचमरुतः त्वा त्वां युद्धे स्वामिनमन्वभजन्त ततस्त्वंवृत्रमहन् हतवानसि तेमरुतस्तुभ्यं त्वदर्थमोजोयुद्धेशत्रुहननादिरूपंपराक्रममदधुः अकुर्वन् ॥ अभजः भजसेवायामित्यस्यलङिरूपं यद्वृत्तयोगादनिघातः । अहन् हनहिंसागत्योरित्यस्यलङि सिपोहल्ङ्यादिलोपः पादादित्वादनिघातः । अदधुः दधातेर्लङि झेःसिजभ्यस्तेतिजुस् वाक्यभेदादनिघातः ॥ ३ ॥

मरुत्वतीयशस्त्रेयाज्यायेत्वाहिहत्यइत्येषा सूत्रितञ्च—येत्वाहिहत्येमघवन्नवर्धन्नितियाज्येति ।

अथचतुर्थी—

येत्वा॑हि॒हत्ये॑मघव॒न्नव॑र्ध॒न्येशा॑म्ब॒रेह॑रिवो॒येगवि॑ष्टौ ।
येत्वा॑नू॒नम॑नु॒मद॑न्ति॒विप्रा॒ःपिबे॑न्द्र॒सोमं॒सग॑णोम॒रुद्भि॑ः ॥ ४ ॥

ये । त्वा॒ । अ॒हि॒ऽहत्ये॑ । म॒घ॒ऽव॒न् । अव॑र्धन् । ये । शा॒म्ब॒रे ।
ह॒रि॒ऽव॒ः । ये । गोऽइ॑ष्टौ । ये । त्वा॒ । नू॒नम् । अ॒नु॒ऽमद॑न्ति । विप्रा॑ः ।
पिब॑ । इ॒न्द्र॒ । सोम॑म् । स॒ऽग॑णः । म॒रुत्ऽभि॑ः ॥ ४ ॥

हेमघवन्धनवन्निन्द्र येमरुतः अहिहत्येवृत्रहननरूपेकर्मणि त्वा त्वामवर्धन् प्रहरभगवोजहिवीरयस्वेतिबलदानेनावीवृधन् हेहरिवोश्ववन्निन्द्र येचशांबरे शंबरवधसंबन्धिनि युद्धे त्वामवीवृधन् इन्द्रः शंबरमवधीदित्यस्मिन्नर्थेमन्त्रवर्णः—यःशंबरंपर्वतेषुक्षियन्तंचत्वारिंश्यांशरद्यन्वविन्दत्ओजायमानंयोअहिंजघानेति । तथा येमरुतः गविष्टौ पणिनामकैरसुरैः सहगवार्थेयुद्धेच त्वामवीवृधन् विप्रामेधाविनोयेचमरुतःनूनमिदानींत्वामनुमदन्तिमादयन्ति तादृशैस्तैर्मरुद्भिः सगणःसन् इमंसोमंपिब ॥ अहिहत्ये हन्तेर्भावे हनस्तचेतिक्यप् कृदुत्तरपदस्वरः । अवर्धन् वृधुवृद्धौ इत्यस्यण्यन्तस्य लङिरूपं छन्दस्युभयथेतिझेरार्धधातुकत्वाण्णेर्लोपः यद्वृत्तयोगादनिघातः । शांबरे शंबरस्येदमित्यर्थे तस्येदमित्यण्प्रत्ययः । गविष्टौ इषुइच्छायां भावेक्तिन् बहुव्रीहौपूर्वपदस्वरः । अनुमदन्ति मदिस्तुत्यादिष्वित्यस्यलटिव्य-

---

[१] ऋ० सं० २. ६. ९. ।

Funding by IKS-MoE

त्ययेनपरस्मैपदं आगमानुशासनस्यानित्यत्वान्नुमभावः झलेर्लसार्वधातुकस्वरेकृतेधातुस्वरः तिङ्ङिचोदात्तवतीतिगतेर्निघातः ॥ ४ ॥

अथपञ्चमी–

म॒रुत्व॑न्तंवृष॒भंवा॑वृधा॒नमक॑वारिंदि॒व्यंशा॒समिन्द्र॑म् ।
वि॒श्वा॒साह॒मव॑से॒नूत॑नायो॒ग्रंस॑हो॒दामि॒हतंहु॑वेम ॥ ५ ॥ ११ ॥

म॒रुत्व॑न्तम् । वृ॒ष॒भम् । वा॒वृ॒धा॒नम् । अक॑वऽअरिम् । दि॒व्यम् ।
शा॒सम् । इन्द्र॑म् । वि॒श्व॒ऽसह॑म् । अव॑से । नूत॑नाय । उ॒ग्रम् ।
स॒हः॒ऽदाम् । इ॒ह । तम् । हु॒वे॒म ॥ ५ ॥ ११ ॥

हेइन्द्र मरुत्वंतं मरुद्भिस्तद्वन्तं वृषभं मेघभेदनद्वारापांवर्षकं ववृधानं वृत्रहननादिकर्मसूत्साहेनवर्धमानं अकवारिं प्रभूतशब्दं यद्वा अकुत्सितारं तथाचमन्त्रः—स्वरिरमत्रोववक्षेरणायेति । दिव्यं दिवि स्वर्गलोकेवर्तमानं शासंहितोपदेशाहितपरिहाराभ्यांशासितारं विश्वसाहं विश्वस्यप्रतिपक्षस्यसर्वस्याभिभवितारं उग्रं शत्रुषूद्गूर्णं सहोदां युद्धसहकारिणांमरुतां बलप्रदं तं तादृशसामर्थ्योपेतमिन्द्रं नूतनाय नवतरायावसेरक्षणाय इहकर्मणिहुवेम त्वामाह्वयेम ॥ नूतनाय नवशब्दस्यनूइत्यादेशः त्नप्तनप्खाश्चप्रत्ययावक्तव्याइतितनप्प्रत्ययः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेएकादशोवर्गः ॥ ११ ॥

सद्योहेतिपञ्चर्चंदशमंसूक्तं वैश्वामित्रंत्रैष्टुभमैन्द्रं सद्योहेत्यनुक्रमणिका अग्निष्टोमेमाध्यंदिनसवनेमैत्रावरुणशस्त्रेसद्योहजातइत्येतत्सूक्तं सूत्रितञ्च—सद्योहजातएवात्वामिति । चातुर्विंशिकेप्यहनिमैत्रावरुणशस्त्रेअहरहःशस्यसंज्ञमेतत्सूक्तं सूत्रितञ्च—सद्योहजातइत्यहरहःशस्यंमैत्रावरुणइति । अहर्गणेद्वितीयादिष्वहःसुमाध्यंदिनसवनेस्मिन्शस्त्रेएतत्सूक्तं अहरहःशस्यानीति होत्रकाद्वितीयादिष्वेवेतिसूत्रितं । साद्यस्क्रेएकाहेमरुत्वतीयशस्त्रेसद्योहजातइत्याद्यासूक्तमुखीया सूत्रितञ्च—सद्योहजातोवृषभःकनीनस्त्वंसद्योअपिबोजातइन्द्रेति ।

---

१ ऋ० सं० १. ४. २७ ।

सूक्तेप्रथमा—

स॒द्योह॑जा॒तोवृ॑ष॒भःक॒नीन॒ःप्रभ॑र्तुमाव॒दन्ध॑सःसु॒तस्य॑ ।
सा॒धोःपि॑बप्रतिका॒मंयथा॑ते॒रसा॑शिरःप्रथ॒मंसो॒म्यस्य॑ ॥ १ ॥

स॒द्यः । ह॒ । जा॒तः । वृ॒ष॒भः । क॒नीनः॑ । प्र॒ऽभ॑र्तुम् । आ॒व॒त् ।
अन्ध॑सः । सु॒तस्य॑ । सा॒धोः । पि॒ब । प्र॒ति॒ऽका॒मम् ।
यथा॑ । ते॒ । रस॑ऽआशिरः । प्र॒थ॒मम् । सो॒म्यस्य॑ ॥ १ ॥

वृषभोवृष्टिद्वारापांवर्षितासद्यस्तदानीमेवजातउत्पन्नः कनीनःकमनीयइन्द्रःसुतस्याभिषुतस्यान्धसः हविर्लक्षणस्यान्नस्यसोमस्यप्रभर्तुं प्रकर्षेणभर्तारंसंग्रहीतारं यजमानमावत् रक्षतु हप्रसिद्धौ किञ्च तादृशस्त्वं प्रतिकामं कामेकामेसोमपानेच्छायांसत्यां ते तव यथा कामस्यपूर्तिर्भवति तथा साधोः रसात्मनासंसिद्धं रसाशिरःगोपयोमिश्रणोपेतंसोमस्यसोममयंरसंप्रथमं सर्वेभ्योदेवेभ्यःपुरस्तात्पिब ॥ प्रतिकामं कामंकामंप्रति वीप्सायामव्ययीभावसमासस्वरः । यथा अपादान्तत्वादेवलित्स्वरः । रसाशिरः आङ्पूर्वात्श्रीणातेःक्विपि अपस्पृधेथामित्यादिनाशिरइत्यादेशः बहुव्रीहौपूर्वपदप्रकृतिस्वरः । सोम्यस्य सोमशब्दान्मयडर्थे मयेचेतियप्रत्ययः ॥ १ ॥

अथद्वितीया—

यज्जाय॑था॒स्तदह॑रस्य॒कामे॒ंशोःपी॒यूष॑मपिबोगिरि॒ष्ठाम् ।
तंते॑मा॒तापरि॒योषा॒जनि॑त्रीम॒हःपि॒तुर्दम॒आसि॑ञ्च॒दग्रे॑ ॥ २ ॥

यत् । जाय॑थाः । तत् । अहः॑ । अ॒स्य । कामे॑ । अं॒शोः । पी॒यूष॑म् ।
अ॒पि॒बः । गि॒रि॒ऽस्थाम् । तम् । ते॒ । मा॒ता । परि॑ । योषा॑ ।
जनि॑त्री । म॒हः । पि॒तुः । दमे॑ । आ । अ॒सि॒ञ्च॒त् । अग्रे॑ ॥ २ ॥

हेइन्द्र त्वं यद्यस्मिन्नहनिजायथाः अजायथाः तदहस्तस्मिन्नेवाहनि अस्यसोमस्य कामे पिपासायांसत्यां गिरिष्ठां गिरिस्थां उच्चस्थानेवर्तमाने अंशोःसोमलताखण्डविशिष्टस्य ऋजोषस्य पीयूषं अभिनवंरसमपिबः पीतवानसि उत्पत्तिक्षणएवसोमपानेकारणंदर्शयति—ते तव जनित्री माता योषा युवतिरदितिःमहोमहतः पितुर्जनकस्यकश्यपस्यदमे सूतिकागृहे अग्रे

स्तन्यदानात्प्राक् तंतादृशंसोमंपर्यांसिंचत् तवास्येपरितोऽक्षारयत् ॥ जायथाः जनीप्रादुर्भावेइत्यस्यलङि बहुलंछन्दसीत्यडभावः यद्वृत्तयोगादनिघातः ॥ जनित्री जनितामन्त्रेइतिनिपातनाण्णेर्लोपः ॥ २ ॥

अथतृतीया–

उ॒प॒स्थाय॑मा॒तर॒मन्न॑मैट्टति॒ग्मम॑पश्यद॒भिसोम॒मूध॑ः ।
प्र॒या॒वय॑न्नचर॒द्गृत्सो॑अ॒न्यान्म॒हानि॑चक्रेपुरु॒धप्र॑तीकः ॥ ३ ॥

उ॒प॒ऽस्थाय॑ । मा॒तर॑म् । अन्न॑म् । ऐ॒ट्ट॒ । ति॒ग्मम् । अ॒प॒श्य॒त् ।
अ॒भि । सोम॑म् । ऊध॑ः । प्र॒ऽय॒वय॑न् । अ॒च॒र॒त् । गृत्स॑ः ।
अ॒न्यान् । म॒हानि॑ । च॒क्रे॒ । पु॒रु॒धऽप्र॑तीकः ॥ ३ ॥

सइन्द्रः मातरमुपस्थायप्रार्थयित्वा अन्नमैट्ट तामन्नमयाचत ईळिरध्येषणाकर्मेतिर्यास्कः । ततस्तस्याऊधः ऊधसिक्षीररूपेणस्थितंतिग्मंदीप्तंसोममभ्यपश्यत् सर्वतोदर्शत् गृत्सः गृध्यते अभिकांक्ष्यतेसर्वैःदेवैःशत्रुहननार्थमितिगृत्सइन्द्रः अन्यान्सपत्नान्प्रयवयन् स्वस्वस्थानात्प्रकर्षेणोच्चालयन्नचरत् सर्वत्रचरति किंच पुरुधप्रतीकः तेजोयोगाद्बहुधाविक्षिप्ताङ्गःसन् महानि महांति वृत्रहननादीनिकर्माणिचक्रे ॥ उपस्थाय तिष्ठतेर्ल्यपिधुमास्थेतीत्वेप्राप्ते नल्यपीतिप्रतिषेधः लित्स्वरः । ऐट्ट ईळियांञ्चार्थः तस्माल्लङिरूपं आडजादीनामित्याडागमः ष्टुत्वं निघातः । तिग्मं तिजनिशाने अस्माद्युजिरुजितिजांकुश्चेतिमक्प्रत्ययः कवर्गादेशश्च । प्रयवयन् युमिश्रणामिश्रणयोरित्यस्यण्यन्तस्यशतरिरूपं लित्स्वरः। गृत्सःगृधुअभिकांक्षायां गृधिपण्योर्दकौचेतिसप्रत्ययः दकारश्चान्तादेशः वृषादित्वादाद्युदात्तः । पुरुधप्रतीकः पुरुशब्दइहसंख्यावाची संख्यायाविधार्थेधेतिधाप्रत्ययः ह्रस्वश्छान्दसः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ३ ॥

अथचतुर्थी–

उ॒ग्रस्तु॑रा॒षाळ॒भिभू॑त्योजायथाव॒शंत॒न्व॑ञ्चक्रए॒षः ।
त्वष्टा॑र॒मिन्द्रो॒ज॒नुषा॑भि॒भूया॒मुष्या॒सोम॑मपिबच्च॒मूषु॑ ॥ ४ ॥

---

१ नि० ३. १९. ।

उ॒ग्रः । तु॒रा॒षाट् । अ॒भिभू॑तिऽओजाः । य॒था॒ऽव॒शम् ।
त॒न्व॑म् । च॒क्रे॒ । ए॒षः । त्वष्टा॑रम् । इन्द्रः॑ । ज॒नुषा॑ । अ॒भि॒ऽभूय॑ ।
आ॒ऽमुष्य॑ । सोम॑म् । अ॒पि॒ब॒त् । च॒मूषु॑ ॥ ४ ॥

यएषइन्द्रः उग्रः शत्रूणांभयंकरः तुराषाट् त्वरयाशत्रूणामभिभविता अतएवाभिभूत्योजाः शत्रूणामभिभवनपराक्रमोपेतःसन् तन्वमात्मीयंशरीरंयथावशं यथाकामं नानाविधरूपोपेतंचक्रे । तथाचमन्त्रवर्णः–रूपंरूपंमघवाबोभवीती[1]ति। सइन्द्रोजनुषा जन्मनासामर्थ्येनवात्वष्टारं त्वष्टृनामकमसुरमभिभूय चमूषु चमसेषुस्थितमामुष्यचोरयित्वासोममपिबत् त्वष्टाहतपुत्रोवीन्द्रमित्यादिमासहासोममपिबदितितैत्तिरी[2]यकम् ॥ तुराषाट् ञित्वरासंभ्रमे क्विप् ज्वरत्वरेत्यादिनाऊठ् सहेश्छन्दसिण्विः कर्तृकरणेकृताबहुलमितिसमासः तत्पुरुषेकृतिबहुलमितितृतीयायाअलुक् सहेःसाडःसइतिषत्वं कृदुत्तरपदस्वरः । यथावशं वशंकाममनतिक्रम्येत्यव्ययीभावसमासः समासस्वरः । आमुष्य मुषस्तेये ल्यप् । चमूषु चमुअदने कृषिचमितनिधनिसर्जिखर्जिभ्यऊइत्यूप्रत्ययः प्रत्ययस्वरः ॥ ४ ॥

अथपञ्चमी–

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तँ॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥५॥ १२॥

शु॒नम् । हु॒वे॒म॒ । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ । नृऽत॑मम् ।
वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ ।
घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ५ ॥ १२ ॥

सिद्धैषा ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेद्वादशोवर्गः ॥ १२ ॥

शंसामहामितिपञ्चर्चंएकादशंसूक्तं वैश्वामित्रंत्रैष्टुभमैन्द्रं शंसामहामित्यनुक्रमणिका । समूळ्हेदशरात्रेऽष्टमेऽहनिमरुत्वतीयशस्त्रेएतत्सूक्तं सूत्रितञ्च–शंसामहांमहश्चित्त्वमिन्द्रेति ।

---

[1] ऋ० सं० ३. ३. २०. । [2] तै०सं० २. ४. १२. ।

Funding by IKS-MoE

तत्रप्रथमा—

शंसा॑म॒हामिन्द्रं॒यस्मि॒न्विश्वा॒आकृ॒ष्टयः॑सोम॒पाःकाम॒मव्य॑न् ।
यंसु॒क्रतुं॑धि॒षणे॑विभ्वत॒ष्टं॑घ॒नंवृ॒त्राणां॑ज॒नय॑न्तदे॒वाः ॥ १ ॥

शंस॑ । म॒हाम् । इन्द्र॑म् । यस्मि॑न् । विश्वाः॑ । आ । कृ॒ष्टयः॑ ।
सो॒म॒ऽपाः । काम॑म् । अव्य॑न् । यम् । सु॒ऽक्रतु॑म् । धि॒षणे॒ इति॑ ।
वि॒भ्व॒ऽत॒ष्टम् । घ॒नम् । वृ॒त्राणा॑म् । ज॒नय॑न्त । दे॒वाः ॥ १ ॥

हेहोतः महां महान्तमिन्द्रंशंस शस्त्रैःस्तुहि यस्मिन्निन्द्रेरक्षितरिसति विश्वाःकृष्टयः सर्वेमनुष्याः सोमपाः यज्ञमनुष्ठायसोमपाःसन्तः कामं काम्यतइतिकामःस्वर्गादिः तमाव्यन् सर्वतःप्राप्नुवन्ति धिषणे देवमनुष्यादीनांधारयित्र्यौ यद्वा प्रगल्भेसमर्थे स्वाश्रितान्रक्षितुमिति धिषणेद्यावापृथिव्यौ देवाश्च सुक्रतुं क्रतुःकर्म जगतपालनादिशोभनःक्रतुर्यस्यासौसुक्रतुः तादृशं विभ्वतष्टं विभुनाब्रह्मणाजगदाधिपत्येस्थापितंमहान्तंवृत्राणांपापरूपाणांघनंहन्तारंयमिन्द्रंजनयन्त अजनयन् ॥ शंस शंसुस्तुतावित्यस्यलोटिरूपं पादादित्वादनिघातः द्व्यचोतस्तिङइतिसंहितायांदीर्घः । अव्यन् वीकान्तिगत्यादिषु लङिरूपं यद्वृत्तयोगादनिघातः अट्स्वरः । सुक्रतुं क्रत्वादयश्चेत्युत्तरपदाद्युदात्तः । धिषणे ञिधृषाप्रागल्भ्ये इत्यस्माद्धृषेर्धिषचसंज्ञायामितिक्युप्रत्ययः धिषइत्यादेशः प्रत्ययस्वरः । घनं हन्तेःपुंसिसंज्ञायांघःप्रत्ययः होहन्तेरितिकुत्वं प्रत्ययस्वरः । जनयन्त जनेर्ण्यन्तस्यलङिरूपं यद्वृत्तयोगादनिघातः ॥ १ ॥

अथद्वितीया—

यंनुनकि॒ःपृत॑नासुस्व॒राजं॑द्वि॒तातर॑ति॒नृत॑मंहरि॒ष्ठाम् ।
इ॒नत॑मः॒सत्व॑भि॒र्योह॑शू॒षैःपृ॑थु॒ज्रया॑अमिना॒दायु॒र्दस्योः॑ ॥ २ ॥

यम् । नु । नकिः॑ । पृत॑नासु । स्व॒ऽराज॑म् । द्वि॒ता । तर॑ति ।
नृऽत॑मम् । ह॒रि॒ऽस्थाम् । इ॒नऽत॑मः । सत्व॑ऽभिः । यः । ह॒ ।
शू॒षैः । पृ॒थु॒ऽज्रयाः॑ । अ॒मि॒ना॒त् । आयुः॑ । दस्योः॑ ॥ २ ॥

पृतनासु व्याप्रियन्तेऽत्रयोद्धारइतिपृतनाःसंग्रामाः तेषु स्वराजं स्वतेजसाराजमानं हरिष्ठांहरिस्थां हरियुक्तेरथेवर्तमानं नृतमं बलस्ययुद्धेनेतृतमं द्वितायुद्धमासाद्यसेनांद्विधाकृत्वावर्तमानं यमिन्द्रंनकिः नकश्चिदपितरति उत्तीर्यगच्छति नकोप्यभ्यस्तोत्यर्थः नुप्रसिद्धौ सइन्द्रः इनतमः अतिशयेनसेनास्वामी सत्वभिः परितःसीदद्भिर्मरुद्भिःसह यःयान्गच्छन् शूषैःशोषयन्तिपरबलानीतिशूषाणिबलानि तैः पृथुज्रयाः युद्धंप्रतितीव्रवेगःसन् दस्योःशत्रोरायुरन्नं प्राणंवामिनातिहिनस्ति हप्रसिद्धौ अत्रनिरुक्तम्—पृथुज्रयाःपृथुजवःपृथुज्रयाअमिनादायुर्दस्योःप्रामापयदायुर्दस्योरिति ॥ तरति तॄप्लवनतरणयोरित्यस्यलटिरूपं यद्वृत्तयोगादनिघातः शपःपित्त्वादनुदात्तत्वेधातुस्वरः । यः यामापणे औणादिकःकप्रत्ययः आतोलोपः प्रत्ययस्वरः ॥२॥

अथतृतीया—

स॒हावा॑पृ॒त्सु॒त॒रणि॒र्नार्वा॑व्यान॒शीरोद॑सीमे॒हना॑वान् ।
भगो॒नका॒रेह॒व्यो॑मती॒नां॑पि॒तेव॒चारुः॑सु॒हवो॑वयो॒धाः ॥ ३ ॥

स॒हऽवा॑ । पृ॒त्ऽसु । त॒रणिः॑ । न । अर्वा॑ । वि॒ऽआ॒न॒शिः ।
रोद॑सी॒ इति॑ । मे॒हना॑ऽवान् । भगः॑ । न । का॒रे । हव्यः॑ । म॒ती॒नाम् ।
पि॒ताऽइ॑व । चारुः॑ । सु॒ऽहवः॑ । व॒य॒ःऽधाः ॥ ३ ॥

यइन्द्रः सहावा बलवान् पृत्सुसङ्ग्रामेषु तरणिः शत्रूनुत्तीर्यवर्ततइतितरणिः तत्रदृष्टान्तः—अर्वान यथा अर्वाबलवानश्वःशत्रुबलंतरति तथा रोदसीद्यावापृथिव्यौव्यानशिः व्यापुवन् मेहनावान् मिह्यतेसिच्यतेदीयतेऽर्थिभ्यइतिमेहनंधनं तद्वान्भवति तादृशइन्द्रः कारे क्रियतइतिकारोयज्ञादिः तस्मिन्यज्ञे भगोन पूषादेवइव हव्योहवनीयः मतीनांस्तोतॄणांस्तुतीनांवा पितेवपालयिता चारुः कमनीयः सुहवः सुष्ठ्वाह्वानोपेतः वयोधाः अन्नस्यदाताभवति ॥ सहावा सहोस्यास्तीतिमत्वर्थेछन्दसीवनिपाविितिवनिप् अन्येषामपिदृश्यतइतिसंहितायां दीर्घः । पृत्सु पृतनाशब्दस्यसौपरतः मांस्पृत्स्नूनामुपसंख्यानमितिपृदादेशः सावेकाचइति विभक्तेरुदात्तत्वम् । व्यानशिः अशूव्याप्तावित्यस्माच्छन्दसिसदादित्वात्किप्रत्ययःतस्यलिड्वद्भावः अतआदेरित्यभ्यासस्यदीर्घेकृते अश्नोतेश्चेतिनुमागमः प्रादिसमासः । कारे करोतेःकर्म-

---

१ नि० ५. ९ ।

णिघञ् कर्षात्वतोघञोन्तउदात्तइत्यन्तोदात्तत्वं । हव्यः जुहोतेरचोयत् यतोनावइत्याद्युदात्तत्वम् । सुहवः ह्वयतेर्भावेनुपसर्गस्येत्यप्रत्ययः संप्रसारणं प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः आद्युदात्तंद्व्यच्छन्दसीतिबहुव्रीहावुत्तरपदाद्युदात्तत्वम् ॥ ३ ॥

अथचतुर्थी–

ध॒र्तादि॒वोरज॑सस्पृ॒ष्टऊ॒र्ध्वोरथो॒नवा॒युर्वसु॑भिर्नि॒युत्वा॑न् ।
क्ष॒पांव॒स्ताज॑नि॒तासूर्य॑स्य॒विभ॑क्ताभा॒गंधि॒षणे॑व॒वाज॑म् ॥ ४ ॥

ध॒र्ता । दि॒वः । रज॑सः । पृ॒ष्टः । ऊ॒र्ध्वः । रथः॑ । न । वा॒युः ।
वसु॑ऽभिः । नि॒युत्वा॑न् । क्ष॒पाम् । व॒स्ता । ज॒नि॒ता । सूर्य॑स्य ।
विऽभ॑क्ता । भा॒गम् । धि॒षणा॑ऽइव । वाज॑म् ॥ ४ ॥

सइन्द्रोदिवोद्युलोकस्य रजसोन्तरिक्षस्यचधर्ता धारकः पृष्टः व्याप्तः सर्वत्रवर्तमानः रथोन तदीयोरथइव ऊर्ध्वोवायुरूर्ध्वगन्ता वसुभिः सहायतयानिवसद्भिर्मरुद्भिर्नियुत्वान्सहायवान् यद्वा नेत्ययमुत्तरेणापिसंबध्यते तथा वायुर्नियुत्वान्नियुन्नामकवडवाभिस्तद्वान् एवमिन्द्रोवसुभिर्मरुद्भिःसहायवान् तथा क्षपांवस्ता रात्रिमाच्छादयन् सूर्यस्यजगत्प्रकाशकस्यादित्यस्यजनिता जनयिता भागं भजनीयं वाजंकर्मफलरूपमन्नं विभक्ता साधुविभागकर्ताभवति तत्रदृष्टान्तः– धिषणेव यथा आढ्यानांवागस्येदमितिविभागंकरोतितद्वत् ॥ रजसः रञ्जरागेइत्यस्माद्भूरञ्जिभ्यांकिदितिअसुन् कित्त्वान्नलोपः रज्यतेप्रकाशेनेतिरजोन्तरिक्षं नित्त्वादाद्युदात्तः । वस्ता वसआच्छादनेइत्यस्यतृचिरूपं । जनिता जनयतेस्तृचि जनितामन्त्रेइतिनिपातनाण्णिलोपः चित्त्वादन्तोदात्तः । विभक्ता भजसेवायामित्यस्यसाधुकारिण्यर्थेतृन् एकाचउपदेशे इतीट्प्रतिषेधः तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् ॥ ४ ॥

अथपञ्चमी–

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तं॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ ५ ॥१३॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् ।
वाजऽसातौ । शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् ।
वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ५ ॥ १३ ॥

व्याख्यातेयमृक् ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेत्रयोदशोवर्गः ॥ १३ ॥

इन्द्रःस्वाहेतिपञ्चर्चंद्वादशंसूक्तंवैश्वामित्रंत्रैष्टुभमैन्द्रं दशरात्रेनवमेहनिमरुत्वतीयशस्त्रेइदं सूक्तं । सूत्रितञ्च–तृतीयस्येन्द्रःस्वाहागायत्सामेति ।

तत्रप्रथमा–

इन्द्रःस्वाहापिबतुयस्यसोमआगत्यातुम्रोवृषभोमरुत्वान् ।
ओरुव्यचाःपृणतामेभिरन्नैरास्यहविस्तन्व१ःकाममृध्याः ॥ १ ॥

इन्द्रः । स्वाहा । पिबतु । यस्य । सोमः । आऽगत्य । तुम्रः ।
वृषभः । मरुत्वान् । आ । उरुऽव्यचाः । पृणताम् । एभिः ।
अन्नैः । आ । अस्य । हविः । तन्वः । कामम् । ऋध्याः ॥ १ ॥

अयमिन्द्रः स्वाहा स्वाहाकृतमिमंसोमंपिबतु यस्येन्द्रस्यायंसोमः सइन्द्रोयज्ञंप्रत्यागत्य तुम्रः कर्मविघ्नकारिणांहिंसकः वृषभोयष्टॄणामभिमतफलवर्षकः मरुत्वान्मरुद्भिस्तद्वान् उरुव्यचाः प्रभूतव्याप्तिःसन् एभिरस्माभिर्दत्तैरन्नैःसोमादिलक्षणैर्हविर्भिरापृणतां समन्तात्पूरयतु ततोस्येन्द्रस्यसंबन्धिनस्तन्वःशरीरस्यकामं पुष्ट्यादिलक्षणविषयमभिलाषं हविरस्माभिर्दत्तं आऋध्याः सर्वतःपूरयतु ॥ तुम्रः तुमिराहननार्थः । उरुव्यचाः व्यचेरसुन् व्यचेःकुटादित्वमनसीतिवक्तव्यमित्यत्रअनसीतिपर्युदासात् ङित्त्वाभावः कृदुत्तरपदस्वरः । ऋध्याः ऋध्नोतेराशीर्लिङिरूपम् ॥ १ ॥

अथद्वितीया–

आतेसपर्यूजवसेयुनज्मिययोरनुप्रदिवःश्रुष्टिमावः ।
इहत्वाधेयुर्हरयःसुशिप्रपिबात्व१स्यसुषुतस्यचारोः ॥ २ ॥

Funding by IKS-MoE

आ । ते॒ । स॒प॒र्यू इति॑ । ज॒वसे॑ । यु॒न॒ज्मि॒ । ययोः॑ । अनु॑ ।
प्र॒ऽदिवः॑ । श्रु॒ष्टिम् । आवः॑ । इ॒ह । त्वा॒ । धे॒यु॒ः । हर॑यः ।
सु॒ऽशि॒प्र॒ । पिब॑ । तु । अ॒स्य । सुऽसु॑तस्य । चारोः॑ ॥ २ ॥

हेइन्द्र ते तव जवसे यज्ञंप्रत्यागमनाय सपर्यू परिचारकौहरी आयुनज्मि रथेयोजयामि प्रदिवः पुरातनस्त्वं ययोरश्वयोःश्रुष्टिंवेगं श्रुष्टीतिक्षिप्रनामेतियास्कः[1] । तमन्वावः अनुगच्छसि हेसुशिप्र शोभनहनो इन्द्र हरयोरथेयोजितास्तेऽश्वाः इहकर्मणि त्वा त्वां धेयुः यज्ञंप्रतिधारयन्तु ततआगतस्त्वं सुषुतस्य सुष्ठुअभिषुतं चारोः कमनीयं अस्येमंसोमं तु क्षिप्रं पिब ॥ सपर्यू सपरशब्दःकण्ड्वादिः तदन्तादौणादिकःकुप्रत्ययः । आवः अवरक्षणादिषु छान्दसेलङिरूपं यद्वृत्तयोगादनिघातः । धेयुः दधातेराशीर्लिङिकिदाशिषीतियासुट् एर्लिङीत्येकारादेशः निघातः । पिब पादादित्वादनिघातः । सुषुतस्य षुञ्अभिषवे कर्मणिक्तः गतिरनन्तरइतिगतिस्वरः उपसर्गात्सुनोतीत्यादिनासंहितायांषत्वम् ॥ २ ॥

अथतृतीया—

गोभि॑र्मिमि॒क्षुंद॑धिरेसुपा॒रमिन्द्रं॒ज्यैष्ठ्या॑य॒धाय॑सेगृणा॒नाः ।
म॒न्दा॒नःसोमं॑पपि॒वाँऋ॑जीषि॒न्त्सम॒स्मभ्यं॑पुरु॒धागाइ॑षण्य ॥ ३ ॥

गोभिः॑ । मि॒मि॒क्षुम् । द॒धि॒रे॒ । सु॒ऽपा॒रम् । इन्द्र॑म् । ज्यैष्ठ्या॑य ।
धाय॑से । गृ॒णा॒नाः । म॒न्दा॒नः । सोम॑म् । प॒पि॒ऽवान् । ऋ॒जी॒षि॒न् ।
सम् । अ॒स्मभ्य॑म् । पु॒रु॒धा । गाः । इ॒ष॒ण्य॒ ॥ २ ॥

गृणानाः स्तोत्रंकुर्वाणाः ऋत्विजोमिमिक्षुं स्तोतॄणामभिमतफलंवर्षितुमिच्छन्तं सुपारं शोभनपारं स्तुतिभिरभिमुखीकर्तुंशक्यमित्यर्थः तादृशमिन्द्रं ज्यैष्ठ्याय धनादिसंपत्त्याश्रेष्ठत्वाय धायसे चिरकालमायुर्धारणायच गोभिर्गव्यमिश्रितैः सोमैर्दधिरे धारयन्ति शेषःप्रत्यक्षः हेऋजीषिन् सोमवन्निन्द्र सत्वंमदानः मोदमानः सोमंपपिवान् सोमस्यपातासन् स्तोतृभ्योस्मभ्यंपुरुधा बहुधा गाअग्निहोत्रादिकर्मसिद्ध्यर्थंधेनूः समिषण्य सम्यक्प्रेरय ॥ गोभिः सावे-

---

[1] नि० ६. १२. ।

काचइतिविभक्तेरुदात्तत्वेप्राप्ते नगोश्वन्त्सावववर्णेतिप्रतिषेधः । मिमिक्षुं मिहसेचनेइत्यस्य सनि एकाचइतीट्प्रतिषेधे हलन्ताच्चेतिकिद्वद्भावः सनाशंसभिक्षउः प्रत्ययस्वरः । ज्यैष्ठ्याय ज्येष्ठस्यभावइत्यर्थे ब्राह्मणादित्वात्ष्यञ् ञित्त्वादाद्युदात्तः । गृणानाः गॄशब्दे क्र्यादित्वाच्छ्ना चित्त्वादन्तोदात्तः । मन्दानः मदिस्तुत्यादिष्वित्यस्यशानचि बहुलंछन्दसीतिशपोलुक् । पुरुधा पुरुशब्दइहसंख्यावाची संख्यायाविधार्थेधेतिधाप्रत्ययः । इषण्य इषगतौ इषणमिच्छतीति छन्दसिपरेच्छायांक्यच् तदन्तादन्तर्भावितण्यर्थस्यलोटिरूपम् ॥ ३ ॥

अथचतुर्थी—

इ॒मंकामं॑मन्दया॒गोभि॒रश्वै॑श्च॒न्द्रव॑ता॒राध॑साप॒प्रथ॑श्च ।
स्व॒र्यवो॑म॒तिभि॒स्तुभ्यं॒विप्रा॒इन्द्रा॑य॒वाहः॑कुशि॒कासो॑अक्रन् ॥ ४ ॥

इ॒मम् । काम॑म् । म॒न्द॒य॒ । गोभिः॑ । अश्वैः॑ । च॒न्द्रऽव॑ता । राध॑सा ।
प॒प्रथः॑ । च॒ । स्वः॒ऽयवः॑ । म॒तिऽभिः॑ । तुभ्य॑म् । विप्राः॑ ।
इन्द्रा॑य । वाहः॑ । कु॒शि॒कासः॑ । अ॒क्र॒न् ॥ ४ ॥

अथपञ्चमी—

शु॒नंहु॑वेमम॒घवा॑न॒मिन्द्र॑म॒स्मिन्भरे॒नृत॑मं॒वाज॑सातौ ।
शृ॒ण्वन्त॑मु॒ग्रमू॒तये॑स॒मत्सु॒घ्नन्तँ॑वृ॒त्राणि॑सं॒जितं॒धना॑नाम् ॥ ५॥१४॥

शु॒नम् । हु॒वे॒म॒ । म॒घऽवा॑नम् । इन्द्र॑म् । अ॒स्मिन् । भरे॑ ।
नृऽत॑मम् । वाज॑ऽसातौ । शृ॒ण्वन्त॑म् । उ॒ग्रम् । ऊ॒तये॑ । स॒मत्ऽसु॑ ।
घ्नन्त॑म् । वृ॒त्राणि॑ । स॒म्ऽजित॑म् । धना॑नाम् ॥ ५ ॥ १४ ॥

एतेव्याख्याते ॥ ४ ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेचतुर्दशोवर्गः ॥ १४ ॥

चर्षणीधृतमितिद्वादशर्चँत्रयोदशंसूक्तं वैश्वामित्रमैन्द्रं अत्रानुक्रमणिका—चर्षणीधृतंद्वादशाद्यान्त्यौतृचौजागतगायत्राविति । आद्यस्तृचोजागतः अन्त्यस्तृचोगायत्रः शिष्टाऋचस्त्रि-

ष्टुभः सूक्तविनियोगोलैङ्गिकः उक्थ्येक्रतौमैत्रावरुणशस्त्रे अनुरूपतृचानन्तरमाद्यस्तृचःशंसनीयः सूत्रितश्च—चर्षणीधृतमस्तभ्नाद्यामसुरइतितृचाविति। विषुवतिनिष्केवल्येनृणामुत्वेतितृचः विषुवानितिखण्डेसूत्रितं—नृणामुत्वानृतमंगीर्भिरुक्थैरितितिस्रइति । बृहस्पतिसवेप्ययंतृचोनिष्केवल्येनिविद्धानीयः सूत्रितश्च—नृणामुत्वेतिमाध्यन्दिनइति । महाव्रतेपिनिष्केवल्येअयंतृचः दशरात्रेचतुर्थेहनिमरुत्वतीयेइन्द्रमरुत्वइतितिस्रः षष्ठेहनिषष्ठस्येतिखण्डेसूत्रितं—इन्द्रमरुत्वइतितिस्रइतिमरुत्वतीयमिति । बृहस्पतिसवेपिमरुत्वतीयशस्त्रेअयंतृचोनिविद्धानीयः । सूत्रितश्च—इन्द्रमरुत्वइहनृणामुत्वेतिमाध्यन्दिनइति । आद्यामरुत्वतीयग्रहस्यानुवाक्या सूत्रितश्च—मरुत्वतीयेनग्रहेणचरन्तींद्रमरुत्वइहपाहिसोममिति । तृतीयेपर्यायेहोतुःशस्त्रेइदंह्यन्वोजसेतिस्तोत्रियस्तृचः । सूत्रितंच—इदंह्यन्वोजसामहांइन्द्रोयओजसेति ।

तत्रप्रथमा—

च॒र्ष॒णी॒धृतं॑म॒घवा॑नमु॒क्थ्य१॒॑मिन्द्रं॒गिरो॑बृह॒तीर॒भ्य॑नूषत ।
वा॒वृ॒धा॒नंपु॑रुहू॒तंसु॑वृ॒क्तिभि॒रम॑र्त्यं॒जर॑माणंदि॒वेदि॑वे ॥ १ ॥

च॒र्ष॒णि॒ऽधृत॑म् । म॒घऽवा॑नम् । उ॒क्थ्य॑म् । इन्द्र॑म् । गिरः॑ ।
बृ॒ह॒तीः । अ॒भि । अ॒नू॒ष॒त । वा॒वृ॒धा॒नम् । पु॒रु॒ऽहू॒तम् ।
सु॒वृ॒क्तिऽभिः॑ । अम॑र्त्यम् । जर॑माणम् । दि॒वेऽदि॑वे ॥ १ ॥

बृहतीः प्रभूतागिरोस्मदीयाःस्तुतिलक्षणावाचः चर्षणीधृतं चर्षणीनांमनुष्याणामभिमतफलप्रदानेनधारकंपोषकं यद्वा आकृषत्यनेनसर्वमितिचर्षणिबलं तद्धारकं मघवानं धनवन्तं उक्थ्यं उक्थैःशस्त्रैःशंसनीयं वावृधानं बलधनादिसंपत्त्याप्रतिक्षणंवर्धमानं पुरुहूतं स्तोतृभिर्बहुवारमाहूतं अमर्त्यं मरणधर्मरहितं सुवृक्तिभिः शोभनस्तुतिवाक्यैर्दिवेदिवे प्रत्यहं जरमाणंस्तूयमानं तमिममिन्द्रं अभ्यनूषत अभितःसर्वतःस्तुवन्तु ॥ बृहतीः वाछन्दसीतिसवर्णदीर्घः । अनूषत णुस्तवने अस्माल्लुङिसिच् धातोःकुटादित्वात्सिचोङित्त्वेनगुणाभावः । सुवृक्तिभिः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं यद्वा सुवृक्तयइतिस्तुतिकरणभूताऋचोवृक्तिशब्देनोच्यन्ते क्तिच्क्तौचेतिक्तिच् कृत्स्वरेणान्तोदात्तः । दिवेदिवे नित्यवीप्सयोरितिद्विर्वचनं परस्याम्रेडितत्वादनुदात्तत्वेपूर्वपदस्वरः ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

श॒तक्र॑तुमर्ण॒वंशा॒किनं॒नरं॒गिरो॑म॒इन्द्र॒मुप॑यन्तिवि॒श्वतः॑ ।
वा॒ज॒सनिं॑पू॒र्भिदं॒तूर्णि॑म॒प्तुरं॑धाम॒साच॑मभि॒षाचं॑स्व॒र्विद॑म् ॥ २ ॥

श॒तऽक्र॑तुम् । अ॒र्ण॒वम् । शा॒किन॑म् । नर॑म् । गिरः॑ । मे॒ । इन्द्र॑म् ।
उप॑ । य॒न्ति॒ । वि॒श्वतः॑ । वा॒ज॒ऽसनि॑म् । पूः॒ऽभिद॑म् । तूर्णि॑म् ।
अ॒प्ऽतुर॑म् । धा॒म॒ऽसाच॑म् । अ॒भि॒ऽसाच॑म् । स्वः॒ऽविद॑म् ॥ २ ॥

मे मदीयागिरः स्तुतिलक्षणावाचः शतक्रतुं शतंक्रतवोयज्ञायस्यतं अर्णवं पर्जन्यात्मनाउदकवन्तं शाकिनं शक्नोत्येभिरिन्द्रइतिशाकाःसहायभूतामरुतस्तद्वन्तं नरं सर्वस्यजगतोनेतारं वाजसनिं वाजस्यान्नस्यदातारं पूर्भिदं शत्रुपुरांभेत्तारं तूर्णिं युद्धंप्रतिशीघ्रंगन्तारं अप्तुरं मेघभेदनद्वारापांप्रेरकं धामसाचं तेजोभजमानं यद्वा धनं धाम तदर्थिभिःसहयोजयितारं अभिषाचं शत्रूणामभिभवितारं स्वर्विदं स्वर्गस्यलंभकं तमिममिन्द्रं विश्वतः सर्वतः उपयन्ति उपगच्छन्तु ॥ अर्णवं अर्णोस्यास्तीतिमत्वर्थे अर्णसःसलोपश्चेतिवप्रत्ययःसकारलोपश्च प्रत्ययस्वरः । नरं नयतेर्डिच्चेतिऋप्रत्ययः अमःसुप्त्वादनुदात्तत्वेप्रत्ययस्वरः । यन्ति इण्गतावित्यस्य लटि इणोयणितियण् निघातः । वाजसनिं षणुदाने खनिकष्यंज्यसिवसीत्यादिनाइप्रत्ययः परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । तूर्णिं ञित्वरासंभ्रमे वहिश्रीत्यादिनानिप्रत्ययः ज्वरत्वरेत्यादिनाऊठ् निदित्यतिदेशादाद्युदात्तः । अप्तुरं तुरत्वरणे क्विप् कृदुत्तरपदस्वरः । अभिषाचं षचसमवाये ण्यन्तस्यक्विप् ॥ २ ॥

अथतृतीया—

आ॒क॒रेवसो॑र्जरि॒तापन॑स्यतेने॒हसः॒स्तुभ॒इन्द्रो॑दुवस्यति ।
विव॑स्वतः॒सद॑न॒आहिपि॑प्रि॒येस॑त्रा॒साह॑मभिमाति॒हनं॑स्तुहि ॥ ३॥

आ॒ऽक॒रे । वसोः॑ । ज॒रि॒ता । प॒न॒स्य॒ते॒ । अ॒ने॒हसः॑ । स्तुभः॑ ।
इन्द्रः॑ । दु॒व॒स्य॒ति॒ । वि॒वस्व॑तः । सद॑ने । आ । हि । पि॒प्रि॒ये ।
स॒त्रा॒ऽसह॑म् । अ॒भि॒मा॒ति॒ऽहन॑म् । स्तु॒हि॒ ॥ ३ ॥

Funding by IKS-MoE

जरिता शत्रूणांजरयितेन्द्रः आकरे आकीर्यतेयुद्धार्थंधनमत्रेत्याकरोयुद्धं तस्मिन्वसोर्धनस्यस्थानभूतेयुद्धे पनस्यते सर्वैःस्तूयते यद्वा वसोः वसत्याभिमुख्येनतिष्ठतीतिवसुः शत्रुः तस्य जरयितेतियोजनीयं सइन्द्रः अनेहसः अपापाः स्तुभः स्तुतीः दुवस्यतिपरिचरति तासांफलंप्रयच्छन्पूजयतीत्यर्थः किञ्च सइन्द्रोविवस्वतः विशेषेणाग्निहोत्रार्थंवसतोहविष्मतोवा यजमानस्यसदनेगृहे आपिप्रियेहि सोमपानादिनाअत्यन्तंप्रीतोभवति खलु सत्रासाहं सत्यमेवशत्रूणामभिभवितारं यद्वा मरुद्भिःसहशत्रूणामभिभवितारं अतएवाभिमातिहनं शत्रूणांहन्तारमिन्द्रंस्तुहि हेविश्वामित्रेति ॥ आकरे कॄविक्षेपे अधिकरणे ऋदोरबित्यप् थाथादिस्वरेणान्तोदात्तः । जरिता जॄष्वयोहानौ इत्यस्यांतर्भावितण्यर्थस्यतृचिरूपं चित्त्वादन्तोदात्तः । पनस्यते पनस्यतिःस्तुतिकर्मा तस्य कर्मणिलटिरूपं निघातः । अनेहसः हन्तेर्नञिउपपदेनञिहनएहचेत्यसिप्रत्ययः एहइत्ययंचादेशोधातोः नञ्सुभ्यामितिस्वरेणान्तोदात्तः । स्तुभः स्तोभतिरर्चतिकर्मा क्विप् । दुवस्यति दुवःपरिचरणमात्मनइच्छतीत्यर्थेक्यच् निघातः । पिप्रिये प्रीङ्तर्पणे लिटिरूपं हियोगादनिघातः ॥ ३ ॥

अथचतुर्थी—

नृ॒णामु॑त्वा॒नृत॑मंगी॒र्भिरु॒क्थैर॒भिप्रवी॒रम॑र्चतास॒बाधः॑ ।
संसह॑सेपु॒रुमा॒योजि॑हीते॒नमो॑अस्यप्र॒दिव॒एक॑ईशे ॥ ४ ॥

नृ॒णाम् । ऊँ॒ इति॑ । त्वा॒ । नृऽत॑मम् । गीः॒ऽभिः । उ॒क्थैः । अ॒भि ।
प्र । वी॒रम् । अ॒र्च॒त॒ । स॒ऽबाधः॑ । सम् । सह॑से । पु॒रु॒ऽमा॒यः ।
जि॒ही॒ते॒ । नमः॑ । अ॒स्य॒ । प्र॒ऽदिवः॑ । एकः॑ । ई॒शे॒ ॥ ४ ॥

हेइन्द्र सबाधः रक्षोघ्नमन्त्रोच्चारणेनतद्विषयबाधयासहवर्तन्तइतिसबाधः ऋत्विजः नृणांनृतमं मनुष्याणामतिशयेनस्वस्वकर्मणिनेतारं वीरंसामर्थ्योपेतं त्वां गीर्भिःस्तुतिसाधनभूतैर्वाक्यैरुक्थैःशस्त्रैश्चाभिमुख्येनप्रार्चत प्रकर्षेणार्चन्ति पुरुमायः वृत्रहननादिबहुकर्मासइन्द्रः सहसे बलायसंजिहीते गमनोद्यमंकरोति किंच प्रदिवः पुरातनः एकः असहायः सइन्द्रः नमः नमसोऽस्यहविर्लक्षणस्यान्नस्य ईशे ईष्टे यद्वा अस्य सर्वस्यजगतईष्टे तस्मादिन्द्रायनमः ॥ नृणां नामन्यतरस्यामितिविभक्तेरुदात्तत्वम् । अर्चत अर्चतेर्लटि झे-

Funding by IKS-MoE

स्तादेशः तिङातिङोभवन्तीतिवचनात् । सबाधः बाधृविलोडने क्विप् वोपसर्जनस्येतिसहस्यसत्वं कृदुत्तरपदस्वरः । पुरुमायः अन्तोदात्तप्रकरणे त्रिचक्रादीनामुपसंख्यानमिति अन्तोदात्तत्वम् । ईशे ईशऐश्वर्ये इत्यस्यलटि लोपस्तआत्मनेपदेष्वितितलोपः निघातः ॥ ४ ॥

अथपञ्चमी–

पू॒र्वीर॑स्यनि॒ष्षिधो॒मर्त्ये॑षुपु॒रूवसू॑निपृ॒थि॒वीबि॑भर्ति ।
इन्द्रा॑य॒द्याव॒ओष॑धीरु॒तापो॑र॒यिंर॑क्षन्तिजी॒रयो॒वना॑नि ॥५॥१५॥

पू॒र्वीः । अ॒स्य॒ । निः॒ऽसिधः॑ । मर्त्ये॑षु । पु॒रु । वसू॑नि । पृ॒थि॒वी ।
बि॒भ॒र्ति॒ । इन्द्रा॑य । द्यावः॑ । ओष॑धीः । उ॒त । आपः॑ । र॒यिम् ।
र॒क्ष॒न्ति॒ । जी॒रयः॑ । वना॑नि ॥ ५ ॥ १५ ॥

मर्त्येषु मनुष्येषु अस्येन्द्रस्य निष्षिधोनुशासनानि पूर्वीः हितोपदेशादिभिः प्रभूतानि नानाप्रकाराणिभवन्ति इन्द्रस्यशासितृत्वेमन्त्रः—उक्थमिन्द्रायशंस्यंवर्धनंपुरुनिष्षिधंइति । तथा शासकाय तस्माइन्द्राय पृथिवी पुरुपुरूणि बहूनि वसूनि धनानि बिभर्ति अन्तर्धारयति किंच द्यावोद्युलोकाः ओषधीरोषधयः उतापिच आपोजलानि जीरयःजीर्यन्तइतिजीरयोमनुष्याः वनानि वृक्षाश्च एतेसर्वे इन्द्रस्याज्ञयातदुपभोगयोग्यं रयिं धनं रक्षन्ति ॥ निष्षिधः षिधुगत्यां क्विप् संहितायांनिसःसकारेण इणोव्यवधानंछान्दसत्वादनादृत्य उपसर्गात्सुनोतीत्यादिनाषत्वं निसःसकारस्यष्टुनाष्टुरितिषत्वम् ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेपंचदशोवर्गः ॥ १५ ॥

अथषष्ठी–

तुभ्यं॒ब्रह्मा॑णि॒गिर॑इन्द्र॒तुभ्यं॑स॒त्राद॑धिरेहरिवोजु॒षस्व॑ ।
बो॒ध्या॒३॒॑पिर॑वसो॒नूत॑नस्य॒सखे॑वसोजरि॒तृभ्यो॒वयो॑धाः ॥ ६ ॥

---

१ ऋ. सं. १. १. १९ ।

Funding by IKS-MoE

तुभ्य॑म् । ब्रह्मा॑णि । गिरः॑ । इ॒न्द्र॒ । तुभ्य॑म् ॥ स॒त्रा । द॒धि॒रे॒ ।
ह॒रि॒ऽवः॒ । जु॒षस्व॑ । बो॒धि । आ॒पिः । अव॑सः । नूत॑नस्य ।
सखे॑ । व॒सो॒ इति॑ । ज॒रि॒तृऽभ्यः॑ । वयः॑ । धाः॒ ॥ ६ ॥

हेहरिवः अश्ववन्निन्द्र तुभ्यंत्वदर्थंब्रह्माणिस्तोत्राणि तथा तुभ्यम् गिरःशस्त्राणिच सत्रा सत्यमेवदधिरे ऋत्विजोधारयन्ति तानिजुषस्व सेवस्व हेवसो सर्वस्यवासयितः सखे सखिभूत हेइन्द्र आपिर्व्याप्तस्त्वं नूतनस्य नवतरमवसोन्नलक्षणंहविर्बोधि त्वदर्थंदीयमानंजानीहि अतस्त्वं जरितृभ्यः स्तोतृभ्योऽस्मभ्यंवयोन्नंधाः देहि ॥ तुभ्यं ङयिचेत्याद्युदात्तत्वम् । जुषस्व जुषीप्रीतिसेवनयोरित्यस्यलोटिरूपं वाक्यभेदादनिघातः । बोधि बुध अवगमनेइत्यस्य लोटि वाछन्दसीतिहेर्विकल्पेनङित्त्वादत्रपित्त्वाद्गुणः हुझल्भ्योहेर्धिरितिध्यादेशः ङित्त्वादन्तोदात्तः ॥ ६ ॥ अथसप्तमी—

इन्द्र॑मरुत्वइ॒हपा॑हि॒सोमं॒यथा॑शार्या॒तेअपि॑बःसु॒तस्य॑ ।
तव॒प्रणी॑ती॒तव॑शूर॒शर्म॒न्नाविवासन्ति॑क॒वयः॑सु॒य॒ज्ञाः ॥ ७ ॥

इन्द्र॑ । म॒रु॒त्वः॒ । इ॒ह । पा॒हि॒ । सोम॑म् । यथा॑ । शा॒र्या॒ते ।
अपि॑बः । सु॒तस्य॑ । तव॑ । प्रऽनी॑ती । तव॑ । शू॒र॒ । शर्म॑न् ।
आ । वि॒वा॒स॒न्ति॒ । क॒वयः॑ । सु॒ऽय॒ज्ञाः ॥ ७॥

हेमरुत्वः मरुद्भिस्तद्वन्निन्द्र त्वं इहास्मदीयेयज्ञे आगत्य सोमंपाहि पिब यथा त्वं पूर्वं शार्यातेः शर्यातेःपुत्रेतस्मिन्राजनियज्ञंकुर्वाणे सुतस्याभिषुतंसोममपिबः तथात्रपिबेत्यर्थः इन्द्रः शार्यातस्ययज्ञेसोमरसानपिबदित्येषोर्थःकौषीतकेस्पष्टमुक्तः तथामन्त्रवर्णश्च—आस्मारथंवृषपाणेषुतिष्ठसिशार्यातस्यप्रभृतायेषुमन्दसेइति । हेशूरेन्द्र तवसंबन्धिनि शर्मन् शर्मणि निर्बाधस्थानेस्थिताःसुयज्ञाःसुष्ठुकृतयज्ञाःकवयोमेधाविनोयजमानाःप्रणीती तवहविषांप्रणयनेनप्रापणेनआसमन्ताद्विवासंति त्वामेवपरिचरंतिविवासतिःपरिचरणकर्मा ॥ शार्याते शर्यातिरयमित्यर्थे तस्येदमित्यण्प्रत्ययः । अपिबः यथायोगादनिघातः अडागमस्वरः । प्रणीती नयतेर्भावेक्तिन् तादौचनितिकृतीतिगतेःप्रकृतिस्वरत्वं सुपांसुलुगितितृतीयायाःसवर्णदीर्घः उपसर्गादसमासेपिणत्वम् ॥ ७ ॥

---

१ ऋ० सं० १. ४. ११. ।

अथाष्टमी–

सवा॑वशा॒नइ॒हपा॑हि॒सोमं॑म॒रुद्भि॑रिन्द्र॒सखि॑भिःसु॒तंनः॑ ।
जा॒तंयत्त्वा॒परि॑दे॒वाअभू॑षन्म॒हेभरा॑यपुरुहूत॒विश्वे॑ ॥ ८ ॥

सः । वा॒व॒शा॒नः । इ॒ह । पा॒हि॒ । सोम॑म् । म॒रुत्ऽभिः॑ । इ॒न्द्र॒ ।
सखि॑ऽभिः । सु॒तम् । न॒ः । जा॒तम् । यत् । त्वा॒ । परि॑ । दे॒वाः ।
अभू॑षन् । म॒हे । भरा॑य । पु॒रु॒ऽहू॒त॒ । विश्वे॑ ॥ ८ ॥

हेइन्द्र वावशानः सोमंकामयमानः सतादृशस्त्वं सखिभिः समानख्यानैर्मरुद्भिःसह नोऽस्मत्संबन्धिनीहास्मिन्यज्ञे सुतमभिषुतंसोमंपाहि पिब हेपुरुहूत पुरुभिराहूतेन्द्र जातं पानेनप्रबलंसंपन्नंयत्वयं त्वां विश्वेसर्वेदेवाः महे महते भराय ह्रियन्ते योधानामायूंष्यत्रेतिभरः संग्रामः तस्मै संग्रामाय पर्यभूषन्सर्वतोलंकुर्वन् ॥ वावशानः वशेर्यङ्लुकि चानशिरूपं चित्त्वादन्तोदात्तः । अभूषन् भूषअलंकारेभूवादिः लङिरूपं यद्योगादनिघातः । भराय हृञ्हरणे अधिकरणेघः हृग्रहोर्भश्छन्दसीतिहकारस्यभकारः वृषादित्वादाद्युदात्तः ॥ ८ ॥

अथनवमी–

अ॒प्तूर्ये॑मरुतआ॒पिरे॒षोम॑न्द॒न्निन्द्र॒मनु॒दाति॑वाराः ।
तेभिः॑सा॒कंपि॑बतुवृत्रखा॒दःसु॒तंसोमं॑दा॒शुषः॒स्वेस॒धस्थे॑ ॥ ९ ॥

अ॒प्ऽतूर्ये॑ । म॒रु॒तः॒ । आ॒पिः । ए॒षः । अम॑न्दन् । इन्द्र॑म् ।
अनु॑ । दाति॑ऽवाराः । तेभिः॑ । सा॒कम् । पि॒ब॒तु॒ । वृ॒त्र॒ऽखा॒दः ।
सु॒तम् । सोम॑म् । दा॒शुषः॑ । स्वे । स॒धऽस्थे॑ ॥ ९ ॥

हे मरुतः यएषइन्द्रः अप्तूर्ये अपांप्रेरणे आपिः युष्माकंसखासन्वर्तते दातिवाराः वारोवरणीयंबलंधनंवा दत्तबलाःदत्तधनावा तेमरुतःतमिन्द्रमन्वमन्दन् अहृष्यन् वृत्रखादः वृत्रस्यहिंसकः सइन्द्रः तेभिस्तैर्मरुद्भिःसाकं दाशुषः हविर्दत्तवतोयजमानस्य स्वे स्वकीये सधस्थे सहतिष्ठत्यस्मिन्नितिसधस्थंगृहं तस्मिन्सुतमभिषुतंसोमंपिबतु ॥ अप्तूर्ये तूरीत्वराहिंसयोरित्यस्मादघ्न्यादयश्चेतियत्प्रत्ययः यतोनावइत्याद्युदात्तः समासेकृदुत्तरपदस्वरः । अमन्दन् मदिस्तुत्यादिषु परस्मैपदी पादादित्वादनिघातः । वृत्रखादः खादृभक्षणे कर्मण्यण् । दाशुषः दाशृदाने

Funding by IKS-MoE

इत्यस्यकसौ दाश्वान्साह्वान्मीढ्वांश्चेतिद्विर्वचनाद्यभावः वसोःसंप्रसारणं प्रत्ययस्वरः । सधस्थे सधमादस्थयोश्छन्दसीति सहस्यसधादेशः ॥ ९ ॥

अथदशमी—

इ॒दंह्य१न्वोज॑सासु॒तंरा॑धानां॑पते । पिबा॒त्व१॒स्यगि॑र्वणः ॥ १० ॥

इ॒दम् । हि । अनु॑ । ओज॑सा । सु॒तम् । रा॒धा॒ना॒म् ।
प॒ते॒ । पिब॑ । तु । अ॒स्य । गि॒र्व॒णः॒ । ॥ १० ॥

हेराधानांपते धनानांस्वामिन् गिर्वणः गीर्भिःस्तुतिभिर्वननीय हेइन्द्र इदमनुअनेनानुक्रमेण उद्देशानुक्रमेणेत्यर्थः ओजसाबलेन ग्रावभिःसुतमभिषुतंअस्येमंसोमं तु क्षिप्रं पिबहि ॥ १० ॥

अथैकादशी—

यस्ते॒अनु॑स्व॒धामस॑त्सु॒तेनिय॑च्छत॒न्व॑म् । सत्वा॑ममत्तुसो॒म्यम् ॥ ११ ॥

यः । ते॒ । अनु॑ । स्व॒धाम् । अस॑त् । सु॒ते ।
नि । य॒च्छ॒ । त॒न्व॑म् । सः । त्वा॒ । म॒म॒त्तु॒ । सो॒म्यम् ॥ ११ ॥

हेइन्द्र त्वदर्थं यःसोमः स्वधामन्नमन्वनुसृत्य ग्रावभिरभिषुतः असत्अस्ति सुते तस्मिन्सोमे तन्वंस्वकीयंशरीरंनियच्छ प्रेरय ससोमःसोम्यं सोमार्हं त्वा त्वांममत्तु मादयतु ॥ असत् अस्तेर्लेटचडागमेरूपं यद्वृत्तयोगादनिघातः आगमस्यानुदात्तत्वेधातुस्वरः ॥ ११ ॥

अथद्वादशी—

प्रते॑अश्नोतुकु॒क्ष्योःप्रेन्द्र॒ब्रह्म॑णा॒शिरः॑ । प्रबा॒हूशू॑र॒राध॑से ॥१२॥१६॥

प्र । ते॒ । अ॒श्नो॒तु॒ । कु॒क्ष्योः । प्र । इ॒न्द्र॒ । ब्रह्म॑णा ।
शिरः॑ । प्र । बा॒हू इति॑ । शू॒र॒ । राध॑से ॥ १२ ॥ १६ ॥

हेइन्द्र ससोमस्तेतव कुक्ष्योः कुक्षेरुभयोःपार्श्वयोःप्राश्नोतु प्रकर्षेणव्याप्नोतु तथा ब्रह्मणास्तोत्रेणसहितःससोमः शिरः शरीरमवयवादिनाअवयवीलक्ष्यते त्वच्छरीरंप्राश्नोतु

Funding by IKS-MoE

हेशूरेन्द्र राधसेधनाय तव बाहूअपिप्राश्नोतु ॥ अश्नोतु अशूव्याप्तावित्यस्यलोटि व्यत्ययेनपरस्मैपदं निघातः । कुक्ष्योः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ॥ १२ ॥

॥ इतितृतीयस्यतृतीयेषोडशोवर्गः ॥ १६ ॥

धानावन्तमित्यष्टर्चंचतुर्दशंसूक्तंवैश्वामित्रमैन्द्रं अत्रेयमनुक्रमणिका—धानावन्तमष्टौपूर्वार्धंगायत्रंषष्ठीजगतीति । आदितश्चतस्रोगायत्र्यः तृतीयेधानाइतिषष्ठीजगती शिष्टास्त्रिष्टुभः सूक्तविनियोगोलिङ्गादवगन्तव्यः प्रातःसवनीयपुरोडाशस्यानुवाक्याधानावन्तमित्याद्या सूत्रितंच—धानावन्तंकरंभिणमितिप्रातःसवनेनुवाक्येति ।

तत्रप्रथमा—

धा॒नाव॑न्तंकर॒म्भिण॑मपू॒पव॑न्तमु॒क्थिन॑म् । इन्द्र॑प्रा॒तर्जु॑षस्वनः ॥ १ ॥

धा॒नाऽव॑न्तम् । क॒र॒म्भिण॑म् । अ॒पू॒पऽव॑न्तम् ।
उ॒क्थिन॑म् । इन्द्र॑ । प्रा॒तः । जु॒ष॒स्व॒ । नः॒ ॥ १ ॥

हेइन्द्र धानावन्तं धानाभृष्टयवास्तद्वन्तं करंभिणं करंभोदधिमिश्राःसक्तवः तद्वन्तं अपूपवन्तं सवनीयपुरोडाशोपेतं उक्थिनं शस्त्रिणं नोऽस्मदीयमिमंसोमंप्रातः प्रातःसवनेजुषस्व सेवस्व ॥ प्रातः स्वरादिष्वन्तोदात्तत्वेनपठितत्वादन्तोदात्तः ॥ १ ॥

अथद्वितीया—

पु॒रो॒ळाशं॑पच॒त्यं॑जु॒षस्वे॒न्द्रागु॑रस्वच । तुभ्यं॑ह॒व्यानि॑सिस्रते ॥ २ ॥

पु॒रो॒ळाश॑म् । प॒च॒त्य॑म् । जु॒षस्व॑ । इ॒न्द्र॒ । आ ।
गु॒र॒स्व॒ । च॒ । तुभ्य॑म् । ह॒व्यानि॑ । सि॒स्र॒ते॒ ॥ २ ॥

हेइन्द्र पचत्यं पचनेसाधुं पुरोळाशं पुरोदाशन्तएनमितिपुरोडाशोहविःतंजुषस्व किंच अगुरस्व पुरोडाशभक्षणार्थमुद्यमंकुरु हव्यानि हवनयोग्यानिपुरोडाशादीनिहवींषितुभ्यंत्वदर्थंसिस्रते आहवनीयंगच्छन्ति तानिसेवस्वेतिभावः ॥ पचत्यं पचनशब्दात्तत्रसाधुरितियत्प्रत्ययांतस्यपदस्यह्यच्त्वाभावादत्रयतोनावइत्यस्यप्राप्तिर्नास्ति तित्स्वरितः । गुरस्व गुरीउद्यमने शविकरणी निघातः । सिस्रते सृगतौ छन्दसिजुहोत्यादिः व्यत्ययेनात्मनेपदम् ॥ २ ॥

अथतृतीया—

पु॒रो॒ळाशं॑चनो॒घसो॑जो॒षया॑से॒गिर॑श्चनः । व॒धू॒युरि॑व॒योष॑णाम् ॥ ३ ॥

पु॒रो॒ळाश॑म् । च॒ । न॒ः । घस॑ः । जो॒षया॑से । गिर॑ः ।
च॒ । न॒ः । व॒धू॒युःऽइ॑व । योष॑णाम् ॥ ३ ॥

हेइन्द्र नोऽस्मत्संबन्धिनंपुरोळाशं घसः भक्षयच नोऽस्मदीयाःस्तुतिलक्षणागिरोजोषयासे सेवस्वच तत्रदृष्टान्तः—वधूयुरिवयोषणां यथा वधूयुः स्त्रीकामः योषणांभजनीयांयुवतिंसेवतेतद्वत्॥ घसः घस्लृअदनेइत्यस्य लेट्यडागमेरूपं चवायोगेप्रथमेतिननिघातः। जोषयासे जुषीप्रीतिसेवनयोरित्यस्यण्यन्तस्य लेट्याडागमेरूपं आगमस्यानुदात्तत्वेणिच्स्वरः पादादित्वादनिघातः। वधूयुरिव सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः प्रत्ययस्वरः। योषणां युषभजनइतिसौत्रोधातुः कृत्यल्युटोबहुलमितिल्युट् लित्स्वरः ॥ ३ ॥

अथचतुर्थी—

पु॒रो॒ळाशं॑सनश्रुतप्रातःसा॒वेजु॑षस्वनः । इन्द्र॒क्रतु॒र्हिते॑बृ॒हन् ॥ ४ ॥

पु॒रो॒ळाश॑म् । स॒न॒ऽश्रु॒त॒ । प्रा॒त॒ःऽसा॒वे । जु॒ष॒स्व॒ ।
न॒ः । इन्द्र॑ । क्रतु॑ः । हि । ते॒ । बृ॒हन् ॥ ४ ॥

हेसनश्रुत पुराणतयाप्रसिद्ध हेइन्द्र नोऽस्मत्संबन्धिनमिमंपुरोडाशं प्रातःसावे सूयते अत्रसोमइतिसावः तस्मिन्प्रातःसवनेजुषस्व यतस्तेतवक्रतुःकर्म बृहन्महद्धि ॥ प्रातःसावे षुञ् अभिषवे कर्मणिघञ् प्रादिसमासः थाथादिस्वरेणान्तोदात्तः ॥ ४ ॥

माध्यंदिनसवनेसवनीयपुरोडाशस्यमाध्यन्दिनस्यसवनस्यधानाइत्यनुवाक्या । सूत्रितञ्च—माध्यंदिनस्यसवनस्यधानाइतिमाध्यंदिनइति ।

तत्रपञ्चमी—

माध्यं॑न्दिनस्य॒सव॑नस्यधा॒नाःपु॑रो॒ळाश॑मिन्द्रकृष्वे॒हचारु॑म् ।
प्रय॑त्स्तो॒ताज॑रि॒तातूर्ण्य॑र्थो॑वृषा॒यमा॑ण॒उप॑गी॒र्भिरीट्टे॑ ॥ ५ ॥ १७ ॥

माध्य॑न्दिनस्य। सव॑नस्य। धा॒नाः। पु॒रो॒ळाश॑म्। इ॒न्द्र॒।
कृ॒ष्व॒। इ॒ह। चारु॑म्। प्र। य॒त्। स्तो॒ता। ज॒रि॒ता। तूर्णि॑ऽअर्थः।
वृ॒ष॒ऽयमा॑णः। उप॑। गी॒ःऽभिः। ईट्टे॑॥ ५॥ १७॥

हेइन्द्र माध्यंदिनस्य मध्यन्दिनेभवस्यसवनस्यसंबंधिनीर्धानाःभृष्टयवान् चारुं कमनीयं पुरोडाशंचइहकर्मण्यागत्यकृष्व भक्षणेनसंस्कुरु यद्यदाजरिता भवत्परिचरणंकुर्वाणःतूर्ण्यर्थःत्वांस्तोतुमितस्ततःत्वरितगमनः अतएव वृषायमाणः वृषइवाचरन् स्तोतागीर्भिःस्तुतिलक्षणाभिर्वाग्भिरुपसमीपेप्रैट्ट प्रकर्षेणस्तौति तदा पुरोडाशादिहवींषिभक्षयेतिभावः॥ माध्यंदिनस्य मध्यन्दिनशब्दात्तत्रभवार्थे उत्सादित्वादञ् ञित्त्वादाद्युदात्तः। चारुम् चरगतिभक्षणयोः दृसनिजनिचरिचटिरहिभ्योञ्युण् णित्त्वादुपधावृद्धिः ञित्त्वादाद्युदात्तः। तूर्ण्यर्थः तूर्णि ञित्वरासंभ्रमेइत्यस्माद्वहिश्रीत्यादिनानिप्रत्ययः ञिच्च अर्थः ऋगतौ उषिकुषिगार्तिभ्यस्थन्निति थन् बहुव्रीहौपूर्वपदस्वरः। वृषायमाणः वृषइवाचरतीत्यर्थे कर्तुःक्यङ्सलोपश्चेतिक्यङ् अकृत्सार्वधातुकयोर्दीर्घः ङित्त्वादनुदात्तङित आत्मनेपदं लट् शानच् तस्यलसार्वधातुकस्वरेधातुस्वरः। ईट्टे ईडस्तुतावित्यस्यलटिरूपं यद्योगादनिघातः॥ ५॥

॥ इतितृतीयस्यतृतीयेसप्तदशोवर्गः॥ १७॥

तृतीयसवनेसवनीयपुरोडाशस्य तृतीयेधानाइत्यनुवाक्या। सूत्रितञ्च—तृतीयेधानाःसवनेपुरुष्टुतेतितृतीयसवनइति।

सूक्तेषष्ठी—

तृ॒तीये॑धा॒नाःसव॑नेपुरुष्टुतपु॒रो॒ळाश॒माहु॑तंमामहस्वनः।
ऋ॒भु॒मन्तं॒वाज॑वन्तंत्वाकवे॒प्रय॑स्वन्त॒उप॑शिक्षेमधी॒तिभिः॑॥ ६॥

तृ॒तीये॑। धा॒नाः। सव॑ने। पु॒रु॒ऽस्तु॒त॒। पु॒रो॒ळाश॑म्। आऽहु॑तम्।
म॒म॒ह॒स्व॒। न॒ः। ऋ॒भु॒ऽमन्त॑म्। वाज॑ऽवन्तम्। त्वा॒। क॒वे॒।
प्रय॑स्वन्तः। उप॑। शि॒क्षे॒म॒। धी॒तिऽभिः॑॥ ६॥

हेपुरुष्टुत पुरुभिर्बहुभिःस्तोतृभिःस्तुत हेइन्द्र तृतीयेसवनेनोऽस्मदीयान्धानाहुतान्भृष्टयवान् आहुतंपुरोडाशंच मामहस्व भक्षणेनमहय हेकवे इन्द्र प्रयस्वन्तःसंभृतहविष्कावयं ऋभुमन्तं ऋभवोयेकेचनदेवाःतद्वन्तं वाजवन्तं वाजोनामसुधन्वनःपुत्रः तद्वन्तं त्वात्वां धीतिभिः

स्तुतिभिरुपशिक्षेम समीपेपरिचरेम ॥ आहुतं जुहोतेःकर्मणिक्तः गतिरनन्तरइतिगतेःस्वरः । मामहस्व महपूजायांइत्यस्ययङ्लुगन्तस्यलोटि व्यत्ययेनात्मनेपदं शपोलुगभावश्छान्दसः । शिक्षेम शिक्षतेराशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्ययः निघातः । धीतिभिः हिष्ठवत्सरतिशत्थांतानामित्यन्तोदात्तत्वम् ॥ ६ ॥

अथसप्तमी–

पू॒ष॒ण्वते॑तेचकृमाकर॒म्भंहरि॑वते॒हर्य॑श्वायधा॒नाः ।
अ॒पू॒पम॑द्धि॒सग॑णोम॒रुद्भिः॒सोमं॑पिबवृत्र॒हाशू॑रवि॒द्वान् ॥ ७ ॥

पू॒ष॒ण्ऽवते॑ । ते॒ । च॒कृ॒म॒ । क॒र॒म्भम् । हरि॑ऽवते । हरि॑ऽअश्वाय ।
धा॒नाः । अ॒पू॒पम् । अ॒द्धि॒ । सऽग॑णः । म॒रुत्ऽभिः॑ । सोम॑म् ।
पि॒ब॒ । वृ॒त्र॒ऽहा । शू॒र॒ । वि॒द्वान् ॥ ७ ॥

हेइन्द्र पूषण्वते पूषानामकश्चिद्देवःअदन्तकः तद्वते तेतुभ्यं करंभं दधिमिश्रं सक्तुचरुमभक्षणार्थंकुर्मः तथाचश्रुतेः—पूषाप्रपिष्टभागोदन्तकोहीति । हरिवते हरिनामकावश्वौ तद्वते हर्यश्वाय हरितवर्णाश्वयुक्तेन्द्राय तुभ्यं धानाःभक्षणार्थंकुर्मः तथाचमन्त्रवर्णः—ग्रसेतामश्वाविमुचेहशोणादिवेदिवेसदृशीरद्धिधानाइति । मरुद्भिःसगणस्त्वं अपूपं पुरोडाशं अद्धि भक्षय हेशूर असहाय हेइन्द्र वृत्रहावृत्रस्यहन्ता विद्वान्सर्वंजानानस्त्वंसोमंपिब ॥ पूषण्वते पूषशब्दस्यमतुप् अनोनुडितिनुडागमः रषाभ्यामितिणत्वम् । चकृम करोतेश्छान्दसेवर्तमानेलिटि क्रादित्वादिडभावः निघातः । हरिवते छन्दसीरइतिमतुपोवत्वम् ॥ ७ ॥

अथाष्टमी–

प्रति॑धा॒नाभ॑रत॒तूय॑मस्मैपुरो॒ळाशं॑वी॒रत॑मायनृ॒णाम् ।
दि॒वेदि॑वेस॒दृशी॑रिन्द्र॒तुभ्यं॒वर्ध॑न्तुत्वासोम॒पेया॑यधृष्णो ॥ ८ ॥ १८ ॥

प्रति॑ । धा॒नाः । भ॒र॒त॒ । तूय॑म् । अ॒स्मै॒ । पु॒रो॒ळाश॑म् । वी॒रऽत॑माय ।
नृ॒णाम् । दि॒वेऽदि॑वे । स॒ऽदृशीः॑ । इ॒न्द्र॒ । तुभ्य॑म् । वर्ध॑न्तु ।
त्वा॒ । सो॒म॒ऽपेया॑य । धृ॒ष्णो॒ इति॑ ॥ ८ ॥ १८ ॥

---

१ ऋ॰ सं॰ ३. २. १७. ।

यजमानोध्वर्य्वादीन्प्रतिब्रूते—हे अध्वर्य्वादयः अस्माइन्द्रायधानाः तूयंक्षिप्रंप्रतिभरत संपादयत नृणांवीरतमायास्माइन्द्रायपुरोडाशंचसंपादयत अथप्रत्यक्षकृतः हेधृष्णो शत्रूणामभिभवनशील हेइन्द्र सदृशीरेकविधाः स्तुतयः तुभ्यंत्वदर्थं दिवेदिवे प्रतिदिवसमस्माभिःक्रियन्ते ताःस्तुतयः सोमपेयाय सोमपानार्थंत्वांवर्धन्तु उत्साहेनप्रवृद्धंकुर्वन्तु ॥ सदृशीः समानान्ययोश्चेतिकञ्प्रत्ययः टिड्ढाणञित्यादिनाङीप् दृग्दृशवतुष्वितिसमानस्यसभावः ॥ ८ ॥

॥ इतितृतीयस्यतृतीयेष्टादशोवर्गः ॥ १८ ॥

इन्द्रापर्वतेतिचतुर्विंशत्यृचंपंचदशंसूक्तं अत्रेयमनुक्रमणिका—इन्द्रापर्वताचतुर्विंशतिराद्यैन्द्रापार्वती पञ्चदश्यादिद्वेवाचेससपर्यैंचतस्रोरथाङ्गस्तुतयोन्त्याअभिशापार्थास्तावसिष्ठद्वेषिण्योनवसिष्ठाःशृण्वन्ति दशमीषोळश्यौजगत्यौ त्रयोदशीगायत्रीद्वादशीविंशीद्वाविंश्योनुष्टुभोष्टादशीबृहतीति । विश्वामित्रऋषिः दशमीषोळशीच द्वे जगत्यौ त्रयोदशीगायत्री द्वादशीविंशीद्वाविंश्यस्तिस्रोऽनुष्टुभः अष्टादशीबृहती शिष्टास्त्रिष्टुभः आद्याइन्द्रापर्वतदेवताका पञ्चदशीषोडश्यौवाग्देवत्ये तदुत्तराश्चतस्रोरथाङ्गदेवताकाः शिष्टाऐन्द्र्यः ।

तत्रप्रथमा—

इन्द्रा॑पर्वताबृह॒तारथे॑नवा॒मीरिष॒आव॑हतंसु॒वीराः॑ ।
वी॒तंह॒व्यान्य॑ध्व॒रेषु॑देवा॒वर्धे॑थांगी॒र्भिरिळ॑या॒मद॑न्ता ॥ १ ॥

इन्द्रा॑पर्वता । बृ॒ह॒ता । रथे॑न । वा॒मीः । इषः॑ । आ । व॒ह॒त॒म् ।
सु॒ऽवीराः॑ । वी॒तम् । ह॒व्यानि॑ । अ॒ध्व॒रेषु॑ । दे॒वा॒ । वर्धे॑थाम् ।
गी॒ःऽभिः । इळ॑या । मद॑न्ता ॥ १ ॥

इन्द्रापर्वता इन्द्रश्चपर्वतश्च हेइन्द्रापर्वतौ बृहतारथेनागत्य वामीः वननीयाः सुवीराः शोभनपुत्रोपेताः इषोन्नानि आवहतं अस्मदर्थंधारयतं प्रयच्छतमित्यर्थः किंच हेदेवौ द्योतमानौ अध्वरेष्वस्मत्संबन्धिषुयज्ञेषु हव्यानि हवनयोग्यानिपुरोडाशादीनिहवींषि वीतं भक्षयतं तथा इळया अस्माभिर्दत्तेनहविषा मदन्ता हृष्यन्तौ युवां गीर्भिःस्तुतिलक्षणाभिरस्मदीयाभिर्वाग्भिर्वर्धेथां समृद्धौभवतम् ॥ इन्द्रापर्वता आमन्त्रितस्यपादादित्वात्षाष्ठिकमाद्युदात्तत्वम् । सुवीराः बहुव्रीहौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । वीतं वीकान्त्यादिष्वित्यस्यलोटि अदादित्वाच्छपोलुक् प्रत्ययस्वरः । वर्धेथां वृधुवृद्धावित्यस्यलोटि आथामोलसार्वधातुकस्वरेधातुस्वरः ॥ १ ॥

Funding by IKS-MoE

अहर्गणेष्वंत्यवर्जितेष्वहःसु हारियोजनस्यतिष्ठासुकमित्यनुवाक्या सूत्रितश्च—तिष्ठासुकंमघवन्मापरागाअयंयज्ञोदेवयाअयंमियेधइति ।

सूक्तेद्वितीया—

ति॒ष्ठा॒सुकँ॑मघव॒न्मापरा॑गाः॒सोम॑स्य॒नुत्वा॒सुषु॑तस्ययक्षि ।
पि॒तुर्नपु॒त्रःसिच॒मार॑भेत॒इन्द्र॒स्वादि॑ष्ठयागि॒राश॑चीवः ॥ २ ॥

तिष्ठ॑ । सु । क॒म् । म॒घ॒ऽव॒न् । मा । परा॑ । गा॒ः । सोम॑स्य ।
नु । त्वा॒ । सुऽसु॑तस्य । य॒क्षि॒ । पि॒तुः । न । पु॒त्रः । सिच॑म् ।
आ । र॒भे॒ । ते॒ । इन्द्र॑ । स्वादि॑ष्ठया । गि॒रा । श॒ची॒ऽइ॒वः ॥ २ ॥

हेमघवन् धनवन्निन्द्र कं सुखेनास्मिन्यज्ञेसुतिष्ठ सुष्ठुकंचित्कालमत्रतिष्ठ मापरागाः अस्मदीयाद्यज्ञान्मागच्छ तत्रकारणमाह—सुषुतस्य सुष्ठु अभिषुतेनसोमस्य सोमेन नु क्षिप्रं त्वा त्वां यक्षि यजे हेशचीवः शक्तिमन्निन्द्र ते तव सिचं वस्त्रप्रान्तंस्वादिष्ठया स्वादुतरयास्तुतिलक्षणयागिरा आरभे आलभे गृह्णामीत्यर्थः तत्रदृष्टान्तः—पितुर्न यथा पुत्रः मधुरयावाचापितुर्जनकस्यचेलांचलंगृह्णातितद्वत् ॥ सुकमितिनिपातद्वयम् प्रथमस्यनिपाताआद्युदात्ताइत्याद्युदात्तत्वम् द्वितीयस्यचादयोनुदात्ताइत्यनुदात्तत्वं । सोमस्ययक्षि यजदेवपूजासङ्गतिकरणदानेषुस्वरितञित इत्यात्मनेपदं तस्यलुङि सिचएकाचइतीट्प्रतिषेधः व्रश्चादिनाषत्वं षढोःकःसीतिकत्वं सिचःसकारस्यषत्वं निघातः । रभे डुलभष्प्राप्तौ लट्युत्तमइटिरूपं रलयोरभेदः निघातः । स्वादिष्ठया स्वादुशब्दादिष्ठनिरूपं नित्त्वादाद्युदात्तः ॥ २ ॥

अथतृतीया—

शंसा॑वाध्व॒र्यो॒प्रति॑मेगृणी॒हीन्द्रा॑य॒वाहः॑कृणवाव॒जुष्ट॑म् ।
एदंब॒र्हिर्यज॑मानस्यसी॒दाथा॑चभूदु॒क्थमिन्द्रा॑यश॒स्तम् ॥ ३ ॥

शंसा॑व । अध्व॒र्यो॒ इति॑ । प्रति॑ । मे॒ । गृ॒णी॒हि॒ । इन्द्रा॑य । वाहः॑ ।
कृ॒ण॒वा॒व॒ । जुष्ट॑म् । आ । इ॒दम् । ब॒र्हिः । यज॑मानस्य ।
सी॒द॒ । अथ॑ । च॒ । भू॒त् । उ॒क्थम् । इन्द्रा॑य । श॒स्तम् ॥ ३ ॥

Funding by IKS-MoE

शंसिष्यन्होताध्वर्युंप्रतिब्रूते—हेअध्वर्यो आवांशंसाव होतस्त्वमेवशंससि कथमहंशंसानि अतआह प्रतिमेगृणीहीति त्वंमेप्रतिगृणीहि ओथामोदैवेत्यादिकोहोतुरुत्साहजननःप्रतिगरस्तंदत्स्व तथेन्द्रायजुष्टंप्रीतियुक्तंवाहःस्तोत्रंकृणवाव करवाव त्वंयजमानस्यइदंबर्हिः अस्मिन्बर्हिष्यासीद उपविश अथचानन्तरं इन्द्रायेन्द्रार्थमावाभ्यांक्रियमाणमुक्थंशस्त्रं शस्तंप्रशस्तमभूत् भवतु ॥ शंसाव शंसुस्तुतावित्यस्यलोटयुत्तमद्विवचनेरूपं आडुत्तमस्येत्याडागमः उत्तमस्य पिद्वद्भावादनुदात्तत्वेधातुस्वरः । मे अनुप्रतिगृणश्चेतिसंप्रदानसंज्ञा । जुष्टं नित्यंमन्त्रेइत्याद्युदात्तत्वम् ॥ ३ ॥

अथचतुर्थी—

जा॒येदस्तं॑मघव॒न्त्सेदु॒योनि॒स्तदित्त्वा॑यु॒क्ताहर॑योवहन्तु ।
य॒दाक॒दाचं॑सु॒नवा॑म॒सोमं॑म॒ग्निष्ट्वा॑दू॒तोधन्वा॒त्यच्छ॑ ॥ ४ ॥

जा॒या । इत् । अस्त॑म् । म॒घ॒ऽव॒न् । सा । इत् । ऊँ॒ इति॑ ।
योनि॑ः । तत् । इत् । त्वा॒ । यु॒क्ताः । हर॑यः । व॒ह॒न्तु॒ । य॒दा ।
क॒दा । च॒ । सु॒नवा॑म । सोम॑म् । अ॒ग्निः । त्वा॒ । दू॒तः ।
ध॒न्वा॒ति॒ । अच्छ॑ ॥ ४ ॥

हेमघवन् धनवन्निन्द्र अस्तं अस्यन्तेक्षिप्यन्तेपदार्थाअत्रेत्यस्तंगृहं जायेत् जायैवगृहं भवति नगृहंगृहमित्याहुर्गृहिणीगृहमुच्यतइतिस्मृतेः । तथा सेत् साजायैव योनिः पुरुषस्य मिश्रणस्थानं उप्रसिद्ध्यर्थः तस्मात्तदित् तत्रगृहेएवयुक्तारथेयोजिताहरयोऽश्वास्त्वात्वां वहन्तु वयंतु यदाकदाच त्वदर्थंसोमंसुनवामाभिषुतंकरवाम तदास्माभिःप्रहितोदूतोऽग्निं त्वात्वामच्छाभिमुख्येनधन्वाति गच्छेत् ॥ अस्तं असुक्षेपणे असिहसिमृग्रिण्वामीत्यादिनातन्प्रत्ययः नित्त्वादाद्युदात्तः । सुनवाम षुञ्अभिषवेइत्यस्यलोटिरूपं यद्वृत्तयोगादनिघातः । त्वा युष्मत्तत्ततक्षुष्वन्तःपादमितिसंहितायांषत्वं । धन्वाति धविर्गत्यर्थः लेट्याडागमेरूपं निघातः ॥ ४ ॥

अहर्गणेअन्त्यवर्जितेष्वहःसुहारियोजनस्यवैकल्पिकीपरायाहीत्यनुवाक्या । परायाहिमघवन्नाचयाहीतिवानुवाक्येतिसूत्रितम् ।

सूक्तेपञ्चमी–

परा॑याहिमघव॒न्नाच॑या॒हीन्द्र॑भ्रातरुभ॒यत्रा॑ते॒अर्थ॑म् ।
यत्रा॒रथ॑स्यबृह॒तोनि॒धानं॑वि॒मोच॑नंवा॒जिनो॒रास॑भस्य ॥ ५ ॥१९॥

परा॑ । या॒हि॒ । म॒घ॒ऽव॒न् । आ । च॒ । या॒हि॒ । इन्द्र॑ । भ्रा॒त॒ः ।
उ॒भ॒यत्र॑ । ते॒ । अर्थ॑म् । यत्र॑ । रथ॑स्य । बृ॒ह॒तः । नि॒ऽधान॑म् ।
वि॒ऽमोच॑नम् । वा॒जिन॑ः । रास॑भस्य ॥ ५ ॥ १९ ॥

हेमघवन् धनवन्निन्द्र त्वंपरायाहि अस्मद्देवयजनात्पराङ्मुखोगृहंप्रतिगच्छच अथवा देवयजनंप्रत्यायाहि हेभ्रातः पोषक उभयत्रापितेतव अर्थं अर्यते प्राप्यतइत्यर्थःप्रयोजनं अस्तितत्रजाया अत्रसोमः प्रयोजनान्तरमाह–यत्रगृहंप्रतिगमनेबृहतोमहतोरथस्योपरिनिधानमवस्थानंप्रयोजनं अत्रस्थितौरासभस्यहेषारवंकुर्वतोवाजिनोऽश्वस्यरथाद्विमोचनंप्रयोजनं ॥ अर्थं ऋगतौ उषिकुषिगार्तिभ्यस्थन्नितिथन् नित्स्वरः । निधानं दधातेर्भावेल्युट् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । रासभस्य रासृशब्दे रासिवल्लिभ्यांचेतिकर्तर्यभच्प्रत्ययः ग्रामादित्वादाद्युदात्तः ॥५॥

॥ इतितृतीयस्यतृतीयेएकोनविंशोवर्गः ॥ १९ ॥

अंत्येष्वहःसुहारियोजनस्यअपाःसोममित्यनुवाक्या सूत्रितश्च–हारियोजनोपाःसोममस्तमिन्द्रप्रयाहीति ।

सैषाषष्ठी–

अपा॒ःसोम॒मस्त॑मिन्द्र॒प्रया॑हिकल्या॒णीर्जा॒यासु॒रणं॑गृ॒हेते॑ ।
यत्रा॒रथ॑स्यबृह॒तोनि॒धानं॑वि॒मोच॑नंवा॒जिनो॒दक्षि॑णावत् ॥ ६ ॥

अपा॑ः । सोम॑म् । अस्त॑म् । इ॒न्द्र॒ । प्र । या॒हि॒ । क॒ल्या॒णीः ।
जा॒या । सु॒ऽरण॑म् । गृ॒हे । ते॒ । यत्र॑ । रथ॑स्य । बृ॒ह॒तः ।
नि॒ऽधान॑म् । वि॒ऽमोच॑नम् । वा॒जिन॑ः । दक्षि॑णाऽवत् ॥ ६ ॥

हेइन्द्र सोममपाः अत्रैवस्थित्वासोमंपिब पीत्वा अस्तंगृहंप्रयाहि प्रकर्षेणगच्छ ते तवगृहेकल्याणीः मंगलकारिणीः जायाशचीविद्यते सुरणंशोभनगीतादिध्वनिश्चास्ति यद्वा

Funding by IKS-MoE

सुरणं सुरमणीयंयथाभवतितथागृहेजायातिष्ठति यत्रेत्यादिगतं दक्षिणावद्व अत्रस्थितौस-त्यां रथेयोजितानांवाजिनांविमोचनं खादनपानादिनादक्षिणावत्प्रयोजनवद्भवति विमुक्तेभ्योवा-जिभ्योखादनंपानंचोपहरन्ति ॥ अपाः पापाने लुङि गातिस्थेतिसिचोलुक् अडागमस्वरः । कल्याणीः कल्याणमस्यास्तीतिमत्वर्थेछन्दसीवनिपाविति ईप्रत्ययः । सुरणं रणशब्दार्थः अ-स्मादकुच्छ्रार्थेखल् लित्स्वरः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः समासेकृदुत्तरपदस्वरः ॥ ६ ॥

अथसप्तमी—

इ॒मेभो॒जाअङ्गि॑रसो॒विरू॑पादि॒वस्पु॒त्रासो॒असु॑रस्यवी॒राः ।
वि॒श्वामि॑त्राय॒दद॑तोम॒घानि॑सहस्रसा॒वेप्रति॑रन्त॒आयुः॑ ॥ ७ ॥

इ॒मे । भो॒जाः । अङ्गि॑रसः । विऽरू॑पाः । दि॒वः । पु॒त्रासः॑ । असु॑रस्य । वी॒राः । वि॒श्वामि॑त्राय । दद॑तः । म॒घानि॑ । स॒ह॒स्र॒ऽसा॒वे । प्र । ति॒र॒न्ते॒ । आयुः॑ ॥ ७ ॥

हेइन्द्र इमेयागंकुर्वाणाः भोजाः सौदासाः क्षत्रियाः तेषांयाजकाविरूपानानारूपामे-धातिथिप्रभृतयोंगिरसश्च दिवोसुरस्यदेवेभ्योपिबलवतोरुद्रस्यपुत्रासःपुत्रावीराबलवन्तोमरुतःते सर्वेविश्वामित्रायमह्यंसहस्रसावे सहस्रंसूयतेऽत्रेतिसावोश्वमेधः तस्मिन्नश्वमेधे मघानिमहनी-यानिधनानिददतःप्रयच्छन्तःसन्तः आयुर्जीवनमन्नंवाप्रतिरन्ते प्रकर्षेणवर्धयन्ति ॥ दिवस्पुत्रा-सइतिसंहितायांषष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् । ददतः डुदाञ्दानेइत्यस्यशतरिरूपं अभ्यस्तानामादिरित्याद्युदात्तत्वम् । तिरन्ते तरतेर्व्यत्ययेनशः ॥ ७ ॥

अथाष्टमी—

रू॒पंरू॑पंम॒घवा॑बोभवीतिमा॒याःकृ॑ण्वा॒नस्त॒न्वं१॑परि॒स्वाम् ।
त्रिर्यद्दि॒वःपरि॑मुहू॒र्तमागा॒त्स्वैर्मन्त्रै॒रनृ॑तुपाऋ॒तावा॑ ॥ ८ ॥

रू॒पम्ऽरू॑पम् । म॒घऽवा॑ । बो॒भ॒वी॒ति॒ । मा॒याः । कृ॒ण्वा॒नः । त॒न्व॑म् । परि॑ । स्वाम् । त्रिः । यत् । दि॒वः । परि॑ । मु॒हू॒र्तम् । आ । अगा॑त् । स्वैः । मन्त्रैः॑ । अनृ॑तुऽपाः । ऋ॒तऽवा॑ ॥ ८ ॥

Funding by IKS-MoE

मघवाधनवानिन्द्रः रूपंरूपं यद्यद्रूपंकामयतेतत्तद्रूपंबोभवीति तत्तद्रूपात्मकोभवति तत्रकारणमुच्यते– मायाः अनेकरूपग्रहणसामर्थ्योपेताःकृण्वानःकुर्वाणः स्वांतन्वंस्वकीयांतनूं परि पञ्चम्यर्थे स्वस्माच्छरीरान्नानाविधानिशरीराणिनिर्मिमीते यद्वा स्वांतनूं नानाविधरूपोपेतांकरोति तथाचमन्त्रवर्णः– इन्द्रोमायाभिःपुरुरूपंइति । यद्यस्मात्स्वैर्मंत्रैःस्वकीयैःस्तुतिलक्षणैर्वाक्यैराहूतः अनृतुपाः नकेवलमृतुष्वेवपिबति किन्तु अनृतुष्वपिबहुशःसोमंपिबन्नित्यर्थः ऋतावा सत्यवान्तादृशइन्द्रः दिवः स्वर्गलोकात्परिमुहूर्तमेकस्मिन्नेवमुहूर्ते नानादेशवर्तिषुयज्ञेषु तत्रापि त्रिः त्रिषुसवनेषुआगात् आगच्छति ॥ बोभवीति भवतेर्यङ्लुकि तिपि यङोवेतीडागमः निघातः । अगात् इणोलुङिरूपं यद्वृत्तयोगादनिघातः ॥ ८ ॥

अथनवमी–

म॒हाँऋषि॑र्देव॒जादे॒वजू॒तोस्त॑भ्ना॒त्सिन्धु॑मर्ण॒वंनृ॒चक्षाः॑ ।
वि॒श्वामि॑त्रो॒यदव॑हत्सु॒दास॒मप्रि॑यायतकु॒शि॒केभि॒रिन्द्रः॑॥ ९ ॥

म॒हान् । ऋषिः॑ । दे॒व॒ऽजाः । दे॒वऽजू॑तः । अस्त॑भ्नात् । सिन्धु॑म् ।
अ॒र्ण॒वम् । नृ॒ऽचक्षाः॑ । वि॒श्वामि॑त्रः । यत् । अव॑हत् ।
सु॒ऽदास॑म् । अप्रि॑यायत । कु॒शि॒केभिः॑ । इन्द्रः॑ ॥ ९ ॥

महान् तपसा अतिशयितसामर्थ्यवान् ऋषिरतीन्द्रियार्थद्रष्टा देवजाःद्योतमानानां तेजसांजनयिता देवजूतः तैस्तेजोभिराकृष्टः नृचक्षाः नृणां कर्मनेतॄणांअध्वर्य्वादीनामुपद्रष्टा सविश्वामित्रः अर्णवमुदकवन्तंसिन्धुंविपाट् शुतुद्र्योः संभेदमस्तभ्नात् निरुद्धवेगमकरोत् किञ्च सविश्वामित्रःसुदासंपैजवनंराजानंयद्यदा अवहत् अयाजयत् तदानीमिन्द्रःकुशिकेभिः कुशिकगोत्रोत्पन्नैर्ऋषिभिःसहाप्रियायत प्रियइवाचरत् ॥ अवहत् वहप्रापणेइत्यस्यलङिरूपं यद्योगादनिघातः । अप्रियायत प्रियइवाचरतीत्यर्थे कर्तुःक्यङ्सलोपश्चेतिक्यङ् तदन्ताल्लङिरूपं पादादित्वादनिघातः ॥९॥

अथदशमी–

हं॒साइ॑वकृणुथ॒श्लोक॒मद्रि॑भि॒र्मद॑न्तोगी॒र्भिर॑ध्व॒रेसु॒तेसचा॑ ।
दे॒वेभि॑र्विप्राऋषयोनृचक्षसो॒विपि॑बध्वंकुशिकाःसो॒म्यंमधु॑ ॥ १० ॥२०॥

---

[1] ऋ० सं० ४. ७. ३३. ।

हंसाःऽइव । कृणुथ । श्लोकम् । अद्रिऽभिः । मदन्तः । गीःऽभिः ।
अध्वरे । सुते । सचा । देवेभिः । विप्राः । ऋषयः । नृऽचक्षसः ।
वि । पिबध्वम् । कुशिकाः । सोम्यम् । मधु ॥ १० ॥ २० ॥

हेविप्राः मेधाविनोहेऋषयोऽतीन्द्रियार्थस्यद्रष्टारोहेनृचक्षसोनृणांकर्मनेतॄणांविशेषेणद्रष्टारः हेकुशिकाः कुशिकगोत्रोत्पन्नाः हेपुत्राः अध्वरेयज्ञेअद्रिभिर्ग्रावभिःसोमेसुते अभिषुतेसोमेसतिगीर्भिर्मदन्तःस्तुतिभिर्देवान्मादयन्तोयूयं श्लोकं श्लोक्यतेशस्यतेऽनेनेतिश्लोकःशस्त्रं कृणुथ कृणुष्व सम्यगुच्चारय तत्रदृष्टान्तः—हंसाइव यथाहंसाःसम्यक्शब्दंकुर्वन्तितद्वत् किंच देवेभिःसचा यष्टव्यदेवैःसहितायूयं सोम्यंसोममयं मधुमधुकरंरसं विपिबध्वं परस्परव्यतिहारेणपिबत ॥ श्लोकं श्लोकृशब्दे करणेघञ् ञित्त्वादाद्युदात्तः । मदन्तः मदीहर्षेइत्यस्यान्तर्भावितण्यर्थस्यव्यत्ययेनशप् । पिबध्वं पापाने कर्तरिकर्मव्यतिहारेइत्यात्मनेपदम् । सोम्यं सोमशब्दात् मयेचेतियप्रत्ययः ॥ १० ॥

॥ इतितृतीयस्यतृतीयेविंशोवर्गः ॥ २० ॥

अथैकादशी—

उपप्रेतकुशिकाश्चेतयध्वमश्वंरायेप्रमुञ्चतासुदासः ।
राजावृत्रंजङ्घनत्प्रागपागुदगथायजातेवरआपृथिव्याः ॥ ११ ॥

उप । प्र । इत । कुशिकाः । चेतयध्वम् । अश्वम् । राये ।
प्र । मुञ्चत । सुऽदासः । राजा । वृत्रम् । जङ्घनत् । प्राक् ।
अपाक् । उदक् । अथ । यजाते । वरे । आ । पृथिव्याः ॥ ११ ॥

हेकुशिकाः कुशिकगोत्रोत्पन्नाः हेपुत्राः उपप्रेत अश्वस्यसमीपेप्रकर्षेणगच्छत तत्रगत्वाचेतयध्वं सावधानाभवत यद्वा अश्वरक्षिणःसावधानान्कुरुत सुदासः पैजवनस्यराज्ञोऽश्वं राये तस्यदिग्विजयेनधनलाभायप्रमुञ्चत राजादेवानांस्वामीन्द्रः वृत्रं कर्मविघ्नकारिणमसुरंप्रागपागुदक् पूर्वपश्चिमोत्तरेषुदेशेषुजंघनत् भृशंजघान तस्मादश्वंविमुञ्चतेतिभावः अथानन्तरं आपृथिव्यावरेउत्तमेदेवयजनदेशेआयजाते समन्तात्सराजायजेत ॥ चेतयध्वं चितीसंज्ञानेइत्यस्यण्यन्तस्यलोटिरूपं आमन्त्रितस्याविद्यमानत्वेन तिङउत्तरत्वान्ननिघातः । जंघनत् हनहिंसागत्योरित्यस्य यङ्लुकिनुगतोनुनासिकान्तस्येत्यभ्यासस्यनुगागमः तदन्ताल्लेटयडागमः प्राक्अंचतेः

क्विनिरूपं अनिगन्तोंचतौवप्रत्ययेइतिगतेःस्वरः । यजाते यजतेर्लेट्यडागमः निघातः । वरे वृञ्वरणेइत्यस्माद्ग्रहवृद्दनिश्चिगमश्चेत्यप्रत्ययः तस्यपित्त्वादनुदात्तत्वेधातुस्वरः ॥ ११ ॥

अथद्वादशी–

यइ॒मेरोद॑सीउ॒भेअ॒हमिन्द्र॒मतु॑ष्टवम् ।
वि॒श्वामि॑त्रस्यरक्षति॒ब्रह्मे॒दंभार॑तं॒जन॑म् ॥ १२ ॥

यः । इ॒मे इति॑ । रोद॑सी॒ इति॑ । उ॒भे इति॑ । अ॒हम् । इन्द्र॑म् । अतु॑स्तवम् ।
वि॒श्वामि॑त्रस्य । र॒क्ष॒ति॒ । ब्रह्म॑ । इ॒दम् । भार॑तम् । जन॑म् ॥ १२ ॥

हेकुशिकाः कुशिकपुत्राःयोहंविश्वामित्रः उभेइमेरोदसीद्यावापृथिव्यौ इन्द्रमतुष्टवं स्तवयामि द्यावापृथिवीभ्यामिन्द्रस्यस्तोत्रंमयाकारितमित्यर्थः यद्वा उभयोरोदस्योरंतरवस्थितमिन्द्रंस्तौमि स्तोत्रंकुर्वाणस्यविश्वामित्रस्यममेदमिन्द्रविषयंब्रह्मस्तोत्रंभारतं भरतकुलंजनंरक्षतिपालयति ॥ अतुष्टवं ष्टुञ्स्तुतौ ण्यन्तस्यलुङिचङिरूपं यद्वृत्तयोगादनिघातः । भारतं भरतशब्दउत्सादिः ञित्त्वादाद्युदात्तः ॥ १२ ॥

अथत्रयोदशी–

वि॒श्वामि॑त्राअरासत॒ब्रह्मेन्द्रा॑यव॒ज्रिणे॑ । कर॒दिन्नः॑सु॒राध॑सः ॥ १३ ॥

वि॒श्वामि॑त्राः । अ॒रा॒स॒त॒ । ब्रह्म॑ । इन्द्रा॑य । व॒ज्रिणे॑ ।
कर॑त् । इत् । नः॒ । सु॒ऽराध॑सः ॥ १३ ॥

विश्वामित्राः वज्रिणे वज्रहस्तायेन्द्राय ब्रह्मस्तोत्रमरासत अकुर्वन् स्तुतःसइन्द्रः नोस्मान्सुराधसः शोभनधनोपेतान्करदित् करोत्वेव ॥ अरासत रासृशब्दे इत्यस्यलङि बहुलंछन्दसीतिशपोलुक् निघातः । करत् करोतेर्लुङि च्लेः कृमृदृरुहिभ्यश्छन्दसीत्यङादेशः । सुराधसः आद्युदात्तंद्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वम् ॥ १३ ॥

अथचतुर्दशी–

किंते॑कृण्वन्ति॒कीक॑टेषु॒गावो॒नाशिरं॑दु॒ह्रेनत॑पन्ति॒घर्म॑म् ।
आनो॑भर॒प्रम॑गन्दस्य॒वेदो॑नैचाशा॒खंम॑घवन्रं॑धयानः ॥ १४ ॥

Funding by IKS-MoE

किम् । ते । कृण्वन्ति । कीकटेषु । गावः । न । आऽशिरम् ।
दुह्रे । न । तपन्ति । घर्मम् । आ । नः । भर । प्रऽमगन्दस्य ।
वेदः । नैचाऽशाखम् । मघऽवन् । रन्धय । नः ॥ १४ ॥

हेइन्द्र कीकटेषु अनार्यनिवासेषुजनपदेषु यद्वा कृताभिर्यागदानहोमलक्षणाभिःक्रियाभिः किंफलिष्यतीत्यश्रद्दधानाः प्रत्युत पिबतखादतायमेवलोकोनपरइतिवदन्तोनास्तिकाः कीकटास्तेषुगावस्तेतवकिंकृण्वन्ति नक्वचित्तवोपयोगंकुर्वन्तीत्यर्थः अनुपयोगंदर्शयति—आशिरंसोममिश्रणयोग्यंपयः नदुह्रेनदुहंति किंच धर्मंप्रवर्ग्याख्यकर्मोपयुक्तंमहावीरपात्रंस्वपयःप्रदानद्वारेणनतपन्ति नदीपयन्ति एतेनसान्नाय्याद्यर्थमपिनोपयुज्यन्तइत्यपिसूचितंभवति एवंक्वचिदपिवैदिकेकर्मणिअनुपयुक्तास्ताःगाःनोस्मभ्यमाभरआहर नकेवलंताएव किंतर्हि प्रमगंदस्यद्वैगुण्यादिलक्षणपरिमाणंगतोर्थोमामेवगमिष्यतीतिबुद्ध्यापरेषांददातीतिमगन्दोवार्धुषिकःतस्यापत्यंपुत्रादिःप्रमगन्दः प्रस्कण्वादिवदपत्यार्थःप्रशब्देनद्योत्यते तस्यात्यन्तकुसीदिकुलस्यवेदोधनमाहर किंच हेमघवन्धनवन्निन्द्र नैचाशाखंनीचासुशूद्रयोनिषुउत्पादिताःशाखाः पुत्रपौत्रादिपरंपरायेनसनीचाशाखः शूद्रापत्यैश्चकेवलैःशूद्रावेदीपतत्यधइतिचपातकहेतुत्वेनस्मरणात् तस्यसंबन्धिधनंनैचाशाखंतद्धनंनोऽस्मभ्यंरन्धय साधय एतेषांयद्धनंतवनोपयुज्यतेऽस्मदायत्तंतुतद्धनंयागादिद्वारातवोपयुज्यते तस्मात्तदस्मभ्यंप्रयच्छेतिभावः एतमर्थंयास्कोप्याह—किंतेकुर्वन्तिकीकटेषुगावःकीकटानामदेशोनार्यनिवासःकोकटाःकिंकृताःकिंक्रियाभिरितिप्रेप्सावानैवचाशिरंदुह्रेनतपन्तिघर्मंहर्म्यमाहरनःप्रमगन्दस्यधनानिमगन्दःकुसीदीमांगदोमामागमिष्यतीतिचददातितदपत्यंप्रमगन्दोत्यंतकुसीदिकुलीनःप्रमदकोवायोयमेवास्तिलोकोनपरइतिप्रेप्सुःपण्डकोवापण्डकःपण्डगःप्रार्दकोवाप्रार्दयत्याण्डावाण्डावाणीइवव्रीडयतितत्स्थंनैचाशाखंनीचाशाखोनीचैःशाखःशाखाःशक्नोतेराणिररणात्तन्नोमघवन्रन्धयेतिरध्यतिर्वशगमनेइति ॥ आशिरं आङ्पूर्वाच्छ्रीणातेःक्विपि अपस्पृधेथामित्यादिनाशिर्इत्यादेशः । दुह्रे दुहेर्लिटिइरयोरेइतिरेआदेशः द्विर्वचनस्यविकल्पितत्वात्द्विर्वचनाभावः चादिलोपेविभाषेतिननिघातः । नैचाशाखं तस्येदमित्यण्प्रत्ययः । रंधय रधेर्ण्यन्तस्यरधिजभोरचीतिनुमागमः ॥ १४ ॥

---

१ नि० ६. ३२. ।

ससर्परीदृचेमाहुरितिहासंपुराविदः । सौदासनृपयज्ञेवैवसिष्ठात्मजशक्तिना । विश्वामित्रस्याभिभूतंबलंवाक्चसमंततः । वसिष्ठेनाभिभूतःसह्यवासीदथगाधिजः । तस्मैब्राह्मींतुसौरींवानाम्नावाचंससर्परीं । सूर्यवेश्मनआहृत्यददुर्वैजमदग्नयः । कुशिकानांमतिःसावागमतिंतामपानुदत् ।

अथपञ्चदशी–

स॒स॒र्प॒रीरम॑तिं॒बाध॑मानाबृ॒हन्मि॑मायज॒मद॑ग्निदत्ता ।
आसूर्य॑स्यदुहि॒तात॑तान॒श्रवो॑दे॒वेष्व॒मृत॑मजु॒र्य॑म् ॥ १५ ॥ २१ ॥

स॒स॒र्प॒रीः । अम॑तिम् । बाध॑माना । बृ॒हत् । मि॒मा॒य॒ ।
ज॒मद॑ग्निऽदत्ता । आ । सूर्य॑स्य । दु॒हि॒ता । त॒ता॒न॒ ।
श्रव॑ः । दे॒वेषु॑ । अ॒मृत॑म् । अ॒जु॒र्य॑म् ॥ १५ ॥ २१ ॥

जमदग्निदत्ताजमदग्निभिःप्रज्वलिताग्निभिर्ऋषिभिःसूर्यादाहृत्यास्मभ्यंदत्ता अमतिमज्ञानं बाधमानाससर्परीसर्वत्ररूपशब्दतयासर्पणशीलावाक् बृहत्प्रभूतंयथाभवतितथामिमायनभसिशब्दंकरोति सैषासूर्यस्यदुहितावाग्देवता देवेष्विन्द्रादिषु अजुर्यंक्षयरहितं अमृतममृतलक्षणंश्रवोन्नमाततान समन्तात्स्वाहाकारवाचंतनोति ॥ जमदग्निदत्ता दाण्दानेइत्यस्यनिष्ठायांदोदद्घोरितिददादेशः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । अजुर्यं जूवयोहानौ ऋहलोर्ण्यत् बहुलंछन्दसीत्युत्वं नञ्सुभ्यामित्यन्तोदात्तत्वम् ॥ १५ ॥

॥ इतितृतीयस्यतृतीयेएकविंशोवर्गः ॥ २१ ॥

अथषोडशी–

स॒स॒र्प॒रीर॑भर॒त्तूय॑मे॒भ्योधि॒श्रव॒ःपाञ्च॑जन्यासुकृ॒ष्टिषु॑ ।
साप॒क्ष्या॒३॒॑नव्य॒मायु॒र्दधा॑ना॒यांमे॑पलस्तिजमद॒ग्नयो॑द॒दुः ॥ १६ ॥

स॒स॒र्प॒रीः । अ॒भ॒र॒त् । तूय॑म् । ए॒भ्यः॒ । अधि॑ । श्रव॑ः ।
पाञ्च॑ऽजन्यासु । कृ॒ष्टिषु॑ । सा । प॒क्ष्या॑ । नव्य॑म् । आयु॑ः ।
दधा॑ना । याम् । मे॒ । प॒ल॒स्ति॒ऽज॒म॒द॒ग्नय॑ः । द॒दुः ॥ १६ ॥

Funding by IKS-MoE

ससर्परीःसर्वत्रगद्यपद्यात्मकत्वेनसर्पणशीलावाग्देवतापाञ्चजन्यासु कृष्टिषु निषादपञ्चमाश्चत्वारोवर्णास्तत्संबन्धिनीषुप्रजासुयत्श्रवोऽन्नंविद्यतेतदेभ्योऽस्मभ्यमध्यधिकंयथाभवतितथातूयंक्षिप्रमभरत् भरतु संपादयतु पलस्तिजमदग्नयःपलस्तयःपलिताःदीर्घायुषाजमदग्नयोमुनयःयांवाचंसूर्यांदाहृत्यमेमह्यंददुः अददुः पक्ष्या पक्षस्यपक्षादिनिर्वाहकस्यसूर्यस्यदुहितासावाक् नव्यंनवतरमायुरन्नंजीवनंवादधाना ममकुर्वाणाभवतु॥ पाञ्चजन्यासु बहिर्देवपञ्चजनेभ्यश्चेतिवक्तव्यमितिञ्यप्रत्ययः ञित्त्वादाद्युदात्तः । पक्ष्या पक्षेभवा दिगादित्वाद्यत् तित्स्वरितः । नव्यं नवशब्दाद्धस्वादित्वात्स्वार्थिकोयत् । पलस्तिजमदग्नयः कर्मधारयसमासः समासस्वरः ॥ १६ ॥

अथसप्तदशी–

स्थिरौगावौभवतांवीळुरक्षोमेषाविवर्हिमायुगंविशारि ।
इन्द्रःपातल्येददतांशरीतोररिष्टनेमेअभिनःसचस्व ॥ १७ ॥

स्थिरौ । गावौ । भवताम् । वीळुः । अक्षः । मा । ईषा । वि ।
वर्हि । मा । युगम् । वि । शारि । इन्द्रः । पातल्येइति ।
ददताम् । शरीतोः । अरिष्टऽनेमे । अभि । नः । सचस्व ॥ १७ ॥

राज्ञःसुदासोयज्ञेअवभृथंकृत्वायज्ञशालातोनिर्गन्तुमिच्छन् रथेश्वादिकंयुंजानोविश्वामित्रोरथाङ्गानिस्तौति गावौ गच्छतइतिगावावश्वौ स्थिरौभवतां अक्षश्चवीळुर्दृढोभवतु ईषादण्डश्चमाविवर्हि व्यूढ्ढोविनष्टोमाभवतु युगंचमाविशारि विशीर्णंमाभवतु इन्द्रःपातल्येपतनशीलेकीलकेशरीतोःविशरणात्प्राक्ददतांधारयतु हेअरिष्टनेमे अहिंसितप्रधिविशिष्ट हेरथ नोऽस्मानभि आभिमुख्येन सचस्व संगतोभव ॥ विवर्हि वृहिवृद्धौ विपूर्वोवृहिर्विनाशेवर्तते अस्मात्कर्मकर्तरिलुङि चिण्भावकर्मणोरितिचिण् चिणोलुगितितप्रत्ययस्यलुक् निघातः । युगं युगशब्दउञ्छादिषुरथाद्युपकरणेर्थे घञंतत्वेननिपातनादगुणत्वं तत्रपाठादन्तोदात्तत्वम् । शारि शॄहिंसायामित्यस्यलुङिरूपम् । अरिष्टनेमे पादादित्वात्षाष्ठिकमाद्युदात्तत्वम् ॥ १७ ॥

अथाष्टादशी–

बलंधेहितनूषुनोबलमिन्द्रानळुत्सुनः ।
बलंतोकायतनयायजीवसेत्वंहिबलदाअसि ॥ १८ ॥

Funding by IKS-MoE

बल॑म् । धे॒हि॒ । त॒नूषु॑ । नः॒ । बल॑म् । इ॒न्द्र॒ । अ॒न॒ळुत्ऽसु॑ । नः॒ । बल॑म् ।
तो॒काय॑ । तन॑याय । जी॒वसे॑ । त्वम् । हि । ब॒ल॒ऽदाः । असि॑ ॥ १८ ॥

हेइन्द्र नोस्माकं तनूषु शरीरेषु बलंधेहि नोऽस्मत्संबन्धिरथवाहेष्वनळुत्सुअनडुत्सु बलं धेहि तोकाय पुत्राय तनयाय पौत्रायच जीवसे चिरंजीवनायबलमायुर्विधेहि एतादृशं दातृत्वं कुतइत्यतआह—त्वंबलदाः बलंददातीतिबलदाअसिहि सर्वेषुलोकेषुप्रसिद्धोसिखलु ॥ अनळुत्सु वहप्रापणे अनसिवहेःक्विप् अनसोडश्चेतिक्विप् अनसःसकारस्यडत्वं वहेर्यजादित्वात्संप्रसारणम् वसुस्रंसुध्वंस्वनडुहांदइतिहकारस्यदत्वं कृदुत्तरस्वरः । असि हियोगादनिघातः सिपःपित्त्वादनुदात्तत्वेधातुस्वरः ॥ १८ ॥

अथैकोनविंशी—

अ॒भिव्य॑यस्वखदि॒रस्य॒सार॒मोजो॑धेहिस्पन्द॒नेशिं॒शपा॑याम् ।
अक्ष॑वीळोवीळितवी॒ळय॑स्व॒मायामा॑द॒स्मादव॑जीहिपोनः ॥ १९ ॥

अ॒भि । व्य॒य॒स्व॒ । ख॒दि॒रस्य॑ । सार॑म् । ओजः॑ । धे॒हि॒ । स्प॒न्द॒ने ।
शिं॒शपा॑याम् । अक्ष॑ । वी॒ळो॒ इति॑ । वी॒ळि॒त॒ । वी॒ळय॑स्व । मा ।
यामा॑त् । अ॒स्मात् । अव॑ । जी॒हि॒पः॒ । नः॒ ॥ १९ ॥

हेइन्द्र खदिरस्यसारं सारेणहिआणिःक्रियते तंखदिरस्यसारभूतंआणिंअभिव्ययस्व अभितस्तत्तत्स्थानेषुदार्ढ्यार्थंनिधेहि स्यंदनेरथस्यगमनेसति शिंशपायां शिंशपाख्यदारुनिर्मितेरथस्यफलके ओजोधेहि दार्ढ्यंकुरु हेवीळो दृढ वीळित अस्माभिर्दृढीकृत हेअक्ष वीळयस्व त्वंदृढोभव यद्वा अस्मान्दृढीकुरु यामाद्गच्छतोऽस्माद्रथान्नोऽस्मान्माअवजीहिपः मापीपतः ॥ खदिरस्य अजिरशिशिरेत्यादिनाकिरच्प्रत्ययान्तत्वेननिपातनादन्तोदात्तः । वीळित वीळयतेर्ण्यन्तस्यनिष्ठायामिडागमः निष्ठायांसेटोतिणेर्लुक् । वीळयस्व आमन्त्रितस्याविद्यमानत्वेनपादादित्वादनिघातः । यामात् याप्रापणेइत्यस्मात्अर्तिस्तुसुहुसृइत्यादिनामन्प्रत्ययः नित्त्वादाद्युदात्तः । जीहिपः ओहाकृत्यागे ण्यन्तस्यलुङिचङिरूपं अकारस्येकारश्छान्दसः॥ १९॥

अथविंशी—

अ॒यम॒स्मान्वन॒स्पति॒र्मा॑च॒हामाच॑रीरिषत् ।
स्व॒स्त्यागृ॒हेभ्य॒आव॒साआवि॒मोच॑नात् ॥ २० ॥ २२ ॥

Funding by IKS-MoE

अ॒यम् । अ॒स्मान् । व॒न॒स्पति॑ः । मा । च॒ । हाः । मा । च॒ ।
रि॒रि॒ष॒त् । स्व॒स्ति । आ । गृ॒हेभ्य॑ः । आ । अ॒व॒ऽसै । आ ।
वि॒ऽमोच॑नात् ॥ २०॥२२॥

यजमानआत्मनःश्रेयआशास्ते वनस्पतिः वनस्पतिनिर्मितोयंरथः रथारूढानस्मान्माचहाः मात्याक्षीत् किञ्च मारीरिषत् अस्मान्माविनाशयतु किञ्च आगृहेभ्यः यावद्गृहान्प्राप्नुयामतावदस्मभ्यंस्वस्तिभवतु तथा आवसै पञ्चम्यर्थेचतुर्थी यावद्रथवेगावसानंतावत् आविमोचनात्यावद्रथयोजिताश्वविमोचनंतावत्स्वस्तिभवतु ॥ हाः ओहाक्त्यागे लुङि मन्त्रेघसेत्यादिनासिचोलुक् पुरुषव्यत्ययः चवायोगेप्रथमेतिननिघातः । रिरिषत् रिषहिंसायामित्यस्यण्यन्तस्यलुङिचङिरूपं द्वितीयत्वान्निघातः । गृहेभ्यः ग्रहेः गेहेकइतिकः पञ्चम्यपाङ्परिभिरितिपञ्चमी । अवसै षोन्तकर्मणि क्विप् चतुर्थ्येकवचनेआतोलोपाभावश्छान्दसः वृद्धिः एकादेशस्वरः ॥ २० ॥

॥ इतितृतीयस्यतृतीयेद्वाविंशोवर्गः ॥ २२ ॥

इन्द्रोतिभिरित्याद्याश्चतस्रोवसिष्ठद्वेषिण्यः पुराखलुविश्वामित्रशिष्यःसुदान्नामाराजर्षिरासीत् सचकेनचित्कारणेनवसिष्ठद्वेष्योभूत् । विश्वामित्रस्तुशिष्यस्यरक्षार्थमाभिर्ऋग्भिर्वसिष्ठमशपत इमाअभिशापरूपास्ताऋचोवसिष्ठानशृण्वन्ति ।

तत्राद्यासूक्तेएकविंशी—

इन्द्रो॒तिभि॑र्ब॑हु॒लाभि॑र्नो॑अ॒द्यया॑च्छ्रे॒ष्ठाभि॑र्म॑घवन्छूरजिन्व ।
योनो॒द्वेष्ट्यध॑र॒ःसस्प॑दीष्ट॒यमु॑द्वि॒ष्मस्तमु॑प्रा॒णोज॑हातु ॥ २१ ॥

इन्द्र॑ । ऊ॒तिऽभि॑ः । ब॒हु॒लाभि॑ः । न॒ः । अ॒द्य । या॒त्ऽश्रे॒ष्ठाभि॑ः ।
म॒घ॒ऽव॒न् । शू॒र॒ । जि॒न्व॒ । यः । न॒ः । द्वेष्टि॑ । अध॑रः । सः ।
प॒दी॒ष्ट॒ । यम् । ऊँ॒ इति॑ । द्वि॒ष्मः । तम् । ऊँ॒ इति॑ । प्रा॒णः ।
ज॒हा॒तु॒ ॥ २१ ॥

परस्य शापंकरिष्यन्नादावात्मनोरक्षांकुरुतेप्रथमेनार्धर्चेन—हेशूर शौर्यवन्पराभिभवशक्त हेमघवन्धनवन्निन्द्र अद्यास्मिन्कालेयात् यातयतिर्वधकर्मा यातयतीतियात् सुपां-

Funding by IKS-MoE

सुलुगितिशसोलुक् यातःशत्रून्हिंसतोनोऽस्मानूतिभिस्त्वदीयाभीरक्षाभिर्जिन्व प्रीणय कीदृशीभिः बहुलाभिर्बह्वीभिःश्रेष्ठाभिःप्रशस्यतराभिः अथ शपति नोऽस्मान्यःशत्रुर्द्वेष्टि अस्मद्विषयामप्रीतिंकरोति सःअधरोनिकृष्टःसन्पदीष्ट पततु वयंच यमुद्विष्मःतमुतंद्वेष्यंप्राणःदेहमध्येवर्तमानःपञ्चवृत्तिर्वायुः जहातु परित्यजतु उशब्दौपूरकौ ॥ २१ ॥

अथद्वाविंशी–

परशुंचिद्वितंपतिशिंबलंचिद्विवृंश्चति ।
उखाचिदिन्द्रयेषंन्तीप्रयंस्ताफेनंमस्यति ॥ २२ ॥

परशुम् । चित् । वि । तपति । शिम्बलम् । चित् । वि ।
वृश्चति । उखा । चित् । इन्द्र । येषन्ती । प्रऽयंस्ता । फेनम् ।
अस्यति ॥ २२ ॥

हेइन्द्र परशुंचिव् चिच्छब्दउपमार्थः यथापरशुंकुठारंप्राप्यवृक्षोवितपति विशिष्टतापयुक्तोभवति एवंमदीयोद्वेष्टावितपतु शिंबलंचिव् शल्मलीकुसुमंयथाअनायासेनविवृश्चति विच्छिद्यते एवं सद्वेष्टाविवृश्चति विच्छिन्नावयवोभवतु प्रत्यस्ता प्रहतायेषन्तीस्रवन्तीउखाचित्स्थालीव सद्वेष्टामदीयमंत्रसामर्थ्येनप्रहतःसन्फेनमस्यति फेनंमुखादुद्गिरतु ॥ २२ ॥

अथत्रयोविंशी–

नसायंकस्यचिकितेजनासोलोधंनंयन्तिपशुमन्यंमानाः ।
नावांजिनंवाजिनांहासयन्तिनगर्दंभंपुरोअश्वांन्नयन्ति ॥ २३ ॥

न । सायंकस्य । चिकिते । जनासः । लोधम् । नयन्ति । पशुं ।
मन्यंमानाः । न । अवांजिनम् । वाजिनां । हासयन्ति ।
न । गर्दभम् । पुरः । अश्वांत् । नयन्ति ॥ २३ ॥

पुराखलु तपसःक्षयोमाप्रापदितिशापान्निवृत्तंमौनिनंविश्वामित्रंवसिष्ठपुरुषाःबद्ध्वानीतवन्तः तान्प्रतिविश्वामित्रोब्रूते–हेजनासोजनाः सायकस्यावसानकारिणोविश्वामित्रस्यमंत्रगणसामर्थ्यंनचिकिते भवद्भिर्नज्ञायते अतएवलोधंलुब्धंतपसःक्षयोमाभूदितिलोभेनतूष्णींस्थितमृषिंप-

शुमन्यमानाः पशुइतिनिपातः पशुशब्दसमानार्थः पशुवन्मन्यमानाः एतेनयन्ति बद्ध्वास्वकीयं देशंप्रापयन्ति एवंस्वसामर्थ्यंप्रदर्श्यविसदृशोवसिष्ठोमयासहस्पर्धितुंनार्हतीतिधिक्करोति नावाजिनमिति अवाजिनं वाचांइनोवाजिनः सर्वज्ञः तद्विलक्षणंमूर्खजनंवागिनावागीशाः नहासयन्ति हास्यास्पदंनकुर्वन्ति तेनसहनस्पर्धन्तइत्यर्थः तथागर्दभंरासभं अश्वात्पुरः पुरस्तान्ननयन्ति एवमेवविसदृशोवसिष्ठोनमयास्पर्धितुमीष्टइत्यर्थः ॥ २३ ॥

अथचतुर्विंशी—

इमइन्द्रभरतस्यपुत्राअपपित्वंचिकितुर्नप्रपित्वम् ।
हिन्वन्त्यश्वमरणंननित्यंज्यावाजंपरिणयन्त्याजौ ॥ २४ ॥२३॥

इमे । इन्द्र । भरतस्य । पुत्राः । अपऽपित्वम् । चिकितुः ।
न । प्रऽपित्वम् । हिन्वन्ति । अश्वम् । अरणम् । न । नित्यम् ।
ज्याऽवाजम् । परि । नयन्ति । आजौ ॥ २४ ॥ २३ ॥

हेइन्द्र भरतस्यपुत्राः भरतवंश्याइमेविश्वामित्राअपपित्वमपगमनंवसिष्ठेभ्यःचिकितुर्जानन्ति प्रपित्वंगमनंनजानन्ति शिष्टैःसहतेषांसंगतिर्नास्ति ब्राह्मणाएवतइत्यर्थः अपिच आजौसंग्रामेनित्यंसहजंअरणंन अरिमिववसिष्ठान्प्रत्यश्वंहिन्वन्ति प्रेरयन्ति ततश्चज्यावाजंमौर्वीवलंधनुःपरिणयन्ति वसिष्ठान्हन्तुंशरसंधानेनव्यापयन्ति ॥ २४ ॥

॥ इतितृतीयस्यतृतीयेत्रयोविंशोवर्गः ॥ २३ ॥

॥ इतितृतीयेमण्डलेचतुर्थोनुवाकः ॥ ४ ॥

पञ्चमेनुवाकेनवसूक्तानि तत्रेमंमहइतिद्वाविंशत्यृचंप्रथमंसूक्तंत्रैष्टुभंवैश्वदेवं विश्वामित्रपुत्रस्यवाक्पुत्रस्यवाप्रजापतेरार्षं अत्रेयमनुक्रमणिका—इमंमहेद्व्यधिकोक्तगोत्रःप्रजापतिर्हिवैश्वदेवंहेति । अस्मिन्सूक्तेआद्याग्नेयी ततःपरंसप्तर्चोद्यावापृथिव्याः ततःपराद्युदेवताका दशमोद्यावापृथिव्या एकादशीसावित्री ततःपरंसुक्रुदितित्वाष्ट्री आर्भवोच विद्युद्रथेतिमारुती सारस्वतीच ततःपरंतिस्रोविष्णिवंद्राग्निदेवताकाः स्वदस्वेत्याग्नेयीति एवंवैश्वदेवंसूक्तं सूक्तविनियोगोलैंगिकः । अग्निप्रणयनेराजन्यस्येमंमहइतिप्रतिपत् । पंचम्यांपौर्णमास्यामित्यत्रसूत्रितं—इमंमहेविदथ्यायशूषमिति ।

Funding by IKS-MoE

सूक्तेप्रथमा—

इमंमहेविदथ्यायशूषंशश्वत्कृत्वईड्यायप्रजभ्रुः ।
शृणोतुनोदम्येभिरनीकैःशृणोत्वग्निर्दिव्यैरजस्रः ॥ १ ॥

इमम् । महे । विदथ्याय । शूषम् । शश्वत् । कृत्वः । ईड्याय ।
प्र । जभ्रुः । शृणोतु । नः । दम्येभिः । अनीकैः । शृणोतु ।
अग्निः । दिव्यैः । अजस्रः ॥ १ ॥

महेमहतेविदथ्यायविदथेयज्ञेमन्थनेननिष्पाद्यमानायईड्यायसर्वैःस्तुत्यायाग्नये शूषंसुखकरमिमं स्तोमंशश्वत्कृत्वः भूयोभूयःप्रजभ्रुः प्रभरन्ति प्रकर्षेणधारयन्ति उच्चारयन्तीत्यर्थः सोग्निर्दम्येभिः परेषांदमनकुशलैर्दमेगृहेविद्यमानैर्वाअनीकैस्तेजोभिर्युक्तःसन् नोऽस्मदीयमिमंस्तोत्रंशृणोतु दिव्यैर्दिविभवैस्तेजोभिरजस्रोनिरन्तरंयुक्तोग्निःइमंस्तोत्रंशृणोतु शश्वत्कृत्वईड्यायप्रजभ्रुःरितिस्वानामेवैनंतच्छ्रैष्ठ्यंगमयंतीति[1]ब्राह्मणानुसारेण । महदादिगुणविशिष्टाययजमानायेममग्निंप्रजभ्रुः प्रहरंत्यृत्विजइतिवाव्याख्येयं उत्तरोर्धर्चःसमानएव ॥ विदथ्याय तत्रभवइत्यर्थेभवेछन्दसीतियत् तित्स्वरः । ईड्याय ईडवन्देत्यादिनाउदात्तत्वं । दम्येभिः तत्रसाधुरितियत् यतोनावइत्याद्युदात्तत्वम् । दिव्यैः दिवमर्हतीत्यर्थेछन्दसिचेतियप्रत्ययः । अजस्रः जसुमोक्षणे नमिकंपीत्यादिनाताच्छीलिकोरप्रत्ययः नञासमासेतस्यस्वरः ॥ १ ॥

अथद्वितीया—

महिमहेदिवेअर्चापृथिव्यैकामोमइच्छञ्चरतिप्रजानन् ।
ययोर्हस्तोमेविदथेषुदेवाःसपर्यवोमादयन्तेसचायोः ॥ २ ॥

महि । महे । दिवे । अर्च । पृथिव्यै । कामः । मे । इच्छन् ।
चरति । प्रऽजानन् । ययोः । ह । स्तोमे । विदथेषु । देवाः ।
सपर्यवः । मादयन्ते । सचा । आयोः ॥ २ ॥

---

[1] ऐ० ब्रा० १. २८।

Funding by IKS-MoE

हेस्तोतः महेमहत्यैदिवेद्युलोकदेवतायैमहत्यैपृथिव्यैच महत्प्रजानन्प्रकर्षेणदेवतासामर्थ्यं विद्वांस्त्वंस्तोत्रमर्चंकुरु मेममकामोमनोरथः सर्वान्भोगानिच्छन्चरति सर्वत्रवर्तते आयोर्मनुष्यस्यविदथेषुयज्ञेषुययोर्द्यावापृथिव्योःस्तोमेस्तोत्रेसपर्यवःपूजाकामादेवाइन्द्राद्याःस्तोतारोवासचामादयन्तेह सहमाद्यंतिखलु । पृथिव्यै उदात्तयणइतिविभक्तेरुदात्तत्वम् । सपर्यवः सपर्यामिच्छतीत्यर्थेसुपःक्यच् ॥ २ ॥

अथतृतीया–

युवोर्ऋतंरोदसीसत्यमस्तुमहेषुणःसुवितायप्रभूतम् ।
इदंदिवेनमोअग्नेपृथिव्यैसपर्यामिप्रयसायामिरत्नम् ॥ ३ ॥

युवोः । ऋतम् । रोदसी इति । सत्यम् । अस्तु । महे । सु ।
नः । सुवितायं । प्र । भूतम् । इदम् । दिवे । नमः । अग्ने ।
पृथिव्यै । सपर्यामि । प्रयसा । यामि । रत्नम् ॥ ३ ॥

हेरोदसी द्यावापृथिव्यौ युवोर्युवयोर्ऋतमानृशंस्यंसत्यंयथार्थमस्तु युवांनोऽस्माकंमहेमहतेसुवितायाभ्युदयाययज्ञसमाप्त्यर्थंसुसुष्ठुप्रभूतंप्रभवतं हेअग्ने दिवेपृथिव्यैच इदंनमोऽस्तु प्रयसा हविर्लक्षणेनान्नेनसपर्यामि । परिचरामि रत्नमुत्तमंधनंयामि याचे यातिर्याञ्चाकर्मा ईमहइत्यादिषुपठितत्वात् ॥ सु संहितायांषुञइतिषत्वं । नः संहितायांनश्चधातुस्थोरुषुभ्यइतिणत्वम् । सुविताय इण्गतौ अधिकरणेक्तः शोभनंगम्यतेस्मिन्निति सुवितं उवङादेशश्छान्दसः । भूतं भवतेर्लोटि बहुलंछन्दसीतिशपोलुकिरूपं यद्वा छान्दसेलुङिसिचोगातिस्थेतिसिचोलुक् निघातः । दिवे पृथिव्यै नमःस्वस्तीत्यादिनाचतुर्थी । सपर्यामि कण्ड्वादिःपरिचरणेवर्तते प्रत्ययस्वरः । यामि यातेर्लटिरूपं वाक्यभेदादनिघातः ॥ ३ ॥

अथचतुर्थी–

उतोहिवांपूर्व्याआविविद्रऋतावरीरोदसीसत्यवाचः ।
नरश्चिद्वांसमिथेशूरसातौववन्दिरेपृथिविवेविदानाः ॥ ४ ॥

उतो इति । हि । वाम् । पूर्व्याः । आऽविविद्रे । ऋतंवरी इत्यृतंऽवरी ।
रोदसी इति । सत्यऽवाचः । नरः । चित् । वाम् । समऽइथे ।
शूरऽसातौ । ववन्दिरे । पृथिवि । वेविदानाः ॥ ४ ॥

Funding by IKS-MoE

उतोअपिच हेऋतावरी ऋतंसत्यंतद्वत्यौ हेरोदसी द्यावापृथिव्यौ पूर्व्याः पूर्वेभवाःपुरातनाःसत्यवाचोमहर्षयः वांयुवाभ्यामाविविद्रे हितंतमपेक्षितमर्थंलेभिरेखलु तथा हेपृथिवि शूरसातौ शूराणांसातिर्लाभोयस्मिन्तस्मिन्समिथे संगमननिमित्तेयुद्धे नरश्चिदद्यतनामनुष्याः वांयुवयोर्माहात्म्यंवेविदानाजानन्तः अतः द्यावापृथिव्यौववन्दिरेस्तुवन्ति ॥ आविविद्रे विदिर्लाभेइत्ययमुभयपदी लिटि इरयोरेइतिरेइत्यादेशः सहसुपेत्यत्रसहेतियोगविभागादाङासहसमासः । समिथे इण्गतौ समीणइतिथक्प्रत्ययः प्रत्ययस्वरः ॥ ४ ॥

अथपञ्चमी—

कोअ॒द्धावे॑द॒कइ॒हप्रवो॑चद्दे॒वाँअच्छा॑प॒थ्या॒३॑कासमे॑ति ।
ददृ॑श्रए॒षामव॒मासदां॑सि॒परे॑षु॒यागुह्ये॑षुव्र॒तेषु॑ ॥ ५ ॥ २४ ॥

कः । अ॒द्धा । वे॑द॒ । कः । इ॒ह । प्र । वो॒च॒त् । दे॒वान् । अच्छ॑ ।
प॒थ्या॑ । का । सम् । ए॒ति॒ । ददृ॑श्रे । ए॒षा॒म् । अ॒व॒मा । सदां॑सि ।
परे॑षु । या । गुह्ये॑षु । व्र॒तेषु॑ ॥ ५ ॥ २४ ॥

कोवाअद्धा सत्यभूतंतादृशमर्थंवेददेत्ति कोवा इहास्मिन्प्रज्ञातमर्थंवोचत्ब्रवीति किंतत्तदुच्यते—देवानच्छाभिलक्ष्य कापथ्या पथिसाधुःसमीचीनःकोमार्गःसमेति सम्यक्प्राप्नोतीतिकेनमार्गेणदेवतास्तर्पयितव्याइतिइममर्थंनकश्चिज्जानाति नकोऽपिब्रवीति किंतेदेवाविद्यन्ते बाढमित्याह—एषांदिविस्थितानांनक्षत्ररूपाणांदेवानामवमा अधोमुखानिसदांसिस्थानानिददृश्रेदृश्यन्ते तथापि परेषूत्तमेषुगुह्येषुदुर्ज्ञानेषुव्रतेषुकर्मस्वनुष्ठितेषुच यायानिदिविदेवस्थानानिलभ्यन्ते तत्रागन्तुंकोमार्गइतिवेदमन्तरेणनकश्चिज्जानातीत्यभिप्रायः ॥ अद्धा स्वरादिष्वन्तोदात्तत्वेनपठितत्वादन्तोदात्तः । वोचत् ब्रूञ्व्यक्तायांवाचि लुङि ब्रुवोवचिरितिवच्यादेशः अस्यतिवक्तिख्यातिभ्यइतिच्लेरङादेशः वचउमित्युमागमः निघातः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेचतुर्विंशोवर्गः ॥ २४ ॥

अथषष्ठी—

क॒विर्नृ॒चक्षा॑अ॒भिषी॑मचष्टऋ॒तस्य॒योना॒विघृ॑ते॒मद॑न्ती ।
नाना॑चक्राते॒सद॑नं॒यथा॒वेःस॑मा॒नेन॒क्रतु॑नासंविदा॒ने ॥ ६ ॥

क॒विः । नृ॒ऽचक्षाः॑ । अ॒भि । सी॒म् । अ॒च॒ष्ट॒ । ऋ॒तस्य॑ । योना॑ ।
विघृ॑ते॒ इति॒ विऽघृ॑ते । मद॑न्ती॒ इति॑ । नाना॑ । च॒क्रा॒ते॒ इति॑ । सद॑नम्
यथा॑ । वेः । स॒मा॒नेन॑ । क्रतु॑ना । सं॒वि॒दा॒ने इति॑ स॒म्ऽवि॒दा॒ने ॥ ६ ॥

कविःक्रान्तदर्शी नृचक्षाः नृणांद्रष्टासूर्यः सीमेतेद्यावापृथिव्यौअभ्यचष्ट सर्वतःपश्यति ऋतस्ययोनाजलस्यस्थानेऽन्तरिक्षेमदन्तीहृष्यन्त्यौविघृतेघृतमस्याओषधयः जलममुष्याइत्येवंविधरसोपेतेसमानेन समानमेतदुकमुच्चैत्यवचाहभिः । भूमिंपर्जन्याजिन्वन्तिदिवंजिन्वन्त्यग्न[1]यइति । परस्परप्रीणनाख्येनैकेनक्रतुनाकर्मणासंविदाने परस्परमैकमत्यंप्राप्ते ते द्यावापृथिव्यौ नानापृथग्भूतंसदनंस्थानंचक्राते तथाचश्रुतिः–इमौवैलोकौसहास्तांतौव्यैतां[2]मिति।तत्रदृष्टान्तः–यथावेःकुलायंनानाभवतितद्वत् ॥ अचष्ट चक्षिङ्व्यक्तायांवाचीत्यस्य लङि स्कोःसंयोगाद्योरितिककारलोपः निघातः । संविदाने विदज्ञानइत्यस्यसमोगमीत्यादिनाआत्मनेपदेशानच् चित्त्वादन्तोदात्तः ॥ ६ ॥

अथसप्तमी–

स॒मा॒न्यावियु॑तेदू॒रेअ॑न्तेध्रु॒वेप॒देत॑स्थतुर्जाग॒रूके॑ ।
उ॒तस्वसा॑रायु॒व॒तीभव॑न्ती॒आदु॑ब्रु॒वातेमि॒थु॒नानि॒नाम॑ ॥ ७ ॥

स॒मा॒न्या । वियु॑ते॒ इति॒विऽयु॑ते । दू॒रेअ॑न्ते॒ इति॑ दू॒रेऽअ॑न्ते । ध्रु॒वे ।
प॒दे । त॒स्थ॒तुः॒ । जा॒ग॒रूके॒ इति॑ । उ॒त । स्वसा॑रा । यु॒व॒ती इति॑ ।
भव॑न्ती॒ इति॑ । आत् । ऊँ॒ इति । ब्रु॒वा॒ते॒ इति॑ । मि॒थु॒नानि॑ । नाम॑ ॥ ७ ॥

समान्या समाने परस्परप्रीणनाख्येनकर्मणा ऐकमत्यंगते वियुते वियुज्यवर्तमानेदूरे अन्ते दूरेंतोवसानंययोस्तेंदूरेअन्ते अविनाशिन्यौ ते द्यावापृथिव्यौ जागरूके जागरस्यशीलेसत्यौ ध्रुवे अविनाशिनिपदेंतरिक्षेतस्थतुः तिष्ठतः उतापिच युवती नित्यतरुणे स्वसारा भगिन्यौ एकस्मादात्मनोजातेइतिभवंतीतस्थतुरित्यन्वयः आदु अनन्तरं उःपूरणः मिथुनानिद्वन्द्वानिनामउर्वीपृथ्वीबहुलेदूरेअन्तेरोदसीपुरोहितेइत्यादीनिनामानिब्रुवाते ते परस्परंब्रूतः

---

[1] ऋ० सं० २. ३. २३. । [2] ऐ० ब्रा० ४. २७. ।

Funding by IKS-MoE

कर्मणिकर्तृप्रत्ययः उर्व्यादिभिर्द्वन्द्वनामभिर्द्यावापृथिव्यावुच्येतेइत्यर्थः ॥ समान्या सुपांसुलुगितिविभक्तेर्डादेशः । दूरेअन्ते इणूगतौ दुरीणोलोपश्चेतिरक्प्रत्ययः धातोर्लोपश्च रोरीतिरेफलोपः ढ्रलोपइतिदीर्घः अन्तःशब्दोअमेरसिहसीत्यादिनातन्प्रत्ययान्तः सप्तम्युपमानेबहुव्रीहिः हलदन्तादितिसप्तम्याअलुक् पूर्वपदस्वरः । जागरूके जागृनिद्राक्षयेइत्यस्मात्ताच्छील्येर्थेजागरूकइत्यूकप्रत्ययः प्रत्ययस्वरः । स्वसारा नषट्स्वस्रादिभ्यइतिङीप्प्रतिषेधः ॥ ७ ॥

अथाष्टमी–

विश्वेदे॒तेजनि॑मा॒संवि॑विक्तोम॒होदे॒वान्बिभ्र॑ती॒नव्य॑थेते ।
एज॑द्ध्रु॒वंप॑त्यते॒विश्व॒मेकं॒चर॑त्पत॒त्रिविषु॑णं॒विजा॒तम् ॥ ८ ॥

विश्वा॑ । इत् । ए॒ते इति॑ । जनि॑म । सम् । वि॒वि॒क्तः॒ । म॒हः ।
दे॒वान् । बिभ्र॑ती॒ इति॑ । न । व्य॒थे॒ते॒ इति॑ । एज॑त् । ध्रु॒वम् । प॒त्य॒ते॒ ।
विश्व॑म् । एक॑म् । चर॑त् । प॒त॒त्रि । विषु॑णम् । वि । जा॒तम् ॥ ८ ॥

एतेद्यावापृथिव्यौ विश्वेज्जनिम सर्वाण्यपिभूतजातानिसंविविक्तः अवकाशप्रदानेनसंविभज्यकुरुतः किंच महोमहतोदेवानिन्द्रसूर्यादीन्सरित्समुद्रपर्वतादींश्चबिभ्रती बिभ्राणे अपि नव्यथेते नखिद्येते किंच एजज्जङ्गमात्मकं ध्रुवंस्थावरात्मकंच विश्वंजगदेकंस्थानंपृथिवीमेवपत्यतेऽभिगच्छति तथा चरच्चंचलंपशुजातं पतत्रिपक्षिजातंच विषुणंविष्वक्नानारूपं अनयोर्मध्येवितिष्ठते उपसर्गवशाद्योग्यक्रियाध्याहारः ॥ विविक्तः विचिर्पृथग्भावे जुहोत्यादिः निघातः । बिभ्रती डुभृञ्धारणपोषणयोरित्यस्यशतरि नाभ्यस्ताच्छतुरितिनुमभावः अभ्यस्तस्वरः । एजत् एजृकंपने शतरिरूपम् । पत्यते पदगतौ दिवादिरात्मनेपदी दकारस्यतकारःव्यत्ययेननिघातः ॥ ८ ॥

अथनवमी–

सना॑पुरा॒णमध्ये॑म्या॒रान्म॒हःपि॒तुर्जनि॒तुर्जा॒मितन्नः॑ ।
दे॒वासो॒यत्र॑पनि॒तार॒एवैरु॒रौप॒थिव्यु॑तेत॒स्थुर॒न्तः ॥ ९ ॥

Funding by IKS-MoE

स॒ना॑ । पु॒रा॒णम् । अधि॑ । ए॒मि॒ । आ॒रात् । म॒हः । पि॒तुः ।
ज॒नि॒तुः । जा॒मि । तत् । न॒ः । दे॒वासः॑ । यत्र॑ । प॒नि॒तारः॑ । एवैः॑ ।
उ॒रौ । प॒थि । विऽउ॑ते । त॒स्थुः । अ॒न्तरिति॑ ॥ ९ ॥

हेद्यौः महोमहत्याःपितुःसर्वस्यपालयित्र्याः जनितुर्जनयित्र्याः तव सना सनातनं पुराणंपूर्वक्रमागतंनोऽस्माकंयदेतज्जामित्वं सर्वमेकस्माज्जातमितिद्यौर्भगिनीभवति तादृशं भगिनीत्वं तदारादधुना अध्येमि स्मरामि दिवःपितृत्वेजनयितृत्वेचमन्त्रवर्णः — द्यौर्मेपिताजनितानाभिरत्रेति । यत्रयस्यांदिव्यन्तर्मध्ये उरौविस्तीर्णेव्युते विविक्ते पथि नभसि पनितारस्त्वांस्तुवन्तोदेवासोदेवाः एवैर्गमनसाधनैःस्वैःस्वैर्वाहनैःसहिताःसन्तस्तस्थुः तत्रस्थितादेवामदीयंस्तोत्रंशृण्वन्त्वितिभावः ॥ पुराणं पुराशब्दात्शैषिकार्थे सायंचिरमितिटच्युप्रत्ययः पुराणप्रोक्तेषुब्राह्मणकल्पेष्विति निपातनात्तुडभावः निपातनादेवान्तोदात्तत्वम् । एमि इक्स्मरणे अदादिः लटिरूपं निघातः । व्युते व्येञ्तंतुसंताने कर्मणिक्तः यजादित्वात्संप्रसारणं गतिरनन्तरइतिगतेःप्रकृतिस्वरः । तस्थुः तिष्ठतेर्लिटिरूपं यत्रयोगादनिघातः॥९॥

अथदशमी—

इ॒मंस्तोम॑ंरो॒दसी॒प्रब्र॑वीम्यृदू॒दराः॑शृणवन्नग्निजि॒ह्वाः ।
मि॒त्रःस॒म्राजो॒वरु॑णो॒युवा॑नआदि॒त्यासः॑क॒वयः॑पप्रथा॒नाः ॥१०॥२५॥

इ॒मम् । स्तोम॑म् । रो॒दसी॒ इति॑ । प्र । ब्र॒वी॒मि॒ । ऋ॒दू॒दराः॑ ।
शृ॒ण॒वन् । अ॒ग्निऽजि॒ह्वाः । मि॒त्रः । स॒म्ऽराजः॑ । वरु॑णः ।
युवा॑नः । आ॒दि॒त्यासः॑ । क॒वयः॑ । प॒प्र॒था॒नाः ॥ १० ॥ २५ ॥

हेरोदसी द्यावापृथिव्यौ इमंयुष्मदीयंस्तोमंस्तोत्रंप्रब्रवीमि प्रकर्षेणवदामि ऋदूदराः ऋदुमृदुउदरंयेषांतेऋदूदराः यद्वा मृदुरुदरेसोमोयेषांतेऋदूदराः अग्निजिह्वाः अग्निर्जिह्वास्थानीयोयेषांतेतथोक्ताः सम्राजः सम्यग्दीप्यमानाः युवानोनित्यतरुणाः यद्वा यजमानानभिमतफलैर्मिश्रीकुर्वन्तः कवयःक्रान्तदर्शिनः पप्रथानाःस्वानिस्वानिकर्माणिप्रथयन्तोमित्रादयोदेवाः

---

१ ऋ. सं. २. ३. २०. ।

Funding by IKS-MoE

श्रृणवन् तदिदंस्तोत्रंश्रृणवन्तु ॥ श्रृणवन् श्रुश्रवणेइत्यस्यलेटयडागमः । अग्निजिह्वाः त्रिचक्रादित्वादन्तोदात्तत्वम् । पप्रथानाः प्रथप्रख्यानेइत्यस्यकानचिरूपं चित्त्वादन्तोदात्तः ॥ १० ॥

॥ इतितृतीयस्यतृतीयेपञ्चविंशोवर्गः ॥ २५॥

अथैकादशी—

हिरण्यपाणिःसवितासुजिह्वस्त्रिरादिवोविदथेपत्यमानः ।
देवेषुचसवितःश्लोकमश्रेरादस्मभ्यमासुवसर्वतातिम् ॥ ११ ॥

हिरण्यऽपाणिः । सविता । सुऽजिह्वः । त्रिः । आ । दिवः ।
विदथे । पत्यमानः । देवेषु । च । सवितरिति । श्लोकम् ।
अश्रेः । आत् । अस्मभ्यम् । आ । सुव । सर्वऽतातिम् ॥ ११ ॥

हिरण्यपाणिः दानार्थंहिरण्यंपाणौहस्तेयस्यसतथोक्तः यद्वा देवकर्तृकयागेसवितुर्ऋत्विग्भूतस्यहस्तेप्राशित्रंभक्षणार्थं अध्वर्यवोददुः तत्प्राशित्रंतस्यहस्तौचिच्छेद ततोऽध्वर्यवोहिरण्मयौहस्तौकृत्वासंदधुः ततोयंहिरण्यपाणिः तथाचकौषीतकं—सवित्रेप्राशित्रंप्रतिजहुस्तत्तस्यपाणीप्रचिच्छेदतस्मैहिरण्मयौप्रतिदधुस्तस्माद्धिरण्यपाणिरिति । सुजिह्वः शोभनवाक् सविता विदथेयज्ञे त्रि त्रिषुसवनेषुदिवोनभसःसकाशादापत्यमानःआगच्छन्भवतीतिशेषः परोऽर्धर्चःप्रत्यक्षः हेसवितःत्वंदेवेषुस्तोतृषुविद्यमानंचश्लोकं श्लोक्यतेऽनेनेतिश्लोकःस्तोत्रं तदश्रेः प्रापुहिच आदनन्तरं सर्वतातिंसर्वमपेक्षितंफलमस्मभ्यमासुव प्रेरय ॥ हिरण्यपाणिः हिरण्यशब्दंयास्कोबहुधानिर्वक्ति—हिरण्यंकस्माद्ध्रियतआयम्यमानमितिवाह्रियतेजनाज्जन[1]मित्यादिना । पाणिशब्दंचबहुधानिर्विवेच—पाणिःपणायतेःपूजाकर्मण[2]इति । हर्यगतिकान्त्योः हर्यतेः कन्यन्हिरचेतिकन्यन् हिरइत्ययमादेशोधातोः नित्त्वादाद्युदात्तः बहुव्रीहौपूर्वपदस्वरः । पत्यमानः पदगतौ दिवादिरात्मनेपदी दकारस्यतकारश्छान्दसः । अश्रेः श्रिञ्सेवायामित्यस्यलङि बहुलंछन्दसीतिशपोलुक् चवायोगेप्रथमेतिननिघातः । सुव षूप्रेरणे तुदादिः । सर्वतातिं सर्वदेवात्तातिल् स्वार्थिकोलित्स्वरः ॥ ११ ॥

---

[1] नि० २. १०. । [2] नि० २. २६. ।

Funding by IKS-MoE

अथद्वादशी—

सु॒कृत्सु॑पा॒णिःस्ववाँ॑ऋ॒तावा॑दे॒वस्त्वष्टाव॑से॒तानि॑नोधात् ।
पू॒ष॒ण्वन्त॑ऋभवो॑मादयध्वमू॒र्ध्वग्रा॑वाणोअध्व॒रम॑तष्ट ॥ १२ ॥

सु॒ऽकृत् । सु॒ऽपा॒णिः । स्वऽवा॑न् । ऋ॒तऽवा॑ । दे॒वः । त्वष्टा॑ ।
अव॑से । तानि॑ । न॒ः । धा॒त् । पू॒ष॒ण्ऽवन्तः॑ । ऋ॒भ॒वः॒ ।
मा॒द॒य॒ध्व॒म् । ऊ॒र्ध्वऽग्रा॑वाणः । अ॒ध्व॒रम् । अ॒त॒ष्ट ॥ १२ ॥

सुकृत् सुष्ठुजगतःकर्ता सुपाणिःकल्याणपाणिः स्ववान्धनवान् ऋतावासत्यसंकल्पः त्वष्टादेवः तानियान्यस्माकमपेक्षितानि अवसेरक्षणायनोऽस्मभ्यंधात् ददातु ऋभवः उरुभान्तीत्यृभवः हेऋभवः पूषण्वन्तः पूष्णासहितायूयंमादयध्वं अस्मान्धनप्रदानेनहृष्टान्कुरुत ऊर्ध्वग्रावाणः सोमाभिषवार्थमुद्यतग्रावाणःसन्तःऋत्विजइममस्मदीयमध्वरमतष्टाकुर्वन् ॥ अतष्ट तक्षूत्वक्षूतनूकरणे ऊदित्त्वादत्रेडभावः झलोझलीतिसिलोपः स्कोःसंयोगाद्योरितिककारलोपः बहुवचनस्यैकवचनंछान्दसम् ॥ १२ ॥

अथत्रयोदशी—

वि॒द्युद्र॑थाम॒रुत॑ऋ॒ष्टिमन्तो॑दि॒वोमर्या॑ऋ॒तजा॑ताअ॒यासः॑ ।
सर॑स्वतीशृणवन्य॒ज्ञिया॑सो॒धाता॑र॒यिंस॒हवी॑रंतु॒रासः॑ ॥ १३ ॥

वि॒द्युत्ऽर॑थाः । म॒रुतः॑ । ऋ॒ष्टि॒ऽमन्तः॑ । दि॒वः । मर्याः॑ ।
ऋ॒तऽजा॑ताः । अ॒यासः॑ । सर॑स्वती । शृ॒ण॒व॒न् । य॒ज्ञिया॑सः ।
धात॑ । र॒यिम् । स॒हऽवी॑रम् । तु॒रा॒सः॑ ॥ १३ ॥

विद्युद्रथाः विद्योतमानरथोपेताः ऋष्टिमन्तोदीप्तिमन्तः ऋष्टिरायुधविशेषः तद्वन्तोवा दिवोद्योतमानाः द्योतमानस्यरुद्रस्यपुत्रावामर्याः शत्रूणांमारयितारः मनुष्येभ्योहितावा ऋतजाताः उदकाद्यज्ञाद्वाप्रादुर्भूताः यद्वा ऋतमुदकंजातंयेभ्यः तेऋतजाताः अयासः सततगमनशीलाः यज्ञियासः यज्ञार्हामरुतः सरस्वती गद्यपद्यरूपेणप्रसरणमस्यास्तीतिसरस्वती वाग्देवताच एतेसर्वेदेवामदीयमिमंस्तोमंश्रृणवन् शृण्वन्तु तुरासः अस्माकंफलप्रदानेत्वरणयुक्ताः

Funding by IKS-MoE

हेमरुतः सहवीरं पुत्रसहितंरयिंधनंधात अस्मभ्यंधत्त ॥ धात दधातेर्लोटि बहुलंछन्दसीतिशपोलुक् तप्तनप्तनथनाश्चेतितबादेशः पादादित्वादनिघातः तपःपित्त्वादनुदात्तत्वेधातुस्वरः ।तुरासः तुरत्वरणे इगुपधलक्षणःकः आमन्त्रितत्वान्निघातः ॥ १३ ॥

अथचतुर्दशी–

विष्णुं॒स्तोमा॑सःपुरुद॒स्मम॒र्काभग॑स्येवका॒रिणो॒याम॑निग्मन् ।
उ॒रु॒क्र॒मःक॑कु॒होयस्य॑पू॒र्वीर्नम॑र्धन्तियुव॒तयो॒जनि॑त्रीः ॥ १४ ॥

विष्णु॑म् । स्तोमा॑सः । पु॒रु॒ऽद॒स्मम् । अ॒र्काः । भग॑स्यऽइव ।
का॒रिणः॑ । याम॑नि । ग्म॒न् । उ॒रु॒ऽक्र॒मः । क॒कु॒हः । यस्य॑ ।
पू॒र्वीः । न । म॒र्ध॒न्ति॒ । यु॒व॒तयः॑ । जनि॑त्रीः ॥ १४ ॥

स्तोमासःस्तूयन्तेएभिरितिस्तोमाःस्तोत्राणि अर्काअर्चनीयानिशस्त्राणिचभगस्येवधनस्यकारिणः कर्तॄणीवस्थितानितानियामनिसन्ततंप्रतायमानेऽस्मिन्यज्ञे पुरुदस्मं बहुकर्माणं यद्वा बहून्दस्यतिउपक्षपयतीतिपुरुदस्मा तं विष्णुं देवं ग्मन गच्छन्तु पूर्वीःबह्व्यः जनित्रीः सर्वस्यजनयित्र्यः युवतयः परस्परमसंकीर्णाःककुहः कंस्कुभ्नन्तिविस्तारयन्तिककुभोदिशः यद्वा ककुबुच्छ्रयार्थः उच्छ्रिताइवहिदिशोवृक्षाग्रेषूपलभ्यमानास्तिष्ठन्ति एतादिशोयस्यविष्णोराज्ञां नमर्धन्ति नाहिंसन्तिसविष्णुरुरुक्रमः उरुर्महाक्रमः पादविक्षेपोयस्यसः त्रिविक्रमावतारे एकेनैवपादेनसर्वंजगदाक्रम्यातिष्ठत ॥ ग्मन् गमेर्लुङि मन्त्रेघसेत्यादिनाच्लेर्लुक् । ककुभः पृषोदरादित्वाद्रूपस्वरसिद्धिः ॥ १४ ॥

अथपञ्चदशी–

इन्द्रो॒विश्वै॑र्वी॒र्यै॒३॒ःपत्य॑मानउ॒भेआप॑प्रौ॒रोद॑सीमहि॒त्वा ।
पु॒र॒न्द॒रोवृ॑त्र॒हाधृ॒ष्णुषे॑णःसं॒गृभ्या॑न॒आभ॑रा॒भूरि॑प॒श्वः ॥१५॥२६॥

इन्द्रः॑ । विश्वैः॑ । वी॒र्यैः॑ । पत्य॑मानः । उ॒भे इति॑ । आ । प॒प्रौ॒ ।
रोद॑सी॒ इति॑ । म॒हि॒ऽत्वा । पु॒र॒म्ऽद॒रः । वृ॒त्र॒ऽहा । धृ॒ष्णु॒ऽसे॑नः ।
स॒म्ऽगृभ्य॑ । न॒ः । आ । भ॒र॒ । भूरि॑ । प॒श्वः ॥ १५ ॥ २६ ॥

विश्वैः सर्वैर्वीर्यैःसामर्थ्यैः पत्यमानः प्राप्यमाणःसइन्द्रः उभेरोदसीद्यावापृथिव्यौमहित्वा स्वकीयेनमहिम्नाआपप्रौ पूरयामास शेषःप्रत्यक्षकृतः पुरंदरःशत्रुपुरांदारयिता वृत्रहा वृत्रस्यहन्ता धृष्णुषेणः पराभिभवनशीलसेनोपेतः समरुद्गणइत्यर्थः सत्वंपश्वः पशून्संगृभ्यसंगृह्य नोऽस्मभ्यंभूरिप्रभूतंयथाभवतितथा आभर देहि यद्वा पश्वःपशोर्भूरिबहुत्वंबहून्पशूंश्चयच्छेति ॥ पुरंदरः दॄविदारणेइत्यस्यपुरशब्देउपपदेपूःसर्वयोर्दारिसहोरितिखच्प्रत्ययः वाचंयमपुरंदरौचेतिनिपातनात्पूर्वपदस्यअमागमः चित्त्वादन्तोदात्तः । धृष्णुषेणः पूर्वपदादितिसंहितायांषत्वं यदाषत्वं तदा रषाभ्यामितिणत्वम् । संगृभ्य ग्रहेर्ल्यपि स्थानिवद्भावात्संप्रसारणं हृग्रहोर्भश्छन्दसीतिभत्वं ल्तितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । पश्वः पशुशब्दाच्छसः जसादिषुछन्दसिवावचनमितिसवर्णदीर्घाभावः ॥ १५ ॥

॥ इतितृतीयस्यतृतीयेषड्विंशोवर्गः ॥ २६ ॥

अथषोडशी—

नास॑त्यामेपि॒तरा॑बन्धु॒पृच्छा॑सजा॒त्य॑म॒श्विनो॒श्चारु॒नाम॑ ।
यु॒वंहि॒स्थोर॑यि॒दौनो॑र॒यी॒णांदा॒त्रंर॑क्षे॒थेअक॑वै॒रद॑ब्धा ॥ १६ ॥

नास॑त्या । मे॒ । पि॒तरा॑ । ब॒न्धु॒ऽपृच्छा॑ । स॒ऽजा॒त्य॑म् । अ॒श्विनोः॑ ।
चारु॑ । नाम॑ । यु॒वम् । हि । स्थः । र॒यि॒ऽदौ । न॒ः । र॒यी॒णाम् ।
दा॒त्रम् । र॒क्षे॒थे॒ इति॑ । अक॑वैः । अद॑ब्धा ॥ १६ ॥

हेनासत्यावश्विनौ बन्धुपृच्छा हविःप्रदातृत्वेनबन्धूनस्मानपेक्षितमर्थंपृच्छतइतिबन्धूनांप्रष्टारोयुवांमेपितरौपालयितारौभवतम् युवयोरश्विनोःसजात्यं सजातेभवंसंगतं चारुनामकमनीयंखलु हेअश्विनौ युवंयुवांनोस्मभ्यंरयीणांधनानांमध्येरयिदौ उत्तमस्यधनस्यदातारौस्थोहि भवथःखलु किंचअदब्धाकेनाप्यतिरस्कृतौयुवांदात्रंहविषांदातारंमांअकवैरकुत्सितैःशोभनैःकर्मभिःरक्षेथे पालयतम् ॥ नासत्या नभ्राण्नपादित्यादिनानिपातनान्नञःप्रकृतिभावः । बन्धुपृच्छा पृच्छेःक्विप् सुपांसुलुगितिसुपोडादेशः । सजात्यं सजातेभवं भवेछन्दसीतियत् तित्स्वरितः । स्थः अस्तेर्लङिरूपं हियोगादनिघातः ॥ १६ ॥

अथसप्तदशी—

म॒हत्तद्वः॑कवय॒श्चारु॒नाम॒यद्ध॑देवा॒भव॑थ॒विश्व॒इन्द्रे॑ ।
सख॑ऋ॒भुभिः॑पुरुहूतप्रि॒येभि॑रि॒मांधियं॑सा॒तये॑तक्षतानः ॥ १७ ॥

म॒हत् । तत् । व॒ः । क॒व॒य॒ः । चारु॑ । नाम॑ । यत् । ह॒ । दे॒वा॒ः ।
भव॑थ । विश्वे॑ । इन्द्रे॑ । सखा॑ । ऋ॒भुऽभिः॑ । पु॒रु॒ऽहू॒त॒ । प्रि॒येभिः॑ ।
इ॒माम् । धिय॑म् । सा॒तये॑ । त॒क्ष॒त॒ । न॒ः ॥ १७ ॥

हेकवयोमेधाविनोहेदेवाः वोयुष्माकंतत्तादृशंमहत्प्रभूतंनामकर्मनमनंवा चारुमनोहरंखलु यद्येनकर्मणाविश्वेसर्वेयूयंइन्द्रे इन्द्रोपलक्षितेलोकेदेवाभवथह देवत्वंप्राप्नुथखलु हेपुरुहूत बहुभिराहूत हेइन्द्र त्वं प्रियेभिःप्रियतमैः ऋभुभिः ऋतेनभवन्तिऋतेनभान्तीतिवा ऋभुभिर्देवैःसखासि इन्द्रसहिताऋभवोयूयं इमामस्मदीयांधियंस्तुतिंनोऽस्माकंसातयेधनादिलाभार्थंतक्षत स्वीकुरुत ॥ यत् सुपांसुलुगित्यादिनासुपोलुक् । भवथ भवतेर्लटिरूपं यद्वृत्तयोगादनिघातः । सखऋभुभिरित्यस्यसंहितायांऋत्यकइतिप्रकृतिभावोह्रस्वत्वंच॥ १७ ॥

अथाष्टादशी—

अ॒र्य॒माणो॒अदि॑तिर्य॒ज्ञिया॒सोद॑ब्धानि॒वरु॑णस्यव्र॒तानि॑ ।
यु॒योत॑नोअनप॒त्यानि॒गन्तोः॑प्र॒जावा॑न्नःपशु॒माँअ॑स्तुगा॒तुः ॥ १८॥

अ॒र्य॒मा । न॒ः । अदि॑तिः । य॒ज्ञिया॑सः । अद॑ब्धानि । वरु॑णस्य ।
व्र॒तानि॑ । यु॒योत॑ । न॒ः । अ॒न॒प॒त्यानि॑ । गन्तोः॑ । प्र॒जाऽवा॑न् । न॒ः ।
प॒शु॒ऽमान् । अ॒स्तु॒ । गा॒तुः ॥ १८॥

अर्यमा ऋच्छतिसर्वदागच्छतीत्यर्यमासूर्यः अदितिर्देवमाता यज्ञियासोयज्ञार्हादेवायस्य वरुणस्यव्रतानिकर्माणि अदब्धान्यहिंसितानिभवन्तिसवरुणः तेचार्यमादयोदेवानोऽस्मात्रक्षन्त्वितिशेषः तेयूयंनोऽस्माकंअनपत्यानि अपत्यानांपुत्राणांअहितानिकर्माणि यद्वा पतनकारणंनभवतीत्यपत्यं तदन्यान्यनपत्यानि पतनकारणानिकर्माणिगन्तोः सन्मार्गाद्युयोत पृथक्कुरुत यथा तान्यहितानिकर्माणिनस्पृशन्तितथाकुरुतेत्यर्थः अथ गातुः गायन्तिस्तुवन्ती-

न्द्रादीनत्रेतिगातुर्गृहं नोऽस्मदीयंगृहंपशुमान्पश्वादियुक्तंप्रजावानपत्योपेतमस्तु ॥ अर्यमा ऋगतौ श्वन्नुक्षन्प्लीहन्क्लेदन्नित्यादिनानिपातनाद्रूपसिद्धिः । अदितिः दीङ्क्षयेइत्यस्यकर्तरिक्तिच् नञ्समासः अदितिरदीनेतियास्कः । छान्दसंह्रस्वत्वं नञःस्वरः । युयोत यौतेरमिश्रीभावकर्मणोलोटिबहुलंछन्दसीतिशपःश्लुः तप्तनप्तनथनाश्चेतितस्यतबादेशः । गन्तोः गम्लृगतौ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्नितितुन्प्रत्ययः नित्त्वादाद्युदात्तः । गातुः गापाहिभ्यश्चेतितुप्रत्ययः ॥ १८ ॥

अथैकोनविंशी—

दे॒वानां॑दू॒तःपु॑रु॒धप्रसू॒तोना॑गान्नोवोचतु॒स॒र्वता॑ता ।
शृ॒णोतु॑नःपृ॒थि॒वीद्यौरु॒ताप॒ःसूर्यो॒नक्ष॑त्रैरु॒र्व१॒न्तरि॑क्षम् ॥ १९ ॥

दे॒वाना॑म् । दू॒तः । पु॒रु॒ध । प्रऽसू॑तः । अना॑गान् । न॒ः । वो॒च॒तु॒ । स॒र्वऽता॑ता । शृ॒णोतु॑ । न॒ः । पृ॒थि॒वी । द्यौः । उ॒त । आप॑ः ।
सूर्य॑ः । नक्ष॑त्रैः । उ॒रु । अ॒न्तरि॑क्षम् ॥ १९ ॥

पुरुध पुरुषुबहुषुदेशेषुप्रसूतः अग्निहोत्रार्थंविहितः यद्वा पुरुभिर्यजमानैःप्रसूतः यष्टव्यदेवानाह्वानार्थंप्रेरितोदेवानांदूतः तथाचतैत्तिरीयकम्—अग्निर्देवानांदूतआसीदिति । ताद्दशोऽग्निकर्मकर्तृसाधनवैगुण्येनसापराधान्नोऽस्मान्ननागाननागसः सर्वताता सर्वत्रवोचतुब्रवीतु किंच पृथिवीद्यौश्च उतापिचापःसूर्यश्च नक्षत्रैरुरुविस्तीर्णमन्तरिक्षंच एतेसर्वेदेवानोऽस्मदीयांस्तुतिं शृणोतु शृण्वन्तु प्रत्येकविवक्षयैकवचनं ॥ प्रसूतः षूप्रेरणे कर्मणिक्तः गतिरनन्तरइतिगतेः प्रकृतिस्वरः । अनागान् शसि सकारलोपश्छान्दसः सवर्णदीर्घेकृतेतस्माच्छसोनइतिनत्वम् । वोचतु वचपरिभाषणे व्यत्ययोबहुलमितिशपोऽङादेशः वचउम् गुणः निघातः । नक्षत्रैः नक्षगतौ अमिनक्षियजिवन्धिपतिभ्योऽत्रन्नित्यत्रन्प्रत्ययः नित्त्वादाद्युदात्तः यद्वा नक्षरतिनक्षीयतइतिवानक्षत्रं नभ्राण्नपादितिनञःप्रकृतिभावः नञ्स्वरः ॥ १९ ॥

अथविंशी—

शृ॒ण्वन्तु॑नो॒वृष॑ण॒ःपर्व॑तासोध्रु॒वक्षे॑मास॒इळ॑या॒मद॑न्तः ।
आ॒दि॒त्यैर्नो॒अदि॑तिःशृ॒णोतु॒यच्छ॑न्तुनोम॒रुत॒ःशर्म॑भ॒द्रम् ॥ २० ॥

---

१ नि० ४. २२. ।

शृ॒ण्वन्तु॑ । नः॒ । वृष॑णः । पर्व॑तासः । ध्रु॒वऽक्षे॑मासः । इळ॑या ।
मद॑न्तः ।आ॒दि॒त्यैः । नः॒ । अदि॑तिः । शृ॒णो॒तु॒ । यच्छ॑न्तु । नः॒ ।
म॒रुतः॑ । शर्म॑ । भ॒द्रम् ॥ २० ॥

वृषणः अभिमतफलसेचकामरुतः पर्वतासः पृणन्तिपूरयन्तिअर्थिनांकामानितिपर्वताग्रावाभिमानिनोदेवाः ध्रुवक्षेमासः निश्चलस्थानाः इळयाहविर्लक्षणान्नेनमदन्तोमाद्यन्तःसन्तः नोऽस्मदीयांस्तुतिंशृण्वन्तु किंच आदित्यैरपत्यभूतैरादित्यैरुपेतादितिर्नोऽस्मदीयांस्तुतिंशृणोतु मरुतश्चनोऽस्मभ्यंभद्रंकल्याणकरंशर्म सुखं यच्छन्तुददतु ॥ आदित्यैः अदितेरपत्यानीत्यर्थे दित्यदित्येतिण्यः प्रत्ययस्वरेणान्तोदात्तः सुपासहैकादेशेकृते एकादेशउदात्तः ॥ २० ॥

प्रवत्स्यन्यजमानः सदासुगइत्यृचंजपन्गच्छेत् सूत्रितश्च–सदासुगःपितुमांअस्तुपन्थाइतिपन्थानमवरुह्येति ।

सूक्तेएकविंशी–

सदा॑सु॒गःपि॑तु॒माँअ॑स्तु॒पन्था॒मध्वा॑दे॒वा॒ओष॑धीः॒संपि॑पृक्त ।
भगो॑मेअग्नेस॒ख्येनमृ॑ध्या॒उद्रा॒योअ॑श्यां॒सद॑नंपु॒रु॒क्षोः ॥ २१ ॥

सदा॑ । सु॒ऽगः । पि॒तु॒ऽमान् । अ॒स्तु॒ । पन्थाः॑ । मध्वा॑ । दे॒वाः॒ ।
ओष॑धीः । सम् । पि॒पृ॒क्त॒ । भगः॑ । मे॒ । अ॒ग्ने॒ । स॒ख्ये । न ।
मृ॒ध्याः॒ । उत् । रा॒यः । अ॒श्या॒म् । सद॑नम् । पु॒रु॒ऽक्षोः ॥ २१ ॥

हेअग्ने अस्माकंपन्थामार्गः सदा सर्वदा सुगःसुखेनगन्तुंशक्यः पितुमानन्नवांश्चास्तु हेदेवाःमध्वामाधुर्योपेतेन उदकेनओषधीःसंपिपृक्त संपर्चयत सेचयतेत्यर्थः हेअग्ने त्वयासख्येसंजातेसति मेममभगोधनंनमृध्याः नविनश्यतु किञ्च रायोधनस्य पुरुक्षोःबह्वन्नस्यच सदनंस्थानमुदश्यांप्राप्नुयाम् ॥ सदा स्वरादिष्वाद्युदात्तत्वेनपाठादाद्युदात्तः । पिपृक्त पृचीसंपर्के लोटिबहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम् । मृध्याः मृधिर्हिंसार्थः लिङि तिङांतिङोभवन्तीतितिपःसिप् ॥ २१ ॥

पशौपुरोडाशस्विष्टकृतःस्वदस्वहव्येतियाज्या सूत्रितश्च–स्वदस्वहव्यासमिषोदिदीहीतिपुरोडाशस्विष्टकृतइति ।

सूक्तेद्वाविंशी—

स्वद॑स्वह॒व्यासमिषो॑दिदीह्यस्म॒द्र्य१॒क्सं॑मिमीहि॒श्रवां॑सि ।
विश्वाँ॑अग्नेपृ॒त्सुताञ्जे॑षि॒शत्रू॒नहा॒विश्वा॑सु॒मना॑दीदिहीनः ॥२२॥२७॥

स्वद॑स्व । ह॒व्या । सम् । इषः॑ । दि॒दी॒हि॒ । अ॒स्म॒द्र्य॑क् । सम् ।
मि॒मी॒हि॒ । श्रवां॑सि । विश्वा॑न् । अ॒ग्ने॒ । पृ॒त्ऽसु । तान् । जे॒षि॒ ।
शत्रू॑न् । अहा॑ । विश्वा॑ । सु॒ऽमनाः॑ । दी॒दि॒हि॒ । नः॒ ॥ २२ ॥ २७ ॥

हेअग्ने हव्या हवनयोग्यानिहवींषिस्वदस्व स्वादय अस्माकमिषोन्नानिसंदिदीहि सम्यक्प्रकाशय दीपितानितानिश्रवांस्यन्नानि अस्मद्र्यक् अस्मदभिमुखानिसंमिमीहि संमानय कुर्वित्यर्थः ततः पृत्सुसंग्रामेषु तान्बाधकान्विश्वान्सर्वान्शत्रून्जेषिजय अथ सुमनाः शोभनमनस्कःसन्नोऽस्माकंविश्वाहासर्वाण्यहानिदीदिहि अग्निहोत्रादिकर्मयोग्यानिप्रकाशय ॥ स्वदस्व स्वदआस्वादने लोटिरूपं थासोलसार्वधातुकस्वरेधातुस्वरः । दिदीहि दिवुक्रीडादावित्यस्यलोटि बहुलंछन्दसीतिविकरणस्यश्लुः परत्वाद्धलिचेतिदीर्घेकृते पश्चाद्वलिलोपः निघातः । अस्मद्र्यक् अस्मानञ्चतीत्यञ्चतेःक्विप् विष्वग्देवयोश्चटेरितियणःस्वरितत्वम् । मिमीहि माङ्मानेशब्देच जुहोत्यादिः तस्य लोटि व्यत्ययेनपरस्मैपदं निघातः । सुमनाः सोर्मनसीत्युत्तरपदाद्युदात्तत्वम् । दीदिहि दिवेर्यङ्लुकि लोटि तुजादित्वादभ्यासस्यदीर्घः वलिलोपः ॥ २२ ॥

॥ इतितृतीयस्यतृतीयेसप्तविंशोवर्गः ॥ २७ ॥

उषसःपूर्वाइतिद्वाविंशत्यृचंद्वितीयंसूक्तंत्रैष्टुभं उषसइत्यनुक्रमणिका प्रजापतेरार्षंवैश्वदेवं प्रजापतिर्हिवैश्वदेवंहेतिपूर्वसूक्तेहिहशब्दप्रयोगात् सूक्तविनियोगोलैङ्गिकः । अत्राद्योषस्या ततःपरंनवर्चोऽग्न्यादिदेवताः ततःपराहोरात्रिदेवताका ततश्चतस्रोरोदस्यः पञ्चदशीद्युनिशोर्वा षोडशीदिग्देवताका ततःषड्ऋचः वर्षतःइन्द्रस्यकेचिदग्नेस्त्वष्टुश्चेतिमन्यन्ते ।

तत्रप्रथमा—

उ॒षसः॒पूर्वा॒अध॒यद्व्यू॒षुर्म॒हद्विज॑ज्ञेअ॒क्षरं॑प॒देगोः ।
व्र॒तादे॒वाना॒मुप॒नुप्र॒भूष॑न्म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ १ ॥

Funding by IKS-MoE

उषसः । पूर्वाः । अध । यत् । विऽऊषुः । महत् । वि । जज्ञे ।
अक्षरम् । पदे । गोः । व्रता । देवानाम् । उप । नु । प्रऽभूषन् ।
महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १ ॥

पूर्वाउदयकालात्प्राचीनाउषसोयद्यदाव्यूषुः व्युच्छन्ति अध तदानीं अक्षरं नक्षरतीत्यक्षरं अविनाश्यादित्याख्यंमहत्प्रभूतंज्योतिर्गौरुदकस्यपदेस्थानेसमुद्रेनभसिवाविजज्ञे उत्पद्यतेअथोदितेसूर्ये प्रभूषन्नग्निहोत्रादिकर्मसुप्रभवितुमिच्छन्यजमानः व्रताकर्माणिदेवानांनुक्षिप्रं उपसमीपंतिष्ठति योग्यक्रियाध्याहारः तदिदंदेवानामेकंमुख्यंअसुरत्वमस्यतिक्षिपतिसर्वानित्यसुरः प्रबलः तस्यभावोसुरत्वंप्राबल्यं महदैश्वर्यं ॥ व्यूषुः उषप्लुषदाहेइत्यस्यविपूर्वस्य लिट्युसिरूपं सहेतियोगविभागात्समासः यद्वृत्तयोगादनिघातः । प्रभूषन् भवतेःसनि द्विर्वचनस्यछन्दसिविकल्पितत्वादत्रद्विर्वचनाभावः तदन्ताच्छतरिरूपं प्रादिसमासः शतुर्लसार्वधातुकस्वरेधातुस्वरः ॥ १ ॥

अथद्वितीया—

मोषूणोअत्रंजुहुरन्तदेवामापूर्वेअग्नेपितरःपदज्ञाः ।
पुराण्योःसद्मनोःकेतुरन्तर्महद्देवानामसुरत्वमेकम् ॥ २ ॥

मो इति । सु । नः । अत्र । जुहुरन्त । देवाः । मा । पूर्वे ।
अग्ने । पितरः । पदऽज्ञाः । पुराण्योः । सद्मनोः । केतुः ।
अन्तः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ २ ॥

हेअग्ने अद्यास्मिन्कालेदेवाः नोऽस्मान्सुसुष्ठुमोजुहुरन्त माहिंस्युः तथा पदज्ञाः कर्माण्यनुष्ठायदेवपदमनुभवन्तः पूर्वेपुरातनाःपितरः माहिंसिषुः यस्मात्केतुर्यज्ञानांप्रज्ञापकःसूर्यः पुराण्योः पुरातनयोःसद्मनोःसीदन्त्यनयोर्देवमनुष्याइतिसद्मनीरोदसी तयोरन्तर्मध्ये उदेति तस्मादत्रमाहिंसत्वित्यर्थः महद्देवानामित्यादिपूर्ववत् ॥ जुहुरन्त हृप्रसह्यकरणे लुङि जुहोत्यादित्वाच्छ्लुः व्यत्ययेनात्मनेपदं बहुलंछन्दसीत्युत्वं संज्ञापूर्वकस्यविधेरनित्यत्वाददादेशाभावे अन्तादेशः॥२॥

अथतृतीया—

विमेपुरुत्रापतयन्तिकामाःशम्यच्छांदीद्येपूर्व्याणि ।
समिद्धेअग्नावृतमिद्वदेममहद्देवानामसुरत्वमेकम् ॥ ३ ॥

Funding by IKS-MoE

वि । मे॒ । पु॒रु॒ऽत्रा । प॒त॒य॒न्ति॒ । कामाः॑ । शमि॑ । अच्छ॑ ।
दी॒द्ये॒ । पू॒र्व्याणि॑ । सम्ऽइ॑द्धे । अ॒ग्नौ । ऋ॒तम् । इत् । व॒दे॒म ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ ३ ॥

हेअग्ने मे मम पुरुत्रा बहवःकामाअभिलाषाः विपतयन्ति विविधंगच्छन्ति शमिअग्निष्टोमादिलक्षणंकर्मांच्छाभिलक्ष्यअहं पूर्व्याणिपुरातनानिस्तोत्राणितदर्थंदीद्ये दीपयामि पश्चाद्यज्ञार्थमग्नौसमिद्धेदीप्यमानेसति ऋतमित्सत्यमेववदेम अनृतवचनेहियज्ञेवैगुण्यंस्यादिति ॥ पुरुत्रा देवमनुष्यपुरुषेत्यादिनात्राप्रत्ययः । पतयन्ति पत्लृगतौ स्वार्थिकोणिच् ॥ ३ ॥

अथचतुर्थी—

स॒मा॒नोराजा॒विभृ॑तःपु॒रु॒त्राशये॑श॒यासु॒प्रयु॑तो॒वनानु॑ ।
अ॒न्याव॒त्संभर॑ति॒क्षेति॑मा॒ताम॒हद्दे॒वाना॑मसुर॒त्वमेक॑म् ॥ ४ ॥

स॒मा॒नः । राजा॑ । विऽभृ॑तः । पु॒रु॒ऽत्रा । शये॑ । श॒यासु॑ ।
प्रऽयु॑तः । वना॑ । अनु॑ । अ॒न्या । व॒त्सम् । भर॑ति । क्षेति॑ ।
मा॒ता । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ ४ ॥

समानः साधारणः सर्वेषां यद्वा एकएवराजादीप्यमानोऽग्निः पुरुत्रा बहुषुदेशेषुविभृतः अग्निहोत्रार्थंविहृतोभवति यद्वा राजाभिषुतःसोमः सर्वेषुदेशेषुयज्ञार्थंविहृतोभवति सचाग्निः सोमोवाशयासु शेरते हविरादयःपदार्थाअत्रेतिशयावेद्यः तासु शयेशेतेनिवसतिवनानु अनुवनं वनेष्वरणिरूपेषुकाष्ठेषुप्रयुतोविभक्तोग्निर्वर्तते सोमश्चेद्वनेषुचमसेषुविभक्तोवर्तते तस्य द्वेमातरौद्यावापृथिव्यौ तयोरन्याद्यौः अस्याभूमेर्जायमानतयावत्सभूतमग्निंसोमंवाभरति वृष्ट्यादिरूपेणपोषयति मातावसुधाक्षेति केवलंनिवासयति ॥ विभृतः हृञ्हरणे कर्मणिक्तः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । पुरुत्रा अधिकरणेक्रप्रत्ययः । शये शीङ्स्वप्ने लोपस्तइतितकारलोपः शीङःसार्वधातुकेगुणः । शयासु शीङ्स्वप्ने एरजित्यधिकरणेअच् । भरति भृञ्भरणे भ्वादिः एकान्याभ्यांसमर्थाभ्यामितिपूर्वस्यनिघातः । क्षेति क्षिनिवासगत्योरित्यस्य बहुलंछन्दसीतिविकरणस्यलुक् ॥ ४ ॥

Funding by IKS-MoE

BHARATIYA ... LIBRARY
S. N. ३०३

अथपञ्चमी–

आक्षित्पूर्वास्वपराअनूरुत्सद्योजातासुतरुणीष्वन्तः ।
अन्तर्वतीःसुवतेअप्रवीतामहद्देवानामसुरत्वमेकम् ॥ ५ ॥ २८ ॥

आऽक्षित् । पूर्वासु । अपराः । अनूरुत् । सद्यः । जातासु ।
तरुणीषु । अन्तरिति । अन्तःऽवतीः । सुवते । अप्रऽवीताः ।
महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ५ ॥ २८ ॥

पूर्वासुजीर्णास्वोषधीषु आक्षित् आवर्तमानः तथा अपराः नव्याओषधीरनूरुत् अनुरुन्धन् उत्पत्त्यानुगुण्येनानुतिष्ठन् अग्निःसूर्योवासद्योजातासुतदानीमुत्पन्नासुतरुणीषुपल्लवितासु ओषधीष्वन्तर्वर्तते ताओषधयः अप्रवीताः केनापिपुरुषेणानिषिक्तरेतस्काः अनभ्यक्तावा अन्तर्वतीः अग्निनागर्भवत्योभूत्वा सुवतेफलंपुष्पंचोत्पादयन्ति तदिदंदेवानामैश्वर्यं ॥ आक्षित् क्षिनिवासगत्योः क्विप् । अनूरुत् अनौ रुधकामेअस्मात्क्विप् अन्येषामपिदृश्यतइतिअनोर्दीर्घः कृत्स्वरः । तरुणीषु नञ्स्नञीककख्युंस्तरुणतलुनानामुपसंख्यानमितिङीप् । अन्तर्वतीः झयइतिमतुपोवत्वम् । सुवते षूङ्प्राणिगर्भविमोचनेइत्यस्यलटिरूपं निघातः ॥ ५ ॥

॥ इतितृतीयस्यतृतीयेअष्टाविंशोवर्गः ॥ २८ ॥

अथषष्ठी–

शयुःपरस्तादधनुद्विमाताबन्धनश्चरतिवत्सएकः ।
मित्रस्यतावरुणस्यव्रतानिमहद्देवानामसुरत्वमेकम् ॥ ६ ॥

शयुः । परस्तात् । अध । नु । द्विऽमाता । अबन्धनः । चरति ।
वत्सम् । एकः । मित्रस्य । ता । वरुणस्य । व्रतानि ।
महत् । देवानाम् । असुरऽत्वम् । एकम् । ६ ॥

द्विमाता द्वेद्यावापृथिव्यौमातरौयस्यसद्विमाता यद्वा द्वयोर्लोकयोर्निर्मातासूर्यः परस्तात्पश्चिमायांदिशि अस्तवेलायां शयुः शयानः अव्याप्रियमाणोभवति अधनु अथोदयवेलायां एकः द्यावापृथिव्योःसाधारणस्तयोरसादानाद्वत्सःपुत्रःअबन्धनः अप्रतिबद्धगतिरनालंबनए-

कःसन्नचरति नभसिगच्छति तातानीमानिमित्रस्यवरुणस्यमित्रावरुणयोर्व्रतानिकर्माणि ॥ शयुः शीङ्स्वप्ने भृमृशीतृचरिइत्यादिनाउप्रत्ययः । द्विमाता नद्यृतश्चेतिप्राप्तस्यकपः ऋतश्छन्दसीतिप्रतिषेधः ॥ ६ ॥

अथसप्तमी–

द्वि॒मा॒ताहोता॑वि॒दथे॑षुस॒म्राळन्व॒ग्रं॑चर॑ति॒क्षेति॑बु॒ध्नः ।
प्ररण्या॑निरण्य॒वाचो॑भरन्तेम॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ ७ ॥

द्वि॒ऽमा॒ता । होता॑ । वि॒दथे॑षु । स॒म्ऽराट् । अनु॑ । अग्र॑म् ।
चर॑ति । क्षेति॑ । बु॒ध्नः । प्र । रण्या॑नि । र॒ण्य॒ऽवाचः॑ । भ॒र॒न्ते॒ ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ ७ ॥

द्विमाता द्वयोर्लोकयोर्निर्माता विदथेषुयज्ञेषु होतादेवानामाह्वाता सम्राट्यज्ञेषुसम्यग्राजमानोऽग्निः अन्वग्रं अग्रेदिविचरति सूर्यभूतस्तत्रवर्तते बुध्नःसर्वस्यकर्मणोमूलभूतःसन् क्षेति भूमौवसति यद्वा अग्रंमुख्यंभागंचरति भक्षयति क्षेति यज्विनांगृहेषुनिवसति यद्वा बुध्नः प्रतिष्ठा अन्तेभागी स्विष्टकृद्रूपेण प्रतिष्ठावैस्विष्टकृदितिश्रुतेः । किंच रण्यवाचः रमणीयवाचःस्तोतारः रण्यानिरमणीयानिस्तोत्राणि प्रभरन्तेप्रणयन्ति प्रकर्षेणकुर्वन्ति तदिदंदेवानामैश्वर्यं ॥ चरति चादिलोपइतिननिघातः ॥ ७ ॥

अथाष्टमी–

शूर॑स्येव॒युध्य॑तोअन्त॒मस्य॑प्रती॒चीनं॑ददृशे॒विश्व॑मा॒यत् ।
अ॒न्तर्म॒तिश्च॑रतिनि॒ष्षिधं॒गोर्म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ ८ ॥

शूर॑स्यऽइव । युध्य॑तः । अ॒न्त॒मस्य॑ । प्र॒ती॒चीन॑म् । द॒दृ॒शे॒ ।
विश्व॑म् । आ॒ऽयत् । अ॒न्तः । म॒तिः । च॒र॒ति॒ । नि॒ःऽसिध॑म् ।
गोः । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ ८ ॥

---

१ ऐ० ब्रा० २. ४. ।

Funding by IKS-MoE

अन्तमस्य समीपेवर्तमानस्यदावाग्नेरायत् अभिमुखमागच्छत् विश्वंभूतजातं प्रतीचीनं पराङ्मुखं ददृशे दृश्यते तत्रदृष्टान्तः—शूरस्येव यथायुध्यतोयुद्धंकुर्वाणस्यशूरस्यसमर्थस्य राज्ञोभिमुखमागच्छत् परबलंपराङ्मुखंदृश्यतेतद्वत् मतिःसर्वैर्ज्ञायमानःसोऽग्निर्गोरुदकस्यनिःषिधंहिंसिकांदीप्तिमन्तश्चरति अन्तर्धारयति ॥ युध्यतः युधसंप्रहारे दिवादित्वात्तस्यशतरिरूपं । अन्तमस्य अन्तःशब्दादतइनिठनावितिठन् अतिशयेनान्तिकइत्यर्थेतमप् तमेतादेश्चेति तादिलोपः नित्त्वादाद्युदात्तः । प्रतीचीनं प्रतिपूर्वस्याञ्चतेःक्विप् तस्माद्विभाषांचेरदिक्स्त्रियामितिखः ईनादेशः प्रत्ययस्वरः । आयत् याप्रापणेइत्यस्याङ्पूर्वस्यशतरिरूपं आङ्पूर्वस्य अयपयगतावित्यस्यशतरिरूपंवेतिव्युत्पत्त्यनवधारणादनवग्रहः ॥ ८ ॥

अथनवमी—

निवे॑वेतिपलि॒तोदू॒तआ॑स्व॒न्तर्म॒हाँश्च॑रतिरोच॒नेन॑ ।
वपूं॑षि॒बिभ्र॑द॒भिनो॒विच॑ष्टेम॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ ९ ॥

नि । वे॒वे॒ति॒ । प॒लि॒तः । दू॒तः । आ॒सु॒ । अ॒न्तः । म॒हान् । च॒र॒ति॒ ।
रो॒च॒नेन॑ । वपूं॑षि । बिभ्र॑त् । अ॒भि । न॒ः । वि । च॒ष्टे॒ । म॒हत् ।
दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ ९ ॥

पलितःपालयितापूर्णोवादेवानांदूतोऽग्निःआस्वोषधीषुनिवेवेति नितरांव्याप्यवर्तते महान्सोऽग्निःरोचनेनसूर्येणसहअन्तः रोदस्योर्मध्येचरति वपूंषिनानाविधानिरूपाणिबिभ्रत्सोग्निः नोअस्मान्यष्टृनभिविचष्टे विशेषेणानुग्रहदृष्ट्यापश्यति ॥ वेवेति वीगत्यादिषु यङ्लुकि ईडभावेरूपं । रोचनेन सहार्थेतृतीया । बिभ्रत् डुभृञ्धारणपोषणयोरित्यस्यशतरिरूपम् अभ्यस्तस्वरः॥९ ॥

अथदशमी—

विष्णु॑र्गो॒पाःप॑र॒मंपा॑ति॒पाथः॑प्रि॒याधामा॑न्य॒मृता॒दधा॑नः ।
अ॒ग्निष्टाविश्वा॒भुव॑नानिवेद॒म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् १० ॥ २९ ॥

विष्णुः॑ । गो॒पाः । प॒र॒मम् । पा॒ति॒ । पाथः॑ । प्रि॒या । धामा॑नि ।
अ॒मृता॑ । दधा॑नः । अ॒ग्निः । ता । विश्वा॑ । भुव॑नानि । वे॒द॒ ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १० ॥ २९ ॥

Funding by IKS-MoE

विष्णुर्व्याप्तः गोपाः सर्वस्यगोपायिता प्रिया प्रियतमानि अमृता क्षयरहितानि धामानि तेजांसिदधानःसोग्निः परमंपाथःस्थानंपाति रक्षति यद्वा धामानि लोकधारकाणि अमृता उदकानिदधानःसन् परमंपाथः उदकस्यस्थानं अन्तरिक्षंपाति सोऽग्निःता तानि विश्वा सर्वाणिभुवनानिभूतजातानि वेद जानाति ॥ गोपाः गोपायतेःक्विपि अतोलोपयलोपौ अग्निष्टेत्यत्रसंहितायांयुष्मत्तत्ततक्षुष्वन्तःपादमितिषत्वम् ॥ १० ॥

॥ इतितृतीयस्यतृतीयेएकोनत्रिंशोवर्गः ॥ २९ ॥

अथैकादशी—

नानाचक्रातेयम्या३वपूंषितयोरन्यद्रोचतेकृष्णमन्यत् ।
श्यावीचयदरुषीचस्वसारौमहद्देवानामसुरत्वमेकम् ॥ ११ ॥

नाना । चक्राते इति । यम्या । वपूंषि । तयोः । अन्यत् ।
रोचते । कृष्णम् । अन्यत् । श्यावी । च । यत् । अरुषी ।
च । स्वसारौ । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ ११ ॥

यम्या यमरूपेमिथुनभूतेऽहश्चरात्रिश्चेत्येते नाना नानाविधानिवपूंषि शुक्लकृष्णादीनिरूपाणिचक्राते कुरुतः श्यावी कृष्णवर्णा अरुषीशुक्लतयारोचमाना यत्येपरस्परंस्वसारौभवतः तयोर्मध्येअन्यदर्जुनमहःरोचते किरणसंबन्धाद्दीप्यते अन्यद्रात्रिलक्षणंकृष्णंतमःसंबन्धात्कृष्णवर्णमाभाति ॥ यम्या सुपोडादेशः। रोचते एकान्याभ्यांसमर्थाभ्यामितिननिघातः ॥ ११ ॥

अथद्वादशी—

माताचयत्रदुहिताचधेनूसबर्दुघेधापयेतेसमीची ।
ऋतस्यतेसदसीळेअन्तर्महद्देवानामसुरत्वमेकम् ॥ १२ ॥

माता । च । यत्र । दुहिता । च । धेनू इति । सबर्दुघे इतिसबःऽदुघे ।
धापयेते इति । समीची इति सम्ऽईची । ऋतस्य । ते इति । सदसि ।
ईळे । अन्तः । महत् । देवानाम् । असुरऽत्वम् । एकम् ॥ १२ ॥

माता सर्वेषांनिर्मातृत्वान्माता पृथिवीचदुहिता दूरेनिहिताद्यौश्च दुहितादुर्हितादूरेहितादोग्धेर्वेतियास्कः[1] । एते सबर्दुघे सबरःस्वोयस्यक्षीररूपस्यरसस्यदोग्ध्र्यौ अत-

---

[1] नि० ३.। ४.।

Funding by IKS-MoE

एवधेनू जगतःप्रीणयित्र्यौ द्यावापृथिव्यौ यत्रान्तरिक्षे समीची परस्परंसंगतेसत्यौ धापयेते स्वकीयरसमन्योन्यंपाययेते ऋतस्योदकस्यसदसिस्थानभूतेतस्मिन्नन्तरिक्षेअन्तःस्थिते तेद्यावापृथिव्यावीळेऽहंस्तौमि यद्वा वृष्टिलक्षणंरसंद्यौःपृथिवींधापयेते आहुतिलक्षणंरसं द्यांपृथिवीति एवमन्योन्यंमाताचदुहिताचभवतः ऋतस्यसदसिस्थाने यज्ञसदनेस्थितोऽहं उभेस्तौमि ॥ सबर्दुघे सबःशब्दःक्षीरवाचीतिसंप्रदायविदआहुः तस्मिन्नुपपदेदुहप्रपूरणेइत्यस्माद्धातोः दुहःकब्घश्चेतिकप्रत्ययः घश्चान्तादेशः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः । धापयेते धेट्पानेइत्यस्यण्यन्तस्यलटि निगरणचलनार्थेभ्यश्चेतिपरस्मैपदेप्राप्ते पादिषुधेटउपसंख्यानमित्यात्मनेपदं यद्वृत्तयोगादनिघातः ॥ १२ ॥

अथत्रयोदशी–

अ॒न्यस्या॑व॒त्संरि॑ह॒तीमि॑माय॒कया॑भु॒वानिद॑धेधे॒नुरूधः॑ ।
ऋ॒तस्य॒सापय॑सापिन्व॒तेळा॑म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म् ॥ १३ ॥

अ॒न्यस्याः॑ । व॒त्सम् । रि॒ह॒ती । मि॒मा॒य॒ । कया॑ । भु॒वा । नि ।
द॒धे॒ । धे॒नुः । ऊधः॑ । ऋ॒तस्य॑ । सा । पय॑सा । पि॒न्व॒त॒ । इळा॑ ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १३ ॥

अन्यस्याःपृथिव्यावत्समग्निंरिहतीउदकधारारूपयाजिह्वयालिहन्तीद्यौः मिमाय मेघद्वाराध्वनिंकरोति धेनुः प्रीणयित्रीसाद्यौःकयाजलवर्जितयाभुवातत्रत्यंजलमादायस्वकीयमूधोमेघरूपंनिदधे उदकेननिहितंपुष्टमकरोत् यद्वा कयाभुवा कस्यांभुविप्रदेशेऊधःस्थानीयंमेवंनिदधेधारयतिनज्ञायतेवर्षाकालएवकेवलंदृश्यतेमेघः साजलवर्जिताइलापृथिवीऋतस्यसत्यभूतस्यादित्यस्यपयसा उदकेनापिन्वत वर्षाकालेसिक्ताभवति आदित्याज्जायतेवृष्टिरिति स्मृतेः ॥ रिहती लिहआस्वादनेइत्यस्यशतरिरूपं शतुरनुमइतिङीपउदात्तत्वम् ॥ अपिन्वत पिविसेचने मुचादिरात्मनेपदी निघातः ॥ १३ ॥

अथचतुर्दशी–

पद्याव॑स्तेपुरु॒रूपा॒वपूं॑ष्यू॒र्ध्वात॑स्थौ॒त्र्यविं॒रेरि॑हाणा ।
ऋ॒तस्य॒सद्म॒विच॑रामिवि॒द्वान्म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म् ॥ १४ ॥

पद्या॑ । व॒स्ते॒ । पु॒रु॒ऽरूपा॑ । वपूं॑षि । ऊ॒र्ध्वा । त॒स्थौ॒ । त्रि॒ऽअवि॑म् ।
रेरि॑हाणा । ऋ॒तस्य॑ । सद्म॑ । वि । च॒रा॒मि॒ । वि॒द्वान् । म॒हत् ।
दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥१४ ॥

पद्याजगत्स्रष्टुःपरमेश्वरस्यपद्भ्यांजातत्वात्पद्याभूमिः तथाचमन्त्रवर्णः—[1]पद्भ्यांभूमिरिति । यद्वा पादसंचारेसाधुःपद्याभूमिः पुरुरूपानानाविधस्वरूपाणिवपूंषिस्थावरजंगमात्मकानिरूपाणिवस्ते आच्छादयति सैषाभूमिरूर्ध्वाउत्तरवेद्यात्मनाउन्नतासतीस्वसारभूतेनहविषात्र्यविं सार्धसंवत्सरवयस्कोवत्सःत्र्यविरुच्यते तत्प्रमाणमादित्यंत्रीन्लोकानवति स्वतेजसाव्याप्नोतीतित्र्यविरितिवा रेरिहाणालिहन्तीतस्थौ ऋतस्यसत्यभूतस्यादित्यस्यसद्मस्थानंविद्वान्जानानोऽहंविचरामि हविर्भिस्तमादित्यंपरिचरामि ॥ पद्या पादशब्दाद्भवेछन्दसीतियत् पद्यत्यतदर्थइतिपादस्यपद्भावः यद्वा तत्रसाधुरितियत् यतोनावइत्याद्युदात्तत्वम् । अविं अवरक्षणादिषु इन्नितीन्प्रत्ययः कृत्स्वरः । रेरिहाणा लिहआस्वादनेइत्यस्य यङ्लुकि शानचिरूपं अभ्यस्तस्वरः ॥ १४ ॥

अथपञ्चदशी—

प॒देइ॑व॒निहि॑तेद॒स्मेअ॒न्तस्तयो॑र॒न्यद्गुह्य॑मा॒विर॒न्यत् ।
स॒ध्री॒ची॒नाप॒थ्या॒३॑साविषू॑चीम॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म्॥ १५॥३०॥

प॒देइ॒वेति॑प॒देऽइ॑व । निहि॑ते॒इति॒निऽहि॑ते । द॒स्मे । अ॒न्तरिति॑ । तयो॑ः ।
अ॒न्यत् । गुह्य॑म् । आ॒विः । अ॒न्यत् । स॒ध्री॒ची॒ना । प॒थ्या॑ । सा ।
विषू॑ची । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १५ ॥ ३० ॥

पदेइवपद्येतेज्ञायेतेतत्तदसाधारणलिङ्गेनेतिपदे अहश्चरात्रिश्चेत्येतेदस्मेसर्वैर्दर्शनीयेतेउभे अन्तर्नभसिनिहितेस्थापितेइववर्तेते तयोरहोरात्रयोरन्यद्रात्रिलक्षणंगुह्यं अप्रकाशमानतयागूढमिवास्ते अन्यदहःआविःसूर्यप्रकाशेनप्रकटंभवति सध्रीचीनाअहोरात्रयोःपरस्परमेलनरूपापथ्यामार्गःकालइत्यर्थः साविषूचीपुण्यकृतोपुण्यकृतश्चप्राप्नोतीतिविषूचीभवति सर्वेजनाः अहोरात्रयोर्वर्तन्ते यद्वा पदेइव देवमनुष्यादीनांस्थानभूतेद्यावापृथिव्यौ अन्तःअन्तरिक्षे

---

[1] ऋ० सं० ८. ४. १९.

Funding by IKS-MoE

निहितेवर्तेते तयोरन्यद्द्यौःगुह्यमस्माभिरदृश्यमानतयागूढंवर्तते अन्यापृथिवीआविःसर्वैर्दृश्यमानाप्रकटाभवति सध्रीचीनेतिपूर्ववत् ॥ सध्रीचीना सहपूर्वादञ्चतेःक्विन् सहस्यसध्रिरितिसध्र्यादेशः विभाषांचेरदिक्स्त्रियामितिखः ॥ १५ ॥

॥ इतितृतीयस्यतृतीयेत्रिंशोवर्गः ॥ ३० ॥

अथषोडशी—

आधे॒नवो॑धुनयन्ता॒मशि॑श्वीःसब॒र्दुघाः॑शश॒याअप्र॑दुग्धाः ।
नव्या॑नव्यायु॒व॒तयो॒भव॑न्तीर्म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ १६ ॥

आ । धे॒नवः॑ । धु॒न॒य॒न्ता॒म् । अशि॑श्वीः । स॒बः॒ऽदुघाः॑ । श॒श॒याः ।
अप्र॑ऽदुग्धाः । नव्याः॑ऽनव्याः । यु॒व॒तयः॑ । भव॑न्तीः । म॒हत् ।
दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १६ ॥

धेनवः वृष्टिद्वारासर्वस्यजगतःप्रीणयित्र्यः अशिश्वीः शिशुरहिताः यद्वा अशिशवः नभवन्तीत्यशिश्वीः शशयाः नभसिशयानावर्तमानाःकेनाप्यप्रदुग्धाः अक्षीणरसाः सबर्दुघाः उदकलक्षणस्यक्षीरस्यदोग्ध्र्यः युवतयःपरस्परमिश्रणोपेताः नव्यानव्याःअतिशयेननूतनाभवंतीः दिशोमेघावा आधुनयन्तां आदुहन्तु मेघपक्षे अशिश्वीःभवन्तीरित्यत्रलिङ्गव्यत्ययः ॥ धुनयन्तां धूञ्कंपने णिचि धूञ्प्रीणोर्नुग्वक्तव्यइतिनुक् ह्रस्वश्छान्दसः । अशिश्वीः सख्यशिश्वीतिभाषायामितिव्यत्ययेनछन्दसिभवति ॥ १६ ॥

अथसप्तदशी—

यद॒न्यासु॑वृष॒भोरोर॑वीति॒सोअ॒न्यस्मि॑न्यू॒थेनिद॑धाति॒रेतः॑ ।
सहि॒क्षपा॑वा॒न्त्सभग॒ःसराजा॑म॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ १७ ॥

यत् । अ॒न्यासु॑ । वृ॒ष॒भः । रोर॑वीति । सः । अ॒न्यस्मि॑न् । यू॒थे ।
नि । द॒धा॒ति॒ । रेतः॑ । सः । हि । क्षपा॑ऽवान् । सः । भगः॑ । सः ।
राजा॑ । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १७ ॥

वृषभः अपांवर्षकः यद्यःपर्जन्यात्मेन्द्रः अन्यासुदिक्षुरोरवीति मेघद्वाराभृशंशब्दंकरोति सपर्जन्यइन्द्रः अन्यस्मिन्यूथेदिशांवृन्देरेतउदकंनिदधाति तत्रवर्षति लोकेहिवृषभः कासुचि-

Funding by IKS-MoE

द्रोषुरेतःसेकार्थंरवंकरोति अन्यस्मिन्गोयूथेरेतःसिञ्चति तद्वत् सइन्द्रःक्षपावान्क्षिपतिशत्रूनुदकंवेतिक्षेपणवान् यद्वा क्षपारात्रिः तथारात्रिपर्याययागानांस्तोत्राणांभागभूतायारात्रिःसोच्यते तद्वान्सभगः सर्वैर्भजनीयः सराजाहितत्तत्कर्मानुरूपफलप्रदानेनसर्वेषांराजाखलु ॥ रोरवीति रुशब्दे इत्यस्ययङ्लुगन्तस्यलटिरूपं एकान्याभ्यांसमर्थाभ्यामितिप्रथमस्यननिघातः । यूथे युमिश्रणे तिथपृष्ठगूथयूथप्रोथाइतिथक्प्रत्ययान्तत्वेननिपातनाद्दीर्घः । रेतः रीङ्क्षरणेइत्यस्मात्स्नुरीभ्यांतुट्चेत्यसुन्प्रत्ययः तुडागमश्च नित्त्वादाद्युदात्तः ॥ १७ ॥

अथाष्टादशी–

वी॒रस्य॒नुस्व॒श्व्यँ॑जनास॒ःप्रनुवो॑चामवि॒दुर॑स्यदे॒वाः ।
षो॒ळ्हायु॒क्ताःपञ्च॑प॒ञ्चाव॑हन्तिम॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ १८ ॥

वी॒रस्य॑ । नु । सु॒ऽअश्व्य॑म् । ज॒ना॒स॒ः । प्र । नु । वो॒चा॒म॒ । वि॒दुः ।
अ॒स्य॒ । दे॒वाः । षो॒ळ्हा । यु॒क्ताः । पञ्च॑ऽपञ्च । आ । व॒ह॒न्ति॒ ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १८ ॥

हेजनासोजनाः वीरस्यशूरस्येन्द्रस्य स्वश्व्यंशोभनाश्वोपेतत्वंनुक्षिप्रंप्रवोचाम प्रकर्षेणवदाम तथा देवाअपि अस्येन्द्रस्यस्वश्वत्वंनुक्षिप्रंविदुर्जानन्ति किंतत्स्वश्वत्वंतदुच्यते षोळ्हा मासानांद्वंद्वयोगकालेषोढादृश्यमानाऋतवोश्वानिरूप्यन्ते तेचषट्संख्याकाऋतवः हेमंतशिशिरयोःसमासेनपञ्चपञ्चयुक्ताःसन्तः कालात्मकमिन्द्रमावहन्ति तदिदमिन्द्रस्यस्वश्वत्वं यद्दतुभिरूढत्वम् ॥ षोळ्हा षषःशब्दात्संख्यायाविधार्थेधेतिधाप्रत्ययः षषउत्वं दतृदशधास्तूत्तरपदादेष्टुत्वंचेत्युत्वंष्टुत्वंच प्रत्ययस्वरः ॥ १८ ॥

त्वाष्ट्रेपशौहविषोनुवाक्यादेवस्त्वष्टेत्येषा सूत्रितंच–देवस्त्वष्टासविताविश्वरूपोदेवत्वष्टर्यद्धचारुत्वमानडिति ।

सूक्तेएकोनविंशी–

दे॒वस्त्वष्टा॑सवि॒ताविश्वरू॑पःपु॒पोष॑प्र॒जाःपु॑रु॒धाज॑जान ।
इ॒माच॒विश्वा॒भुव॑नान्यस्यम॒हद्दे॒वाना॑मसु॒र॒त्वमेक॑म् ॥ १९ ॥

दे॒वः । त्वष्टा॑ । स॒वि॒ता । वि॒श्वऽरू॑पः । पु॒पोष॑ । प्र॒ऽजाः । पु॒रु॒धा ।
ज॒जा॒न॒ । इ॒मा । च॒ । विश्वा॑ । भुव॑नानि । अ॒स्य॒ । म॒हत् ।
दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ १९ ॥

सवितान्तर्यामितयासर्वस्यप्रेरकोविश्वरूपोनानाविधरूपस्त्वष्टात्वष्टृनामकोदेवः प्रजाः पुरुधाबहुधाजजानजनयति ताश्चपुपोष पोषयति इमा इमानि विश्वा विश्वानि सर्वाणिभुवनानिभूतजातानिच अस्यत्वष्टुःसंबन्धीनि ॥ विश्वरूपः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् ॥ १९ ॥

अथविंशी—

म॒हीसमै॑रच्च॒म्वा॑स॒मी॒चीउ॒भेतेअ॑स्य॒वसु॑ना॒न्यृ॑ष्टे ।
शृ॒ण्वेवी॒रोवि॒न्दमा॑नो॒वसू॑निम॒हद्दे॒वाना॑मसु॒रत्वमेक॑म् ॥ २० ॥

म॒ही इति॑ । सम् । ऐ॒र॒त् । च॒म्वा॑ । स॒मी॒ची इति॑ स॒म्ऽई॒ची ।
उ॒भे इति॑ । ते इति॑ । अ॒स्य॒ । वसु॑ना । न्यृ॑ष्टे॒इति॒निऽऋ॑ष्टे । शृ॒ण्वे ।
वी॒रः । वि॒न्दमा॑नः । वसू॑नि । म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् ।
एक॑म् ॥ २० ॥

मही महत्यौ समीची परस्परंसंगते चम्वा चमंतिअदन्तिअनयोर्देवमनुष्याइतिचम्वौ यद्वा चम्यते अद्यते भूतजातैरितिचम्वौद्यावापृथिव्यौ समैरत् इन्द्रःप्रजापश्वादिभिःसम्यगयोजयत् तेउभेद्यावापृथिव्यौअस्येन्द्रस्यवसुनातेजसाधनेनवान्यृष्टे नितरांव्याप्तेभवतः वीरःसमर्थःसइन्द्रः वसूनिशत्रूनभिभूयतदीयानिधनानिविन्दमानोलभमानःसन् शृण्वे सर्वैःश्रूयते तवेदिदमभितश्चेकितेवस्वित्यादिषुदृष्टत्वात् ॥ ऐरत् ईरगतावित्यस्यलङिरूपम् । न्यृष्टे ऋषीगतौ कर्मणिक्तः गतिरनन्तरइतिगतेःस्वरः । शृण्वे श्रुश्रवणेइत्यस्यव्यत्ययेनकर्मणिश्लुः लोपस्तआत्मनेपदेष्वितितलोपः । विन्दमानः विद्लृलाभेइत्यस्य लटि शानचि रूपं तस्यलसार्वधातुकस्वरः ॥ २० ॥

अथैकविंशी—

इ॒मांच॑नःपृथि॒वीं॑वि॒श्वधा॑या॒उप॑क्षेतिहि॒तमि॑त्रो॒नराजा॑ ।
पु॒र॒ःसदः॑शर्म॒सदो॒नवी॒राम॒हद्दे॒वाना॑मसु॒रत्वमेक॑म् ॥ २१ ॥

Funding by IKS-MoE

इ॒माम् । च॒ । नः॒ । पृ॒थि॒वीम् । वि॒श्वऽधा॑याः । उप॑ । क्षे॒ति॒ ।
हि॒तऽमि॑त्रः । न । राजा॑ । पु॒रः॒ऽसदः॑ । श॒र्म॒ऽसदः॑ । न । वी॒राः ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ २१ ॥

विश्वधायाः विश्वस्यधातासर्वान्नोवानोऽस्माकंराजेन्द्रः इमांपृथिवीमन्तरिक्षंचउप तयोःसमीपेक्षेतिनिवसति तत्रदृष्टान्तः—हितमित्रोन यथाकस्यचिद्धितोपदेष्टासुहृत्समीपेनिवसति तद्वत् वीराःसमर्थायुद्धसहायामरुतः पुरःसदःयुद्धार्थंपुरतोनिश्चयेनगन्तारः इन्द्रस्यशर्मसदोन नश्चार्थे शर्मणि गृहेसीदन्तश्चभवन्तियत्रयत्रासौ तत्रतत्र संनिधिंकुर्वाणाइत्यर्थः ॥ क्षेति क्षिनिवासगत्योरित्यस्य लटिबहुलंछन्दसीतिविकरणस्यलुक् निघातः ॥ २१ ॥

अथद्वाविंशी—

नि॒ष्षिध्व॑रीस्त॒ओष॑धीरु॒तापो॑र॒यिंत॑इन्द्रपृथि॒वीबि॑भर्ति ।
सखा॑यस्तेवाम॒भाजः॑स्यामम॒हद्दे॒वाना॑मसुर॒त्वमेक॑म् ॥२२॥३१॥

निः॒ऽसिध्व॑रीः । ते॒ । ओष॑धीः । उ॒त । आपः॑ । र॒यिम् । ते॒ ।
इ॒न्द्र॒ । पृ॒थि॒वी । बि॒भ॒र्ति॒ । सखा॑यः । ते॒ । वा॒म॒ऽभाजः॑ । स्या॒म॒ ।
म॒हत् । दे॒वाना॑म् । अ॒सु॒र॒ऽत्वम् । एक॑म् ॥ २२ ॥ ३१ ॥

हेपर्जन्यात्मकेन्द्र ओषधीरोषधयः तेनिष्षिध्वरीः निष्षिध्वर्योनितरांत्वत्कर्तृकसिद्धिमत्यः उतापिच आपस्त्वत्तोनिःसृताःपृथिवीतेतवभोगयोग्यंरयिंधनंबिभर्ति पुरूवसूनिपृथिवीबिभर्तीतिनिगमः । ततस्तेतवसखायःहविःप्रदानेनोपकारकाःस्तोतारोवयंवामभाजः स्याम सर्वैर्वननीयधनभागिनोभवेम तदेतद्देवानांमहदैश्वर्यं ॥ निष्षिध्वरीः षिधुसंराद्धौ संपदादिलक्षणोभावेक्विप् तदस्यास्तीत्यर्थेछन्दसीवनिपाविति वनिप् वनोरचेतिङीप्रेफश्च निसासहसमासः निसःसकारंछान्दसत्वादनादृत्य उपसर्गात्सुनोतीत्यादिनाषत्वं ङीपःपित्वादनुदात्तत्वेधातुस्वरः । बिभर्ति डुभृञ्धारणपोषणयोरित्यस्यलटि भृञामिदित्यभ्यासस्येत्वं निघातः । वामभाजः भजसेवायां भजोण्विरितिण्विः कृदुत्तरपदस्वरः ॥ २२ ॥

॥ इतितृतीयस्यतृतीयेएकत्रिंशोवर्गः ॥ ३१ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ।

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेतृतीयोऽध्यायः ॥ ३ ॥

Funding by IKS-MoE

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

नतामिनन्तीत्यष्टर्चंतृतीयंसूक्तं विश्वामित्रस्यवाचःपुत्रस्यवाप्रजापतेरार्षंत्रैष्टुभं वैश्वदेवं तथाचानुक्रमणिका—नताष्टाविति । सूक्तविनियोगोलिङ्गादवगन्तव्यः अस्मिन्सूक्तेप्रायेणादित्यैःसहसंवत्सरःस्तूयते ।

तत्रप्रथमा—

ओ३म् नतामि॑नन्तिमा॒यिनो॒नधीरा॑व्र॒तादे॒वानां॑प्रथ॒माध्रु॒वाणि॑ ।
नरोद॑सीअ॒द्रुहा॑वे॒द्याभि॒र्नपर्व॑तानि॒नमे॑तस्थि॒वांस॑ः ॥ १ ॥

न । ता । मि॒न॒न्ति॒ । मा॒यिन॑ः । न । धीरा॑ः । व्र॒ता । दे॒वाना॑म् ।
प्र॒थ॒मा । ध्रु॒वाणि॑ । न । रोद॑सी॒ इति॑ । अ॒द्रुहा॑ । वे॒द्याभि॑ः ।
न । पर्व॑ताः । नि॒ऽनमे॑ । त॒स्थि॒ऽवांस॑ः ॥ १ ॥

मायिनःकपटबुद्ध्युपेताः असुरादेवानांइन्द्रादीनांप्रथमाप्रथमानिसृष्ट्यनन्तरभावीनि ध्रुवाणि स्थिराणि केनापिचालयितुमशक्यानि ता तानि लोकेप्रसिद्धानि व्रता व्रतानि लोकपालादिकर्माणिनमिनन्ति नहिंसन्ति तथा धीराः विद्वांसोपिनाहिंसन्ति तथा अद्रुहा देवमनुष्यादिषुप्रजासुद्रोहवर्जिते रोदसी द्यावापृथिव्यौ वेद्याभिः स्वाश्रयतयासर्वैर्वेदनीयाभिःप्रजाभिःसहितानिकर्माणिनमिमीतः तदेतदुपपादयति—तस्थिवांसः पृथिव्यामूर्धतयास्थिताःपर्वताः ननिनमे निनमनीयानभवन्ति एतदुक्तंभवति यद्देवमनुष्यादीनांद्यावापृथिव्याधारकतयावस्थानंयच्चपर्वतादीनामुन्नततयावस्थानंतदिदंदेवानांकर्मतन्नकोऽप्यन्यथयितुमर्हतीति ॥ मिनन्ति मीङ्हिंसायामित्यस्यलटि मीनातेर्निगमेइतिह्रस्वः निघातः । वेद्याभिः वेदनमर्हति छन्दसिचेतियत्प्रत्ययः । निनमे णमुप्रह्वत्वेइत्यस्यकृत्यार्थेकेन्प्रत्ययः कृत्स्वरः ॥ १ ॥

अथद्वितीया—

षड्भा॒राँएको॒अच॑रन्बिभर्त्यृ॒तंवर्षि॑ष्ठ॒मुप॒गाव॒आगु॑ः ।
ति॒स्रोम॒हीरुप॑रास्तस्थु॒रत्या॒गुहा॒द्वेनिहि॑ते॒दर्श्येका॑ ॥ २ ॥

षट् । भा॒रान् । एक॑ः । अच॑रन् । बि॒भ॒र्ति॒ । ऋ॒तम् । वर्षि॑ष्ठम् ।
उप॑ । गाव॑ः । आ । अ॒गु॒ः । ति॒स्रः । म॒हीः । उप॑राः । त॒स्थु॒ः ।
अत्या॑ः । गुहा॑ । द्वे इति॑ । निहि॑ते॒ इति॒ निऽहि॑ते । दर्शि॑ । एका॑ ॥२॥

अचरन्स्थायीएकःसंवत्सरःषट्षट्संख्याकान्भारान्भ्रियते पुष्पविकासादियेष्वितिभाराऋतवः तान्वसन्तादीन्बिभर्ति अवयवत्वेनधारयति तथा ऋतंसत्यभूतंवर्षिष्ठंवृद्धतरमादित्यात्मकं तमेवसंवत्सरं गावोरश्मयःउपआअगुःप्राप्नुवन्ति किञ्च तस्मिन्नेवसंवत्सरे अत्याअतनशीलाआगमापायधर्मोपेतास्तिस्रोमहीः त्रयोलोकाःउपराः उपर्युपरिवर्तमानाः तस्थुःतिष्ठन्ति लोकत्रयमेवदर्शयति गुहा गुहायांस्वात्मनिद्वेभूमी द्यौश्चान्तरिक्षंचेत्येतेनिहिते नदृश्येते एकाभूमिर्दर्शिसर्वभूताधारतयादृश्यते ॥ भारान् डुभृञ्धारणपोषणयोरित्यस्मादधिकरणेघञ् कर्षात्वतोघञइत्यन्तोदात्तत्वम्। निहिते दधातेःकर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। दर्शि दृशिर्प्रेक्षणे कर्मणिलुङिचिणि चिणोलुगितिप्रत्ययस्यलुक् वाक्यभेदादनिघातः ॥ २ ॥

अथतृतीया–

त्रि॒पा॒ज॒स्यो॑वृष॒भोवि॒श्वरू॑पउ॒तत्र्यु॒धापु॑रु॒धप्र॒जावा॑न् ।
त्र्य॒नी॒कःप॑त्यते॒माहि॑नावा॒न्त्सरे॑तो॒धावृ॑ष॒भःशश्व॑तीनाम् ॥ ३ ॥

त्रि॒ऽपा॒ज॒स्यः । वृ॒ष॒भः । वि॒श्वऽरू॑पः । उ॒त । त्रि॒ऽउ॒धा । पु॒रु॒ध ।
प्र॒जाऽवा॑न् । त्रि॒ऽअ॒नी॒कः । प॒त्य॒ते । माहि॑नऽवान् । सः ।
रे॒तः॒ऽधाः । वृ॒ष॒भः । शश्व॑तीनाम् ॥ ३ ॥

त्रिपाजस्यः ग्रीष्मवर्षाहेमन्ताख्यैस्त्रिभिर्ऋतुभिः पाजस्यमुरोयस्यसत्रिपाजस्यः त्र्युरस्कइत्यर्थः उरोवचनश्चपाजस्यशब्दः इन्द्रस्यक्रोडोदित्यैपाजस्यवाजइतिअश्वमेधमन्त्रे उरःपरतयाम्नानात्। पाजसिबलेसाधुरितिव्युत्पत्तेश्च सर्वेषामङ्गानांमध्येउरसोबलवत्त्वात् वृषभः स्वावयवभूतेवर्षर्तौ अपांवर्षकःविश्वरूपः तत्तदृत्वसाधारणकार्यैःपुष्पविकासादिभिर्लिङ्गैर्नानारूपः उतापिच त्र्युधावसन्तशरद्धेमन्ताख्यैःत्रिभिर्ऋतुभिरूधोयस्यसत्र्युधा प्रजावान्प्रकर्षेणजायन्तइतिव्रीह्यादयःप्रजाः पुरुधानानाप्रकाराणिविद्यमानव्रीहियवादिरूपप्रजावान् किञ्च त्र्यनीकः त्रिभिरुष्णवर्षशीताख्यैरनेकैर्गुणैरुपेतः माहिनावान्महत्त्ववान्संवत्सराभिमानीदेवः पत्यतेआगच्छति वृषभःसेचनसमर्थःससंवत्सरःशश्वतीनांबह्वीनामोषधीनांपुष्पफलादिसंपत्तये

रेतोधारेतसउदकस्यधर्ताभवति ॥ त्र्युधा बहुव्रीहेरूधसोनङित्यनङ् सर्वविधीनांछन्दसिविकल्पितत्वात्पुंस्यपिभवति ऊकारस्यह्रस्वश्छान्दसः उत्तरपदान्तोदात्तप्रकरणेत्रिचक्रादीनांछन्दस्युपसंख्यानमित्युत्तरपदान्तोदात्तत्वम् ॥ ३ ॥

अथचतुर्थी–

अ॒भीक॑आसांपद॒वीर॑बोध्यादि॒त्याना॑मह्वे॒चारु॒नाम॑ ।
आप॑श्चिदस्माअरमन्तदे॒वीःपृथ॒ग्व्रज॑न्ती॒ःपरि॑षीमवृञ्जन् ॥ ४ ॥

अ॒भीके॑ । आ॒सा॒म् । प॒द॒ऽवीः । अ॒बो॒धि॒ । आ॒दि॒त्याना॑म् । अ॒ह्वे॒ ।
चारु॑ । नाम॑ । आपः॑ । चि॒त् । अ॒स्मै॒ । अ॒र॒म॒न्त॒ । दे॒वीः । पृथ॑क् ।
व्रज॑न्तीः । परि॑ । सी॒म् । अ॒वृ॒ञ्ज॒न् ॥ ४ ॥

संवत्सरः आसामोषधीनामभीकेसमीपे पदवीः पदानितत्तद्वनविशिष्टपुष्पफलादीनिवेतिप्रजनयतीतिपदवीःसन्नबोधि बुध्यते सावधानोवर्तते तथा आदित्यानां आदित्यामासाःसंख्यासाम्यात् यद्वा आदित्यसंक्रमणनिमित्तत्वादादित्यामासाः मेषादिस्थेसवितरियोयोमासः प्रपूर्यतेचान्द्रःचैत्राद्यःसज्ञेयइतिस्मृतेः । तेषांचैत्रादीनांमासानांचारुनाममधुश्चमाधवश्चेत्यादिनामधेयं अह्वे आह्वयामि उच्चारयामीत्यर्थः किंच देवीःद्योतनशीलाःपृथगितस्ततोव्रजन्तीर्गच्छन्त्यः आपश्चित् आपोपि अस्मैसंवत्सरायअरमन्त संवत्सरसंबन्धिमासचतुष्टयेवृष्टिद्वाराररमन्ते ताआपः सीमेनंसंवत्सरंपर्यवृंजन् अष्टसुमासेषुपरिवर्जयन्ति ॥ पदवीः वीगत्यादिषु क्विप् । अबोधि बुधअवगमनेइत्यस्यलुङि दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यामितिकर्तरिचिण् चिणोलुक् निघातः । आदित्यानां आदित्यसंबन्धिनइत्यर्थे दित्यदित्यादित्यपत्त्युत्तरपदाण्ण्यइतिण्यः अतोलोपयलोपौ प्रत्ययस्वरः । अह्वे ह्वयतेर्लुङि सिचआत्मनेपदेष्वन्यतरस्यामित्यङादेशः गुणः निघातः । अवृंजन् वृजीवर्जनेइत्यस्यलङिश्नमिरूपं निघातः ॥ ४ ॥

अथपञ्चमी–

त्रीष॒धस्था॑सिन्धव॒स्त्रिःक॑वी॒नामु॒तत्रि॒मा॒ताविद॒थे॑षुस॒म्राट् ।
ऋ॒ताव॑री॒र्योष॑णास्ति॒स्रोअप्या॒स्त्रिरादि॒वोवि॒दथे॒पत्य॑मानाः ॥ ५ ॥

त्री । स॒धऽस्था॑ । सि॒न्ध॒व॒ः । त्रिः । क॒वी॒नाम् । उ॒त । त्रि॒ऽमा॒ता ।
वि॒दथे॑षु । स॒म्ऽराट् । ऋ॒तऽव॑रीः । योष॑णाः । ति॒स्रः । अप्या॑ः ।
त्रिः । आ । दि॒वः । वि॒दथे॑ । पत्य॑मानाः ॥ ५ ॥

प्रजापतिःस्वविज्ञानंसिंधूनांनिवेदयति—हेसिंधवः आपः सर्वसाक्षिण्योयूयंमदीयंवचःशृणुतेतिशेषः त्रीषधस्था त्रयोलोकाः तेचप्रत्येकंत्रिर्भवन्ति तथा त्रयोवाइमेत्रिवृतोलोका[1]इतिश्रुतिः। नद्यावइन्द्रमोजसानांतरिक्षाणिवज्रिणंनविव्यचन्तभूमय[2]इति । प्रत्येकंबहुवचनश्रवणात् बहुवचनंचकपिञ्जलन्यायेनत्रित्वेपर्यवसितं तेचलोकाःकवीनांदेवानांनिवासस्थानानिभवन्ति उतापिच त्रिमाता त्रयाणाममीषांलोकानांनिर्मातासंवत्सरःसूर्योवा विदथेषुयज्ञेषु सम्राट् यजनीयतयासम्यग्दीप्यमानोवर्तते तथा ऋतावरीः उदकवत्यःअप्याःनभस्याआप्तव्यावातिस्रोयोषणाः त्रिसंख्याकाःइळासरस्वतीभारतीत्येवंरूपाः परस्परमिश्रणोपेतादेवताः विदथेयज्ञे दिवःदिवसस्य त्रिः त्रिषुसवनेषु आपत्यमानाआगच्छन्त्योभवन्ति॥सधस्था पूर्वपदादितिसंहितायांषत्वम् । योषणाः युषइतिसौत्रोधातुःल्युटिरूपं लित्स्वरः । तिस्रः तिसृभ्योजसइत्याद्युदात्तत्वम् । अप्याः अपइत्यन्तरिक्षनाम तत्रभवाः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् ॥ ५ ॥

अथषष्ठी—

त्रिरादि॒वःस॑वित॒र्वार्या॑णिदि॒वेदि॑व॒आसु॑व॒त्रिर्नो॑अह्नः॑ ।
त्रि॒धातु॑रा॒यआसु॑वा॒वसू॑नि॒भग॑त्रातर्धि॑षणेसा॒तये॑धाः ॥ ६ ॥

त्रिः । आ । दि॒वः । स॒वि॒त॒ः । वार्या॑णि । दि॒वेऽदि॑वे । आ ।
सु॒व॒ । त्रिः । न॒ः । अह्नः॑ । त्रि॒ऽधातु॑ । रा॒यः । आ । सु॒व॒ । वसू॑नि ।
भग॑ । त्रा॒त॒ः । धि॒ष॒णे॒ । सा॒तये॑ । धा॒ः ॥ ६ ॥

सवितः सर्वस्यप्रेरक हेआदित्य दिवः द्युलोकादागत्य त्वंवार्याणिसर्वैःसंभजनीयानिधनानि दिवेदिवे प्रतिदिनं त्रिरासुव त्रिवारमस्मभ्यंप्रेरय प्रयच्छेत्यर्थः तदेवोच्यते—भग सर्वैर्भजनीय त्रातःअस्माकंरक्षक हेआदित्य त्रिधातु त्रिधातूनिपशुकनकरत्नभेदेनत्रिप्रकाराणिवसूनिधनानि रायःरान्तिक्षीरादीनीतिरायोगोधनानि तानिचनोऽस्मभ्यमह्नःसंबन्धिषुत्रिःत्रिषुस-

---

१ ऐ० ब्रा० २. १७. । २ ऋ० सं० ५. ८. ११. ।

वनेषु आसुव प्रयच्छ धिषणेमाध्यमिकेहेवाक् सातयेधनलाभाय धाः अस्मान्कुरु ॥ त्रिः द्वित्रिचतुर्भ्यःसुजितिसुच् चित्स्वरः । सुव षूप्रेरणे तुदादिः लोटिरूपम् । त्रिधातु डुधाञ्धारणपोषणयोरित्यस्मात्सितनिगमिमसीत्यादिनातुन्प्रत्ययः । धिषणे आमन्त्रितत्वान्निघातः ॥ ६ ॥

अथसप्तमी–

त्रिरादिवःसवितासोषवीतिराजानामित्रावरुणासुपाणी ।
आपश्चिदस्यरोदसीचिदुर्वीरत्नंभिक्षन्तसवितुःसवाय ॥ ७ ॥

त्रिः । आ । दिवः । सविता । सोसवीति । राजाना । मित्रावरुणा ।
सुऽपाणी । आपः । चित् । अस्य । रोदसी इति । चित् ।
उर्वी इति । रत्नम् । भिक्षन्त । सवितुः । सवाय ॥ ७॥

सवितादेवः दिवोदिवसस्य त्रिः त्रिषुकालेषु आसोषवीतिअस्मभ्यंधनान्यासुवतु प्रेरयतु किञ्च राजाना राजानौ सुपाणी कल्याणपाणी मित्रावरुणौ आपः आप्नोतिसर्वं जगदित्यापोन्तरिक्षं नित्यबहुवचनान्तत्वाद्बहुवचनं चिदपिच उर्वीविस्तीर्णेरोदसीद्यावापृथिव्यौ एतादेवताः सवितुः प्रेरकस्यास्यदेवस्य सवाय सवेनप्रेरणेनरत्नमपेक्षितमर्थंभिक्षन्त याचन्ते ॥ सोसवीति षूप्रेरणेइत्यस्य यङ्लुकिलटिरूपं । मित्रावरुणा देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् । भिक्षन्त भिक्षयाञ्चायामित्यस्यलङिरूपं । सवाय जवसवौचेत्यजन्तत्वेननिपातनादन्तोदात्तत्वम् ॥ ७ ॥

अथाष्टमी–

त्रिरुत्तमादूणशारोचनानित्रयोराजन्त्यसुरस्यवीराः ।
ऋतावानइषिरादूळभासस्त्रिरादिवोविदथेसन्तुदेवाः ॥ ८ ॥ १ ॥

त्रिः । उत्ऽतमा । दुःऽनशा । रोचनानि । त्रयः । राजन्ति ।
असुरस्य । वीराः । ऋतऽवानः । इषिराः । दुःऽदभासः ।
त्रिः । आ । दिवः । विदथे । सन्तु । देवाः ॥ ८ ॥ १ ॥

दूणशा दुर्नशाकेनापिविनाशयितुमशक्यानि रोचनानिदीप्यमानानित्रिः त्रीण्युत्तमाउत्तमानि स्थानानिसन्ति एतेषु त्रिषुस्थानेषु असुरस्य अस्यतिक्षिपतिसर्वमित्यसुरः का-

Funding by IKS-MoE

लात्मासंवत्सरः तस्य वीराःपुत्रास्त्रयोग्निवायुसूर्यरूपाः राजन्ति शोभन्ते तानेवविशिनष्टि ऋतावानः ऋतंसत्यभूतमग्निहोत्रादिकंकर्मतद्वन्तः इषिराः यज्ञार्थंशीघ्रगतिमन्तः दूळभासः दुर्दभासःकेनापिस्वतेजसातिरस्कर्तुमशक्याएतेसर्वेदेवाः विदथेस्मदीयेयज्ञे दिवोह्नःसंबन्धिषु त्रिःत्रिषुसवनेषु आसन्तुसमन्ताद्यजनीयतयाभवन्तु ॥ उत्तमा उत्तमशश्वत्तमौसर्वत्रेत्युंछादिषुपाठादन्तोदात्तत्वम् । दूणशा नशेरकृच्छ्रार्थेखल् दुरोदाशनाशदभेषूत्वंवक्तव्यमितिरेफस्यउत्वं उत्तरपदादेष्टुत्वं लित्स्वरः । दूळभासः पूर्ववदुत्वष्टुत्वे ॥ ८ ॥

॥ इतितृतीयस्यचतुर्थेप्रथमोवर्गः ॥ १ ॥

प्रमेविविक्वानितिषळृचंचतुर्थंसूक्तं वैश्वामित्रंत्रैष्टुभं विश्वेदेवादेवता अत्रानुक्रमणिका—प्रमेषळिति । सूक्तविनियोगोलैङ्गिकः ।

तत्रप्रथमा—

प्रमे॑विवि॒क्वाँअ॑विदन्मनी॒षांधे॒नुंचर॑न्तीं॒प्रयु॑ता॒मगो॑पाम् ।
स॒द्यश्चि॒द्यादु॑दु॒हेभूरि॑धा॒सेरिन्द्र॒स्तद॒ग्निःप॑नि॒तारो॑अस्याः ॥ १ ॥

प्र । मे॒ । वि॒वि॒क्वान् । अ॒वि॒द॒त् । म॒नी॒षाम् । धे॒नुम् । चर॑न्तीम् ।
प्रऽयु॑ताम् । अगो॑पाम् । स॒द्यः । चि॒त् । या । दु॒दु॒हे । भूरि॑ ।
धा॒सेः । इन्द्रः॑ । तत् । अ॒ग्निः । प॒नि॒तारः॑ । अ॒स्याः ॥ १ ॥

विविक्वान् विवेकवानिन्द्रोग्निर्वामेममनीषांदेवताविषयांस्तुतिंप्राविदत् प्रकर्षेणजानातु तत्र दृष्टान्तः—चरन्तींयवसेइतस्ततोगच्छन्तींप्रयुतांपृथग्भूतामेकाकिनीं अगोपांगोप्तृरहितांयथाकामंचरन्तींधेनुंनवसूतिकांगामिव देवतानांप्रीणयित्रींस्तुतिमविन्ददित्यन्वयः यास्तुतिरूपाधेनुः सद्यश्चित्तदानीमेवधासेः धारयतिप्राणान्धीयतेदीयतेर्थिभ्यइतिवाधासिरन्नं कर्मणिषष्ठी भूरि बह्वन्नमपेक्षितंफलंदुदुहेदुग्धे इन्द्रोग्निरन्येचदेवाअस्याःस्तुतिरूपायाधेनोस्तत्तस्यान्नभूतस्य पयसःपनितारःस्तोतारोभवन्ति यद्वा इन्द्राग्नीस्तोतारोवयंचअस्याधेनोस्तत्पयःप्राप्नुमः ॥ विविक्वान् विचिर्पृथग्भावेइत्यस्यक्वसौरूपम् । अविदत् विदज्ञानेइत्यस्यलङि बहुलंछन्दसीति शः । दुदुहे दुहप्रपूरणेइत्यस्यलिटिरूपं यद्वृत्तयोगादनिघातः प्रत्ययस्वरः । पनितारः पनस्तुतावित्यस्यतृचिरूपम् ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया–

इन्द्रःसुपूषावृषणासुहस्तादिवोनप्रीताःशशयंदुदुह्रे ।
विश्वेयदस्यांरणयन्तदेवाःप्रवोत्रवसवःसुम्नमश्याम् ॥ २ ॥

इन्द्रः । सु । पूषा । वृषणा । सुऽहस्ता । दिवः । न । प्रीताः ।
शशयम् । दुदुह्रे । विश्वे । यत् । अस्याम् । रणयन्त । देवाः ।
प्र । वः । अत्र । वसवः । सुम्नम् । अश्याम् ॥ २ ॥

वसवःसर्वस्यवासयितारोहेदेवाः इन्द्रःपूषाच वृषणाअभिमतफलस्यसेक्तारौ सुहस्ता कल्याणपाणीनासत्यौमित्रावरुणौवाराजानामित्रावरुणासुपाणीइत्यादिषुदृष्टत्वात् एतेसर्वेदेवाः नेतिसंप्रत्यर्थे इदानींप्रीताः प्रीताःसन्तः शशयंनभसिशयानंमेघं दिवोनभसःसकाशात् सुदुदुह्रे वृष्टिद्वाराअपेक्षितफलंसुष्ठुदुहन्ति यद्यस्माद्विश्वेसर्वेदेवाः अस्यांवेद्यांरणयन्त रमयन्ते वोयुष्माकंसंवंधिन्यामत्रलोके सुम्नंसुखकरमपेक्षितफलंप्राश्यांप्राप्नुयां ॥ सुहस्ता हसेरसिहसीत्यादिनातन्प्रत्ययः नित्त्वादाद्युदात्तः बहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । दुदुह्रे दुहपपूरणे इत्यस्यलिटिइरयोरे । रणयन्त रमुक्रीडायां ण्यन्तस्यलटिरूपं वर्णव्यापत्तिः । अश्यां अशूव्याप्तावित्यस्यलिङि बहुलंछन्दसीतिविकरणस्यलुक् व्यत्ययेनपरस्मैपदम् ॥ २ ॥

अथतृतीया–

याजामयोवृष्णइच्छन्तिशक्तिंनमस्यन्तीर्जानतेगर्भमस्मिन् ।
अच्छापुत्रंधेनवोवावशानामहश्चरन्तिबिभ्रतंवपूंषि ॥ ३ ॥

यः । जामयः । वृष्णे । इच्छन्ति । शक्तिम् । नमस्यन्तीः ।
जानते । गर्भम् । अस्मिन् । अच्छ । पुत्रम् । धेनवः । वावशानाः ।
महः । चरन्ति । बिभ्रतम् । वपूंषि ॥ ३ ॥

याजामयः जमन्तिवर्षाकालेप्रादुर्भवन्तीतिजामयओषधयः वृष्णे अपांवर्षकायेन्द्राय शक्तिंसेचनसामर्थ्यंइच्छन्ति नमस्यन्तीः प्रह्वीभूतास्ताओषधयोस्मिन्निन्द्रेगर्भंवृष्टिद्वारापुष्पफलादिलक्षणगर्भाधानादिसामर्थ्यंजानतेजानन्ति वावशानाः फलंकामयमानाधेनवः सर्वस्यपी-

णयित्र्यओषधयः महः महान्तिनानाप्रकाराणिवपूंषिरूपाणिबिभ्रतं व्रीहियवनीवारादिफललक्षणंपुत्रंतनयमच्छाभिमुख्येन चरन्ति प्राप्नुवन्ति लोकेहिहंभारवंकुर्वाणाधेनवःवत्समभिलक्ष्यगच्छन्तितद्वत् यद्वा जामयः जमन्तिसर्वत्रप्रसरन्तीतिजामयःसूर्यदीप्तयः वृष्णे अपांवर्षकायस्वरश्मिभिर्भौमान्रसानादायपुनर्वर्षतीतिवर्षकःसूर्यः आदित्याज्जायतेवृष्टिरितिस्मृतेश्च । तस्मैवर्षणशक्तिमिच्छन्ति तादीप्तयःअस्मिन्नादित्ये गर्भमब्रूपगर्भाधानसामर्थ्यंजानन्ति ॥ जामयः जमतेर्गतिकर्मणोजमिघसिभ्यामिणितिविधीयमानोबहुवचनादस्मादपिभवति । नमस्यन्तीः नमस्शब्दान्नमोवरिवश्चित्रङःक्यजितिक्यच् तदन्ताच्छतरिरूपं प्रत्ययस्वरः। जानते ज्ञाअवबोधनेइत्यस्यलटिरूपम् । अच्छ निपातस्यचेतिसंहितायांदीर्घः ॥ ३ ॥

अथचतुर्थी–

अच्छा॑विवक्मि॒रोद॑सीसु॒मेके॒ग्राव्णो॑यु॒जा॒नोअ॑ध्व॒रेम॑नी॒षा ।
इ॒माउ॑ते॒मन॑वे॒भूरि॑वाराऊ॒र्ध्वाभ॑वन्तिदर्श॒तायज॑त्राः ॥ ४ ॥

अच्छ॑ । वि॒व॒क्मि॒ । रोद॑सी॒ इति॑ । सु॒मेके॒ इति॑ सु॒ऽमेके॑ । ग्राव्ण॑ः ।
यु॒जा॒नः । अ॒ध्व॒रे । म॒नी॒षा । इ॒माः । ऊँ॒ इति॑ । ते॒ । मन॑वे ।
भूरि॑ऽवाराः । ऊ॒र्ध्वाः । भ॒व॒न्ति॒ । द॒र्श॒ताः । यज॑त्राः ॥ ४ ॥

अध्वरेयज्ञेग्राव्णः सोमाभिषवार्थमुपलान्युजानः प्रयुंजानोहं सुमेकेसुरूपेरोदसीद्यावापृथिव्यौ मनीषा मनसईषयास्तुतिलक्षणयावाचा अच्छ विवक्मि आभिमुख्येनस्तौमि हे अग्ने ते तव भूरिवाराः यजमानैर्बहुवारंवरणीयाः दर्शता कमनीयतयादर्शनीयाः यजत्राः पूज्याः इमादीप्तयः मनवे मनुष्यव्यवहारार्थं ऊर्ध्वाः ऊर्ध्वमुखाभवन्ति ॥ विवक्मि वचपरिभाषणे लटि बहुलंछन्दसीतिशपःश्लुः अर्तिपिपर्त्योश्च बहुलंछन्दसीत्यभ्यासस्येत्वं चकारस्यकुत्वंव्यत्ययेन । युजानः युजिबुधिदृशेःकिच्चेत्यानच् कित्त्वादगुणः चित्त्वादन्तोदात्तः । मनीषा सुपोडादेशः ॥ ४ ॥

अथपञ्चमी–

याते॑जि॒ह्वामधु॑मतीसुमे॒धाअग्ने॑दे॒वेषू॒च्यत॑उरू॒ची ।
तये॒हविश्वाँ॒अव॑से॒यज॑त्रा॒नासा॑दयपा॒यया॑चा॒मधू॑नि ॥ ५ ॥

या । ते॒ । जि॒ह्वा । मधु॑ऽमती । सु॒ऽमे॒धाः । अग्ने॑ । दे॒वेषु॑ । उ॒च्यते॑ ।
उ॒रू॒ची । तया॑ । इ॒ह । विश्वा॑न् । अव॑से । यज॑त्रान् । आ ।
सा॒द॒य॒ । पा॒यय॑ । च॒ । मधू॑नि ॥ ५ ॥

हेअग्ने तेतवमधुमतीउदकवतीसुमेधाःशोभनामेधाप्रज्ञायस्याःसा सर्वस्यज्ञापयित्री या जिह्वाज्वालाउरूचीबहुव्याप्तिः सती देवेषुमध्ये आह्वानार्थमुच्यते प्रेर्यते यद्वा मधुमती माधुर्यवती सुमेधाःशोभनप्रज्ञानोपेता उरूची महतइन्द्रादीनञ्चतिपूजयतीत्युरूची जिह्वा वाक् देवेष्वाह्वानार्थंप्रेर्यते तयाजिह्वया यजत्रान्यजनीयान्देवान् विश्वान्देवानिह कर्मणि अस्माकमवसेरक्षणायआसादय उपवेशय किञ्च तान्विश्वान्देवान्मधूनिमदकरान्सोमान्पायय ॥ सुमेधाः नित्यमसिच्प्रजामेधयोरित्यसिच् । उच्यते वचपरिभाषणे कर्मणियकिरूपं यद्वृत्तयोगादनिघातः । उरूची अञ्चतेःक्विन् अञ्चतेश्चोपसंख्यानमितिङीप् अनुदात्तस्यचयत्रोदात्तलोपइतिङीपउदात्तत्वम् । पायय पापानेइत्यस्यणौपरतःशाछासाह्वाव्यावेपांयुगितियुक् तिङउत्तरत्वादनिघातः ॥ ५ ॥

अथषष्ठी–

याते॑अ॒ग्नेपर्व॑तस्येव॒धारास॑श्चन्तीपी॒पय॑द्देवचि॒त्रा ।
ताम॒स्मभ्यं॒प्रम॑तिंजातवेदो॒वसो॒रास्वं॑सुम॒तिंवि॒श्वज॑न्याम् ॥६॥२॥

या । ते॒ । अ॒ग्ने॒ । पर्व॑तस्यऽइव । धारा॑ । अस॑श्चन्ती । पी॒पय॑त् ।
दे॒व॒ । चि॒त्रा । ताम् । अ॒स्मभ्य॑म् । प्रऽम॑तिम् । जा॒त॒ऽवे॒दः॒ ।
वसो॒ इति॑ । रास्व॑ । सु॒ऽम॒तिम् । वि॒श्वऽज॑न्याम् ॥ ६ ॥ २ ॥

देव दीप्यमान हेअग्ने चित्रानानारूपा असश्चंती अस्मदन्यत्रसङ्गतिमकुर्वाणा या ते तवप्रमतिः प्रकृष्टाबुद्धिःपीपयत् अपेक्षितफलदानेनास्मान्वर्धयति तत्रदृष्टान्तः—पर्वतस्येवधारा यथा पर्वतस्यमेघस्यउदकधाराओषधिवनस्पत्यादिषुसंगतिंकुर्वाणातान्वर्धयतितद्वत् वसोसर्वस्यवासयितः जातवेदः जातप्रज्ञ हे अग्ने तांप्रमतिंपरहितकरणसमर्थांबुद्धिमस्मभ्यंरास्व दत्स्व तथा विश्वजन्यां सर्वजनहितांसुमतिंशोभनांबुद्धिंदत्स्व ॥ असश्चन्ती सश्चतिर्गतिकर्मा शतरि उगितश्चेतिङीप् नञासमासेनञ्स्वरः । पीपयत् पापाने ण्यन्तस्यलुङिचङिरूपं चङ्यन्यतरस्या-

मितिचङिपरतःपूर्वस्योदात्तत्वं यद्वृत्तयोगादनिघातः । प्रमतिं तादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम् । रास्व रादाने व्यत्ययेनात्मनेपदं लोटिरूपं आमन्त्रितस्याविद्यमानत्वान्निघाताभावः ॥ ६ ॥

॥ इतितृतीयस्यचतुर्थेद्वितीयोवर्गः ॥ २ ॥

धेनुःप्रत्नस्येतिनवर्चंपञ्चमंसूक्तं वैश्वामित्रंत्रैष्टुभमाश्विनं तथाचानुक्रान्तं–धेनुर्नवाश्विनमिति । प्रातरनुवाकेआश्विनेक्रतौत्रैष्टुभेछन्दस्याश्विनशस्त्रेचास्यसूक्तस्यविनियोगः सूत्रितञ्च–धेनुःप्रत्नस्यकउश्रवदितिसूक्तेइति । व्यूळ्हेदशरात्रेद्वितीयेछन्दोमेप्रउगशस्त्रे अयमाश्विनश्चतुर्थस्तृचः द्वितीयस्याग्निंवइतिखण्डेसूत्रितम्–धेनुःप्रत्नस्यकाम्यंदुहानाब्रह्माणइन्द्रोपयाहिविद्वानिति ।

तत्रप्रथमा–

धे॒नुःप्र॒त्नस्य॒काम्यं॒दुहा॑ना॒न्तःपु॒त्रश्च॑रति॒दक्षि॑णायाः ।
आद्यो॑त॒निंव॑हतिशु॒भ्रया॑मो॒षसः॒स्तोमो॑अ॒श्विना॑वजीगः ॥ १ ॥

धे॒नुः । प्र॒त्नस्य॑ । काम्य॑म् । दुहा॑ना । अ॒न्तरिति॑ । पु॒त्रः ।
च॒र॒ति॒ । दक्षि॑णायाः । आ । द्यो॒त॒निम् । व॒ह॒ति॒ । शु॒भ्रऽया॑मा ।
उ॒षसः॑ । स्तोमः॑ । अ॒श्विनौ॑ । अ॒जी॒ग॒रिति॑ ॥ १ ॥

धेनुःप्रीणयित्रीउषाः प्रत्नस्यपुरातनस्याग्नेःकाम्यंकमनीयंपयोदुहानादोग्ध्रीभवति दक्षिणायाउषसःपुत्रःसूर्यस्तस्याअन्तश्चरति उषसोनन्तरंशुभ्रयामा सूर्यकिरणसंपर्काच्छुभ्रतया यामोगमनंयस्यासौशुभ्रयामांदिवसः द्योतनिंसर्वस्यप्रकाशकंसूर्यमावहति बिभर्ति अतउषसः पुराअश्विनौस्तोतुं स्तोमःस्तोत्रकारी होत्रादिरजीगः जागर्ति उत्तिष्ठति ॥ शुभ्रयामा यामाप्णे आतोमनिन् बहुव्रीहौपूर्वपदस्वरः । अजीगः जागृनिद्राक्षये लङितिपि अदादित्वाच्छपोलुक् आकारस्यईकारश्छान्दसः गुणेकृते हल्ङ्यादिनातिपोलोपः ॥ १ ॥

अथद्वितीया–

सु॒युग्व॑हन्ति॒प्रति॑वामृ॒तेनो॒र्ध्वाभ॑वन्तिपि॒तरे॑व॒मेधाः॑ ।
ज॒रेथा॑म॒स्मद्विप॒णेर्म॑नी॒षांयु॒वोरव॑श्चकृ॒माया॑तम॒र्वाक् ॥ २ ॥

Funding by IKS-MoE

सुऽयुक् । वहन्ति । प्रति । वाम् । ऋतेन । ऊर्ध्वाः । भवन्ति ।
पितराऽइव । मेधाः । जरेथाम् । अस्मत् । वि । पणेः । मनीषाम् ।
युवोः । अवः । चकृम । आ । यातम् । अर्वाक् ॥ २॥

हेअश्विनौ सुयुक् सुष्ठुरथेयोजिताअश्वाऋतेनसत्यभूतेनरथेनवांयुवांप्रतिवहन्ति यज्ञंप्रत्यागमनायधारयन्ति मेधाः यज्ञाश्च ऊर्ध्वाःयुष्मदभिमुखंऊर्ध्वमुखाभवन्ति तत्रदृष्टान्तः—पितराइव यथापुत्राःपितरौमातापितरावभिलक्ष्यगच्छंतितद्वत् अस्मदस्मत्तःसकाशात्पणेर्मनीषांआसुरींबुद्धिंविजरेथां विशेषेणनाशयतं वयंतु युवोर्युवयोरवः हविर्लक्षणमन्नं चकृमकुर्मः युवामर्वाक्अस्मदाभिमुख्येनायातम् ॥ सुयुक् युजेःक्विप् सुपांसुलुगितिसुपोलुक् । पितरेव पितामात्रेतिपितुःशेषः सुपोडादेशः । जरेथां जृष्वयोहानौ ण्यन्तस्य जनीजृष्क्नसुरञ्जोमन्ताश्चेतिमित्त्वाद्वृद्ध्यभावः छन्दस्युभयथेतिआथामआर्धधातुकत्वाण्णिलोपः शपःपित्त्वादनुदात्तत्वेधातुस्वरः॥२॥

अथतृतीया—

सुयुग्भिरश्वैःसुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः ।
किमङ्गवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासोअश्विनापुराजाः ॥ ३ ॥

सुयुक्ऽभिः । अश्वैः । सुऽवृता । रथेन । दस्रौ । इमम् । शृणुतम् ।
श्लोकम् । अद्रेः । किम् । अङ्ग । वाम् । प्रति । अवर्तिम् ।
गमिष्ठा । आहुः । विप्रासः । अश्विना । पुराऽजाः ॥ ३ ॥

हेअश्विनौ सुयुग्भिः सुष्ठुयोजितैरश्वैःसुवृता पुनःपुनरावर्ततइतिवृच्चक्रं शोभनचक्रोपेतेनरथेनागत्य दस्रौ शत्रूणामुपक्षपयितारौ युवां अद्रेःआद्रियतेसर्वैरित्यद्रिःस्तोता तस्येमंश्लोकं स्तोत्रं शृणुतं अंग हेअश्विनौ विप्रासोमेधाविनः पुराजाः पुरातनाऋषयः वां युवांअवर्तिं अस्माकंवृत्तिहानिंप्रति गमिष्ठा अतिशयेनगन्ताराविति किमाहुः किंकथयन्तीति किं नकथयन्तीत्यर्थः प्रथमाष्टकेष्टमेध्यायेसुवृतारथेनेत्यादिगतं । गमिष्ठा गन्तृशब्दादिष्ठनिरूपम् ॥ ३ ॥

अथचतुर्थी—

आमंन्येथामागंतंकच्चिदेवैर्विश्वेजनासोअश्विनाहवन्ते ।
इमाहिवांगोऋजीकामधूनिप्रमित्रासोनददुरुस्रोअग्रे ॥ ४ ॥

Funding by IKS-MoE

आ । मन्येथाम् । आ । गतम् । कत् । चित् । एवैः । विश्वे । जनासः ।
अश्विना । हवन्ते । इमा । हि । वाम् । गोऽऋजीका । मधूनि ।
प्र । मित्रासः । न । ददुः । उस्रः । अग्ने ॥ ४ ॥

कच्चिदितिप्रश्ने हेअश्विनौ आमन्येथां इमांमदीयांस्तुतिंजानीतं किञ्च एवैर्गमनसाधनैरश्वैरागतं यज्ञंप्रत्यागच्छतं विश्वेसर्वेजनासःस्तोतारः अश्विनाअश्विनौ वां युवांहवन्ते स्तुतिलक्षणाभिर्वाग्भिराह्वयन्ति किञ्च गोऋजीकागवांपयसामिश्रणोपेतानिमधूनिमदकराणिसोमरसरूपाणिइमाइमानिहवींषि युवाभ्यांप्रददुरध्वर्य्वादयःप्रयच्छन्ति तत्रदृष्टान्तः—मित्रासोन यथा मित्राणिमित्रेभ्योपेक्षितंददतितद्वत् उस्रः वसतिनभसीत्युस्रःसूर्यः अग्ने उषसोग्रेउदेति तस्मादागच्छतमितिभावः॥ मन्येथां मनज्ञाने दिवादिः लोटिरूपम् । इमा सुपोडादेशः। गोऋजीका प्रकृत्यान्तःपादमितिएङःप्रकृतिभावः । ददुः दाण्दानेइत्यस्यलिटचुसिरूपं हियोगादनिघातः । उस्रः वसनिवासे स्फायितञ्चीत्यादिनारक् किच्वात्संप्रसारणं शासिवसिघसीनांचेतिषत्वाभावश्छान्दसः ॥ ४ ॥

अथपञ्चमी—

तिरःपुरूचिदश्विनारजांस्याङ्गूषोवांमघवानाजनेषु ।
एहयातंपथिभिर्देवयानैर्दस्राविमेवांनिधयोमधूनाम् ॥ ५ ॥ ३ ॥

तिरः । पुरु । चित् । अश्विना । रजांसि । आङ्गूषः । वाम् ।
मघऽवाना । जनेषु । आ । इह । यातम् । पथिऽभिः । देवऽयानैः ।
दस्रौ । इमे । वाम् । निऽधयः । मधूनाम् ॥ ५ ॥ ३ ॥

हेअश्विनौ पुरुचित् बहून्यपिरजांसिस्थानानि तिरः स्वतेजसातिरस्कुर्वन्तौ वां युवां इहकर्मणि देवयानैः पथिभिर्मार्गैरायातं आगच्छतं मघवाना धनवन्तौ हेअश्विनौ जनेषुस्तोतृषु वां युवयोराङ्गूषः आसमन्ताद्घोषणीयंस्तोत्रंवर्तते दस्रौ शत्रूणामुपक्षपयितारौ हेअश्विनौ वांयुवयोर्मधूनांमदकराणांसोमानामिमेनिधयः निधीयतेत्रसोमइतिनिधयःपात्रविशेषाःसन्ति तस्मादागच्छतमितिभावः ॥ आङ्गूषः आङ्पूर्वाद्घुषेःकर्मणिघञ् आघुष्यतइत्याघोषः घोइत्यस्यपृषोदरादित्वाद्गूइत्यादेशः आङोनुनासिकश्छन्दसीत्यनच्यपि अनुनासिकश्छान्दसः यद्वा

अगिर्गत्यर्थःअस्मादङ्गूषइतिसूत्रेणोषच्प्रत्ययान्तोनिपातितः अंगतिगच्छतिदेवानित्यंगूषःस्तोत्रं अङ्गूषएवांगूषः प्रज्ञादित्वात्स्वार्थिकोणः प्रत्ययस्वरः । एहयातमित्यर्धर्चोगतः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेतृतीयोवर्गः ॥ ३ ॥

अप्तोर्यामेतिरिक्तोक्थ्येच्छावाकशस्त्रेपुराणमोकइतिचतस्रोविकल्पेनयाज्याः सूत्रितञ्च–यदिनाधीयात्पुराणमोकःसख्यंशिवंवामितिचतस्रोयाज्याइति ।

सूक्तेषष्ठी–

पु॒रा॒णमोक॑ःस॒ख्यंशि॒वंवां॑यु॒वोर्न॑रा॒द्रवि॑णंज॒ह्नाव्या॑म् ।
पुन॑ःकृण्वा॒नाःस॒ख्याशि॒वानि॒मध्वा॑मदेमस॒हनूस॑मा॒नाः ॥ ६ ॥

पु॒रा॒णम् । ओक॑ः । स॒ख्यम् । शि॒वम् । वा॒म् । यु॒वोः । न॒रा॒ ।
द्रवि॑णम् । ज॒ह्नाव्या॑म् । पुन॑रिति॑ । कृ॒ण्वा॒नाः । स॒ख्या ।
शि॒वानि॑ । मध्वा॑ । म॒दे॒म॒ । स॒ह । नु । स॒मा॒नाः ॥ ६ ॥

हेअश्विनौ वांयुवयोःपुराणंपुरातनं सख्यंसखित्वं ओकः सेव्यं शिवंकल्याणकरंभवति किञ्च हेनरा नरौ अस्मदीयस्यकर्मणोनेतारौ युवोःयुवयोर्द्रविणंधनंजह्नाव्यां जह्नुकुलजायां भवति शिवानिसुखकराणि युवयोःसख्या सख्यानि पुनःपुनःकृण्वानाःकुर्वन्तःसमानाः हविःप्रदानेनोपकारकत्वान्मित्रभूतावयंमध्वामदकरेणसोमेनयुवांसहयुगपत् नुक्षिप्रंमदेम हर्षयेम ॥ सख्यं सख्युर्भावइत्यर्थेसख्युर्यइतियप्रत्ययः । जह्नाव्यां जह्नोःसंबन्धिनीत्यर्थे तस्येदमित्यण् ओर्गुणः ह्रस्वदीर्घयोर्व्यत्ययः । मदेम मदीहर्षेइत्यस्याशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्ययः निघातः ॥ ६ ॥

अथसप्तमी–

अश्वि॑नावा॒युना॑यु॒वंसु॑दक्षानि॒युद्भि॑श्चस॒जोष॑सायुवाना ।
नास॑त्याति॒रोअं॑ह्न्यंजुषा॒णासोमं॑पिबतम॒स्रिधा॑सुदानू ॥ ७ ॥

अश्वि॑ना । वा॒युना॑ । यु॒वम् । सु॒ऽद॒क्षा॒ । नि॒युत्ऽभि॑ः । च॒ ।
स॒ऽजोष॑सा । यु॒वा॒ना॒ । नास॑त्या । ति॒रःऽअं॑ह्न्यम् । जु॒षा॒णा ।
सोम॑म् । पि॒ब॒त॒म् । अ॒स्रिधा॑ । सु॒दा॒नू॒ इति॑ सु॒ऽदा॒नू ॥ ७ ॥

Funding by IKS-MoE

सुदक्षा शोभनसामर्थ्योपेतौयुवाना नित्यतरुणौ नासत्या नविद्यतेअसत्यंययोस्तौ सुदानू शोभनफलस्यदातारौ हेअश्विनौ वायुनानियुद्भिश्च सजोषसासंगतौजुषाणा सोमविषयप्रीतियुक्तौ अस्रिधा अनुपक्षीणौ युवं युवांतिरोअह्न्यं अह्नितिरोहिते हूयमानमिमं सोमंपिबतम् ॥ नियुद्भिः योतेःक्विप् । तिरोअह्न्यं अह्निभवमह्न्यं भवेछन्दसीतियत् तिरोभूतमह्न्यंयस्मिन्कालेसतिरोअह्न्यः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ७ ॥

अथाष्टमी—

अश्वि॑ना॒परि॑वा॒मिषः॑पुरू॒चीरी॒युर्गी॒र्भिर्यत॑माना॒अमृ॑ध्राः ।
रथो॑ह॒वामृत॒जाअद्रि॑जूत॒ःपरि॒द्यावा॑पृथि॒वीय॑न्तिस॒द्यः ॥ ८ ॥

अश्वि॑ना । परि॑ । वा॒म् । इषः॑ । पु॒रू॒चीः । ई॒युः । गी॒ःऽभिः ।
यत॑मानाः । अमृ॑ध्राः । रथः॑ । ह॒ । वा॒म् । ऋ॒त॒ऽजाः । अद्रि॑ऽजूतः ।
परि॑ । द्यावा॑पृथि॒वी इति॑ । य॒न्ति॒ । स॒द्यः ॥ ७ ॥

हेअश्विनौ पुरूचीः पुरुतममञ्चन्तिगच्छन्तीतिपुरूचीः बहूनि इषोहविर्लक्षणान्यन्नानि वां युवां परीयुःपरितोगच्छन्ति तथा अमृध्राः केनाप्यतिरस्कृताः यतमानाः कर्मणिप्रवर्तमानाः स्तोतारः गीर्भिःस्तुतिलक्षणाभिर्वाग्भिर्युवांपरिचरन्ति ऋतजा ऋतस्योदकस्यजनयिता ऋते यज्ञेप्रादुर्भवतीतिवा अद्रिजूतः स्तोतृभिराकृष्टः वांयुवयोःरथः द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेवपरियातिह सर्वतःप्राप्नोतिखलु अश्विनोरथस्यवेगवत्त्वेमन्त्रवर्णः—योवामश्विनामनसोजवीयान्रथःस्वश्वोविशआजिगातीति[1] ।अतःकारणादस्मदीयंयज्ञंप्रत्यागच्छतमितिभावः ॥ ईयुः इण्गतावित्यस्य लिटि दीर्घइणःकितीत्यभ्यासस्यदीर्घः पादादित्वादनिघातः । यतमानाः यतीप्रयत्नेइत्यस्यशानचिरूपं शपःपित्त्वादनुदात्तत्वेशानचोलसार्वधातुकस्वरेणानुदात्तत्वेधातुस्वरः । ऋतजाः जनेर्विट् विड्वनोरित्यात्वम् । अद्रिजूतः जूइतिसौत्रोधातुः कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदस्वरः ॥ ८ ॥

---

[1] ऋ० सं० १. ८. १३. ।

Funding by IKS-MoE

अथनवमी—

अश्वि॑नामधु॒षुत्त॑मोयु॒वाकु॒ःसोम॒स्तंपा॑त॒माग॑तंदुरो॒णे ।
रथो॑हवा॒म्भूरि॒वर्प॒ःकरि॑क्रत्सु॒ताव॑तोनि॒ष्कृ॒तमाग॑मिष्ठः ॥ ९ ॥ ४ ॥

अश्वि॑ना । म॒धु॒सुत्ऽत॑मः । यु॒वाकुः॑ । सोमः॑ । तम् । पा॒त॒म् ।
आ । ग॒त॒म् । दु॒रो॒णे । रथः॑ । ह॒ । वा॒म् । भूरि॑ । वर्पः॑ ।
करि॑क्रत् । सु॒तऽव॑तः । निः॒ऽकृ॒तम् । आऽग॑मिष्ठः ॥ ९ ॥ ४ ॥

हेअश्विनौ यःसोमः मधुषुत्तमः मधुरसमत्यन्तंप्रेरयन् युवाकुर्युवांकामयमानोवर्तते यद्वा युवाकुर्वसतीवरीप्रभृतिभिर्मिश्रितइत्यर्थः तमिमंसोमंपातं पिबतं दुरोणेऽस्माकंगृहेआगतमागच्छतं भूरि प्रभूतं वर्षोवारकं तेजःसर्वैर्वरणीयंधनंवा करिक्रत् पुनःपुनःकुर्वन् वांयुवयोरथःसुतवतःसोममभिषुतवतोयजमानस्यनिष्कृतं निरित्येषसमित्येतस्यस्थानेइति[1]यास्कः । संस्कारि यद्वा संस्कृतं गृहमागमिष्ठः ह अतिशयेनागच्छन्भवतिखलु ॥ युवाकुः यौतेः कटिकुषिभ्यांकाकुरितिबाहुलकादस्मादपिभवति प्रत्ययस्वरेणमध्योदात्तः । करिक्रत् करोतेर्यङ्लुकि शतरि दाधर्तिदर्धर्तिदर्धर्षीत्यादिनाचुत्वाभावेयणादेशेकृतेङ्गस्यानृकारान्तत्वादभ्यासस्यरिगागमोनप्राप्नोतीतिसोपिनिपात्यते अभ्यस्तस्वरः । निष्कृतं करोतेरादिकर्मणिक्तः संस्कर्तुंप्रवृत्तइत्यर्थः थाथादिस्वरः ॥ ९ ॥

॥ इतितृतीयस्यचतुर्थेचतुर्थोवर्गः ॥ ४ ॥

मित्रोजनानितिनवर्चंषष्ठंसूक्तं वैश्वामित्रं त्रैष्टुभमैन्द्रं मित्रोमैत्रंचतुर्गायत्र्यंतमित्यनुक्रमणिका । आदितःपञ्चत्रिष्टुभः शिष्टाश्चतस्रोगायत्र्यः मित्रोदेवता अग्निहोत्रार्थेपयसिवर्षबिन्दुपतनेमित्रोजनानित्यनयासमिधमादध्यात् । सूत्रितञ्च—मित्रोजनान्यातयतिब्रुवाणइतिसमिदाधानमिति ।

तत्रप्रथमा—

मि॒त्रोजना॑न्यातयतिब्रुवा॒णोमि॒त्रोदा॑धारपृथि॒वीमु॒तद्याम् ।
मि॒त्रःकृ॒ष्टीरनि॑मिषा॒भिच॑ष्टेमि॒त्राय॑ह॒व्यंघृ॒तव॑ज्जुहोत ॥ १ ॥

---

[1] नि० १२. ७.

Funding by IKS-MoE

मित्रः । जनान् । यातयति । ब्रुवाणः । मित्रः । दाधार ।
पृथिवीम् । उत । द्याम् । मित्रः । कृष्टीः । अनिऽमिषा । अभि ।
चष्टे । मित्राय । हव्यम् । घृतऽवत् । जुहोत ॥ १ ॥

ब्रुवाणःस्तूयमानः शब्दंकुर्वाणोवा मित्रः प्रकर्षेणसर्वैर्मीयतेतथासर्वान्वृष्टिप्रदानेनत्रायतइतिवामित्रःसूर्यः जनान्कर्षकादिजनान् यातयति कृष्यादिकर्मसुप्रयत्नंकारयति तथामित्रएव पृथिवीं उतापिचद्यां एतावुभौलोकौवृष्टिद्वारान्नंयागांश्चजनयन् दाधारधारयति तथासति मित्रःअनिमिषाअनिमिषणेनानुग्रहदृष्ट्याकृष्टीःकर्मवतोमनुष्यानभिचष्टे सर्वतःपश्यति एतत्सर्वंज्ञात्वा हेऋत्विजः घृतवदुपस्तरणाभिघारणयुक्तंहव्यं हवनयोग्यंपुरोडाशादिकं तस्मैमित्रायदेवायजुहोत जुहुत प्रयच्छतेत्यर्थः उक्तार्थंयास्कोब्रवीति—मित्रोजनानायातयतिब्रुवाणःशब्दंकुर्वन्मित्रएवधारयतिपृथिवींचदिवंचमित्रःकृष्टीरनिमिषन्नभिविपश्यतीतिकृष्टयइतिमनुष्यनामकर्मवन्तोभवन्तिविकृष्टदेहावामित्रायहव्यंघृतवज्जुहोतीतिव्याख्यातंजुहोतिर्दानकर्मेति॥ यातयति यतीप्रयत्नेइत्यस्यण्यन्तस्यलटिरूपम् । दाधार तुजादीनामित्यभ्यासस्यदीर्घः । जुहोत जुहोतेर्लोटि प्रत्ययस्यतबादेशः गुणःनिघातः ॥ १ ॥

देवसुवांहविष्षुमित्रस्यसत्यस्यप्रसमित्रेतियाज्या एषैवप्रातर्होमस्यकालात्ययनिमित्तेमैत्रेचरौयाज्या सूत्रितश्च—प्रसमित्रमर्तोअस्तुप्रयस्वांस्त्वांनष्टवान्महिमायपृच्छतइति । ततइष्टिर्मित्रःसूर्योभियोमहिनादिवंप्रसमित्रमर्तोअस्तुप्रयस्वानितिसंस्थितायामितिच ।

सूक्तेद्वितीया—

प्रसमित्रमर्तोअस्तुप्रयंस्वान्यस्तंआदित्यशिक्षंतिव्रतेनं ।
नहंन्यतेनजींयतेत्वोतोनैनमंहोंअश्नोत्यन्तितोनदूरात् ॥ २ ॥

प्र । सः । मित्र । मर्तः । अस्तु । प्रयस्वान् । यः । ते । आदित्य ।
शिक्षंति । व्रतेनं । न । हन्यते । न । जीयते । त्वाऽऊंतः ।
न । एनम् । अंहः । अश्नोति । अन्तितः । न । दूरात् ॥ २ ॥

हेआदित्यव्रतेनयज्ञेनयुक्तोयोमनुष्यःतेतुभ्यंशिक्षति हविर्लक्षणमन्नंददाति हेमित्र समर्तोमनुष्यः प्रयस्वानन्नवान्प्रास्तु प्रभवतु त्वोतस्त्वयारक्षितः समनुष्यः केनापिनहन्यते नबाध्यते नजीर्यते नाभिभूयतेच एनंतुभ्यंहविर्दत्तवन्तंपुरुषंअंहःपापंअन्तितःसमीपान्नाश्नोति नप्राप्नोति ॥

---

१ नि० १०।२२।

Funding by IKS-MoE

शिक्षतिर्दानकर्मा व्यत्ययेनपरस्मैपदं यद्वृत्तयोगादनिघातः । जीयते जयतेःकर्मणियकि अकृत्सार्वधातुकयोरितिदीर्घः । त्वोतः तृतीयाकर्मणीतिपूर्वपदस्वरः । अश्नोति अशूव्याप्तौ स्वादिः व्यत्ययेनपरस्मैपदम्.॥ २ ॥

देवसुवांहविष्षुमित्रस्यसत्यस्यानुवाक्या । अनमीवासइळयामदन्तःप्रसमित्रमर्तोअस्तुप्रयस्वानितिसूत्रम् ।

सैषातृतीया–

अ॒न॒मी॒वास॒इळ॑या॒मद॑न्तोमि॒तज्ञ॑वो॒वरि॑म॒न्नापृ॑थि॒ऽव्याः ।
आ॒दि॒त्यस्य॑व्र॒तमु॑पक्षि॒यन्तो॑व॒यंमि॒त्रस्य॑सुम॒तौस्या॑म ॥ ३ ॥

अ॒न॒मी॒वास॑ः । इळ॑या । मद॑न्तः । मि॒तऽज्ञ॑वः । वरि॑मन् । आ ।
पृ॒थि॒व्याः । आ॒दि॒त्यस्य॑ । व्र॒तम् । उ॒प॒ऽक्षि॒यन्त॑ः । व॒यम् ।
मि॒त्रस्य॑ । सु॒ऽम॒तौ । स्या॒म॒ ॥ ३ ॥

हेमित्र अनमीवासः रोगवर्जिताः इळयान्नेनमदन्तोमाद्यन्तःपृथिव्याःवरिमन्विस्तीर्णेप्रदेशे मितज्ञवः मितजानुकाः आयथाकामंसर्वत्रगच्छन्तः आदित्यस्यसंबन्धिव्रतंकर्मोपक्षियन्तः तस्यकर्मणःसमीपेनिवसन्तः तदीयंकर्मकुर्वाणाइत्यर्थः तादृशावयंमित्रस्यादित्यस्यसुमतौशोभनायामनुग्रहबुद्ध्यांस्यामवर्तेमहि ॥ मदन्तःमदीहर्षेइत्यस्यशतरिव्यत्ययेनशप् । मितज्ञवः जानुशब्दस्यज्ञुश्छान्दसः । वरिमन् उरुशब्दात्पृथ्वादित्वादिमनिच् प्रियस्थिरेत्यादिनावरादेशः सुपांसुलुगितिसप्तम्यालुक् व्यत्ययेनाद्युदात्तः ॥ ३ ॥

अथचतुर्थी–

अ॒यंमि॒त्रोन॑म॒स्य॑ःसु॒शेवो॒राजा॑सु॒क्ष॒त्रोअ॑जनिष्टवे॒धाः ।
तस्य॑व॒यंसु॑म॒तौय॒ज्ञिय॒स्यापि॑भ॒द्रेसौ॑मन॒सेस्या॑म ॥ ४ ॥

अ॒यम् । मि॒त्रः । न॒म॒स्य॑ः । सु॒ऽशेव॑ः । राजा॑ । सु॒ऽक्ष॒त्रः ।
अ॒ज॒नि॒ष्ट॒ । वे॒धाः । तस्य॑ । व॒यम् । सु॒ऽम॒तौ । य॒ज्ञिय॑स्य ।
आपि॑ । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥ ४ ॥

Funding by IKS-MoE

अयंपूर्वमन्त्रेप्रतिपादितोमित्रः सूर्यः नमस्यः सर्वैर्नमस्करणीयः सुशेवः शोभनसुखः सुखेनसेव्यइत्यर्थः राजा सर्वस्यजगतःप्रकाशप्रदानेनस्वामी सुक्षत्रः क्षत्रशब्देनबलमुच्यते शोभनबलोपेतः वेधाःसर्वस्यजगतोविधाता एवंगुणोपेतःसूर्यः अजनिष्ट प्रादुरभूत् तस्यएवंविधगुणोपेतस्ययज्ञियस्ययज्ञार्हस्यसूर्यस्यसुमतौशोभनायांबुद्ध्यांभद्रेकल्याणकारिणिसौमनसे सौमनस्येपि यजमानावयं स्यामभवेम ॥ नमस्यः नमसिसाधुःतत्रसाधुरितियत् तित्स्वरितः । अजनिष्ट जनीप्रादुर्भावेइत्यस्यलुङिसिचिरूपं । सौमनसे सुमनसइदमित्यर्थेतस्येदमित्यण्प्रत्ययस्वरः ॥४॥

अथपञ्चमी—

म॒हाँआ॑दि॒त्योनम॑सोप॒सद्यो॑यात॒यज्ज॑नोगृण॒तेसु॒शेवः॑ ।
तस्मा॑ए॒तत्पन्य॑तमाय॒जुष्ट॑म॒ग्नौमि॒त्राय॑ह॒विराजु॑होत ॥ ५ ॥ ५ ॥

म॒हान् । आ॒दि॒त्यः । नम॑सा । उ॒प॒ऽसद्यः॑ । या॒त॒यत्ऽज॑नः ।
गृ॒ण॒ते । सु॒ऽशेवः॑ । तस्मै॑ । ए॒तत् । पन्य॑ऽतमाय ।
जुष्ट॑म् । अ॒ग्नौ । मि॒त्राय॑ । ह॒विः । आ । जु॒हो॒त॒ ॥ ५ ॥ ५ ॥

योयमादित्योमहान् अतएवनमसानमस्कारेणोपसद्यः सर्वैरुपसदनीयः यातयज्जनः प्रातः प्रातःस्वस्वकर्मणिप्रवर्तनीयाजनायेनेतिसतथोक्तः गृणते स्तोत्रंकुर्वतेजनायसुशेवश्चभवति तस्मै पन्यतमाय स्तुत्यतमाय मित्रायादित्याय जुष्टंप्रीतिविषयमेतद्धविः अग्नावाजुहोतजुहुत ॥ यातयज्जनः यतीप्रयत्नेइत्यस्यण्यन्तस्यशतरिरूपं बहुव्रीहौपूर्वपदप्रकृतिस्वरेप्राप्तेमरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । गृणते गॄशब्दे शतुरनुमइतिविभक्तेरुदात्तत्वम् । पन्यतमाय पनतेरघ्न्यादित्वाद्यतोनावइत्याद्युदात्तत्वम् । जुष्टं नित्यंमंत्रेइत्याद्युदात्तत्वम् ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेपञ्चमोवर्गः ॥ ५ ॥

अभिप्लवषडहेदशरात्रेचसप्तदशैकविंशादिस्तोमेसतिहोत्रकशस्त्रेष्वावापस्थानेपञ्चसप्तादिसंख्याकाऋचआवपनीयाः तत्रमैत्रावरुणशस्त्रेमित्रस्यचर्षणीधृतइत्याद्याश्चतस्रआवापार्थाः सूत्रितश्च—मित्रस्यचर्षणीधृतइतिचतस्रोमैत्र्यइति ।

Funding by IKS-MoE

अथषष्ठी—

मि॒त्रस्य॑चर्षणी॒धृतोवो॑दे॒वस्य॑सान॒सि ।
द्यु॒म्नंचि॒त्रश्र॑वस्तमम् ॥ ६ ॥

मि॒त्रस्य॑ । च॒र्ष॒णि॒ऽधृत॑ः । अव॑ः । दे॒वस्य॑ ।
सा॒न॒सि । द्यु॒म्नम् । चि॒त्रश्र॑वःऽतमम् ॥ ६ ॥

चर्षणीधृतोमनुष्याणांवृष्टिप्रदानेनधारकस्यमित्रस्यदेवस्यसंबन्धिअवोन्नं सानसि सर्वैः संभजनीयं द्युम्नं त्वदीयंधनंच चित्रश्रवस्तमं अतिशयेनचायनीयकीर्तियुक्तं ॥ सानसि सनोतेःसानसिपर्णसीत्यादिनासिच्प्रत्ययान्तत्वेननिपातनादुपधावृद्धिः चित्त्वादन्तोदात्तः स्वमोरितिस्वमोर्लुक्॥ ६ ॥

प्रातर्होमस्यकालात्ययेमैत्रेष्टिः तस्यामभियोमहिनेत्यनुवाक्या सूत्रितश्च—अभियोमहिनादिवंप्रसमित्रमर्तोअस्तुप्रयस्वानिति ।

सैषासप्तमी—

अ॒भियोम॑हि॒नादिवं॑मि॒त्रोब॒भूव॑स॒प्रथा॑ः ।
अ॒भिश्रवो॑भिःपृथि॒वीम् ॥ ७ ॥

अ॒भि । यः । म॒हि॒ना । दिव॑म् । मि॒त्रः । ब॒भूव॑ ।
स॒ऽप्रथा॑ः । अ॒भि । श्रव॑ःऽभिः । पृ॒थि॒वीम् ॥ ७ ॥

योमित्रः महिना स्वकीयेनमहिम्ना दिवमन्तरिक्षमभिबभूवाभिभवति समित्रः सप्रथाः प्रथःप्रसिद्धिः कीर्तिः तत्सहितःश्रवोभिर्वृष्टिद्वाराउत्पादितैरन्नैः पृथिवीमप्यभिभवति बह्वन्नयुक्तांकरोतीत्यर्थः ॥ सप्रथाः प्रथप्रख्याने असुन् वोपसर्जनस्येतिसहस्यसभावः ॥ ७ ॥

अथाष्टमी—

मि॒त्राय॒पञ्च॑येमिरे॒जना॑अ॒भिष्टि॑शवसे ।
सदे॒वान्विश्वा॑न्बिभर्ति ॥ ८ ॥

मित्राय । पञ्च । येमिरे । जनाः । अभिष्टिऽशवसे ।
सः । देवान् । विश्वान् । बिभर्ति ॥ ८ ॥

पञ्चजनाः निषादपञ्चमाश्चत्वारोवर्णाः अभिष्टिशवसेशत्रूणामभिगन्तृबलयुक्तायमित्राययेमिरे हवींष्युद्यच्छन्ति सताद्दशोमित्रः विश्वान्सर्वान्देवान्बिभर्ति स्वस्वरूपतयाधारयति ॥ अभिष्टिशवसे इषेर्मंत्रेवृषेत्यादिनाक्तिन् तादौचनितीत्यभेरन्तोदात्तत्वं शकंध्वादित्वात्पररूपत्वं बहुव्रीहौपूर्वपदस्वरः ॥ ८ ॥

अथनवमी—

मित्रोदेवेष्वायुषुजनायवृक्तबर्हिषे । इषइष्टव्रताअकः ॥९॥६॥

मित्रः । देवेषु । आयुषु । जनाय । वृक्तऽबर्हिषे ।
इषः । इष्टऽव्रताः । अकरित्यकः ॥ ९ ॥ ६ ॥

मित्रोभगवानादित्योदेवेषुद्योतमानादिगुणयुक्तेषु आयुषुमनुष्येषुमध्येयोजनोवृक्तबर्हिः वृक्तंलूनंबर्हिर्येनसः लवनासादनपूर्वंहविषोदाता ऋत्विगित्यर्थः तस्मैवृक्तबर्हिषे जनाय इष्टव्रताः-इष्टानिकल्याणानिव्रतानिकर्माणियाभिःसिध्यन्तिताइषः तादृशान्यन्नानि अकःकरोति तस्मैददातीत्यर्थः ॥ वृक्तबर्हिषे ओव्रश्चूछेदने कर्मणिनिष्ठायां यस्यविभाषेतीट्प्रतिषेधः बहुव्रीहौ पूर्वपदस्वरः । अकः करोतेर्लुङि च्लेः मन्त्रेवृषेत्यादिनालुक् सिपोहल्ङ्यादिलोपः निघातः ॥ ९ ॥

॥ इतितृतीयस्यचतुर्थेषष्ठोवर्गः ॥ ६ ॥

इहेहवइतिसप्तर्चंसप्तमंसूक्तं वैश्वामित्रंजागतमृभुदेवताकं अन्त्यस्तृचइन्द्रदेवताकश्च तथाचानुक्रान्तं—इहेहसप्तार्भवंजागतंतृचोन्त्यऐन्द्रश्चेति । सूक्तविनियोगोलैङ्गिकः आद्याश्चतस्रः पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिवैश्वदेवशस्त्रेआर्भवनिविद्धानीयाः सूत्रितश्च—इहेहवइतिचतस्रइति ।

तत्रप्रथमा—

इहेहवोमनसाबन्धुतानरउशिजोजग्मुरभितानिवेदसा ।
याभिर्मायाभिःप्रतिजूतिवर्पसःसौधन्वनायज्ञियंभागमानश ॥१॥

Funding by IKS-MoE

इ॒हऽइ॑ह । व॒ः । मन॑सा । ब॒न्धुता॑ । न॒र॒ः । उ॒शिज॑ः । ज॒ग्मु॒ः ।
अ॒भि । तानि॑ । वेद॑सा । याभि॑ः । मा॒याभि॑ः । प्रति॑जूतिऽवर्प॑सः ।
सौध॑न्वनाः । य॒ज्ञिय॑म् । भा॒गम् । आ॒न॒श ॥ १ ॥

हेऋभवः वोयुष्माकंबन्धुता बध्नन्तिफलेनसंयोजयन्तीतिबन्धवः कर्माणि तेषांभावोबन्धुताइहेहसर्वत्रमनसासर्वैर्ज्ञायते नरःहेमनुष्याः ऋभवः उशिजः यज्ञभागंकामयमानाभवन्तः वेदसायज्ञभागप्रापककर्मविषयज्ञानेनतानितादृशानिकर्माणि अभिजग्मुःप्राप्नुवन्ति कानितानि मायाभिः मीयन्तेज्ञायन्तेइतिमायाः कर्माणि याभिर्मायाभिः यैःकर्मभिः प्रतिजूतिवर्पसः प्रतिपक्षाभिभवनशीलतेजोयुक्ताः सौधन्वनाः सुधन्वनामाङ्गिरसःपुत्रःकश्चिदृषिस्तस्यपुत्राः सौधन्वनाः तेचत्रयः ऋभुर्विभ्वावाजइति एतन्नामकायूयं यज्ञियंयज्ञार्हंभागंसोमपानादिलक्षणं आनश व्याप्ताः स्थ तथाचमन्त्रवर्णः—ऋभुर्विभ्वावाजोदेवाँअगच्छतस्वपसोयज्ञियंभागमैतनेति।अयमर्थोब्राह्मणेपि—ऋभवोवैदेवेषुतपसासोमपीथमभ्यजयन्नित्यत्रोपाख्यानपूर्वकंस्पष्टमभिहितः । यद्वा नरः कर्मणांनेतारोहेऋभवः उशिजःकामयमानाः वेदसाहविर्लक्षणेनधनेनयुक्ताःस्तोतारः वोयुष्माकं तानि चमसभक्षणादीनिकर्माणि बंधुताबन्धुतयासख्येनमनसाजग्मुरभिगच्छन्ति कानीत्याशंकायामाह—यैश्चमसभक्षणादिभिःकर्मभिर्यज्ञार्हंभागंयूयमाप्नुत तान्यभिगच्छन्ति युष्माकंबुद्धिनैपुणानिचिन्तयन्तीत्यर्थः ॥ इहेह नित्यवीप्सयोरितिद्विर्वचनं परस्याम्रेडितत्वादनुदात्तत्वेपूर्वपदस्वरः । बन्धुता बंधबन्धने शॄस्वृस्निहीत्यादिनाकर्तरिउप्रत्ययः समूहेइत्यर्थेग्रामजनबन्धुसहायेभ्यस्तलितितल् लित्स्वरः ॥ १ ॥

अथद्वितीया—

याभि॒ःशची॑भिश्चम॒साँअपिं॑शत॒यया॑धि॒यागामरि॑णीत॒चर्म॑णः ।
येन॒हरी॒मन॑सानि॒रत॑क्षत॒तेन॑देव॒त्वमृ॑भव॒ःसमा॑नश ॥ २ ॥

याभि॑ः । शची॑भिः । च॒म॒सान् । अपिं॑शत । यया॑ । धि॒या ।
गाम् । अरि॑णीत । चर्म॑णः । येन॑ । हरी॒ इति॑ । मन॑सा । निः॒ऽअत॑क्षत ।
तेन॑ । दे॒व॒ऽत्वम् । ऋ॒भ॒व॒ः । सम् । आ॒न॒श ॥ २ ॥

---

१ ऋ० सं० २. ३. ५. ।   २ ऐ० ब्रा० ३. ३०. ।

Funding by IKS-MoE

हेऋभवः याभिःशचीभिःशक्तिभिश्चमसान्चतुरः अपिंशत विभक्तवन्तःस्थ यथाधिया प्रज्ञयागामृतामरिणीतचर्मणः चर्मणायोजनात्प्रापितवन्तःस्थ येनमनसाप्रज्ञानेनहरीएतन्नामकाविन्द्रस्याश्वौनिरतक्षत नितरामकुरुत तथाचमन्त्रवर्णः—यइन्द्रायवचोयुजाततक्षुर्मनसाहरीइति। तेनसर्वेणानेनकर्मणादेवत्वंयज्ञभागार्हत्वलक्षणंदेवभावंसमानश सम्यक्प्राप्ताःस्थ ॥ अपिंशत पिशअवयवे तुदादिः तस्यलङि मध्यमेरूपंयद्वृत्तयोगादनिघातः । अरिणीतः रीगतिरेषणयोः क्र्यादिःतस्यलङिरूपम् अत्रापिपूर्ववदनिघातः । निरतक्षत तक्षूत्वक्षूतनूकरणे लङिरूपं पूर्ववदनिघाते तिङिचोदात्तवतीतिगतेर्निघातः अडुदात्तः । आनश अश्नोतेर्लिटिरूपं निघातः ॥ २ ॥

अथतृतीया—

इन्द्र॑स्यस॒ख्यमृ॒भवः॒समा॑नशु॒र्मनो॒र्नपा॑तोअ॒पसो॑दधन्विरे ।
सौ॒ध॒न्व॒नासो॑अमृत॒त्वमेरि॑रेवि॒ष्ट्वीशमी॑भिःसु॒कृतः॑सु॒कृ॒त्यया॑ ॥ ३ ॥

इन्द्र॑स्य । स॒ख्यम् । ऋ॒भवः॑ । सम् । आ॒न॒शुः॒ । मनोः॑ । नपा॑तः ।
अ॒पसः॑ । द॒ध॒न्वि॒रे॒ । सौ॒ध॒न्व॒नासः॑ । अ॒मृ॒त॒ऽत्वम् । आ । ई॒रि॒रे॒ ।
वि॒ष्ट्वी । शमी॑भिः । सु॒ऽकृतः॑ । सु॒ऽकृ॒त्यया॑ ॥ ३ ॥

मनोर्नपातः मनुष्यस्याङ्गिरसःपुत्राःअपसःयागादिलक्षणकर्मवन्तः ऋभवः इन्द्रस्यसख्यं समानख्यानत्वंसमानशुः सम्यक्प्राप्नुवन् तथा इन्द्रस्यसख्यंप्राप्तास्तेऋभवःदधन्विरे पूर्वंमनुष्यत्वेनमरणयोग्याअपिइदानीमिन्द्रस्यसख्येनप्राणान्धारयन्ति तथाचमन्त्रवर्णः—अधारयन्तवह्नयेइति । सौधन्वनासःसुधन्वनामकस्यऋषेःपुत्राऋभवः सुकृतःशोभनकर्माणःसन्तः प्रभूतैःशमीभिः देवत्वप्राप्तिप्रतिबन्धनिवारणहेतुभिःकर्मभिः सुकृत्यया शोभनेनकर्मणाच विष्ट्वीव्याप्य अमृतत्वमेरिरे देवत्वंप्रापुः तथाचमन्त्रान्तरमाम्नायते—मर्तासःसन्तोअमृतत्वमानशुरिति ॥ नपातः नभ्राण्नपादित्यादिनानञःप्रकृतिभावः । दधन्विरे धविर्गत्यर्थः व्यत्ययेनात्मनेपदं लिटिरूपं । ईरिरे ईरगतौ मन्त्रत्वादाम्नभवति निघातः । सुकृत्यया करोतेर्भावे कृञःशचेतिक्यप् प्रत्ययस्यव्यत्ययेनान्तोदात्तत्वं समासेकृदुत्तरस्वरः ॥ ३ ॥

---

१ ऋ. सं. १. २. १. । २ ऋ० सं० १. २. २. । ३ ऋ० सं० १. ७. ३०. ।

Funding by IKS-MoE

अथचतुर्थी—

इन्द्रे॑णयाथस॒रथं॑सु॒तेसचाँ॒अथो॒वशा॑नांभवथास॒हश्रि॒या ।
नव॑:प्रति॒मैसु॑कृ॒ता॑निवाघत॒:सौध॑न्वनाऋभवोवी॒र्या॑णिच ॥ ४ ॥

इन्द्रे॑ण । या॒थ॒ । स॒ऽरथ॑म् । सु॒ते । सचा॑ । अ॒थो॒ इति॑ । वशा॑नाम् ।
भ॒व॒थ॒ । स॒ह । श्रि॒या । न । व॒: । प्र॒ति॒ऽमै । सु॒ऽकृ॒तानि॑ ।
वा॒घ॒त॒: । सौध॑न्वनाः । ऋ॒भ॒व॒: । वी॒र्या॑णि । च॒ ॥ ४ ॥

हेऋभवः यूयं इन्द्रेणसचा सह सरथं समानमेकंरथमारुह्य सुते अभिषुतसोमवतियज्ञे याथ गच्छथ अथोअनन्तरं इन्द्रेणसहैकरथमारूढायूयं वशानां उश्यतेकाम्यते यजमानेनस्वर्गादिलक्षणंफलमेभिरितिवशामनुष्याः तेषां श्रियास्तुतिहविरादिरूपयासहिताः भवथ हेसौधन्वनाः सुधन्वनःपुत्राः वाघतः अमृतत्वादिलक्षणफलस्यवोढारः मेधाविनोवेतियास्कः[1] । तादृशाहेऋभवः वोयुस्माकंसुकृतानि देवस्यप्रापकाणिशोभनानिकर्माणिनप्रतिमै प्रतिमातुमियत्तयापरिच्छेत्तुंनकेनापिशक्यानि तथा वीर्याणि युष्माकंसामर्थ्यानिच नैवप्रतिमातुंशक्यानि ॥ वशानां वशकान्तौ वशिरण्योरुपसंख्यानमितिकरणेप्प्रत्ययः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः वशाशब्दोवन्ध्यावचनश्चेदंतोदात्तोभवति वशामेषाअवसृष्टासआहुताईति[2] । वः युष्मच्छब्दस्यषष्ठीबहुवचनेवसादेशः निघातः । प्रतिमै माङ्माने विच् प्रतिमाप्रतिमानंतस्यचतुर्थ्येकवचनेआतोलोपश्छान्दसः एकादेशस्वरः ॥ ४ ॥

आभिप्लविकेपञ्चमेहनिवैश्वदेवशस्त्रे इन्द्रऋभुभिरित्यार्भवस्तृचः सूत्रितश्च—घृतवतीभुवनानामभिश्रियेन्द्रऋभुभिर्वाजवद्भिरितितृचाविति । आद्यातृतीयसवनेहोतुःप्रस्थितयाज्या सूत्रितश्च—इन्द्रऋभुभिर्वाजवद्भिःसमुक्षितमिन्द्रावरुणासुतपाविमंसुतमिति ।

सैषापञ्चमी—

इन्द्र॑ऋ॒भुभि॒र्वाज॑वद्भि॒:समु॑क्षितंसु॒तंसोम॒मावृ॑षस्वा॒गभ॑स्त्योः ।
धि॒येषि॒तोम॑घवन्दा॒शुषो॑गृ॒हेसौ॑धन्व॒नेभि॑:स॒हम॑त्स्वा॒नृभि॑: ॥ ५ ॥

---

[1] नि० ११. १६. ।

[2] ऋ० सं०८. ४.२२. ।

Funding by IKS-MoE

इन्द्र॑ । ऋ॒भुऽभिः॑ वाज॑वत्ऽभिः । सम्ऽउ॑क्षितम् । सु॒तम् ।
सोम॑म् । आ । वृ॒ष॒स्व॒ । गभ॑स्त्योः । धि॒या । इ॒षि॒तः । म॒घ॒ऽव॒न् ।
दा॒शुषः॑ । गृ॒हे । सौ॒ध॒न्व॒नेभिः॑ । स॒ह । म॒त्स्व॒ । नृऽभिः॑ ॥ ५ ॥

हेइन्द्र वाजवद्भिः वाजोनामऋभूणांभ्राता यद्वा वाजोन्नं तत्सहितैर्ऋभुभिःसहितस्त्वं समुक्षितं सम्यगद्भिःसिक्तंग्रावभिःसुतंसोमं गभस्त्योः बप्सत्यदंत्याभ्यामन्नमिति गृह्णन्ति पदार्थानाभ्यामितिवागभस्ती बाहू तयोर्बाह्वोरावृषस्व आक्षारय ग्रहमुभाभ्यांगृहीत्वासोमंपिबेत्यर्थः हेमघवन् धनवन् हेइन्द्र धिया स्तोत्ररूपेणकर्मणा इषितः प्रेरितस्त्वं दाशुषोहविर्दत्तवतोयजमानस्यगृहे सौधन्वनेभिः सुधन्वनःपुत्रैर्नृभिर्मनुष्यैर्ऋभुभिःसह साकं मत्स्व सोमपानेनहृष्टोभव ॥ समुक्षितं उक्षसेचने कर्मणिक्तः गतिरनन्तरइतिगतेःस्वरः । गभस्त्योः भसभर्त्सनदीप्त्योरित्यस्माद्भसेर्गट्चेतिसूत्रेणतिप्रत्ययोधातोर्गडागमश्च यद्वा गृह्णातेः पृषोदरादित्वादेवंनेयं । मत्स्व मदिस्तुत्यादिषु लोटिबहुलंछन्दसीतिविकरणलुक्निघातः ॥ ५ ॥

अथषष्ठी–

इन्द्र॑ऋभु॒मान्वाज॑वान्मत्स्वे॒हनो॒स्मिन्त्सव॑ने॒शच्यां॑पुरुष्टुत ।
इ॒मानि॒तुभ्यं॑स्वस॑राणि॒येमि॑रेव्र॒तादे॒वानां॒मनु॑षश्च॒धर्म॑भिः ॥ ६ ॥

इन्द्र॑ । ऋ॒भु॒ऽमान् । वाज॑ऽवान् । म॒त्स्व॒ । इ॒ह । नः॒ । अ॒स्मिन् ।
सव॑ने । शच्यां॑ । पु॒रु॒ऽस्तु॒त॒ । इ॒मानि॑ । तुभ्य॑म् । स्वस॑राणि ।
ये॒मि॒रे॒ । व्र॒ता । दे॒वाना॑म् । मनु॑षः । च॒ । धर्म॑ऽभिः ॥ ६ ॥

पुरुष्टुत बहुभिःस्तुत हेइन्द्र ऋभुमान् ऋभुणातद्वान् वाजवान् वाजेनऋभोर्भ्रात्रायुक्तः शच्या इन्द्राण्याकर्मणावासहितःसन् नोऽस्माकमिहकर्मण्यस्मिन्तृतीयसवने मत्स्व हृष्टोभव हेइन्द्र तुभ्यं त्वदर्थंइमानि स्वसराण्यहानियेमिरे तवसोमपानार्थंत्रिषुसवनेषुनियतान्यासते किञ्च देवानामग्न्यादीनां व्रता व्रतानि कर्माणिचमनुषोमनुष्यस्यधर्मभिःकर्मभिः साकंत्वदर्थंनियतान्यासते ॥ ६ ॥

अथसप्तमी–

इन्द्र॑ऋ॒भुभि॑र्वा॒जिभि॑र्वा॒जय॑न्नि॒हस्तोमं॑जरि॒तुरुप॑याहिय॒ज्ञिय॑म् ।
श॒तंकेते॑भिरिषि॒रेभि॑रा॒यवे॑स॒हस्र॑णीथोअध्व॒रस्य॒होम॑नि ॥७॥७॥

Funding by IKS-MoE

इन्द्र॑ । ऋ॒भुऽभिः॑ । वा॒जिऽभिः॑ । वा॒जय॑न् । इ॒ह । स्तोम॑म् ।
ज॒रि॒तुः । उप॑ । या॒हि॒ । य॒ज्ञिय॑म् । श॒तम् । केते॑भिः ।
इ॒षि॒रेभिः॑ । आ॒यवे॑ । स॒हस्र॑ऽनीथः । अ॒ध्व॒रस्य॑ । होम॑नि ॥ ७ ॥ ७॥

हेइन्द्र वाजिभिः वाजयुक्तैर्ऋभुभिःसहितस्त्वं वाजयन्स्तोतुर्वाजमन्नंकुर्वाणइह यज्ञे यज्ञियं यज्ञार्हं जरितुःस्तोमं स्तोत्रमुपयाहि आगच्छ पुनःकिंविशिष्टः केतेभिःकेत्यते ज्ञायते सर्वमेभिरितिकेताःप्राज्ञामरुतःतैः शतंशतसंख्याकैरिषिरेभिरिषिरैर्गमनकुशलैरश्वैः सहितःआयवे मनुष्याय यजमानायसहस्रनीथः बहुप्रकारनयनोपेतः अध्वरस्य नविद्यते ध्वरोहिंसायस्य तादृशस्य सोमस्य होमनि होमे आगच्छेतिशेषः ॥ वाजयन् वाजंकरोतीतिणिच् णाविष्ठवदितीष्ठवद्भावात्तुरिष्ठेमेयःस्वितिटिलोपः । केतेभिः कितज्ञाने घञ् ञित्त्वादाद्युदात्तः ॥ ७ ॥

॥ इतितृतीयस्यचतुर्थेसप्तमोवर्गः ॥ ७ ॥

उषोवाजेनेतिसप्तर्चमष्टमंसूक्तं वैश्वामित्रमुषोदेवताकं तथाचानुक्रान्तम्—उषऔषस्यमिति प्रातरनुवाकेउषःक्रतौआश्विनशस्त्रेचत्रैष्टुभेछन्दस्येतस्यसूक्तस्यविनियोगः सूत्रितश्च—उषोवाजेनेदमुत्यदिति ।

तत्रप्रथमा—

उषो॒वाजे॑नवाजिनि॒प्रचे॑ता॒ःस्तोमं॑जुषस्वगृण॒तोम॑घोनि ।
पु॒रा॒णीदे॑वियुव॒तिःपुरं॑न्धि॒रनु॑व्र॒तंच॑रसिविश्ववारे ॥ १ ॥

उष॑ः । वाजे॑न । वा॒जि॒नि॒ । प्रऽचे॑ताः । स्तोम॑म् । जु॒ष॒स्व॒ ।
गृ॒ण॒तः । म॒घो॒नि॒ । पु॒रा॒णी । दे॒वि॒ । यु॒व॒तिः । पुर॑म्ऽधिः ।
अनु॑ । व्र॒तम् । च॒र॒सि॒ । वि॒श्व॒ऽवा॒रे॒ ॥ १ ॥

वाजेन वाजिनि अन्नेनान्नवति तथाचमन्त्रः—संवाजैर्वाजिनीर्वतीति । मघोनि धनवति हेउषः प्रचेताः प्रकृष्टज्ञानवतीसती गृणतस्तवस्तोत्रंकुर्वतस्तोतुःस्तोमंस्तोत्रंजुषस्व यद्वा वाजेन

---

१ ऋ० सं० १. ४. ५. ।

Funding by IKS-MoE

हविर्लक्षणेनान्नेनसह स्तोमंजुषस्वेतिसंबन्धः विश्ववारे विश्वैःसर्वैर्वरणीये हेउषोदेवि पुराणी पुरातनी युवतिरित्युपमा तद्वत् शोभमाना सुसंकाशामातृमृष्टेवयोषेतिवत्[1] पुरन्धिः पुरुबहुधीः स्तोत्रलक्षणंकर्मयस्याःसा बहुस्तोत्रवती पुरंधिर्बहुधीरिति[2]यास्कः । पुरन्धिः शोभनावाएवंविधगुणोपेतात्वं अनुव्रतं यज्ञकर्माभिलक्ष्यचरसि यष्टव्यतयावर्तसे ॥ मघोनि मघशब्दान्मतुबर्थे छन्दसीवनिपावितिवनिप् स्त्रियां ऋन्नेभ्योङीप् श्वयुवमघोनामतद्धितेइतिसंप्रसारणेकृतेगुणः संबुद्धौअंबार्थनद्योर्ह्रस्वः निघातः । पुराणी पुराणशब्दःपुराणप्रोक्तेष्वित्यन्तोदात्तत्वेननिपातितः टिड्ढाणञितिङीप् अनुदात्तस्यचयत्रोदात्तलोपइत्यन्तोदात्तत्वम् । पुरन्धिः पृषोदरादित्वादुकारस्यअमादेशः ईकारस्यह्रस्वश्च आद्युदात्तप्रकरणेदिवोदासादीनांछन्दस्युपसंख्यानमित्याद्युदात्तत्वं ॥ १ ॥

अथद्वितीया—

उषो॑दे॒व्यम॑र्त्या॒विभा॑हिच॒न्द्रर॑थासू॒नृता॑ई॒रय॑न्ती ।
आत्वा॑वहन्तुसु॒यमा॑सो॒अश्वा॒हिर॑ण्यवर्णांपृ॒थुपाज॑सो॒ये ॥ २ ॥

उष॑ः । दे॒वि॒ । अम॑र्त्या । वि । भा॒हि॒ । च॒न्द्रऽर॑था । सू॒नृता॑ः ।
ई॒रय॑न्ती । आ । त्वा॒ । व॒ह॒न्तु॒ । सु॒ऽयमा॑सः । अश्वा॑ः ।
हिर॑ण्यऽवर्णाम् । पृ॒थु॒ऽपाज॑सः । ये ॥ २ ॥

हेउषोदेवि अमर्त्या मरणधर्मरहिताचन्द्ररथासुवर्णमयरथोपेतासूनृताःप्रियसत्यरूपावाचः ईरयन्ती उच्चारयन्ती तथाचमन्त्रवर्णः—सुम्नावरीसूनृताईरयन्तीति[3] ।तादृशीत्वंविभाहि सूर्यकिरणसंबन्धाद्विशेषेणदीप्यस्व पृथुपाजसः प्रभूतबलयुक्ताअरुणवर्णायेअश्वाविद्यन्ते सुयमासः सुष्ठु नियन्तुंशक्यारथेयोजितास्तेअश्वाः हिरण्यवर्णांत्वात्वांआवहन्तु ॥ सुयमासः यमेरकृच्छ्रार्थेखल् लित्स्वरः ॥ २ ॥

अथतृतीया—

उष॑ःप्रती॒चीभुव॑नानि॒विश्वो॒र्ध्वाति॑ष्ठस्य॒मृत॑स्यके॒तुः ।
स॒मा॒नमर्थं॑चरणी॒यमा॑नाच॒क्रमि॑वनव्य॒स्याव॑वृत्स्व ॥ ३ ॥

---

[1] ऋ० सं० २.१.६.। [2] नि० ६.१३.। [3] ऋ० सं० १.८.३

उषः । प्रतीची । भुवनानि । विश्वा । ऊर्ध्वा । तिष्ठसि ।
अमृतस्य । केतुः । समानम् । अर्थम् । चरणीयमाना ।
चक्रम्ऽइव । नव्यसि । आ । ववृत्स्व ॥ ३ ॥

हेउषोदेवि विश्वासर्वाणिभुवनानिभूतजातानि प्रतीची प्रत्याभिमुख्येनाञ्चतिप्राप्नोतीतिप्रतीची अमृतस्यमरणधर्मरहितस्यसूर्यस्यकेतुः प्रज्ञापयित्री त्वं ऊर्ध्वानभस्युन्नतातिष्ठसि नव्यसि पुनःपुनर्जायमानतयानवतरे हेउषोदेवि अर्थंअर्थ्यतेगम्यतेयस्मिन्नित्यर्थोमार्गः समानमेकंमार्गं उदयात्प्राचीनकाललक्षणंचरणीयमाना चरितुमिच्छन्तीत्वमाववृत्स्व पुनःपुनस्तस्मिन्मार्गेआवृत्ताभव तत्रदृष्टान्तः—चक्रमिव यथानभसिचरितुः सूर्यस्यरथांगंपुनःपुनरावर्ततेतद्वत् ॥ प्रतीची प्रतिपूर्वादञ्चतेःक्विन् अञ्चतेश्चोपसंख्यानमितिङीप् अचइकारलोपे चावितिदीर्घः उदात्तनिवृत्तिस्वरेणान्तोदात्तः । केतुः चायृपूजानिशामनयोरित्यस्माच्चायःकीचेतितुःकीइत्यादेशः आर्धधातुकलक्षणोगुणः । अर्थं अर्तेस्थन्प्रत्ययः । नव्यसि नवशब्दादीयसुनिङीपिरूपं ईकारलोपश्छान्दसः । ववृत्स्व वृतुवर्तने बहुलंछन्दसीतिविकरणस्यश्लुः ॥ ३ ॥

अथचतुर्थी—

अवस्यूमेवचिन्वतीमघोन्युषायातिस्वसरस्यपत्नी ।
स्व१र्जनन्तीसुभगासुदंसाआन्ताद्दिवःपप्रथआपृथिव्याः ॥ ४ ॥

अव । स्यूमऽइव । चिन्वती । मघोनी । उषाः । याति ।
स्वसरस्य । पत्नी । स्वः । जनन्ती । सुऽभगा । सुऽदंसाः । आ ।
अन्तात् । दिवः । पप्रथे । आ । पृथिव्याः ॥ ४ ॥

येयमुषाः स्यूमेव वस्त्रमिव विस्तृतंतमोवचिन्वती अवचयमपक्षयंप्रापयन्ती मघोनी धनवती स्वसरस्य सुष्ठुअस्यतिक्षिपतितमइतिस्वसरःसूर्योवासरोवा तस्यपत्नीसतीयाति गच्छति स्वःस्वकीयंतेजः जनन्तीजनयन्ती सुभगा सुधना सौभाग्ययुक्तावा सुदंसाः शोभनाग्निहोत्रकर्मासेयमुषाः दिवोद्युलोकस्यआन्तात्पृथिव्याश्चान्तादवसानात् पप्रथे प्रथतेप्रकाशतइत्यर्थः ॥ स्यूमेव षिवुतंतुसंताने अविषिविशुषिभ्यःकिदितिमन्प्रत्ययः श्छ्वोःशूडनुनासिकेचेत्यूठ् यणादेशः सुपांसुलुगितिशेर्लुक् नित्त्वादाद्युदात्तः । चिन्वती शतुरनुमइतिङीपउदात्त-

त्वम् । जनन्ती जनजननेइत्यस्यण्यन्तस्यशतरिरूपं छन्दस्युभयथेतितिपआर्धधातुकत्वेन णिलोपः ॥ ४ ॥

अथपञ्चमी–

अच्छावोदेवीमुषसंविभातींप्रवोभरध्वंनमसासुवृक्तिम् ।
ऊर्ध्वंमधुधादिविपाजोअश्रेत्प्ररोचनारुरुचेरण्वसंन्दृक् ॥ ५ ॥

अच्छ । वः । देवीम् । उषसम् । विऽभातीम् । प्र । वः । भरध्वम् ।
नमसा । सुऽवृक्तिम् । ऊर्ध्वम् । मधुऽधा । दिवि । पाजः ।
अश्रेत् । प्र । रोचना । रुरुचे । रण्वऽसंन्दृक् ॥ ५ ॥

हेस्तोतारः वोयुष्मानच्छाभिलक्ष्यविभातीं शोभमानामुषसंदेवींप्रति वोयुष्माकंसंबन्धिनानमसानमस्कारेणसह सुवृक्तिं शोभनांस्तुतिंप्रभरध्वं यूयंकुरुत मधुधा मधुराणिस्तुतिलक्षणानिवाक्यानिदधातीतिमधुःस्तोमः तंधारयतीतिवा यद्वा मधुधा आदित्यस्यधात्री यद्वा अवग्रहाभावादव्युत्पन्नावयवमखण्डमिदंपदं उषोनाम सेयमुषाः दिविनभस्यूर्ध्वं ऊर्ध्वाभिमुखंपाजस्तेजःअश्रेत् श्रयति तथा रोचना रोचनशीलारण्वसंदृक् रमणीयदर्शनोषाः प्ररुरुचे प्रकर्षेणदीप्यते यद्वा रोचना लोकान्प्ररुरुचे प्रकर्षेणस्वतेजसादीपयति तथाचमन्त्रवर्णः–व्युच्छन्तीहिरश्मिभिर्विश्वमाभासिरोचनंमिति ॥ रण्वसंदृक् रवेर्गत्यर्थस्याच्प्रत्ययः इदित्त्वान्नुमागमः संपूर्वाद्दृशेःक्विन् बहुव्रीहौपूर्वपदप्रकृतिस्वरः ॥ ५ ॥

सैषाषष्ठी–

ऋतावरीदिवोअर्कैरबोध्यारेवतीरोदसीचित्रमस्थात् ।
आयतीमग्नउषसंविभातींवाममेषिद्रविणंभिक्षमाणः ॥ ६ ॥

ऋतऽवरी । दिवः । अर्कैः । अबोधि । आ । रेवती । रोदसी इति ।
चित्रम् । अस्थात् । आऽयतीम् । अग्ने । उषसम् । विऽभातीम् ।
वामम् । एषि । द्रविणम् । भिक्षमाणः ॥ ६ ॥

---

१ ऋ० सं० १.४६. ।

Funding by IKS-MoE

ऋतावरी सत्यवती येयमुषाः दिवोद्युलोकादर्कैस्तेजोभिरबोधि सर्वैर्ज्ञायते ततः रेवती धनवती येयं रोदसीद्यावापृथिव्यौचित्रंनानाविधरूपयुक्तंयथाभवतितथाअस्थात् सर्वतोव्याप्यतिष्ठति हेअग्ने आयतीं त्वदभिमुखमागच्छन्तींविभातींभासमानामुषसंउषोदेवींभिक्षमाणोहवींषियाचमानस्त्वं वामं वननीयंद्रविणं अग्निहोत्रादिलक्षणंधनं एषिप्राप्नोषि ॥ अबोधि बुधअवगमने कर्मणिलुङि चिण्भावकर्मणोरितिचिण् चिणोलुक् । रेवती रयिशब्दान्मतुप् छन्दसीरइतिवत्वं रयेर्मतौबहुलमितिसंप्रसारणं पररूपत्वे गुणः उगितश्चेतिङीप् रेशब्दाच्चोपसंख्यानमितिमतुपउदात्तत्वम् ॥ ६ ॥

अथसप्तमी—

ऋ॒तस्य॑बु॒ध्नउ॒षसा॑मिष॒ण्यन्वृषा॑म॒हीरोद॑सी॒आवि॑वेश ।
म॒हीमि॒त्रस्य॒वरु॑णस्यमा॒याच॒न्द्रेव॑भा॒नुंविद॑धेपु॒रु॒त्रा ॥ ७ ॥ ८ ॥

ऋ॒तस्य॑ । बु॒ध्ने । उ॒षसा॑म् । इ॒ष॒ण्यन् । वृषा॑ । म॒ही इति॑ । रोद॑सी॒ इति॑ ।
आ । वि॒वे॒श॒ । म॒ही । मि॒त्रस्य॑ । वरु॑णस्य । मा॒या ।
च॒न्द्राऽइ॑व । भा॒नुम् । वि । द॒धे॒ । पु॒रु॒ऽत्रा ॥ ७ ॥ ८ ॥

वृषा वृष्टिद्वारापांप्रेरकः आदित्यः ऋतस्याग्निहोत्रादिकर्मकरणेसत्यभूतस्याह्नोबुध्नेमूलेउषसामिषण्यन् प्रेरणंकुर्वन् महीमहत्यौरोदसीद्यावापृथिव्यौआविवेश सर्वतःप्रविष्टवान् यद्वा वृषा वर्षिता इषण्यन्सर्वतोगच्छन् उषःसंबन्धीरश्मिसमूहोरोदसीद्यावापृथिव्यावाविष्टवानितियोजनीयं ततउषाः महीमहती मित्रस्यवरुणस्यमित्रावरुणयोर्मायाप्रभारूपासती चन्द्रेवसुवर्णानीव भानुंस्वप्रभांपुरुत्रा बहुषुदेशेषुविदधे विदधाति सर्वत्रप्रसारयति ॥ मही अह्लोपश्छान्दसः । पुरुत्रा देवमनुष्येत्यादिनाधिकरणेत्राप्रत्ययः ॥ ७ ॥

॥ इतितृतीयस्यचतुर्थेऽष्टमोवर्गः ॥ ८ ॥

इमाउवामित्यष्टादशर्चंनवमंसूक्तं अत्रेयमनुक्रमणिका—इमाउझ्मूनैंद्रावरुणबार्हस्पत्यपौष्णसावित्रसौम्यमैत्रावरुणास्तृचाः अन्त्योजमदग्न्यार्षोवा चतुर्थ्याद्यागायत्र्यइति । कृत्स्नस्यविश्वामित्रऋषिः अन्त्यस्यतृचस्यजमदग्निर्वा आद्यास्तिस्रस्त्रिष्टुभः शिष्टाःपञ्चदशगायत्र्यः प्रथमस्यैन्द्रावरुणौदेवता द्वितीयस्यबृहस्पतिः तृतीयस्यपूषा चतुर्थस्यसविता पञ्चमस्यसोमः षष्ठस्यमित्रावरुणौ आभिप्लविकेषूक्थ्येषुतृतीयसवनेस्तोमवृद्धौसत्यांस्वस्वशस्त्रे होत्रकाअन्त्यसूक्तम-

Funding by IKS-MoE

वशोष्यस्तोमाभिशंसनार्थंतृचादिसंख्याकृचआवपेयुः । तत्रमैत्रावरुणस्यावापार्थमाद्यस्तृचः सूत्रितश्च—इमाउवांभृमयोमन्यमानाइतितिस्रइति ।

तत्रप्रथमा—

इ॒माउं॑वांभृ॒मयो॒मन्य॑मानायु॒वाव॑ते॒नतु॒ज्या॑अभूवन् ।
क्व१॒त्यदि॑न्द्रावरुणा॒यशो॑वां॒येन॑स्मा॒सिनं॒भर॑थ॒ःसखि॑भ्यः ॥ १ ॥

इ॒माः । ऊँ॒ इति॑ । वा॒म् । भृ॒मयः॑ । मन्य॑मानाः । यु॒वाऽव॑ते ।
न । तु॒ज्याः॑ । अ॒भू॒व॒न् । क्व॑ । त्यत् । इ॒न्द्रा॒व॒रु॒णा॒ । यशः॑ ।
वा॒म् । येन॑ । स्म॒ । सिन॑म् । भर॑थः । सखि॑ऽभ्यः ॥ १ ॥

हेइन्द्रावरुणौ वांयुवयोःसंबंधिन्यः मन्यमानाः बलिभिःशत्रुभिरभिमन्यमानाः अतएवभृमयः भ्रमणशीलाः इमाः प्रजाः उःपूरणः युवावते तृतीयार्थेचतुर्थी यौवनवताबलिनाशत्रुणा तुज्याहिंस्यानाभूवन् नभवन्तु वां युवयोः त्यत् तादृशंयशःक्व कुत्रास्ते येनयशसासखिभ्योस्मभ्यंसिनमन्नंभरथःस्म प्रदातुंसंपादयथः तत्कास्तइत्यन्वयः यद्वा हेइन्द्रावरुणौवांयुवयोः संबन्धिन्यः इमाः अस्माभिःक्रियमाणाभृमयः युवां प्राप्तुं भ्रमणशीलाः मन्यमानाः मन्यतिरर्चतिकर्मा युवामर्चन्त्यः ताःस्तुतयः युवावते युवाभ्यांसदृशाय अन्यस्मैदेवायनतुज्याः तुजतिर्दानकर्मार्थः प्रदेयामाभूवन् शिष्टंसमानम् ॥ भृमयः भ्रमुअनवस्थाने भ्रमेःसंप्रसारणंचेतिइन्प्रत्ययःसंप्रसारणंचव्यत्ययेनान्तोदात्तत्वम् । युवावते युष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानमितिवतुप् अविभक्तावपियुवादेशश्छान्दसः । तुज्याः तुजहिंसादाननिकेतनेषु अघ्न्यादयश्चेतियत् यतोनावइत्याद्युदात्तत्वम् । सिनं षिञ्बन्धने इणूषिञ्दीङुष्यविभ्योनगितिनक् व्यत्ययेनाद्युदात्तत्वम् ॥ १ ॥

अथद्वितीया—

अ॒यमुं॑वांपु॒रु॒तमो॑र॒यी॒यञ्छ॑श्व॒त्त॒ममव॑सेजोहवीति ।
स॒जोषा॑विन्द्रावरुणाम॒रुद्भि॑र्दि॒वापृ॑थि॒व्याशृ॑णु॒तंहवं॑मे ॥ २ ॥

अ॒यम् । ऊँ॒ इति॑ । वा॒म् । पु॒रु॒ऽतमः॑ । र॒यि॒ऽयन् । श॒श्व॒त्ऽत॒मम् ।
अव॑से । जो॒ह॒वी॒ति॒ । स॒ऽजोषौ॑ । इ॒न्द्रा॒व॒रु॒णा॒ । म॒रुत्ऽभिः॑ ।
दि॒वा । पृ॒थि॒व्या । शृ॒णु॒तम् । हव॑म् । मे॒ ॥ २ ॥

Funding by IKS-MoE

हेइन्द्रावरुणौ रयीयन् रयिमात्मनइच्छन् अयमु पुरुतमः वैदिककर्मप्रवृत्ततयातिशयेन पुरुर्महान्यजमानः अवसे रक्षणायान्नायवा वां युवां शश्वत्तमं सर्वदाजोहवीति भृशमाह्वयति मरुद्भिर्देवविशेषैर्दिवापृथिव्याचसजोषौ संगतौ युवां मे मम हवंयुष्मदीयमाह्वानंशृणुतं ॥ पुरुतमः तमपोव्यत्ययेनाद्युदात्तत्वम् । जोहवीति ह्वयतेर्यङ्लुकि अभ्यस्तस्यचेतिसंप्रसारणेकृते रूपम् । दिवा ऊडिदमितिविभक्तेरुदात्तत्वम् । पृथिव्या उदात्तयणोहल्पूर्वादित्युदात्तत्वम् । हवं ह्वयतेर्भावेनुपसर्गस्येत्यप्प्रत्ययस्यपित्त्वादनुदात्तत्वम् ॥ २ ॥

अथतृतीया–

अ॒स्मेतदि॑न्द्रावरुणा॒वसु॑ष्याद॒स्मेर॒यिर्म॑रुत॒ःसर्व॑वीरः ।
अ॒स्मान्वरू॑त्रीःशर॒णैर॑वन्त्व॒स्मान्होत्रा॒भार॑ती॒दक्षि॑णाभिः ॥ ३ ॥

अ॒स्मे इति॑ । तत् । इ॒न्द्रा॒व॒रु॒णा॒ । वसु॑ । स्या॒त् । अ॒स्मे इति॑ ।
र॒यिः । म॒रु॒त॒ः । सर्व॑ऽवीरः । अ॒स्मान् । वरू॑त्रीः । श॒र॒णैः ।
अ॒व॒न्तु॒ । अ॒स्मान् । होत्रा॑ । भार॑ती । दक्षि॑णाभिः ॥ ३ ॥

हेइन्द्रावरुणौ अस्मे अस्मासुतदभिलषितंतादृशंवसुधनंस्याद्भवतु हेमरुतः सर्ववीरः सर्वेषुकर्मसुवीरःसमर्थः रयिः पुत्रपशुसंघः पशवोवैरयिरितितैत्तिरीयकं । सोअस्मेअस्माकंभवतु वरूत्रीः सर्वैःसंभजनीयादेवपत्न्यः शरणैः शृणन्तीतिशीतादिक्लेशमितिशरणानिगृहाः तैरस्मानवन्तु होत्राहूयन्तेस्यांहवींषीति यद्वा हूयतेतत्रप्राणइतिहोत्रावाक् तथाचश्रुतिः—वाचिहिप्राणंजुहुमःप्राणेवावाचमिति । यद्वा होत्रेतियज्ञनाम हूयतेऽत्रहविरितियज्ञश्चवागुच्यते वाचंयच्छन्तिवाग्वैयज्ञइतिब्राह्मणम् । तादृशीभारतीसरस्वतीदक्षिणाभिर्गोरूपाभिर्दक्षिणाभिः यद्वा उदाराभिर्वाग्भिरस्मान्पालयतु यद्वा होत्रा होतरग्नेः पत्नीभारतीसूर्यपत्नीचसरस्वतीचतिस्रोदेव्यःपालयन्त्विति ॥ वसुष्यादित्यत्रसंहितायांपूर्वपदादितिषत्वम् । वरूत्रीः ग्रसितस्कभितेत्यादिनाङीबन्तत्वेननिपातनादिष्टसिद्धिः । होत्रा हुदानादनयोः हुयामाश्रुभसिभ्यस्त्रन्नितिअधिकरणेत्रन्प्रत्ययः ॥ ३ ॥

अथचतुर्थी–

बृह॑स्पतेजु॒षस्व॑नोह॒व्यानि॑विश्वदे॑व्य । रास्व॒रत्ना॑निदा॒शुषे॑ ॥ ४ ॥

---

१ ऐ० ब्रा० ५. २४. ।

Funding by IKS-MoE

बृह॑स्पते । जु॒षस्व॑ । नः॒ । ह॒व्यानि॑ ।
वि॒श्व॒ऽदे॒व्य॒ । रास्व॑ । रत्ना॑नि । दा॒शुषे॑ ॥ ४ ॥

विश्वदेव्य सर्वदेवहित हेबृहस्पते नोऽस्मत्संबन्धीनिहव्यानिहवनयोग्यानिपुरोडाशादीनिहवींषिजुषस्व सेवस्व ततस्त्वं दाशुषेहविर्दत्तवतेयजमानाय मह्यंरत्नान्युत्तमानिधनानि रास्व देहि ॥ रास्व रादाने व्यत्ययेनात्मनेपदम् ॥ ४ ॥

अथपञ्चमी–

शुचि॑म॒र्कैर्बृह॒स्पति॑मध्व॒रेषु॑नमस्यत । अना॒म्योज॒आच॑के ॥ ५ ॥९॥

शुचि॑म् । अ॒र्कैः । बृ॒ह॒स्पति॑म् । अ॒ध्व॒रेषु॑ ।
न॒म॒स्य॒त॒ । अना॑मि । ओजः॑ । आ । च॒के॒ ॥ ५ ॥ ९ ॥

हेऋत्विजः यूयं अध्वरेषु शुचिं शुद्धं बृहस्पतिमर्कैरर्चनीयैःस्तोत्रैर्नमस्यत परिचरत अनामि अनमनशीलं परैरनभिभवनीयं ओजस्तस्यबलमाचके सर्वतोयाचे ॥ बृहस्पतिं वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । चके कर्मेलिँटचुत्तमेमकारलोपश्छान्दसः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेनवमोवर्गः ॥ ९ ॥

अथषष्ठी–

वृ॒ष॒भंच॑र्षणी॒नांवि॒श्वरू॑प॒मदा॑भ्यम् । बृ॒ह॒स्पतिं॒वरे॑ण्यम् ॥ ६ ॥

वृ॒ष॒भम् । च॒र्ष॒णी॒नाम् । वि॒श्वऽरू॑पम् । अदा॑भ्यम् ।
बृह॒स्पति॑म् । वरे॑ण्यम् ॥ ६ ॥

चर्षणीनांमनुष्याणांवृषभमभिमतफलवर्षकंविश्वरूपंव्याप्तरूपं यद्वा विश्वरूपनामकगोवाहनोपेतं तथाचमन्त्रवर्णः–बृहस्पतिर्विश्वरूपामुपाजतइति । अदाभ्यं केनाप्यतिरस्करणीयं वरेण्यं सर्वैर्भजनीयंबृहस्पतिमाचकेइतिपूर्वेणान्वयः ॥ विश्वरूपं बहुव्रीहौविश्वंसंज्ञायामिति पूर्वपदान्तोदात्तत्वं यद्वा विश्वरूपाअस्यसन्तीतिअर्शआदित्वादच्प्रत्ययः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । अदाभ्यं दभेश्चेतिवक्तव्यमितिण्यत्प्रत्ययः ॥ ६ ॥

---

1 ऋ० सं० २. ३. ५. ।

Funding by IKS-MoE

अथसप्तमी—

इयंतेपूषन्नाघृणेसुष्टुतिर्देवनव्यंसी । अस्माभिस्तुभ्यंशस्यते ॥ ७ ॥

इयम् । ते । पूषन् । आघृणे । सुऽस्तुतिः । देव । नव्यंसी ।
अस्माभिः । तुभ्यम् । शस्यते ॥ ७ ॥

आघृणे दीप्तिमन् हेपूषन् देव नव्यसी नवतरी इयं सुष्टुतिः शोभनास्तुतिरूपावाक् ते त्वत्संबंधिनीभवति सैषास्तुतिः अस्माभिः स्तोतृभिःतुभ्यंत्वदर्थंशस्यतेतांजुषस्वेत्युत्तरेणान्वयः ॥७॥

अथाष्टमी—

तांजुषस्वगिरंममवाजयन्तीमवाधियम् । वधूयुरिवयोषणाम् ॥ ८ ॥

ताम् । जुषस्व । गिरम् । मम । वाजऽयन्तीम् । अव । धियम् ।
वधूयुःऽइव । योषणाम् ॥ ८ ॥

हेपूषन् स्तोत्रंकुर्वाणस्य मम तां तादृशींगिरंस्तुतिलक्षणांवाचंजुषस्व सेवस्व स्तुत्याप्रीतस्त्वं वाजयन्तीं वाजमन्नमिच्छन्तीं हर्षकारिणींधियमिमांस्तुतिंप्रति अवाभिगच्छ तत्रदृष्टान्तः—वधूयुरिव यथावधूयुः स्त्रीकामः योषणांस्त्रियंप्रत्यागच्छतितद्वत् ॥ वाजयन्तीं वाजशब्दादिच्छतीत्यर्थेक्यच् तदन्ताच्छतरिरूपं ङीपोनुदात्तत्वेप्रत्ययस्वरः । अव अवरक्षणादिष्वित्यस्यलोटिरूपम् ॥ ८ ॥

अथनवमी—

योविश्वाभिविपश्यतिभुवनासंचपश्यति । सनःपूषाविताभुवत् ॥ ९ ॥

यः । विश्वा । अभि । विऽपश्यति । भुवना । सम् । च ।
पश्यति । सः । नः । पूषा । अविता । भुवत् ॥ ९ ॥

यःपूषा विश्वाभुवनासर्वांल्लोकानभि आभिमुख्येनविपश्यति विशेषेणपश्यति किंच तानिसंपश्यति तद्वस्तुयाथात्म्यंसम्यक्जानाति सतादृशःपूषादेवः नोऽस्माकमवितारक्षकोभुवत् भवतु ॥ विपश्यति यद्वृत्तयोगादनिघातः शपःपित्त्वादनुदात्तत्वेधातुस्वरः तिङिचोदात्तवतीतिगतेर्निघातः । पश्यति अत्रसकर्मकत्वात्परस्मैपदं पूर्ववदनिघातः । भुवत् भवतेर्लेट्यडागमः भूसुवोस्तिङीतिगुणप्रतिषेधेउवङादेशः निघातः ॥ ९ ॥

Funding by IKS-MoE

दशरात्रस्यषष्ठेहनिवैश्वदेवशस्त्रेतत्सवितुरितिद्वेऋचौप्रतिपत्तृचस्यद्वितीयतृतीये । सूत्रितश्च—तत्सवितुर्वरेण्यमितिद्वेदोषोआगादिति । अभिप्लवपृष्ठ्यषडहयोर्द्वितीयेहनिवैश्वदेवशस्त्रे प्रतिपत्तृचस्यैतेएवप्रथमाद्वितीये । सूत्रितश्च—तत्सवितुर्वरेण्यमितिद्वेआविश्वदेवमिति ।

सैषादशमी—

तत्स॑वि॒तुर्वरे॑ण्यं॒भर्गो॑दे॒वस्य॑धीमहि । धियो॒योनः॑प्रचो॒दया॑त् ॥१०॥१०॥

तत् । स॒वि॒तुः । वरे॑ण्यम् । भर्गः॑ । दे॒वस्य॑ । धी॒म॒हि॒ ।
धियः॑ । यः । नः॒ । प्र॒ऽचो॒दया॑त् ॥ १० ॥ १० ॥

यःसवितादेवःनोऽस्माकंधियःकर्माणिधर्मादिविषयावाबुद्धीः प्रचोदयात् प्रेरयेत् तत्तस्यसर्वासुश्रुतिषु प्रसिद्धस्य देवस्य द्योतमानस्य सवितुः सर्वान्तर्यामितयाप्रेरकस्यजगत्स्रष्टुः परमेश्वरस्यआत्मभूतं वरेण्यंसर्वैरुपास्यतयाज्ञेयतयाचसंभजनीयं भर्गः अविद्यातत्कार्ययोर्भर्जनाद्भर्गः स्वयंज्योतिः परब्रह्मात्मकंतेजःधीमहि तद्योहंसोसौयोसौसोहमितिवयंध्यायेम यद्वा तदितिभर्गोविशेषणं सवितुर्देवस्यतत्तादृशंभर्गःधीमहि किंतदपेक्षायामाह—यइतिलिङ्गव्यत्ययः यद्भर्गोधियःप्रचोदयादिति तद्ध्यायेमेतिसमन्वयः यद्वा यःसवितासूर्यः धियःकर्माणिप्रचोदयात् प्रेरयति तस्यसवितुःसर्वस्यप्रसवितुर्देवस्यद्योतमानस्यसूर्यस्यतत्सर्वैर्दृश्यमानतयाप्रसिद्धं वरेण्यं सर्वैःसंभजनीयंभर्गःपापानांतापकंतेजोमण्डलंधीमहि ध्येयतयामनसाधारयेम यद्वा भर्गःशब्देनान्नमभिधीयते यःसवितादेवोधियःप्रचोदयति तस्यप्रसादाद्भर्गोन्नादिलक्षणंफलंधीमहि धारयामः तस्याधारभूताभवेमेत्यर्थः भर्गशब्दस्यान्नपरत्वेधीशब्दस्यकर्मपरत्वेचआथर्वणं—वेदांश्छन्दांसिसवितुर्वरेण्यंभर्गोदेवस्यकवयोन्नमाहुः कर्माणिधियस्तदुतेप्रब्रवीमिप्रचोदयन्त्सवितायाभिरेतीति ॥ भर्गः भ्रस्जपाके असुन् भ्रस्जोरोपधयोरमन्यतरस्यामितिरोपधयोर्लोपः रमागमः न्यंक्वादित्वात् कुत्वं । धीमहि ध्यायतेर्लिङि बहुलंछन्दसीतिसंप्रसारणं व्यत्ययेनात्मनेपदं यद्वा धीङ्आधारे लिङिबहुलंछन्दसीतिविकरणस्यलुक् । प्रचोदयात् चोदयतेर्लेटि आडागमः यद्वृत्तयोगादनिघातः आगमस्यानुदात्तत्वेणिचःस्वरः ॥ १० ॥

॥ इतितृतीयस्यचतुर्थेदशमोवर्गः ॥ १० ॥

शांकरभाष्यम्—

अथसर्वदेवात्मनः सर्वशक्तेःसर्वावभासकतेजोमयस्यपरमात्मनः सर्वात्मकत्वद्योतनार्थं सर्वात्मकत्वप्रतिपादकगायत्रीमहामन्त्रस्योपासनप्रकारःप्रकाश्यते—तत्रगायत्रींप्रणवादिसप्तव्याह-

त्युपेतांशिरःसमेतांसर्ववेदसारमितिवदन्ति एवंविशिष्टागायत्रीप्राणायामैरुपास्या सप्रणवव्याहृतित्रयोपेताप्रणवान्तागायत्रीजपादिभिरुपास्या तत्रशुद्धगायत्रीप्रत्यक्ब्रह्मैक्यबोधिका धियोयोनःप्रचोदयादिति नोस्माकंधियोबुद्धीः यः प्रचोदयात् प्रेरयेदिति सर्वबुद्धिसंज्ञान्तःकरणप्रकाशकसर्वसाक्षीप्रत्यगात्मेत्युच्यते तस्यप्रचोदयाच्छब्दनिर्दिष्टस्यात्मनः स्वरूपभूतंपरंब्रह्म तत्सवितुरित्यादिपदैर्निर्दिश्यते तत्र ओंतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतंइति । तच्छब्देनप्रत्यग्भूतंस्वतःसिद्धंपरंब्रह्मोच्यते सवितुरितिसृष्टिस्थितिलयलक्षणकस्यसर्वप्रपंचस्यसमस्तद्वैतविभ्रमस्याधिष्ठानंलक्ष्यते । वरेण्यमिति सर्ववरणीयंनिरतिशयानन्दरूपं । भर्गइत्यविद्यादिदोषभर्जनात्मकज्ञानैकविषयत्वं । देवस्येति सर्वद्योतनात्मकाखण्डचिदेकरसं । सवितुर्देवस्येत्यत्रषष्ठ्यर्थोराहोःशिरोवदौपचारिकः बुद्ध्यादिसर्वदृश्यसाक्षिलक्षणंयन्मेस्वरूपंतत्सर्वाधिष्ठानभूतं परमानन्दंनिरस्तसमस्तानर्थरूपंस्वप्रकाशचिदात्मकंब्रह्मेत्येवंधीमहिध्यायेम । एवंसतिसहब्रह्मणास्वविवर्तजडप्रपञ्चेनरज्जुसर्पन्यायेनापवादसामानाधिकरण्यरूपमेकत्वं सोयमितिन्यायेनसर्वसाक्षिप्रत्यगात्मनोब्रह्मणासहतादात्म्यरूपमेकत्वंभवतीतिसर्वात्मकब्रह्मबोधकोयंगायत्रीमन्त्रःसंपद्यते । सप्तव्याहृतीनामयमर्थः—भूरितिसन्मात्रमुच्यते ॥ १ ॥ भुवइतिसर्वंभावयतिप्रकाशयतीतिव्युत्पत्त्याचिद्रूपमुच्यते ॥२॥ सुव्रियतइतिव्युत्पत्त्यास्वरितिसुष्ठुसर्वैर्व्रियमाणसुखस्वरूपमुच्यते ॥ ३ ॥ महइतिमहीयतेपूज्यतइतिव्युत्पत्त्यासर्वातिशयत्वमुच्यते ॥ ४ ॥ जनइतिजनयतीतिजनः सकलकारणत्वमुच्यते ॥ ५ ॥ तपइतिसर्वतेजोरूपत्वं ॥ ६ ॥ सत्यमितिसर्वबाधारहितं ॥ ७ ॥ एतदुक्तंभवति—यत्लोकेसद्रूपंतदोंकारवाच्यंब्रह्मैव । आत्मनोऽस्यसच्चिद्रूपस्यभावादिति । अथभूरादयः सर्वलोकाओंकारवाच्यब्रह्मात्मकाः नतद्व्यतिरिक्तंकिञ्चिदस्तीति । व्याहृतयोऽपिसर्वात्मकब्रह्मबोधिकाः गायत्रीशिरसोप्ययमेवार्थः—आपइत्याप्नोतीतिव्युत्पत्त्याव्यापित्वमुच्यते । ज्योतिरितिप्रकाशरूपत्वं रसइतिसर्वातिशयत्वं अमृतमितिमरणादिसंसारनिर्मुक्तत्वं सर्वव्यापिसर्वप्रकाशकसर्वोत्कृष्टनित्यमुक्तमात्मरूपंसच्चिदानन्दात्मकंयदोंकारवाच्यंब्रह्म तदहमस्मीतिगायत्रीमन्त्रस्यार्थः । गुहाशयब्रह्महुताशनोहंकर्त्रैदमंशाख्यहविर्हुतंसत् । विलीयतेनेदमहंभवानीत्येषप्रकारस्तुविभिद्यतेत्र । यदस्तियद्भातितदात्मरूपंनान्यत्ततोभातिनचान्यदस्ति । स्वभावसंवित्प्रविभातिकेवलाग्राह्यंगृहीतेतिमृषैवकल्पना ॥ इतिश्रीमच्छंकरभगवतःकृतौगायत्रीभाष्यंसमाप्तम् ॥

अथैकादशी—

दे॒वस्य॑स॒वि॒तु॒र्व॒यंवा॑ज॒यन्त॒ःपु᳚रंध्या । भग॑स्यरा॒तिमी॑महे ॥ ११ ॥

Funding by IKS-MoE

देवस्य । सवितुः । वयम् । वाजऽयन्तः । पुरम्ऽध्या ।
भगस्य । रातिम् । ईमहे ॥ ११ ॥

वाजयन्तः वाजमन्नमात्मनइच्छन्तोवयंदेवस्यद्योतमानस्यसवितुःपुरंध्यातद्विषयस्तुत्या प्रज्ञयावा भगस्यभजनीयस्यधनस्यरातिंदानं ईमहेयाचामहे ॥ रातिं मन्त्रेवृषेत्यादिनाक्तिनउदात्तत्वम् ॥ ११ ॥

अथद्वादशी—

देवंनरःसवितारंविप्रायज्ञैःसुवृक्तिभिः । नमस्यन्तिधियेषिताः ॥१२॥

देवम् । नरः । सवितारम् । विप्राः । यज्ञैः ।
सुवृक्तिऽभिः । नमस्यन्ति । धिया । इषिताः ॥ १२ ॥

नरः कर्मणांनेतारोविप्रामेधाविनोध्वर्य्वादयः धियेषिताः कर्मणाबुद्ध्यावाप्रेर्यमाणाःसन्तः सवितारंदेवंत्वांयज्ञैर्यजनीयैर्हविर्भिः सुवृक्तिभिः शोभनस्तोत्रैश्चनमस्यन्ति परिचरन्ति ॥ नमस्यन्ति नमोवरिवश्चित्रङःक्यजितिक्यच् ॥ १२ ॥

अग्नीषोमप्रणयनेसोमोजिगातीत्याद्यास्तिस्रऋचः । सूत्रितञ्च—सोमोजिगातिगातुविद्देवानांतमस्यराजावरुणस्तमश्विनेत्यर्धर्चआरमेदिति ।

सैषात्रयोदशी—

सोमोजिगातिगातुविद्देवानामेतिनिष्कृतम् । ऋतस्ययोनिमासदम् ॥१३॥

सोमः । जिगाति । गातुऽवित् । देवानाम् । एति ।
निःऽकृतम् । ऋतस्य । योनिम् । आऽसदम् ॥ १३ ॥

गातुवित् गातुर्मार्गः तंजानानःसोमोजिगातिगच्छति गन्तव्यंस्थानंदर्शयति—देवानां निष्कृतंसंस्कृतं आसदंसर्वैरासदनीयं ऋतस्ययज्ञस्ययोनिंस्थानं हविर्धानाख्यमेतिप्राप्नोति ॥ जिगाति गास्तुतौ जुहोत्यादिः ॥ १३ ॥

अथचतुर्दशी--

सोमोअस्मभ्यंद्विपदेचतुष्पदेचपशवे । अनमीवाइषस्करत् ॥ १४ ॥

सोमः । अस्मभ्यम् । द्विऽपदे । चतुःऽपदे । च ।
पशवे । अनमीवाः । इषः । करत् ॥ १४ ॥

Funding by IKS-MoE

सोमः स्तोतृभ्योऽस्मभ्यं तथाद्विपदेस्मदीयेभ्योद्विपाद्भ्यः चतुष्पदेपशवेचतुष्पाद्भ्योगवादिपशुभ्यश्च अनमीवारोगवर्जितानिइषोन्नानिकरत्करोतु ॥ चतुष्पदे भसंज्ञायां पादस्यपद्भावः इसुसोःसामर्थ्येइतिसंहितायांषत्वं आदेशप्रत्यययोरितिषत्वं बहुव्रीहौपूर्वपदस्वरः । करत् करोतेर्लेटच्यडागमः । इषस्करदित्यत्रसंहितायांकःकरतीत्यादिनासत्वम् ॥ १४ ॥

अथपञ्चदशी–

अ॒स्माक॒मायु॑र्व॒र्धय॑न्न॒भिमा॑ती॒ःसह॑मानः । सोम॑ःस॒धस्थ॒मास॑दत् ॥ १५ ॥

अ॒स्माक॑म् । आयु॑ः । व॒र्धय॑न् । अ॒भिऽमा॑तीः । सह॑मानः ।
सोम॑ः । स॒धऽस्थ॑म् । आ । अ॒स॒द॒त् ॥ १५ ॥

ससोमोदेवः अस्माकमायुरन्नंजीवनंवावर्धयन्वृद्धिंप्रापयन् अभिमातीः कर्मविघ्नकारिणः शत्रून्सहमानोऽभिभवन्नस्माकंसधस्थंहविर्धानाख्यंस्थानं आसदत् आसीदतु ॥ असदत् सदेर्लेटिरूपं निघातः ॥ १५ ॥

अग्निष्टोमेप्रातःसवनेमैत्रावरुणशस्त्रेआनोमित्रावरुणेतिस्तोत्रियस्तृचः सूत्रितश्च—आनोमित्रावरुणानोगन्तंरिशादसेति । चतुर्विंशेहनिप्रातःसवनेमैत्रावरुणशस्त्रेआनोमित्रावरुणेतिषळहस्तोत्रियसंज्ञकस्तृचः सूत्रितश्च—आनोमित्रावरुणामित्रंवयंहवामहइति । स्तोमवृद्धावयमेवतृचआवापार्थः सूत्रितश्च—आनोमित्रावरुणेतितृचाविति । दाक्षायणयज्ञेद्वेअमावास्येकर्तव्ये तत्रोत्तरस्याममावास्यायांद्वितीयेहनिमैत्रावरुणआनोमित्रावरुणेतितस्यानुवाक्या सूत्रितश्च—आनोमित्रावरुणायद्वंहिष्ठंनातिविधेसुदानूइति ।

सैषाषोडशी–

आनो॑मि॒त्रावरुणाघृ॒तैर्गव्यू॑तिमुक्षतम् । मध्वा॒रजां॑सिसुक्रतू ॥ १६ ॥

आ । न॒ः । मि॒त्रा॒व॒रु॒णा॒ । घृ॒तैः । गव्यू॑तिम् । उ॒क्ष॒त॒म् ।
मध्वा॑ । रजां॑सि । सु॒क्र॒तू॒ इति॑ सुऽक्रतू ॥ १६ ॥

सुक्रतू शोभनकर्माणौ हेमित्रावरुणौ नोऽस्माकंगव्यूतिं गवांमार्गंगोनिवासस्थानं घृतैःक्षरणसाधनैः पयोभिराउक्षतं समन्तात्सिञ्चतं अस्मभ्यंदोग्ध्रीर्गाःप्रयच्छतमितिभावः रजांस्यस्मदावासस्थानानिमध्वामधुरेणरसेनसिञ्चतम् ॥ गव्यूतिं गोर्यूतौछन्दसीतिवान्तादेशः । मध्वा सर्वविधीनांछन्दसिविकल्पितत्वादत्रनुमागमाभावः ॥ १६ ॥

Funding by IKS-MoE

अथसप्तदशी–

उ॒रु॒शंसा॑नमो॒वृधा॑म॒ह्नादक्ष॑स्यराजथः । द्राघि॑ष्ठाभिःशुचिव्रता ॥१७॥

उ॒रु॒ऽशंसा॑ । न॒मः॒ऽवृधा॑ । म॒ह्ना । दक्ष॑स्य ।
रा॒ज॒थः॒ । द्राघि॑ष्ठाभिः । शुचि॒ऽव्र॒ता ॥ १७ ॥

शुचिव्रता परिशुद्धकर्माणौ हेमित्रावरुणौ उरुशंसा उरुभिर्बहुभिःशंसनीयौ यद्वा उरु महत् शंसःशस्त्रं ययोस्तौ नमोवृधा नमसाहविर्लक्षणेनान्नेनस्तोत्रेणवावर्धमानौ द्राघिष्ठाभिः अत्यन्तंदीर्घस्तुतिलक्षणाभिर्वाग्भिः युक्तौ युवांदक्षस्यदक्षंधनंबलंवा तस्य मह्ना महत्त्वेन राजथः ईशाथे ॥ उरुशंसा शंसुस्तुस्तौ कर्मणिघञ् ञित्स्वरः । द्राघिष्ठाभिः दीर्घशब्दादिष्ठनि प्रियस्थिरेत्यादिनाद्राघीत्यादेशः नित्त्वादाद्युदात्तः ॥ १७ ॥

मैत्रावरुणस्यग्रहस्ययाज्यागृणानाजमदग्निनेत्येषा सूत्रितश्च–होतायक्षन्मित्रावरुणागृणानाजमदग्निनेति । अध्यायोपाकरणेमण्डलाद्यन्तहोमेगृणानाजमदग्निनेत्येषा ।

सूक्तेष्टादशी–

गृ॒णा॒नाज॒मद॑ग्निना॒योना॑वृ॒तस्य॑सीदतम् । पा॒तंसोम॑मृतावृधा ॥ १८ ॥

गृ॒णा॒ना । ज॒मत्ऽअ॑ग्निना । योनौ॑ । ऋ॒तस्य॑ । सी॒द॒त॒म् ।
पा॒तम् । सोम॑म् । ऋ॒त॒ऽवृ॒धा ॥ १८ ॥ ११ ॥

हेमित्रावरुणौ जमदग्निना एतन्नामकेनमहर्षिणा गृणाना स्तूयमानौ यद्वा जमदग्निना प्रज्वलिताग्निना विश्वामित्रेणस्तूयमानौ युवां ऋतस्ययज्ञस्ययोनौ देवयजनाख्येदेशे सीदतं उपविशतं ऋतावृधा ऋतस्यकर्मफलस्यवर्धयितारौ युवां सोमंपातं पिबतं ॥ गृणाना गृशब्दे कर्मणिशानच् चित्त्वादन्तोदात्तः । सीदतं सदेर्लोटि पाघ्रेत्यादिनासीदादेशः । पातं पापाने बहुलंछन्दसीतिशपोलुक् ॥ १८ ॥

॥ इतितृतीयस्यचतुर्थेएकादशोवर्गः ॥ ११ ॥

॥ इतितृतीयेमंडलेपञ्चमोऽनुवाकः ॥ ५ ॥

॥ इतितृतीयंमण्डलंसमाप्तम् ॥

Funding by IKS-MoE

॥श्रीगणेशायनमः॥

अथचतुर्थमण्डलम्.

वामदेवेचतुर्थेमण्डलेपञ्चानुवाकाः तत्रप्रथमेनुवाकेदशसूक्तानि तेषुत्वांह्यग्नेसदमिदिति विंशत्यृचंप्रथमंसूक्तं अत्रेयमनुक्रमणिका–त्वांह्यग्नेविंशतिरष्ट्यतिजगतीधृतयआद्याउपाद्याश्चतस्रोवारुण्यश्चवेति । मण्डलद्रष्टावामदेवऋषिः प्रथमाचतुःषष्ट्यक्षराअष्टिः द्वितीयाद्विपञ्चाशदक्षराअतिजगती तृतीयाद्वासप्तत्यक्षराधृतिः चतुर्थ्याद्या अनादेशपरिभाषयासप्तदशत्रिष्टुभः कृत्स्नस्यसूक्तस्यमण्डलादिष्वाग्नेयमितिपरिभाषयाअग्निर्देवता द्वितीयाद्याश्चतस्रोवरुणदेवत्यावा सूक्तविनियोगोलैङ्गिकः आद्याध्यायोपाकरणेमण्डलादिहोमेविनियुक्ता ।

तत्रप्रथमा–

त्वांह्य॑ग्नेसद॒मित्स॑म॒न्यवो॑दे॒वासो॑दे॒वम॑र॒तिंन्ये॑रि॒रइति॒क्रत्वा॑ -
न्येरि॒रे । अम॑र्त्यंयजत॒मर्त्ये॒ष्वादे॒वमादे॑वंजनत॒प्रचे॑तसं॒वि-
श्व॒मादे॑वंजनत॒प्रचे॑तसम् ॥ १ ॥

त्वाम् । हि । अ॒ग्ने॒ । सद॑म् । इत् । स॒ऽम॒न्यव॑ः । दे॒वास॑ः । दे॒वम् ।
अ॒र॒तिम् । नि॒ऽए॒रि॒रे । इति॑ । क्रत्वा॑ । नि॒ऽए॒रि॒रे । अम॑र्त्यम् ।
य॒ज॒त॒ । मर्त्ये॑षु । आ । दे॒वम् । आऽदे॑वम् । ज॒न॒त॒ । प्रऽचे॑तसम् ।
विश्व॑म् । आऽदे॑वम् । ज॒न॒त॒ । प्रऽचे॑तसम् ॥ १ ॥

वामदेवःस्तौति–हेअग्ने समन्यवः मन्युःस्पर्धा तयासहवर्तमानाः स्वसमानैःस्पर्धमानाइत्यर्थः देवासोदेवनशीलाइन्द्रादयोदेवाः देवंद्योतमानमरतिंशीघ्रंगन्तारंत्वांसदमित् सदैवन्येरिरे हि स्पर्धानिमित्तेयुद्धेप्रेरयन्तिखलु इतिशब्दोहेत्वर्थः यस्माद्देवाःत्वांयुद्धार्थंनितरांप्रेरयन्तितस्माद्यजमानाःक्रत्वास्तुतिलक्षणेनकर्मणान्येरिरे यज्ञकर्मणिदेवान्हविःप्रापयितुं देवानाह्वातुं च त्वां नितरांप्रेरयन्तिखलु यजत यजनीय हेअग्ने अमर्त्यंमरणधर्मरहितं आसर्वतोदेवंद्योतमानंप्रचेतसं प्रकृष्टंकर्मविषयंचेतोज्ञानंयस्यतादृशंत्वांमर्त्येषुयागंकुर्वाणेषुमनुष्येषुआदेवमागन्तारंजनत देवाहविःश्रपणार्थमजनयन् तथाप्रचेतसंकर्माभिज्ञंआदेवंतत्तद्यज्ञेष्वागन्तारं त्वां विश्वंजनत

Funding by IKS-MoE

युगपन्नानादेशवर्तिषुयज्ञेषुयौगपद्येनहविरानयनार्थंव्याप्तंदेवाअकुर्वन् ॥ न्येरिरे ईरगतौ लिटि मन्त्रत्वादाम्नभवति सहेतियोगविभागात्समासः हियोगादनिघातः । क्त्वा जसादिषुछन्दसिवावचनमितिनादेशाभावः यणादेशः ॥ १ ॥

अथद्वितीया—

सभ्रात॑रं॒वरु॑णमग्न॒आव॑वृत्स्वदे॒वाँअच्छा॑सुम॒तीय॒ज्ञव॑नसं॒
ज्येष्ठं॑य॒ज्ञव॑नसम्। ऋ॒तावा॑नमादि॒त्यंच॑र्षणी॒धृतं॒राजा॑नं
चर्षणी॒धृत॑म् ॥ २ ॥

सः । भ्रात॑रम् । वरु॑णम् । अ॒ग्ने॒ । आ । व॒वृ॒त्स्व॒ । दे॒वान् । अच्छ॑ । सु॒ऽम॒ती । य॒ज्ञऽव॑नसम् । ज्येष्ठ॑म् । य॒ज्ञऽव॑नसम् । ऋ॒तऽवा॑नम् । आ॒दि॒त्यम् । च॒र्ष॒णि॒ऽधृत॑म् । राजा॑नम् । च॒र्ष॒णि॒ऽधृत॑म् ॥ २ ॥

हेअग्ने सतादृशस्त्वं भ्रातरंएकस्थानवासेनभ्रातरंवरुणंवृणोत्युदकमितिवरुणः तंदेवं यज्ञवनसं यज्ञैर्वननीयैर्हविर्भिःसंभजनीयं यज्ञवनसंचयज्ञस्यसंभक्तारंज्येष्ठमतिशयेनप्रशस्यं ऋतावानमपांस्वामितयोदकवन्तंसत्यवन्तंवाआदित्यमदितेःपुत्रंचर्षणीधृतं मनुष्याणामुदकप्रदानेनधारकं सुमती शोभनबुध्या हेतुनाचर्षणीधृतं चर्षणिभिर्विद्वद्भिर्धृतंराजानंराजन्तंएतादृशंवरुणंदेवंदेवान्देवनशीलान्स्तोतॄनच्छाभिलक्ष्य आववृत्स्व आवर्तय अभिमुखीकुरु ॥ ववृत्स्व वृतुवर्तने लोटि बहुलंछन्दसीतिविकरणस्यश्लुः निघातः । सुमती मन्त्रेवृषेत्यादिना क्तिन्नुदात्तः सुपांसुलुगितितृतीयायाःपूर्वसवर्णदीर्घः एकादेशस्वरः । ज्येष्ठं प्रशस्यस्येष्ठनिज्यचेतिज्यादेशः नित्त्वादाद्युदात्तः एकादेशस्वरः । यज्ञवनसं वनषणसंभक्तौ कर्मकर्तरिच असुन्प्रत्ययः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेतिपूर्वपदस्वरः ॥ २ ॥

प्रवर्ग्येभिष्टवेउत्तरस्मिन्पटलेसखेसखायमित्येषा सूत्रितंच—सखेसखायमभ्याववृत्स्वोर्ध्वऊषुणऊतयइति ।

सैषातृतीया—

सखे॒सखा॑यम॒भ्याव॑वृत्स्वा॒शुं॑नच॒क्रंरथ्ये॑व॒रंह्या॒स्मभ्यं॑दस्म॒रंह्या॑ ।
अग्ने॑मृळी॒कंवरु॑णे॒सचा॑विदो॒मरुत्सु॑वि॒श्वभा॑नुषु ॥
तो॒कायतु॒जेशु॑शुचान॒शंकृ॑ध्य॒स्मभ्यं॑दस्म॒शंकृ॑धि ॥ ३ ॥

Funding by IKS-MoE

सखे । सखायम् । अभि । आ । ववृत्स्व । आशुम् । न । चक्रम् ।
रथ्याऽइव । रंह्या । अस्मभ्यम् । दस्म । रंह्या । अग्ने । मृळीकम् ।
वरुणे । सचा । विदः । मरुत्ऽसु । विश्वऽभानुषु । तोकाय ।
तुजे । शुशुचान । शम् । कृधि । अस्मभ्यम् । दस्म । शम् । कृधि ॥३॥

सखे सखिभूत दस्म दर्शनीय हेअग्ने त्वं तवसखायंवरुणमस्मभ्यं अस्मदर्थं आववृत्स्व अभिमुखीकुरु तत्रदृष्टान्तः—रंह्या रंहणेगमनेसाधुभूतौरथ्येव रथेयोजितावश्वौयथा आशुं शीघ्रगंतृचक्रंलक्ष्यदेशंप्रत्यभिमुखीकुरुतःतद्वत् हेअग्ने सचा तवसहायेवरुणोमृळीकंसुखकरंहविः विदः लब्धवानसि तथा विश्वभानुषु सर्वतोव्याप्ततेजस्केषुमरुत्सु सुखकरंलब्धवानसि अग्निवारुणाग्निमारुतयोःकर्मणोरिष्टवानसीत्यर्थः शुशुचान दीप्यमान हेअग्ने तोकाय तुज्यतेपीड्यते नेनमातागर्भवासेनेतितोकंपुत्रः तस्मैतुजेतुजतिगच्छत्यनेनानृण्यंपितेतितुक् पौत्रः तस्मै शंसुखं कृधि कुरु दस्म दर्शनीय हेअग्ने अस्मभ्यंशंकृधि सुखंकुरु ॥ रथ्येव रथस्येमावित्यर्थेरथाद्यदितियत् सुपांसुलुगितिसुपोडादेशः । रंह्या रंहशब्दात्तत्रसाधुरितियत्प्रत्ययः यतोनावइत्याद्युदात्तत्वम् ॥ ३ ॥

त्वंनोअग्नेइत्येतदारभ्येदंसूक्तंउत्तराणिसूक्तानिचप्रातरनुवाकेआग्नेयेक्रतौत्रैष्टुभेछन्दसिआश्विनशस्त्रेचविनियुक्तानि सूत्रितश्च—त्वंनोअग्नेवरुणस्यविद्वानित्येतत्प्रभृतीनिचत्वारीति । अवभृथेष्टयांस्विष्टकृदर्थेअग्नीवरुणौयष्टव्यौ तत्र त्वंनोअग्नइतिद्वेयाज्यानुवाक्ये सूत्रितश्च—अग्नीवरुणौस्विष्टकृदर्थेत्वंनोअग्नेवरुणस्यविद्वानितिद्वेइति । अस्नातोयद्यग्निहोत्रंजुहुयात्तदाग्निवारुणीष्टिः तस्यामेतेएवयाज्यानुवाक्ये तदाहुर्यआहिताग्निरित्युपक्रम्याम्नातं तस्ययाज्यानुवाक्ये त्वंनोअग्नेवरुणस्यविद्वान्सत्वंनोअग्नेवमोभवोतीति ।

सैषाचतुर्थी—

त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेळोवयासिसीष्ठाः ।
यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ ४ ॥

त्वम् । नः । अग्ने । वरुणस्य । विद्वान् । देवस्य । हेळः । अव ।
यासिसीष्ठाः । यजिष्ठः । वह्निऽतमः । शोशुचानः । विश्वा ।
द्वेषांसि । प्र । मुमुग्धि । अस्मत् ॥ ४ ॥

हेअग्ने विद्वान्सर्वपुरुषार्थसाधनोपायज्ञस्त्वं देवस्य द्योतमानस्यवरुणस्यहेळःक्रोधान्नः अस्मत्संबन्धिनःवरुगकर्तृकान्पाशग्रहणान् अवयासिसीष्ठाः अपनय किञ्च यजिष्ठोयष्टृतमः वह्नितमो हविषामतिशयेनवोढा शोशुचानोतिशयेनदीप्यमानस्त्वं विश्वा सर्वाणिद्वेषांसि पापानि द्वेष्टृणि रजांसिवास्मदस्मत्तः प्रमुमुग्धि प्रकर्षेणमोचय॥हेळः हेडृअनादरे क्विप् शसिरूपं शसःसुप्त्वादनुदात्तत्वेधातुस्वरः । यासिसीष्ठाः यसेर्ण्यन्तादाशीर्लिङ् यासिसीयुडागमः छन्दस्युभयथेतिलिङःसार्वधातुकत्वाण्णिलोपाभावः अवपूर्वोयासिर्विनाशेवर्तते । मुमुग्धि मुञ्चतेर्लोटि रूपं बहुलंछन्दसीतिशपःश्लुः ॥ ४ ॥

अथपञ्चमी—

सत्वंनो॑अग्नेव॒मोभ॑वो॒तीनेदि॑ष्ठोअ॒स्याउ॒षसो॒व्यु॑ष्टौ ।
अव॑यक्ष्वनो॒वरु॑णं॒ररा॑णोवी॒हिमृ॑ळी॒कं॑सु॒हवो॑नएधि ॥ ५ ॥ १२ ॥

सः । त्वम् । न॒ः । अ॒ग्ने॒ । अ॒व॒मः । भ॒व॒ । ऊ॒ती । नेदि॑ष्ठः । अ॒स्याः ।
उ॒षस॑ः । विऽउ॑ष्टौ । अव॑ । य॒क्ष्व॒ । न॒ः । वरु॑णम् । ररा॑णः । वी॒हि ।
मृ॒ळी॒कम् । सु॒ऽहव॑ः । न॒ः । ए॒धि॒ ॥ ५ ॥ १२ ॥

हेअग्ने सतादृशस्त्वंऊती ऊत्या रक्षणेननोऽस्माकं अवमः अर्वाचीनः प्रत्यासन्नःसन् अस्याउषसोव्युष्टौव्युच्छन्नेप्रातःकालेअग्निहोत्रादिकर्मसिद्ध्यर्थंनेदिष्ठोभव अतिशयेनास्मदन्तिकस्थोभव यद्वा ऊत्यागमनेनास्माकमवमोरक्षकोभव किञ्च नोस्माकंवरुणं वरुणकृतंजलोदरादिरोगंआवरकंपापंवा अवयक्ष्व अवयज विनाशयेत्यर्थः रराणः अस्माभिर्दत्तेहविषिरममाणः यद्वा यजमानेभ्योत्यन्तंफलप्रदस्त्वं मृळीकं सुखकरंइदंहविः वीहि भक्षय किञ्च नोस्माकं सुहवःशोभनाह्वानोपेतः एधिभव ॥ नेदिष्ठः अन्तिकशब्दादिष्ठनि अन्तिकबाढयोर्नेदसाधावितिनेदइत्यादेशः नित्त्वादाद्युदात्तः । रराणः रमतेःकानचि मकारलोपश्छान्दसः यद्वा रातेर्यङ्लुकिव्यत्ययेनकानच् अभ्यस्तानामादिः । एधि अस्तेर्लोटि घ्वसोरेद्धावभ्यासलोपश्चेति एइत्यादेशः तस्यासिद्धत्वात् हुझल्भ्योहेर्धिः निघातः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेद्वादशोवर्गः ॥ १२ ॥

अथषष्ठी—

अ॒स्यश्रेष्ठा॑सु॒भग॑स्यसं॒दृक्दे॒वस्य॑चि॒त्रत॑मा॒मर्त्ये॑षु ।
शुचि॑घृ॒तंनत॒प्तमघ्न्या॑याःस्पा॒र्हादे॒वस्य॑मं॒हने॑वधे॒नोः ॥ ६ ॥

Funding by IKS-MoE

अस्य । श्रेष्ठा । सुऽभगस्य । सम्ऽदृक् । देवस्य । चित्रऽतमा ।
मर्त्येषु । शुचि । घृतम् । न । तप्तम् । अघ्न्यायाः । स्पार्हा ।
देवस्य । मंहनाऽइव । धेनोः ॥ ६ ॥

सुभगस्य सुष्ठुभजनीयस्याग्नेर्देवस्यश्रेष्ठा अतिशयेनप्रशस्या संदृक् संदृष्टिर्मर्त्येषुचित्रतमातिशयेनचायनीयापूजनीयाभवति स्पार्हा सर्वैःस्पृहणीयाचभवति तत्रदृष्टान्तः—यथादेवस्यक्षीरंकामयमानस्यपुरुषस्यअघ्न्याः अहन्तव्यागोः शुचितेजोयुक्तंघृतंक्षरणयुक्तंतप्तंश्रृतं क्षीरंस्पृहणीयंभवति तत्रैवदृष्टान्तान्तरं—यथा गांभिक्षमाणस्यमर्त्यस्यधेनोःदोग्ध्र्यागोर्मंहनेव मंहतिर्दानकर्मा दानंयथाप्रियकरंभवतितद्वत् ॥ सुभगस्य आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वं । स्पार्हा कर्षात्वतोघञोन्तउदात्तः । देवस्य दीव्यतीतिदेवः दीव्यतेःकान्त्यर्थस्यपचाद्यचिरूपम् ॥ ६ ॥

अथसप्तमी—

त्रिरस्यतापरमासन्तिसत्यास्पार्हादेवस्यजनिमान्यग्नेः ।
अनन्तेअन्तःपरिवीतआगाच्छुचिःशुक्रोअर्योरोरुचानः ॥ ७ ॥

त्रिः । अस्य । ता । परमा । सन्ति । सत्या । स्पार्हा । देवस्य ।
जनिमानि । अग्नेः । अनन्ते । अन्तरिति । परिऽवीतः । आ ।
अगात् । शुचिः । शुक्रः । अर्यः । रोरुचानः ॥ ७ ॥

अग्नेरध्यभिमानिनोऽस्यदेवस्यत्रिःत्रीणि अग्निवायुसूर्यात्मनात्रीणि तातानिप्रसिद्धानि परमा उत्तमानि सत्या यथार्थभूतानि जनिमानि जन्मानि स्पार्हा सर्वैः स्पृहणीयानिसन्ति यद्वा अग्नेरेवत्रीणिजन्मानि दिवस्परिप्रथमंजज्ञेअग्निरिति ।त्रीणिजानापरिभूषंत्य[2]स्येत्येवमादिषुमन्त्रेषु प्रसिद्धानि अनन्तेअपर्यन्तेनभस्यन्तर्मध्येस्वतेजसापरिवीतः परिवेष्टितः शुचिः सर्वस्य शोधकः शुक्रोदीप्तियुक्तः अतएवरोरुचानःभृशंदीप्यमानः अर्यः स्वामी तादृशोदेवः अगात् अस्मदीयंयज्ञंप्रत्यागच्छतु॥ सत्या शेश्छन्दसिबहुलमितिशेर्लुक् । परिवीतः व्येञ्संवरणे कर्मणिक्तः यजादित्वात्संप्रसारणं गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वं । अर्यः ऋगतौ अर्यः स्वामिवैश्ययोरितियत्प्रत्ययान्तोनिपातितः स्वामिन्यन्तोदात्तत्वंवक्तव्यमित्यन्तोदात्तत्वम् ॥ ७ ॥

---

१ ऋ. सं. ७. ८. २८. । २ ऋ० सं० १. ७. १. ।

Funding by IKS-MoE

अथाष्टमी—

सदू॒तोविश्वेद॒भिव॑ष्टि॒सद्मा॒होता॒हिर॑ण्यरथो॒रंसु॑जिह्वः ।
रो॒हिद॑श्वोवपु॒ष्यो॑वि॒भावा॒सदा॑र॒ण्वःपि॑तु॒मती॑वसं॒सत् ॥ ८ ॥

सः । दू॒तः । विश्वा॑ । इत् । अ॒भि । व॒ष्टि॒ । सद्म॑ । होता॑ ।
हिर॑ण्यऽरथः । रम्ऽसु॑जिह्वः । रो॒हित्ऽअ॑श्वः । व॒पु॒ष्य॑ः ।
वि॒भाऽवा॑ । सदा॑ । र॒ण्वः । पि॒तु॒मती॑ऽइव । स॒म्ऽसत् ॥ ८ ॥

देवानांदूतः होता देवानामाह्वाता हिरण्यरथः सुवर्णमयरथोपेतः रंसुजिह्वःरमणीयशोभनज्वालोपेतः सतादृशोऽग्निः विश्वेत्सर्वाण्येवसद्म देवयजनस्थानानि अभिवष्टिकामयते पुनश्चकीदृशः रोहिदश्वः रोहितवर्णाअश्वायस्यसतथोक्तः वपुष्यः वपुषिरूपेसाधुः विभावा कान्तियुक्तः अतएवसदासर्वदारण्वोरमणीयोभवति तत्रदृष्टान्तः—पितुमतीवसंसत् यथान्नादिवत्समृद्धंगृहंरमणीयंतद्वत् ॥ रंसुजिह्वः रमतेरन्येभ्योपिदृश्यतइतिर्विच् बहुव्रीहौपूर्वपदस्वरः । वपुष्यः तत्रसाधुरितियत् तित्स्वरितः । विभावा छन्दसीवनिपावितिवनिप् ॥ ८ ॥

अथनवमी—

सचे॑तय॒न्मनु॑षोय॒ज्ञब॑न्धुः॒प्रतंम॒ह्यार॑श॒नया॑नयन्ति ।
सक्षे॑त्यस्य॒दुर्या॑सु॒साध॑न्दे॒वोमर्त॑स्यसधनि॒त्वमा॑प ॥ ९ ॥

सः । चे॒त॒य॒त् । मनु॑षः । य॒ज्ञऽब॑न्धुः । प्र । तम् । म॒ह्या । र॒श॒नया॑ ।
न॒य॒न्ति॒ । सः । क्षे॒ति॒ । अ॒स्य॒ । दुर्या॑सु । साध॑न् । दे॒वः । मर्त॑स्य ।
स॒ध॒नि॒ऽत्वम् । आ॒प॒ ॥ ९ ॥

यज्ञबन्धुः यज्ञेग्निहोत्रादौबन्धनंविनियोजनंयस्यसतथोक्तः सोग्निर्मनुषः कर्मणिप्रवृत्तान्मनुष्यान्चेतयत्जानाति मह्ना महत्यारशनयास्तुतिरूपयारज्ज्वायुक्तं तंतादृशमग्निंप्रणयन्ति उत्तरवेद्यादिषु अध्वर्य्वादयःप्रक्षिपन्ति मर्तस्य मनुष्यस्यास्ययजमानस्यदुर्यासु गृहेषु साधन् अभीष्टानिसाधयन्सोऽग्निःक्षेतिवसति सदेवोद्योतमानोऽग्निः सधनित्वं यस्यगृहेनिवसतितेनधनिनासाहित्यमाप प्राप्नोति प्रभूतंधनंयतमानायदापयित्वातेनसहितोभवदित्यर्थः ॥ साधन् राधसाधसंसिद्धौ ण्यन्तस्यशतरिरूपम् ॥ ९ ॥

Funding by IKS-MoE

अथदशमी–

सतूनोअग्निर्नयतुप्रजानन्नच्छारत्नंदेवभक्तंयदस्य ।
धियायद्विश्वेअमृताअकृण्वन्द्यौष्पिताजनितासत्यमुक्षन् ॥ १०॥१३॥

सः । तु । नः । अग्निः । नयतु । प्रऽजानन् । अच्छ । रत्नम् ।
देवऽभक्तम् । यत् । अस्य । धिया । यत् । विश्वे । अमृताः ।
अकृण्वन् । द्यौः । पिता । जनिता । सत्यम् । उक्षन् ॥ १० ॥ १३ ॥

प्रजानन्सर्वंजानानःसोऽग्निः देवभक्तं देवैर्देवनशीलैःस्तोतृभिःसंभजनीयं अस्याग्नेःसंबन्धियदुत्तमंरत्नंधनमस्तितद्रत्नमच्छाभिमुख्येनतुक्षिप्रंनोऽस्मान्नयतुप्रापयतु अमृताःमरणधर्मरहिताःविश्वेसर्वेदेवाःधियाहविर्लक्षणेनकर्मणाहेतुना यत्यमग्निं अकृण्वन् हविषांप्रापयितारमकुर्वन् यस्यचाग्नेःद्यौः पितापालयित्रीजनिताजनयित्रीच अग्नेदिवःसूनुरसिप्रचेताइतिश्रवणात् । यद्वा द्यौर्देवनशीलआदित्यः पिताजनयिताच आदित्यादग्निरित्याम्नानात् । सत्यंयथार्थभूतं तमग्निंउक्षन् घृताद्याहुतिभिरध्वर्य्वादयःसिञ्चन्ति ॥ देवभक्तं भजसेवायां कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः । उक्षन् उक्षसेचने लङिरूपं बहुलंछन्दसीत्यडभावः ॥ १० ॥

॥ इतितृतीयस्यचतुर्थेत्रयोदशोवर्गः ॥ १३ ॥

अथैकादशी–

सजायतप्रथमःपस्त्यासुमहोबुध्नेरजसोअस्ययोनौ ।
अपादशीर्षागुहमानोअन्तायोयुवानोवृषभस्यनीळे ॥ ११ ॥

सः । जायत । प्रथमः । पस्त्यासु । महः । बुध्ने । रजसः । अस्य ।
योनौ । अपात् । अशीर्षा । गुहमानः । अन्ता । आऽयोयुवानः ।
वृषभस्य । नीळे ॥ ११ ॥

सोऽग्निःप्रथमआहवनीयादिरूपतयाश्रेष्ठःसन् पस्त्यासु यजमानानांगृहेषु जायत अजायत आहुत्यधिकरणतयासंपद्यते तथा महोमहतोऽस्यरजसोन्तरिक्षस्यबुध्नेमूलेपृथिव्यांतत्रापियोनावुत्तरवेद्यादिस्थानेसंपद्यते सोग्निरपात् पादवर्जितः अशीर्षा शिरोवर्जितः तदेवाह-

---

१ ऋ० सं० ३. १. २५. ।

Funding by IKS-MoE

अन्ता आद्यन्तेपादशिरसीगुहमानःगूहमानः अविज्ञेयपादशिराइत्यर्थः वृषभस्य वर्षणसमर्थस्यमेघस्य नीळे निलयेनभसि आयोयुवानः धूमाकारेणात्मानमायोजयन्वर्तते यद्वा यःप्रथमोवैद्युतोग्निः पस्त्यासुनदीषुबुध्नेन्तरिक्षेमहोमहतोरजसउदकस्यतेजसोवा योनौ स्थानेच चरति अपादशीर्षागादशिरोवर्जिता अन्ता आत्मनःपर्यन्तप्रदेशान् स्वतेजसागुहमानःआच्छादयन् पुनश्चायोयुवानः तानितेजांसिस्वात्मनिमिश्रीकुर्वन् वृषभस्यमेवस्यनीळेस्थानेनभसिचरति सोग्निरधुनाकर्मयोग्यतयाजायत ॥ अपात् पादस्यलोपोहस्त्यादिभ्यइत्यकारलोपः समासान्तः । गुहमानः गुहूसंवरणे शविकरणी शानचिरूपं शानचोलसार्वधातुकस्वरेकृतेप्रत्ययस्वरः । आयोयुवानः युमिश्रणे यङ्लुकिशानचिरूपं अभ्यस्तस्वरेणाद्युदात्तः ॥ ११ ॥

अथद्वादशी–

प्रशर्धआर्तप्रथमंविपन्याँऋतस्ययोनावृषभस्यनीळे ।
स्पार्होयुवावपुष्योविभावासप्तप्रियासोजनयन्तवृष्णे ॥ १२ ॥

प्र । शर्धः । आर्त । प्रथमम् । विपन्या । ऋतस्य । योना ।
वृषभस्य । नीळे । स्पार्हः । युवा । वपुष्यः । विभाऽवा । सप्त ।
प्रियासः । अजनयन्त । वृष्णे ॥ १२ ॥

हेअग्ने विपन्या स्तुत्यायुक्तं ऋतस्योदकस्य योनौ स्थाने वृषभस्य वर्षणसमर्थस्यमेघस्य नीळे कुलायभूतेन्तरिक्षे वैद्युताग्निरूपेणत्वांवर्तमानंशर्धस्तेजःप्रथमंप्रार्तं प्रकर्षेण गच्छति यश्चाग्निःस्पार्हः सर्वैःस्पृहणीयः युवा नित्यतरुणः वपुष्यःकमनीयः विभावा दीप्तिमान् तस्मैवृष्णे अभिमतफलवर्षकायाग्नये प्रियासः प्रियाःसप्तहोत्रकाः अजनयन्त स्तोत्रमकुर्वन् ॥ आर्त ऋगतौ लङि व्यत्ययेनात्मनेपदं निघातः । विपन्या पनचेत्यस्य इन्प्रत्ययः कृदिकारादक्तिनइतिङीष् प्रत्ययस्वरेणान्तोदात्तः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् । विपन्याँऋतस्येत्यत्र संहितायांइकोसवर्णेशाकल्यस्यह्रस्वश्चेत्यनिकोपिह्रस्वः अनुनासिकश्च ॥ १२ ॥

अथत्रयोदशी–

अस्माकमत्रपितरोमनुष्याअभिप्रसेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाःसुदुघावव्रेअन्तरुदुस्राआजन्नुषसोहुवानाः ॥ १३ ॥

अस्माकम् । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतम् ।
आशुषाणाः । अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अन्तः । उत् ।
उस्राः । आजन् । उषसः । हुवानाः ॥ १३॥

अत्रलोके पूर्वेमनुष्याः अस्माकंपितरोङ्गिरसः ऋतंयज्ञमाशुषाणाःअश्नुवानाःसन्तः अभिप्रसेदुः अग्निमभिलक्ष्यप्रजग्मुः तेङ्गिरसः अग्निपरिचर्याबलात् अश्मव्रजाःपर्वतैःपरिवृताःवव्रेवृणोत्याच्छादयतीतिवव्रं पर्वतबिलान्तर्वर्तितमः तस्मिन्नंतर्मध्येस्थिताः सुदुघाः सुष्ठुदोग्ध्रीः उस्राः पणिभिरपहृतागाः उदाजन् तस्माद्बिलान्निरगमयन् किंकुर्वन्तः तमसोविध्वंसिनीरुषसोदेवीःप्रकाशार्थं हुवानाआह्वयन्तः ॥ वव्रे वृणोतेरौणादिकः कृञादीनांद्वेभवतइतिद्विर्वचनम् ॥ १३ ॥

अथचतुर्दशी–

तेमर्मृजतददृवांसोआद्रिंतदेषामन्येअभितोविवोचन् ।
पश्वयन्त्रासोअभिकारमर्चन्विदन्तज्योतिश्चकृपन्तधीभिः ॥१४॥

ते । मर्मृजत । ददृऽवांसः । आद्रिम् । तत् । एषाम् । अन्ये ।
अभितः । वि । वोचन् । पश्वऽयन्त्रासः । अभि । कारम् ।
अर्चन् । विदन्त । ज्योतिः । चकृपन्त । धीभिः ॥ १४ ॥

तेङ्गिरसः अद्रिंपणिभिरपहृतानांगवांनिरोधकंपर्वतं ददृवांसोविदारयन्तःसन्तःमर्मृजत अग्निंपर्यचरन् एषामङ्गिरसांतत्तादृशंकर्म अन्येमहर्षयोभितःसर्वत्रजगतिविवोचन् विशेषेण कथयन् पश्वयन्त्रासः पशुनिर्गमनार्थानियन्त्राणिउपायायेषांतेङ्गिरसः कारं अभिमतस्यप्रयोजनस्यकर्तारमग्निमभ्यर्चयन्नस्तुवन् ततस्तमोपहं आदित्याख्यंज्योतिर्विदन्तालभन्त ततोधीभिर्बुद्धिभिश्चकृपन्त यज्ञानकुर्वन् ॥ मर्मृजत मृजूष्शुद्धौ यङ्लुकि लङि व्यत्ययेनात्मनेपदं निघातः । चकृपन्त कृपूसामर्थ्ये ण्यन्तस्यलुङिचङि सन्वद्भावाभावश्छान्दसः ॥ १४ ॥

अथपञ्चदशी–

तेगव्यतामनसादृध्रमुब्धंगायेमानंपरिषन्तमाद्रिम् ।
दृळ्हंनरोवचसादैव्येनव्रजंगोमन्तमुशिजोविवव्रुः ॥ १५ ॥ १४ ॥

ते । ग॒व्य॒ता । मन॑सा । दृ॒ध्रम् । उ॒ब्धम् । गाः । ये॒मा॒नम् । परि॑ ।
सन्त॑म् । अद्रि॑म् । दृ॒ळ्हम् । नर॑ः । वच॑सा । दैव्ये॑न । व्र॒जम् ।
गोऽम॑न्तम् । उ॒शिज॑ः । वि । व॒व्रु॒रिति॑वव्रुः ॥ १५ ॥ १४ ॥

नरः कर्मणांनेतारः उशिजोऽग्निंकामयमानास्तेङ्गिरसः गव्यतागाइच्छतामनसादृध्रं गवां निर्गमनद्वारनिरोधकमुब्धं समुब्धंसंहतं यद्वा उभिःपूरणार्थः गोभिः पूर्णंगाः येमानंनियच्छन्तं परिसर्वतःसन्तंवर्तमानंदृह्ळंदृढंगोमन्तं गोभिर्युक्तंव्रजं गवांनिवासस्थानं अद्रिंपर्वतं दैव्येनाग्निविषयेणवचसावेदात्मकेनस्तोत्रेण विवव्रुः गोनिर्गमनार्थमुद्घाटितवन्तः ॥ उब्धं उभ्नातिर्हन्तिनासमानार्थः यद्वा उंभपूरणे कर्मणिक्तः । येमानं यमेःकानचि एत्वाभ्यासलोपौ चित्त्वादन्तोदात्तः । परिषन्तमित्यत्रसंहितायामुपसर्गप्रादुर्भ्यामस्तिर्यच्परइतिषत्वम् ॥ १५ ॥

॥ इतितृतीयस्यचतुर्थेचतुर्दशोवर्गः ॥ १४ ॥

अथषोडशी–

तेम॑न्वतप्रथ॒मंनाम॑धे॒नोस्त्रिःस॒प्तमा॒तुःप॑र॒माणि॑विन्दन् ।
तज्जा॑न॒तीर॒भ्य॑नूषत॒व्राआ॒विर्भु॑वदरु॒णीर्य॒शसा॒गोः ॥ १६ ॥

ते । म॒न्व॒त । प्र॒थ॒मम् । नाम॑ । धे॒नोः । त्रिः । स॒प्त । मा॒तुः ।
प॒र॒माणि॑ । वि॒न्द॒न् । तत् । जा॒न॒तीः । अ॒भि । अ॒नू॒षत॒ ।
व्राः । आ॒विः । भु॒व॒त् । अ॒रु॒णीः । य॒शसा॑ । गोः ॥ १६ ॥

हेअग्ने तेस्तोत्रंकुर्वाणाअङ्गिरसः मातुर्जनन्याधेनोर्वाचः संबन्धिनाम स्तुतिसाधकं शब्दमात्रं प्रथमंपूर्वमन्वत अजानत पश्चात्तस्यावाचःसंबन्धीनि त्रिःसप्त एकविंशतिसंख्याकानि स्तुतिसाधनानि छन्दांसि तानिच गायत्र्यादीनिजगत्यन्तानिसप्तअतिजगत्यादीन्यतिधृत्यंतानिसप्तकृतिप्रभृतीन्युत्कृतिपर्यन्तानिसप्तेति एवं त्रिःसप्तच्छन्दांसि परमाण्युत्तमानिविन्दन्नलभन्त एवंविधछन्दोयुक्तैर्मन्त्रैरग्निमस्तुवन्नित्यर्थः तत्ततः जानतीः सर्वंजानानाः व्राः व्राइत्युषोनाम उषसः अभ्यनूषत अस्तुवन् ततोगोःसूर्यस्ययशसातेजसासह अरुणीः अरुणवर्णोषाः आविर्भुवत् आविरभूत्। यद्वा तेङ्गिरसः प्रथमंपुरातनंनाम एहि सुरभिगुग्गुलुगन्धिनीति धेनोर्नामधेयं मन्वतोच्चारयामासुः मातुर्भूम्याः स्वभूतानिपणिभिरपहृतानि त्रिःसप्तरत्नानिविन्दन् तदुच्चारितंनामजानन्त्योगावः अभ्यनूषत हंभारवलक्षणंशब्दमकुर्वन् तदानीमुषाःप्रादुरभूदिति ॥ जानतीः शतुरनुमोनद्यजादी-

Funding by IKS-MoE

इतिङीपउदात्तत्वम् । अनूषत णुस्तुतौ लुङिरूपं कुटादित्वादगुणः । अरुणीः सोरलोपश्छान्दसोगौरीर्मिमायेतिवत् ॥ १६ ॥

अथसप्तदशी–

नेश॒त्तमो॒दुधि॑तं॒रोच॑त॒द्यौरु॒द्दे॒व्याउ॒षसो॑भा॒नुर॑र्त ।
आसूर्यो॑बृह॒तस्ति॑ष्ठ॒दज्राँ॑ऋ॒जुमर्ते॑षुवृ॒जि॒ना॒च॒पश्य॑न् ॥ १७ ॥

नेश॑त् । तम॑ः । दुधि॑तम् । रोच॑त । द्यौः । उत् । दे॒व्याः । उ॒षस॑ः ।
भा॒नुः । अ॒र्त॒ । आ । सूर्य॑ः । बृ॒ह॒तः । ति॒ष्ठ॒त् । अज्रा॑न् ।
ऋ॒जु । मर्ते॑षु । वृ॒जि॒ना । च॒ । पश्य॑न् ॥ १७ ॥

तमः रात्रिकृतंध्वान्तंदुधितं दुधिःप्रेरणकर्मा प्रातरग्निविहरणकाले उषसाप्रेरितंसत् नेशत् अनश्यत् ततोद्यौरन्तरिक्षंरोचतादीप्यत ततोदेव्याः देवनशीलायाउषसोभानुः प्रभा उदर्त उद्गच्छति अथ सूर्यः बृहतोमहतः अज्रानजरान्पर्वतान्गमनशीलान्रश्मीन्वा आतिष्ठदध्यतिष्ठत् किंकुर्वन् मर्त्येषुमनुष्येषु विद्यमानमृजुसत्कर्म वृजिना वृजिनानि अनृजून्यसत्कर्माणिच पश्यन्नध्यतिष्ठदितिशेषः ॥ नेशत् णशअदर्शने लङि णशिमन्योरलिङ्चेत्वंवक्तव्यमित्येत्वं शपः पित्त्वादनुदात्तत्वेधातुस्वरः । रोचत रुचदीप्तौ लङिरूपं वाक्यभेदादनिघातः ॥ १७ ॥

अथाष्टादशी–

आदित्प॒श्चाबु॑बु॒धा॒नाव्य॑ख्य॒न्नादिद्रत्नं॑धारय॑न्त॒द्युभ॑क्तम् ।
विश्वे॒विश्वा॑सु॒दु॒र्या॑सुदे॒वामित्र॑धि॒येव॑रुणस॒त्यम॑स्तु ॥ १८ ॥

आत् । इत् । प॒श्चा । बु॒बु॒धा॒नाः । वि । अ॒ख्य॒न् । आत् । इत् ।
रत्न॑म् । धा॒र॒य॒न्त॒ । द्युऽभ॑क्तम् । विश्वे॑ । विश्वा॑सु । दु॒र्या॑सु ।
दे॒वाः । मित्र॑ । धि॒ये । व॒रु॒ण॒ । स॒त्यम् । अ॒स्तु ॥ १८ ॥

आदित्सूर्योदयानन्तरं बुबुधानाः पणिभिरपहृताः निरोधान्निर्गतागाः जानानाःअंगिरसः पश्चा पश्चात्पृष्ठचदेशेषुव्यख्यन् अशेषेण तागाः अपश्यन् तथा आदिदनन्तरं द्युभक्तं दीप्तियुक्तं देवैःसंभक्तंवा रत्नं पणिभिरपहृतंधनंच धारयन्ताधारयन् लब्धगोधनानामंङ्गिरसां विश्वासु दु-

यांसु सर्वेषुगृहेषु विश्वेयजनीयाः सर्वेदेवाआजग्मुः हेमित्र मित्रभूत हेवरुणोपद्रवाणांवारक हेअग्ने धिये कर्मणांकर्त्रे स्तोत्रेवा यजमानाय सत्यमस्तु यदेतत्तवोपद्रववारणसामर्थ्यंतद्यथार्थभूतमस्तु ॥ पश्वा पश्वपश्वाचच्छन्दसीतिनिपातितः । बुबुधानाः बुधेर्लिटि कानचिरूपं चित्त्वादन्तोदात्तः । द्युभक्तं भजसेवायां कर्मणिक्तप्रत्ययः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरः ॥१८॥

सूक्तेएकोनविंशी–

अच्छावोचेयशुशुचानमग्निंहोतारंविश्वभरसंयजिष्ठम् ।
शुच्यूधोअतृणन्नगवामन्धोनपूतंपरिषिक्तमंशोः ॥ १९ ॥

अच्छ । वोचेय । शुशुचानम् । अग्निम् । होतारम् ।
विश्वऽभरसम् । यजिष्ठम् । शुचि । ऊधः । अतृणत् । न । गवाम् ।
अन्धः । न । पूतम् । परिऽसिक्तम् । अंशोः ॥ १९ ॥

हेअग्ने शुशुचानं भृशंदीप्यमानं होतारं देवानामाह्वातारं विश्वभरसं आहुतिद्वारावृष्टिप्रदानेन विश्वस्यपोषकं यजिष्ठं यष्टृतममग्निं त्वामच्छाभिलक्ष्यवोचेय स्तवानि गवामूधःशुचि शुद्धंपयःनातृणत् तवआहुत्यर्थंयजमानोनदोग्धि अंशोः सोमलताखण्डस्यसंबन्धि अन्धोरसाख्यमन्नं पूतं दशापवित्रेणशोधितं सन्नपरिषिक्तं गृहेषु नप्रक्षिप्तं किंत्वनेनयजमानेनकेवलंस्तुतिरेवक्रियते ॥ वोचेय ब्रूञआशिर्लिङि ब्रुवोवचिः लिङ्याशिष्यङ् छन्दस्युभयथेतिसार्वधातुकत्वात्सीयुटःसलोपः । अतृणत् उत्तृदिर्हिंसानादरयोः दोहनमेवऊधोहिंसनं । परिषिक्तं सिञ्चतेःकर्मणिक्तः उपसर्गात्सुनोतीतिसंहितायांषत्वं गतिरनन्तरइतिगतेःस्वरः ॥ १९ ॥

अथविंशी–

विश्वेषामदितिर्यज्ञियानांविश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामवआवृणानःसुमृळीकोभवतुविश्ववेदाः ॥ २० ॥ १५ ॥

विश्वेषाम् । अदितिः । यज्ञियानाम् । विश्वेषाम् । अतिथिः ।
मानुषाणाम् । अग्निः । देवानाम् । अवः । आऽवृणानः । सुऽमृळीकः ।
भवतु । विश्वऽवेदाः ॥२० ॥

Funding by IKS-MoE

अयमग्निर्विश्वेषांसर्वेषांयज्ञियानांयज्ञार्हाणांदेवानामदितिः अदितिर्देवमाता तद्वद्देवानांपोषकइत्यर्थः यद्वा विश्वेषांदेवानामदितिः भूस्थानीयः आधारभूतइतियावत् अयंवाग्निर्वैश्वानरइति श्रुतेः। तथायमग्निर्विश्वेषांमानुषाणामतिथिरतिथिवत्पूज्योभवति देवानां देवनशीलानांस्तोतॄणामवोत्वंहविरावृणानःसंभजन् जातवेदाःजातंसर्ववेत्तीतिजातवेदाः सोग्निस्तेषांस्तोतॄणांसुमृळीकः सुखकरोभवतु ॥ अतिथिः अतसातत्यगमने ऋतन्यंजीत्यादिनाइथिन्प्रत्ययः नित्त्वादाद्युदात्तः। मानुषाणांमनोर पत्यानीत्यर्थे मनोर्जातावञ्यतौषुक्चेतिअञ्प्रत्ययः ञित्त्वादाद्युदात्तः ॥२०॥

॥ इतितृतीयस्यचतुर्थेपञ्चदशोवर्गः ॥ १५ ॥

योमर्त्येष्वितिविंशत्यृचंद्वितीयंसूक्तं वामदेवस्यार्षंत्रैष्टुभमाग्नेयं योमर्त्येष्वित्यनुक्रमणिका। अस्यसूक्तस्यप्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तएवविनियोगउक्तः ।

तत्रप्रथमा—

योमर्त्ये॑ष्व॒मृत॑ऋ॒तावा॑दे॒वोदे॒वेष्व॑र॒तिर्नि॒धायि॑ ।
होता॒यजि॑ष्ठोम॒ह्नाशु॒चध्यै॑ह॒व्यैर॒ग्निर्मनु॑षई॒रय॑ध्यै ॥ १ ॥

यः । मर्त्ये॑षु । अ॒मृत॑ः । ऋ॒तऽवा॑ । दे॒वः । दे॒वेषु॑ । अ॒र॒तिः ।
नि॒ऽधायि॑ । होता॑ । यजि॑ष्ठः । म॒ह्ना । शु॒चध्यै॑ । ह॒व्यैः । अ॒ग्निः ।
मनु॑षः । ई॒र॒यध्यै॑ ॥ १ ॥

अमृतः मरणधर्मरहितः योग्निर्मर्त्येषुमनुष्येषु ऋतावा सत्यवान्निधायि निहितः यद्वा मर्त्येषुमनुष्यसंबन्धिषुवागादीन्द्रियेषुनिहितः अग्निर्वाग्भूत्वामुखंप्राविशदितिश्रुतेः। देवोदेवनशीलोयोग्निः इन्द्रादिषुदेवेषुअरतिरभिगन्ताशत्रूणां यद्वा देवलोकेगन्ता निधायि निहितः सचहोत.देवानामाह्वातायजिष्ठोयष्टृतमोग्निः मह्नास्वकीयेनमहतातेजसाशुचध्यै दीपितुमुत्तरवेद्यां निहितः किंच हव्यैर्हवनीयैराज्यपुरोडाशादिभिर्हविर्भिर्हेतुभिर्मनुषोमनुष्यस्ययजमानस्यईरयध्यै स्वर्गप्रतिप्रेरणायनिहितः ॥ अरतिः ऋगतौ वहिवस्यर्तिभ्यश्चिदिति अतिप्रत्ययः चित्त्वादन्तोदात्तः। निधायि दधातेःकर्मणिलुङिरूपं परादिश्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। शुचध्यै शुचदीप्तौ तुमर्थेकध्यैप्रत्ययः कित्त्वादगुणः प्रत्ययस्वरः। ईरयध्यै ईरयतेस्तुमर्थेशध्यैप्रत्ययः शित्त्वेनसार्वधातुकत्वाण्णिलोपाभावः ॥ १ ॥

---

१ तै० ब्रा० ३. ९. १७. ।

अथद्वितीया—

इ॒हत्वंसू॑नोसहसोनोअ॒द्यजा॒तोजा॒ताँउ॒भयाँ॑अ॒न्तर॑ग्ने ।
दू॒तई॑यसेयुयुजा॒नऋ॑ष्वऋ॒जुमु॒ष्कान्वृष॑णःशु॒क्राँश्च॑ ॥ २ ॥

इ॒ह । त्वम् । सू॒नो॒ इति॑ । स॒ह॒सः॒ । नः॒ । अ॒द्य । जा॒तः । जा॒तान् ।
उ॒भया॑न् । अ॒न्तः । अ॒ग्ने॒ । दू॒तः । ई॒य॒से॒ । यु॒यु॒जा॒नः । ऋ॒ष्व॒ ।
ऋ॒जु॒ऽमु॒ष्कान् । वृष॑णः । शु॒क्रान् । च॒ ॥ २ ॥

हेसहसःसूनो बलस्यपुत्राग्ने अद्यास्मिन्दिवसेनोऽस्मदीये इहकर्मणिजातः आधानपवमानेष्टिभिःसंस्कृतस्त्वं जातानुत्पन्नानुभयान्देवमनुष्यानन्तः तेषांमध्येदूतः हवींषि देवान्प्रापयितुमीयसे गच्छसि किंकुर्वन् हेऋष्व दर्शनीयाग्ने ऋजुमुष्कान् मुष्कशब्देनमांसलोभिधीयते ऋजवःप्रसाधकाः ऋजवश्चतेमुष्काश्चेतिऋजुमुष्काः तान्वृषणः रेतःसेचनसमर्थान् शुक्रान्दीप्यमानानश्वांश्च युयुजानः स्वरथेयोजयन्नीयसे यद्वा ऋष्व महन्नग्ने युयुजानः हविर्वहनेनियुज्यमानस्त्वं वृषणः हविःसेचनसमर्थान्यजमानान्देवांश्चईयसे ॥ सूनोसहसः परमपिछन्दसीतिसहसःपराङ्गवद्भावाद्द्वयोःसर्वानुदात्तत्वम् । ईयसे ईङ्गतौ दिवादिः निघातः । युयुजानः युजेर्वर्तमानेलिटि कानचिरूपम् । ऋष्व संहितायामृत्यकइतिप्रकृतिभावः । ऋजुमुष्कान् समासस्वरः ॥ २ ॥

अथतृतीया—

अत्या॑वृ॒धस्नू॒रोहि॑ताघृ॒तस्नू॑ऋ॒तस्य॑मन्ये॒मन॑सा॒जवि॑ष्ठा ।
अ॒न्तरी॑यसेअरु॒षायु॑जा॒नोयु॒ष्मांश्च॑दे॒वान्विश॒आच॒मर्ता॑न् ॥ ३ ॥

अत्या॑ । वृ॒ध॒स्नू॒ इति॑ वृ॒ध॒ऽस्नू॒ । रोहि॑ता । घृ॒तस्नू॒ इति॑ घृ॒त॒ऽस्नू॑ ।
ऋ॒तस्य॑ । म॒न्ये॒ । मन॑सा । जवि॑ष्ठा । अ॒न्तः । ई॒य॒से॒ । अ॒रु॒षा ।
यु॒जा॒नः । यु॒ष्मान् । च॒ । दे॒वान् । विशः॑ । आ । च॒ । मर्ता॑न् ॥ ३ ॥

हेअग्ने ऋतस्यसत्यभूतस्यतवसंबन्धिनौमनसामनसोपिजविष्ठा वेगवत्तमौ वृधस्नू वर्धयतीतिवृधमन्नंतत्क्षरन्तौ घृतस्नू घृतमुदकं तत्स्रवन्तौ रोहितवर्णौअत्याश्वौ मन्येस्तौमि अरुषा आरोचमानौ तावश्वौ युजानोरथेयुजानस्त्वं युष्मान्देवेष्वग्नेरन्तर्भावाद्यजनीयरूपेणकीर्तनं

युष्मान्यष्टव्यान्देवान्विशः परिचारकान्मर्तान्मनुष्यानन्तः षष्ठ्यर्थेद्वितीया तेषांमध्ये आसमन्तादीयसे हविःस्वीकर्तुंयजमानान्गच्छसि तद्धविः प्रदातुं देवान्गच्छसि ॥ मन्ये मन्यतिरर्चतिकर्मा । मनसा सुपांसुलुगितिपञ्चम्याआकारः । युजानः युजिर्योगे युधिबुधिदृशेःकिच्चेतिआनच्प्रत्ययः चित्त्वादन्तोदात्तः ॥ ३ ॥

अथचतुर्थी–

अ॒र्य॒मणं॒वरु॑णंमि॒त्रमे॑षा॒मिन्द्रा॒विष्णू॑म॒रुतो॑अ॒श्विनो॒त ।
स्वश्वो॑अग्नेसु॒रथः॑सु॒राधा॒एदु॑वहसुह॒विषे॒जना॑य ॥ ४ ॥

अ॒र्य॒मण॑म् । वरु॑णम् । मि॒त्रम् । ए॒षा॒म् । इन्द्रा॒विष्णू॒ इति॑ । म॒रुतः॑ ।
अ॒श्विना॑ । उ॒त । सु॒ऽअश्वः॑ । अ॒ग्ने॒ । सु॒ऽरथः॑ । सु॒ऽराधाः॑ । आ ।
इत् । ऊ॒ँ इति॑ । व॒ह॒ । सु॒ऽह॒विषे॑ । जना॑य ॥ ४ ॥

हेअग्ने स्वश्वःशोभनाश्वोपेतः सुरथः शोभनरथः सुराधाः शोभनधनोपेतस्त्वं एषां मर्त्यानांमध्ये सुहविषे शोभनहविष्काय जनाय यजमानाय अर्यमादीनुतापिच अश्विनौ यष्टव्यान्देवानावहेदु आह्वयैव ॥ इन्द्राविष्णू ऋज्रेन्द्रेत्यादिनानिपातनादिन्द्रशब्दआद्युदात्तः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् । सुहविषेचेत्यत्र नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ॥ ४॥

अथपञ्चमी–

गोमाँ॑अ॒ग्नेवि॑माँअ॒श्वीय॒ज्ञोनृ॒वत्स॑खा॒सद॒मिद॑प्रमृ॒ष्यः ।
इळा॑वाँए॒षोअ॑सुरप्र॒जावा॑न्दी॒र्घोर॒यिःपृ॑थु॒बु॒ध्नःस॒भावा॑न् ॥५॥१६॥

गोऽमा॑न् । अ॒ग्ने॒ । आवि॑ऽमान् । अ॒श्वी । य॒ज्ञः । नृ॒वत्ऽस॑खा ।
सद॑म् । इत् । अ॒प्र॒ऽमृ॒ष्यः । इळा॑ऽवान् । ए॒षः । अ॒सु॒र॒ । प्र॒जाऽवा॑न् ।
दी॒र्घः । र॒यिः । पृ॒थु॒ऽबु॒ध्नः । स॒भाऽवा॑न् ॥ ५ ॥

हेअसुर बलवन् हेअग्ने एषःमदीयोयंयज्ञः गोमान्गोभिस्तद्वान् अविमान् अवयःमेषाअस्यसन्तितद्वान् अश्वी अश्वोपेतश्चास्तु नृवत्सखा नरः कर्मणांनेतारोध्वर्य्वादयस्तद्वन्तः सखायोऽनुष्ठातारोयजमानायस्यसतथोक्तः सदमित् सदैवअप्रमृष्यः अप्रधृष्यश्चास्तु तथा इळावान् इळाहविर्लक्षणमन्नं तद्वान् प्रजावान् पुत्रपौत्रादियुक्तश्चास्तु दीर्घःअविच्छिन्नानुष्ठानो-

पेतः रयिर्धनवान् लुप्तमत्वर्थीयः पृथुबुध्नः पृथूनिबहुलानिबुध्नानिधनादीनिकारणानियस्य सतथोक्तः सभावान् उपद्रष्टृरूपसभायुक्तश्चास्तु ॥ नृवत्सखा नरोयेषांसन्तीतिनृवत् मतुप् तस्य छान्दसंवत्वं ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वं बहुव्रीहौपूर्वपदस्वरः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेषोडशोवर्गः ॥ १६ ॥

अथषष्ठी—

य॒स्त॑इ॒ध्मंज॒भर॑त्सिष्विदा॒नोमू॒र्धानं॑वात॒तप॑नेत्वा॒या ।
भुव॒स्तस्य॒स्वत॑वाँःपा॒युर॑ग्ने॒विश्व॑स्मात्सीमघाय॒तउ॑रुष्य ॥ ६ ॥

यः । ते॒ । इ॒ध्मम् । ज॒भर॑त् । सि॒स्वि॒दा॒नः । मू॒र्धान॑म् । वा॒ । त॒तप॑ते त्वा॒ऽया । भुव॑ः । तस्य॑ । स्वऽत॑वान् । पा॒युः । अ॒ग्ने॒ । विश्व॑स्मात् । सी॒म् । अ॒घ॒ऽय॒तः । उ॒रु॒ष्य॒ ॥ ६ ॥

हेअग्ने तेत्वदर्थं यःपुमान्सिष्विदानः स्विद्यद्गात्रःसन् इध्मं त्वत्समिन्धनार्थंकाष्ठभारंजभरदाहरति योवात्वाया त्वत्कामनया मूर्धानं स्वमस्तकं ततपते काष्ठभारेणतापयति तस्यतादृशस्यपुंसः स्वतवान् स्वतवान्धनवानितितलवकारेउक्तं धनवान् भुवःभवसि पायुः पालयितासि सीमेनंविश्वस्मात् अघायतः अघंपापमिच्छन्तः पुरुषादुरुष्यरक्ष ॥ जभरत् हरतेर्लुङिचङिरूपं चङ्यन्यतरस्यामितिचङ्पूर्वस्योदात्तत्वम् । सिष्विदानः ञिष्विदागात्रप्रक्षरणे कानचिरूपं संहितायामादेशप्रत्यययोरितिधातुसकारस्यषत्वम् । त्वाया त्वामात्मनइच्छतीत्यर्थेक्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः दकारस्यछान्दसमात्वं क्यजन्ताद्धातोर्भावेअप्रत्ययादित्यकारप्रत्ययः सुपांसुलुगितितृतीयायाआकारः एकादेशस्वरः । भुवः भवतेर्लेटचडागमेरूपं भूसुवोस्तिङीतिगुणप्रतिषेधः आगमस्यानुदात्तत्वेधातुस्वरः । स्वतवाँःपायुरित्यत्र संहितायांस्वतवान्पायाविति नकारस्यरुत्वं अत्रानुनासिकःपूर्वस्यतुवेतिआकारोनुनासिकः रेफस्यविसर्जनीयः कुप्वोःᳲकᳳपौचेतिᳲपइत्यादेशः । अघायतः अघमात्मनइच्छतीत्यर्थे सुपःक्यच् । अश्वाघस्यादित्यात्वं तदन्ताच्छतृप्रत्ययः शतुरनुमइतिविभक्तेरुदात्तत्वम् । उरुष्य उरुशब्दःकण्ड्वादिः लोटिरूपं निघातः ॥ ६ ॥

अथसप्तमी—

यस्ते॒भरा॒दन्नि॑यतेचि॒दन्नं॑नि॒शिष॑न्म॒न्द्रमति॑थिमु॒दीर॑त् ।
आदे॑व॒युरि॒नध॑तेदुरो॒णेतस्मि॑न्र॒यिर्ध्रु॒वोअ॑स्तु॒दास्वा॑न् ॥ ७ ॥

यः । ते॒ । भरा॑त् । अन्नि॑ऽयते । चि॒त् । अन्न॑म् । नि॒ऽशिष॑त् ।
म॒न्द्रम् । अति॑थिम् । उ॒त्ऽईर॑त् । आ । दे॒व॒ऽयुः । इ॒नध॑ते ।
दु॒रो॒णे । तस्मि॑न् । र॒यिः । ध्रु॒वः । अ॒स्तु॒ । दास्वा॑न् ॥ ७॥

हेअग्ने यःपुमान् अन्नियते अन्नमिच्छते तेतुभ्यंहविर्लक्षणंपुरोडाशादिकमन्नंभरात् दातुंबिभृयात् चिदितिचार्थे यश्चमन्द्रंमदकरंसोमंनिशिषत् नितरांप्रयच्छति यश्चातिथिमतिथिवत्पूज्यंत्वांउदीरत् उत्तरवेद्यांप्रणयति आअपिच यश्चदेवयुः देवत्वंकामयमानः दुरोणे स्वकीयगृहे इनधतेत्वांसमिद्भिःसमिंधते तस्मिन्नेतस्मिन्पुरुषेरयिः पुत्रःध्रुवः आस्तिक्यबुद्ध्यावैदिके मार्गेनिश्चलोऽस्तु तथा दास्वान् औदार्योपेतश्चास्तु ॥ भरात् डुभृञ्धारणपोषणयोरित्यस्यलेट्याडागमेरूपं यद्वृत्तयोगादनिघातः । अन्नियते अन्नमात्मनइच्छन् क्यच् क्यचिचेतीत्वं ह्रस्वश्छान्दसः । निशिषत् शासुअनुशिष्टौ लुङि सर्तिशास्त्यर्तिभ्यश्चेतिच्लेरङादेशः शासइदङ्हलोरितीत्वं । उदीरत् ईरगतौ लेटि व्यत्ययेनपरस्मैपदं अडागमः आगमस्यानुदात्तत्वेधातुस्वरः तिङ्चोदात्तवतीतिगतेर्निघातः । इनधते ञिइन्धीदीप्तौ लटि व्यत्ययेनशप् रुधादित्वात् श्नम् श्नान्नलोपइतिधातुनकारस्यलोपः ङित्परत्वाभावात्श्नसोरल्लोपभावः यद्वृत्तयोगादनिघातः श्नमःस्वरः । दास्वान् दासृदाने संपदादिलक्षणोभावेक्विप् तदस्यास्तीतिमतुप् मादुपधाया इतिवत्वं प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः ॥ ७ ॥

अथाष्टमी—

यस्त्वा॑दो॒षाय॑उ॒षसि॑प्र॒शंसा॑त्प्रि॒यंवा॑त्वाकृ॒णव॑तेह॒विष्मा॑न् ।
अश्वो॒नस्वेद॒मआहे॒म्यावा॒न्तमंह॑सःपीपरोदा॒श्वांस॑म् ॥ ८ ॥

यः । त्वा॒ । दो॒षा । यः । उ॒षसि॑ । प्र॒ऽशंसा॑त् । प्रि॒यम्॑ । वा॒ ।
त्वा॒ । कृ॒णव॑ते । ह॒विष्मा॑न् । अश्वः॑ । न । स्वे । दमे॑ । आ ।
हे॒म्याऽवा॑न् । तम् । अंह॑सः । पी॒प॒रः॒ । दा॒श्वांस॑म् ॥ ८॥

Funding by IKS-MoE

हेअग्ने यःपुमान् दोषा दोषायांरात्रौत्वा त्वांप्रशंसात् संस्तुयात् यश्चोषसि प्रातःकाले त्वां प्रशंसेत् हविष्मान्संभृतहविष्कोयोवायजमानः त्वात्वांप्रियंहविर्भिःप्रीतंकृणवते कुर्यात् आ अथ दाश्वांसं हविर्दत्तवन्तंतत्तादृशंयजमानंस्वेदमेस्वकीयेगृहे हेम्यावान् सुवर्णनिर्मितकक्ष्यावानश्वोन अश्वइव संचरंस्त्वं अंहसःपापरूपाद्दारिद्र्यात् पीपरः पारंनय तस्मैयजमानायबहुधनंप्रयच्छेत्यर्थः ॥ दोषा सप्तम्याआकारः । प्रशंसात् शंसुस्तुतौ लेट्याडागमेरूपम् । कृणवते कृविहिंसाकरणयोरित्यस्यलेटि धिन्विकृण्व्योरचेत्युप्रत्ययः लेटोडाटावित्यडागमः यद्वृत्तयोगादनिघातः प्रत्ययस्वरः । हेम्यावान् हेमार्हति छन्दसिचेतियप्रत्ययः । पीपरः पॄपालनपूरणयोरित्यस्यण्यन्तस्य लुङिचङिरूपं निघातः ॥ ८ ॥

अथनवमी—

यस्तुभ्य॑मग्नेअ॒मृता॑य॒दाश॒द्दुव॒स्त्वेकृ॒णव॑तेय॒तस्रु॑क् ।
नसरा॒याश॑शमा॒नोवियो॑ष॒न्नैन॒मंह॒ःपरि॑वरदघा॒योः ॥ ९ ॥

यः । तुभ्य॑म् । अ॒ग्ने॒ । अ॒मृता॑य । दाश॑त् । दुव॑ः । त्वे इति॑ ।
कृ॒णव॑ते । य॒तऽस्रु॑क् । न । सः । रा॒या । श॒श॒मा॒नः । वि । यो॒ष॒त् ।
न । ए॒न॒म् । अंह॑ः । परि॑ । व॒र॒त् । अ॒घ॒ऽयोः ॥ ९ ॥

हेअग्ने योयजमानः अमृताय मरणधर्मरहिताय तुभ्यंदाशत् हवींषिप्रयच्छेत् यतस्रुक् संयतस्रुक् यश्चयजमानः त्वे त्वयि दुवः परिचर्यांकृणवते करोति शशमानः स्तोत्रंकुर्वाणः सयजमानोरायाधनेननवियोषत् नपृथग्भवेत् सदाधनयुक्तोभवेदित्यर्थः अघायोः पापमिच्छतोहिंसकस्यसंबन्धि अंहः आहननंपापंएनं यजमानंनपरिवरत् नपरिवृणुयात् नस्पृशेदित्यर्थः ॥ दाशत् दाशृदाने लेट्यडागमेरूपम् । त्वे सुपांसुलुगितिसप्तम्याःशेआदेशः । कृणवते यद्वृत्तयोगादनिघातः । योषत् युमिश्रणे लेटि सिब्बहुलमितिसिप् अडागमः निघातः । वरत् वृञ् वरणे लेटिरूपम् ॥ ९ ॥

अथदशमी—

यस्य॒त्वम॑ग्नेअध्व॒रंजुजो॑षोदे॒वोमर्त॑स्य॒सुधि॑तं॒ररा॑णः ।
प्री॒तेद॑स॒द्धोत्रा॒साय॑वि॒ष्ठासा॑म॒यस्य॑विध॒तोवृ॒धास॑ः ॥ १० ॥ १७ ॥

Funding by IKS-MoE

यस्य । त्वम् । अग्ने । अध्वरम् । जुजोषः । देवः । मर्तस्य ।
सुऽधितम् । रराणः । प्रीता । इत् । असत् । होत्रा । सा । यविष्ठ ।
असाम । यस्य । विधतः । वृधासः ॥ १० ॥

हेअग्ने रराणः रममाणः देवोदीप्यमानस्त्वं यस्यमर्तस्य मनुष्यस्यसंबंधिसुधितंत्वदर्थंसुष्ठु निहितं अध्वरमनुपहतंहविर्लक्षणमन्नंजुजोषः सेवसे हेयविष्ठ युवतम सा होत्रासःहोतायजमानः प्रीतेदसत्प्रीतएवभवेत् असामतस्ययजमानस्यसंबन्धिनोभवेम यस्यविधतः अग्निपरिचर्यांकुर्वतोयजमानस्यहोत्रादयोवृधासः यज्ञस्यवर्धयितारोभवन्ति॥ जुजोषःजुषीप्रीतिसेवनयोरित्यस्यबहुलंछन्दसीतिश्लुः अडागमः अभ्यस्तस्वरः । सुधितं दधातेर्निष्ठायां सुधितवसुधितेतिनिपातनाद्ध्यादेशः गतिरनन्तरइतिगतेःस्वरः । असाम अस्तेर्लोटि आडुत्तमस्यपिच्चेत्याडागमः उत्तमस्यपिद्वद्भावादनुदात्तत्वेधातुस्वरः । विधतः विधविधाने तुदादिः शतुरनुमइतिविभक्तेरुदात्तत्वम् ॥ १० ॥

॥ इतितृतीयस्यचतुर्थेसप्तदशोवर्गः ॥ १७ ॥

अथैकादशी—

चित्तिमचित्तिंचिनवद्विविद्वान्पृष्ठेववीतावृजिनाचमर्तान् ।
रायेचनःस्वपत्यायदेवदितिंचरास्वादितिमुरुष्य ॥ ११ ॥

चित्तिम् । अचित्तिम् । चिनवत् । वि । विद्वान् । पृष्ठाऽइव । वीता ।
वृजिना । च । मर्तान् । राये । च । नः । सुऽअपत्याय । देव ।
दितिम् । च । रास्व । अदितिम् । उरुष्य ॥ ११ ॥

विद्वान्प्राणिनांपुण्यपापरूपाणिकर्माणिजानानः सोग्निः चित्तिं ज्ञातव्यं पुण्यं अचित्तिं अनुपादेयत्वेनाचेतनीयंपापं यद्वा चित्तिंज्ञानं अचित्तिं अज्ञानं विचिनवत् विचिनोतु पृथक्करोतु तत्रदृष्टान्तः—पृष्ठेव यथाश्वपालोश्वानांवीता कान्तानिवृजिनादुर्वहाणिच पृष्ठा पृष्ठानि ज्ञेयोपादेयत्वेनपृथक्करोतितद्वत् किञ्च मर्तान्पुण्यकृतोऽपुण्यकृतश्चमनुष्यान्पृथक्करोतु हेदेवाग्ने स्वपत्याय शोभनपुत्रोपेताय रायेधनाय नोऽस्मान्कुरु दितिं दातारंचरास्वदेहि अदितिं पञ्चम्यर्थेद्वितीया अदातुःसकाशादुरुष्य रक्ष ॥ चित्तिं चितीसंज्ञाने स्त्रियांक्तिन् नित्त्वादाद्युदा-

त्तः। चिनवत् चिनोतेर्लेटचडागमः। दितिं दाणूदाने कर्मणिक्तिच्। रास्व रादाने लोटि व्यत्ययेनात्मनेपदं चवायोगेप्रथमेतिननिघातः ॥ ११ ॥

अथद्वादशी—

क॒विंश॑शासुःक॒वयोद॑ब्धानिधा॒रय॑न्तो॒दुर्या॑स्वा॒योः ।
अ॒तस्त्वंदृश्याँ॑अग्नए॒तान्प॒ड्भिःप॑श्ये॒रद्भु॑ताँअ॒र्यएवैः॑ ॥ १२ ॥

क॒विम् । श॒शा॒सुः । क॒वयः॑ । अद॑ब्धाः । नि॒ऽधा॒रय॑न्तः । दुर्या॑सु ।
आ॒योः । अतः॑ । त्वम् । दृश्या॑न् । अ॒ग्ने॒ । ए॒तान् । प॒ट्ऽभिः । प॒श्ये॒ः
अद्भु॑तान् । अ॒र्यः॑ । एवैः॑ ॥ १२ ॥

हेअग्ने आयोर्मनुष्यस्यदुर्यासु गृहेषु अदब्धाः केनाप्यतिरस्कृतानिधारयन्तःनिवसन्तः कवयः क्रान्तदृशोदेवाः कविंमेधाविनं त्वांशशासुः होताभवेतिशशंसुः अतःकारणात अर्यः यज्ञस्यस्वामी त्वं दृश्यान्दर्शनीयानद्भुतानाश्चर्यरूपोपेतानिन्द्रादीनेतान्देवानेवैर्गमनशीलैःपड्भिः पादैःस्वतेजोभिःपश्येः जानीयाः ॥ दृश्यान् दृशिर्प्रेक्षणे ऋदुपधाच्चाकृपि चृतेरितिकर्मणिक्यप् कित्त्वादगुणः पित्त्वादनुदात्तत्वेधातुस्वरः ॥ १२ ॥

अथत्रयोदशी—

त्वम॑ग्नेवा॒घते॑सु॒प्रणी॑तिःसु॒तसो॑मायविध॒तेय॑विष्ठ ।
रत्नं॑भरशशमा॒नाय॑घृष्वेपृ॒थु॒श्च॒न्द्रमव॑सेचर्षणि॒प्राः ॥ १३ ॥

त्वम् । अ॒ग्ने॒ । वा॒घते॑ । सु॒ऽप्रनी॑तिः । सु॒तऽसो॑माय । वि॒ध॒ते ।
य॒वि॒ष्ठ॒ । रत्न॑म् । भ॒र॒ । श॒श॒मा॒नाय॑ । घृ॒ष्वे॒ । पृ॒थु । च॒न्द्रम् ।
अव॑से । च॒र्ष॒णि॒ऽप्राः ॥ १३ ॥

हेयविष्ठ युवतम घृष्वे दीप्तियुक्त यद्वा परेषांघर्षणशील हेअग्ने चर्षणिप्राः अपेक्षितफलप्रदानेनमनुष्याणांकामपूरकः सुप्रनीतिः सुष्ठूत्तरवेद्यांप्रणयनीयस्त्वं सुतसोमायविधतेतवपरिचरणंकुर्वतेशशमानायत्वांस्तुवतेवाघतेयज्ञनिर्वाहकाययजमानाय पृथु प्रभूतं चन्द्रमाह्लादकारिरत्नमुत्तमंधनं अवसे रक्षणायभर आहर प्रयच्छेत्यर्थः ॥ सुप्रणीतिः णीञ्प्रापणे

Funding by IKS-MoE

कर्मणिक्तिन् तादौचनितिकृतीतिअनन्तरप्रशब्दस्योदात्तत्वम् । पृथुश्चन्द्रमित्यत्रसंहितायां ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रेइतिसुडागमः श्चुत्वेनशकारः ॥ १३ ॥

अथचतुर्दशी—

अधा॑ह॒यद्व॒यम॑ग्नेत्वा॒याप॒ड्भिर्हस्ते॑भिश्चकृ॒मात॒नूभि॑ः ।
रथं॒नक्रन्तो॒अप॑साभु॒रिजो॑र्ऋ॒तंये॑मुःसु॒ध्य॑आशुषा॒णाः ॥ १४ ॥

अध॑ । ह॒ । यत् । व॒यम् । अ॒ग्ने॒ । त्वा॒ऽया । प॒ट्ऽभिः । हस्ते॑भिः ।
च॒कृ॒म । त॒नूभि॑ः । रथ॑म् । न । क्रन्त॑ः । अप॑सा । भु॒रिजो॑ः । ऋ॒तम् ।
ये॒मु॒ः । सु॒ऽध्य॑ः । आ॒शु॒षा॒णाः ॥ १४ ॥

हेअग्ने अधह अथखलु वयंत्वाया त्वत्कामनया पड्भिः पादैःहस्तेभिः हस्तैस्तनूभिरन्यैश्चावयवैश्चकृम यत्यस्मात्कारणात् कर्मसिद्ध्यर्थं त्वामुपपादयामः तस्मात्सुध्यः सुकर्माणः आशुषाणाः कर्माणिव्याप्नुवन्तः तेङ्गिरसः ऋतं सत्यभूतं त्वांभुरिजोः बिभ्रतःकर्मकरणसामर्थ्यंपदार्थान्वेतिभुरिजौ बाहू तयोःअपसामन्थनाख्येनकर्मणायेमुः उद्यच्छन्ति तत्रदृष्टान्तः— रथंन यथा क्रन्तः कारवः शिल्पिनः क्रामन्तोध्वगावाहस्तयोर्यथारथमुद्यच्छन्तितद्वत् यद्वा भुरिजोः देवान्मनुष्यांश्च बिभृतइतिभुरिजौ द्यावापृथिव्यौ तयोर्मध्ये अपसापरिचरणकर्मणासत्यभूतंतमग्निं येमुरुद्यच्छन्ति ॥ अध संहितायांनिपातस्यचेतिदीर्घः । क्रंतः करोतेः शतरि बहुलंछन्दसीतिविकरणस्यलुक् प्रत्ययस्वरः । भुरिजोः डुभृञ्धारणपोषणयोः भृञउच्चेतीजिप्रत्ययेधातोर्ऋकारस्यरपरः प्रत्ययस्वरः ॥ १४ ॥

अथपञ्चदशी—

अधा॑मा॒तुरु॒षस॑ःस॒प्तविप्रा॒जाये॑महिप्रथ॒मावे॒धसो॒नॄन् ।
दि॒वस्पु॒त्राअङ्गि॑रसोभवे॒माद्रिं॑रुजेमध॒निनं॑शु॒चन्त॑ः ॥ १५ ॥

अध॑ । मा॒तुः । उ॒षस॑ः । स॒प्त । विप्रा॑ः । जाये॑महि । प्र॒थ॒माः ।
वे॒धस॑ः । नॄन् । दि॒वः । पु॒त्राः । अङ्गि॑रसः । भ॒वे॒म॒ । अद्रि॑म् ।
रु॒जे॒म॒ । ध॒निन॑म् । शु॒चन्त॑ः ॥ १५ ॥

Funding by IKS-MoE

वामदेवान्यैःषड्भिरङ्गिरोभिःसहब्रूते अधापिच मातुरुषसःसकाशात्सप्त सप्तसंख्याकाविप्राःप्राज्ञावयंस्मः प्रथमाःश्रेष्ठावयंवेधसोऽग्नेःपरिचारकान्नॄन्वेधसोविधातॄन्रश्मीन्वाजायेमहि वयंजनयामः दिवोद्योतमानस्यादित्यस्यपुत्रावयं अङ्गिरसोभवेम भूतिमन्तःस्याम शुचन्तोदीप्यमानावयंधनिनमुदकवन्तमद्रिंमेघंरुजेम वर्षार्थंभिद्याम यद्वा धनिनंपणिनामकासुरापहृतगोधनयुक्तमद्रिंपर्वतंरुजेम अङ्गिरसामादित्यपुत्रत्वमेवमाम्नायते–तस्ययद्रेतसःप्रथममुददीप्यततदसावादित्योभवदित्युपक्रम्ययेङ्गाराआसंस्तेङ्गिरसोभवन्निति ॥ जायेमहि जनीप्रादुर्भावे लिङि ज्ञाजनोर्जेतिजादेशः । वेधसः डुधाञ्धारणपोषणयोरित्यस्माद्विधाञोवेधचेत्यसिप्रत्ययः धातोर्वेधइत्यादेशः । दिवस्पुत्राइत्यत्र संहितायांषष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् । रुजेम रुजोभंगे अदादिः लिङिरूपम् ॥ १५ ॥

॥ इतितृतीयस्यचतुर्थेष्टादशोवर्गः ॥ १८ ॥

अथषोडशी–

अ॒धा॒यथा॑नःपि॒तरः॒परा॑सःप्र॒त्नासो॑अग्नऋ॒तमा॑शु॒षा॒णाः ।
शु॒चीद॑य॒न्दीधि॑तिमुक्थ॒शा॒सः॒क्षामा॑भि॒न्दन्तो॑अरु॒णीरप॑व्रन् ॥१६॥

अध॑ । यथा॑ । नः॒ । पि॒तरः॑ । परा॑सः । प्र॒त्नासः॑ । अ॒ग्ने॒ । ऋ॒तम् ।
आ॒शु॒षा॒णाः । शुचि॑ । इत् । अ॒य॒न् । दीधि॑तिम् । उ॒क्थ॒ऽशसः॑ ।
क्षाम॑ । भि॒न्दन्तः॑ । अ॒रु॒णीः । अप॑ । व्र॒न् ॥ १६ ॥

हेअग्ने अधापिच परासःश्रेष्ठाः प्रत्नासःपुराणाः ऋतंसत्यभूतं यज्ञं यथायथावदाशुषाणाः अश्नुवानानोऽस्माकंपितरोङ्गिरसः शुचिदीप्तंस्थानमयन् अगच्छन् तथा दीधितिं तेजश्चागच्छन् किंच उक्थशासः उक्थानांशस्त्राणांशंसितारः क्षाम क्षयकारणंतमःपापंवा भिन्दन्तोविनाशयन्तोङ्गिरसः अरुणीः अरुणवर्णाःपणिभिरपहृतागाः उषसोवा अपव्रन् अपावृण्वन्प्रकाशितवन्तइत्यर्थः ॥ अयन् इण्गतौ लङि इणोयणितियण् व्यत्ययेन अडागमः । दीधितिं दीधीङ्दीप्तिदेवनयोरित्यस्मात्क्तिनिह्रस्वश्छान्दसः नित्त्वादाद्युदात्तः । उक्थशासः उक्थशब्देउपपदे शंसुस्तुतावित्यस्मान्मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्निति ण्विन् नकारलोपश्चनिपातनादेव पदकालेह्रस्वश्छान्दसः । अरुणीः गौरादिङीषन्तः एकादेशस्वरः । व्रन् वृणोतेर्लुङि मन्त्रेघसेत्यादिनाच्लेर्लुक् निघातः ॥ १६ ॥

---

१ ऐ० ब्रा० ३. ३४. ।

आग्रयणे आग्नेन्द्रस्यहविषःसुकर्माणइतियाज्या सूत्रितश्च—सुकर्माणःसुरुचोदेवयन्तोविश्वेदेवासआगतेति ।

सैषासप्तदशी—

सु॒कर्मा॑णःसु॒रुचो॑दे॒व॒यन्तो॒यो॒नदे॒वाजनि॑मा॒धम॑न्तः ।
शु॒चन्तो॑अ॒ग्निंव॑वृ॒धन्त॒इन्द्र॑मू॒र्वंगव्यं॑परि॒षद॑न्तोअग्मन् ॥ १७ ॥

सु॒ऽकर्मा॑णः । सु॒ऽरुच॑ः । दे॒व॒ऽयन्त॑ः । अय॑ः । न । दे॒वाः । जनि॑म ।
धम॑न्तः । शु॒चन्त॑ः । अ॒ग्निम् । व॒वृ॒धन्त॑ः । इन्द्र॑म् । ऊ॒र्वम् । गव्य॑म् ।
प॒रि॒ऽसद॑न्तः । अ॒ग्म॒न् ॥ १७ ॥

सुकर्माणः सुष्ठु अनुष्ठितयागादिकर्माणः सुरुचः शोभनदीप्तयः देवयन्तोदेवान्कामयमानाः देवाः देवनशीलाः स्तोतारः जनिम स्वकीयंमानुषंजन्म धमन्तः यागादिलक्षणेनकर्मणा निर्मलीकुर्वन्तः तत्रदृष्टान्तः—अयोन यथाकर्माणःअयोभस्त्रेणधमन्तितद्वत् तादृशाअग्निंशुचन्तोहविर्भिर्दीपयन्तइन्द्रंववृधन्तः सोमेनस्तुत्यावावर्धयन्तः अङ्गिरसः परिषदन्तः परितःसीदन्तः सन्तः ऊर्वं महान्तं गव्यं गोसंघं अग्मन् प्राप्नुवन् ॥ सुकर्माणः सोर्मनसीइत्युत्तरपदाद्युदात्तत्वम् । धमन्तः ध्माशब्दाग्निसंयोगयोः शतरिपाघ्राध्मादिनाधमादेशः शपःपित्त्वादनुदात्तत्वे शतुर्लसार्वधातुकस्वरः । ववृधन्तः वृधुवर्धने व्यत्ययेनपरस्मैपदं शतरिशपःश्लुः । गव्यं गवांसमूहइत्यर्थे खलगोरथादितियः । अग्मन् गमेर्लुङि च्लेर्लुकिरूपम् ॥ १७ ॥

अथाष्टादशी—

आयू॒थेव॑क्षु॒मति॑प॒श्वोअ॑ख्यद्दे॒वानां॒यज्जनि॒मान्त्यु॑ग्र ।
मर्ता॑नांचिदु॒र्वशी॑रकृप्रन्वृ॒धेचि॑द॒र्यउप॑रस्या॒योः ॥ १८ ॥

आ । यू॒थाऽइ॑व । क्षु॒ऽमति॑ । प॒श्वः । अ॒ख्य॒त् । दे॒वाना॑म् । यत् ।
जनि॑मा । अन्ति॑ । उ॒ग्र॒ । मर्ता॑नाम् । चि॒त् । उ॒र्वशी॑ः । अ॒कृ॒प्र॒न् ।
वृ॒धे । चि॒त् । अ॒र्यः । उप॑रस्य । आ॒योः ॥ १८ ॥

Funding by IKS-MoE

उग्र तेजस्विन् हेअग्ने देवानामङ्गिरसांसम्बन्धियज्जनिम गोसंघमन्ति पर्वतस्यसमीपे आख्यत् आसमन्तादिन्द्रोपश्यत्। तत्रदृष्टान्तः—यूथेव यथापश्वः पशूनांगवांयूथानिक्षुमति अन्नवत्याढ्यगृहेवर्तमानानिपश्यन्तिजनास्तद्वत् यद्वा हेअग्ने तवपरिचारकोङ्गिरसोगणः देवानामिन्द्रादीनांयज्जनिम योयंजनः अन्तिमदन्तिके पश्वः पणिभिरपहृतान्पशूनाख्यत् समन्तात्पश्यति तत्रदृष्टान्तः—यथाक्षुमतिशब्दंकुर्वाणेगवांयूथायूथेपशून्पश्यन्तितद्वत् मर्तानांचित् मनुष्याणांउर्वशीः ऊरुभ्यामश्नुवानाः [1]ऊरुभ्यामश्नुतइतियास्कः। प्रजाः अकृपन् ताभिरानीताभिर्गोभिः कृप्ताः समर्थाअभवन् चिदपिच अर्यःस्वामिलब्धगोधनउपरस्यउप्तस्यनिषिक्तस्यापत्यस्यवृधेवर्धनायसमर्थोभवति तथा आयोर्मनुष्यस्य भृत्यादेश्चपोषणेसमर्थोभवति ॥ यूथेव शसःसप्तम्यावाडादेशः । क्षुमति क्षुदित्यन्ननाम यद्वा टुक्षुशब्दे भावेक्विप् छान्दसस्तकारलोपः तदस्यास्तीतिमतुप् ह्रस्वनुड्भ्यांमतुबिति मतुपउदात्तत्वम्। अख्यत् ख्याप्रकथने लुङिच्लेरस्यतिवक्तिख्यातिभ्योङित्यङादेशः आतोलोपः । जनोप्रादुर्भावे हृजनिभ्यामिमनिन्नितिइमनिन्प्रत्ययः नित्त्वादाद्युदात्तः । अकृपन् कृपूसामर्थ्ये लङिबहुलंछन्दसीतिविकरणस्यलुक् रुडागमः ॥ १८ ॥

अथैकोनविंशी—

अक॑र्म॑ते॒स्वप॑सोअभूमऋ॒तम॑वस्रन्नु॒षसो॑विभा॒तीः ।
अनू॑नम॒ग्निंपु॑रु॒धासु॑श्च॒न्द्रंदे॒वस्य॒मर्मृ॑जत॒श्चारु॒चक्षुः॑ ॥ १९ ॥

अक॑र्म । ते॒ । सु॒ऽअप॑सः । अ॒भू॒म॒ । ऋ॒तम् । अ॒व॒स्र॒न् । उ॒षसः॑ ।
वि॒ऽभा॒तीः । अनू॑नम् । अ॒ग्निम् । पु॒रु॒ध । सु॒ऽच॒न्द्रम् । दे॒वस्य॑ ।
मर्मृ॑जतः । चारु॑ । चक्षुः॑ ॥ १९ ॥

हेअग्ने तेतव परिचरणमकर्म अकुर्म तेनकर्मणास्वपसःशोभनकर्माणोभूम विभातीः व्युच्छन्त्यउषसः ऋतंतेजोवस्रन् आच्छादयंति धारयन्तीत्यर्थः। तथा ताउषसः अनूनं संपूर्णं पुरुधा बहुधा सुचन्द्रं सुष्ठुआह्लादकारिणं यद्वा सुहिरण्यमग्निंधारयन्ति किञ्च देवस्यद्योतमानस्यतवचारुमनोहरंचक्षुःतेजोमर्मृजतः परिचरन्तोवयंस्वपसोऽभूमेतिपूर्वेणान्वयः ॥ अकर्म करोतेर्लङि बहुलंछन्दसीतिविकरणस्यलुक् । मर्मृजतः मृजूष्शुद्धौ यङ्लुकि रुग्रिकौचलुकीत्यभ्यासस्यरुगागमः शतरि नाभ्यस्ताच्छतुरितिनुमभावः अभ्यस्तस्वरः ॥ १९ ॥

---

[1] नि० ५. १३.

Funding by IKS-MoE

अथविंशी—

ए॒ताते॑अग्नउ॒चथा॑निवे॒धोवो॑चामक॒वये॒ताजु॑षस्व ।
उच्छो॑चस्वकृणु॒हिवस्य॑सोनोम॒होरा॒यःपु॑रुवार॒प्रय॑न्धि ॥२०॥१९॥

ए॒ता । ते॒ । अ॒ग्ने॒ । उ॒चथा॑नि । वे॒ध॒ः । अवो॑चाम । क॒वये॑ । ता ।
जु॒ष॒स्व॒ । उत् । शो॒च॒स्व॒ । कृ॒णु॒हि । वस्य॑सः । न॒ः । म॒हः ।
रा॒यः । पु॒रु॒ऽवा॒र॒ । प्र । य॒न्धि॒ ॥ २० ॥

वेधः विधातः हेअग्ने कवयेमेधाविने तेतुभ्यं एता एतान्युचथानि उक्थानिशस्त्राण्यवोचाम त्वं तातानिजुषस्वसेवस्व किञ्च त्वंउच्छोचस्व उद्दीप्यस्व नोस्मान्वस्यसः अतिशयेन धनयुक्तान्कृणुहिकुरु तदेवोच्यते—पुरुवार पुरुभिर्बहुभिर्वरणीय महोरायोमहद्धनंप्रयन्धि अस्मभ्यंप्रयच्छ ॥ अवोचाम वचपरिभाषणे लुङि च्लेरङादेशः पादादित्वादनिघातः । कृणुहि कृविहिंसाकरणयोरित्यस्यलोटिरूपं तिङउत्तरत्वादनिघातः । वस्यसः वसुमच्छब्दादीयसुनि विन्मतोर्लुगितिमतुपोलुकिटिलोपेचकृते ईकारलोपश्छान्दसः । यन्धि यमेर्लोटि बहुलंछन्दसीतिविकरणस्यलुक् वाछन्दसीतिहेर्विकल्पेनपित्त्वादङितश्चेतिधिरादेशः ॥ २० ॥

॥ इतितृतीयस्यचतुर्थेएकोनविंशोवर्गः ॥ १९ ॥

आवोराजानमितिषोडशर्चंतृतीयंसूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं आवःषोळशेत्यनुक्रान्तं । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगउक्तः ।

तथाप्रथमा—

आवो॒राजा॑नमध्व॒रस्य॑रु॒द्रंहोता॑रंसत्य॒यजं॒रोद॑स्योः ।
अ॒ग्निंपु॒रात॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरूप॒मव॑सेकृणुध्वम् ॥ १ ॥

आ । व॒ः । राजा॑नम् । अ॒ध्व॒रस्य॑ । रु॒द्रम् । होता॑रम् । स॒त्य॒ऽयज॑म् ।
रोद॑स्योः । अ॒ग्निम् । पु॒रा । त॒न॒यि॒त्नोः । अ॒चित्ता॑त् । हिर॑ण्यऽरूपम् ।
अव॑से । कृ॒णु॒ध्व॒म् ॥ १ ॥

हेऋत्विग्यजमानाः अध्वरस्ययज्ञस्यराजानमधिपतिं होतारं देवानामाह्वातारं रुद्रं रोरूयमाणं द्रवन्तं शत्रून्रोदयन्तंवा यद्वा एषावाअग्नेस्तनूर्यद्रुद्रंइति । रुद्रात्मकं रोदस्योर्द्यावापृथिव्योःसत्ययजं सत्यस्यान्नस्यदातारं यद्वा सत्ययजंसत्येनहविषादेवान्यजन्तं यद्वा रोदस्योर्व्याप्यवर्तमानंहिरण्यरूपंसुवर्णप्रभं एवंविधमग्निं वोयुष्माकं अवसे रक्षणाय तनयित्नोस्तनयित्नुरशनिःसह्याकस्मिकःतत्सदृशादचित्तात् नविद्यतेचित्तंयस्मिन्तदचित्तं चित्तोपलक्षितसर्वेन्द्रियोपसंहारोमरणमितियावत् तन्मरणात्पुराप्रागेव आकृणुध्वं यूयंसमन्ताद्धविर्भिरग्निंभजध्वम् ॥ रुद्रं रोदयतेरोदेर्णिलुक्चेतिरक्प्रत्ययः । तनयित्नोः तनिःशब्दार्थः चुरादिरदन्तः स्तनिशुधिपुषिगमिमनिभ्योणेरित्नुजितिइत्नुच्प्रत्ययः चित्स्वरेणान्तोदात्तः सुपासहैकादेशेएकादेशस्वरः । कृणुध्वं कृविर्हिंसाकरणयोः लोटिरूपम् ॥ १ ॥

अथद्वितीया—

अ॒यंयोनि॑श्चकृ॒मायंव॒यन्ते॑जा॒येव॒पत्य॑उश॒तीसु॒वासा॑ः ।
अ॒र्वा॒ची॒नःपरि॑वीतो॒निषी॑दे॒माउ॑तेस्वपाकप्रती॒चीः ॥ २ ॥

अ॒यम् । योनि॑ः । च॒कृ॒म । यम् । व॒यम् । ते॒ । जा॒याऽइ॑व । पत्ये॑ ।
उ॒श॒ती इति॑ । सु॒ऽवासा॑ः । अ॒र्वा॒ची॒नः । परि॑ऽवीतः । नि । सी॒द॒ ।
इ॒माः । ऊँ॒ इति॑ । सु॒ऽअ॒पा॒क॒ । प्र॒ती॒चीः ॥ २ ॥

हेअग्ने त्वदर्थं यमुत्तरवेदिलक्षणंप्रदेशंवयंचकृम कुर्मः अयंयोनिः तवस्थानंभवति तत्रदृष्टान्तः—जायेव यथापत्येउशतीपतिंकामयमानासुवासाःशोभनवस्त्रोपेताजायास्वात्मसमीपेतस्यस्थानंकरोतितद्वत् हेस्वपाक स्वपस्क सुकर्मन् अग्ने त्वंपरिवीतः यष्टव्यदेवैस्तेजोभिर्वापरिवीतः अर्वाचीनोऽस्मदभिमुखःसन् निषीदोत्तरवेद्यामुपविश तत्रस्थितस्यतेतव इमा ज्वालाःस्तुतयोवाप्रतीचीः त्वदभिमुखाःप्रवर्तन्ते ॥ चकृम करोतेर्लिटिरूपं वाक्यभेदान्निघाताभावः । अर्वाचीनः विभाषांचेरदिगितिखः । परिवीतः व्येञ्संवरणे कर्मणिनिष्ठा यजादित्वात्संप्रसारणं गतिरनन्तरइतिगतेःस्वरः ॥ २ ॥

अथतृतीया—

आ॒शृ॒ण्व॒तेअदृ॑पिताय॒मन्म॑नृ॒चक्ष॑सेसुमृळी॒काय॑वेधः ।
दे॒वाय॑श॒स्तिम॒मृता॑यशंसग्रावे॑वसोता॑मधु॒षुद्यमी॒ळे ॥ ३ ॥

आ॒ऽश्रृ॒ण्व॒ते । अदृ॑पिताय । मन्म॑ । नृ॒ऽचक्ष॑से । सु॒ऽमृ॒ळी॒काय॑ ।
वे॒ध॒ः । दे॒वाय॑ । श॒स्तिम् । अ॒मृता॑य । शं॒स॒ । ग्रावा॑ऽइव । सोता॑ ।
म॒धु॒ऽसुत् । यम् । ई॒ळे ॥ ३ ॥

वेधः स्तोत्राणांकर्तः हेस्तोतः आश्रृणवते स्तोत्राकर्णनपराय अदृपिताय अदृप्ताय अप्रमत्ताय नृचक्षसे नृणांद्रष्ट्रे सुमृळीकाय सुसुखाय अमृताय मरणधर्मरहितायदेवाय तस्माअग्नयेमन्म स्तोत्रं शस्तिं शस्त्रंच शंस मधुषुत् मदकरस्यसोमस्यसोता तत्रदृष्टान्तः— ग्रावेव यथाग्रावासोमस्यसोतातद्वत् सोमाभिषवंकुर्वाणोयजमानोयमग्निमीळेस्तौति तस्मैशंसेतिसमन्वयः यद्वा मधुषुत् सोमसुद्यजमानः अग्निमीळेस्तौति तत्रदृष्टान्तः—यथाग्रावासोमस्यसोताशब्दं करोति [1]प्रैतेवदन्तुप्रवयंवदामग्रावभ्यइत्यत्रग्राव्णांकर्तृत्वंश्रुतमिति ॥ आश्रृण्वते शतुरनुम्नतिविभक्तेरुदात्तत्वम् । ईळे ईडस्तुतौ लटिलोपस्तआत्मनेपदेष्वितितल्लोपः यद्वा लिटितशब्दस्यैशादेशेकृतेरूपम् ॥ ३ ॥

अथचतुर्थी—

त्वंचि॑न्न॒ःशम्या॑अग्ने॒अ॒स्याऋ॒तस्य॑बोध्यृतचित्स्वा॒धीः ।
क॒दात॑उ॒क्थास॑ध॒माद्या॑निक॒दाभ॑वन्तिस॒ख्यागृ॒हेते॑ ॥ ४ ॥

त्वम् । चि॒त् । न॒ः । शम्यै॑ । अ॒ग्ने॒ । अ॒स्याः । ऋ॒तस्य॑ । बो॒धि॒ ।
ऋ॒त॒ऽचि॒त् । सु॒ऽआ॒धीः । क॒दा । ते॒ । उ॒क्था । स॒ध॒ऽमाद्या॑नि ।
क॒दा । भ॒व॒न्ति॒ । स॒ख्या । गृ॒हे । ते॒ ॥ ४ ॥

हेअग्ने त्वंचित् त्वमेव शम्यै शमीशब्दःकर्मनाम अस्याःशम्यै शम्याःनोऽस्मत्संबन्धिनोस्यकर्मणःदेवताभवसि हेऋतचित् सत्यज्ञ हेअग्ने स्वाधीः सुकर्मासुध्यानोवात्वं ऋतस्यबोधि अस्मदीयंस्तोत्रंबुध्यस्व तेतव सधमाद्यानि सहमदनिमित्तानि उक्था शस्त्राणि कदाकस्मिन्कालेभवन्ति भविष्यन्ति तथास्मदीयेगृहे तेत्वयासहसख्यासख्यानिकदाभविष्यन्ति ॥ सधमाद्यानि मादयतेर्ण्यन्तस्याचोयदितियत् सधमादस्थयोरिति सहस्यसधादेशः । भवन्ति विभाषाकदाकर्ह्योरितिभविष्यदर्थेलट् ॥ ४ ॥

---

[1] ऋ० सं० ८. ४. २९. ।

Funding by IKS-MoE

अथपञ्चमी–

क॒थाह॒तद्वरु॑णाय॒त्वम॑ग्नेक॒थादि॒वेग॑र्हसे॒कंन॒आगः॑ ।
क॒थामि॒त्राय॑मी॒ळ्हुषे॑पृथि॒व्यैब्रव॒ःकद॑र्य॒म्णेकद्भगा॑य ॥ ५ ॥ २०॥

क॒था । ह॒ । तत् । वरु॑णाय । त्वम् । अ॒ग्ने॒ । क॒था । दि॒वे ।
ग॒र्ह॒से॒ । कत् । न॒ः । आगः॑ । क॒था । मि॒त्राय॑ । मी॒ळ्हुषे॑ । पृ॒थि॒व्यै ।
ब्रवः॑ । कत् । अ॒र्य॒म्णे । कत् । भगा॑य ॥ ५ ॥ २० ॥

हेअग्ने त्वंतदस्मदीयं पापं वरुणायकथागर्हसे केनहेतुनागर्हापूर्वमावेदयेः हेतिपूरणः दिवे द्युलोकायद्योतमानायसूर्यायवाकथा कथंतत्पापमावेदयेः नोऽस्माकमागस्तत्पापंकत् किमस्ति त्वत्परिचरणान्नास्तीत्यर्थः तथा मीळ्हुषेअभिमतफलसेक्त्रेमित्राय पृथिव्यैच कथाब्रवः कथमागोब्रूयाः अर्यम्णेदेवायकत्कथं भगाय एतन्नामकायचदेवायकत्कथंब्रूयाः ॥ कथा किंशब्दात्थाहेतौचच्छन्दसीतिथाप्रत्ययः प्राग्दिशोविभक्तिरितिविभक्तिसंज्ञायांकिमःकइतिकादेशः। मीळ्हुषे मिहसेचने क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातितः। ब्रवः ब्रूञ्व्यक्तायांवाचि लेटि लेटोडाटावित्यडागमः। पादादित्वादनिघातः आगमस्यानुदात्तत्वाद्धातुस्वरः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेविंशोवर्गः ॥ २० ॥

अथषष्ठी–

कद्धिष्ण्या॑सुवृधसा॒नोअ॑ग्ने॒कद्वाता॑य॒प्रत॑वसेशुभं॒ये ।
परि॑ज्मने॒नास॑त्याय॒क्षेब्रव॒ःकद॑ग्नेरु॒द्राय॑नृ॒घ्ने ॥ ६ ॥

कत् । धिष्ण्या॑सु । वृ॒ध॒सा॒नः । अ॒ग्ने॒ । कत् । वाता॑य । प्रऽत॑वसे ।
शु॒भ॒म्ऽये । परि॑ऽज्मने । नास॑त्याय । क्षे । ब्रवः॑ । कत् ।
अ॒ग्ने॒ । रु॒द्राय॑ । नृ॒ऽघ्ने ॥ ६ ॥

हेअग्ने धिष्ण्यासु आग्नीध्रीयादिधिष्ण्येषु वृधसानःघृताद्याहुतिभिर्वर्धमानस्त्वं कत्कथंब्रूयाः प्रतवसे प्रकृष्टबलाय शुभंये शुभस्यप्रापयित्रे परिज्मने परितोगन्त्रे नासत्याय सत्यस्यनेत्रे यद्वा नविद्यतेसत्यंयस्यतस्मै वाताय वायवे यद्वा नासत्यायेतिवचनव्यत्ययः नासत्याभ्यामश्विभ्यांक्षे क्षेतिपृथिवीमाह क्षियन्तिनिवसन्त्यस्यांप्राणिनइतितस्यैक्षेपृथिव्यैच

कत्कथंब्रूयाः हेअग्ने नृघ्ने नृणांपापकृतांहन्त्रे रुद्रायदेवाय कत्कथमागोब्रवोब्रूयाः ॥ वृधसानः वृधुवर्धने असानजित्यनुवृत्तौ ऋंजिवृधिमन्दिसहिभ्यःकिदित्यसानच्प्रत्ययः कित्त्वादगुणः चित्त्वादन्तोदात्तः। शुभंये याप्रापणेविच् तत्पुरुषेकृतिबहुलमितिद्वितीयायाअलुक् कृत्स्वरः। क्षे क्षिनिवासगत्योः अन्येभ्योपिदृश्यतइतिअधिकरणेडः ततष्टाप् चतुर्थ्येकवचने आतोधातोरित्यत्रातइतियोगविभागादाकारलोपः । नृघ्ने हनहिंसागत्योः बहुलंछन्दसीति क्विप् ॥ ६ ॥

अथसप्तमी–

क॒थाम॒हेपु॑ष्टिंभ॒राय॑पू॒ष्णेकद्रु॒द्राय॒सुम॑खायह॒वि॒र्दे॑ ।
कद्विष्ण॑वउरुगा॒याय॒रेतो॒ब्रव॒ःकद॒ग्नेशर॑वेबृह॒त्यै ॥ ७ ॥

क॒था । म॒हे । पु॒ष्टि॒म्ऽभ॒राय॑ । पू॒ष्णे । कत् । रु॒द्राय॑ ।
सु॒ऽम॑खाय । ह॒वि॒ःऽदे । कत् । विष्ण॑वे । उ॒रु॒ऽगा॒याय॑ ।
रेत॑ः । ब्रव॑ः । कत् । अ॒ग्ने । शर॑वे । बृ॒ह॒त्यै ॥ ७ ॥

हेअग्ने महे महते पुष्टिंभराय पुष्टिधारकाय पूष्णे एतन्नामकायदेवाय कथा केनहेतुना पापंब्रवीथाः सुमखाय सुपूजनीयाय सुयज्ञायवा हविर्दे अग्निरूपेणदेवानांहविर्दात्रे यद्वा स्विष्टकृत्त्वात् हविषोदात्रेरुद्रायकत्कथंब्रूयाः तथा उरुगायाय उरुभिर्बहुभिर्गीयमानाय यद्वा प्रभूतकीर्तयेजिष्णवेरेतःक्षयहेतुपापंकत्कथंवदेः शरवे शृणातिपक्काओषधीरितिशरुःशरत्संवत्सरः यद्वा हिंसिका निर्ऋतिः बृहत्यैमहत्यैशरवे निर्ऋत्यैवाकत्कथंपापंब्रवः ब्रूयाः ॥ पुष्टिंभराय डुभृञ्धारणपोषणयोः संज्ञायांभृतॄवृजीत्यादिनाखच् अरुर्द्विषदजन्तस्यमुमितिपूर्वपदस्यमुमागमः चित्त्वादन्तोदात्तः समासेकृत्स्वरः । हविर्दे अनुदात्तस्यचयत्रोदात्तलोपइतिसुपउदात्तत्वम्। शरवे शॄहिंसायां शॄस्वृस्निहित्रप्यसीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तः ॥ ७ ॥

अथाष्टमी–

क॒थाशर्धा॑यम॒रुतां॑मृ॒ताय॑क॒थासू॒रेबृ॑ह॒तेपृ॒च्छ्यमा॑नः ।
प्रति॑ब्र॒वोदि॑तयेतु॒राय॒साधा॑दि॒वोजा॑तवेदश्चिकि॒त्वान् ॥ ८ ॥

कथा । शर्धाय । मरुताम् । ऋताय । कथा । सूरे । बृहते ।
पृच्छ्यमानः । प्रति । ब्रवः । अदितये । तुराय । साध । दिवः ।
जातऽवेदः । चिकित्वान् ॥ ८ ॥

हेअग्ने ऋताय गन्त्रे सत्यभूतायवामरुतांशर्धाय बलभूताय गणाय कथा केनहेतुना मदीयमागःप्रतिब्रूयाः तेनपृच्छ्यमानःसन् तस्मैबृहतेमहतेसूरेसूर्यायकथाकथंवदेः तथा अदितये देव्यै तुराय त्वरितगमनायवायवे अदितये अदीनायतुरायवाप्रतिब्रवः मदीयमागःकथंब्रूयाः यस्मादेवंतस्मात् हेजातवेदोऽग्ने चिकित्वान् तत्सर्वंजानानस्त्वं दिवोदीप्तान्देवान्साध साधय गच्छ यद्वा दिवोद्युलोकस्ययज्ञवहनलक्षणंकार्यंसाध कुरु ॥ सूरे सर्वविधीनां छन्दसिविकल्पितत्वात् ङेर्यत्वाभावः अतोगुणेइतिपररूपत्वम् । पृच्छ्यमानः प्रच्छज्ञीप्सायां कर्मणियक् ग्रहिज्यादिनासंप्रसारणं शानचोलसार्वधातुकानुदात्तत्वेयक्स्वरः । साध राधसाधसंसिद्धौ अन्तर्भावितण्यर्थस्यलोटिव्यत्ययेनशप् ॥ ८ ॥

अथनवमी—

ऋतेनऋतंनियतमीळआगोरामासचामधुमत्पक्कमग्ने ।
कृष्णासतीरुशताधासिनैषाजामर्येणपयसापीपाय ॥ ९ ॥

ऋतेन । ऋतम् । निऽयतम् । ईळे । आ । गोः । आमा । सचा ।
मधुऽमत् । पक्कम् । अग्ने । कृष्णा । सती । रुशता । धासिना ।
एषा । जामर्येण । पयसा । पीपाय ॥ ९ ॥

हेअग्ने ऋतेनसत्यभूतेनयज्ञेननियतमनुस्यूतमृतमुदकं गोर्धेनोःपयईळे आयाचे सान्नाय्यादिहविरर्थंगव्यंपयः त्वांयाचइत्यभिप्रायः आमाअपक्का सा गोः मधुमन्माधुर्योपेतंपक्कंपयः सचासहधारयति कृष्णा कृष्णवर्णासतीएषागौः रुशतीश्वेतेनधासिना प्राणिनां धारकेणजामर्येणजायन्तइतिजाःप्रजास्ताजामर्येणअमरणनिमित्तेनतेनपयसापीपाय प्रजाःप्यायययति तवैषमहिमायद्रसान्परिणामयन्नेवंकरोषि ॥ पीपाय प्यायतेर्लिटि लिड्यङोश्चेतिपीभावः ॥९॥

अथदशमी—

ऋ॒तेन॒हिष्मा॑वृष॒भश्चि॑द॒क्तःपुमाँ॑अ॒ग्निःपय॑सापृ॒ष्ठ्ये॑न ।
अस्प॑न्दमानोअचरद्वयो॒धावृषा॑शु॒क्रंदु॑दुहे॒पृश्नि॒रूध॑ः ॥१०॥२१॥

ऋ॒तेन॑ । हि । स्म॒ । वृ॒ष॒भः । चि॒त् । अ॒क्तः । पुमा॑न् । अ॒ग्निः ।
पय॑सा । पृ॒ष्ठ्ये॑न । अस्प॑न्दमानः । अ॒च॒र॒त् । व॒य॒ःऽधाः ।
वृषा॑ । शु॒क्रम् । दु॒दु॒हे॒ । पृश्नि॑ः । ऊध॑ः ॥ १० ॥ २१ ॥

वृषभः अभिमतफलवर्षकःपुमान्श्रेष्ठःसोग्निः ऋतेनसत्यभूतेनपृष्ठ्येन धारकेणपयसा अक्तः सिक्तोभवति हिस्मचित् त्रयःपूरणाः वयोधाःअन्नदः सोग्निः अस्पंदमानः एकत्रावस्थितः सन् एवाचरत् सर्वत्रतेजसाचरति तथा वृषा अपांवर्षकः पृश्निःसूर्यः शुक्रंपयः ऊधोन्तरिक्षंमेघंवादुदुहे दोग्धि ॥ अक्तः अञ्जूव्यक्तिम्रक्षणगतिषु कर्मणिनिष्ठा । दुदुहे द्विकर्मकोयंधातुः । ऊधः अकथितंचेतिकर्मसंज्ञा ॥ १० ॥

॥ इतितृतीयस्यचतुर्थेएकविंशोवर्गः ॥ २१ ॥

अथैकादशी—

ऋ॒तेनाद्रिं॒व्य॑सन्भि॒दन्त॒ःसमङ्गि॑रसोनवन्त॒गोभि॑ः ।
शु॒नंनर॒ःपरि॑षदन्नु॒षास॑मा॒विःस्व॑रभवज्जा॒तेअ॒ग्नौ ॥ ११ ॥

ऋ॒तेन॑ । अद्रि॑म् । वि । अ॒स॒न् । भि॒दन्त॑ः । सम् । अङ्गि॑रसः ।
न॒व॒न्त॒ । गोभि॑ः । शु॒नम् । नर॑ः । परि॑ । स॒द॒न् । उ॒षस॑म् ।
आ॒विः । स्व॑ः । अ॒भ॒व॒त् । जा॒ते । अ॒ग्नौ ॥ ११ ॥

अङ्गिरसः मेधातिथिप्रभृतयः ऋतेनयज्ञेनहेतुनागवांनिरोधकमद्रिंपर्वतं भिदन्तोविदारयन्तःसन्तः व्यसन् व्यक्षिपन् ततस्तेगोभिः संनवन्त समगच्छन् नरः कर्मणांनेतारः ते शुनं सुखेनउषसंपरिसदन्परितः प्राप्नुवन् ततः स्वः सूर्योप्याविरभवत् सर्वमेतदग्नौत्वयिजातेमन्थनेन निष्पादितेसत्यभूदिति ॥ असन् अस्यतेर्लुङि च्लेरस्यतिवक्तीत्यादिनाअङादेशः अनित्यमागमानुशासनमितिथुगभावः ॥ ११ ॥

Funding by IKS-MoE

अथद्वादशी—

ऋ॒तस्य॑दे॒वीर॒मृता॒अमृ॑क्ता॒अर्णो॑भि॒रापो॒मधु॑मद्भिरग्ने ।
वा॒जीनसर्गे॑षुप्रस्तुभा॒नःप्रसद॒मित्स्रवि॑तवेदधन्युः ॥ १२ ॥

ऋ॒तेन॑ । दे॒वीः । अ॒मृताः॑ । अमृ॑क्ताः । अर्णः॑ऽभिः । आपः॑ ।
मधु॑मत्ऽभिः । अ॒ग्ने॒ । वा॒जी । न । सर्गे॑षु । प्र॒ऽस्तु॒भा॒नः । प्र ।
सद॑म् । इत् । स्रवि॑तवे । द॒ध॒न्युः ॥ १२ ॥

हेअग्ने अमृताः अमरणहेतवः अमृक्ताः रक्षःप्रभृतिभिरबाधिताः मधुमद्भिर्माधुर्योपेतैरर्णोभिरुदकैर्युक्तादेवीःदेव्योनद्यः ऋतेनसत्येनयज्ञेनवाहेतुना आपः आप्तव्याः सत्यः सदमिव सदैव स्रवितवे स्रवणायप्रदधन्युः प्रगच्छन्ति तत्रदृष्टान्तः—वाजीन यथासर्गेषुप्रेरणेषुप्रस्तुभानः प्रोत्साह्यमानोश्वःप्रगच्छतितद्वत् ॥ आपः आप्लृव्याप्तौ आप्नोतेःक्विप्ह्रस्वश्चेतिकर्मणिक्विप् अप्तृन्नित्यादिना जसिदीर्घः । प्रस्तुभानः स्तोभतिरर्चतिकर्मा ॥ १२ ॥

अथत्रयोदशी—

माकस्य॑य॒क्षंसद॒मिद्धु॒रोगा॒मावे॒शस्य॑प्रमिन॒तोमापेः ।
माभ्रातु॑रग्ने॒अनृ॑जोर्ऋ॒णं॑वेर्मा॑सख्यु॒र्दक्षं॑रि॒पोर्भु॑जेम ॥ १३ ॥

मा । कस्य॑ । य॒क्षम् । सद॑म् । इत् । हु॒रः । गाः । मा । वे॒शस्य॑ ।
प्र॒ऽमि॒न॒तः । मा । आ॒पेः । मा । भ्रातुः॑ । अ॒ग्ने॒ । अनृ॑जोः ।
ऋ॒णम् । वेः । मा । सख्युः॑ । दक्ष॑म् । रि॒पोः । भु॒जे॒म ॥ १३ ॥

हेअग्ने हुरोऽस्माकंहिंसकस्यकस्यचिदपिजन्तोर्यक्षं यज्ञं सदमित्सदैवमागाः कदाचिदपिमागच्छ प्रमिनतोहिंसकस्य वेशस्य प्रातिवेश्यस्य यज्ञंमागाः तथा आपेर्मज्ञातिरिक्तस्यबन्धोर्यज्ञमागच्छ तथा अनृजोः कुटिलचित्तस्यभ्रातुः ऋणंऋणवद्देयंहविःमावेः माकामयेथाः तथा वयमपि सख्युर्मित्रस्य रिपोः शत्रोर्दत्तंभोगसमर्थंधनंमाभुजेम नभुञ्जीमहि किन्तु त्वया दत्तंधनंभुञ्जीमहि ॥ हुरः हृप्रसह्यकरणे क्विप् बहुलंछन्दसीत्युत्वं सावेकाचइतिविभक्तेरुदात्तत्वम् । भुजेम भुजपालनाभ्यवहारयोः आशीर्लिङि व्यत्ययेनपरस्मैपदं लिङ्याशिष्यङित्यङ्प्रत्ययः ॥ १३ ॥

Funding by IKS-MoE

अथचतुर्दशी—

रक्षाणोअग्नेतवरक्षणेभीरारक्षाणःसुमखप्रीणानः ।
प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिचिद्वावृधानम् ॥ १४ ॥

रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः ।
प्रति । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः ।
महि । चित् । ववृधानम् ॥ १४ ॥

सुमख सुयज्ञ सुधनेतिवा हेअग्ने ररक्षाणं भृशमस्माकंरक्षिता प्रीणानः हविर्भिःप्रीतस्त्वंतवरक्षणेभिःत्वदीयैरवनैर्नोस्मान्रक्षपालय प्रतिस्फुर अस्मान्प्रतिदीप्यस्व वीळुदृढमंहःपापं विरुज विशेषेणनाशय किञ्च महिचित् महदपि वावृधानं वर्धमानं वृद्धंवा बाधकं रक्षोजहि ॥ णः नश्चधातुस्थोरुषुभ्यइतिसंहितायांणत्वम् । ररक्षाणः रक्षेर्यङ्लुकिचानशिरूपम् । जहि हन्हिंसागत्योः लोटि हन्तेर्जइतिजादेशः आभाच्छास्त्रीयसिद्धत्वादतोहेरितिलुङ्न भवति ॥ १४ ॥

अथपञ्चदशी—

एभिर्भवसुमनाअग्नेअर्कैरिमान्स्पृशमन्मभिःशूरवाजान् ।
उतब्रह्माण्यङ्गिरोजुषस्वसन्तेशस्तिर्देववाताजरेत ॥ १५ ॥

एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश ।
मन्मऽभिः । शूर । वाजान् । उत । ब्रह्माणि । अङ्गिरः । जुषस्व ।
सम् । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥

हेअग्ने एभिर्मदीयैरर्कैरर्चनीयैःशस्त्रैः सुमनाः शोभनमनस्कोभव हेशूर इमानस्मदीयान्हविर्लक्षणान्वाजान्मन्मभिःस्तोत्रैःसहस्पृश प्रतिगृहाण उतापिच अङ्गिरः अङ्गतिहवींषि प्राप्नोतीत्यङ्गिराअग्निः यद्वा येङ्गाराआसंस्तेङ्गिरसोभवन्नितिब्राह्मणं[1] । तेषामङ्गिरसांकारणत्वादग्नेरङ्गिरस्त्वं तत्कारणत्वेचमन्त्रः—येअङ्गिरसःसूनवस्तेअग्नेःपरिजज्ञिरे[2]इति । तादृश हेअ-

---

१ ऐ० ब्रा० ३. ३४. । २ ऋ० सं०८. २. १. ।

Funding by IKS-MoE

ग्ने ब्रह्माणि मन्त्रान्जुषस्व सेवस्व देववाता देवार्थंगता देवान्स्तोतुंप्राप्तेत्यर्थः तादृशी शस्तिः शंसनं तेत्वांसंजरेतसंवर्धयतु ॥ स्पृश स्पृशसंस्पर्शने तुदादिः । देववाता वागतिगन्धनयोः गत्यर्थाकर्मकेतिकर्तरिक्तः देवः पचाद्यजन्तः क्तेचेतिचतुर्थ्यंतस्यपदस्यप्रकृतिस्वरः ॥ १५ ॥

अथषोडशी–

ए॒ताविश्वा॑वि॒दुषे॒तुभ्यं॑वेधोनी॒थान्य॑ग्ने॒नि॒ण्यावचां॑सि ।
नि॒वच॑नाक॒वये॒काव्या॒न्यशं॑सिषंम॒तिभि॒र्विप्र॑उ॒क्थैः ॥ १६ ॥२२॥

ए॒ता । विश्वा॑ । वि॒दुषे॑ । तुभ्य॑म् । वे॒धः॒ । नी॒थानि॑ । अ॒ग्ने॒ । नि॒ण्या । वचां॑सि । नि॒ऽवच॑ना । क॒वये॑ । काव्या॑नि । अशं॑सिषम् । म॒तिऽभिः॑ । विप्रः॑ । उ॒क्थैः ॥ १६ ॥ २२ ॥

वेधःविधातः हेअग्ने विदुषेकर्मविषयज्ञानवते कवये क्रान्तदर्शिने तुभ्यं नीथानि फलप्रापकाणि निण्या गूढानि निवचनानि नितरांवक्तव्यानिकाव्यानि कविभिर्मेधाविभिःकृतानि एता विश्वा एतानि सर्वाणि वचांसि वाक्यानि मतिभिर्मननीयैःस्तोत्रैरुक्थैःशस्त्रैश्चसहितः विप्रःप्राज्ञोऽहमशंसिषमवोचं तानिसेवस्वेत्यर्थः ॥ १६ ॥

॥ इतितृतीयस्यचतुर्थेद्वाविंशोवर्गः ॥ २२ ॥

कृणुष्वेतिपञ्चदशर्चंचतुर्थंसूक्तम् वामदेवस्यार्षं त्रैष्टुभं रक्षोहाग्निदेवताकं कृणुष्वपञ्चोनाराक्षोघ्नमित्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोःसूक्तविनियोगः प्रवर्ग्येभिष्टवेकृणुष्वपाजइत्याद्याःपञ्चर्चोविनियुक्ताः सूत्रितञ्च–कृणुष्वपाजःप्रसितिंनपृथ्वीमितिपञ्चेति ।

तत्रप्रथमा–

कृ॒णु॒ष्वपाजः॒प्रसि॑तिं॒नपृ॒थ्वींया॒हिराजे॒वाम॑वाँ॒इभे॑न ।
तृ॒ष्वीमनु॒प्रसि॑तिंद्रूणा॒नोऽस्ता॑सि॒विध्य॑र॒क्षस॒स्तपि॑ष्ठैः ॥ १ ॥

कृ॒णु॒ष्व । पाजः॑ । प्रऽसि॑तिम् । न । पृ॒थ्वीम् । या॒हि । राजा॑ऽइव । अम॑ऽवान् । इभे॑न । तृ॒ष्वीम् । अनु॑ । प्रऽसि॑तिम् । द्रू॒णा॒नः । अस्ता॑ । अ॒सि॒ । विध्य॑ । र॒क्षसः॑ । तपि॑ष्ठैः ॥ १ ॥

हेअग्ने पाजस्तेजःसंघंकृणुष्व कुरुष्व विस्तारय तत्रदृष्टान्तः—प्रसितिंन यथामृगयुः पृथ्वींविस्तीर्णां प्रसृतिंप्रकर्षेणसीयतेबध्यतेययाइतिप्रसृतिर्वागुरा तादृशींप्रसितिं पक्षिग्रहणार्थंवनगहनेषुप्रसारयति तद्वत् त्वमपिरक्षांसिहंतुंमहद्बलमग्रतस्तनुष्व इभेनगतभयेनतेजःसंघेनयुक्तस्त्वंयाहि रक्षांसिहन्तुंगच्छ तत्रदृष्टान्तः—राजेव यथा अमवान् अमाराज्ञासहवर्ततइत्यमोमात्यः तद्वान् यद्वा अमा अमनंरोगः शत्रूणांकर्तव्यैरोगैस्तद्वान् शत्रूणांरोगभूतइत्यर्थः राजा इभेनगजेनयुक्तः सन् परबलंप्रतिगच्छतितद्वत् किंच तृष्वीं तृष्वीतिक्षिप्रनाम क्षिप्रगामिनींप्रसितिं प्रकृष्टांसेनां अनुद्रूणानः अनुगच्छन् यद्वा तृष्वीमितितृतीयार्थेद्वितीया तृष्व्याक्षिप्रयाप्रसित्या अनुबद्धयासन्ततयागत्या द्रूणानःपरसेनांहिंसन् अस्ता शत्रूणांक्षेप्तासि तपिष्ठैस्तप्तृतमैस्तेजोभिःरक्षसोराक्षसान्विध्यताडय अत्रनिरुक्तं[1]—कुरुष्वपाजःपाजःपालनात्प्रसितिमिवपृथ्वींप्रसितिःप्रसयनात्तन्तुर्वाजालंवायाहिराजेवामात्यवानभ्यमनवान्स्ववान्वेरावतागणेनगतभयेनहस्तिनेतिवातृष्व्यानुप्रसित्याद्रूणानस्तृष्वीतिक्षिप्रनामतरतेर्वात्वरतेर्वासितासिविध्यरक्षसस्तपिष्ठैस्तप्ततमैस्तृप्ततमैस्तपिष्ठतमैरितिवेति ॥ कृणुष्व कृविहिंसाकरणयोः लोटि धिन्विकृण्व्योरचेत्युप्रत्ययः व्यत्ययेनात्मनेपदं विकरणस्वरः सतिशिष्टोपि लसार्वधातुकस्वरंनबाधतइतिलसार्वधातुकस्वरः ॥ १ ॥

अथद्वितीया—

त॒व॑भ्र॒मास॑आशु॒याप॑त॒न्त्यनु॑स्पृशधृष॒ताशोशु॑चानः ।
तपूँ॑ष्यग्नेजु॒ह्वा॑पत॒ङ्गानसं॑दितो॒विसृ॑ज॒विष्व॑गु॒ल्काः ॥ २ ॥

तव॑ । भ्र॒मासः॑ । आ॒शु॒ऽया । प॒त॒न्ति॒ । अनु॑ । स्पृ॒श॒ । धृ॒ष॒ता ।
शोशु॑चानः । तपूँ॑षि । अ॒ग्ने॒ । जु॒ह्वा॑ । प॒त॒ङ्गान् । अस॑म्ऽदितः ।
वि । सृ॒ज॒ । विष्व॑क् । उ॒ल्काः ॥ २ ॥

हेअग्ने तवभ्रमासः भ्रम्यन्तः आशुया शीघ्रगतयःरश्मयःपतन्ति सर्वतःप्रसरन्ति शोशुचानः भृशंदीप्यमानस्त्वं धृषता अभिभवसमर्थेनतेजःसंघेन शत्रूननुक्रमेणस्पृश दह दहनोपायंदर्शयति—असंदितपरैरनिरुद्धस्त्वं तपूंषि तापकानितेजांसि पतङ्गान्पतनशीलान्विस्फुलिङ्गान् उल्काः निर्गतज्वालारूपाणि किद्वानिचेत्येतत्त्रितयंजुह्वा हूयन्तेस्यामाहुतयइंतिजुहूर्ज्वाला

---

[1] नि० ६. । १२. ।

तया विष्वक् सर्वतोविसृज प्रसारय ॥ आशुया आशुशब्दाज्जसःसुपांसुलुगितियाजादेशः चित्स्वरः । धृषता धृषप्रसहने चुरादिराधृषीयः व्यत्ययेनशः शतुरनुमइतिविभक्तेरुदात्तत्वम् । जुह्वा जुहोतेर्दीर्घश्चेतिक्विप् द्विर्वचनं दीर्घत्वं उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वस्य नोङ्धात्वोरितिप्रतिषेधः उदात्तस्वरितयोर्यणइतिस्वरितत्वम् । असंदितः दोअवखण्डने कर्मणि निष्ठा द्यतिस्यतीतीत्वं नञासमासेतस्यस्वरः ॥ २ ॥

अथतृतीया—

प्रति॒स्पशो॒विसृ॑ज॒तूर्णि॑तमो॒भवा॑पा॒युर्वि॒शोअ॒स्याअद॑ब्धः ।
योनो॑दू॒रेअ॒घशं॑सो॒योअन्त्य॑ग्ने॒माकि॑ष्टे॒व्य॑थि॒राद॑धर्षीत् ॥ ३ ॥

प्रति॑ । स्पशः॑ । वि । सृ॒ज॒ । तूर्णि॑ऽतमः । भव॑ । पा॒युः वि॒शः ।
अ॒स्याः । अद॑ब्धः । यः । न॒ः । दू॒रे । अ॒घऽशं॑सः । यः । अन्ति॑ ।
अग्ने॑ । माकि॑ः । ते॒ । व्यथि॑ः । आ । द॒ध॒र्षी॒त् ॥ २ ॥

हेअग्ने तूर्णितमः त्वरिततमस्त्वं स्पशः परबाधकान्रश्मीन्चारान्वा सत्यानृतविवेकार्थं विसृज शत्रून्प्रतिविशेषेणप्रेरय अदब्धः केनाप्यहिंसितस्त्वं अस्याः त्वदीयायाविशः अस्मदादिकायाःप्रजायाः पायुः पालकोभव कस्मात्तद्रक्षणमित्यपेक्षायामाह—नोऽस्माकंदूरेयोघशंसः अघंपापात्मकंशंसनमभिलाषःकीर्तनंवायस्यसोघशंसः यश्चाघशंसः अन्तिअस्माकं समीपेतिष्ठति तस्मादुभयविधाच्छत्रोः पालकोभव किञ्च तेत्वत्संबन्धिनोऽस्मान्माकिः नकश्चिदपिव्यथिः बाधकोराक्षसःआदधर्षीत् आधर्षयतु अस्माकंकश्चिदपिपरिभवंमाकरोत्वित्यर्थः ॥अन्ति अन्तिकस्यकादिलोपआद्युदात्तत्वंच । अग्ने पादादित्वात्षाष्ठिकमाद्युदात्तत्वम् । माकिष्टइतिसंहितायांयुष्मत्तत्ततक्षुष्वन्तःपादमितिषत्वम् । दधर्षीत् धृषप्रसहने लुङि बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीतितिपईडागमः निघातः ॥ ३ ॥

अथचतुर्थी—

उद॑ग्नेतिष्ठ॒प्रत्यात॑नुष्व॒न्य१॒॑मित्राँ॑ओषतात्तिग्महेते ।
योनो॒अरा॑तिंसमिधानच॒क्रेनी॒चातंध॑क्ष्यत॒संनशुष्क॑म् ॥ ४ ॥

उत् । अ॒ग्ने॒ । ति॒ष्ठ॒ । प्रति॑ । आ । त॒नु॒ष्व॒ । नि । अ॒मित्रा॑न् ।
ओ॒ष॒ता॒त् । ति॒ग्म॒ऽहे॒ते॒ । यः । नः॒ । अरा॑तिम् । स॒म्ऽइ॒धा॒न॒ । च॒क्रे ।
नी॒चा । तम् । ध॒क्षि॒ । अ॒त॒सम् । न । शुष्क॑म् ॥ ४ ॥

तिग्महेते तिग्मास्तीक्ष्णाहेतयोज्वालायस्यसतथोक्तः तादृश हेअग्ने उत्तिष्ठ रक्षोहननार्थमुद्यतोभव शत्रून्प्रतिआतनुष्व ज्वालासंघंविस्तारय तैस्तेजःसंघैरमित्रान् शत्रूनोषताव् नितरांदह हेसमिधान समिद्भिर्दीप्यमानाग्ने यःपुमान्नोऽस्माकं अरातिं भावप्रधाननिर्देशः अरातित्वंशात्रवंचक्रे कुरुते अरातिमदानंवाकुरुते तंपुमांसंनीचा न्यग्भूतंधक्षि दह तत्रदृष्टान्तः—अतसंन यथाशुष्कमनार्द्रमतसंकाष्ठंदहसितद्वत् ॥ ओषतात् उषदाहे लोटि हेस्तुह्योरितितातङादेशः । धक्षि दहेर्लोटि बहुलंछन्दसीतिशपोलुक् होढइतिढत्वं भष्भावः षढोःकः सीतिकत्वं निघातः ॥ ४ ॥

अथपञ्चमी—

ऊ॒र्ध्वोभ॑व॒प्रति॑वि॒ध्याध्य॒स्मदा॒विष्कृ॑णुष्व॒दैव्या॑न्यग्ने ।
अव॑स्थि॒रात॑नुहियातु॒जूनां॑जा॒मिमजा॑मिं॒प्रमृ॑णीहि॒शत्रू॑न् ॥ ५ ॥ २३॥

ऊ॒र्ध्वः । भ॒व॒ । प्रति॑ । वि॒ध्य॒ । अधि॑ । अ॒स्मत् । आ॒विः ।
कृ॒णु॒ष्व॒ । दैव्या॑नि । अ॒ग्ने॒ । अव॑ । स्थि॒रा । त॒नु॒हि॒ । या॒तु॒ऽजूना॑म् ।
जा॒मिम् । अजा॑मिम् । प्र । मृ॒णी॒हि॒ । शत्रू॑न् ॥ ५ ॥ २३ ॥

हेअग्ने ऊर्ध्वोभव रक्षोहननार्थमुद्युक्तोभव अस्मदस्मत्तः अधि अधिकान्राक्षसान् प्रतिविध्य प्रत्येकंताडय दैव्यानितेजांस्याविष्कृणुष्व आविष्कुरु एतत्त्रयंविधाय यातुजूनांयातयितुंप्राणिनः क्लेशयितुंयेजवंकुर्वन्तितेषांयातुधानानांस्थिरा दृढानि धनूंषि अवतनुहि अवगतज्यानिकुरु किंच जामिंबन्धुमजामिमबन्धुंशत्रून्प्रमृणीहि प्रजहि यद्वा जामिंयःपूर्वंप्रहृतःतमजामिंपूर्वमप्रहृतंएवंभूतान्शत्रून्जहि प्रहृतोयमित्यपेक्षांमाकृथाः ॥ आविष्कृणुष्वेत्यत्रसंहितायामिदुदुपधस्यचाप्रत्ययस्यचेतिषत्वम् । तनुहि तनोतेर्लोटि उतश्चप्रत्ययाच्छन्दसिवावचनमितिहेर्लुगभावः । यातुजूनां जुगतौ क्विब्वचीत्यादिनाक्विप्दीर्घौ आमिछान्दसोनुम् । प्रमृणीहि मृङ्प्राणत्यागे अन्तर्भावितण्यर्थस्य लोटि बहुलंछन्दसीतिविकरणस्यश्ना निघातः ॥ ५ ॥

॥ इतितृतीयस्यचतुर्थेत्रयोविंशोवर्गः ॥२३ ॥

Funding by IKS-MoE

अथषष्ठी—

सते॑जानातिसुम॒ति॑ंय॑विष्ठ॒यई॑व॑ते॒ब्रह्म॑णेगा॒तुमै॑र॑त् ।
विश्वा॑न्यस्मैसु॒दिना॑निरा॒योद्यु॒म्नान्य॒र्यो॑विदुरो॑अ॒भिद्यौ॑त् ॥ ६ ॥

सः । ते॒ । जा॒ना॒ति॒ । सु॒ऽम॒तिम् । य॒वि॒ष्ठ॒ । यः । ईव॑ते ।
ब्रह्म॑णे । गा॒तुम् । ऐर॑त् । विश्वा॑नि । अ॒स्मै॒ । सु॒ऽदिना॑नि । रा॒यः ।
द्यु॒म्नानि॑ । अ॒र्यः । वि । दुर॑ः । अ॒भि । द्यौत् ॥ ६ ॥

यविष्ठ युवतम यद्वा देवानांहवींषिमिश्रयितृतम हेअग्ने यःपुमान् ईवते गमनवते कल्याणहेतुभूतागमनाय ब्रह्मणे परिवृढाय तुभ्यंगातुं गीयते उच्चार्यतइतिगातुःस्तोत्रं तदैरत्प्रेरयति सपुमान् ते तव सुमतिं कल्याणकरीमनुग्रहात्मिकांबुद्धिंजानाति लभतइत्यर्थः अस्मैस्तोत्रंकुर्वतेयजमानायतदर्थंविश्वानिसुदिनानिशोभनानि दिनानिरायोधनानिद्युम्नानिद्युतिमन्तिरत्नकनकादीनि दुरः गृहान् अभिअभिलक्ष्य अर्यः यज्ञानांस्वामी त्वं विद्योत् विशेषेणद्योतस्व केचिदत्रवाक्यभेदमङ्गीकुर्वते स्तोत्रंकृतवतेयजमानायविश्वानिसुदिनानि अभ्युदयकारीणि भवन्ति रायः रान्तिक्षीरादीनीतिरायोगोधनानिद्युम्नानि द्योतमानानिकनकादीनिचास्मैभवन्ति अर्यः कर्मणामनुष्ठाता सः यजमानःदुरःगृहानभिविद्यौत् विशेषेणद्योतते ॥ ईवते ईगतौ क्विप् तदस्यास्तीतिमतुप् छन्दसीरइतिमतुपोवत्वम् । ऐरत् ईरगतौ यद्वृत्तयोगादनिघातः । अर्यः ऋगतौ अर्यःस्वामिवैश्ययोरितियत्प्रत्ययान्तोनिपातितः स्वामिन्यन्तोदात्तत्वम् । द्यौत् द्युतदीप्तौ छान्दसे लुङिद्युद्भ्योलुङीतिपरस्मैपदं बहुलंछन्दसीत्यडभावः ॥ ६ ॥

अथसप्तमी—

सेद॑ग्नेअस्तुसु॒भग॑ःसु॒दानु॒र्य॑स्त्वा॒नित्ये॑नह॒विषा॒यउ॒क्थैः ।
पिप्री॑षति॒स्वआयु॑षिदुरो॒णेविश्वेद॑स्मैसु॒दिना॒सास॑दि॒ष्टिः ॥ ७ ॥

सः । इत् । अ॒ग्ने॒ । अ॒स्तु॒ । सु॒ऽभग॑ः । सु॒ऽदानु॑ः । यः । त्वा॒ । नित्ये॑न ।
ह॒विषा॑ । यः । उ॒क्थैः । पिप्री॑षति । स्वे । आयु॑षि । दु॒रो॒णे ।
विश्वा॑ । इत् । अ॒स्मै॒ । सु॒ऽदिना॑ । सा । अ॒स॒त् । इ॒ष्टिः ॥ ७ ॥

Funding by IKS-MoE

हेअग्ने यःपुमान्नित्येन यावज्जीवंसंकल्पितेनाग्निहोत्रादिसाधनभूतेनहविषा त्वा त्वां पिप्रीषति प्रीणयितुमिच्छति यश्चोक्थैःशस्त्रैःप्रीणयितुमिच्छति सेत् सएवपुमान् सुभगःशोभनधनः सौभाग्यवान्वासुदानुः शोभनदानोपेतश्चास्तु किञ्च दुरोणेदुरवनेकृच्छ्रलभ्येस्वेस्वकीयेआयुषिशतवर्षाख्यजीवनेतिष्ठतु अस्मैयजमानायविश्वा सर्वाणि सुदिना शोभनानिदिनानि भवन्तु अस्य सेष्टिः सयज्ञः असत् फलसाधनसमर्थोभवतु॥ पिप्रीषति प्रीङ्तर्पणे धातोःकर्मणइतिसन्। असत् अस्तेर्लेटचडागमः। इष्टिः मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः॥ ७॥

उखासंभरणीयेष्टौअग्नेःक्षत्रभृतोर्चामितइतियाज्या सूत्रितञ्च–अर्चामितेसुमतिंघोष्यर्वागितीदंप्रभृतिकर्मणामिति ।

सैषाष्टमी–

अर्चामितेसुमतिंघोष्यर्वाक्सन्तेवावाताजरतामियंगीः ।
स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून् ॥ ८ ॥

अर्चामि । ते । सुऽमतिम् । घोषि । अर्वाक् । सम् । ते ।
ववाता । जरताम् । इयम् । गीः । सुऽअश्वाः । त्वा । सुऽरथाः ।
मर्जयेम । अस्मे इति । क्षत्राणि । धारयेः । अनु । द्यून् ॥८॥

हेअग्ने ते तव सुमतिं अनुग्रहकरांशोभनांबुद्धिं अर्चामि पूजयामि ववाता पुनःपुनस्त्वामभिगच्छन्तीयमुच्यमानागीर्वाग्घोषि घोषयुक्तंयथाभवतितथार्वाक् त्वदभिमुखं ते त्वां संजरतांस्तौतु वयमपि स्वश्वाःशोभनाश्वोपेताः सुरथाश्च उपलक्षणमेतत् पुत्रपौत्रादिभिःसहिताः सन्तस्त्वांमर्जयेम अलंकुर्याम परिचरेमेतियावत् त्वंतुअनुद्यून् अन्वहमस्मेअस्मासुक्षत्राणिधनानिधारयेः निधेहि॥ घोषि घुषशब्दने औणादिकइन् निच्वादाद्युदात्तः। वावाता वागतिगन्धनयोरित्यस्ययङ्लुगंतस्यरूपम्। मर्जयेम मृजूशौचालंकारयोः ण्यन्तस्य लिङिरूपं वृद्ध्यभावश्छान्दसः ॥ ८ ॥

अथनवमी–

इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवांसमनुद्यून् ।
क्रीळन्तस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवांसोजनानाम् ॥ ९ ॥

Funding by IKS-MoE

इ॒ह । त्वा॒ । भूरि॑ । आ । च॒रे॒त् । उप॑ । त्मन् । दोषा॑ऽवस्तः ।
दी॒दि॒ऽवांस॑म् । अनु॑ । द्यून् । क्रीळ॑न्तः । त्वा॒ । सु॒ऽमन॑सः । स॒पे॒म ।
अ॒भि । द्यु॒म्ना । त॒स्थि॒ऽवांसः॑ । जना॑नाम् ॥ ९ ॥

हेअग्ने इहरक्षोहननाख्येकर्मणि यद्वा अस्मिन्लोकेपुरुषःदोषावस्तःरात्रावहनिचदीदिवांसंदीप्यमानंत्वामनुद्यूनन्वहं त्मन् आत्मना स्वयमेवउपसमीपे भूरि भूयिष्ठं यथाभवतितथा आचरेत परिचरति तस्माद्वयमपिजनानांशत्रूणांद्युम्नाद्युम्नानिधनानिअभितस्थिवांसःत्वत्प्रसादादात्मसात्कुर्वन्तः अतएवक्रीडन्तः स्वेस्वेगृहेपुत्रपौत्रादिभिःसहक्रीडमानाः तथा सुमनसःशोभनमनस्काःसन्तस्त्वांसपेम परिचरेम यद्वा दोषावस्तरितिसंबुद्धिः दोषायाःरात्रिकृतस्यतमसोवस्तःआच्छादयितःनिवारयितः ॥ त्मन् आत्मन्शब्दस्यतृतीयायाःसुपांसुलुगितिलुक् मन्त्रेष्वाङ्यादेरात्मनइत्याकारलोपः । दोषावस्तः द्वन्द्वपक्षेकार्तकौजपादयश्चेतिपूर्वपदप्रकृतिस्वरः संबुद्धिपक्षेआमन्त्रितस्यपादादित्वात्षाष्ठिकमाद्युदात्तत्वम् । सपेम षपसमवाये लिङिरूपं निघातः॥९॥

अथदशमी–

यस्त्वा॒स्व॒श्वः॑सु॒हि॒र॒ण्योअ॑ग्नउप॒याति॒वसु॑मता॒रथे॑न ।
तस्य॑त्रा॒ताभ॑वसि॒तस्य॒सखा॒यस्त॑आति॒थ्यमा॑नु॒षग्जुजो॑षत् ॥ १०॥२४॥

यः । त्वा॒ । सु॒ऽअश्वः॑ । सु॒ऽहि॒र॒ण्यः । अ॒ग्ने॒ । उ॒प॒ऽयाति॑ ।
वसु॑ऽमता । रथे॑न । तस्य॑ । त्रा॒ता । भ॒व॒सि॒ । तस्य॑ । सखा॑ ।
यः । ते॒ । आ॒ति॒थ्यम् । आ॒नु॒षक् । जुजो॑षत् ॥ १० ॥ २४ ॥

हेअग्ने यःपुमान्स्वश्वः शोभनाश्वोपेतः सुहिरण्यः यागयोग्यधनोपेतः वसुमता व्रीह्यादिधनयुक्तेनरथेनसहितःसन् त्वात्वामुपयाति परिचरणार्थंतवसमीपंगच्छति तस्यपुंसः त्राता सर्वदुरितेभ्योरक्षकोभवसि यश्चपुमान्तेतवआतिथ्यमतिथियोग्यांपूजामानुषक् अनुक्रमेणजुजोषत्मापयति तस्यपुंसः सखा तदुचितफलप्रदानेनोपकर्ताभवसि ॥ उपयाति सहसुपेत्यत्रसहेतियोगविभागात्समासः तिपःपित्त्वादनुदात्तत्वेधातुस्वरः तिङिचोदात्तवतीतिगतेर्निघातः । आतिथ्यं अतिथिशब्दादतिथेर्ञ्यइतिञ्यप्रत्ययः प्रत्ययस्वरः । जुजोषत् जोषयतेर्लङिबहुलंछन्दसीतिशपः श्लुः छन्दस्युभयथेतितिपआर्धधातुकत्वाण्णिलोपः अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥१०॥

॥ इतितृतीयस्यचतुर्थेचतुर्विंशोवर्गः ॥ २४ ॥

Funding by IKS-MoE

अथैकादशी–

म॒हो रु॑जामिब॒न्धुता॒वचो॑भि॒स्तन्मा॑पि॒तुर्गोत॑मा॒दन्वि॑याय ।
त्वंनो॑अ॒स्यवच॑सश्चिकिद्धि॒होत॑र्यविष्ठसुक्रतो॒दमू॑नाः ॥ ११ ॥

म॒हः । रु॒जा॒मि॒ । ब॒न्धुता॑ । वचः॑ऽभिः । तत् । मा॒ । पि॒तुः ।
गोत॑मात् । अनु॑ । इ॒या॒य॒ । त्वम् । न॒ः । अ॒स्य । वच॑सः ।
चि॒कि॒द्धि॒ । होत॑ः । य॒वि॒ष्ठ॒ । सु॒क्र॒तो॒ इति॑ सुऽक्रतो । दमू॑नाः ॥ ११ ॥

हेहोतः देवानामाह्वातः यविष्ठ युवतम सुक्रतो शोभनप्रज्ञ हेअग्ने वचोभिः त्वदुद्देशेनकृतैः स्तोत्रैःसमुपजातायेयंबन्धुताबन्धुभावः तयाबन्धुतया महोमहतोराक्षसान्रुजामि भनज्मि तत्तादृशंस्तोत्रात्मकंवचः पितुरुत्पादयितुः गोतमादृषेःसकाशान्मावामदेवंमामन्वियाय दमूनादान्तमनादानमनावाशत्रूणांउपक्षपयितावातादृशस्त्वंनोस्मदीयस्यास्यवचसःस्तोत्रात्मकमेतद्वाक्यंचिकिद्धि जानीहि॥ चिकिद्धि कितज्ञाने जुहोत्यादिकः लोटिरूपं । होतः पादादित्वात्षाष्ठिकमाद्युदात्तत्वम् इतरयोस्तुनामन्त्रितेसमानाधिकरणेइतिप्रथमस्याविद्यमानवद्भावनिषेधादपादादित्वे ननिघातः ॥ ११ ॥

अथद्वादशी–

अस्व॑प्नजस्त॒रण॑यःसु॒शेवा॒अत॑न्द्रासोवृ॒काअश्र॑मिष्ठाः ।
तेपा॒यवः॑स॒ध्र्य॑ञ्चोनि॒षद्याग्ने॒तव॑नःपान्त्वमूर ॥ १२ ॥

अस्व॑प्नऽजः । त॒रण॑यः । सु॒ऽशेवाः॑ । अत॑न्द्रासः । अ॒वृ॒काः ।
अश्र॑मिष्ठाः । ते । पा॒यवः॑ । स॒ध्र्य॑ञ्चः । नि॒ऽसद्य॑ । अग्ने॑ ।
तव॑ । न॒ः । पा॒न्तु॒ । अ॒मू॒र॒ ॥ १२ ॥

अमूर अमूढ सर्वज्ञ यद्वा अमूर अप्रतिहतगते हेअग्ने अस्वप्नजः अस्वपन्तः जागरूकाइतियावत् तरणयः सततगमनस्वभावाःआपद्भ्यस्तारकावासुशेवाःसुसुखाःअतन्द्रासः अतन्द्राःअनलसाःसर्वदोद्युक्ताः अवृकाः अहिंसकाः अश्रमिष्ठाः अश्रान्ततमाःसध्र्यञ्चः परस्परंसंगताः पायवोरक्षकास्ते तादृशास्तवरश्मयः निषद्यास्मद्यज्ञेनिषण्णाभूत्वानोऽस्मान्पान्तुरक्षन्तु॥

Funding by IKS-MoE

अस्वप्नजः स्वपितृषोर्नजिङ्प्रत्ययः मध्येवग्रहश्छान्दसः। सध्र्यंचः सहपूर्वादञ्चतेःक्विप् सहस्यसध्रिरितिसध्र्यादेशः सध्र्यादेशस्यान्तोदात्तत्वनिपातनाद्यणादेशेउदात्तस्वरितयोरितिस्वरितत्वम्। अमूर मुहवैचित्ये निष्ठायांढकारस्यरेफश्छान्दसः यद्वा मूङ्बन्धने औणादिकोरक्प्रत्ययः ॥ १२ ॥

अथत्रयोदशी—

येपा॒यवो॑मामते॒यन्ते॑अग्ने॒पश्य॑न्तोअ॒न्धंदु॑रि॒तादर॑क्षन्।
र॒रक्ष॒तान्त्सु॒कृतो॑वि॒श्ववे॑दा॒दिप्स॑न्त॒इद्रि॒पवो॒नाह॑दे॒भुः ॥ १३ ॥

ये। पा॒यवः॑। मा॒म॒ते॒यम्। ते॒। अ॒ग्ने॒। पश्य॑न्तः। अ॒न्धम्।
दु॒ःऽइ॒तात्। अर॑क्षन्। र॒रक्ष॑। तान्। सु॒ऽकृतः॑। वि॒श्वऽवे॑दाः।
दिप्स॑न्तः। इत्। रि॒पवः॑। न। अह॑। दे॒भु॒ः ॥ १३ ॥

अत्रेयमैतिहासिकीकथा—उचथ्यस्यगर्भिणींममतानामधेयांभार्यां तदनुजोबृहस्पतिरचकमत तस्यांरेतआधित्सुंतंबृहस्पतिंगर्भस्थंरेतोऽब्रवीत् रेतोऽत्रमासैक्षीः अहमत्रवसामीति एवमुक्तोबृहस्पतिः निरुद्धरेतस्कःसन् रेतोरूपंगर्भंशशाप जात्यन्धत्वरूपंदीर्घंतमःप्राप्नुहीति ततस्तस्यांदीर्घतमाअजनिष्ट सचांध्यपरिहारायाग्निंस्तुत्वाचक्षुरलभतेतितदिदानीमाह—हेअग्ने पायवः रक्षकाः पश्यन्तःअन्धोयमितिकृपादृष्ट्यापश्यन्तः तेतवयेरश्मयः मामतेयं ममतायाः पुत्रंअन्धंचक्षुर्हीनंदीर्घतमसंदुरितात्आन्ध्यलक्षणाच्छापात्अरक्षन् चक्षुःप्रदानेनापालयन् विश्ववेदाः विश्वप्रज्ञोभवान् सुकृतः शोभनचक्षुःप्रदानादिकर्मकृतवतः तान्रश्मीन्ररक्ष आदरेणपरिगृह्यपालयतितेषांपरिग्रहसिद्धिरभिधीयते दिप्सन्तइत् दंभितुंपरिभवितुमिच्छन्तएव रिपवःशत्रवः एनंदीर्घतमसंनाहदेभुः नैवपरिभवन्तिखलु ॥ मामतेयं ममतायाअपत्यमित्यर्थे स्त्रीभ्योढक्। दिप्सन्तः दंभुदम्भे सनीवन्तर्धेत्यादिनाइडभावः दम्भइच्चेतीकारः। देभुः श्रंथिग्रंथिदंभिष्वंजीनामुपसंख्यानमितिलिटःकित्त्वादुपधालोपः ॥ १३ ॥

अथचतुर्दशी—

त्वया॑व॒यंस॑ध॒न्य१॒॑स्त्वोता॒स्तव॒प्रणी॑त्यश्याम॒वाजा॑न्।
उ॒भाशंसा॑सूदयसत्यतातेऽनुष्ठु॒याकृ॑णुह्यह्रयाण ॥ १४ ॥

Funding by IKS-MoE

त्वया॑ । व॒यम् । स॒ऽध॒न्य॑ः । त्वाऽऊ॑ताः । तव॑ । प्रऽनी॑ती ।
अ॒श्या॒म॒ । वाजा॑न् । उ॒भा । शंसा॑ । सू॒द॒य॒ । स॒त्य॒ऽता॒ते॒ ।
अ॒नु॒ष्टु॒या । कृ॒णु॒हि॒ । अ॒ह्र॒या॒ण॒ ॥ १४ ॥

अह्रयाण अलज्जितगमन अह्रयाणोह्रीतयानइतियास्कः[1] । तादृश हेअग्ने वयंस्तोतारः त्वयासधन्यः त्वत्प्रसादात्समानधनाः त्वोताः त्वयारक्षितावयं तवप्रणीती प्रणीत्या तवप्रेरणेनानुज्ञयावा वाजानन्नान्यश्यामप्राप्नुयाम हेसत्यताते सत्यंतनोतीतिवासत्यंतायतेयस्मिन्निति वासत्यतातिः हेसत्यताते शंसा पापानांशंसितारौ उभा उभौ आसन्नविप्रकृष्टौशत्रू सूदय जहि अनुष्टुया अनुक्रमेणकृणुहि अस्मिन्सूक्तेप्रतिपादितमर्थंकुरु ॥ सधन्यः धनमेषामस्तीति छन्दसीवनिपावितिईप्रत्ययः एरनेकाचइतियण् उदात्तस्वरितयोरितिस्वरितत्वम् । अनुष्टुया अपदुःसुषुस्थइतिविधायमानःकुप्रत्ययः बहुलवचनादनुपूर्वस्यापिभवति सुपांसुलुगितितृतीयायायाजादेशः । अह्रयाण ह्रीलज्जायां बहुलंछन्दसीतिशपःश्लुभावाभावः अनित्यमागमशासनमितिमुगभावः ॥ १४ ॥

अथपञ्चदशी—

अ॒याते॑अग्ने॒स॒मिधा॑विधेम॒प्रति॒स्तोमं॑श॒स्यमा॑नंगृभाय ।
द॒हाश॑सोर॒क्षसः॑पा॒ह्य१॒स्मान्द्रु॒हो नि॒दोमि॑त्रमहोअव॒द्यात् ॥१५॥२५॥

अ॒या । ते॒ । अ॒ग्ने॒ । स॒म्ऽइधा॑ । वि॒धे॒म॒ । प्रति॑ । स्तोम॑म् ।
श॒स्यमा॑नम् । गृ॒भा॒य॒ । दह॑ । अ॒शसः॑ । र॒क्षसः॑ । पा॒हि ।
अ॒स्मान् । द्रु॒हः । नि॒दः । मि॒त्र॒ऽम॒हः॒ । अ॒व॒द्यात् ॥ १५ ॥ २५ ॥

हेअग्ने अया अनया समिधा दीप्तयास्तुत्या ते त्वांविधेम परिचरेम अस्माभिःशस्यमानमिमं स्तोमंस्तोत्रंप्रतिगृभाय प्रतिगृहाण अशसः शंसन्तिस्तुवन्तीतिशसःस्तोतारः तेनभवन्तीतिअशसोनृशंसाः तान्रक्षसोदह भस्मसात्कुरु हेमित्रमहः मित्रैःपूजनीय हेअग्ने द्रुहोद्रोग्धुः निदः निन्द-

---

[1] नि० ५. १५. ।

कान् अवद्यात्परिवादाच्चास्मान्पाहि रक्ष ॥ गृभाय ग्रहेर्लोटि छन्दसिशायजपीतिश्नःशायच् हृग्रहोर्भः । पाहि वाक्यभेदादनिघातः । निदः णिदिकुत्सायां क्विप् आगमानुशासनस्यानित्यत्वान्नुमभावः सावेकाचइतिविभक्तेरुदात्तत्वम् । अवद्यात् अवद्यपण्येतियत् ययतोश्चातदर्थेइत्यंतोदात्तत्वम् । मित्रमहोअवद्यादित्यत्रसंहितायां अव्यादवद्यादितिएङःप्रकृतिभावः ॥१५॥

॥ इतितृतीयस्यचतुर्थेपञ्चविंशोवर्गः ॥ २५ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेचतुर्थोध्यायः ॥ ४ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥
इत्थंतृतीयाष्टकगश्चतुर्थोऽध्यायआदरात् ॥ व्याख्यातःसायणार्येणपञ्चमोऽव्याकरिष्यते ॥ २ ॥

चतुर्थेमंडलेप्रथमेनुवाकेदशसूक्तानि वैश्वानरायेतिपंचदशर्चंपंचमंसूक्तं वामदेवस्यार्षं त्रैष्टुभंवैश्वानराग्निदेवताकम् अत्रानुक्रमणिका—वैश्वानरायवैश्वानरीयमिति विनियोगोलैंगिकः ।

तत्रप्रथमा—

ॐम्वै॒श्वा॒न॒राय॑मी॒ह्ळुषे॑स॒जोषाः॑क॒थादा॑शेमा॒ग्नये॑बृ॒हद्भाः ।
अनू॑नेनबृह॒ताव॒क्षथे॒नोप॑स्तभायदुप॒मिन्नरोधः॑ ॥ १ ॥

वै॒श्वा॒न॒राय॑ । मी॒ह्ळुषे॑ । स॒ऽजोषाः॑ । क॒था । दा॒शे॒म॒ । अ॒ग्नये॑ ।
बृ॒हत् । भाः । अनू॑नेन । बृ॒ह॒ता । व॒क्षथे॑न । उप॑ । स्त॒भा॒य॒त् ।
उ॒प॒ऽमित् । न । रोधः॑ ॥ १ ॥

सजोषाः सजोषसःसमानप्रीतियुक्तावयमृत्विग्यजमानाः वैश्वानराय विश्वानरसंबन्धिनएतन्नामकाय मीह्ळुषे अभिमतवृष्ट्यादिसेक्त्रेबृहत् बृहते महते भाः भासमानायाग्नयेदेवाय कथा कथं केनप्रकारेणदाशेम दद्याम सामर्थ्याद्धविरितिगम्यते अथवा बृहद्भाइत्युत्तरत्रयोज्यम् कथादाशेमेत्युक्तम् किंतत्राधिक्यमितितदुच्यते—योग्निः बृहन्महान्भाः भासमानश्चसन् अनूनेन अविकलेन संपूर्णेन अतएव बृहताप्रभूतेनवक्षथेनवोढव्येनस्वशरीरेण उपस्तभायत् उपस्तभ्नाति सामर्थ्यात्द्यांइतिशेषः द्युलोकंव्याप्नोतीत्यर्थः तत्रदृष्टान्तः—उपमिन्नरोधः उपसमीपेमीयतेक्षिप्यतेइत्युपमित् स्थूणा सा यथातृणाच्छादनादिनिरोधकं वंशादिकमुपस्तभ्नातितद्वत् यद्वा वक्षथेन उक्थलक्षणेनफलादिवाहकेनस्तोत्रेणसहद्युलोकमुपस्तभायत् ॥ स्तभायत् स्तंभुःसौत्रोधातुः लङि छन्दसिशायजपीतिव्यत्ययेनाहावपिशायजादेशः बहुलंछन्दसीत्यडभावः किमिवउपमिन्नरोधःउपसमीपेमीयतइत्युपमिदुदकंकूलमिव ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया–

मानि॑न्दत॒यइ॒मांमह्यं॑रा॒तिंदे॒वोद॒दौमर्त्या॑यस्व॒धावा॑न् ।
पाका॑य॒गृत्सो॑अ॒मृतो॒विचे॑तावैश्वान॒रोनृत॑मोय॒ह्वोअ॒ग्निः ॥ २ ॥

मा । नि॒न्द॒त॒ । यः । इ॒माम् । मह्य॑म् । रा॒तिम् । दे॒वः । द॒दौ ।
मर्त्या॑य । स्व॒धाऽवा॑न् । पाका॑य । गृत्सः॑ । अ॒मृतः॑ । विऽचे॑ताः ।
वै॒श्वा॒न॒रः । नृऽत॑मः । य॒ह्वः । अ॒ग्निः ॥ २ ॥

हेहोत्रादयः अमुंवैश्वानरमग्निंमानिन्दत निन्दांमाकुरुत स्तुतेत्यर्थः योदेवोदीप्यमानोऽग्निःस्वधावानस्मद्दत्तेनहविर्लक्षणेनान्नेनतद्वान्सन् मर्त्यायमरणधर्मायपाकायपरिपक्वप्रज्ञायमह्यं यजमानाय इमामिदानींदीयमानप्रकारांरातिंधनंददौ दत्तवान् सविशेष्यते गृत्सोमेधावी मेधाविनामैतत् अमृतः अमरणस्वभावः विचेताः विशिष्टप्रज्ञोवैश्वानरः विश्वैर्नरैराहवनीयादिरूपेणनीयमानः नृतमः नेतृतमः फलादीनां यह्वोमहान् महन्नामैतत् अग्निः अंगनादिगुणविशिष्टः तादृशमग्निंस्तुतेतिभावः ॥ २ ॥

अथतृतीया–

साम॑द्वि॒बर्हा॒महि॑ति॒ग्मभृ॑ष्टिःस॒हस्र॑रेतावृष॒भस्तुवि॑ष्मान् ।
प॒दंनगोरप॑गूळ्हंवि॒विद्वान॒ग्निर्मह्यं॒प्रेदु॑वोचन्मनी॒षाम् ॥ ३ ॥

साम॑ । द्वि॒ऽबर्हाः॑ । महि॑ । ति॒ग्मऽभृ॑ष्टिः । स॒हस्र॑ऽरेताः । वृ॒ष॒भः ।
तुवि॑ष्मान् । प॒दम् । न । गोः । अप॑ऽगूळ्हम् । वि॒वि॒द्वान् । अ॒ग्निः ।
मह्य॑म् । प्र । इत् । ऊँ॒ इति॑ । वो॒च॒त् । म॒नी॒षाम् ॥ ३ ॥

द्विबर्हाः द्वयोर्मध्यमोत्तमयोःस्थानयोःपरिवृढः तिग्मभृष्टिः तीक्ष्णतेजाः सहस्ररेताः बहुविधहिरण्यरेतस्कः रेतःशब्दःसारवाची प्रभूतसारोवा वृषभोवर्षिताकामानां तुविष्मान्बहुधनः ईदृशोयमग्निः अत्यन्तगोपितंगोःपदंन नष्टागोःपदमिव अपगूळ्हं अत्यन्तरहस्यं मनीषाशब्दोज्ञानवाचीसन्नत्रज्ञातव्येवर्तते मनीषांज्ञातव्यंमहिमहत्पूज्यंसामअस्मदभिमतंस्तोत्रंविविद्वान्विशेषेणजानन्मह्मंप्रेदुवोचत् प्रैवब्रवीतु ॥ ३ ॥

Funding by IKS-MoE

अथचतुर्थी—

प्रताँअ॒ग्निर्ब॑भसत्ति॒ग्मज॑म्भ॒स्तपि॑ष्ठेनशो॒चिषा॒यःसु॒राधाः॑ ।
प्रयेमि॒नन्ति॒वरु॑णस्य॒धाम॑प्रि॒यामि॒त्रस्य॒चेत॑तोध्रु॒वाणि॑ ॥ ४ ॥

प्र । तान् । अ॒ग्निः । ब॒भ॒स॒त् । ति॒ग्मऽज॑म्भः । तपि॑ष्ठेन । शो॒चिषा॑ । यः । सु॒ऽराधाः॑ । प्र । ये । मि॒नन्ति॑ । वरु॑णस्य । धाम॑ । प्रि॒या । मि॒त्रस्य॑ । चेत॑तः । ध्रु॒वाणि॑ ॥ ४ ॥

योग्निः सुराधाः शोभनधनः सतिग्मजंभः तीक्ष्णदंष्ट्रःसन् तपिष्ठेनशोचिषा अतिशयेनशत्रूणांतापकेनतेजसातान्वक्ष्यमाणान्द्वेष्टॄन् प्रबभसत् प्रकर्षेणभर्त्सयतु दहत्वित्यर्थः भसभर्त्सनदीप्त्योः लेटि इतश्चलोपइतीकारलोपः लेटोडाटावित्यडागमः तानित्युक्तंकानित्याह येद्वेष्टारः चेततः जानतः एतदुभयविशेषणंमित्रस्यवरुणस्यच प्रिया प्रियाणि ध्रुवाणि स्थिराणि धाम धामानि तेजःस्थानानि कर्माणिवा प्रमिनन्ति प्रकर्षेणहिंसन्ति मीञ्हिंसायां मीनातेर्निगमेइतिह्रस्वत्वं विकरणस्वरः ॥ ४ ॥

अथपञ्चमी—

अ॒भ्रा॒तरो॒नयोष॑णो॒व्यन्तः॑पति॒रिपो॒नजन॑योदु॒रेवाः॑ ।
पा॒पासः॒सन्तो॑अनृ॒ताअ॑स॒त्याइ॒दंप॒दम॑जनतागभी॒रम् ॥ ५ ॥ १ ॥

अ॒भ्रा॒तरः॑ । न । योष॑णः । व्यन्तः॑ । प॒ति॒ऽरिपः॑ । न । जन॑यः । दुः॒ऽएवाः॑ । पा॒पासः॑ । सन्तः॑ । अ॒नृ॒ताः । अ॒स॒त्याः । इ॒दम् । प॒दम् । अ॒ज॒न॒त॒ । ग॒भी॒रम् ॥ ५ ॥ १ ॥

अभ्रातरः भ्रात्रादिबन्धुरहिताः योषणोन गतभर्तृकायोषितइव वाषपूर्वस्यनिगमेइतिविकल्पनाद्दीर्घाभावः तायथाभर्तृगृहात्पितृगृहंप्रत्यायन्तितद्वत् व्यन्तः गच्छन्तः यज्ञादीनपहाय अमार्गेवर्तमानाइत्यर्थः तथा पतिरिपोनजनयः पतिद्वेषिण्यःस्त्रियइव दुरेवाः दुष्टगतयः दुराचाराः अतएवपापासः पापाःसन्तः अनृताः मानससत्यरहिताः असत्याःवाचिकसत्यरहिताः मनसावाचाग्निमभजमानाःइदंपापिभिरनुभूयमानतयाप्रसिद्धंगभीरमगाधंपदंनरकस्थानमजनत अजनयन्त उत्पादयन्ति लङिजनेरन्तर्भावितण्यर्थाद्व्यत्ययेनैकवचनम् ॥ ५ ॥

॥ इतितृतीयस्यपंचमेप्रथमोवर्गः ॥ १ ॥

Funding by IKS-MoE

अथषष्ठी–

इ॒दंमे॑अ॒ग्ने॒कियं॑तेपाव॒का॑मिनते॒गु॒रुंभा॒रंनमन्मं॑ ।
बृ॒हद्द॑धाथधृष॒ताग॑भी॒रंय॒ह्वंपृ॒ष्ठंप्रयं॑सास॒प्तधा॑तु ॥ ६ ॥

इ॒दम् । मे॒ । अ॒ग्ने॒ । कियं॑ते । पा॒व॒क॒ । अमि॑नते । गु॒रुम् ।
भा॒रम् । न । मन्मं॑ । बृ॒हत् । द॒धा॒थ॒ । धृ॒ष॒ता । ग॒भी॒रम् ।
य॒ह्वम् । पृ॒ष्ठम् । प्रयं॑सा । स॒प्तऽधा॑तु ॥ ६ ॥

हेपावक शोधकाग्ने कियते अत्यल्पाय गुरुंभारंन वोढुमशक्यंभारमिव तंयथा धर्तुमसहमानःपातयतितद्वत् त्वदीयंकर्मामिनते अहिंसते अत्यजतेमेमह्यमिदंज्ञातव्यत्वेनप्रसिद्धंबृहत्प्रभूतं मन्ममननीयं धनं दधाथ देहि तदेवविशेष्यते धृषताशत्रूणांधर्षकेणप्रयसा अन्नात्मैतव अन्नेनयुक्तंगभीरमन्यैरनवगाह्यं यह्वं महत्पृष्ठं स्प्रष्टुंयोग्यं सप्तधातु ग्राम्यारण्यभेदेनसप्तप्रकारं सप्तग्राम्याःपशवःसप्तारण्याइतिश्रुतेः। ईदृग्धनंदेहीत्यर्थः गुरुंभारंन अन्यदोयंभारं यथा अन्यस्मैददातितद्वदस्माकं दातव्यं धनं देहीतिवायोज्यम् ॥ ६ ॥

अथसप्तमी–

त॒मि॒न्वे॒३॑वसं॑म॒नासं॑मा॒नम॒भिक्रत्वां॑पु॒न॒तीधी॒तिर॑श्याः ।
स॒स॒स्य॒चर्म॒न्नधि॒चारु॒पृश्ने॒रग्रे॑रु॒पआरु॑पितं॒जबा॑रु ॥ ७ ॥

तम् । इत् । नु । ए॒व । स॒म॒ना । स॒मा॒नम् । अ॒भि । क्रत्वा॑ ।
पु॒न॒ती । धी॒तिः । अ॒श्या॒ः । स॒सस्य॑ । चर्म॑न् । अधि॑ । चारु॑ ।
पृश्ने॑ः । अग्रे॑ । रु॒पः । अरु॑पितम् । जबा॑रु ॥ ७ ॥

अग्निविद्युदादित्यास्त्रयोपि मतभेदेन वैश्वानरशब्दाभिधेयाइतियास्केनोक्तत्वादत्रादित्यात्मनावैश्वानरःस्तूयते–तमित्तमेव वैश्वानरं द्युस्थानं समानंसर्वेषामेकरूपंसमानासदृशीतद्योग्यापुनती अस्मान्शोधयित्रीधीतिर्मतिः अस्मदीयास्तुतिः क्रत्वा तदुचितेनकर्मणान्वेव क्षिप्रमेवाश्याः अभिप्राप्नुयाद्व्रजेदित्यर्थः अश्नोतेर्लिङि बहुलंछन्दसीतिविकरणस्यलुक् व्यत्ययेनपरस्मैपदं मध्यमपुरुषत्वंचपूर्वत्रतच्छब्दश्रुतेर्यच्छब्दोध्याहार्यः यस्यद्युस्थानस्यवैश्वानर-

---

१ तै० सं० ५. २. ५. । २ नि० ७. २३. ।

Funding by IKS-MoE

स्य जबारु जवमानरोहि चारुदीप्तंमंडलं जबारुजवमानरोहीतिवाजरमाणरोहीतिवेतियास्कः । अग्रेपुरस्तात्पूर्वस्यांदिशि रुपः आरोपयतिस्वात्मनिसस्यादीनि रुबितिभूमिरुच्यते तस्याःसकाशात् ससस्यलुप्तोपममेतत् स्वपतइव निश्चलस्यपृश्नेः द्युनामैतत् स्वःपृश्निरितिद्युलोकादित्ययोःसाधारणनामसुपाठात् ज्योतिरादिभिःस्पृश्यमानस्यद्युलोकस्याधिउपरिचर्मन् चर्मणे चरणाय चरेरौणादिकोमनिन् सुपांसुलुगितिचतुर्थ्यालुक् आरुपितं आरोपितंदेवैस्तमश्यादितिपूर्वेणान्वयः ॥ ७ ॥

अथाष्टमी–

प्र॒वाच्यं॒वच॑सः॒किंमे॑अ॒स्यगुहा॑हि॒तमुप॑नि॒णिग्व॑दन्ति ।
यदु॒स्रिया॑णा॒मप॒वारि॑व॒व्रन्पाति॑प्रि॒यंरु॒पोअग्रं॑प॒दंवेः ॥ ८ ॥

प्र॒ऽवाच्य॑म् । वच॑सः । किम् । मे॒ । अ॒स्य । गुहा॑ । हि॒तम् । उप॑ ।
नि॒णिक् । व॒द॒न्ति॒ । यत् । उ॒स्रिया॑णाम् । अप॑ । वाःऽइ॑व । व्रन् ।
पाति॑ । प्रि॒यम् । रु॒पः । अग्र॑म् । प॒दम् । वेरिति॒वेः ॥ ८ ॥

मेमदीयस्य अस्य वक्ष्यमाणस्यवचसोवाक्यस्य किंप्रवाच्यमस्ति तथ्यमेवोच्यतइत्यर्थः किंतद्वचइत्युच्यते उस्रियाणां गोनामैतत् क्षीराद्युत्स्राविणीनांगवांसंबन्धियत्क्षीरं वारिवदुदकमिव तद्यथासेकेनाविष्कुर्वन्ति तथा अपव्रन् अपवृण्वन्तिदोग्धारः निणिक् नितरांनेनेक्ति शोधयतीतिनिणिक् क्षीरमुच्यते तादृक्क्षीरं अनेनवैश्वानरेण गुहागुहायां उपहितं उपनिहितं वदन्तिवेत्तारः किंचायंवेः व्याप्तायाःरुपःभूम्याःप्रियं सर्वेषामाधारत्वेनप्रियभूतं अग्रं श्रेष्ठंपदंस्थानंपातिरक्षति॥ ८ ॥

अथनवमी–

इ॒दमु॒त्यन्महि॑म॒हामनी॑कं॒यदु॒स्रिया॒सच॑तपू॒र्व्यं॑गौः ।
ऋ॒तस्य॑प॒देअधि॒दीद्या॑नं॒गुहा॑रघु॒ष्यद्र॑घु॒यद्वि॑वेद ॥ ९ ॥

१नि०६. १७. ।

इदम् । ऊँ इति । त्यत् । महि । महाम् । अनीकम् ।
यत् । उस्रियाः । सचत । पूर्व्यम् । गौः । ऋतस्य । पदे ।
अधि । दीद्यानम् । गुहा । रघुऽस्यत् । रघुऽयत् । विवेद ॥ ९ ॥

इदम् इदमेव त्यत्प्रसिद्धं महि महत् पूज्यं महां महतांदेवानामनीकंसमूहरूपंसूर्यमंडलं वैश्वानरएवेतिशेषः पूर्व्यं पूर्वकालीनंपूरकंवा यन्मंडलंउस्रियाक्षीराद्युत्स्राविणीगोः अग्निहोत्राद्यर्थंसचते सेवते ऋतस्योदकस्यपदेस्थानेअन्तरिक्षेधि अधिकं यद्वा अधीतिसप्तम्यर्थानुवादः दीद्यानं द्योतमानं गुहा गुहायां रघुष्यत् शीघ्रंस्यन्दमानं रघुयत् शीघ्रंगच्छत्सूर्यमंडलंविवेद वैश्वानरमेवेतिज्ञातवानस्मि ॥ ९ ॥

अथदशमी–

अधद्युतानःपित्रोःसचासामनुतगुह्यंचारुपृश्नेः ।
मातुष्पदेपरमेअन्तिषद्गोर्वृष्णःशोचिषःप्रयतस्यजिह्वा ॥ १०॥२॥

अध । द्युतानः । पित्रोः । सचा । आसा । अमनुत । गुह्यम् ।
चारु । पृश्नेः । मातुः । पदे । परमे । अन्ति । सत् । गोः ।
वृष्णः । शोचिषः । प्रऽयतस्य । जिह्वा ॥ १० ॥ २ ॥

अध अथ द्युतानोदीप्यमानः पित्रोर्द्यावापृथिव्योः सचा सह मध्ये व्याप्तःसन् पृश्नेर्गोः संबन्धि चारुरमणीयं गुह्यमूधसिनिगूढंपयः आसा स्वकीयेनास्येन अमनुत पानायाबुध्यत उक्तमेवार्थंविवृणोति मातुःक्षीरादिनिर्मात्र्यागोः परमेपदे उत्कृष्टेस्थाने ऊधोलक्षणे अन्तिसत् समीपेविद्यमानंक्षीरं वृष्णः फलानांवर्षितुःशोचिषोदीप्तस्यप्रयतस्याहवनीयादिरूपेणनियतस्यवैश्वानरस्यजिह्वापातुमिच्छतीतिशेषः ॥ १० ॥

इतितृतीयस्यपंचमेद्वितीयोवर्गः ॥ २ ॥

अथैकादशी–

ऋतंवोचेनमसापृच्छ्यमानःस्तवाशसाजातवेदोयदीदम् ।
त्वमस्यक्षयसियद्धविश्वंदिवियद्द्रविणंयत्पृथिव्याम् ॥ ११ ॥

ऋ॒तम् । वा॒चे॒ । नम॑सा । पृ॒च्छ्यमा॑नः । तव॑ । आ॒ऽशसा॑ ।
जा॒त॒ऽवे॒द॒ः । यदि॑ । इ॒दम् । त्वम् । अ॒स्य । क्ष॒य॒सि॒ । यत् । ह॒ ।
विश्व॑म् । दि॒वि । यत् । ऊँ॒ इति॑ । द्रवि॑णम् । यत् । पृ॒थि॒व्याम् ॥ ११ ॥

अहंयजमानः नमसा नमस्कारेणसहपृच्छयमानः अन्यैरनुयुज्यमानःसन् ऋतंवोचे सत्यंब्रवीमि किंतदित्युच्यते–हेजातवेदः जातानांवेदितः जातप्रज्ञवाग्ने तवाशसा त्वत्स्तुत्यासाधनेनयदीदंधनंलब्धमस्माभिःस्यात् अस्यधनस्य त्वंक्षयसि त्वमेवेश्वरोभवसि तस्यधनस्ययज्ञादिद्वाराग्न्यर्थत्वादितिभावः अत्यल्पमिदमुक्तं यद्ध विश्वंयत्खलुकृत्स्नंधनमस्ति तस्यापीशिषे विश्वमितिसामान्येनयदुक्तं तदेवविशदयति–दिवि द्युलोके यदुद्रविणं यदेवधनं यच्चपृथिव्यां धनंतस्यसर्वस्यत्वमीश्वरोभवसि यज्ञार्थंद्रव्यमुत्पन्नमितिस्मरणात् अग्निव्यतिरेकेणयज्ञासंभवादितिभावः ॥ ११ ॥

अथद्वादशी–

किंनो॑अ॒स्यद्रवि॑ण॒ंकद्ध॒रत्न॒ंविनो॑वोचोजातवेदश्चि॒कि॒त्वान् ।
गुहा॒ध्व॑नःपर॒मंयन्नो॑अ॒स्यरेकु॑प॒दंनानि॑दा॒नाअग॑न्म ॥ १२ ॥

किम् । न॒ः । अ॒स्य । द्रवि॑णम् । कत् । ह॒ । रत्न॑म् । वि ।
न॒ः । वो॒च॒ः । जा॒त॒ऽवे॒द॒ः । चि॒कि॒त्वान् । गुहा॑ । अध्व॑नः । प॒र॒मम् ।
यत् । न॒ः । अ॒स्य । रेकु॑ । प॒दम् । न । नि॒दा॒नाः । अग॑न्म ॥ १२ ॥

पूर्वमंत्रेणयस्यधनस्याग्निस्वामित्वमुक्तं अस्यधनस्यकिंद्रविणं किंसाधनभूतंनोस्मभ्यं दातव्यंधनमस्ति कद्धरत्नं किंचरमणीयंहितकरंधनमस्ति तद्धनं हेजातवेदः जातधनाग्ने चिकित्वान् चेतनावानंभिज्ञस्त्वंनोस्मभ्यंविवोचः विब्रूहि यद्वा किंदातव्यंद्रविणमस्ति अस्यद्रविणराशेः कद्धरत्नमितियोज्यम्, अस्याध्वनः धनप्राप्तिमार्गस्य यत् गुहा गुहायांनिहितंगूढंपरममुत्कृष्टंप्राप्तव्यमस्तितदपिनोस्मभ्यंविवोचः वयं रेकुरिक्तंपदं गंतव्यंस्थानं गृहादिकं निदानाः अन्यैर्निन्द्यमानाः कर्मणिकर्तृप्रत्ययः नागन्म नप्राप्नुमः ॥ १२ ॥

Funding by IKS-MoE

अथत्रयोदशी–

का॒म॒र्या॑दा॑व॒युना॒कद्ध॑वा॒मम॒च्छा॑गमेमर॒घवो॑नवाजं॑म् ।
क॒दानो॑दे॒वीर॒मृत॑स्य॒पत्नी॒ःसूरो॒वर्णे॑नततन॒न्नु॒षासः॑ ॥ १३ ॥

का । म॒र्यादा॑ । व॒युना॑ । कत् । ह॒ । वा॒मम् । अच्छ॑ । ग॒मे॒म॒ ।
र॒घवः॑ । न । वाज॑म् । क॒दा । न॒ः । दे॒वीः । अ॒मृत॑स्य । पत्नीः॑ ।
सूर॑ः । वर्णे॑न । त॒त॒न॒न् । उ॒षसः॑ ॥ १३ ॥

कामर्यादा काप्राच्यादिव्यवस्था काचवयुना प्रज्ञानंपदार्थविषयम् किंचवामं वननीयंपदार्थजातं एतत्सर्वं अच्छ गमेम अधिगच्छेम तत्रदृष्टान्तः—रघवोन वाजं शीघ्रगामिनोश्वादयःसंग्राममिव तद्वत् कदाकस्मिन्कालेनोस्माकंव्यवहाराय देवीः देव्यः द्योतमानाः अमृतस्यामरणधर्मस्यादित्यस्यपत्नीः पत्न्यः पालयित्र्यः सूरः प्रसवित्र्यः उषसः वर्णेनप्रकाशेनततनन् विस्तारयेयुः एवंसूर्यसंबन्धिनःउषसःस्तुत्या सर्वात्मनोवैश्वानरस्यस्तुतिरवगन्तव्या तनोतेर्लेटि बहुलंछन्दसीतिविकरणस्यश्लुः द्विर्भावहलादिशेषौ ॥ १३ ॥

अथचतुर्दशी–

अ॒नि॒रे॒णव॒च॑साफ॒ल्ग्वे॑नप्र॒ती॑त्ये॑नकृ॒धुना॑तृ॒पासः॑ ।
अधा॒तेअ॑ग्ने॒किमि॒हाव॑द॒न्त्यना॒यु॒धास॒आस॑तासचन्ताम् ॥ १४ ॥

अ॒नि॒रेण॑ । वच॑सा । फ॒ल्ग्वे॑न । प्र॒तीत्ये॑न । कृ॒धुना॑ । अ॒तृ॒पासः॑ ।
अध॑ । ते । अ॒ग्ने॒ । किम् । इ॒ह । व॒द॒न्ति॒ । अ॒ना॒यु॒धासः॑ ।
अस॑ता । स॒च॒न्ता॒म् ॥ १४ ॥

अनिरेण इरान्नं तद्रहितेन फल्गवेन उक्थ्येन प्रतीत्येनप्रतिगन्तव्येन आरोह्येणेत्यर्थः कृधुनाह्रस्वेन कृध्विति ह्रस्वनाम कृधुकःवम्रकइतितन्नामसूक्तत्वात् एवंविधेनवचसा अतृपासः अतृप्ताः जनाः अध अधुनाइहास्मिन्लोके हेअग्ने ते त्वाम् किंवदन्ति निर्हविष्केणवचसानकिंचिल्लभ्यतइत्यर्थः किंतुअनायुधासः आयुधशब्दःसाधनंलक्षयति हविरादिसाधनरहितास्तेअसतादुःखेनसचन्तां संगच्छन्ताम् ॥ १४ ॥

अथपंचदशी—

अ॒स्यश्रि॒येस॑मिधा॒नस्य॒वृष्णो॒वसो॒रनी॑कं॒दम॒आरु॑रोच ।
रुश॒द्वसा॑नःसु॒दृशी॑करूपःक्षि॒तिर्न॑रा॒यापु॑रु॒वारो॑अद्यौत् ॥ १५॥३॥

अ॒स्य । श्रि॒ये । स॒म्ऽइ॒धा॒नस्य॑ । वृष्ण॑ः । वसो॑ः । अनी॑कम् । दमे॑ ।
आ । रु॒रो॒च॒ । रुश॑त् । वसा॑नः । सु॒दृशी॑कऽरूपः । क्षि॒तिः ।
न । रा॒या । पु॒रु॒ऽवार॑ः । अ॒द्यौ॒त् ॥ १५ ॥ ३ ॥

समिधानस्य समिध्यमानस्य कर्मणिकर्तृप्रत्ययः वृष्णोवर्षितुःफलस्य वसोर्वासयितुः अस्याग्नेरनीकंतेजःसंघः दमे यागगृहे आरुरोच सर्वतोदीप्यते किमर्थं श्रिये श्रेयसेयजमानानां सोग्निः रुशद्वर्णनामैतत् दीप्तंतेजोवसानःआच्छादयन् अतएवसुदृशीकरूपः सुष्ठु दर्शनीयरूपः पुरुवारः बहुभिर्ऋत्विग्भिर्यजमानैर्वरणीयःसन्नद्यौत् द्योतते किमिव राया अश्वादिधनेनक्षितिर्न राजादिरिव क्षितिरितिमनुष्यनाम ॥ १५ ॥

॥ इतितृतीयस्यपंचमेतृतीयोवर्गः ॥ ३ ॥

ऊर्ध्वऊषुणइत्येकादशर्चंषष्ठंसूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं ऊर्ध्वऊष्वेकादशेत्यनुक्रान्तम् प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौत्रैष्टुभेछन्दसीदं सूत्रितंच—ऊर्ध्वऊषुणससस्ययद्वियुतेतिपंचेति ।

तत्रप्रथमा—

ऊ॒र्ध्वऊ॒षुणो॑अध्वरस्यहोत॒रग्ने॒तिष्ठ॑दे॒वता॑ता॒यजी॑यान् ।
त्वंहिविश्व॑म॒भ्यसि॒मन्म॒प्रवे॒धस॑श्चित्तिरसिमनी॒षाम् ॥ १ ॥

ऊ॒र्ध्वः । ऊँ॒ इति॑ । सु । न॒ः । अ॒ध्व॒र॒स्य॒ । होत॒ः । अग्ने॑ । तिष्ठ॑ ।
दे॒वऽता॑ता । यजी॑यान् । त्वम् । हि । विश्व॑म् । अ॒भि । आसि॑ ।
मन्म॑ । प्र । वे॒धस॑ः । चि॒त् । ति॒र॒सि॒ । म॒नी॒षाम् ॥ १ ॥

हेअध्वरस्यहोतः यागसंबन्धिनांदेवानामाह्वातः यद्वा होतरित्यत्रप्रकृत्यंशोनुवादः हेहोमनिष्पादकाग्ने यजीयान्यष्टृतमस्त्वंनोस्माकंऊर्ध्वऊषुतिष्ठ उन्नतएवतिष्ठ नित्यमुन्नतोभवतीत्यर्थः कुत्रेतितदुच्यते—देवताता देवतातौ देवास्तायन्तेविस्तीर्यंतेत्रेतिदेवतातिर्यज्ञः तस्मिंस्त्वंहि

त्वंखलु विश्वंसर्वंमन्म मननीयंशत्रूणांधनमभ्यसि अभिभवसि किंच वेधसश्चित् चित्पूजायां स्तोतुर्यजमानादेर्मनीषांमतिंस्तुतिंगतिरसि प्रवर्धयसि प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ १ ॥

अथद्वितीया—

अमू॑रो॒होता॒न्य॑सादिवि॒क्ष्व१॒॑ग्निर्म॒न्द्रोवि॒दथे॑षु॒प्रचे॑ताः ।
ऊ॒र्ध्वंभा॒नुंस॑वि॒तेवा॑श्रे॒न्मेते॑वधू॒मंस्त॑भा॒य॒दुप॒द्याम् ॥ २ ॥

अमू॑रः । होता॑ । नि । अ॒सा॒दि॒ । वि॒क्षु । अ॒ग्निः । म॒न्द्रः । वि॒दथे॑षु ।
प्रऽचे॑ताः । ऊ॒र्ध्वम् । भा॒नुम् । स॒वि॒ताऽइ॑व । अ॒श्रे॒त् । मेता॑ऽइव ।
धू॒मम् । स्त॒भा॒य॒त् । उप॑ । द्याम् ॥ २ ॥

अमूरः अमूढः प्रगल्भइत्यर्थः होता होमनिष्पादकोमन्द्रोमदनीयः मादयितावा प्रचेताः प्रकृष्टज्ञानोग्निः देवः विक्षुऋत्विग्रूपासुप्रजासुमध्येविदथेषुयागेषुनिमित्तभूतेषुन्यसादि नितरांस्थापितः अथतथाभूतोग्निः भानुंदीप्तिंसवितेव उदितःसूर्यइव उर्ध्वमश्रेत्ऊर्ध्वमुखमाश्रयति किंच मेतेव स्थूणेव सायथास्वाधिष्ठितंवंशादिकंस्तभ्नातितद्वदयमग्निर्धूमंस्वोत्थितंद्यामुपद्युलोकस्योपरिस्तभायत् स्तभ्नाति ॥ २ ॥

अथतृतीया—

य॒तासु॑जू॒र्णी॑रा॒तिनी॑घृ॒ताची॑प्रद॒क्षि॒णिद्दे॒वता॑तिमु॒रा॒णः ।
उ॒दु॒स्वरु॑र्नव॒जानाक्रः॑प॒श्वोअ॑नक्ति॒सुधि॑तः॒सुमे॑कः ॥ ३ ॥

य॒ता । सु॒ऽजूर्णि॑ः । रा॒तिनी॑ । घृ॒ताची॑ । प्र॒ऽद॒क्षि॒णित् ।
दे॒वऽता॑तिम् । उ॒रा॒णः । उत् । ऊँ॒ इति॑ । स्वरु॑ः । न॒व॒ऽजाः ।
न । अ॒क्रः । प॒श्वः । अ॒न॒क्ति॒ । सुऽधि॑तः । सु॒ऽमेक॑ः ॥ ३ ॥

यता संयता सुजूर्णिः शोभनजवा सुष्ठुजीर्णापुराणीवा घृतमंचतीतिघृताची जुहूः रातिनी रातिर्धनं हविर्लक्षणधनवती आज्यपूर्णाभवतीत्यर्थः देवतातिंयज्ञं तथा उराणउरुकुर्वाणोध्वर्युरग्निर्वा प्रदक्षिणमेतीतिप्रदक्षिणित् प्रदक्षिणगमनोभवति अकारलोपश्छान्दसः नवजाः नवजातः तदानीमेवोत्पादितः स्वरुर्न यूपशकलवाची स्वरुरत्रयूपंलक्षयति चषालवन्तः स्वरवः पृथिव्यामित्यादिषुस्वरुशब्देनयूपाभिधानाच्च नकारःसमुच्चयेयूपोपिउदुउपसर्गश्रुतेर्योग्यक्रियाध्या-

हारः उन्नतोभवति किंच अक्रः आक्रमिता सुमेकःसुदीप्तः सुधितःस्वधितिरित्यर्थः सोपिपश्वः पशूननक्तिगच्छति यद्वा सुधितः स्वरुरेवउदुउत्कृष्टः पश्वःपशूननक्ति स्वरुणापशुमनक्तीतिश्रुतेः ॥ ३ ॥

अथचतुर्थी–

स्तीर्णेबर्हिषिसमिधानेअग्नाऊर्ध्वोअध्वर्युर्जुजुषाणोअस्थात् ।
पर्यग्निःपशुपानहोतात्रिविष्टयेतिप्रदिवउराणः ॥ ४ ॥

स्तीर्णे । बर्हिषि । सम्ऽइधाने । अग्नौ । ऊर्ध्वः । अध्वर्युः ।
जुजुषाणः । अस्थात् । परि । अग्निः । पशुऽपाः । न ।
होता । त्रिऽविष्टि । एति । प्रऽदिवः । उराणः ॥ ४ ॥

बर्हिषि वेद्यां स्तीर्णेआस्तृतेसति अग्नावाहवनीयादिकेसमिधाने सम्यगिध्यमाने सत्यध्वर्युरध्वरस्यनेताजुजुषाणोदेवान्प्रीणयन् ऊर्ध्वोस्थात् तिष्ठति होता होमनिष्पादकः प्रदिवः पुराणनामैतत् पुरातनः उराणः स्वल्पमपिहविर्देवयोग्यत्वसंपादनेनोरुकुर्वाणः उराणउरुकुर्वाणइतिनिरुक्तम्[1] । यद्वैदेवैर्जोष्यतेहविस्तद्विरिमात्रंवर्धतइतिश्रुतेः । अग्नेरुरुकरणमुचितम् ईदृशोग्निः पशुपान पशूनांपालकइव पशून्त्रिविष्टि त्रिरावृत्यपर्येति त्रिर्हिपर्यग्निःक्रियते॥ ४ ॥

अथपंचमी–

परित्मनामितद्रुरेतिहोताग्निर्मन्द्रोमधुवचाऋतावा ।
द्रवन्त्यस्यवाजिनोनशोकाभयन्तेविश्वाभुवनायदभ्राट् ॥५॥४॥

परि । त्मना । मितऽद्रुः । एति । होता । अग्निः । मन्द्रः ।
मधुऽवचाः । ऋतऽवा । द्रवन्ति । अस्य । वाजिनः । न ।
शोकाः । भयन्ते । विश्वा । भुवना । यत् । अभ्राट् ॥ ५ ॥ ४ ॥

उक्तमेवार्थंस्पष्टयति–अयंहोता होमनिष्पादकोग्निः त्मना आत्मना स्वरूपेणैव मितद्रुः परिमितगतिःसन् पर्येति परितोगच्छतिपशुम् कीदृशोयं मन्द्रोमदनीयः मोदयितावा मधुवचाः मधुरवचनः ऋतावा यज्ञवान् वाजिनोहविष्मतोस्याग्नेः शोकान दीप्तयोपि नशब्दोप्यर्थे द्रवन्ति

---

१ नि० ६. १७. ।

गछन्तिपरितः यद्वा नकारउपमार्थीयः वाजिनोन अश्वाइव द्रवन्तीतियोज्यम् यद्यस्मादयंअ-भ्राट् भ्राजते तस्माद्विश्वाभुवना सर्वाणिभूतजातानि भयन्ते भीतानिभवन्ति॥ ५. ॥

॥ इतितृतीयस्यपंचमेचतुर्थोवर्गः ॥ ४ ॥

अथषष्ठी–

भ॒द्राते॑अ॒ग्ने॒स्वनीकसं॒दृग्घो॒रस्य॑स॒तोविषु॑णस्य॒चारुः॑ ।
नयत्ते॑शो॒चिस्तम॑सा॒वर॑न्त॒नध्व॒स्मान॑स्त॒न्वी॒३॑रेप॒आधुः॑ ॥ ६ ॥

भ॒द्रा । ते॒ । अ॒ग्ने॒ । सु॒ऽअ॒नी॒क॒ । स॒म्ऽदृक् । घो॒रस्य॑ । स॒तः ।
विषु॑णस्य । चारुः॑ । न । यत् । ते॒ । शो॒चिः । तम॑सा । वर॑न्त ।
न । ध्व॒स्मानः॑ । त॒न्वि॑ । रेपः॑ । आ । धु॒रिति॑धुः ॥ ६ ॥

हेस्वनीक शोभनज्वालाग्ने घोरस्यभीतिजनकस्यापिसतः विषुणस्य विष्वक्सर्वतोव्याप्तस्य ते तव चारुः रमणीयाभद्रास्तुत्याकल्याणीवामूर्तिः सन्दृक् सन्दृष्टिः सम्यक्दृश्याभवतीत्यर्थः यद्यस्मात्तेशोचिर्दीप्तिं तमसान्धकारेण नवरन्त नवारयन्तिनिशाः यस्माच्च ध्वस्मानोध्वंसकाराक्षसादयः तेतन्वि तवशरीरे रेपः पापं ध्वंसनादिरूपं नाधुः नदधति नकुर्वन्ति अतःसन्दृगितिसंबन्धः ॥ ६ ॥

अथसप्तमी–

नयस्य॒सातु॒र्ज॑नि॑तो॒रवा॑रि॒नमा॒तरा॑पि॒तरा॒नूचि॑दि॒ष्टौ ।
अधा॑मि॒त्रोनसुधि॑तःपाव॒को॒३॑ग्निर्दी॑दाय॒मानु॑षीषुवि॒क्षु ॥ ७ ॥

न । यस्य॑ । सातुः॑ । जनि॑तोः । अवा॑रि । न । मा॒तरा॑ । पि॒तरा॑ ।
नु । चि॒त् । इ॒ष्टौ । अध॑ । मि॒त्रः । न । सुऽधि॑तः । पा॒व॒कः ।
अ॒ग्निः । दी॒दा॒य॒ । मानु॑षीषु । वि॒क्षु ॥ ७ ॥

जनितोर्जनयितुर्वृष्ट्युत्पादकस्य यस्य वैश्वानरस्य सातुः सनिः पश्वादिलक्षणं दानं दीप्तिर्वा नावारि केनापिनवार्यते किंच मातरापितरा मातापितरौ द्यावापृथिव्यौ यस्येष्टौप्रेषणेनूचित्क्षिप्रमेवनप्रभवतः अधापिच मित्रोन सखेव सुधितः सुतृप्तः पावकः शोधकोग्निः मानुषीषु

Funding by IKS-MoE

मनोःसंबन्धिनीषुविक्षुप्रजासुदीदाय दीप्यते दीपीदीप्तौ पकारलोपश्छान्दसः व्यत्ययेनपरस्मैपदं लिटि अभ्यासस्यह्रस्वेकृते तुजादित्वाद्दीर्घत्वम् ॥ ७ ॥

अथाष्टमी–

द्विर्यंपञ्चजीजनन्त्संवसानाःस्वसारोअग्निंमानुषीषुविक्षु ।
उषर्बुधमथर्यो३नदन्तंशुक्रंस्वासंपरशुंनतिग्मम् ॥ ८ ॥

द्विः । यम् । पञ्च । जीजनन् । सम्ऽवसानाः । स्वसारः ।
अग्निम् । मानुषीषु । विक्षु । उषःऽबुधम् । अथर्यः । न ।
दन्तम् । शुक्रम् । सुऽआसम् । परशुम् । न । तिग्मम् ॥ ८ ॥

मानुषीषुमनोःसंबन्धिनीषु विक्षु प्रजासु संवसानाः संगच्छमानाः द्विःपंच दश स्वसारः अंगुलयः यमग्निंजीजनन् मंथनेनउदपादयन् जनीप्रादुर्भावे लङि छांदसत्वादडभावः कीदृशं अथर्योनस्त्रियइव उषर्बुधं उषसिबुध्यमानं दंतंहविषांभक्षकं शुक्रं रश्मिभिर्दीप्यमानं स्वासं शोभनास्यं तिग्मं तीक्ष्णं परशुंन परशुमिव रक्षसांहन्तारमितिशेषः ॥ ८ ॥

अथनवमी–

तवत्येअग्नेहरितोघृतस्नारोहितासऋज्वंचस्वश्वः ।
अरुषासोवृषणऋजुमुष्काआदेवतातिमह्वन्तदस्माः ॥ ९ ॥

तव । त्ये । अग्ने । हरितः । घृतऽस्नाः । रोहितासः । ऋजुऽअञ्चः ।
सुऽअश्वः । अरुषासः । वृषणः । ऋजुऽमुष्काः । आ ।
देवऽतातिम् । अह्वन्त । दस्माः ॥ ९ ॥

हेअग्ने त्ये ते प्रसिद्धाः तवहरितः त्वत्संबन्धिनोश्वाः देवतातिमस्मदीयंयागंप्रतिआह्वन्त ऋत्विग्भिराहूयन्ते लुङिसिचिह्वश्चेत्यङादेशः कीदृशाः घृतस्नाः घृतस्नुवः बलातिशयान्नासापुटादिस्थानेभ्यउदकंक्षरन्तः रोहितासः रोहितालोहितवर्णाः ऋज्वंचः ऋजुअकुटिलंअंचन्ति गच्छन्तीतिऋज्वंचः सुष्ठुगच्छन्तः अरुषासःआरोचमानाःवृषणःयुवानःवर्षितारोवा वाषपूर्वस्य निगमेइतिविकल्पेनदीर्घविधानादत्रदीर्घाभावः ऋजुमुष्काः साधनमुष्काः दस्माः दर्शनीयाः ॥९॥

अथदशमी—

येह॒त्येते॒सह॑मानाअ॒यास॑स्त्वे॒षासो॑अग्नेअ॒र्चय॑श्चर॑न्ति ।
श्ये॒नासो॒नदु॒वस॒नासो॒अर्थं॑तुवि॒ष्व॒णसो॒मारु॑तं॒नशर्धः॑ ॥ १० ॥

ये । ह॒ । त्ये । ते॒ । सह॑मानाः । अ॒यासः॑ । त्वे॒षासः॑ । अ॒ग्ने॒ ।
अ॒र्चयः॑ । चर॑न्ति । श्ये॒नासः॑ । न । दु॒व॒सनासः॑ । अर्थ॑म् ।
तु॒वि॒ऽस्व॒नसः॑ । मारु॑तम् । न । शर्धः॑ ॥ १० ॥

हेअग्ने येहखलु त्येतेप्रसिद्धाः सहमानाः शत्रूनभिभवन्तः अयासोगमनशीलाः त्वेषासोदीप्ताः दुवसनासः परिचरणीयाः तेत्वदीयाअर्चयोरश्मयः श्येनासोन अश्वाइव अर्थं गन्तव्यम् चरन्ति गच्छन्ति कीदृशाः मारुतंशर्धोन मरुत्संबन्धीगणइव तुविष्वणसः तुविस्वनाः अधिकध्वनयोभवन्ति ॥ १० ॥

अथैकादशी—

अका॑रि॒ब्रह्म॑समिधान॒तुभ्यं॒शंसा॑त्यु॒क्थंयज॑ते॒व्यू॑धाः ।
होता॑रम॒ग्निंमनु॑षो॒निषे॑दुर्नम॒स्यन्त॑उ॒शिजः॒शंस॑मा॒योः ॥ ११ ॥५॥

अका॑रि । ब्रह्म॑ । स॒म्ऽइ॒धा॒न॒ । तुभ्य॑म् । शंसा॑ति । उ॒क्थम् ।
यज॑ते । वि । ऊँ इति॑ । धा॒ः । होता॑रम् । अ॒ग्निम् । मनु॑षः ।
नि । से॒दुः॒ । न॒म॒स्यन्तः॑ । उ॒शिजः॑ । शंस॑म् । आ॒योः ॥ ११ ॥ ५ ॥

हेसमिधान समिध्यमानाग्ने तुभ्यं त्वदर्थंब्रह्मस्तोत्रं अकारि अस्माभिःकृतं होता उक्थंशस्त्ररूपंस्तोत्रंशंसाति शंसति शंसुस्तुतौ लेटोडाटावित्याडागमः त्वांयजमानोयजते अतःकारणादस्मभ्यं धनंविधाः विधेहि दधातेश्छान्दसेलुङि बहुलंछन्दसीत्यडभावः उइतिपूरणः किंच आयोर्मनुष्यस्यशंसं शंसनीयं होतारं देवानामाह्वातारं अग्निं त्वांनमस्यन्तःपूजयन्तः उशिजः पश्वादिलक्षणंधनंकामयमानाःमनुषोमनुष्याऋत्विजःनिषेदुः उपाविशन् सेवन्तइत्यर्थः ॥ ११ ॥

॥ इतितृतीयस्यपंचमेपंचमोवर्गः ॥ ५ ॥

Funding by IKS-MoE

अयमिहेत्येकादशर्चंसप्तमंसूक्तं वामदेवस्यार्षमाग्नेयं आद्याजगती द्वितीयाद्याःपंचानुष्टुभः शिष्टास्त्रिष्टुभः तथाचानुक्रान्तम्—अयमिहादौजगतीपंचानुष्टुभइति । सूक्तविनियोगोलैंगिकः अग्निप्रणयनेयमिहेतिवैश्यस्यप्रतिपत् तथाचसूत्रितम्—अयमिहप्रथमोधायिधातृभिरितितुराजन्यवैश्ययोराद्येइति ।

तत्रप्रथमा—

अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः ।
यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे ॥ १ ॥

अयम् । इह । प्रथमः । धायि । धातृऽभिः । होता ।
यजिष्ठः । अध्वरेषु । ईड्यः । यम् । अप्नवानः । भृगवः ।
विऽरुरुचुः । वनेषु । चित्रम् । विऽभ्वम् । विशेऽविशे ॥ १ ॥

धातृभिर्यज्ञार्थंकर्मकुर्वद्भिः अध्वर्युभिरिहास्मिन्यज्ञेहोतादेवानामाह्वातायजिष्ठः अतिशयेनयष्टा अध्वरेषुयागेषु ईड्यः ऋत्विग्भिःस्तूयमानःप्रथमः सर्वेषांदेवानांमुख्यः अयमाहवनीयादिस्थानेषुप्रत्यक्षेणोपलभ्यमानोग्निः धायि अधायि निहितः दधातेःकर्मणिलुङ् बहुलंछन्दस्यमाङ्योगेइत्यडभावः तिङ्ङतिङइतिनिघातः अयमग्निरित्युक्तं कोसावग्निरित्यतआह—अप्नवानः भृगुसंबन्धी कश्चिदृषिः सच अन्येभृगवश्चवनेष्वरण्येषुचित्रंदावाग्निरूपेणबहुधादर्शनीयंविशेविशे वीप्सयासर्वजनव्याप्तिर्गृह्यते सर्वस्यविशःप्रजायाः विभ्वं विभुमीश्वरंयंदेवानांहविर्वाहकत्वेनप्रसिद्धमग्निंविरुरुचुर्दीप्तियुक्तंकुर्वन्तिस्म । यमिति यच्छब्दस्य अयमितीदंशब्देनसंबन्धः ॥ १ ॥

अग्नेकदातइतिप्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतावानुष्टुभेछन्दसि अग्नेकदातइत्याद्याःपंचर्चः सूत्रितंच—अग्नेकदातइतिपंचेति ।

सूक्तेद्वितीया—

अग्नेकदातआनुषग्भुवद्देवस्य चेतनम् ।
अधाहित्वांजगृभ्रिरेमर्तासोविक्ष्वीड्यम् ॥ २ ॥

अग्ने । कदा । ते । आनुषक् । भुवत् । देवस्य । चेतनं । अध ।
हि । त्वा । जगृभ्रिरे । मर्तासः । विक्षु । ईड्यम् ॥ २ ॥

हेअग्ने अधातःकारणाद्देवस्यद्योतमानस्यतेतवसंबन्धि चेतनं तेजः कदा आनुषक् अनुषक्तंभुवत् भवेत् लेटयडागमः बहुलंछन्दसीतिविकरणस्यलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः अतःकारणादित्युक्तं कस्माद्धेतोरित्युच्यते हियस्मात्कारणात् मर्तासोमनुष्याः विक्षु विड्भिः प्रजाभिः ईड्यंस्तुत्यं त्वा त्वां जगृभ्रिरे जगृहिरे गृह्णन्ति ग्रहेर्धातोर्लिटिहग्रहोर्भइतिभत्वं बहुलंछन्दसीतिरुडागमः ॥ २ ॥

अथतृतीया—

ऋतावानंविचेतसंपश्यन्तोद्यामिवस्तृभिः ।
विश्वेषामध्वराणांहस्कर्तारंदमेदमे ॥ ३ ॥

ऋतऽवानम् । विऽचेतसम् । पश्यन्तः । द्याम्ऽइव । स्तृऽभिः ।
विश्वेषाम् । अध्वराणाम् । हस्कर्तारम् । दमेऽदमे ॥ ३ ॥

ऋतावानं अमायिनं विचेतसं विशिष्टज्ञानं स्तृभिर्नक्षत्रैःपरिवृतं द्यामिवविस्फुलिंगैःसमेतंविश्वेषांसर्वेषामध्वराणांयज्ञानांहस्कर्तारं प्रभासकंवृद्धेःकर्तारंवाग्निंपश्यन्तः ऋत्विगादयः दमेदमेसर्वस्मिन्यज्ञगृहे जगृभ्रिरइतिपूर्वेणसंबन्धः ॥ ३ ॥

अथचतुर्थी—

आशुंदूतंविवस्वतोविश्वायश्चर्षणीरभि ।
आजभ्रुःकेतुमायवोभृगवाणंविशेविशे ॥ ४ ॥

आशुम् । दूतम् । विवस्वतः । विश्वाः । यः । चर्षणीः । अभि ।
आ । जभ्रुः । केतुम् । आयवः । भृगवाणम् । विशेऽविशे ॥ ४ ॥

योग्निः विश्वाश्चर्षणीः सर्वाः प्रजाः अभिभवति आयवोमनुष्याः आयवइतिमनुष्यनाम आयवोयदवइतिमनुष्यनामसुपाठात् आशुंक्षिप्रगामिनं विवस्वतोमनुष्यस्ययजमानस्य दूतंविवस्वतइतिमनुष्यनामेदं केतुंप्रज्ञापकं भृगवाणं भृगुवदाचरंतं दीप्यमानमित्यर्थः सर्वप्राति-

पदिकेभ्यःक्विबकव्यइतिक्विप् तदन्ताल्लटोव्यत्ययेनशानच् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेप्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं तमग्निंविशेविशे सर्वस्यैप्रजायै आजभ्रुः आजह्रुः हृग्रहोर्भइति भत्वम्॥४॥

अथपंचमी—

तमीं॒होता॑रमानु॒षक्चि॑कि॒त्वांसं॒निषे॑दिरे ।
र॒ण्वंपा॑व॒कशो॑चि॒षं॒यजि॑ष्ठंस॒प्तधाम॑भिः ॥ ५ ॥ ६ ॥

तम् । ई॒म् । होता॑रम् । आ॒नु॒षक् । चि॒कि॒त्वांस॑म् । नि । से॒दि॒रे ।
र॒ण्वम् । पा॒व॒कऽशो॑चिषम् । यजि॑ष्ठम् । स॒प्त । धाम॑ऽभिः ॥ ५॥६॥

ऋत्विगादयोमनुष्याः आनुषक् आनुपूर्व्येणहोतारं देवानामाह्वातारं चिकित्वांसं जानन्तं कितज्ञाने लिटःक्वसुः द्विर्भावहलादिशेषचुत्वदीर्घाः प्रत्ययःस्वरः तमीं तमिममग्निं निषेदिरे निषादयन्तिस्म कीदृशं रण्वं रमणीयं पावकशोचिषं शोधकदीप्तिं यजिष्ठं यष्टृतमं सप्त सप्तभिर्धामभिस्तेजोभिर्युक्तम् ॥ ५ ॥

॥ इतितृतीयस्यपंचमेषष्ठोवर्गः ॥ ६ ॥

अथषष्ठी—

तंशश्व॑तीषुमा॒तृषु॒वन॒आवी॒तम॑श्रितम् ।
चि॒त्रंसन्तं॒गुहा॑हि॒तंसु॒वेदं॑कूचिद॒र्थिन॑म् ॥ ६ ॥

तम् । शश्व॑तीषु । मा॒तृषु॑ । वने॑ । आ । वी॒तम् । अश्रि॑तम् । चि॒त्रम् ।
सन्त॑म् । गुहा॑ । हि॒तम् । सु॒ऽवेद॑म् । कू॒चि॒त्ऽअ॒र्थिन॑म् ॥ ६ ॥

शश्वतीषु बह्वीषु मातृष्वप्सुताः सस्यादिनिर्मातृकत्वान्मातरइत्युच्यन्ते वने आवृक्षसमूहेच आकारश्चार्थे सन्तं विद्यमानं वीतं कान्तं अश्रितं प्राणिभिर्दाहभयादसेवितंदुरासदमित्यर्थः चित्रं चायनीयं गुहागुहायां हितं निहितं सुवेदं सुविज्ञानं सुधनंवाकूचिदर्थिनं क्वापि हविषिअर्थिनंसमिदाज्यपुरोडाशादिहविःस्वीकुर्वन्तं क्वेत्यत्रवकारस्यछान्दसेसंप्रसारणेपरपूर्वत्वे चहलइतिदीर्घत्वं एवंभूतमग्निं निषेदिरे इतिपूर्वेणसंबन्धः ॥ ६ ॥

प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभेछन्दसिससस्ययद्वियुतेत्याद्याःपंचर्चः सूत्रितंच—ससस्ययद्वियुतेतिपंचेति ।

Funding by IKS-MoE

तत्रसप्तमी–

स॒सस्य॒यद्वियु॑ता॒सस्मि॒न्नूध॑न्नृ॒तस्य॒साम॑न्र॒णय॑न्तदे॒वाः ।
म॒हाँअ॒ग्निर्नम॑सारा॒तह॑व्यो॒वेर॑ध्व॒राय॒सद॒मिदृ॒तावा॑ ॥ ७ ॥

स॒सस्य॑ । यत् । विऽयु॑ता । सस्मि॑न् । ऊध॑न् । ऋ॒तस्य॑ । साम॑न् ।
र॒णय॑न्त । दे॒वाः । म॒हान् । अ॒ग्निः । नम॑सा । रा॒तऽह॑व्यः । वेः ।
अ॒ध्व॒राय॑ । सद॑म् । इत् । ऋ॒तऽवा॑ ॥ ७ ॥

यत् यमग्निं देवाःस्तोतारः ससस्य स्वप्नस्य वियुतावियुते वियोगेउषसीत्यर्थः ऋतस्योदकस्यधामन्धामनिस्थाने सस्मिन्सर्वस्मिन्नूधन्नूधनि यज्ञे रणयन्त रमयन्ति स्तोत्रैरितिशेषः महान्प्रभूतः नमसा नमस्कारेणरातहव्यः दत्तहविष्कः ऋतावा सत्यवान्सोग्निः सदमित्सदैवाध्वरायाध्वरंयजमानैःकृतंयज्ञं सुपांसुपोभवन्तीतिवक्तव्यमितिवचनादत्रद्वितीयार्थेचतुर्थी वेः वेत्तिजानाति यद्वा देवाइन्द्रादयः ससस्य ऋत्विग्भिःसेव्यस्य यत्यस्याग्नेः वियुता विशिष्टेसस्मिन्भजनीयेऋतस्यसत्यस्यधामन्धामनियोनौ ऊधन्नूधनियज्ञेरणयन्त रमयन्ते महान्प्रभूतः नमसाहविषा रातहव्योदत्तहविष्कः ऋतावा सत्यवान्सोग्निः अध्वराय यज्ञार्थं सदमित् सदैववेर्गन्ताभवति अध्वराययज्ञं वेःकामयतेवा ॥ ७ ॥

अथाष्टमी–

वेर॑ध्व॒रस्य॑दू॒त्या॑निवि॒द्वानु॒भेअ॒न्तारोद॑सीसञ्चिकि॒त्वान् ।
दू॒तई॑यसेप्र॒दिव॑उरा॒णोवि॒दुष्ट॑रोदि॒वआ॒रोध॑नानि ॥ ८ ॥

वेः । अ॒ध्व॒रस्य॑ । दू॒त्या॑नि । वि॒द्वान् । उ॒भे इति॑ । अ॒न्तरिति॑ ।
रोद॑सी॒ इति॑ । स॒म्ऽचि॒कि॒त्वान् । दू॒तः । ई॒य॒से॒ । प्र॒ऽदिव॑ः । उ॒रा॒णः ।
वि॒दुःऽत॑रः । दि॒वः । आऽरोध॑नानि ॥ ८ ॥

हेअग्ने विद्वान्सर्वंजानानस्त्वं अध्वरस्ययज्ञस्यसंबन्धीनि दूत्यानि दूतकर्माणि वेः वेत्सि कामयसेवा यद्वा वेरितियज्ञविशेषणं वेः यजमानस्याभीष्टफलजनकस्याध्वरस्ययागस्यसंबन्धीनि दूत्यानि दूतकर्माणि विद्वान् जानन् उभेरोदसी उभयोरोदस्योर्द्यावापृथिव्योरन्तर्मध्येस्थितमंतरिक्षंसंचिकित्वान्सम्यग्जानन्प्रदिवः पुराणः पुराणनामेदम् प्रत्नंप्रदिव-

Funding by IKS-MoE

इति पुराणनामसुपाठात् उराणः अल्पमपिहविः उरुबहुकुर्वाणः उराणउरुकुर्वाणइतियास्केनोक्तत्वात् । विदुष्टरः विद्वत्तरः देवानांदूतस्त्वं दिवःस्वर्गस्यआरोधनानि आरोहणानि आरोहणार्हाणिस्थानानीत्यर्थः देवानांहवींष्यर्पयितुमीयसेगच्छसि ॥ ८ ॥

अथनवमी–

कृ॒ष्णंत॒एम॒रुश॑तःपु॒रोभाश्च॑रि॒ष्ण्व१॒॑र्चिर्वपु॑षा॒मिदेक॑म् ।
यदप्र॑वीता॒दध॑तेह॒गर्भं॑स॒द्यश्चि॑ज्जा॒तोभव॒सीदु॑दू॒तः ॥ ९ ॥

कृ॒ष्णम् । ते॒ । एम॑ । रुश॑तः । पु॒रः । भाः । च॒रि॒ष्णु । अ॒र्चिः॑ ।
वपु॑षाम् । इत् । एक॑म् । यत् । अप्र॑ऽवीता । दध॑ते । ह॒ ।
गर्भ॑म् । स॒द्यः । चि॒त् । जा॒तः । भव॑सि । इत् । ऊँ॒ इति॑ । दू॒तः ॥ ९॥

हेअग्ने रुशतः रोचमानस्य ते तव संबन्धि अत्रैम एमन्शब्देनगमनमार्गंउच्यते एमवर्त्म कृष्णं कृष्णवर्णंभवति भाः तवसंबन्धिनीदीप्तिः पुरः पुरस्ताद्भवति चरिष्णु संचरणशीलंअर्चिः त्वदीयंतेजः वपुषांवपुष्मतांरूपवतांतेजस्विनामित्यर्थः एकमित् मुख्यमेवभवति यत्वयंत्वांअप्रवीतां अनुपगतायजमानाः गर्भंत्वज्जननहेतुमरणिंदधतेह धारयन्ति खलु सत्वं सद्यश्चित् सद्यएव जातउत्पन्नःसन् दूतोभवसीदु यजमानस्यदूतोभवस्येव ॥ ९ ॥

अथदशमी–

स॒द्योजा॒तस्य॒ददृ॑शा॒नमोजो॒यद॑स्य॒वातो॑अनु॒वाति॑शो॒चिः ।
वृ॒णक्ति॑ति॒ग्माम॑त॒सेषु॑जि॒ह्वांस्थि॒राचि॒दन्ना॑दयते॒विजम्भैः॑ ॥ १० ॥

स॒द्यः । जा॒तस्य॑ । ददृ॑शानम् । ओजः॑ । यत् । अ॒स्य॒ । वातः॑ ।
अ॒नु॒ऽवाति॑ । शो॒चिः । वृ॒णक्ति॑ । ति॒ग्माम् । अ॒त॒सेषु॑ । जि॒ह्वाम् ।
स्थि॒रा । चि॒त् । अन्ना॑ । द॒य॒ते॒ । वि । जम्भैः॑ ॥ १० ॥

सद्योजातस्य अरणिनिर्मन्थनादनन्तरमेवउत्पन्नस्याग्नेःओजस्तेजः ददृशानं ऋत्विगादिभिर्दृश्यमानंभवतीतिशेषः वातोवायुःयद्यदास्याग्नेःशोचिर्दीप्तिः अन्वनुलक्षीकृत्यवातिगच्छति

नि० ६. १७. ।

Funding by IKS-MoE

तदासोयमग्निःअतसेषु वृक्षसंघेषु तिग्मां तीक्ष्णांजिह्वांज्वालांवृणक्तिसंयोजयति स्थिरांचित् स्थिराण्यपि अन्ना अन्नरूपाणिकाष्ठादीनिजंभैस्तेजोभिः विदयते विखंडयति भक्षयतीत्यर्थः ॥ १० ॥

अथैकादशी—

तृ॒षुयदन्ना॑तृ॒षुणा॑व॒वक्ष॑तृ॒षुंदू॒तंकृ॑णुतेय॒ह्वोअ॒ग्निः ।
वात॑स्यमे॒ळिंस॑चतेनि॒जूर्वं॑ना॒शुंनवा॑जयतेहि॒न्वेअर्वा॑ ॥ ११ ॥ ७ ॥

तृ॒षु । यत् । अन्ना॑ । तृ॒षुणा॑ । व॒वक्ष॑ । तृ॒षुम् । दू॒तम् । कृ॒णु॒ते॒ ।
य॒ह्वः । अ॒ग्निः । वात॑स्य । मे॒ळिम् । स॒च॒ते॒ । नि॒ऽजूर्व॑न् । आ॒शुम् ।
न । वा॒ज॒य॒ते॒ । हि॒न्वे । अर्वा॑ ॥ ११ ॥ ७ ॥

यद्यःअग्निः तृषु क्षिप्रमेव अन्ना अन्नानि काष्ठादीनि तृषुणा क्षिप्रेण रश्मिसमूहेन ववक्ष वहति दहतीत्यर्थः यह्वः महानसोग्निः तृषुमात्मानंदूतंकृणुते यजमानदूतंकरोति निजूर्वन्काष्ठानिनिःशेषेणदहन्नग्निः वातस्यवायोः मेळिं बलं सचतेसेवते आशुंन अश्वसादी यथा अश्वं तथा अर्वागमनशीलोग्निः स्वरश्मिवाजयते वाजिनंबलवन्तंकरोति हिन्वे प्रेरयतिच ॥ ११ ॥

॥ इतितृतीयस्यपंचमेसप्तमोवर्गः ॥ ७ ॥

दूतंवइत्यष्टर्चमष्टमंसूक्तं वामदेवस्यार्षं गायत्रीछन्दस्कं अग्निदेवताकं तथाचानुक्रम्यते—दूतंवोष्टौगायत्रंत्विति । व्यूळ्हेदशरात्रेप्रथमेन्छन्दोमेइदंसूक्तंजातवेदस्यनिविद्धानीयं तथाचसूत्रम्—दूतंवइत्याग्निमारुतमिति । इदमादिकेद्वेसूक्तेप्रातरनुवाकस्याग्नेयेक्रतौगायत्रेछन्दसिविनियुक्ते सूत्रितंच—अग्नेपावकदूतंवइतिसूक्तेइति ।

तत्रप्रथमा—

दू॒तंवो॑वि॒श्ववे॑दसंह॒व्य॒वाह॒मम॑र्त्यम् । यजि॑ष्ठमृञ्जसेगि॒रा ॥ १ ॥

दू॒तम् । व॒ः । वि॒श्वऽवे॑दसम् । ह॒व्य॒ऽवाह॑म् । अम॑र्त्यम् ।
यजि॑ष्ठम् । ऋ॒ञ्ज॒से॒ । गि॒रा ॥ १ ॥

Funding by IKS-MoE

हेअग्ने विश्ववेदसं विश्वंसमस्तंवेदोधनंयस्यासौविश्ववेदाःतं सर्वविदंवाहव्यवाहंदेवेभ्योहविषांवोढारं अमर्त्यममरणधर्माणंयजिष्ठमतिशयेनयष्टारं दूतं देवानांवः त्वांगिरास्तुतिरूपयावाचाऋंजसे यजमानोहंप्रसाधयामि वर्धयामीत्यर्थः ऋंजतिःप्रसाधनंकर्मेतियास्कः[1] ॥ १ ॥

अथद्वितीया—

सहिवेदा॒वसु॑धिति॑म॒हाँआ॒रोध॑नंदि॒वः । सदे॒वाँएहव॑क्षति ॥२॥

सः । हि । वेद॑ । वसु॑ऽधितिम् । म॒हान् । आ॒ऽरोध॑नम् ।

दि॒वः । सः । दे॒वान् । आ । इ॒ह । व॒क्ष॒ति॒ ॥ २ ॥

सहि प्रसिद्धएवाग्निः वसुधितिं यजमानाभीष्टफलरूपधनस्यदानं वेद वेत्ति महान्प्रभूतोग्निः दिवआरोधनंआरोहणंदेवानांस्थानंवेत्ति सोग्निरिहास्मिन्यज्ञेदेवानिन्द्रादीनावक्षति आवहतु वहेर्धातोर्लिङर्थेलेडितिलेट् तस्यतिप् सिब्बहुलंलेटीतिसिप् लेटोडाटावित्यडागमश्च होढइति ढत्वं ढत्वकत्वषत्वानि तिङ्ङतिङइतिनिघातः ॥ २ ॥

अथतृतीया—

सवे॑ददे॒वआ॒नमं॑दे॒वाँऋ॑ताय॒तेदमे॑ । दाति॑प्रि॒याणि॑चि॒द्वसु॑ ॥ ३ ॥

सः । वे॒द॒ । दे॒वः । आ॒ऽनम॑म् । दे॒वान् । ऋ॒त॒ऽय॒ते ।

दमे॑ । दाति॑ । प्रि॒याणि॑ । चि॒त् । वसु॑ ॥ ३ ॥

देवोद्योतमानः सोग्निः आनमं यजमानादीनानमयितुं नमस्कारयितुं देवानिन्द्रादीन्वेद क्रमेणवेत्ति दमेयज्ञगृहे ऋतायते ऋतंयज्ञमिच्छतेयजमानाय प्रियाणिचित् अभीष्टान्यपि वसु वसूनि पश्वादीनिधनानिदाति ददाति प्रयच्छति ॥ ३ ॥

अथचतुर्थी—

सहोता॒सेदु॑दू॒त्यं॑चिकि॒त्वाँअ॒न्तरी॑यते । वि॒द्वाँआ॒रोध॑नंदि॒वः ॥ ४ ॥

सः । होता॑ । सः । इत् । उँ॒ इति॑ । दू॒त्य॑म् । चि॒कि॒त्वान् ।

अ॒न्तः । ई॒य॒ते । वि॒द्वान् । आ॒ऽरोध॑नम् । दि॒वः ॥ ४ ॥

---

[1] नि० ६. २१. ।

Funding by IKS-MoE

सोग्निर्होतादेवानामाह्वाताभवति सेदु सएवाग्निः दूत्यं देवानां दूतकर्मचिकित्वान्जानन् दिवः स्वर्गस्यआरोधनं आरोहणंआरोहणार्हदेवानांस्थानंच विद्वान् जानन् अन्तः द्यावापृथिव्योर्मध्येईयते गच्छति ईङ्गतौ दिवादिभ्यःश्यन् तिङ्ङतिङइतिनिघातः ॥४॥

अथपञ्चमी–

तेस्या॑म॒येअ॒ग्नये॑ददा॒शुर्ह॒व्यदा॑तिभिः । यईं॒पुष्य॑न्तइन्ध॒ते ॥ ५ ॥

ते । स्या॒म॒ । ये । अ॒ग्नये॑ । द॒दा॒शुः । ह॒व्यदा॑तिऽभिः ।
ये । ई॒म् । पुष्य॑न्तः । इ॒न्ध॒ते ॥ ५ ॥

ते तव यजमानाः स्याम भूयाम तेइत्युक्तं केइत्युच्यते–येयजमानाः अग्नये हव्यदातिभिर्हविर्दानैर्ददाशुः प्रीतिंकुर्वन्ति ईमेनमग्निंपुष्यन्तोवर्धयन्तोयेयजमानाःइन्धते समिद्भिर्दीप्तियुक्तंकुर्वन्ति ॥५॥

अथषष्ठी–

तेरा॒यातेसु॒वीर्यैः॑स॒स॒वांसो॒विश्रृ॑ण्विरे । येअ॒ग्नाद॑धि॒रेदुवः॑ ॥ ६ ॥

ते॒ । रा॒या । ते । सु॒ऽवीर्यैः॑ । स॒स॒ऽवांसः॑ । वि ।
श्रृ॒ण्वि॒रे॒ । ये । अ॒ग्ना । द॒धि॒रे । दुवः॑ ॥ ६ ॥

येयजमानाः अग्नाअग्नौ सुपांसुलुगित्याकारः दुवः परिचर्यां दधिरे धारयन्ति कुर्वन्तीत्यर्थः ते ससवांसः अग्निंसंभजमानाः रायापश्वादिलक्षणेनधनेनविश्रृण्विरे विश्रूयन्ते प्रख्यायन्ते ते सुवीर्यैःशोभनवीर्योपेतैःपुत्रादिभिश्चविश्रूयन्ते ॥ ६ ॥

अथसप्तमी–

अ॒स्मेरायो॑दि॒वेदि॑वे॒संच॑रन्तुपुरु॒स्पृहः॑ । अ॒स्मेवाजा॑सईरताम् ॥ ७ ॥

अ॒स्मे इति॑ । रायः॑ । दि॒वेऽदि॑वे । सम् । च॒र॒न्तु॒ ।
पु॒रु॒ऽस्पृहः॑ । अ॒स्मे इति॑ । वाजा॑सः । ई॒र॒ता॒म् ॥ ७ ॥

पुरुस्पृहः ऋत्विगादिभिरभिलष्यमाणारायः पश्वादिधनानि अस्मे अस्मासुयजमानेषु दिवेदिवे प्रतिदिनं संचरन्तु प्रचरन्त्योभवन्तु दिवशब्दादुत्तरस्याःसप्तम्याःसुपांसुलुगित्यादिनाशेआदेशे ऊडिदमित्यादिनाचतस्याउदात्तत्वं नित्यवीप्सयोरितिद्विर्भावेसति उत्तरभागस्यानुदात्तंचेत्यनुदात्तत्वं वाजासः अन्नानिच अस्मेअस्मानीरतां प्रेरयन्तु ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी—

सविप्रश्चर्षणीनांशवसामानुषाणाम् । अतिक्षिप्रेवविध्यति ॥ ८ ॥८॥

स: । विप्रः । चर्षणीनाम् । शवसा । मानुषाणाम् ।
अति । क्षिप्राऽइव । विध्यति ॥ ८ ॥ ८ ॥

विप्रः मेधावी विप्रइतिमेधाविनाम विप्रःधीरइतितन्नामसुपाठात् सोग्निः शवसाबलेन शवइतिबलनाम पाजःशवइतितन्नामसुपाठात् मानुषाणां मनुसंबन्धिनांचर्षणीनांप्रजानांक्षिप्रेव क्षेप्याण्येव विनाशयतु अर्हाणिदुरितानीतिशेषः अतिविध्यति अतिविध्यतु अतिशयेन नाशयतु ॥ ८ ॥

॥ इतितृतीयस्यपंचमेऽष्टमोवर्गः ॥ ८ ॥

अग्नेमृळेत्यष्टर्चंनवमंसूक्तं वामदेवस्यार्षं गायत्रीछन्दस्कं अग्निदेवताकं अत्रानुक्रान्तं च—अग्नेमृळेति। द्वितीयेछन्दोमेइदंसूक्तंजातवेदस्यनिविद्धानीयं सूत्रितंच—क्रीळंवःशर्धोग्नेमृळेत्याग्निमारुतमिति ।

तत्रप्रथमा—

अग्नेमृळमहाँअसियईमादेवयुंजनम् । इयेथबर्हिरासदम् ॥ १ ॥

अग्ने । मृळ । महान् । असि । यः । ईम् । आ । देवऽयुम् ।
जनम् । इयेथ । बर्हिः । आऽसदम् ॥ १ ॥

हेअग्ने मृळ अस्मान्सुखय सत्वं महानसि प्रभूतोभवसि यस्त्वमीमिमंदेवयुं देवानां कामयितारं जनंयजमानं बर्हिर्दर्भमासदंयज्ञेआसत्तुं आइयेथ आगच्छसि ॥ १ ॥

अथद्वितीया—

समानुषीषुदूळभोविक्षुप्रावीरमर्त्यः । दूतोविश्वेषांभुवत् ॥ २ ॥

स: । मानुषीषु । दुःऽदभः । विक्षु । प्रऽअवीः । अमर्त्यः ।
दूतः । विश्वेषाम् । भुवत् ॥ २ ॥

दूळभोदुर्दभोराक्षसादिनादुर्हिंसः मानुषीषुमनुसंबन्धिनीषु विक्षु प्रजासु प्रावीः प्रकर्षेणगन्ता अमर्त्यः अमरणधर्मासोग्निः विश्वेषांसर्वेषांदेवानां दूतोभुवत् भवतु ॥ २ ॥

अथतृतीया–

सस॒द्मपरि॑णीयते॒होता॑म॒न्द्रोदिवि॑ष्टिषु । उ॒तपोता॒निषी॑दति ॥ ३ ॥

सः । सद्म॑ । परि॑ । नी॒य॒ते॒ । होता॑ । म॒न्द्रः ।
दिवि॑ष्टिषु । उ॒त । पोता॑ । नि । सी॒द॒ति॒ ॥ ३ ॥

सोग्निः सद्मयज्ञगृहंपरिणीयते ऋत्विग्भिःपरितोनीयमानःसन् दिविष्टिषु यागेषु मन्द्रः मदनीयःस्तुत्यः सोग्निर्होताचभवति उतापिच पोतासन्निषीदति यज्ञगृहेउपविशति ॥ ३ ॥

अथचतुर्थी–

उ॒तग्नाअ॒ग्निर॑ध्व॒रउ॒तोगृ॒हप॑ति॒र्दमे॑ । उ॒तब्र॒ह्मानिषी॑दति ॥ ४ ॥

उ॒त । ग्नाः । अ॒ग्निः । अ॒ध्व॒रे । उ॒तो इति॑ । गृ॒हऽप॑तिः ।
दमे॑ । उ॒त । ब्र॒ह्मा । नि । सी॒द॒ति॒ ॥ ४ ॥

उतापिचाग्निः अध्वरे यागे ग्नाः देवपत्नीर्यजति यष्टाभवतीत्यर्थः यद्वा ग्नाः गच्छन् अध्वर्युर्भवति उतोअपिच सोग्निर्दमेयज्ञगृहे गृहपतिर्यजमानश्चभवति उतापिच ब्रह्मा ब्राह्मणाच्छंसीसन्निषीदति उपविशति ॥ ४ ॥

अथपंचमी–

वेषि॒ह्य॑ध्वरीय॒तामु॑पव॒क्ताजना॑नाम् । ह॒व्याच॒मानु॑षाणाम् ॥ ५ ॥

वेषि॑ । हि । अ॒ध्व॒रि॒ऽय॒ताम् । उ॒प॒ऽव॒क्ता ।
जना॑नाम् । ह॒व्या । च॒ । मानु॑षाणाम् ॥ ५ ॥

अध्वरीयतां यज्ञमिच्छतां मानुषाणां मनुसंबन्धिनां जनानां हव्याच हव्यानिहवींषि हेअग्ने वेषिहि कामयसेखलु उपवक्ता अध्वर्युप्रभृतीनांसर्वेषांकर्मणाम् अनुज्ञार्थम् माप्रणयेत्यादिरूपस्यवाक्यस्यवक्तासन् ब्रह्माचासि ब्रह्मात्वोवदतिजातविद्यामितिश्रुतेः । उपवक्ता

---

१ ऋ० सं० ८. २. २४.

Funding by IKS-MoE

सर्वेषांकर्मणामवैकल्यार्थमुपद्रष्टावा सदस्योसि सहिसप्तदशःकर्मणामुपद्रष्टाभवतीत्यापस्तंबेनोक्तत्वात् ॥ ५ ॥

अथषष्ठी–

वेषीद्व॑स्यदू॒त्यं१॒॑यस्य॒जुजो॑षोअध्व॒रम् । ह॒व्यंमर्त॑स्य॒वोळ्ह॑वे ॥ ६ ॥

वेषि॑ । इत् । ऊँ इति॑ । अ॒स्य॒ । दू॒त्य॑म् । यस्य॑ । जुजो॑षः ।
अ॒ध्व॒रम् । ह॒व्यम् । मर्त॑स्य । वोळ्ह॑वे ॥ ६ ॥

हेअग्ने त्वं मर्तस्यमनुष्यस्ययस्ययजमानस्याध्वरं यागं हव्यं हविःवोढवेवोढुं वहेर्धातोस्तुमर्थेसेसेनसेतितवेन्प्रत्ययः ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं जुजोषः सेवेथाः जुषीप्रीतिसेवनयोः लेट् वहुलंछन्दसीतिशपःश्लुः द्विर्भावश्च लेटोडाटावित्यडागमः अस्ययजमानस्यदूत्यं दूतकर्मवेषीदुं कामयसएव ॥ ६ ॥

अथसप्तमी–

अ॒स्माकं॑जोष्यध्व॒रम॒स्माकं॑य॒ज्ञम॑ङ्गिरः । अ॒स्माकं॑शृणुधी॒हव॑म् ॥ ७॥

अ॒स्माक॑म् । जो॒षि॒ । अ॒ध्व॒रम् । अ॒स्माक॑म् ।
य॒ज्ञम् । अ॒ङ्गि॒रः॒ । अ॒स्माक॑म् । शृ॒णु॒धि॒ । हव॑म् ॥७॥

हेअंगिरोग्ने त्वं अस्माकमध्वरं अस्मदीयंयागं जोषि जुषस्व सेवस्व अस्माकमस्मदीयंयज्ञं यजनसाधनं हविश्चजुषस्व अस्माकमस्मदीयं हवमाह्वानरूपं स्तोत्रंच शृणुधि शृणु शृणोतेर्लोण्मध्यमैकवचनेसिप् तस्यहिरादेशे श्रुवःशृचेतिधातोःश्नुप्रत्ययः शृभावश्च श्रुशृणुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः ॥ ७ ॥

अथाष्टमी–

परि॑तेदू॒ळभो॒रथो॒स्माँअ॑श्नोतुवि॒श्वतः॑ । येन॒रक्ष॑सिदा॒शुषः॑ ॥८॥१॥

परि॑ । ते॒ । दुः॒ऽदभः॑ । रथः॑ । अ॒स्मान् । अ॒श्नो॒तु॒ ।
वि॒श्वतः॑ । येन॑ । रक्ष॑सि । दा॒शुषः॑ ॥ ८ ॥ १ ॥

हेअग्ने त्वं येनरथेनविश्वतोविश्वासुसर्वासुदिक्षुगच्छन् दाशुषोहविःप्रदातॄन्यजमानान्रक्षसि विघ्नेभ्यःपालयसि त्वदीयोदूळभोदुर्दभोदुर्हिंसः सरथः अस्मान्यजमानान्परि परितः सर्वतःअश्नोतु व्याप्नोतु अश्नोतेर्व्यत्ययेनपरस्मैपदम् ॥ ८ ॥

॥ इतितृतीयस्यपंचमेनवमोवर्गः ॥ ९ ॥

अग्नेतमद्येत्यष्टर्चंदशमंसूक्तं वामदेवस्यार्षमाग्नेयं तथाचानुक्रमणिका—अग्नेतमद्यपदपांक्तंपंचमीमहापदपंक्तिरन्त्योष्णिक् चतुर्थीषष्ठ्युपान्त्यावा सप्तम्याःपंचकौमुख्यौतृतीयःसप्तकोनवकश्चाष्टम्याःपंचकःपादश्चतुष्कःसप्तकस्त्रैष्टुभश्चेति इदंकृत्स्नमपिसूक्तंपदपंक्तिच्छन्दस्कं पंचकाश्चत्वारःषट्कश्चैकश्चतुर्थश्चतुष्कोवापदपंक्तिरित्युक्तलक्षणत्वात् पंचमीतवस्वादिष्ठेत्येषामहापदपंक्तिः पंचपंचकाःषट्कश्चैकइतिलक्षणसद्भावात् अन्त्याशिवानःसख्येत्येषोष्णिक्छन्दस्का चतुर्थीषष्ठीसप्तम्यःआभिष्टेअद्यघृतंनपूतंकृतंचिद्धिष्मेत्येतास्तिस्रउष्णिहः पदपंक्त्योवा अत्रसप्तम्यष्टम्योःपदपंक्त्युष्णिहोःपरिभाषोक्तपादविच्छेदापवादाय प्रकारान्तरेणविच्छेदःकृतः । दशमेहनीदंसूक्तमाज्यशस्त्रं सूत्रितंच—अग्नेतमद्याश्वंनस्तोमैरित्याज्यमिति । पिंडपितृयज्ञेग्नेतमद्येत्यनयाग्निंप्रत्यागच्छेत् सूत्रितंच—अग्निंप्रत्येयादग्नेतमद्याश्वंनस्तोमैरिति । पौनराधेयिक्यांस्विष्टकृतिएषैवयाज्या सूत्रितंच—अग्नेतमद्याश्वंनस्तोमैरितिसंयाज्येइति ।

तत्रप्रथमा—

अ॒ग्ने॒तम॒द्याश्वं॒नस्तोमैः॒क्रतुं॒नभ॒द्रंहृ॑दि॒स्पृश॑म् । ऋ॒ध्यामा॑त॒ओहैः॑ ॥१॥

अग्ने॑ । तम् । अ॒द्य । अश्व॑म् । न । स्तोमैः॑ । क्रतु॑म् ।
न । भ॒द्रम् । हृ॒दि॒ऽस्पृश॑म् । ऋ॒ध्याम॑ । ते॒ । ओहैः॑ ॥ १ ॥

हेअग्ने अद्यास्मिन्नहनिवयमृत्विगादयओहैरिन्द्रादिप्रापकैःस्तोमैःस्तोत्रसमूहैः तं प्रसिद्धं त्वां ऋध्याम समर्धयामः कीदृशंत्वां अश्वंन वोढारमश्वमिव तथाहविषोवाहकं क्रतुंन कर्तारमिव उपकर्तारमित्यर्थः तथा भद्रं भजनीयं हृदिस्पृशं हृदयंगमं अतिशयेनप्रियमित्यर्थः ॥ १ ॥

पौनराधिक्यामिष्टौप्रधानस्याधाह्यग्नइत्येषानुवाक्या एभिर्नोअर्कैरिततस्यांस्विष्टकृतोनुवाक्या आभिष्टेअद्येतिप्रधानस्ययाज्या सूत्रितंच—अधाह्यग्नेक्रतोर्भद्रस्याभिष्टेअद्यगीर्भिर्गृणन्तएभिर्नोअर्कैरिति ।

Funding by IKS-MoE

अथद्वितीया—

अधा॒ह्य॑ग्ने॒क्रतो॑र्भ॒द्रस्य॒दक्ष॑स्यसा॒धोः । र॒थीर्ऋ॒तस्य॑बृह॒तोब॒भूथ॑ ॥ २॥

अध॑ । हि । अ॒ग्ने॒ । क्रतोः॑ । भ॒द्रस्य॑ । दक्ष॑स्य ।
सा॒धोः । र॒थीः । ऋ॒तस्य॑ । बृ॒ह॒तः । ब॒भूथ॑ ॥ २ ॥

अधहि इदानीमेव हेअग्ने त्वं क्रतोः अस्मदीयस्ययागस्यरथीर्नेताबभूथ भवसि छन्दसिलुङ्लङ्लिटइतिभवतेर्वर्तमानेर्थेलिटिसिपस्थल् आर्धधातुकस्येड्वलादेरितीडागमेप्राप्ते बभूथाततन्थेतिनिपातनादिडभावः कीदृशस्ययागस्य भद्रस्य भजनीयस्य दक्षस्य प्रवृद्धस्य साधोः अभीष्टफलानांसाधकस्य ऋतस्य सत्यभूतस्य बृहतोमहतः ॥ २ ॥

अथतृतीया—

ए॒भिर्नो॑अ॒र्कैर्भवा॑नोअ॒र्वाङ्स्व१॒र्णज्योतिः॑ ।
अग्ने॒विश्वे॑भिःसु॒मना॒अनी॑कैः ॥ ३ ॥

ए॒भिः । न॒ः । अ॒र्कैः । भव॑ । न॒ः । अ॒र्वाङ् । स्वः॑ । न ।
ज्योतिः॑ । अग्ने॑ । विश्वे॑भिः । सु॒ऽमनाः॑ । अनी॑कैः ॥ ३ ॥

हेअग्ने ज्योतिर्ज्योतिष्मान् स्वर्णसूर्यइव तथाविश्वेभिर्विश्वैःसमस्तैरनीकैस्तेजोभिःसुमनाःशोभनमनस्कस्त्वं नोस्मदीयैरेभिरेतैःअर्कैरर्चनीयैःस्तोत्रैर्नोस्माकमर्वाङभिमुखोभव ॥ ३ ॥

अथचतुर्थी—

आ॒भिष्टे॑अ॒द्यगी॒र्भिर्गृ॒णन्तोग्ने॒दाशे॑म । प्रते॑दि॒वोनस्त॑नयन्ति॒शुष्माः॑ ॥४॥

आ॒भिः । ते॒ । अ॒द्य । गी॒ःऽभिः । गृ॒णन्तः॑ । अग्ने॑ । दाशे॑म ।
प्र । ते॒ । दि॒वः । न । स्त॒न॒य॒न्ति॒ । शुष्माः॑ ॥ ४ ॥

अद्यास्मिन्दिवसे हेअग्ने आभिर्गीर्भिःस्तुतिरूपाभिर्वाग्भिःगृणन्तस्त्वांस्तुवन्तोवयमृत्विगादयः तेतुभ्यं दाशेम हवींषिदधाम दिवोनसूर्यस्यरश्मयइवतेत्वदीयाःशुष्माःशोषकाज्वालाः प्रस्तनयन्ति प्रकर्षेणशब्दायन्ते यद्वा दिवोन मेघाइव त्वदीयाज्वालाःशब्दायन्ते ॥ ४ ॥

Funding by IKS-MoE

अथपंचमी–

तवस्वादिष्ठाग्नेसंदृष्टिरिदाचिदह्नइदाचिदक्तोः ।
श्रियेरुक्मोनरोचतउपाके ॥ ५ ॥

तव । स्वादिष्ठा । अग्ने । सम्ऽदृष्टिः । इदा । चित् । अह्नः । इदा ।
चित् । अक्तोः । श्रिये । रुक्मः । न । रोचते । उपाके ॥ ५ ॥

हेअग्ने स्वादिष्ठास्वादुतमा प्रियतमा तव त्वदीयासंदृष्टिर्दीप्तिः अह्नइदाचित् दिवसस्येदानींच अक्तोरिदाचित् अक्तुरितिरात्रिनाम शर्वरीअक्तुःऊर्म्यैतिरात्रिनामसुपाठात् रात्रेरिदानींच अहोरात्रेइत्यर्थः अञ्जूव्यक्तिम्रक्षणकान्तिगतिष्वित्यस्माद्धातोःकिच्चेत्यौणादिकसूत्रेणतुप्रत्ययः तस्यकिद्वद्भावस्य तितुत्रेतीट्प्रतिषेधः अनिदितामित्युपधानकारलोपः चोःकुरितिकुत्वं रुक्मोन अलंकारइव श्रिये पदार्थमाश्रयितुमुपाके अन्तिके उपाकइत्यन्तिकनाम आकेउपाकेइतितन्नामसुपाठात् रोचते राजते ॥ ५ ॥

अथषष्ठी–

घृतंनपूतंतनूररेपाःशुचिहिरण्यम् । तत्तेरुक्मोनरोचतस्वधावः ॥ ६ ॥

घृतम् । न । पूतम् । तनूः । अरेपाः । शुचि । हिरण्यम् ।
तत् । ते । रुक्मः । न । रोचत । स्वधाऽवः ॥ ६ ॥

हेस्वधावः स्वधाशब्दोन्नवाची अन्नवन्नग्ने पूतं शोधितं घृतंन आज्यमिव तनूः त्वदीयामूर्तिः अरेपाः पापरहिताभवति शुचिःशुद्धंहिरण्यंहितरमणीयं तेत्वदीयंतत्प्रसिद्धंतेजः रुक्मोन भूषणमिवरोचत रोचते भासते ॥ ६ ॥

अथसप्तमी–

कृतंचिद्धिष्मासनेमिद्वेषोग्नइनोषिमर्तात् । इत्थायजमानादृतावः ॥७॥

कृतम् । चित् । हि । स्म । सनेमि । द्वेषः । अग्ने । इनोषि ।
मर्तात् । इत्था । यजमानात् । ऋतऽवः ॥ ७ ॥

हेऋतावः सत्यवन्नग्ने कृतंचित् यजमानेनकृतमपि सनेमि चिरन्तनं सनेमीतिपुराणनाम सनेमिपूर्व्यमितिपुराणनामसुपाठात् द्वेषः पापं मर्तात्मनुष्याद्यजमानात् इत्थासत्यं इत्थेतिसत्यनामैतत् अद्धाइत्थेतितन्नामसुपाठात् इनोषिस्महि प्रेरयस्येवखलु नाशयसीत्यर्थः ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी–

शि॒वानः॑स॒ख्यासन्तु॑भ्रा॒त्राग्ने॑दे॒वेषु॑यु॒ष्मे ।
सानो॒नाभि॒ःसद॑ने॒सस्मि॒न्नूध॑न् ॥ ८ ॥ १० ॥

शि॒वा । न॒ः । स॒ख्या । सन्तु॑ । भ्रा॒त्रा । अग्ने॑ । दे॒वेषु॑ ।
यु॒ष्मे इति॑ । सा । न॒ः । नाभि॑ः । सद॑ने । सस्मि॑न् । ऊध॑न् ॥८॥१०॥

हेअग्ने नोस्मदीयानिसख्या सख्यानि भ्रात्राभ्रात्राणि भ्रातृसंबन्धीनिकर्माणि देवेषुद्योतमानेषुयुष्मे युष्मासु सुपांसुलुगितिसप्तमीबहुवचनस्यशेआदेशः शिवा शिवानि सन्तु मंगलानिभवन्तु सा सखित्वभ्रातृकर्मसन्ततिः सदने देवानांस्थाने सस्मिन्नूधनि सर्वस्मिन्यज्ञेनोस्माकंनाभिर्बंधनंभवति ॥ ८ ॥

॥ इतितृतीयस्यपंचमेदशमोवर्गः ॥ १० ॥

॥ इतिचतुर्थेमंडलेप्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाकेएकादशसूक्तानि तत्रभद्रंतइतिषळृचंप्रथमंसूक्तं वामदेवस्यार्षं त्रिष्टुप्छन्दस्कं अग्निदेवताकं भद्रंषळित्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौत्रैष्टुभेछन्दसीदमादिकेद्वेसूक्तेविनियुक्ते सूत्रितंच–भद्रंतेअग्नइतिसूक्तेइति ।

तत्रप्रथमा–

भ॒द्रंते॑अग्नेसहसि॒न्ननी॑कमुपा॒कआरो॑चते॒सूर्य॑स्य ।
रुश॑द्दृ॒शेद॑दृशेन॒क्तया॑चि॒दरू॑क्षितंदृ॒शआरू॒पेअन्न॑म् ॥ १ ॥

भ॒द्रम् । ते॒ । अ॒ग्ने॑ । स॒ह॒सि॒न् । अनी॑कम् । उ॒पा॒के । आ ।
रो॒च॒ते॒ । सूर्य॑स्य । रुश॑त् । दृ॒शे । द॒दृ॒शे । न॒क्त॒ऽया । चि॒त् ।
अरू॑क्षितम् । दृ॒शे । आ । रू॒पे । अन्न॑म् ॥ १ ॥

हेसहसिन् बलवन्नग्ने ते त्वदीयं भद्रं भजनीयमनीकंतेजः सूर्यस्यउपाके समीपभूतेदिवसेइत्यर्थः आरोचते समन्ताद्दीप्यते रुशत् रोचमानं दृशेदर्शनीयंतेजः नक्तयाचिद्रात्रावपि ददृशेदृश्यते आइत्ययंशब्दोनेत्यर्थेवर्तते आकिंच अरूक्षितं स्निग्धं दृशे दर्शनीयं अन्नंपुरोडाशादिरूपंहविः रूपेरूपवति त्वयि ऋत्विगादिभिर्हुतंभवति ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

विषा॑ह्यग्नेगृण॒तेम॑नी॒षांखंवेप॑सातु॒विजा॒त॒स्तवा॑नः ।
विश्वे॑भि॒र्यद्वा॒वनः॑शुक्रदे॒वैस्तन्नो॑रास्वसुमहो॒भूरि॒मन्म॑ ॥ २ ॥

वि । सा॒हि॒ । अ॒ग्ने॒ । गृ॒ण॒ते । म॒नी॒षाम् । खम् । वेप॑सा ।
तु॒वि॒ऽजा॒त॒ । स्तवा॑नः । विश्वे॑भिः । यत् । व॒वनः॑ । शु॒क्र॒ ।
दे॒वैः । तत् । न॒ः । रा॒स्व॒ । सु॒ऽम॒ह॒ः । भूरि॑ । मन्म॑ ॥ २ ॥

हेतुविजात मन्थनीयारणिद्वारा यज्ञादिकर्मसु बहुजन्मन्नग्ने स्तवानः ऋत्विगादिभिःस्तूयमानस्त्वं वेपसायज्ञादिकर्मणा वेपइतिकर्मनाम वेषःवेपःविष्टीतिकर्मनामसुपाठाव् मनीषां स्तुतिंगृणतेकुर्वतेयजमानायखंयजमानप्राप्यस्यपुण्यलोकस्यद्वारं विषाहि विष्य विमुंचेत्यर्थः षोन्तकर्मणिइत्यस्माद्धातोःलोणमध्यमपुरुषैकवचनं सिप् दिवादिभ्यःश्यन् तस्यबहुलंछन्दसीतिलुक् आदेचउपदेशेशितीत्यात्वं सेर्हिरादेशः तिङ्ङतिङइतिनिघातः हेशुक्र दीप्यमानाग्ने त्वं विश्वेभिर्विश्वैःसर्वैः बहुलंछन्दसीतिभिसऐस्भावः देवैरिन्द्रादिभिःसह यत्पश्वादिधनं ववनः यजमानेभ्यःप्रयच्छेः वनतेर्लेट् तस्यसिपइतश्चलोपइतीकारलोपः बहुलंछन्दसीतिविकरणस्यश्लुः श्लावितिद्विर्वचनं हलादिशेषः लेटोडाटावित्यडागमः यद्वृत्तान्नित्यमितिनिघाताभावः हेसुमहः शोभनतेजस्काग्ने भूरि प्रभूतं मन्ममननीयंतद्धनंनोस्मभ्यं रास्व देहि ॥ २ ॥

महापितृयज्ञेस्विष्टकृतोग्निःकव्यवाहनोयष्टव्यः तस्यद्वेअनुवाक्ये तत्र त्वदग्नेकाव्याइति द्वितीयानुवाक्या तथाचसूत्रितम्—त्वदग्नेकाव्यात्वन्मनीषाःसमत्नथासहसाजायमानइति।

सूक्तेतृतीया—

त्वद॑ग्ने॒काव्या॒त्वन्म॑नी॒षास्त्वदु॒क्थाजा॑यन्ते॒राध्या॑नि ।
त्वदे॑ति॒द्रवि॑णंवी॒रपे॑शाइ॒त्थाधि॑येदा॒शुषे॒मर्त्या॑य ॥ ३ ॥

त्वत् । अ॒ग्ने॒ । काव्या॑ । त्वत् । म॒नी॒षाः । त्वत् । उ॒क्था ।
जा॒य॒न्ते॒ । राध्या॑नि । त्वत् । ए॒ति॒ । द्रवि॑णम् । वी॒रऽपे॑शाः ।
इ॒त्थाऽधि॑ये । दा॒शुषे॑ । मर्त्या॑य ॥ ३ ॥

हेअग्ने काव्याकाव्यानि हविर्वहनदेवतानयनादीन्यग्निसंबन्धीनिकर्माणि आध्वर्यवाणि कर्माणि वा त्वद्भवतोजायन्ते उत्पद्यन्ते मनीषास्तुतिरूपावाचस्त्वदेवजायन्ते राध्यानि राद्धुंयो-

Funding by IKS-MoE

ग्यानि उक्थानिशस्त्राणित्वत्त्वत्तोजायन्ते इत्थाधिये धीरितिकर्मनाम इत्थेतिसत्यनामसुपाठात् सत्यकर्मणे दाशुषे हवींषिदत्तवतेमर्त्यायमनुष्याययजमानायवीरपेशाः पेशइतिरूपनाम इदंविक्रान्तंरूपं अत्रलिंगव्यत्ययेनवीरपेशाइतिरूपं द्रविणंपश्वादिधनंत्वत्त्वत्तःएतिनिर्गच्छति उत्पद्यतइत्यर्थः ॥ ३ ॥

अथचतुर्थी–

त्वद्वा॒जीवा॑जंभ॒रोविहा॑याअभिष्टि॒कृज्जा॑यतेस॒त्यशु॑ष्मः।
त्वद्र॒यिर्दे॒वजू॑तोमयो॒भुस्त्वदा॒शुर्जू॑जु॒वाँअ॑ग्ने॒अर्वा॑ ॥ ४ ॥

त्वत्। वा॒जी। वा॒ज॒म्ऽभ॒रः। विऽहा॑याः। अ॒भि॒ष्टि॒ऽकृत्।
जा॒य॒ते॒। स॒त्यऽशु॑ष्मः। त्वत्। र॒यिः। दे॒वऽजू॑तः। म॒यः॒ऽभुः।
त्वत्। आ॒शुः। जू॒जु॒ऽवान्। अ॒ग्ने॒। अर्वा॑ ॥ ४ ॥

हेअग्ने वाजी बलवान् वाजंभरः हविर्लक्षणान्नस्यवाहकः अग्नेर्वाजंभरइत्येषावैदिकीसंज्ञा संज्ञायां भृतॄवृजीतिवाजशब्देकर्मण्युपपदेखच्प्रत्ययः अरुर्द्विषदजन्तस्येतिमुमागमः चितइत्यन्तोदात्तत्वं विहायाः महान् अभिष्टिकृत् यज्ञकृत् अभ्येषणकृद्वा सत्यशुष्मः सत्यबलः पुत्रः त्वत्त्वत्तोजायतेउत्पद्यते देवजूतोदेवैःप्रेरितःमयोभुः सुखप्रदः मयइतिसुखनामैतत् रयिधनंत्वज्जायते आशुःशीघ्रगामीअप्रतिहतगमनइत्यर्थः जूजुवान्वेगेनगच्छन्नर्वाश्वःत्वद्भवतोजायते ॥ ४ ॥

अथपञ्चमी–

त्वाम॑ग्नेप्रथ॒मंदे॑व॒यन्तो॑दे॒वंमर्ता॑अमृतम॒न्द्र॒जि॑ह्वम्।
द्वे॒षो॒युत॒मावि॑वासन्तिधी॒भिर्दमू॑नसंगृ॒हप॑ति॒ममू॑रम् ॥ ५ ॥

त्वाम्। अ॒ग्ने॒। प्र॒थ॒मम्। दे॒व॒ऽयन्तः॑। दे॒वम्। मर्ताः॑। अ॒मृ॒त॒।
म॒न्द्रऽजि॑ह्वम्। द्वे॒षः॒ऽयुत॑म्। आ। वि॒वा॒स॒न्ति॒। धी॒भिः।
दमू॑नसम्। गृ॒हऽप॑तिम्। अमू॑रम् ॥ ५ ॥

हेअमृत अमरणशीलाग्ने देवयन्तोदेवानिच्छन्तोमर्तामनुष्यायजमानाः त्वां धीभिः स्तुतिभिःकर्मभिर्वा आविवासन्ति समन्तात्परिचरन्ति कीदृशंत्वां प्रथमं देवानामाद्यंदेवंद्योतमानं मन्द्रजिह्वं देवानांमादयित्रीजिह्वायस्यतं द्वेषोयुतं द्वेषसांपापानां पृथक्कर्तारं दमूनसं रक्षसांदमनकरणमनसोपेतं दमूनःशब्दस्यकथमयमर्थइतिदमूनादममनावादानमनावादान्तमनावाअपिवादमइतिगृहनामतन्मनाःस्यादितियास्केनोक्तत्वांदिति। दमुउपशमने दमेरूनसिरित्यौणादिकऊनसिप्रत्ययः गृहपतिं गृहाणांपालयितारं अमूरं अमूढं प्रगल्भमित्यर्थः ॥ ५ ॥

स्वस्त्ययन्यां आरेअस्मदितिस्वस्तिमतोग्नेर्याज्या सूत्रितंच—आरेअस्मदमतिमारेअंहइति ।

अथषष्ठी—

आरेअस्मदमतिमारेअंहआरेविश्वांदुर्मतिंयन्निपासि ।
दोषाशिवःसहसःसूनोअग्नेयंदेवआचित्सचसेस्वस्ति ॥ ६ ॥११॥

आरे । अस्मत् । अमतिम् । आरे । अंहः । आरे । विश्वाम् ।
दुःऽमतिम् । यत् । निऽपासि । दोषा । शिवः । सहसः । सूनो इति ।
अग्ने । यम् । देवः । आ । चित् । सचसे । स्वस्ति ॥ ६ ॥ ११ ॥

हेसहसःसूनो बलस्यपुत्र मथ्यमानोग्निर्मन्थनकारिणांहिबलेनजायते इत्यग्नेर्बलपुत्रत्वं हेअग्ने दोषारात्रौ शिवः शिवकरः देवोद्योतमानस्त्वं यंयानस्मान्स्वस्ति अविनाशाय आसचसे परितःसेवसे चिदितिपूरणः यद्यस्मात्कारणात् निपासि यजमानान्नितरांपालयसि तेभ्योस्मदस्मत्तः अमतिंपापरूपामशनेच्छां आरे दूरेकुरु अशनायावैपाप्मामतिरितिब्राह्मणं । आरेदूरेस्मत्तःअंहःपापंकुरु आरेइतिदूरनामैतत् अस्मत्तःआरेदूरेदुर्मतिंदुर्मनस्त्वंकुरु ॥ ६ ॥

॥ इतितृतीयस्यपंचमेएकादशोवर्गः ॥ ११ ॥

यस्त्वामग्नइतिषळृचंद्वितीयंसूक्तं वामदेवऋषिस्त्रैष्टुभोग्निर्देवता यस्त्वामित्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तोविनियोगः ।

---

१ नि० ४. ४. । २ ऐ० ब्रा० २. २. ।

Funding by IKS-MoE

तत्रप्रथमा–

यस्त्वाम॑ग्नइ॒नध॑तेय॒तस्रु॒क्त्रिस्ते॒अन्नं॑कृ॒णव॒त्सास्मि॒न्नह॑न् ।
ससुद्यु॒म्नैर॒भ्य॑स्तुप्र॒सक्ष॒त्तव॒क्रत्वा॑जातवेदश्चिकि॒त्वान् ॥ १ ॥

यः । त्वाम् । अ॒ग्ने॒ । इ॒नध॑ते । य॒तऽस्रु॑क् । त्रिः । ते॒ । अन्न॑म् ।
कृ॒णव॑त् । सास्मि॑न् । अह॑न् । सः । सु । द्यु॒म्नैः । अ॒भि । अ॒स्तु॒ ।
प्र॒ऽसक्ष॑त् । तव॑ । क्रत्वा॑ । जा॒त॒ऽवे॒दः॒ । चि॒कि॒त्वान् ॥ १ ॥

हेअग्ने यतस्रुक् स्रुचासंबद्धोयोयजमानः त्वांइनधते दीप्तियुक्तंकुर्यात् यः सस्मिन्नहन्सर्वस्मिन्नहनि तेतुभ्यं त्रिः त्रिवारं सवनत्रये अन्नंहविर्लक्षणमन्नंकृणवत्कुर्यात् हेजातवेदः जातानांवेदितरग्ने तवतोषकेणक्रत्वाइन्धनादिहेतुनाकर्मणाप्रसंक्षत् प्रसहमानंत्वदीयंतेजःचिकित्वान् जानन्सयजमानः द्युम्नैर्धनैर्यशोभिर्वा सु अत्यन्तमभ्यस्तु शत्रूनभिभवतु ॥१॥

अथद्वितीया–

इ॒ध्मं॑यस्ते॑ज॒भर॑च्छश्रमा॒णोम॒होअ॑ग्ने॒अनी॑क॒मास॑प॒र्यन् ।
सइ॑धा॒नःप्रति॑दो॒षामु॒षासं॒पुष्य॑न्र॒यिंस॑चते॒घ्नन्न॒मित्रा॑न् ॥ २ ॥

इ॒ध्मम् । यः । ते॒ । ज॒भर॑त् । श॒श्र॒मा॒णः । म॒हः । अ॒ग्ने॒ । अनी॑कम् ।
आ । स॒प॒र्यन् । सः । इ॒धा॒नः । प्रति॑ । दो॒षाम् । उ॒षस॑म् ।
पुष्य॑न् । र॒यिम् । स॒च॒ते॒ । घ्नन् । अ॒मित्रा॑न् ॥ २ ॥

हेअग्ने योयजमानः तेतुभ्यं इध्मं होमसाधनं समिज्जातं जभरत् आहरेत् हृञ्हरणे लिङर्थेलेट् तस्य तिपइतश्चलोपइतीकारलोपः बहुलंछन्दसीतिशपःश्लुः द्विर्वचनादिकार्यं लेटोडाटावित्यडागमः हृग्रहोर्भइतिभत्वं शश्रमाणः इध्माद्याहरणेश्राम्यन् महोमहतस्तवानीकं आकारश्चार्थे तेजश्चसपर्यन्परिचरन्यजमानः दोषांप्रति रात्रिंलक्षीकृत्य उषसंप्रति उषःकालंचलक्षीकृत्य कालद्वयेपीत्यर्थः इधानः इन्धानस्त्वां दीप्तियुक्तंकरोति पुष्यन् प्रजाभिःपशुभिश्चपुष्टःसन् सयजमानः अमित्रान् शत्रून् घ्नन् हिंसन् रयिं धनंसचते सेवते सर्वदापश्वादिधनसमृद्धोभवतीत्यर्थः ॥ २ ॥

Funding by IKS-MoE

उखासंभरणीयेष्टावग्नेःक्षत्रभृतोनुवाक्या तथाचसूत्रम्—अग्निरीशेबृहतःक्षत्रियस्यार्चामितेसुमतिंघोष्यर्वागिति ।

सूक्तेतृतीया—

अ॒ग्निरी॑शेबृह॒तःक्ष॒त्रिय॑स्या॒ग्निर्वाज॑स्यपर॒मस्य॑रा॒यः ।
दधा॑ति॒रत्नँ॑विध॒तेयवि॑ष्ठो॒व्या॑नु॒षङ्मर्त्या॑यस्व॒धावा॑न् ॥ ३ ॥

अ॒ग्निः । ई॒शे॒ । बृ॒ह॒तः । क्ष॒त्रिय॑स्य । अ॒ग्निः । वाज॑स्य ।
प॒र॒मस्य॑ । रा॒यः । दधा॑ति । रत्न॑म् । वि॒ध॒ते । यवि॑ष्ठः । वि । आ॒नु॒षक् ।
मर्त्या॑य । स्व॒धाऽवा॑न् ॥ ३ ॥

अग्निः बृहतोमहतःक्षत्रियस्य बलस्य ईशे ईश्वरोभवति वर्तमानार्थेलिट् किंच अग्निःपरमस्योत्कृष्टस्यवाजस्यान्नस्यरायःपश्वादेर्धनस्यचेशे यविष्ठोयुवतमःस्वधावानन्नवान्तेजस्वीचाग्निः विधते परिचरते विधतिःपरिचरणकर्मेतियास्कः । मर्त्याय मनुष्याय यजमानाय रत्नंरमणीयंधनमानुषक् अनुषक्तं विदधाति करोति ॥ ३ ॥

अथचतुर्थी—

यच्चि॒द्धिते॑पुरुष॒त्राय॑वि॒ष्ठाचि॑त्तिभिश्चकृ॒माकच्चि॒दागः॑ ।
कृ॒धीष्व॑१॒स्माँअदि॑ते॒रना॑गा॒न्व्येनां॑सिशिश्रथो॒विष्व॑गग्ने ॥ ४ ॥

यत् । चि॒त् । हि । ते॒ । पु॒रु॒ष॒ऽत्रा । य॒वि॒ष्ठ॒ । अचि॑त्तिऽभिः ।
च॒कृ॒म । कत् । चि॒त् । आग॑ः । कृ॒धि । सु । अ॒स्मान् । अदि॑तेः ।
अना॑गान् । वि । एनां॑सि । शि॒श्र॒थः । विष्व॑क् । अ॒ग्ने॒ ॥ ४ ॥

हेयविष्ठ युवतमाग्ने यच्चिद्धि यद्यपिखलु तेत्वदीयेषु पुरुषत्रा परिचारकेषु अचित्तिभिरज्ञानैः कच्चिदागः किंचिदपिपापंवयंचकृम तथापि हेअग्ने अस्मानदितेर्भूमेरनागाननागसः पापरहितान्सु अत्यन्तं कृधि कुरु हेअग्ने विष्वक् सर्वतोविद्यमानान्येनांसि अस्माभिःकृतानि पापानि विशिश्रथः विश्लथय शिथिलीकुरु ॥ ४ ॥

---

१ नि० १०. २३. ।

अथपञ्चमी–

महश्चिदग्नएनसोअभीकऊर्वाद्देवानामुतमर्त्यानाम् ।
मातेसखायःसदमिद्रिषामयच्छातोकायतनयायशंयोः ॥ ५ ॥

महः । चित् । अग्ने । एनसः । अभीके । ऊर्वात् । देवानाम् ।
उत । मर्त्यानाम् । मा । ते । सखायः । सदम् । इत् । रिषाम ।
यच्छ । तोकाय । तनयाय । शम् । योः ॥ ५ ॥

हेअग्ने देवानामिन्द्रादीनां उतापिच मर्त्यानां मनुष्याणामभीके अन्तिके अभीकइत्यन्तिकनामैतत् अस्माभिर्यत्पापंकृतं महश्चिन्महतोप्यूर्वाद्विस्तृतादस्मादेनसःपापात् तेत्वदीयाःसखायोमित्रभूताः स्तोतारोवयंसदमित् सर्वदैवमारिषाम माहिंसिताभूम हेअग्ने त्वं तोकाय पुत्राय तनयाय पौत्राय शं पापरूपोपद्रवाणांशान्तिं योः सुकृतोत्पादितंसुखंचयच्छ देहि ॥५॥

अथषष्ठी–

यथाहत्यद्वसवोगौर्यंचित्पदिषिताममुंञ्चतायजत्राः ।
एवोष्व१स्मन्मुंञ्चताव्यंहःप्रतार्यग्नेप्रतरंनआयुः ॥ ६ ॥ १२ ॥

यथा । ह । त्यत् । वसवः । गौर्यम् । चित् । पदि । सिताम् ।
अमुंञ्चत । यजत्राः । एवो इति । सु । अस्मत् । मुञ्चत । वि । अंहः ।
प्र । तारि । अग्ने । प्रऽतरम् । नः । आयुः ॥ ६ ॥ १२ ॥

यजत्राः यजनीयाः पूजार्हाः हेवसवोनिवासयितारोग्नयः यूयं यथाह यथैव त्यत् त्यां तां पदि पादे सितां बद्धां गौर्यंचित् गौरींगामपि अमुंचततत्यक्तवन्तोभूयास्तएवो एवमेव अस्मदस्मत्तः अंहःपापं सु अत्यन्तंविमुंचत विमुक्तंकुरुत बहुवचनंपूजार्थं हेअग्ने त्वया प्रतरंप्रवृद्धंनोस्मदीयमायुः प्रतारि प्रवृद्धंक्रियताम् ॥ ६ ॥

॥ इतितृतीयस्यपंचमेद्वादशोवर्गः ॥ १२ ॥

प्रत्यग्निरितिपंचर्चंतृतीयंसूक्तं वामदेवस्यार्षंत्रैष्टुभमाग्नेयं तत्तन्मन्त्रवर्णाभिधेयोषःप्रभृतिदैवतंवा तथाचानुक्रान्तम्–प्रत्यग्निःपंचलिंगोक्तदैवतन्त्वेकइति लैंगिकोविनियोगः ।

Funding by IKS-MoE

तत्रप्रथमा–

प्रत्य॒ग्निरु॒षसा॒मग्र॑मख्यद्विभाती॒नांसु॒मना॑रत्न॒धेय॑म् ।
या॒तम॑श्विनासु॒कृतो॑दुरो॒णमुत्सूर्यो॒ज्योति॑षादे॒वए॑ति ॥ १ ॥

प्रति॑ । अ॒ग्निः । उ॒षसा॑म् । अग्र॑म् । अ॒ख्य॒त् । वि॒ऽभा॒ती॒नाम् ।
सु॒ऽमना॑ः । र॒त्न॒ऽधेय॑म् । या॒तम् । अ॒श्वि॒ना॒ । सु॒ऽकृत॑ः ।
दु॒रो॒णम् । उत् । सूर्य॑ः । ज्योति॑षा । दे॒वः । ए॒ति॒ ॥ १ ॥

सुमनाःशोभनमनस्कोग्निर्विभातीनां व्युच्छन्तीनामुषसामुषोदेवतानां रत्नधेयं रत्नधानं धनप्रकाशकमित्यर्थः अग्रंप्रति पूर्वकालंलक्षीकृत्य अख्यत्प्रवृद्धोभवति हेअश्विना अश्विनौ युवां सुकृतोयजमानस्यदुरोणंगृहं दुरोणइतिगृहनाम दुरोणेदुर्याइतिगृहनामसुपाठात् यातं गच्छतं सूर्यऋत्विगादीनां प्रेरकोदेवःज्योतिषास्वेनतेजसा उदेति उषःकालेप्रादुर्भवतीत्यर्थः॥१॥

अथद्वितीया–

ऊ॒र्ध्वंभा॒नुंस॑वि॒तादे॒वोअ॑श्रेद्द्र॒प्संदवि॑ध्वद्गवि॒षोनसत्वा॑ ।
अनु॑व्र॒तंवरु॑णोयन्तिमि॒त्रोयत्सूर्यं॑दि॒व्या॑रो॒हय॑न्ति ॥ २ ॥

ऊ॒र्ध्वम् । भा॒नुम् । स॒वि॒ता । दे॒वः । अ॒श्रे॒त् । द्र॒प्सम् । दवि॑ध्वत् ।
गो॒ऽइ॒षः । न । सत्वा॑ । अनु॑ । व्र॒तम् । वरु॑णः । य॒न्ति॒ । मि॒त्रः ।
यत् । सूर्य॑म् । दि॒वि । आ॒ऽरो॒हय॑न्ति ॥ २ ॥

सविताप्रेरकोदेवः ऊर्ध्वं उन्मुखंभानुमश्रेत् आश्रयति यद्यदारश्मयःसूर्यंदिविद्युलोके आरोहयन्तिआरोहणंकारयन्ति तदा वरुणोरात्र्यभिमानीदेवः मित्रोहरभिमानी अन्येदेवाश्च व्रतं तत्संवन्धिकर्मानुयन्ति अनुगच्छन्ति अनुगमनेदृष्टान्तउच्यते–द्रप्संपार्थिवंरजोदविध्वत् धुन्वन् विकिरन्नित्यर्थः गविषोगाइच्छन्सत्वानवृषभइव तद्वत्॥ २ ॥

अथतृतीया–

यंसी॒मकृ॑ण्व॒न्तम॑सेवि॒पृचे॑ध्रु॒वक्षे॑मा॒अन॑वस्यन्तो॒अर्थ॑म् ।
तंसूर्यं॑ह॒रित॑ःस॒प्तय॒ह्वीःस्प॒शंविश्व॑स्य॒जग॑तोवहन्ति ॥ ३ ॥

यम्। सी॒म्। अकृ॑ण्वन्। तम॑से। वि॒ऽपृचे॑। ध्रु॒वऽक्षे॑माः।
अन॑वस्यन्तः। अर्थ॑म्। तम्। सूर्य॑म्। ह॒रित॑ः। स॒प्त। य॒ह्वीः।
स्पश॑म्। विश्व॑स्य। जग॑तः। व॒ह॒न्ति॒ ॥ ३ ॥

ध्रुवक्षेमाः स्थिरनिवासाः सृष्टिकर्तारोदेवाः सीम् सर्वतस्तमसेतमसःविपृचे पृथक्करणाय अर्थं जगल्लक्षणंकार्यं अनवस्यन्तः अविमुंचन्तः कुर्वन्तएव यं सूर्यं अकृण्वन्नसृजन्नित्यर्थः यह्वीर्महत्यःसप्त सप्तसंख्याकाः हरितोश्वाः विश्वस्यसमस्तस्यजगतःप्राणिसमूहस्य स्पशं प्रेरकत्वेनज्ञातारं तं सूर्यंवहन्ति धारयन्ति ॥ ३ ॥

अथचतुर्थी–

वहि॑ष्ठेभिर्वि॒हर॑न्यासि॒तन्तु॒मव॒व्यय॒न्नसि॑तंदेव॒वस्म॑ ।
दवि॑ध्वतोर॒श्मय॒ःसूर्य॑स्य॒चर्मे॒वावा॑धु॒स्तमो॑अ॒प्स्व॑१॒न्तः ॥ ४ ॥

वहि॑ष्ठेभिः। वि॒ऽहर॑न्। या॒सि॒। तन्तु॑म्। अ॒व॒ऽव्यय॑म्।
असि॑तम्। दे॒व॒। वस्म॑। दवि॑ध्वतः। र॒श्मय॑ः। सूर्य॑स्य। चर्म॑ऽइव।
अव॑। अ॒धु॒ः। तम॑ः। अ॒प्सु। अ॒न्तरिति॑ ॥ ४ ॥

हेदेव द्योतमान सूर्य त्वं जगन्निर्वाहात्मकस्यरसस्यादानार्थं तन्तुं रश्मिसमूहंविहरन्विस्तारयन्नसि तं कृष्णवर्णवस्म नक्तंचराणां निवासभूतांरात्रिंअवव्ययन् अवाचीनंयथा भवतितथासंवृण्वन्तिरस्कुर्वन्नित्यर्थः वहिष्ठेभिर्वोढुमत्यन्तंशक्तैरश्वैर्यासिगमनमार्गंगच्छसि अस्यामृचिपूर्वार्धेसूर्यस्यप्रत्यक्षमर्थंप्रतिपाद्य उत्तरार्धेपरोक्षमर्थंप्रतिपादयितुमाह–दविध्वतोधुन्वानाःसूर्यस्यसंबन्धिनोरश्मयःकिरणाः अप्स्वन्तरिक्षे आपइत्यन्तरिक्षनाम आकाशं आपः पृथिवीतितन्नामसुपाठात् अन्तर्मध्येचर्मेव चर्मवत्स्थितंतमः अन्धकारमवाधुः अवाचीनमदधुः तिरस्कुर्वंतीत्यर्थः ॥ ४ ॥

अथपंचमी–

अना॑यतो॒अनि॑बद्धःक॒थायं॑न्य॑ङ्ङुत्ता॒नोव॑पद्यते॒न ।
कया॑यातिस्व॒धया॒कोद॑दर्शदि॒वःस्क॒म्भःसमृ॑तःपाति॒नाक॑म् ॥ ५ ॥

अनायतः । अनिऽबद्धः । कथा । अयम् । न्यङ् । उत्तानः ।
अव । पद्यते । न । कया । याति । स्वधया । कः । ददर्श । दिवः ।
स्कम्भः । सम्ऽऋतः । पाति । नाकम् ॥ ५ ॥ १३ ॥

आयतशब्दोदूरवाची तद्विपरीतोनायतः आसीनःसन्नयंप्रत्यक्षेणोपलभ्यमानोमंडलाभिमानीसूर्यः अनिबद्धः केनापिबद्धोनक्रियते अपिवायंसूर्यः न्यङ् अवाङ्मुखःसन् केनचित्कथा कथंनावपद्यते नहिंस्यते किंचायमुत्तानः ऊर्ध्वमुखत्वेनतिष्ठन्कथास्वधयाकेनबलेन यातिगच्छति स्वधाशब्दोन्नवाची अत्रतत्कार्यंबलंलक्षयति अपिचदिवोद्युलोकस्य स्कंभः स्तंभः सम्ऋतः नाकेन समवेतः सूर्यः नाकंस्वर्गंपातिपालयति कोददर्श तत्वतःकःपश्यति नकोपिजानातीत्यर्थः ॥ ५ ॥

॥ इतितृतीयस्यपंचमेत्रयोदशोवर्गः ॥ १३ ॥

प्रत्यग्निरुषसइतिपंचर्चंचतुर्थंसूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं मान्त्रवर्णिकदैवतंवा तथाचानुक्रान्तं प्रत्यग्निरिति । लिंगोक्तदैवतंत्वितितुशब्दादस्यापिसूक्तस्यलिंगोक्तदैवतत्वं विनियोगोलैंगिकः ।

तत्रप्रथमा—

प्रत्यग्निरुषसोजातवेदाअख्यद्देवोरोचमानामहोभिः ।
आनासत्योरुगायारथेनेमंयज्ञमुपनोयातमच्छ ॥ १ ॥

प्रति । अग्निः । उषसः । जातऽवेदाः । अख्यत् । देवः । रोचमानाः ।
महःऽभिः । आ । नासत्या । उरुऽगाया । रथेन । इमम् ।
यज्ञम् । उप । नः । यातम् । अच्छ ॥ १ ॥

देवोद्योतमानः जातवेदाजातधनोग्निः महोभिस्तेजोभिः रोचमानाः दीप्यमानाः उषसःप्रतिउषसोलक्षीकृत्य अख्यत् प्रवृद्धोभवति उरुगाया प्रभूतगमनौ हेनासत्या अश्विनौ रथेननोस्मदीयमिमंयज्ञं अच्छाभिमुखमुपयातं उपगच्छतम् ॥ १ ॥

अथद्वितीया—

ऊर्ध्वंकेतुंसवितादेवोअश्रेज्ज्योतिर्विश्वस्मैभुवनायकृण्वन् ।
आप्राद्यावापृथिवीअन्तरिक्षंविसूर्योरश्मिभिश्चेकितानः ॥ २ ॥

ऊर्ध्वम् । केतुम् । सविता । देवः । अश्रेत् । ज्योतिः ।
विश्वस्मै । भुवनाय । कृण्वन् । आ । अप्राः । द्यावापृथिवी इति ।
अन्तरिक्षम् । वि । सूर्यः । रश्मिऽभिः । चेकितानः ॥ २ ॥

विश्वस्मैसर्वस्मैभुवनायलोकायज्योतिस्तेजःकृण्वन्कुर्वन्सवितापेरकोदेवः ऊर्ध्वंउन्मुखंकेतुं प्रकाशकंभानुमश्रेत् आश्रयति विचेकितानःसर्वंविशेषेणपश्यन्सूर्यःरश्मिभिःस्वकीयैःकिरणैर्द्यावापृथिवी द्युलोकभूलोकौ अन्तरिक्षंच आअप्राः समन्तादपूरयत् ॥ २ ॥

अथतृतीया–

आवहन्त्यरुणीर्ज्योतिषागान्महीचित्रारश्मिभिश्चेकिताना ।
प्रबोधयन्तीसुवितायदेव्यु१षाईयतेसुयुजारथेन ॥ ३ ॥

आऽवहन्ती । अरुणीः । ज्योतिषा । आ । अगात् । मही ।
चित्रा । रश्मिऽभिः । चेकिताना । प्रऽबोधयन्ती । सुविताय ।
देवी । उषाः । ईयते । सुऽयुजा । रथेन ॥ ३ ॥

आवहन्तीधनानिधारयन्ती अरुणीररुणवर्णाः प्रथमैकवचनेद्वितीयाबहुवचनंछान्दसं ज्योतिषा तेजसायुक्तामहीमहतीरश्मिभिः किरणैश्चित्रादर्शनीयाचेकितानाजानती उषाआगादागच्छत् किंच प्रबोधयन्ती सुप्तान्प्रबुद्धान्कुर्वतीदेवीद्योतमानाउषाः सुयुजाशोभनयुक्तेनरथेनसुविताय सुखप्राप्तये ईयते गच्छति ॥ ३ ॥

अथचतुर्थी–

आवांवहिष्ठाइहतेवहन्तुरथाअश्वासउषसोव्युष्टौ ।
इमेहिवांमधुपेयायसोमाअस्मिन्यज्ञेवृषणामादयेथाम् ॥ ४ ॥

आ । वाम् । वहिष्ठाः । इह । ते । वहन्तु । रथाः । अश्वासः ।
उषसः । विऽउष्टौ । इमे । हि । वाम् । मधुऽपेयाय । सोमाः ।
अस्मिन् । यज्ञे । वृषणा । मादयेथाम् ॥ ४ ॥

हेअश्विनौ इहयज्ञे वहिष्ठाः वोढृतमाः तेप्रसिद्धारथाः रंहणाःगन्तारः अश्वासः अश्वाः वांयुवांउषसः उषोदेवतायाव्युष्टौव्युच्छनकालेआवहन्तु समतान्नयन्तु हियस्मात्कारणात् हेवृषणा वृषणौ कामानांवर्षितारौ हेअश्विनौ इमेसोमाः वांयुवांमधुपेयायमधोःसोमस्यपानाय अस्मिन्यज्ञेमादयेथां हर्षयेथाम् ॥ ४ ॥

अथपञ्चमी—

अना॑यतो॒अनि॑बद्धःक॒थायंन्यं॑ङुत्ता॒नोव॑पद्यते॒न।
कया॑यातिस्व॒धया॒कोद॑दर्श॑दि॒वःस्क॒म्भःसमृ॑तःपाति॒नाक॑म् ॥५॥१॥

अना॑यतः । अनि॑ऽबद्धः । क॒था । अ॒यम् । न्य॑ङ् । उ॒त्ता॒नः ।
अव॑ । प॒द्य॒ते॒ । न । कया॑ । या॒ति॒ । स्व॒धया॑ । कः । द॒द॒र्श॑ ।
दि॒वः । स्क॒म्भः । सम्ऽऋ॑तः । पा॒ति॒ । नाक॑म् ॥ ५ ॥ १४ ॥

इयमृक्पूर्वंव्याख्याता ॥ ५ ॥

॥ इतितृतीयस्यपंचमेचतुर्दशोवर्गः ॥ १४ ॥

अग्निर्होतेतिदशर्चंपंचमंसूक्तंवामदेवस्यार्षंगायत्रं अत्रेयमनुक्रमणिका—अग्निर्होतादशगायत्रमृषिर्बोधदितिद्वाभ्यांसोमकंसाहदेव्यमभ्यवदत्पराभ्यामश्विनावायुरयाचतेति बोधदितिद्वचेनसोमकराजास्तूयते एषवामितिद्वचेनाश्विनौ शिष्टाभिःषड्भिरग्निःस्तूयते अतस्ताएवदेवताः सूक्तविनियोगोलैंगिकः पशोःपर्यग्निकरणेअग्निर्होतानइत्याद्यस्तृचोनुवचनीयः तथाचसूत्रितम्—अग्निर्होतानइतितृचंपर्यग्नयेन्वाहेति । प्रातरनुवाकेप्याग्नेयेक्रतौगायत्रेछन्दस्याश्विनशस्त्रेचायंतृचोविनियुक्तः तथाचसूत्रितम्—अग्निर्होतानोअध्वरइतितिस्रइति ।

तत्रप्रथमा—

अ॒ग्निर्होता॑नोअध्व॒रेवा॒जीसन्परि॑णीयते। दे॒वोदे॒वेषु॑य॒ज्ञियः॑ ॥१॥

अ॒ग्निः । होता॑ । नः॒ । अ॒ध्व॒रे । वा॒जी । सन् । परि॑ । नी॒य॒ते॒ । दे॒वः ।
दे॒वेषु॑ । य॒ज्ञियः॑ ॥ १ ॥

होता देवानामाह्वाता होमनिष्पादकोवा अग्निः नोस्मदीयेअध्वरे यागे वाजीत्येतल्लुप्तोपमाकं वाजीशीघ्रगामीवोढाअश्वइव तथादेवेभ्योहविर्वाहकःसन् परिणीयते परितःसमन्ता-

त्प्राप्यते तथाब्राह्मणे[1]भवति—वाजीसन्परिणीयतइतिवाजिनमिवह्येनंसन्तंपरिणयन्तीति । कीदृशोग्निः देवेषुद्योतमानेषु इन्द्रादिषुमध्ये देवोद्योतमानःयज्ञियोयज्ञार्हः ॥ १ ॥

अथद्वितीया—

परित्रिविष्ट्यध्वरंयात्यग्नीरथीरिव । आदेवेषुप्रयोदधत् ॥ २ ॥

परि । त्रिऽविष्टि । अध्वरम् । याति । अग्निः । रथीःऽइव । आ ।
देवेषु । प्रयः । दधत् ॥ २ ॥

देवेषुद्योतमानेष्विन्द्रादिषु प्रयइत्यन्ननामेदं प्रयःयजमानैर्दत्तंहवीरूपमन्नमादधत् आसमन्ताद्धारयन्नग्निःअंगनादिगुणविशिष्टोग्निः त्रिविष्टि त्रिवारंसवनत्रयेपीत्यर्थः परि परितः समन्तादध्वरंयजमानैःकृतंयागंयातिगच्छति परिगमनेदृष्टान्तः—रथीरिव रथवान्पुरुषोयथाशीघ्रंयातितद्वत तथाचब्राह्मणम्—परित्रिविष्ट्यध्वरंयात्यग्नीरथीरिवेत्येषहिरथीरिवाध्वरंपरियाति[2]ति ॥ २ ॥

अथतृतीया—

परिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानिदाशुषे ॥ ३ ॥

परि । वाजऽपतिः । कविः । अग्निः । हव्यानि । अक्रमीत् । दधत् ।
रत्नानि ।। दाशुषे ॥ ३ ॥

वाजपतिः वाजानामन्नानांपतिः पालकः परिवाजपतिः कविरित्येषहिवाजानांपतिरिति ब्राह्मणम्[3] । कविःक्रान्तदर्शी मेधावीवा दाशुषेहविर्दत्तवतेयजमानाय रत्नानिरमणीयानिधनानिदधत प्रयच्छन्नग्निर्हव्यानिहवींषिपर्यक्रमीत् परितःक्रामति व्याप्नोति ॥ ३ ॥

अथचतुर्थी—

अयंयःसृंजयेपुरोदैववातेसमिध्यते । द्युमाँअमित्रदम्भनः ॥ ४ ॥

अयम् । यः । सृञ्जये । पुरः । दैवऽवाते । सम्ऽइध्यते । द्युऽमान् ।
अमित्रऽदम्भनः ॥ ४ ॥

---

[1] ऐ० ब्रा० २. ५. । [2] ऐ० ब्रा० २. ५. ।

Funding by IKS-MoE

यःप्रसिद्धोयं प्रत्यक्षेणोपलभ्यमानोग्निः दैववाते देववातस्यपुत्रेसृंजयोनामकश्चित्सोमयाजी तस्मिन्निमित्तभूतेसति तद्यागार्थमित्यर्थः सृंजयस्ययष्टृत्वंतैत्तिरीयाआमनंति—वासिष्ठोहसात्यहव्योदेवभागंपप्रच्छयत्सृंजयान्बहुयाजिनोयीयजदिति[1] । पुरःपूर्वस्यांदिशि स्थितायामुत्तरवेद्यांसमिध्यते सम्यग्दीप्यते अमित्रदंभनः शत्रूणांहिंसकःसोग्निः द्युमान्दीप्तिमान्भवतीतिशेषः ॥ ४ ॥

अथपंचमी—

अस्य॑घावी॒रईव॑तो॒ग्नेरी॑शीत॒मर्त्यः॑ । ति॒ग्मज॑म्भस्यमी॒ळ्हुषः॑ ॥५॥१५॥

अस्य॑ । घ॒ । वी॒रः॑ । ईव॑तः । अ॒ग्नेः । ई॒शी॒त॒ । मर्त्यः॑ ।
ति॒ग्मऽज॑म्भस्य । मी॒ळ्हुषः॑ ॥ ५ ॥ १५ ॥

वीरः स्तुतौविक्रान्तः मर्त्योमरणधर्मायजमानः तिग्मजंभस्य तीक्ष्णतेजसः मीळ्हुषः अभिलषितफलानांसेक्तुः ईवतोगमनवतोस्याग्नेःईशीत ईश्वरोभवेत् घेतिपादपूरणः एतेनयजमानआत्माभीष्टफलंकारयितुंसमर्थोभवतीत्यर्थः ॥ ५ ॥

॥ इतितृतीयस्यपञ्चमेपंचदशोवर्गः ॥ १५ ॥

अथषष्ठी—

तमर्व॑न्तं॒नसा॑न॒सिम॑रु॒षंनदि॒वःशिशु॑म् । म॒र्मृ॒ज्यन्ते॑दि॒वेदि॑वे ॥ ६ ॥

तम् । अर्व॑न्तम् । न । सा॒न॒सिम् । अ॒रु॒षम् । न । दि॒वः । शिशु॑म् ।
म॒र्मृ॒ज्यन्ते॑ । दि॒वेऽदि॑वे ॥ ६ ॥

यजमानाः अर्वन्तंन शीघ्रगामिनमश्वमिव सानसिं संभजनीयंदिवःशिशुंन द्युलोकस्यपुत्रभूतंसूर्यमिव अरुषं आरोचमानंतमग्निंदिवेदिवेप्रतिदिनंमर्मृज्यन्ते भृशंपरिचरणंकुर्वन्ति ॥ ६ ॥

अथसप्तमी—

बोध॒यन्मा॒हरि॑भ्यांकुमा॒रःसा॑हदे॒व्यः । अच्छा॒नहू॒तउद॑रम् ॥ ७ ॥

---

[1] तै० सं० ६.।६.।२.

बोधंत् । यत् । मा । हरिऽभ्याम् । कुमारः । साहऽदेव्यः । अच्छं ।
न । हूत । उत् । अरम् ॥ ७ ॥

साहदेव्यः सहदेवनाम्नोराज्ञःपुत्रःकुमारःसोमकाभिधोराजा हरिभ्यां अश्वाभ्यामश्वौ दातुंमा मां यद्यदाबोधत् बोधयामास इमौतवाश्वाविति तदाहं अच्छाभिमुख्येन कुमारेणहूतः सन्नोदरंतावश्वावलब्ध्वा ननिर्गतवानस्मि ॥ ७ ॥

अथाष्टमी–

उतत्यायंजताहरींकुमारात्सांहदेव्यात् । प्रयंतासद्यआदंदे ॥ ८ ॥

उत । त्या । यजता । हरी इति । कुमारात् । साहऽदेव्यात् ।
प्रऽयंता । सद्यः । आ । ददे ॥ ८ ॥

उतापिच साहदेव्यात् सहदेवस्यपुत्रात्कुमारात्सोमकाद्राज्ञः यजता पूजनीयौ प्रयता प्रयतौ त्या त्यौ तौ प्रसिद्धौ हरीअश्वौ सद्यः यस्मिन्दिनेतेनाहूतः तस्मिन्नेवदिने आददे आदत्तवानस्मि मन्त्रद्रष्टाऋषिः बोधदित्यृग्द्वयेनकुमारमश्वेप्सयाभ्युपगम्याश्वावेतस्माल्लब्ध्वाप्रीतोभवदित्यर्थः ॥ ८ ॥

अथनवमी–

एषवांदेवावश्विनाकुमारःसांहदेव्यः । दीर्घायुंरस्तुसोमंकः ॥ ९ ॥

एषः । वाम् । देवौ । आश्विना । कुमारः । साहऽदेव्यः ।
दीर्घऽआंयुः । अस्तु । सोमंकः ॥ ९ ॥

देवौ द्योतमानौ हेअश्विनाअश्विनौ वां युवांतर्पकःसाहदेव्यः सहदेवस्यपुत्रः कुमारः सोमकाभिधानएषराजादीर्घायुरस्तु शतायुष्कोभवतु एतमुहैवप्रोचतुःपर्वतनारदौसोमकायेत्यादिनासर्वेहैवमहाराजाआसुरित्यनेनब्राह्मणेनसोमकस्यराजत्वंस्पष्टीकृतम् ॥ ९ ॥

अथदशमी–

तंयुवंदेवावश्विनाकुमारंसांहदेव्यम् । दीर्घायुंषंकृणोतन ॥ १० ॥ १६ ॥

---

१ ऐ० ब्रा० ७. ३४. ।

Funding by IKS-MoE

तम् । यु॒वम् । दे॒वौ॒ । अ॒श्वि॒ना॒ । कु॒मा॒रम् । सा॒ह॒ऽदे॒व्यम् ।
दी॒र्घऽआ॑युषम् । कृ॒णो॒त॒न॒ ॥ १० ॥ १६ ॥

हेदेवावश्विना द्योतमानावश्विनौ युवं युवां साहदेव्यं सहदेवस्यपुत्रं कुमारं सोमकाख्यंराजानंदीर्घायुषंशतायुष्कंकृणोतन कुरुतं अनेनर्चेनास्यकुमारस्यदीर्घमायुरश्विनौऋषिरयाचतेत्यर्थः ॥ १० ॥

॥ इतितृतीयस्यपंचमेषोडशोवर्गः ॥ १६ ॥

आसत्योयात्वित्येकविंशत्यृचंषष्ठंसूक्तं त्रैष्टुभमैन्द्रंवामदेव्यं अत्रेयमनुक्रमणिका—आसत्यःसैकेन्द्रमिति तत्रेन्द्रमित्युक्तत्वादग्न्यधिकारोनिवृत्तइत्यवगम्यते चतुर्विंशेहनिमाध्यंदिनसवनेमैत्रावरुणशस्त्रे इदंद्वितीयमहीनसूक्तं तथाचसूत्रितं—आसत्योयात्वित्यहीनसूक्तं द्वितीयं मैत्रावरुणइति समूह्ळदशरात्रेनवमेहनिनिष्केवल्यशस्त्रेइदंसूक्तं सूत्रितंच—आसत्योयात्वहंभुवंतत्तइन्द्रियमितिनिष्केवल्यमिति ।

तत्रप्रथमा—

आस॒त्योया॑तुम॒घवाँ॑ऋजी॒षीद्रव॑न्त्वस्य॒हर॑य॒उप॑नः ।
तस्मा॒इदन्ध॑ःसुषु॒मासु॒दक्ष॑मि॒हाभि॑पि॒त्वंक॑रतेगृणा॒नः ॥ १ ॥

आ । स॒त्यः । या॒तु॒ । म॒घऽवा॑न् । ऋ॒जी॒षी । द्रव॑न्तु । अ॒स्य॒ । हर॑यः ।
उप॑ । न॒ः । तस्मै॑ । इत् । अन्ध॑ः । सु॒सु॒म॒ । सु॒ऽदक्ष॑म् । इ॒ह ।
अ॒भि॒ऽपि॒त्वम् । क॒र॒ते॒ । गृ॒णा॒नः ॥ १ ॥

ऋजीषी ऋजीषशब्देननिष्पिष्टोविगतसारःसोमोभिधीयते तद्वान् सत्यः सत्यवान् मघवान्धनवानिन्द्रोनोस्माकमुपसमीपेआयात्वागच्छतु किंचास्येन्द्रस्यहरयोश्वाःनोस्माकमुपसमीपे द्रवन्तु आगच्छन्तु वयंयजमानाइहास्मिन्यज्ञेतस्माइन्द्रायसुदक्षंशोभनबलंसारोपेतमित्यर्थः तदिदंप्रत्यक्षेणोपलभ्यमानमन्धः अन्नरूपंसोमंसुषुमाभिषुतंकुर्याम गृणानोस्माभिःस्तूयमानइन्द्रः अभिपित्वमस्मदभिमतप्राप्तिंकरते करोतु ॥ १ ॥

अथद्वितीया—

अवस्यशूराध्वनोनान्तेस्मिन्नोअद्यसवनेमन्दध्यै ।
शंसात्युक्थमुशनेववेधाश्चिकितुषेअसुर्यायमन्म ॥ २ ॥

अव । स्य । शूर । अध्वनः । न । अन्ते । अस्मिन् । नः ।
अद्य । सवने । मन्दध्यै । शंसाति । उक्थम् । उशनाऽइव ।
वेधाः । चिकितुषे । असुर्याय । मन्म ॥ २ ॥

हेशूर शत्रूणामभिभवसमर्थेन्द्र अद्येदानीं अस्मिन्सवने माध्यंदिनाख्येमन्दध्यै त्वांमादयितुंनोस्मानवस्यविमुंच तत्रदृष्टान्तः—अध्वनोगन्तव्यस्यमार्गस्यान्तेसमीपेन अश्वान्मनुष्याः यथामुंचन्तितद्वत् उशनेव काव्यइव वेधाःशंसितायजमानः हेइन्द्र चिकितुषेसर्वंजानते असुर्यायासुराणांहिंसकायतुभ्यंमन्म मननीयमुक्थंशस्त्ररूपंस्तोत्रंशंसाति शंसनंकरोति ॥ २ ॥

अथतृतीया—

कविर्ननिण्यंविदथानिसाधन्वृषायत्सेकंविपिपानोअर्चात् ।
दिवइत्थाजीजनत्सप्तकारूनह्नाचिच्चक्रुर्वयुनागृणन्तः ॥ ३ ॥

कविः । न । निण्यम् । विदथानि । साधन् । वृषा । यत् । सेकम् ।
विऽपिपानः । अर्चात् । दिवः । इत्था । जीजनत् । सप्त ।
कारून् । अह्ना । चित् । चक्रुः । वयुना । गृणन्तः ॥ ३ ॥

कविर्मेधावीनिण्यंन निण्यमित्यन्तर्हितनामैतत् अन्तर्हितंगूढमर्थमिव विदथानि वेदनीयानि कार्यजातानिसाधन्साधयन् वृषाकामानांवर्षितेन्द्रः यद्यदासेकंसेचनीयंसोमंविपिपानः अत्यर्थंपिबन्नर्चात् विशेषेणार्चति सोमपानेश्रद्धांकरोतीत्यर्थः तदानीं दिवोमुष्मात्लोकादित्थासत्यमेवसप्तसप्तसंख्याकान्कारून्रश्मीन्जीजनत्अजीजनत् जनयति गृणन्तः स्तूयमानारश्मयः वयुना वयुनानि मनुष्याणांज्ञानानि अह्नाचिद्दिवसेनापिचक्रुः कृतवन्तः ॥ ३ ॥

अथचतुर्थी—

स्व१र्यद्वेदिसुदृशीकमर्कैर्महिज्योतीरुरुचुर्यद्धवस्तोः ।
अन्धातमांसिदुधिताविचक्षेनृभ्यश्चकारनृतमोअभिष्टौ ॥ ४ ॥

स्व॑ः। यत्। वेदि॑। सु॒ऽदृशी॑कम्। अ॒र्कैः। महि॑। ज्योति॑ः।
रु॒रु॒चु॒ः। यत्। ह॒। वस्तो॑ः। अ॒न्धा। तमां॑सि। दुधि॑ता।
वि॒ऽचक्षे॑। नृऽभ्य॑ः। च॒का॒र। नृऽत॑मः। अ॒भिष्टौ॑॥ ४॥

यद्ध यदाखलु महि महत्प्रभूतं ज्योतिस्तेजोरूपंयत्स्वः योद्युलोकः अर्कैः रश्मिभिः सुदृशीकं सुष्ठुदर्शनीयं वेदिअवेदि ज्ञायते तदानींदेवाः तस्मिन्स्वर्गेवस्तोर्निवासार्थंरुरुचुर्दीप्तियुक्ताबभूवुः नृतमोनेतृतमःसूर्यः अभिष्टौ अभ्यागमनेनृभ्योनृणांविचक्षेविशेषेणदर्शनाय अन्धा अन्धकाररूपाणि निबिडानितमांसि दुधिता दुधितानिनाशितानि चकार कृतवान्॥ ४॥

अथपंचमी–

व॒व॒क्षइन्द्रो॒अमि॑तमृजी॒ष्युं१॒भेआप॑प्रौ॒रोद॑सीमहि॒त्वा।
अत॑श्चिदस्यमहि॒माविरे॑च्य॒भियोविश्वा॒भुव॑नाब॒भूव॑॥ ५॥ १७॥

व॒व॒क्षे। इन्द्र॑ः। अमि॑तम्। ऋ॒जी॒षी। उ॒भे इति॑। आ। प॒प्रौ॒।
रोद॑सी॒ इति॑। म॒हि॒ऽत्वा। अत॑ः। चि॒त्। अ॒स्य॒। म॒हि॒मा।
वि। रे॒चि॒। अ॒भि। यः। विश्वा॑। भुव॑ना। ब॒भूव॑॥ ५॥ १७॥

ऋजीषी ऋजीषशब्देननिष्पिष्टोविगतसारःसोमोभिधीयते तद्वानिन्द्रः परमैश्वर्ययुक्तः अमितमियत्तारहितं महिमानंववक्षे उवाह किंच महित्वामहत्त्वेन स्वेनमहिम्ना उभेरोदसी उभेद्यावापृथिव्यौ आपप्रौ समन्तादपूरयत् यइन्द्रः विश्वा भुवना सर्वाणिभुवनानि अभिबभूव तिरश्चकार अतश्चिदेभ्योपि विश्वेभ्योभुवनेभ्यः अस्येन्द्रस्यमहिमाविरेचि अतिरिरिचे अधिकोबभूवेत्यर्थः॥ ५॥

॥ इतितृतीयस्यपंचमेसप्तदशोवर्गः॥ १७॥

अथषष्ठी–

विश्वा॑निश॒क्रोनर्या॑णिवि॒द्वान॒पोरि॑रेच॒सखि॑भि॒र्निका॑मैः।
अश्मा॑नंचि॒द्येबि॑भि॒दुर्वचो॑भिर्व्र॒जंगोम॑न्तमु॒शिजो॒विव॑व्रुः॥ ६॥

विश्वा॑नि । श॒क्रः । नर्या॑णि । वि॒द्वान् । अ॒पः । रि॒रे॒च॒ । सखि॑ऽभिः ।
निऽका॑मैः । अश्मा॑नम् । चि॒त् । ये । बि॒भि॒दुः । वचः॑ऽभिः ।
व्र॒जम् । गोऽम॑न्तम् । उ॒शिजः॑ । वि । व॒व्रु॒रिति॑वव्रुः ॥ ६ ॥

विश्वानि समस्तानि नर्याणि मनुष्याणांहितानि वृष्ट्यादीनि कार्याणि विद्वान् जानन् शक्रःसमर्थइन्द्रः निकामैर्निकामयमानेभ्यःसखिभिर्मित्रभूतेभ्योमरुद्भ्यः व्यत्ययेनचतुर्थ्यर्थेतृतीया अपोवृष्टिलक्षणान्युदकानिरिरेच रिक्तीचकार इन्द्रःसस्यादिफलसिद्ध्यर्थंमेघस्थान्युदकानिमरुद्भ्योदत्तवानित्यर्थः यद्वा निकामैर्निकामयमानैःसखिभिर्मरुद्भिःसहितःसन् अपोनभसःसकाशात् अपइत्यन्तरिक्षनामैतत् अत्रविभक्तिव्यत्ययः रिरेच व्यतिरिक्तोबभूव येमरुतः वचोभिर्वाग्रूपैर्ध्वनिभिः अश्मानंचित् पर्वतमपि मेघंवा अश्मेतिमेघनामैतत् बिभिदुरभैत्सुः उशिजःकामयमानास्तेमरुतः गोमन्तंगोभिरुपेतंव्रजमंगिरसांसंबन्धिगोस्थानंविवव्रुः आच्छादयामासुः ॥ ६ ॥

अथसप्तमी–

अ॒पोवृ॒त्रंव॑व्रि॒वांसं॒परा॑ह॒न्प्राव॑त्ते॒वज्रं॑पृथि॒वीसचे॑ताः ।
प्रार्णां॑सिसमु॒द्रिया॑ण्यैनो॒ःपति॒र्भव॒ञ्छव॑साशूरधृष्णो ॥ ७ ॥

अ॒पः । वृ॒त्रम् । व॒व्रि॒ऽवांस॑म् । परा॑ । अ॒ह॒न् । प्र । आ॒व॒त् । ते॒ ।
वज्र॑म् । पृ॒थि॒वी । सऽचे॑ताः । प्र । अर्णां॑सि । स॒मु॒द्रिया॑णि ।
ऐ॒नोः॒ । पतिः॑ । भव॑न् । शव॑सा । शू॒र॒ । धृ॒ष्णो॒ इति॑ ॥ ७ ॥

हेइन्द्र प्रावत् राक्षसादिभ्यःप्रकर्षेणलोकान्पालयित् ते त्वदीयंवज्रं अपोवृष्टिलक्षणान्युदकानि वव्रिवांसमावरकंवृत्रंमेघंपराहन् प्रकर्षेणप्रेरयतिस्म पृथिवीभूमिःसचेताश्चेतनावतीत्वयासंगताबभूव धृष्णो धर्षणशील हेशूर विक्रान्तेन्द्र त्वंशवसाबलेनपतिर्भवन्लोकानांपालकः सन् समुद्रियाणि समुद्रसंबन्धीनिअर्णांसि नभसिस्थितान्युदकानिप्रैणोः प्रेरकोबभूथ ॥ ७ ॥

अथाष्टमी–

अ॒पोयदद्रिं॑पुरुहूत॒दर्द॑रा॒विर्भु॑वत्स॒रमा॑पू॒र्व्यंते॑ ।
सनो॑ने॒तावाज॒माद॑र्षि॒भूरिं॑गो॒त्रारु॒जन्नङ्गि॑रोभिर्गृणा॒नः ॥ ८ ॥

अ॒पः । यत् । अद्रि॑म् । पु॒रु॒ऽहू॒त॒ । दर्द॑ः । आ॒विः॑ । भु॒व॒त् ।
स॒रमा॑ । पू॒र्व्य॑म् । ते॒ । सः । न॒ः । ने॒ता । वाज॑म् । आ । द॒र्षि॒ ।
भूरि॑म् । गो॒त्रा । रु॒जन् । अङ्गि॑रःऽभिः । गृ॒णा॒नः ॥ ८ ॥

हेपुरुहूत बहुभिराहूतेन्द्र यद्यदा अपःप्रति वृष्टिलक्षणान्युदकानिलक्षीकृत्य अद्रिंमेघं दर्दः विदारितवानसि सरमादेवशुनी पूर्व्यं पुरा ते तुभ्यं पणिभिरपहृतंगोधनंआविर्भूत् प्रकाशयामास अंगिरोभिर्ऋषिभिः गृणानःस्तूयमानः सन् गोत्रागोत्राण्यभ्राणिरुजन्नोस्मान्भूरिंप्रभूतं वाजमन्नंनेतामापयितासत्वमादर्षि आदरंकृतवानसि ॥ ८ ॥

अथनवमी–

अच्छा॑क॒विंनृ॑मणोगाअ॒भिष्टौ॒स्व॑र्षातामघव॒न्नाध॑मानम् ।
ऊ॒तिभि॒स्तमि॑षणोद्यु॒म्नहू॑तौ॒निमा॒यावा॒नब्र॑ह्मा॒दस्यु॑रर्त ॥ ९ ॥

अच्छ॑ । क॒विम् । नृ॒ऽम॒न॒ः । गा॒ः । अ॒भिष्टौ॑ । स्वः॑ऽसाता ।
म॒घ॒ऽव॒न् । नाध॑मानम् । ऊ॒तिऽभिः॑ । तम् । इ॒ष॒ण॒ः । द्यु॒म्नऽहू॑तौ ।
नि । मा॒याऽवा॑न् । अब्र॑ह्मा । दस्यु॑ः । अ॒र्त॒ ॥ ९ ॥

हेमघवन् धनवन्निन्द्र नृमणः नृभिर्मनुष्यैर्मन्यतइतिनृमणस्त्वं कविंमेधाविनं कुत्सं अच्छगाः अभ्यगाः किंच स्वर्षातास्वर्धनंतस्यसातौदानेनिमित्तेअभिष्टौ कवेरभिगमेसति नाधमानंयुद्धार्थंत्वांयाचमानंकुत्सं ऊतिभिःशत्रुकृतोपद्रवपरिहाररूपैःरक्षणैः इषणः प्रेरितवानसि मायावान्कपटवानब्रह्मा ऋत्विग्भिःक्रियमाणं सर्वकर्मजातमनुज्ञारूपेणजानन्नृत्विग्विशेषो ब्रह्मशब्देनोच्यते सनविद्यतेयस्यसोऽब्रह्मा वेदोक्तकर्मस्वास्तिक्यरहितइत्यर्थः दस्युः कुत्सस्यशत्रुः द्युम्नहूतौ द्युम्नंधनंहूतिराह्वानंयस्यांयुधि तस्यांन्यर्त विनष्टोबभूव इन्द्रः कुत्सेनाहूतः सन् तस्यशत्रुंहतवानित्यर्थः ॥ ९ ॥

अथदशमी–

आद॑स्युघ्नामन॑साया॒ह्यस्तं॑भुव॑त्ते॒कुत्सः॑स॒ख्येनिका॑मः ।
स्वेयोनौ॒निष॑दतं॒सरू॑पा॒विवां॑चिकित्सदृत॒चिद्ध॒नारी॑ ॥ १० ॥ १८ ॥

आ । दस्युऽघ्ना । मनसा । याहि । अस्तम् । भुवत् । ते । कुत्सः ।
सख्ये । निऽकामः । स्वे । योनौ । नि । सदतम् । सऽरूपा । वि ।
वाम् । चिकित्सत् । ऋतऽचित् । ह । नारी ॥ १० ॥ १८ ॥

अत्रकाचिदाख्यायिकाश्रूयते—कथंरुरुनामकःकश्चिद्राजर्षिस्तस्यपुत्रःकुत्साख्योराजर्षिरासीत् सचकदाचिच्छत्रुभिःसहयुयुत्सुः संग्रामेस्वयमशक्तःसन् शत्रूणांहननार्थमिन्द्रस्याह्वानं चकार सचेन्द्रःकुत्सस्यगृहमागत्य तस्यशत्रून्जघान तदनन्तरमतिप्रीत्यातयोःसख्यमभवत् सख्यानन्तरमिन्द्रएनमपिस्वकीयंगृहंप्रापयामास तत्रशचीइन्द्रंप्राप्तुमागतासतीतौसमानरूपौदृष्ट्वा अयमिंद्रअयंकुत्सइतिविवेकाभावेनसंशयंचकारेति । अनयाख्यायिकयाप्रतीयमानोर्थोत्रप्रतिपाद्यते—हेइन्द्र दस्युघ्ना दस्यूनांशत्रूणांहंत्रा मनसायुक्तस्त्वं अस्तंकुत्सस्यगृहं अस्तमितिगृहनामैतत् आयाहिआगाः लुङर्थेलोट् कुत्सश्च ते तव संबन्धिनिसख्ये निकामः नितरांकामयमानोभुवदभवत् ततस्तौवांयुवांस्वेयोनौस्वकीयेस्थानेनिषदतं न्यसीदतं उपविष्टावभूतं ऋतचित्सत्यदर्शनीनारीइन्द्रस्यभार्याशची सरूपा सरूपौसमानरूपौवांयुवांविचिकित्सत् संशयंचकार ॥ १० ॥

॥ इतितृतीयस्यपंचमेष्टादशोवर्गः ॥१८ ॥

अथैकादशी—

यासिकुत्सेनसरथंमवस्युस्तोदोवातस्यहर्योरीशानः ।
ऋज्राावाजंनगध्यंयुयूषन्कविर्यदहन्पार्याय भूषात् ॥ ११ ॥

यासि । कुत्सेन । सऽरथम् । अवस्युः । तोदः । वातस्य । हर्योः ।
ईशानः । ऋज्रा । वाजम् । न । गध्यम् । युयूषन् । कविः । यत् ।
अहन् । पार्याय । भूषात् ॥ ११ ॥

हेइन्द्र अवस्युः कुत्सस्यरक्षणमिच्छन् छन्दसिक्यच् परेच्छायामपिदृश्यते तोदस्तोदकः शत्रूणांहिंसकः वातस्य वायुसदृशयोर्वेगवतोर्हर्योरश्वयोरीशान ईश्वरस्त्वंकुत्सेनकुत्साख्येनराजर्षिणासरथंसमानरथंयासि गच्छसि गध्यंग्राह्यंगध्यंगृह्णातेः ऋज्रावाजंनगध्यंयुयूषन्नित्यपिनिगमोभवतीतिनिरुक्तम्[1] ।वाजंन अन्नमिव ऋज्रा ऋजुगामिनावश्वौयुयूषन्स्वकीयेरथेयो-

---

[1] नि० ५. १५.।

जयन् कविःप्राज्ञःकुत्सः यद्यस्मिन्नहन्नहनिदिवसेपार्याय पारणाय अभिन्निस्तरणायभूषात्प्रभवते तस्मिन्नेवदिने कुत्सेनसरथंयासीतिपूर्वेणसंबन्धः ॥ ११ ॥

अथद्वादशी–

कुत्सा॑य॒शुष्ण॑म॒शुषं॒निब॑र्हीःप्रपि॒त्वेअह्नः॒कुय॑वंस॒हस्रा॑ ।
स॒द्योदस्यू॒न्प्रमृ॑णकु॒त्स्येन॒प्रसूर॑श्च॒क्रंवृ॑हताद॒भीके॑ ॥ १२ ॥

कुत्सा॑य । शुष्ण॑म् । अ॒शुष॑म् । नि । ब॒र्हीः॒ । प्र॒ऽपि॒त्वे । अह्नः॑ ।
कुय॑वम् । स॒हस्रा॑ । स॒द्यः । दस्यू॑न् । प्र । मृ॒ण॒ । कु॒त्स्येन॑ । प्र ।
सूरः॑ । च॒क्रम् । वृ॒ह॒ता॒त् । अ॒भीके॑ ॥ १२॥

शुष्णंपिप्रुमित्यस्यामृचिप्रतिपादितोर्थः कुत्सायेत्यनेनऋग्द्वयेनस्पष्टीक्रियते हेइन्द्र त्वं कुत्साय कुत्सार्थमशुषं शूषमितिसुखनामैतत् तद्रहितं अत्रदीर्घाभावः शुष्णंशुष्णनामानमसुरंनिबर्हीः न्यबर्हीः अवधीः तथा अह्नः दिवसस्य प्रपित्वेप्रक्रमेपूर्वाह्णेकुयवं कुयवनामकमसुरंचहतवानसि तथा सत्वं सहस्रासहस्रेणबहुभिःपरिजनैःसह सद्यःयस्मिन्कालेकुयवमवधीः तस्मिन्कालेएव कुत्स्येन कुत्सइतिवज्रनामैतत् कुत्सएवकुत्स्यं वज्रं तेनदस्यून्शत्रून्प्रमृण जहि भूतार्थेलोट् हतवानसि तथा सूरः प्रेरकस्यसूर्यस्यचक्रमायुधं अभीकेसमीपेसंग्रामेवा प्रवृहतात् प्रकर्षेणछिन्नवानसि ॥ १२ ॥

अथत्रयोदशी–

त्वं॑पिप्रुं॒मृग॑यंशूशु॒वांस॑मृ॒जिश्व॑नेवैदथि॒नाय॑रन्धीः ।
प॒ञ्चा॒शत्कृ॒ष्णानिव॑पःस॒हस्रात्कं॒नपुरो॑जरि॒माविद॑र्दः ॥ १३ ॥

त्वम् । पिप्रु॑म् । मृग॑यम् । शू॒शु॒ऽवांस॑म् । ऋ॒जिश्व॑ने । वै॒द॒थि॒नाय॑ ।
र॒न्धीः॒ । प॒ञ्चा॒शत् । कृ॒ष्णा । नि । व॒पः॒ । स॒हस्रा॑ । अत्क॑म् ।
न । पुरः॑ । ज॒रि॒मा । वि । द॒र्द॒रिति॑दर्दः ॥ १३ ॥

हेइन्द्र त्वं पिप्रुं पिप्रुनामानमसुरं शूशुवांसं प्रवृद्धं मृगयं मृगयमानमसुरंचहतवानसि किंच सत्वं वैदथिनाय विदथिनःपुत्रायऋजिश्वने ऋजिश्वनाम्नेराज्ञेरन्धीः वशमनयः पंचाशत् पंचाशत्संख्याकानि सहस्रा सहस्राणि कृष्णा कृष्णवर्णानि रक्षांसिनिवपः न्यवपः अवधीः तथा स त्वं जरिमा जराअत्कंन वयोविशेषंरूपमिव पुरःशंबरनगराणि विदर्दः विदारितवानसि ॥ १३ ॥

अथचतुर्दशी—

सूरंउपाकेतन्वं१दधानोवियत्तेचेत्यमृतस्यवर्पः ।
मृगोनहस्तीतविषीमुषाणःसिंहोनभीमआयुधानिबिभ्रत् ॥ १४॥

सूरः । उपाके । तन्वम् । दधानः । वि । यत् । ते । चेति ।
अमृतस्य । वर्पः । मृगः । न । हस्ती । तविषीम् । उषाणः ।
सिंहः । न । भीमः । आयुधानि । बिभ्रत् ॥ १४ ॥

हेइन्द्र सूरः प्रेरकस्यसूर्यस्यउपाकेसमीपे तन्वंत्वदीयंशरीरं यद्यदादधानोधारकोभवः तदा अमृतस्यमरणरहितस्य ते त्वदीयं वर्पोरूपंविचेति व्यचेति हेइन्द्र ज्ञातृभिः विशेषेणाज्ञायत सूर्यस्यसमीपेसर्वाणिरूपाणिमलिनीभवंति नतथेन्द्रस्यरूपं किंतु सूर्यस्यसमीपेइन्द्रस्य रूपंविशेषेणभासमानंबभूवेत्यर्थः अपिच हेइन्द्र हस्तीमृगोन गजविशेषोमृगइव तविषींपरेषां बलंउषाणः दहन् आयुधानिवज्रादीनिशस्त्राणिबिभ्रत् बिभ्राणस्त्वंसिंहोन सिंहइवभीमोभयंकरोभूः ॥ १४ ॥

अथपञ्चदशी—

इन्द्रंकामावसूयन्तोअग्मन्त्स्वर्मीह्ळेनसवनेचकानाः ।
श्रवस्यवःशशमानासउक्थैरोकोनरण्वासुदृशीवपुष्टिः ॥१५॥१९॥

इन्द्रम् । कामाः । वसुऽयन्तः । अग्मन् । स्वःऽमीह्ळे । न । सवने ।
चकानाः । श्रवस्यवः । शशमानासः । उक्थैः । ओकः ।
न । रण्वा । सुदृशीऽइव । पुष्टिः ॥ १५ ॥ १९ ॥

कामाः राक्षसादिभयनिवारणार्थं इन्द्रंकामयमानाः वसूयन्तः पश्वादिधनमिच्छन्तः स्तोतारइन्द्रंपरमैश्वर्ययुक्तं अग्मन् अगमन्गच्छन्ति वर्तमानार्थेछान्दसोलुङ् कीदृशाःस्तोतारः स्वर्मीह्लेन युद्धेइव सवनेयज्ञेचकानाः याचमानाःश्रवस्यवोन्नकामाः उक्थैःस्तोत्रैःशशमानासः शंसमानाः स्तुवन्तः तदासोयमिन्द्रः ओकोन स्तोतॄणामावासइवभवति रण्वा रमणीयासुदृशी वपुष्टिःशोभनदर्शनालक्ष्मीरिवभवति ॥ १५ ॥

॥ इतितृतीयस्यपंचमेएकोनविंशोवर्गः ॥ १९ ॥

अथषोडशी–

तमि॑द्व॒इन्द्रं॑सु॒हवं॑हुवेम॒यस्ताच॒कार॒नर्या॑पु॒रूणि॑ ।
योमाव॑तेजरि॒त्रेगध्यं॑चिन्म॒क्षूवाजं॒भर॑तिस्पा॒र्हरा॑धाः ॥ १६ ॥

तम् । इत् । व॒ः । इन्द्र॑म् । सु॒ऽहव॑म् । हु॒वे॒म॒ । यः । ता ।
च॒कार॑ । नर्या॑ । पु॒रूणि॑ । यः । माऽव॑ते । ज॒रि॒त्रे । गध्य॑म् ।
चि॒त् । म॒क्षु । वाज॑म् । भर॑ति । स्पा॒र्हऽरा॑धाः ॥ १६ ॥

यइन्द्रः नर्यानर्याणि मनुष्यहितानिपुरूणिबहूनि ता तानि प्रसिद्धानिकर्माणिचकार अकरोत् किञ्च स्पार्हराधाः स्पृहणीयधनोयइन्द्रः मावते मत्सदृशायजरित्रेस्तोत्रेगध्यंचित् ग्राह्यंसंयोजनीयमपि वाजमन्नंमक्षुशीघ्रंभरति आहरति वयंस्तोतारः हेयजमानाः वोयुष्मभ्यं तमित्तमेवेन्द्रं सुहवं शोभनमाह्वानंयथाभवतितथाहुवेम आह्वयामः ॥ १६ ॥

अथसप्तदशी–

ति॒ग्मायद॒न्तर॒शनि॒ःपता॑ति॒कस्मि॑ञ्चिच्छूरमु॒हु॒केजना॑नाम् ।
घो॒रायद॑र्य॒समृ॑ति॒र्भवा॒त्यध॑स्मानस्त॒न्वो॑बोधिगो॒पाः ॥ १७ ॥

ति॒ग्मा । यत् । अ॒न्तः । अ॒शनि॑ः । पता॑ति । कस्मि॑न् । चि॒त् ।
शू॒र॒ । मु॒हु॒के । जना॑नाम् । घो॒रा । यत् । अ॒र्य॒ । सम्ऽऋ॑तिः ।
भवा॑ति । अध॑ । स्म॒ । न॒ः । त॒न्व॑ः । बो॒धि॒ । गो॒पाः ॥ १७ ॥

हेशूर विक्रान्तेन्द्र यद्यदा कस्मिंश्चित्सर्वस्मिन्नपि जनानां मनुष्याणां मुहुके मोहके युद्धे अन्तः अस्माकंमध्ये तिग्मा तीक्ष्णा अशनिः पताति पतेत् हेअर्य स्वामिन्निन्द्र यद्यदा

स्माकंशत्रुभिःसहघोराभीमरूपा समृतिर्युद्धंभवाति भवेत् अध तदानींनोस्मदीयस्यतन्वःशरीरस्यगोपाःरक्षकःबोधिस्म अबोधि शत्रुभ्यःसकाशादस्मान्रक्षकत्वेनबुद्धवानसिखलु ॥ १७ ॥

अथाष्टादशी—

भुवोवितावामदेवस्यधीनांभुवःसखावृकोवाजसातौ ।
त्वामनुप्रमतिमाजगन्मोरुशंसोजरित्रेविश्वधस्याः ॥ १८ ॥

भुवः । अविता । वामऽदेवस्य । धीनाम् । भुवः । सखा ।
अवृकः । वाजऽसातौ । त्वाम् । अनु । प्रऽमतिम् । आ । जगन्म ।
उरुऽशंसः । जरित्रे । विश्वध । स्याः ॥ १८ ॥

हेइन्द्र त्वंवामदेवस्यवामदेवाख्यस्यमंत्रद्रष्टुः ममसंबन्धिनीनांधीनांकर्मणामवितारक्षिता भुवः भव अवृकोहिंसारहितस्त्वं वाजसातौ युद्धेसखाममसुहृद्भुवःभव हेइन्द्र वयं प्रमतिंप्रकृष्टज्ञानंत्वामनुलक्षीकृत्य आजगन्म आगच्छाम सत्वंविश्वध सर्वदाजरित्रेस्तोत्रे उरुशंसः महताशंसनेनयुक्तःस्याः भवेः ॥ १८ ॥

अथैकोनविंशी—

एभिर्नृभिरिन्द्रत्वायुभिष्ट्वामघवद्भिर्मघवन्विश्वआजौ ।
द्यावोनद्युम्नैरभिसन्तोअर्यःक्षपोमदेमशरदश्चपूर्वीः ॥ १९ ॥

एभिः । नृऽभिः । इन्द्र । त्वायुऽभिः । त्वा । मघवत्ऽभिः ।
मघऽवन् । विश्वे । आजौ । द्यावः । न । द्युम्नैः । अभि । सन्तः ।
अर्यः । क्षपः । मदेम । शरदः । च । पूर्वीः ॥ १९ ॥

हेमघवन्धनवन्निन्द्र विश्वे विश्वस्मिन्नाजौसंग्रामे त्वायुभिः शत्रुजयार्थंत्वां कामयमानैर्मघवद्भिस्त्वदर्थंदीयमानहविर्लक्षणैर्धनैरुपेतैरेभिः प्रत्यक्षेणोपलभ्यमानैः नृभिः पुत्रपौत्राद्यैःपरिजनैःसहितावयंयजमानाः द्युम्नैर्धनैः द्यावोन द्योतमानाःप्रकाशमानाधनिनोयथा तथा अर्यः अरीन् शत्रून्अभिसन्तोभिभवन्तः क्षपः सर्वारात्रीः पूर्वीर्बह्वीः शरदश्च संवत्सरांश्च मदेम स्तवाम यजमानाःसर्वेषुकालेषुस्तोत्रैरिन्द्रंहर्षयन्तीत्यर्थः ॥ १९ ॥

अथविंशी—

ए॒वेदिन्द्रा॑यवृष॒भाय॒वृष्णे॒ब्रह्मा॑कर्म॒भृग॑वो॒नरथ॑म् ।
नूचि॒द्यथा॑नःस॒ख्यावि॒योष॒दस॑न्नउ॒ग्रो॑वि॒तात॑नू॒पाः ॥ २० ॥

ए॒व । इत् । इन्द्रा॑य । वृ॒ष॒भाय॑ । वृष्णे॑ । ब्रह्म॑ । अ॒क॒र्म॒ । भृग॑वः ।
न । रथ॑म् । नु । चि॒त् । यथा॑ । न॒ः । स॒ख्या । वि॒ऽयोष॑त् ।
अस॑त् । न॒ः । उ॒ग्रः । अ॒वि॒ता । त॒नू॒ऽपाः ॥ २० ॥

यथाइन्द्रः नोस्मदीयानिसख्यासख्यानिकर्माणिनूचित् वियोषत् नपृथक्कुर्यात् उग्रःतेजस्वी तनूपाः शरीराणांपालकइन्द्रः यथा नोस्मानवितारक्षितासत्स्यात् तथा वयंयजमानाएवेत् एवमेवोक्तप्रकारेण इन्द्रायवृषभाय कामानांवर्षित्रेवृष्णेनित्यतरुणायब्रह्मस्तोत्रमकर्म अकुर्म तत्रदृष्टान्तः—भृगवोदीप्ताः तक्षाणः रथंन रथमिव तद्वत् यजमानेभ्योयथाइन्द्रोभीप्सितफलप्रदोभवतितथेन्द्रंयजमानाःस्तुवन्तीत्यर्थः ॥ २० ॥

अथैकविंशी—

नूष्टु॒तइ॑न्द्र॒नूगृ॑णा॒नइषँ॑जरि॒त्रेन॒द्यो॒३॒॑नपी॑पेः ।
अका॑रितेहरिवो॒ब्रह्म॒नव्यँ॑धि॒यास्या॑मर॒थ्यः॑सदा॒साः ॥ २१ ॥२०॥

नु । स्तु॒तः । इ॒न्द्र॒ । नु । गृ॒णा॒नः । इष॑म् । ज॒रि॒त्रे । न॒द्यः॑ ।
न । पी॒पे॒रिति॑पीपेः । अका॑रि । ते॒ । ह॒रि॒ऽवः॒ । ब्रह्म॑ । नव्य॑म् ।
धि॒या । स्या॒म॒ । र॒थ्यः॑ । स॒दा॒ऽसाः ॥ २१ ॥ २० ॥

हेइन्द्र नुक्षिप्रं स्तुतः पूर्वैर्ऋषिभिःसंस्तुतः नु क्षिप्रं गृणानः अस्माभिःस्तूयमानश्च त्वंइषमन्नंजरित्रेस्तोत्रेमह्यंनद्योन अद्भिर्नदीरिव पीपेः प्यायय प्रवृद्धंकुरु हेइन्द्र हरिवः हरिवन् हरिसंज्ञकाश्वोपेतेन्द्र तेतुभ्यं नव्यंनवतरंब्रह्मस्तोत्रमकारि अस्माभिःक्रियते रथ्यः रथवन्तोवयंधियाप्रज्ञारूपयास्तुत्या सदासाः त्वांसर्वदाभजमानाः त्वदर्थंहवीरूपस्यान्नस्यदातारोवास्याम्भूयास्म ॥ २१ ॥

॥ इतितृतीयस्यपंचमेविंशोवर्गः ॥ २० ॥

त्वंमहाँइन्द्रतुभ्यमित्येकविंशत्यृचंसप्तमंसूक्तं अत्रेयमनुक्रमणिका—त्वंमहाँअसिक्न्यामेकपदेति । असिक्न्यांयजमानोनहोतेत्येकपदाविराट् शिष्टाविंशतिस्त्रिष्टुभः इन्द्रोदेवता समूह्ळे दशरात्रेष्टमेहनिनिष्केवल्येइदंसूक्तंविनियुक्तं तथासूत्रितं—त्वंमहाँइन्द्रतुभ्यमितिनिष्केवल्यमिति । इन्द्रस्यवृत्रघ्नःत्वंमहानितिपशुपुरोडाशस्यानुवाक्या सूत्रितंच—त्वंमहाँइन्द्रतुभ्यंहक्षाःसत्राहणमिति ।

तत्रप्रथमा—

त्वंमहाँइन्द्रतुभ्यंहक्षाअनुक्षत्रंमंहनामन्यतद्यौः ।
त्वंवृत्रंशवसाजघन्वान्त्सृजःसिन्धूँरहिनाजग्रसानान् ॥ १ ॥

त्वम् । महान् । इन्द्र । तुभ्यम् । ह । क्षाः । अनु । क्षत्रम् ।
मंहना । मन्यत । द्यौः । त्वम् । वृत्रम् । शवसा । जघन्वान् ।
सृजः । सिन्धून् । अहिना । जग्रसानान् ॥ १ ॥

हेइन्द्र त्वं महान्प्रभूतोभवसि क्षाः पृथिवी क्षाइतिपृथवीनामैतत् मंहनामहत्त्वेनयुक्तासती तुभ्यंह त्वदर्थमेव क्षत्रंत्वदीयंबलं अनुमन्यत अन्वमन्यत अनुमतीचकार द्यौश्चत्वदर्थंबलमन्वमन्यत हेइन्द्र त्वंशवसात्वदीयेनबलेन वृत्रंलोकानामावरकंवृत्रनामकमसुरंजघन्वान् हतवान् किंच अहिनावृत्रेणजग्रसानान् जग्रहाणान्ग्रस्तान् ग्रसतेर्लिटःकानजादेशः सिन्धून्सृजः असृजः सृष्टवानसि ॥ १ ॥

अथद्वितीया—

तवत्विषोजनिमन्रेजतद्यौरेजद्भूमिर्भियसास्वस्यमन्योः ।
ऋघायन्तसुभ्वः१पर्वतासआर्दन्धन्वानिसरयन्तआपः ॥ २ ॥

तव । त्विषः । जनिमन् । रेजत । द्यौः । रेजत् । भूमिः ।
भियसा । स्वस्य । मन्योः । ऋघायन्त । सुऽभ्वः । पर्वतासः ।
आर्दन् । धन्वानि । सरयन्तः । आपः ॥ २ ॥

हेइन्द्र त्विषोदीप्यमानस्यतव त्वदीयेजनिमन् जन्मनिसति द्यौरन्तरिक्षं स्वस्यत्वदीयात्मन्योःकोपात् पंचम्यर्थेषष्ठी भियसा जातभयेनरेजत् अरेजत् अकंपत भूमिश्चरेजत् कंपमानाबभूव सुभ्वोमहान्तःपर्वतासः मेघाः ऋघायन्त सस्यादीनांवृष्टिप्रदानार्थंनियामकेनत्वया

Funding by IKS-MoE

बध्यन्त तथा मेघाआर्दन् प्राणिनांपिपासारूपांपीडामहिंसन् तथा मेघाः धन्वान्युदकरहितान्देशान् आपःअपः सरयन्तेगमयन्ति ॥ २ ॥

अथतृतीया–

भि॒नद्गि॒रिंशव॑सा॒वज्र॑मि॒ष्णन्ना॑विष्कृण्वा॒नःस॑हसा॒नओज॑ः ।
वधी॑द्वृ॒त्रंवज्रे॑णमन्दसा॒नःसर॒न्नापो॒जव॑साह॒तवृ॑ष्णीः ॥ ३ ॥

भि॒नत् । गि॒रिम् । शव॑सा । वज्र॑म् । इ॒ष्णन् । आ॒वि॒ःऽकृ॒ण्वा॒नः ।
स॒ह॒सा॒नः । ओज॑ः । वधी॑त् । वृ॒त्रम् । वज्रे॑ण । मं॒द॒सा॒नः ।
सर॑न् । आप॑ः । जव॑सा । ह॒तऽवृ॑ष्णीः ॥ ३ ॥

सहसानः शत्रूणामभिभवन् ओजस्तेजः आविष्कृण्वानः आविष्कुर्वन्निन्द्रः वज्रमिष्णन्वज्रंप्रेरयन् शवसाबलेन गिरिंपर्वतजातंभिनत् अभिनत् बिभेद किंच मन्दसानः सोमेनमोदमानइन्द्रः वज्रेण वृत्रं वृत्रनामानमसुरंवधीदवधीत् जघान ततःआपः वृत्रेणावृतान्युदकानिहतवृष्णीः हतोवृषावृत्रोयासांताःहतवृष्ण्यःताः वृत्रवधानन्तरंनिवारणरहिताःसत्यः जवसावेगेनसरन् असरन्नगच्छन् ॥ ३ ॥

अथचतुर्थी–

सु॒वीर॑स्तेजनि॒ताम॑न्यत॒द्यौरिन्द्र॑स्यक॒र्ता॑स्वप॑स्तमोभूत् ।
यईं॑ज॒जान॑स्व॒र्यं॑सु॒वज्र॒मन॑पच्यु॒तंसद॑सो॒नभूम॑ ॥ ४ ॥

सु॒ऽवीर॑ः । ते॒ । ज॒नि॒ता । म॒न्य॒त॒ । द्यौः । इन्द्र॑स्य । क॒र्ता॑ ।
स्वप॑ःऽतमः । भू॒त् । यः । ई॒म् । ज॒जान॑ । स्व॒र्य॑म् । सु॒ऽवज्र॑म् ।
अन॑पऽच्युतम् । सद॑सः । न । भूम॑ ॥ ४ ॥

हेइन्द्र यःप्रजापतिः स्वर्यंस्तुत्विगादिभिःस्तुत्यं सुवज्रं शोभनवज्रोपेतं सदसःस्वकीयास्स्वर्गाख्यादस्थानादनपच्युतं विनाशरहितंच नेतिसमुच्चयार्थे भूम भूम्ना महत्त्वेनयुक्तंईमेनंत्वांजजान अजीजनत् जनजननेइतिधातुः द्यौःद्योतमानःतेतवजनिता जनयिता सप्रजापतिः सुवीरःशोभनपुत्रवान्अहमस्मीतिमन्यतअमन्यत किंचइंद्रस्यकर्ताइंद्रस्यजनयिताप्रजापतिः स्वपस्तमः अत्यन्तंशोभनकर्माभूत् ॥ ४ ॥

Funding by IKS-MoE

अथपंचमी–

य॒एक॒इच्च्या॒वय॑ति॒प्रभूमा॒राजा॑कृष्टी॒नांपु॑रुहू॒तइन्द्रः॑ ।
स॒त्यमे॑न॒मनु॒विश्वे॑मदन्तिरा॒तिं॑दे॒वस्य॑गृण॒तो॑म॒घोनः॑ ॥ ५ ॥ २१ ॥

यः । एकः॑ । इत् । च्य॒वय॑ति । प्र । भूम॑ । राजा॑ । कृ॒ष्टी॒नाम् ।
पु॒रु॒ऽहू॒तः । इन्द्रः॑ । स॒त्यम् । ए॒न॒म् । अनु॑ । विश्वे॑ । म॒द॒न्ति॒ ।
रा॒तिम् । दे॒वस्य॑ । गृ॒ण॒तः । म॒घोनः॑ ॥ ५ ॥ २१ ॥

कृष्टीनांसर्वासांप्रजानांराजाप्रभुः पुरुहूतः बहुभिराहूतः एकइत् देवानांमध्येमुख्यएव यइन्द्रः भूम भूतंनिष्पन्नंशत्रुभ्योभयं प्रच्यावयति प्रकर्षेणनाशयति विश्वेसर्वेयजमानाःमघोनः मघवतः हविर्लक्षणधनवतइत्यर्थः देवस्येन्द्रसमाश्रयात् द्योतमानस्यगृणतः स्तुवतः रातिं बंधुमेनमिन्द्रमनुलक्ष्य सत्यमेवमदन्ति स्तुवन्ति ॥ ५ ॥

॥ इतितृतीयस्यपंचमेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी–

स॒त्रासोमा॑अभवन्नस्य॒विश्वे॑स॒त्रामदा॑सोबृह॒तोमदि॑ष्ठाः ।
स॒त्राभ॑वो॒वसु॑पति॒र्वसू॑नां॒दत्रे॒विश्वा॑आधिथाइन्द्रकृ॒ष्टीः ॥ ६ ॥

स॒त्रा । सोमाः॑ । अ॒भ॒व॒न् । अ॒स्य॒ । विश्वे॑ । स॒त्रा । मदा॑सः ।
बृ॒ह॒तः । मदि॑ष्ठाः । स॒त्रा । अ॒भ॒वः॒ । वसु॑ऽपतिः । वसू॑नाम् ।
दत्रे॑ । विश्वाः॑ । अ॒धि॒थाः॒ । इ॒न्द्र॒ । कृ॒ष्टीः ॥ ६ ॥

विश्वे सर्वे सोमाः अस्येन्द्रस्यसत्रा सत्रेतिसत्यनामैतत् सत्यमेवप्रभूताअभवन् किंच मदासोमदाः मदकराः सोमाः बृहतोमहतोस्येन्द्रस्य मदिष्ठाः मादयितृतमाः सत्रासत्यमेवाभवन् हेइन्द्र त्वंवसुपतिर्धनपतिः नकेवलंधनपतिः किंतुवसूनांसर्वेषांपश्वादीनांधनानांपतिः सत्रासत्यमेवाभवः भवसि हेइन्द्र त्वंदत्रेधनेनिमित्तभूतेसति विश्वाःसर्वाःकृष्टीःस्तोत्रीःप्रजाः अधिथाः धारयसि ॥ ६ ॥

अथसप्तमी–

त्वमध॑प्रथ॒मंजाय॑मा॒नोमे॒विश्वा॑आधिथाइन्द्रकृ॒ष्टीः ।
त्वंप्रति॑प्र॒वत॑आ॒शया॑नमाहिं॑वज्रे॑णमघवा॒न्विवृ॑श्चः ॥ ७ ॥

त्वम् । अध॑ । प्र॒थ॒मम् । जाय॑मानः । अमे॑ । विश्वा॑ः ।
अ॒धि॒था॒ः । इ॒न्द्र॒ । कृ॒ष्टीः । त्वम् । प्रति॑ । प्र॒ऽवत॑ः ।
आ॒ऽशया॑नम् । अहि॑म् । वज्रे॑ण । म॒घ॒ऽव॒न् । वि । वृ॒श्च॒ः ॥ ७ ॥

अध अपिच प्रथममेवजायमानस्त्वं अमे वृत्रनिमित्तेभयेसति विश्वाःसर्वाःकृष्टीः प्रजाः अधिथाः रक्षकत्वेनधारयसि हेमघवन्धनवन्निन्द्र त्वं प्रतिप्रवतः प्रतिप्रवणान् उदकवतोदेशान्लक्षीकृत्य आशयानं अपांनिरोधकमहिंवृत्रनामानमसुरंवज्रेण विवृश्चः छिन्नवानसि ॥७॥

इन्द्रस्यवृत्रघ्नःप्रशौसत्राहणमितिहविषोनुवाक्या सूत्रितंच—सत्राहणंदाधृषिंतुम्रमिन्द्रंसहदानुंपुरुहूतक्षियन्तमिति ।

सैषाष्टमी—

स॒त्रा॒ह॒णं॑दाधृ॑षिं॒तुम्र॒मिन्द्रं॑म॒हाम॑पा॒रं॑वृ॑ष॒भंसु॒वज्र॑म् ।
ह॒न्ता॒यो॒वृ॒त्रंसनि॑तो॒तवाजं॒दाता॑म॒घानि॑म॒घवा॑सु॒राधा॑ः ॥ ८ ॥

स॒त्रा॒ऽहन॑म् । दधृ॑षिम् । तुम्र॑म् । इन्द्र॑म् । म॒हाम् । अ॒पा॒रम् ।
वृ॒ष॒भम् । सु॒ऽवज्र॑म् । ह॒न्ता । यः । वृ॒त्रम् । सनि॑ता । उ॒त ।
वाज॑म् । दाता॑ । म॒घानि॑ । म॒घऽवा॑ । सु॒ऽराधा॑ः ॥ ८ ॥

सत्राहणं बहूनांशत्रूणांहन्तारं दाधृषिमत्यन्तंधर्षकं तुम्रं तुमिःप्रेरणकर्मा शत्रूणांप्रेरकं महां महान्तं अपारमपरिमाणंविनाशरहितमित्यर्थः वृषभं कामानांवर्षितारं सुवज्रं शोभनेन वज्रेणोपेतं इन्द्रं वयं स्तोतारःस्तुमेतिशेषः यइन्द्रः वृत्रं वृत्रनामकमसुरं हन्ता हिंसिताभवति उतापिच यइन्द्रः वाजमन्नंसनिता दाताभवति सुराधाः शोभनधनयुक्तः योमघवेन्द्रः मघानि धनानिदाताभवति तमिन्द्रंस्तुमेतिपूर्वेणान्वयः अत्रसर्वत्रतृन्नंतत्वान्नलोकाव्ययेतिषष्ठीप्रतिषेधे सतिद्वितीयैवभवति ॥ ८ ॥

अथनवमी—

अ॒यं॑वृत॑श्चातयतेस॒मीची॒र्यआ॒जिषु॑म॒घवा॑शृ॒ण्वए॑कः ।
अ॒यंवाजं॑भरति॒यंस॒नोत्य॒स्यप्रि॒यास॑ःस॒ख्येस्या॑म ॥ ९ ॥

Funding by IKS-MoE

अयम् । वृतः । चातयते । सम्ऽईचीः । यः । आजिषु ।
मघऽवा । शृण्वे । एकः । अयम् । वाजम् । भरति । यम् ।
सनोति । अस्य । प्रियासः । सख्ये । स्याम ॥ ९ ॥

मघवाधनवान्यइन्द्रः आजिषु संग्रामेषु एकोमुख्यएवशृण्वे श्रूयते अयमिन्द्रः समीचीः संगताः वृतः वृण्वन्तिआच्छादयन्तिलोकानितिवृतःशत्रुसेनाः ताश्चातयते नाशयति अयमिन्द्रः यंवाजंयदन्नंसनोतियजमानायददाति तंवाजंभरति यजमानस्यतदन्नंदातुंबिभर्ति स्तोतारोवयं अस्य एवंभूतस्येंद्रस्य सख्ये सखित्वे प्रियासः प्रियाःस्याम भवेम ॥ ९ ॥

अथदशमी—

अयंशृण्वेअधजयन्नुतघ्नन्नयमुतप्रकृणुतेयुधागाः ।
यदासत्यंकृणुतेमन्युमिन्द्रोविश्वंदृळ्हंभयतएजदस्मात् ॥ १० ॥ २२ ॥

अयम् । शृण्वे । अध । जयन् । उत । घ्नन् । अयम् । उत ।
प्र । कृणुते । युधा । गाः । यदा । सत्यम् । कृणुते । मन्युम् ।
इन्द्रः । विश्वम् । दृळ्हम् । भयते । एजत् । अस्मात् ॥ १० ॥ २२ ॥

अधापिच अयमिन्द्रोजयन्शत्रून्विजयन्शृण्वेश्रूयते सर्वत्रप्रख्यातोभवति उतापिच घ्नन्शत्रून्हिंसन्सर्वत्रश्रूयते उतापिच अयमिन्द्रः युधायुद्धेनगाःपशून्प्रकृणुते शत्रुसकाशादाहरति किंच इन्द्रोयदामन्युंकोपंसत्यमेवकृणुते द्विषदर्थंकरोति तदानींदृढंस्थिरं स्थावररूपं एजत्कंपमानंजंगमरूपंच विश्वंसमस्तंजगदस्मादिन्द्राद्भयतेबिभेति ॥ १० ॥

॥ इतितृतीयस्यपंचमेद्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी—

समिन्द्रोगाअजयत्संहिरण्यासमश्वियामघवायोहपूर्वीः ।
एभिर्नृभिर्नृतमोअस्यशाकैरायोविभक्तासंभरश्चवस्वः ॥ ११ ॥

सम् । इन्द्रः । गाः । अजयत् । सम् । हिरण्या । सम् । अश्विया ।
मघऽवा । यः । ह । पूर्वीः । एभिः । नृऽभिः । नृऽतमः । अस्य ।
शाकैः । रायः । विऽभक्ता । सम्ऽभरः । च । वस्वः ॥ ११ ॥ ॥

Funding by IKS-MoE

योह यःखलु मघवाधनवानिन्द्रः गाअसुराणांसमजयत् सम्यग्जितवान्भवति किंच हिरण्या हिरण्यानिहितरमणीयानिशत्रुसंबन्धीनिधनानिसमजयत् तथा अश्विया अश्वियानि शत्रुसंबन्धिनोश्वसमूहान्सम्यग्जयतिस्म तथा पूर्वीर्बह्वीःशत्रुसेनाःसमजयत् इन्द्रःसर्वान् शत्रून्जित्वासकलमपिपश्वादिधनमपहृतवानित्यर्थः शाकैःसामर्थ्यैः नृतमोनेतृतमः पश्वादीनामतिशयेननिर्वाहकःसइन्द्रः एभिर्नृभिर्नेतृभिःस्तोतृभिःस्तुतःसन् अस्यरायः पश्वादिधनरूपस्यविभक्ता स्तोतृभ्योविभागस्यकर्ता दाताभवतीत्यर्थः किंचवस्वोवसुनोधनस्यसंभरश्चसंभर्ता धारकश्चभवति ॥ ११ ॥

अथद्वादशी—

किय॑त्स्वि॒दिन्द्रो॒अध्ये॑तिमा॒तुःकिय॑त्पि॒तुर्ज॑नि॒तुर्यो॑ज॒जान॑ ।
योअ॑स्य॒शुष्मं॑मु॒हु॒कैरिय॑र्ति॒वातो॒नजू॒तःस्त॒नय॑द्भिर॒भ्रैः ॥ १२ ॥

किय॑त् । स्वि॒त् । इन्द्र॑ः । अधि॑ । ए॒ति॒ । मा॒तुः । किय॑त् ।
पि॒तुः । ज॒नि॒तुः । यः । ज॒जान॑ । यः । अ॒स्य॒ । शुष्म॑म् । मु॒हु॒कैः ।
इय॑र्ति । वात॑ः । न । जू॒तः । स्त॒नय॑त्ऽभिः । अ॒भ्रैः ॥ १२ ॥

यइन्द्रः मातुर्जनन्याःसकाशात्कियत्स्वित् यावद्बलमध्येति अधिगच्छति पितुःसकाशात्कियद्यावद्बलमधिगच्छति यइन्द्रः जनितुर्जनयितुर्यस्मात्प्रजापतेःसकाशात् इदंदृश्यमानं जगज्जजान अजनयत् यइन्द्रस्तस्मात्प्रजापतेःसकाशादस्यजगतःशुष्मंयावद्बलंमुहुकैःमुहुर्मुहुरियर्तिप्रेरयति स्तनयद्भिर्गर्जद्भिरभ्रैर्मेघैर्जूतःप्रेरितः वातोन वायुरिव तथासइन्द्रःस्तोतृभिर्जूतः प्रेरितःहविःप्रदानार्थमाहूतोभवति ॥ १२ ॥

अथत्रयोदशी—

क्षि॒यन्तं॑त्व॒माक्षि॑यन्तंकृणो॒तीय॑र्ति॒रे॒णुंम॒घवा॑स॒मोहं॑म् ।
वि॒भ॒ञ्ज॒नु॒रशनि॑माँइव॒द्यौरु॒तस्तो॒तारं॑म॒घवा॒वसौ॑धात् ॥ १३ ॥

क्षि॒यन्त॑म् । त्व॒म् । अक्षि॑यन्तम् । कृ॒णो॒ति॒ । इय॑र्ति । रे॒णुम् ।
म॒घऽवा॑ । स॒म्ऽओह॑म् । वि॒ऽभ॒ञ्ज॒नुः । अ॒शनि॑मान्ऽइव ।
द्यौः । उ॒त । स्तो॒तार॑म् । म॒घऽवा॑ । वसौ॑ । धा॒त् ॥ १३ ॥

मघवाधनवानिन्द्रः क्षियन्तंधनराहित्येनक्षीयमाणंत्वमेकंजनं अक्षियन्तं धनेनाक्षीयमाणंकृणोति करोति अकिंचनः कश्चित्पुरुषः इन्द्रंस्तुत्वाधनसमृद्धोभवदित्यर्थः अशनिमानशनिनायुक्तःद्यौरिवान्तरिक्षमिव विभंजनुः शत्रूणांविशेषेणभंजकोमघवेन्द्रः समोहंसमूढंरेणुंपापं इयर्ति स्तोतुःसकाशात्प्रेरयति उतापिच मघवाधनवानिन्द्रःस्तोतारंवसौधनेधात् अधान्निदधाति ॥ १३ ॥

अथचतुर्दशी—

अयंचक्रमिषणत्सूर्यस्यन्येतशंरीरमत्ससृमाणम् ।
आकृष्णईंजुहुराणोजिघर्तित्वचोबुध्नेरजंसोअस्ययोनौ ॥ १४ ॥

अयम् । चक्रम् । इषणत् । सूर्यस्य । नि । एतशम् । रीरमत् ।
ससृमाणम् । आ । कृष्णः । ईम् । जुहुराणः । जिघर्ति ।
त्वचः । बुध्ने । रजंसः । अस्य । योनौ ॥ १४ ॥

प्रैतशंसूर्येपस्पृधानमित्यर्धर्चेपूर्वंकाचिदाख्यायिकासूचिता अत्राप्ययंचक्रमितिपूर्वार्धेसासूच्यते स्वश्वनामाकश्चिद्राजा सच पुत्रार्थंसूर्यमुपास्ते सचसूर्यःपुत्ररूपेणस्वयमेवतत्रोत्पन्नःसन् एतशाख्येनमहार्षिणासार्धंयुद्धंचकार तदानींसऋषिःयुद्धेजयार्थंइन्द्रंतुष्टाव सइन्द्रःतेनस्तूयमानःसन् स्वश्वपुत्रस्यसूर्यस्यसंबन्धिनःसंग्रामादेनमपालयदिति अयमिन्द्रःसूर्यस्यचक्रमायुधंइषणत् प्रैरयत् ससृमाणं युद्धार्थंसरंतंगच्छंतं एतशनामानमृषिंनिरीरमत् न्यरीरमत् निवारितवान् जुहुराणः कुटिलंयथाभवतितथासंचरन् कृष्णः कृष्णवर्णोमेघः त्वचस्तेजसोबुध्ने मूलभूतेरजसोस्योदकस्ययोनौस्थानेंतरिक्षेस्थितं ईमेनमिन्द्रं आजिघर्ति आसिंचति शत्रूणांप्रेरिताच्चक्रादेस्त्रस्तंररक्षेत्यर्थः ॥ १४ ॥

अथपञ्चदशी—

असिक्न्यांयजंमानोनहोता ॥ १५ ॥ २३ ॥

असिक्न्याम् । यजंमानः । न । होता ॥ १५ ॥ २३ ॥

एकपदेयमृक् पूर्वर्चासहदृष्टान्तत्वेनसंबध्यते असिक्न्यांरात्रौयजमानोन यजमानइव होतारमाह्वातारंअग्निं द्वितीयार्थेप्रथमा सोमेनासिंचति तद्वन्मेघइन्द्रमासिंचतीत्यर्थः ॥ १५ ॥

॥ इतितृतीयस्यपंचमेत्रयोविंशोवर्गः ॥ २३ ॥

अथषोडशी–

गव्यन्तइन्द्रंसख्यायविप्राअश्वायन्तोवृषणंवाजयन्तः ।
जनीयन्तोजनिदामक्षितोतिमाच्यावयामोवतेनकोशम् ॥ १६ ॥

गव्यन्तः । इन्द्रम् । सख्याय । विप्राः । अश्वऽयन्तः । वृषणम् ।
वाजयन्तः । जनिऽयन्तः । जनिऽदाम् । अक्षितऽऊतिम् ।
आ । च्यवयामः । अवते । न । कोशम् ॥ १६ ॥

गव्यन्तः गाइच्छन्तः अश्वायन्तः अश्वानिच्छन्तः वाजयन्तः वाजमन्नमिच्छन्तः जनीयन्तः जायाश्चेच्छन्तः विप्रामेधाविनःस्तोतारोवयंसख्यायेन्द्रसंबन्धिनेसखित्वाय वृषणं कामानां वर्षितारं जनिदां जायाप्रदं अक्षितोतिमक्षीणरक्षंसर्वदारक्षाकरमित्यर्थः एवंभूतमिन्द्रमाच्यावयामः आगमयामः तत्रदृष्टान्तः–अवतेकूपे अवतइतिकूपनाम अवतःअवटःक्रिविरितिकूपनामसुपाठात् कोशंन जलोद्धरणपात्रमिव पुरुषाः जलोद्धरणपात्रंजलेनपूरयितुं कूपेयथाआच्यावयंति तथा वयमाच्यावयामइत्यर्थः ॥ १६ ॥

अथसप्तदशी–

त्रातानोबोधिददृशानआपिरभिख्यातामर्डितासोम्यानाम् ।
सखापितापितृतमःपितॄणांकर्तेमुलोकमुशतेवयोधाः ॥ १७ ॥

त्राता । नः । बोधि । ददृशानः । आपिः । अभिऽख्याता ।
मर्डिता । सोम्यानाम् । सखा । पिता । पितृऽतमः । पितॄणाम् ।
कर्ता । ईम् । ऊँ इति । लोकम् । उशते । वयःऽधाः ॥ १७ ॥

हेइन्द्र आपिः आप्तः ददृशानः सर्वंपालकत्वेनपश्यंस्त्वं नोस्माकंत्रातारक्षकोबोधि भव किंच अभिख्याता अभिद्रष्टा मर्डिता सुखयिता सोम्यानांसोमार्हाणांयजमानादीनांसखा प्रजापतिनासमानख्यातिः पिता पालकः केवलं पालकोन किंतु पितॄणांपालकानांमध्येपितृतमः अतिशयेनपालकःकर्ता ईमु पितॄणांस्रष्टाचत्वं लोकंस्वर्गादिलोकं उशतेकामयमानायस्तोत्रे वयोधाः वयइत्यन्ननामैतत् अन्नप्रदोभव॥ १७ ॥

अथाष्टादशी–

स॒खी॒य॒ताम॑वि॒ताबो॑धि॒सखा॑गृणा॒नइ॑न्द्रस्तुव॒तेवयो॑धाः ।
व॒यंह्याते॑चकृ॒मास॒बाध॑आ॒भिःशमी॑भिर्म॒हय॑न्तइन्द्र ॥ १८ ॥

स॒खि॒ऽय॒ताम् । अ॒वि॒ता । बो॒धि॒ । सखा॑ । गृ॒णा॒नः । इ॒न्द्र॒ ।
स्तु॒व॒ते । वयः॑ । धाः॒ । व॒यम् । हि । आ । ते॒ । च॒कृ॒म ।
स॒ऽबाधः॑ । आ॒भिः । शमी॑भिः । म॒हय॑न्तः । इ॒न्द्र॒ ॥ १८ ॥

हेइन्द्र त्वं सखीयतां सखित्वमिच्छतामस्माकं अवितारक्षिताबोधि भव तथा गृणानः स्तूयमानस्त्वंसखाभव हेइन्द्र स्तुवतेस्तुतिंकुर्वतेमह्यंवयोन्नंधाः धेहि हेइन्द्र सबाधः बाधासहितावयंहि वयंखलु ते त्वामाचकृम आह्वयामः किंकुर्वन्तः आभिः प्रत्यक्षेणोपलभ्यमानैः शमीभिःस्तुतिरूपैःकर्मभिर्महयन्तः त्वांपूजयन्तः ॥ १८ ॥

इन्द्रस्यवृत्रघ्नःपुरोडाशस्यस्तुतइन्द्रइतियाज्या सूत्रितंच–स्तुतइन्द्रोमघवायद्धवृत्रैवावस्वइन्द्रःसत्यःसम्राळिति ।

सूक्तेएकोनविंशी–

स्तु॒तइन्द्रो॑म॒घवा॒यद्ध॑वृ॒त्राभूरी॒ण्येको॑अप्र॒तीनि॑हन्ति ।
अ॒स्यप्रि॒योज॑रि॒तायस्य॒शर्म॒न्नकि॑र्दे॒वावा॒रय॑न्ते॒नमर्ताः॑ ॥ १९ ॥

स्तु॒तः । इन्द्रः॑ । म॒घऽवा॑ । यत् । ह॒ । वृ॒त्रा । भूरी॑णि । एकः॑ ।
अ॒प्र॒तीनि॑ । ह॒न्ति॒ । अ॒स्य । प्रि॒यः । ज॒रि॒ता । यस्य॑ ।
शर्म॑न् । नकिः॑ । दे॒वाः । वा॒रय॑न्ते । न । मर्ताः॑ ॥ १९ ॥

यद्ध यदाखलु मघवाधनवानिन्द्रः स्तुतः अस्माभिःस्तुतोभवति तदा इन्द्रएकः असहायएव भूरीणिबहूनि अप्रतीन्यप्रतिगमनानि अभिगमनयुक्तानीत्यर्थः वृत्रा वृत्राणि शत्रून्हन्ति हिनस्ति यस्येन्द्रस्यशर्मन् शर्मण्याश्रयेवर्तमानंस्तोतारंदेवाःनकिर्वारयन्ते निवारणंनकुर्वन्ति मर्ताश्चननिवारयन्ते निवारणंनकुर्वन्ति अस्येन्द्रस्यजरितास्तोताप्रियोभवति ॥ १९ ॥

आग्निमारुतशस्त्रेएवानइन्द्रइतिपरिधानीया सूत्रितंच—एवानइन्द्रोमघवाविरप्शीतिपरिदध्यादिति ।

सूक्तेविंशी—

एवानइन्द्रोमघवाविरप्शीकरत्सत्याचर्षणीधृदनर्वा ।
त्वंराजाजनुषांधेह्यस्मेअधिश्रवोमाहिनंयज्जरित्रे ॥ २० ॥

एव । नः । इन्द्रः । मघऽवा । विऽरप्शी । करत् । सत्या ।
चर्षणिऽधृत् । अनर्वा । त्वम् । राजा । जनुषाम् । धेहि ।
अस्मे इति । अधि । श्रवः । माहिनम् । यत् । जरित्रे ॥ २० ॥

विरप्शी बहुविधशब्दवान् चर्षणीधृत् सर्वासांप्रजानांधारयिता अनर्वा अप्रत्यृतः केनापिप्रतिकूलेनाप्राप्तइत्यर्थः मघवाधनवानिन्द्रः एवैवमस्माभिःस्तुतःसन् नोस्माकंसत्या सत्यरूपाण्यभिमतानिफलानिकरत्करोतु हेइन्द्र जनुषांजन्मवतांसर्वेषांराजाप्रभुःत्वं माहिनंमहिम्नोपेतंयच्छ्रवःयद्यशोजरित्रेस्तोत्रेदेयं तद्यशःअस्मेस्मासु अध्यधिकत्वेनधेहि एवानइन्द्रोमघवाविरप्शीत्यादिब्राह्मणम्[1] ॥ २० ॥

अथैकाविंशी—

नूष्टुतइन्द्रनूगृणानइषंजरित्रेनद्यो३नपीपेः ।
अकारितेहरिवोब्रह्मनव्यंधियास्यामरथ्यःसदासाः ॥ २१ ॥२४॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः ।
न । पीपेरितिपीपेः । अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् ।
धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥ २४ ॥

व्याख्यातेयम् ॥ २१ ॥

॥ इतितृतीयस्यपंचमेचतुर्विंशोवर्गः ॥ २४ ॥

---

[1] ऐ० ब्रा० ३. ३८.

Funding by IKS-MoE

अयंपन्थाइतित्रयोदशर्चमष्टमंसूक्तंत्रैष्टुभं अत्रानुक्रमणिका—अयंपंथाःसप्तोनासंवाद-इन्द्रादितिवामदेवानामिति । यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतेतिपरिभाषितत्वादृषिदैवतेतत्रतत्रज्ञातव्ये अस्मिन्सूक्तेइन्द्रादितिवामदेवसंवादरूपिणीकाचिदाख्यायिकाश्लोकरूपेण सूच्यते—गर्भस्थोज्ञानसंपन्नोवामदेवोमहामुनिः ॥ मतिंचक्रेनजायेययोनिदेशात्तुमातृतः ॥ १ ॥ किंतुपार्श्वादितश्चेतिज्ञात्वातुजननोत्विदम् ॥ दध्यौशांत्यैशचीदेवीमदितिंत्विन्द्रमातरम् ॥ २ ॥ अदितिस्त्विन्द्रसहितागर्भिणीमभ्यगाद्वने ॥ अदितीन्द्रवामदेवाःसंवादमथचक्रिरे ॥३॥ संवाद-इतिसूत्रेणकथासैषाचसूच्यते ॥ नोक्तोवक्तृविशेषोत्रह्युपदेशेष्वनुक्तितः ॥ ४ ॥ अर्थतस्त्ववगन्तव्योवक्तृभेदइतिस्थितिः ॥ इन्द्रोदितिर्ऋषिश्चास्मिन्मिथःसूक्तेसमूचिरे ॥ ५ ॥ गर्भेशयानं सुचिरंमातुर्गर्भादनिर्गतम् ॥ वामदेवंप्रतिब्रूतआद्ययर्चाशतक्रतुः ॥ ६ ॥ द्वितीयादिभिरर्धर्चैर्ऋषिरत्राहपंचभिः ॥ नहीन्वस्येतिसप्तस्युरर्धर्चाअदितेर्वचः ॥ ७ ॥ ममच्चनत्वायुवतिरित्यृचः पंचवैमुनेः ॥ दौर्गत्यशान्तिमत्राहवामदेवस्तथान्त्यया ॥८॥ एवमर्थाद्वक्तृभेदइतिबह्वृचशासनम्॥ अर्थोविवेकस्पष्टत्वादुपदेशेषुनेरितः ॥ ९ ॥ ऋषिदैवतसिद्ध्यर्थंविवेकादर्थईरितः ॥

तत्रप्रथमा—

अ॒यंपन्था॒अनु॑वित्तःपु॒रा॒णोयतो॑दे॒वाउ॒दजा॑यन्त॒विश्वे॑ ।
अत॑श्चि॒दाज॑निषीष्ट॒प्रवृ॑द्धो॒मामा॒तर॑ममु॒याप॑त्त॒वेकः ॥ १ ॥

अ॒यम् । पन्था॑ः । अनु॑ऽवित्तः । पु॒रा॒णः । यत॑ः । दे॒वाः ।
उ॒त्ऽअजा॑यन्त । विश्वे॑ । अत॑ः । चि॒त् । आ । ज॒नि॒षी॒ष्ट ।
प्रऽवृ॑द्धः । मा । मा॒तर॑म् । अ॒मु॒या । पत्त॑वे । क॒रिति॑कः ॥ १ ॥

पुराणः अनादिः अयं प्रत्यक्षेणोपलभ्यमानः पन्थायोनिनिर्गमनरूपोमार्गः अनुआनुपूर्व्येण वित्तः सर्वैर्जायमानैर्लब्धः यतोयस्माद्योनिमार्गात् विश्वेसर्वेदेवाउदजायन्त उत्कर्षेणोत्पन्नाभवन्ति तस्माद्योनिमार्गान्मनुष्याउत्पन्नाभवन्तीतिकिमुवक्तव्यम् अतश्चिदस्माद्योनिमार्गादेवप्रवृद्धः गर्भेप्रकर्षेणवृद्धिंगतोवामदेवः आजनिषीष्ट आसमन्ताज्जायतां अमुयाअमुं मातरंपत्तवेपतनायमरणायेत्यर्थः माकः माकरोतु ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

ना॒हमतो॒निर॑यादु॒र्ग॑है॒तत्तिर॒श्चता॑पा॒र्श्वान्निर्ग॑माणि ।
ब॒हूनि॑मे॒अकृ॑ता॒कर्त्वा॑नि॒युध्यै॑त्वे॒न॒सं॑त्वे॑नपृच्छै ॥ २ ॥

न । अ॒हम् । अत॑ः । निः । अ॒य॒ । दुः॒ऽगहा॑ । ए॒तत् । ति॒र॒श्चता॑ ।
पा॒र्श्वात् । निः । ग॒मा॒नि॒ । ब॒हूनि॑ । मे॒ । अकृ॑ता । कर्त्वा॑नि ।
युध्यै॑ । त्वे॒न॒ । सम् । त्वे॒न॒ । पृ॒च्छै॒ ॥ २ ॥

वामदेवएवमुक्तवन्तमिन्द्रंप्रत्याह—अहमतोयोनिमार्गान्ननिरय ननिरयाणि ननिर्गच्छानि एतद्योनिनिर्गमनरूपंवर्त्मदुर्गहादुर्ग्रहंदुःखेनग्राह्यं नप्राप्यंभवतीत्यर्थः किंतु तिरश्चता तिरश्चीनात्पार्श्वान्निर्गमानिनिर्गच्छानि योनिदेशादनिर्गतोहंपार्श्वंभित्त्वानिर्गच्छानीत्यर्थः अन्यैरकृतमिदमेवनकेवलंमयाक्रियते किंतु अन्यैरकृता अकृतानिबहूनिकर्माणिमेकर्त्वानिकर्तव्यानिसन्ति त्वेन एकेनसपत्नेनविवदमानेनसहयुध्यै युद्धंकरवाणि त्वेनएकेनबुभुत्सुनासंपृच्छै सम्यक्पृच्छानि ॥ २ ॥

अथतृतीया—

प॒रा॒य॒तीं॑मा॒तर॒मन्व॑चष्ट॒ननानु॑गा॒न्यनु॒नूग॑मानि ।
त्वष्टु॑र्गृ॒हेअ॑पिब॒त्सोम॒मिन्द्रः॑शतध॒न्यं॑च॒म्वोः॑सु॒तस्य॑ ॥ ३ ॥

प॒रा॒ऽय॒तीम् । मा॒तर॑म् । अनु॑ । अ॒च॒ष्ट॒ । न । न । अनु॑ । गा॒नि॒ ।
अनु॑ । नु । ग॒मा॒नि॒ । त्वष्टु॑ः । गृ॒हे । अ॒पि॒ब॒त् ।
सोम॑म् । इन्द्र॑ः । श॒त॒ऽध॒न्य॑म् । च॒म्वोः॑ । सु॒तस्य॑ ॥ ३ ॥

मयिगर्भस्थेसति इन्द्रः मदीयांमातरंपरायतीं परेतांम्रियमाणामन्वचष्ट अन्वब्रवीत् एवमपीदानींगर्भस्थितोहं पुराणं पन्थानं ननानुगानि नानुगच्छानीतिन किंतु क्षिप्रमनुगमानि अनुगच्छान्येव वामदेवः स्वकीयमकृत्यकारित्वंपरिहृत्य इन्द्रस्याकृत्यकारित्वमुत्तरार्धेनप्रतिपादयति इन्द्रः चम्वोःसोमाभिषवफलकयोः सुतस्यसोमंसुतवतोभिषुतवतस्त्वष्टुःसंबंधिनिगृहे अनुपहूतःसन् शतधन्यं बहुधनेनक्रीतंसोमम पिबत् बलात्कारेणसोमस्यपानंकृतवान् अयमर्थस्तैत्तिरीयैः[1]स्त्वष्टाहतपुत्रोवीन्द्रंसोममाहरदित्यनुवाकेमहताप्रबन्धेनप्रपंचितः ॥ ३ ॥

---

[1] तै० सं० २. ४. १२ ।

अथचतुर्थी–

किंसऋधंक्कृणवद्यंसहस्रंमासोजभारंशरदंश्चपूर्वीः ।
नहीन्वंस्यप्रतिमानमस्त्यन्तर्जातेषूतयेजनित्वाः ॥ ४ ॥

किम् । सः । ऋधंक् । कृणवत् । यम् । सहस्रंम् । मासः ।
जभारं । शरदंः । च । पूर्वीः । नहि । नु । अस्य । प्रतिऽमानंम् ।
अस्ति । अन्तः । जातेषु । उत । ये । जनिऽत्वाः ॥ ४ ॥

अदितिर्यमिन्द्रं सहस्रं बहून्मासोमासान्पूर्वीर्बह्वीः शरदश्चसंवत्सरांश्चजभार बभर बिभर्ते रिदंरूपं गर्भेस्थितइन्द्रः बहुषुसंवत्सरेषुअदितिंक्लेशितवानित्यर्थः एवंभूतःसइन्द्रः किंयत्किमपि-सर्वमपीत्यर्थः ऋधक् विरुद्धंकर्मकृणवदकरोत् इन्द्रस्याक्षेपमसहमानादितिरिन्द्रमाताप्येनंप्रतिब्रूते–हेवामदेव जातेषूत्पन्नेषुअन्तर्मध्ये अस्येन्द्रस्यप्रतिमानमुपमानंनह्यस्ति नविद्यतेखलु नुइतिपूरणार्थः उतापिच येदेवादयः जनित्वाःजनयितव्याःजनयिष्यमाणाःतेषुमध्येअस्येन्द्रस्यप्रतिमानंनास्ति ॥ ४ ॥

अथपंचमी–

अवद्यमिंवमन्यंमानागुहांकरिन्द्रंमातावीर्येणान्यृंष्टम् ।
अथोदंस्थात्स्वयमत्कंवसानआरोदंसीअपृणाज्जायंमानः ॥५॥२५॥

अवद्यम्ऽइंव । मन्यंमाना । गुहां । अकः । इन्द्रंम् । माता ।
वीर्येण । निऽऋंष्टम् । अथं । उत् । अस्थात् । स्वयम् । अत्कंम् ।
वसानः । आ । रोदंसी इतिं । अपृणात् । जायंमानः ॥ ५ ॥ २५ ॥

गुहा गुहायां गह्वररूपेसूतिकागृहेजातमिन्द्रं अवद्यमिव गर्हमिव मन्यमानाजानती माताइन्द्रजनन्यदितिः वीर्येणसामर्थ्येनन्यृष्टं नितरांप्राप्तमकः अकरोत् अथानन्तरंजायमानः उत्पद्यमानइन्द्रः स्वयमेवात्कंतेजोवसानःआच्छादकःसन् दधानइत्यर्थः उदस्थात् उत्कर्षेणातिष्ठत किंच रोदसीद्यावापृथिव्यौआपृणात् समंतात्पूरयामास ॥ ५ ॥

॥ इतितृतीयस्यपंचमेपंचविंशोवर्गः ॥ २५ ॥

अथषष्ठी–

एताअर्षन्त्यललाभवन्तीर्ऋतावरीरिवसंक्रोशमानाः ।
एताविपृच्छकिमिदंभनन्तिकमापोअद्रिंपरिधिंरुजन्ति ॥ ६ ॥

एताः । अर्षन्ति । अललाऽभवन्तीः । ऋतवरीःऽइव ।
सम्ऽक्रोशमानाः । एताः । वि । पृच्छ । किम् । इदम् । भनन्ति ।
कम् । आपः । अद्रिम् । परिऽधिम् । रुजन्ति ॥ ६ ॥

अललाभवन्तीः अललेत्येवंरूपंशब्दंकुर्वत्यः ऋतावरीरिव उदकवत्यएवएतानद्यः संक्रोशमानाः इन्द्रमहत्त्वप्रतिपादकोद्भूतेनहर्षेणबहुविधंशब्दायमानाःसत्यः अर्षन्तिगच्छन्ति एवंभूतानद्यः इदंकिंभनन्ति श्रोत्रग्राह्यंशब्दायमानं किंवदन्तीममर्थं हेऋषेत्वमेताःनदीः विपृच्छ विशेषेणपृष्टवान्भव एवंसंपृच्छविचारितेसति एतच्छब्दायमानमिन्द्रमाहात्म्यस्यैववचनं भवतीत्यर्थः किंचापः उदकानि परिधिमावरकंकमद्रिं कंमेघं रुजन्ति भंजंति आपःकमपिमेघं नभंजंति किंतुइन्द्रोममपुत्रएवोदकावरकंमेघंभंक्त्वाअपःप्रवर्तयतीत्यर्थः ॥ ६ ॥

अथसप्तमी–

किमुष्विदस्मैनिविदोभनन्तेन्द्रस्यावद्यंदिधिषन्तआपः ।
ममैतान्पुत्रोमहतावधेनवृत्रंजघन्वाँअसृजद्विसिन्धून् ॥ ७ ॥

किम् । ऊँ इति । स्वित् । अस्मै । निऽविदः । भनन्त । इन्द्रस्य ।
अवद्यम् । दिधिषन्ते । आपः । मम । एतान् । पुत्रः । महता ।
वधेन । वृत्रम् । जघन्वान् । असृजत् । वि । सिन्धून् ॥ ७ ॥

यदाइन्द्रोवृत्रासुरंहतवान्तदाशाश्वतींब्रह्महत्यांप्राप्तवानितिवामदेवस्याभिप्रायमुन्नीयादितिराह–निविदः मरुत्वतीयशस्त्रेप्रयुज्यमानानिमरुत्स्तोत्रोमरुद्गणइत्यादौनिइन्द्रस्तुतिप्रतिपादकानिकानिचित्पदानिनिविच्छब्देनोच्यन्ते तानिविदः अस्मैइमंवृत्रवधनिमित्तंब्रह्महत्यारूपंपापंप्राप्नुवन्तमिन्द्रंकिमुष्विद्भनन्तभनन्ति किं[illegible]तर्हि इन्द्रंपापरहितंमत्वा निविदःस्तुव-

न्ति कथमिन्द्रस्यपापरहितत्वं उच्यते—आपःफेनरूपेणास्येन्द्रस्यावद्यंब्रह्महत्यादिरूपंपापंदिधिषन्तेधारयन्ति ममपुत्रः मदीयःपुत्रइन्द्रः महताप्रभूतेनवधेन वधइतिवज्रनामैतत् वज्रेणवृत्रंजघन्वान् हतवान् ततः एतान्सिन्धूनुदकानिव्यसृजत् विशेषेणस्वैरत्वेन सतुंसृष्टवान् इन्द्रेणसृष्टाआपः तस्यपापंजगृहुरित्यर्थः ॥ ७ ॥

अथाष्टमी—

मम॑च्च॒नत्वा॑यु॒व॒तिःप॒रा॒सम॑म॑च्च॒नत्वा॑कु॒षवा॑ज॒गार॑ ।
मम॑च्चि॒दाप॒ःशिश॑वेममृड्यु॒र्मम॑च्चि॒दिन्द्र॒ःसह॒सोद॑तिष्ठत् ॥ ८ ॥

मम॑त् । च॒न । त्वा॒ । यु॒व॒तिः । प॒रा॒ऽआस॑ । मम॑त् । च॒न । त्वा॒ ।
कु॒षवा॑ । ज॒गार॑ । मम॑त् । चि॒त् । आप॑ः । शिश॑वे । म॒मृ॒ड्यु॒ः ।
मम॑त् । चि॒त् । इन्द्र॑ः । सह॑सा । उत् । अ॒ति॒ष्ठ॒त् ॥ ८ ॥

सूक्तशेषेणऋषिरिन्द्रंस्तौति—हेइन्द्र ममच्चन माद्यन्त्येव प्रमत्तैवेत्यर्थः युवतिस्त्वदीयामाताअदितिः त्वा त्वां परास चिक्षेप किंच कुषवानाम्नीराक्षसी सा ममच्चनप्रमत्तैवत्वात्वांजगार गिरतिस्म हेइन्द्र ममच्चित् प्रमाद्यन्त्यएवापः शिशवेजातायतुभ्यंममृड्युः सुखयांचक्रुः ममच्चित् माद्यन्नेवेन्द्रः सहसास्वेनवीर्येणसहउदतिष्ठत् सूतिकागृहात्राक्षसींबाधमानःसन्उत्कर्षेणतस्थौ ॥ ८ ॥

अथनवमी—

मम॑च्च॒नते॑मघ॒व॒न्व्यं॑सोनिविवि॒ध्वाँअप॒हनू॑ज॒घान॑ ।
अधा॒निवि॑द्ध॒उत्त॑रोबभूवा॒ञ्छिरो॑दा॒सस्य॒संपि॑णग्व॒धेन॑ ॥ ९ ॥

मम॑त् । च॒न । ते॒ । म॒घ॒ऽव॒न् । विऽअं॑सः । नि॒ऽवि॒वि॒ध्वान् । अप॑ ।
हनू॒ इति॑ । ज॒घान॑ । अध॑ । निऽवि॑द्धः । उत्ऽत॑रः । ब॒भूवा॑न् ।
शिर॑ः । दा॒सस्य॑ । सम् । पि॒ण॒क् । व॒धेन॑ ॥ ९ ॥

हेमघवन्धनवन्निन्द्र ममच्चन माद्यन्नेव व्यंसोनामराक्षसः निविविध्वान् प्रविध्यन् तेहनू त्वदीयेहनू मुखपार्श्वेअपजघान अपहतवान् अध अथानन्तरं हेइन्द्र निविद्धः राक्षसेनता-

डितस्त्वं उत्तरः व्यंसादधिकबलः बभूवान्भूतःसन् दासस्यक्षीणस्य व्यंसस्य शिरोवधेनवज्रेणसंपिणक् पिष्टवानसि ॥ ९ ॥

अथदशमी–

गृ॒ष्टिःस॑सूव॒स्थवि॑रंतवा॒गाम॑नाधृ॒ष्यं॑वृ॑ष॒भंतु॒म्रमिन्द्र॑म् ।
अरी॑ह्ळंव॒त्संच॒रथा॑यमा॒तास्व॒यंगा॒तुंत॒न्व॑इ॒च्छमा॑नम् ॥ १० ॥

गृ॒ष्टिः । स॒सू॒व । स्थवि॑रम् । त॒वा॒गाम् । अ॒ना॒धृ॒ष्यम् । वृ॒ष॒भम् ।
तुम्र॑म् । इन्द्र॑म् । अरी॑ह्ळम् । व॒त्सम् । च॒रथा॑य । मा॒ता ।
स्व॒यम् । गा॒तुम् । त॒न्वे॑ । इ॒च्छमा॑नम् ॥ १० ॥

गृष्टिः काचिद्गौः वत्संयथाससूव सुषुवे तथा माताइन्द्रजननी अदितिः चरथाय स्वेच्छयासंचरणाय इन्द्रंससूव सुषुवे कीदृशंइन्द्रं स्थविरं वयसाप्रवृद्धं तवागां प्रवृद्धबलं अनाधृष्यं शत्रुभिरनभिभाव्यं वृषभंसेचनसमर्थं तुम्रंप्रेरकंअरीह्ळं शत्रुभिरनभिभूतंस्वयंगातुं अन्यनिरपेक्षयगमनं तन्वे शरीराय इच्छमानंइच्छन्तम् ॥ १० ॥

अथैकादशी–

उ॒तमा॒ताम॑हि॒षमन्व॑वेनद॒मीत्वा॑जहतिपुत्रदे॒वाः ।
अथा॑ब्रवीद्वृ॒त्रमिन्द्रो॑हनि॒ष्यन्त्सखे॑विष्णोवित॒रंविक्र॑मस्व ॥ ११ ॥

उ॒त । मा॒ता । म॒हि॒षम् । अनु॑ । अ॒वे॒न॒त् । अ॒मी इति॑ । त्वा॒ ।
ज॒ह॒ति॒ । पु॒त्र॒ । दे॒वाः । अथ॑ । अ॒ब्र॒वी॒त् । वृ॒त्रम् । इन्द्रः॑ । ह॒नि॒ष्यन् ।
सखे॑ । वि॒ष्णो॒ इति॑ । वि॒ऽत॒रम् । वि । क्र॒म॒स्व॒ ॥ ११ ॥

उतापिच हेमदीयपुत्रेन्द्र अमो वह्न्यादयोदेवाः त्वा त्वांजहति त्यजन्ति इत्युक्तवतीइन्द्रस्यमाताअदितिः इन्द्रंमहिषंमहान्तं महिषइतिमहन्नामैतत् अन्ववेनत् अयाचत अथानंतरं हेविष्णो व्यापनशील हेसखे मित्रभूत हरे त्वं वृत्रंहनिष्यन् हन्तुमिच्छन् वितरं विक्रमस्व अतिपराक्रमीभव इतिइन्द्रःविष्णुमब्रवीदुवाच ॥ ११ ॥

अथद्वादशी–

कस्ते॑मा॒तरं॑वि॒धवा॑मचक्रच्छ॒युंकस्त्वाम॑जिघांस॒च्चर॑न्तम् ।
कस्ते॑दे॒वोअधि॑मा॒र्डी॒कआ॑सी॒द्यत्प्राक्षि॑णाःपि॒तरं॑पाद॒गृह्य॑ ॥ १२ ॥

कः । ते॒ । मा॒तर॑म् । वि॒धवा॑म् । अ॒च॒क्र॒त् । श॒युम् । कः । त्वाम् ।
अ॒जि॒घां॒स॒त् । चर॑न्तम् । कः । ते॒ । दे॒वः अधि॑ । मा॒र्डी॒के ।
आ॒सी॒त् । यत् । प्र । अक्षि॑णाः । पि॒तर॑म् । पा॒द॒ऽगृह्य॑ ॥ १२ ॥

हेइन्द्र यद्यस्मात्कारणात् पितुःसकाशाज्जनिष्यमाणाद्भीतस्त्वं त्वदीयंपितरंपादगृह्य पादेषुगृहीत्वा प्राक्षिणाः प्रकर्षेणावधीः तस्मात्कारणात्तेत्वत्तोन्यःकोदेवः मातरंस्वकीयजननीं विधवांपितृवधेनपतिरहितांअचक्रत् अकरोत् कःत्वत्तोन्यःशयुंशयानंचरन्तंजाग्रतंवात्वां अजिघांसत् हन्तुमैच्छत् तेत्वत्तोन्यःकोदेवःमार्डीके प्रजानांसुखकरणे अधि अधिकआसीत् अयमर्थः ऋक्सामेवैदेवेभ्यइत्यनुवाकेयज्ञोदक्षिणामभ्यध्यायदित्यादिब्राह्मणेनतैत्तिरीयकैर्बहुधा प्रपंचितः ॥ १२ ॥

अथत्रयोदशी–

अव॑र्त्या॒शुन॑आ॒न्त्राणि॑पेचे॒नदे॒वेषु॑विविदेमर्डि॒तार॑म् ।
अप॑श्यंजा॒याममं॑हीयमाना॒मधा॑मेश्ये॒नोमध्वाज॑भार ॥ १३ ॥ २६ ॥

अव॑र्त्या॑ । शुन॑ः । आ॒न्त्राणि॑ । पे॒चे॒ । न । दे॒वेषु॑ । वि॒वि॒दे॒ ।
म॒र्डि॒तार॑म् । अप॑श्यम् । जा॒याम् । अम॑हीयमानाम् । अध॑ ।
मे॒ । श्ये॒नः । मधु॑ । आ । ज॒भा॒र॒ ॥ १३ ॥ २६ ॥

अनयावामदेवःस्वकीयंदारिद्र्यंसूचयन् इन्द्रस्योत्कर्षमाह वामदेवोहं अवर्त्या जीवनोपायराहित्येन शुनः शुनकसंबन्धीनि आंत्राणि पुरीतंति पेचे अपचं देवेषुद्योतमानेषु

Funding by IKS-MoE

वह्व्यादिषुमध्ये इन्द्रादन्यंमर्डितारंसुखयितारंनविविदे नलेभे किंच जायांस्वकीयांभार्यां अमहीयमानां अश्लाघनीयांअपश्यंअद्राक्षं अधअथानंतरंश्येनःश्येनवच्छीघ्रगामी इन्द्रः मे मह्यं मधु मधुरोपेतंउदकमाजभारआजहार ॥ १३ ॥

॥ इतितृतीयस्यपंचमेषड्विंशोवर्गः ॥ २६ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेपंचमोध्यायःपफाण ॥५॥

Funding by IKS-MoE

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥
व्याख्यातःपंचमोध्यायस्तृतीयाष्टकआदरात् । धीमतासायणाख्येनषष्ठोध्यायोथवर्ण्यते ॥२॥

चतुर्थेमंडलेद्वितीयेनुवाकेष्टसूक्तानिव्याख्यातानि एवात्वामिन्द्रेत्येकादशर्चंनवमंसूक्तं तस्यमंडलादिपरिभाषयावामदेवऋषिः अनादेशपरिभाषयात्रिष्टुप्छन्दः इन्द्रोदेवता तथाचानुक्रान्तम्—एवैकादशेति । अग्निष्टोमेमाध्यंदिनसवनेमैत्रावरुणशस्त्रेइदंसूक्तम् सूत्र्यतेहि—एवात्वामिन्द्रोशन्नुषुणःसुमनाउपाकइतियाज्येति । पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिमैत्रावरुणशस्त्रे अहीनसूक्तं तत्स्थानेत्रीणिसंपातसूक्तानि तत्रेदंप्रथमंसूक्तं सूत्रितंच—एवात्वामिन्द्रयन्नइन्द्रइति ।

तत्रप्रथमा—

ॐम् ए॒वात्वामि॑न्द्रवज्रि॒न्नत्र॒विश्वे॑दे॒वास॑:सु॒हवा॑स॒ऊमा॑: ।
म॒हामु॒भेरोद॑सीवृ॒द्धमृ॒ष्वंनिरेक॒मिद्वृ॑णतेवृत्र॒हत्ये॑ ॥ १ ॥

ए॒व । त्वाम् । इ॒न्द्र॒ । व॒ज्रि॒न् । अत्र॑ । विश्वे॑ । दे॒वास॑: । सु॒ऽहवा॑सः ।
ऊमा॑: । म॒हाम् । उ॒भे इति॑ । रोद॑सी॒ इति॑ । वृ॒द्धम् । ऋ॒ष्वम् ।
निः । एक॑म् । इत् । वृ॒ण॒ते॒ । वृ॒त्र॒ऽहत्ये॑ ॥ १ ॥

अत्रास्मिन्यज्ञे वज्रिन् हेवज्रवन्निन्द्र सुहवासः सुहवाःशोभनाह्वानाः ऊमाः रक्षकाः विश्वेदेवासः सर्वेदेवाः उभेरोदसीद्यावापृथिव्यौच एव एवमुक्तप्रकारेणस्तूयमानंमहांमहान्तंप्रभूतंवृद्धंगुणैःप्रवृद्धंऋष्वंदर्शनीयंत्वामेकमित् एकमेववृत्रहत्येवृत्रहननार्थंनिर्वृणते निःशेषेणसंभजते ॥ १ ॥

अथद्वितीया—

अवा॑सृजन्त॒जिव्र॑यो॒नदे॒वाभुव॑:स॒म्राळि॑न्द्रस॒त्ययो॑निः ।
अह॒न्नहिं॑परि॒शया॑न॒मर्ण॒:प्रव॑र्त॒नीर॑रदोवि॒श्वधे॑नाः ॥ २ ॥

Funding by IKS-MoE

अव॑ । अ॒सृ॒ज॒न्त॒ । जिव्र॑यः । न । दे॒वाः । भुवः॑ । स॒म्ऽराट् ।
इ॒न्द्र॒ । स॒त्यऽयो॑निः । अह॑न् । अहि॑म् । प॒रि॒ऽशया॑नम् ।
अर्णः॑ । प्र । व॒र्त॒नीः । अ॒र॒दः॒ । वि॒श्वऽधे॑नाः ॥ २ ॥

हेइन्द्र देवाः त्वां जिव्रयोन जीर्णाःप्रवृद्धाःपितरःयूनःपुत्रानिव अवासृजन्त असुरवधार्थंप्रैरयन् ततः हेइन्द्र सत्ययोनिः सत्यनिवासस्त्वं सम्राट् सर्वेषांलोकानांअधीश्वरोभुवः अभवः अर्णःउदकंलक्षीकृत्य परिशयानं परितःसमन्तात्शयनंकुर्वन्तं अहिं वृत्रासुरं अहन् अवधीः विश्वधेनाः विश्वस्यप्रीणयित्रीः वर्तनीःसर्वत्रप्रवर्तिकाःनदीः प्रारदः प्रकर्षेणविलेखनंकृतवानसि इन्द्रः वृत्रंहत्वातेनावृतान्युदकानिप्रवाहरूपेणप्रवर्तयतीत्यर्थः ॥ २ ॥

अथतृतीया–

अतृ॑प्णुवन्तं॒विय॑तमबु॒ध्यमबु॑ध्यमानंसुषु॒पा॒णमि॑न्द्र ।
स॒प्तप्रति॑प्र॒वत॑आ॒शया॑न॒महिं॒वज्रे॑ण॒विरि॑णाअप॒र्वन् ॥ ३ ॥

अतृ॑प्णुवन्तम् । विऽय॑तम् । अ॒बु॒ध्यम् । अबु॑ध्यमानम् ।
सु॒सु॒पा॒नम् । इ॒न्द्र॒ । स॒प्त । प्रति॑ । प्र॒ऽवतः॑ । आ॒ऽशया॑नम् ।
अहि॑म् । वज्रे॑ण । वि । रि॒णाः॒ । अ॒प॒र्वन् ॥ ३ ॥

हेइन्द्र त्वं अतृप्णुवन्तं भोगेषु अतृप्यन्तं वियतं शिथिलांगं अबुध्यं दुर्विज्ञानंअबुध्यमानंसुषुपाणं सुप्तं सप्तसर्पणस्वभावाःप्रवतः अपः प्रत्याशयानंआवृत्यतिष्ठन्तं अहिंवृत्रं अपर्वन् अपर्वणि पौर्णमास्यां वज्रेणविरिणाः व्यरिणाःविशेषेणहतवानसि पौर्णमास्यांवृत्रवधः [1]त्वष्टाहतपुत्रइत्यनुवाकेघ्नन्तिवाएनंपौर्णमासआमावास्यायांप्यायन्तीतितैत्तिरीयैरप्युक्तः ॥ ३ ॥

अथचतुर्थी–

अक्षो॑दय॒च्छव॑सा॒क्षामं॑बु॒ध्नंवार्ण॑वा॒तस्तवि॑षीभि॒रिन्द्रः॑ ।
दृ॒ह्ळान्यौ॑भ्नादु॒शमा॑न॒ओजोवा॑भिनत्क॒कु॒भः॒पर्व॑तानाम् ॥ ४ ॥

---

1 तै. सं. २. ४. १२।

अक्षोदयत् । शवसा । क्षाम । बुध्नम् । वाः । न । वातः ।
तविषीभिः । इन्द्रः । दृळ्हानि । औभ्नात् । उशमानः ।
ओजः । अव । अभिनत् । ककुभः । पर्वतानाम् ॥ ४ ॥

इन्द्रः परमैश्वर्ययुक्तः शवसाबलेन बुध्नमंतरिक्षं क्षाम क्षीणोदकं अक्षोदयत् संपिपेष तत्रदृष्टान्तः—वातोवायुःतविषीभिःबलैर्वाणंउदकमिव तद्वत् किंच ओजोबलंउशमानःकामयमानःइन्द्रः दृळ्हानि दृढानि स्थिराण्यपिअभ्राणि औभ्नादभांक्षीत् तथापर्वतानांगिरीणांककुभः पक्षान् अवाभिनत् अत्यन्तमभैत्सीत् ॥ ४ ॥

अथपंचमी—

अभिप्रदद्रुर्जनयोनगर्भंरथाइवप्रययुःसाकमद्रयः ।
अतर्पयोविसृतउब्जऊर्मीन्त्वंवृताँअरिणाइन्द्रसिन्धून् ॥ ५ ॥ १ ॥

अभि । प्र । दद्रुः । जनयः । न । गर्भम् । रथाःऽइव । प्र । ययुः ।
साकम् । अद्रयः । अतर्पयः । विऽसृतः । उब्जः । ऊर्मीन् ।
त्वम् । वृतान् । अरिणाः । इन्द्र । सिन्धून् ॥ ५ ॥ १ ॥

हेइन्द्र त्वां अद्रयोमरुतः जनयोजनन्यः गर्भंन पुत्रमिव अभिप्रदद्रुः अभिजग्मुः किंच रथाइव रंहणशीलारथायथावृत्रवधार्थंत्वयासाकंप्रययुः प्रकर्षेणयासिषुः हे इन्द्र त्वं विसृतः विसरणशीलानदीः अतर्पयः अद्भिरपूरयः तथा ऊर्मीन् मेघान् उब्जः अवधीः तथा त्वंवृतान्वृत्रेणावृतान्सिन्धूनपःअरिणाःप्रैरयः ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी—

त्वंमहीमवनिंविश्वधेनांतुर्वीतयेवय्यायक्षरन्तीम् ।
अरमयोनमसैजदर्णःसुतरणाँअकृणोरिन्द्रसिन्धून् ॥ ६ ॥

त्वम् । महीम् । अवनिम् । विश्वऽधेनाम् । तुर्वीतये । वय्याय ।
क्षरन्तीम् । अरमयः । नमसा । एजत् । अर्णः । सुऽतरणान् ।
अकृणोः । इन्द्र । सिन्धून् ॥ ६ ॥

Funding by IKS-MoE

हेइन्द्र त्वं महीं महतीं विश्वधेनां विश्वस्यप्रीणयित्रीं तुर्वीतये तुर्वीतिनाम्नेराज्ञे वय्याय वय्यनाम्नेच क्षरन्तींअभीष्टान्कामानदुहन्तीं अवनिं भूमिं नमसा अन्नेन एजत् ऐजत अचलत अर्णः अर्णसाउदकेनचअरमयःरमयसि इन्द्रःपृथिवींअन्नोदकसमृद्धांकरोतीत्यर्थः किंच हेइन्द्र त्वंसिन्धून्जलानिसुतरणान्सुष्ठुतीर्णानिअकृणोरकार्षीः ॥ ६ ॥

अथसप्तमी—

प्राग्रुवोनभन्वो३नवक्वाध्वस्राअपिन्वद्युवतीर्ऋतज्ञाः ।
धन्वान्यज्राँअपृणक्तृषाणाँअधोगिन्द्रःस्तर्यो३दंसुपत्नीः ॥ ७ ॥

प्र । अग्रुवः । नभन्वः । न । वक्वाः । ध्वस्राः । अपिन्वत् ।
युवतीः । ऋतऽज्ञाः । धन्वानि । अज्रान् । अपृणक् ।
तृषाणान् । अधोक् । इन्द्रः । स्तर्यः । दम्ऽसुपत्नीः ॥ ७ ॥

इन्द्रः नभन्वः शत्रूणांहिंसिकाः वक्वान सेनाइव ध्वस्राः कूलानांध्वंसिकाः युवतीरद्भिर्मिश्रिताः ऋतज्ञाः ऋतस्यान्नस्यजनयित्रीः अग्रुवः अग्रुवइतिनदीनामैतत् अग्रगामिनीर्नदीः प्रापिन्वत् प्रकर्षेणापूरयत् तथा धन्वानि निर्जलानुन्नतान्देशांश्चवृष्ट्याअपृणत् अपूरयत् तथा अज्रान् मार्गस्यगन्तॄन्तृषाणान् पिपासयायुक्तान् पुरुषान् अपृणक् अपूरयत् किंच इन्द्रः दंसुपत्नीः दमनपराअसुराः सुष्ठुपतयोयासांताः स्तर्यः स्तरीः निवृत्तप्रसवागाः अधोक् अधुक्षत् इन्द्रः राक्षसकृतनिरोधदुःखान्निरुद्धप्रसवाअपिगाविमुच्य सप्रसवाश्चकारेत्यर्थः ॥ ७ ॥

अथाष्टमी—

पूर्वीरुषसःशरदश्चगूर्तावृत्रंजघन्वाँअसृजद्विसिन्धून् ।
परिष्ठिताअतृणद्बद्बधानाःसीराइन्द्रःस्रवितवेपृथिव्या ॥ ८ ॥

पूर्वीः । उषसः । शरदः । च । गूर्ताः । वृत्रम् । जघन्वान् ।
असृजत् । वि । सिन्धून् । परिऽस्थिताः । अतृणत् ।
बद्बधानाः । सीराः । इन्द्रः । स्रवितवे । पृथिव्या ॥ ८ ॥

वृत्रं वृत्राख्यमसुरंजघन्वान्हतवानिन्द्रः गूर्ताः तमिस्रयागीर्णाःपूर्वीर्बह्वीः उषसः शरदश्च संवत्सरांश्च व्यसृजद् विशेषेणससर्ज तथा सिन्धून्वृत्रेणावृतान्युदकानिव्यसृजत् किंच परिष्ठिताः मेघेषुपरितःस्थिताः बद्बधानाः वृत्रेणपरितोबध्यमानाः सीरानदीः सीराइतिनदीनामैतत् पृथिव्यापृथिवीरूपेणमार्गेणस्रवितवे स्रवितुंगमनार्थमतृणत् अविध्यत् ॥ ८ ॥

अथनवमी–

व॒म्रीभि॑:पु॒त्रम॒ग्रुवो॑अदा॒नंनि॒वेश॑नाद्धरिव॒आज॑भर्थ ।
व्य१॒॑न्धोअ॑ख्य॒दहि॑मादद॒ानोनि॒र्भू॑दुख॒च्छित्सम॑रन्त॒पर्व॑ ॥ ९ ॥

व॒म्रीभि॑ः । पु॒त्रम् । अ॒ग्रुव॑ः । अ॒दा॒नम् । नि॒ऽवेश॑नात् । ह॒रि॒ऽव॒ः ।
आ । ज॒भ॒र्थ॒ । वि । अ॒न्धः । अ॒ख्य॒त् । अहि॑म् । आ॒ऽद॒दा॒नः ।
निः । भूत् । उ॒ख॒ऽछि॑त् । सम् । अ॒र॒न्त॒ । पर्व॑ ॥ ९ ॥

हेहरिवः हरिसंज्ञाश्वोपेतेन्द्र त्वं वम्रीभिः उपजिह्विकाभिरदानमद्यमानं अग्रुवः अग्रूनामकाचित् तस्याः पुत्रं निवेशनाद्वल्मीकाख्यात्स्थानादाजभर्थ आहतवानसि आददानः इन्द्रेणाह्रियमाणः अग्रुवः पुत्रः अन्धः पूर्वमन्धःसन् अहिंसर्पंव्यख्यत् विशेषेणापश्यत् ततोनिर्भूतवल्मीकान्निर्गतोभवत् उखच्छित्वल्मीकाख्यायाउखायाश्छेदकानिपर्वं पर्वाणि अस्यसर्वाणि अंगानां शिथिलानिपर्वाणिसमरन्त समगच्छन्त उपजिह्विकाभिः शिथिलीकृतानि अग्रुवः पुत्रस्य पर्वाणिइन्द्रेणसमधीयन्तेत्यर्थः ॥ ९ ॥

अथदशमी–

प्रते॒पूर्वा॑णि॒कर॑णानिविप्रावि॒द्वाँआ॑हवि॒दुषे॒करां॑सि ।
यथा॑यथा॒वृष्ण्या॑नि॒स्वगू॑र्तापां॑सिराज॒न्नर्या॒विवे॑षीः ॥ १० ॥

प्र । ते॒ । पूर्वा॑णि । कर॑णानि । वि॒प्र॒ । आ॒ऽवि॒द्वान् । आ॒ह॒ । वि॒दुषे॑ ।
करां॑सि । यथा॑ऽयथा । वृष्ण्या॑नि । स्वऽगू॑र्ता । अपां॑सि ।
रा॒ज॒न् । नर्या॑ । अवि॑वेषीः ॥ १० ॥

Funding by IKS-MoE

हेराजन्राजमानेन्द्र वृष्ण्यानि वर्षणयोग्यानि स्वगूर्ता स्वगूर्तानि स्वयमुद्गीर्णानि नर्या नर्याणि मनुष्यहितानि अपांसि त्वत्संबन्धीनिकर्माणि यथायथाअविवेषीः व्यमोः अकार्षीरितियावत् तथातथा हेविप्र प्राज्ञेन्द्र विदुषेविदुषःसर्वंजानतस्तेत्वत्संबन्धीनिपूर्वाणिपुरातनानिकरणानिकर्माणि आविद्वान् आसमन्ताज्जानन् वामदेवः करांसि त्वदीयानिकर्माणि प्रप्रकर्षेणाह ब्रवीति ॥ १० ॥

अथैकादशी—

नूष्टुतइन्द्रनूगृणानइषंजरित्रेनद्योइनपीपेः ।
अकारितेहरिवोब्रह्मनव्यंधियास्यामरथ्यःसदासाः ॥ ११ ॥ २ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः ।
न । पीपेरितिपीपेः । अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् ।
धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥ २ ॥

हेइन्द्र नु क्षिप्रं स्तुतः पूर्वैर्ऋषिभिःसंस्तुतः नु क्षिप्रं गृणानः अस्माभिःस्तूयमानस्त्वं इषमन्नं जरित्रे स्तोत्रे मह्यं नद्योन अद्भिर्नदीरिवापीपेः प्यायय प्रवृद्धंकुरु हेहरिवः हरिसंज्ञकाश्वोपेतेन्द्र तेतुभ्यंनव्यं नवतरंब्रह्मस्तोत्रं अकारि अस्माभिःक्रियते रथ्योरथवन्तोवयं धियाप्रज्ञारूपयास्तुत्यासदासाःत्वांसर्वदाभजमानाःत्वदर्थंहवीरूपस्यान्नस्यदातारोवास्याम भूयास्म ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेद्वितीयोवर्गः ॥ २ ॥

आनइन्द्रेत्येकादशर्चंदशमंसूक्तंवामदेवस्यार्षंत्रैष्टुभमैन्द्रं आनइत्यनुक्रमणिका । पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिनिष्केवल्येएतन्निविद्धानीयम् सूत्रितंच—आनइन्द्रइतिनिष्केवल्यमिति । महाव्रतेप्येतत्संपातसूक्तम् तथैवपंचमारण्यकेसूत्रितम्—आनइन्द्रोदूरादानआसादितिसंपातइति ।

तत्रप्रथमा—

आनइन्द्रोदूरादानआसादभिष्टिकृदवसेयासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसंगेसमत्सुतुर्वणिःपृतन्यून् ॥ १ ॥

आ । नः । इन्द्रः । दूरात् । आ । नः । आसात् । अभिष्टिऽकृत् ।
अवसे । यासत् । उग्रः । ओजिष्ठेभिः । नृऽपतिः । वज्रऽबाहुः ।
सम्ऽगे । समत्ऽसु । तुर्वणिः । पृतन्यून् ॥ १ ॥

अभिष्टिकृद्यजमानसंबन्धिनां अभिष्टीनां कर्ता उग्रस्तेजस्वीन्द्रः नोस्माकमवसेरक्षणाय दूरात् आयासदायातु आगच्छतु अपिच आसादासन्नादंतिकाच्चनोस्माकमवसेरक्षणायआयासदायातु कीदृशः समत्सु संग्रामेषु संगेशत्रुभिःसंयोगेसति पृतन्यून् शत्रून् तुर्वणिः हिंसन् वज्रबाहुर्वज्रहस्तः नृपतिः वृष्टिद्वारानृणांमनुष्याणांपालकः ओजिष्ठेभिः अतिशयेनतेजस्विभिर्मरुद्भिर्युक्तइतिशेषः ॥ १ ॥

अथद्वितीया–

आनइन्द्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच ।
तिष्ठातिवज्रीमघवाविरप्शीमंयज्ञमनुनोवाजसातौ ॥ २ ॥

आ । नः । इन्द्रः । हरिऽभिः । यातु । अच्छ । अर्वाचीनः ।
अवसे । राधसे । च । तिष्ठाति । वज्री । मघऽवा । विऽरप्शी ।
इमम् । यज्ञम् । अनु । नः । वाजऽसातौ ॥ २ ॥

अर्वाचीनः अस्मदभिमुखइन्द्रः अवसेस्मदीयायरक्षणायराधसेच धनायच नोच्छ अस्मानभिलक्षीकृत्यहरिभिरश्वैःसहआयातुआगच्छतु किंच वज्री वज्रवान् मघवाधनवान् विरप्शी महान् विरप्शीतिमहन्नामसुपाठात् अस्मदीयस्यकर्मणोद्वेष्टृभिरसुरादिभिःसहनोस्माकं वाजसातौ युद्धेप्राप्तेसतिइममस्मदीयंयज्ञं अनूद्दिश्य तिष्ठाति तिष्ठतु ॥ २ ॥

अथतृतीया–

इमंयज्ञंत्वमस्माकमिन्द्रपुरोदधत्सनिष्यसिक्रतुंनः ।
श्वघ्नीववज्रिन्त्सनयेधनानांत्वयावयमर्यआजिंजयेम ॥ ३ ॥

Funding by IKS-MoE

इमम् । यज्ञम् । त्वम् । अस्माकम् । इन्द्र । पुरः । दधत् ।
सनिष्यसि । क्रतुम् । नः । श्वघ्नीऽइव । वज्रिन् । सनये ।
धनानाम् । त्वया । वयम् । अर्यः । आजिम् । जयेम ॥ ३ ॥

हेइन्द्र त्वंनोस्मान् पुरोदधत् पुरस्कृतान्कुर्वन् अस्माकंक्रतुं क्रियमाणमिमंयज्ञं सनिष्यसि संभजिष्यसि अपिच श्वघ्नीव मृगयुः मृगानिव हेवज्रिन्वज्रवन्निन्द्र त्वया अर्यःअरयः स्तोतारोवयंधनानांपश्वादिधनानांसनयेलाभाय आजिंशत्रुसंबन्धिनंसंग्रामंजयेम जीयास्म ॥ ३ ॥

अग्निष्टोमेमाध्यंदिनसवनेमैत्रावरुणस्योशन्नुषुणइतिशस्त्रयाज्या सूत्रितंच—उशन्नुषुणः सुमनाउपाकइतियाज्येति ।

सैषाचतुर्थी—

उशन्नुषुणःसुमनाउपाकेसोमस्यनुसुषुतस्यस्वधावः ।
पाइन्द्रप्रतिभृतस्यमध्वःसमन्धसाममदःपृष्ठ्येन ॥ ४ ॥

उशन् । ऊँ इति । सु । नः । सुऽमनाः । उपाके । सोमस्य । नु ।
सुऽसुतस्य । स्वधाऽवः । पाः । इन्द्र । प्रतिऽभृतस्य ।
मध्वः । सम् । अन्धसा । ममदः । पृष्ठ्येन ॥ ४ ॥

हेस्वधावः अन्नवन्निन्द्र सुमनाःशोभनमनस्कः त्वं उपाके समीपे नोस्मान्नुशन्नुषु अत्यन्तंकामयमानःसन् सुषुतस्य सुष्ठुअभिषुतंप्रतिभृतस्य संभृतं मध्वः मादकंसोमस्यसोमंनुक्षिप्रमेवपाः पिब पृष्ठ्येन पृष्ठ्यशब्देनमाध्यंदिनसवनेउद्गातृभिरुद्गीयमानंस्तोत्रमुच्यते तत्संबंधिना अंधसा पीतेनसोमेन संममदः संहृष्टोभव ॥ ४ ॥

अथपंचमी—

वियोररप्शऋषिभिर्नवेभिर्वृक्षोनपक्वःसृण्योनजेता ।
मर्योनयोषामभिमन्यमानोच्छाविवक्मिपुरुहूतमिन्द्रम् ॥५॥३॥

वि । यः । ररप्शे । ऋषिऽभिः । नवेभिः । वृक्षः । न । पक्वः ।
सृण्यः । न । जेता । मर्यः । न । योषाम् । अभि । मन्यमानः ।
अच्छ । विवक्मि । पुरुऽहूतम् । इन्द्रम् ॥ ५ ॥ ३ ॥

पक्वः पक्वफलः वृक्षोन वृक्षइव अत्रसृणिशब्दोंकुशवाची तेनायुधमात्रंलक्ष्यते सृण्यः आयुधकुशलः जेतान शत्रुविजयीवीरपुरुषइव यः नवेभिर्नवैर्नूतनैर्ऋषिभिःविररप्शे विविधंस्तूयते स्तोताहंपुरुहूतंबहुभिराहूतं तमिन्द्रमच्छाभिलक्षीकृत्य विवक्मि विशेषेणवच्मि स्तौमि तत्रदृष्टान्तः—अभिमन्यमानःमदीयेयंयोषिदित्यभिजानन्मर्योमर्त्यःयोषांन स्त्रीमिव तद्वत् ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेतृतीयोवर्गः ॥ ३ ॥

अथषष्ठी—

गि॒रिर्नयः॒स्वत॑वाँऋ॒ष्वइन्द्रः॑स॒नादे॒वसह॑सेजा॒तउ॒ग्रः ।
आद॑र्ता॒वज्रं॒स्थवि॑रं॒नभी॒मउ॒द्नेव॒कोशं॒वसु॑ना॒न्यृ॑ष्टम् ॥ ६ ॥

गि॒रिः । न । यः । स्वऽत॑वान् । ऋ॒ष्वः । इन्द्रः॑ । स॒नात् । ए॒व ।
सह॑से । जा॒तः । उ॒ग्रः । आऽद॑र्ता । वज्र॑म् । स्थवि॑रम् । न ।
भी॒मः । उ॒द्नाऽइ॑व । कोश॑म् । वसु॑ना । निऽऋ॑ष्टम् ॥ ६ ॥

गिरिर्न पर्वतइव स्वतवान्स्वयंप्रवृद्धः ऋष्वोमहान् ऋष्वइतिमहन्नाम महत् ब्रध्नः ऋष्वइतितन्नामसुपाठात् उग्रः ओजस्वी यइन्द्रः सहसेशत्रोरभिभवाय सनादेव चिरादेव जातःउत्पन्नः भीमः शत्रूणांभयंकरः सइन्द्रः उद्नेवकोशं उदकेनजलपात्रमिव वसुना तेजसा न्यृष्टं निर्गतं स्थविरंबृहत् वज्रंन वज्रंचनेतिचार्थे आदर्ता आदृतवानासीत् ॥ ६ ॥

अथसप्तमी—

नयस्य॑व॒र्ताज॒नुषा॒न्वस्ति॒नराध॑सआमरी॒ताम॒घस्य॑ ।
उ॒द्वा॒वृ॒षा॒णस्त॑विषीवउग्रा॒स्मभ्यं॑दद्धिपुरुहूतरा॒यः ॥ ७ ॥

न । यस्य॑ । व॒र्ता । ज॒नुषा॑ । नु । अस्ति॑ । न । राध॑सः ।
आ॒ऽम॒री॒ता । म॒घस्य॑ । उ॒त्ऽव॒वृ॒षा॒णः । त॒वि॒षी॒ऽव॒ः । उ॒ग्र ।
अ॒स्मभ्य॑म् । द॒द्धि । पु॒रु॒ऽहू॒त । रा॒यः ॥ ७ ॥

हेइन्द्र यस्यतव कश्चिज्जनुषाजन्मनास्वतएवनुसत्यंवर्ता वारयितानास्ति राधसः यज्ञादिकर्मणांसाधकस्यमघस्यत्वयादीयमानस्य धनस्यआमरीता कश्चिदपिनाशयितानास्ति हेतविषीवः बलवन्नुग्र तेजस्विन्न हेपुरुहूत बहुभिराहूतेन्द्र उद्वावृषाणः अभीक्ष्न्कामान्वर्षकस्त्वं रायः पश्वादिधनानि अस्मभ्यंस्तोतृभ्यःदद्धि देहि ॥ ७ ॥

अथाष्टमी–

ईक्षे॑रा॒यःक्षय॑स्यचर्षणी॒नामु॒तव्र॒जम॑पव॒र्ता॑सि॒गोना॑म् ।
शि॒क्षा॒न॒रःस॑मि॒थेषु॑प्र॒हावा॒न्वस्वो॑रा॒शिम॑भिने॒तासि॒भूरि॑म् ॥ ८ ॥

ईक्षे॑ । रा॒यः । क्षय॑स्य । च॒र्ष॒णी॒नाम् । उ॒त । व्र॒जम् । अ॒प॒ऽव॒र्ता ।
अ॒सि॒ । गोना॑म् । शि॒क्षा॒ऽन॒रः । स॒म्ऽइ॒थेषु॑ । प्र॒हाऽवा॑न् ।
वस्वः॑ । रा॒शिम् । अ॒भि॒ऽने॒ता । अ॒सि॒ । भूरि॑म् ॥ ८ ॥

हेइन्द्र त्वं चर्षणीनां प्रजानां रायोधनस्यक्षयस्य गृहस्यच ईक्षे ईक्षसे उतापिच गोनांगवांव्रजंसमूहं अपवर्ता अपवारकोसि निरोधकेभ्योऽसुरेभ्यःगवांमोचयिताभवसीत्यर्थः किंच हेइन्द्र शिक्षानरः शिक्षयानेताप्रजानांशासकः समिथेषु युद्धेषु प्रहावान्प्रहरणवांस्त्वंभूरिं प्रभूतं वस्वोधनस्यराशिंसमूहमभिनेतासि प्रापयिताचभवसि ॥ ८ ॥

अथनवमी–

कया॒तच्छृ॑ण्वे॒शच्या॒शचि॑ष्ठो॒यया॑कृ॒णोति॒मुहु॒काचि॑दृ॒ष्वः ।
पु॒रुदा॒शुषे॒विच॑यिष्ठो॒अंहोथा॑दधाति॒द्रवि॑णंजरि॒त्रे ॥ ९ ॥

कया॑ । तत् । शृ॒ण्वे॒ । शच्या॑ । शचि॑ष्ठः । यया॑ । कृ॒णोति॑ ।
मुहु॑ । का । चि॒त् । ऋ॒ष्वः । पु॒रु । दा॒शुषे॑ । वि॒ऽच॑यिष्ठः ।
अंहः॑ । अथ॑ । द॒धा॒ति॒ । द्रवि॑णम् । ज॒रि॒त्रे ॥ ९ ॥

शविष्ठः अतिशयेनप्राज्ञः तदितिलिंगव्यत्ययः तत्सइन्द्रः कयाशच्या कयाप्रज्ञया शचीतिप्रज्ञानामैतत् शृण्वे श्रूयते ऋष्वोमहानिन्द्रः मुहुर्मुहुः ययाप्रज्ञयाकाचित्कानिचित् कर्माणि कृणोति करोति सइन्द्रः दाशुषेहविर्दत्तवतेयजमानायपुरुभूयिष्ठमंहः पापं विचयिष्ठः अतिशयेननाशकोभवति अथापिच जरित्रेस्तोत्रेद्रविणंपश्वादिधनंदधातिददाति ॥ ९ ॥

Funding by IKS-MoE

अथदशमी—

मानो॑मर्धी॒राभ॑राद॒द्धितन्न॒ःप्रदा॒शुषे॒दात॑वे॒भूरि॒यत्ते॑ ।
नव्ये॑दे॒ष्णेश॒स्तेअ॒स्मिन्त॑उ॒क्थेप्रब्र॑वामव॒यमि॑न्द्रस्तु॒वन्त॑ः ॥१०॥

मा । न॒ः । म॒र्धी॒ः । आ । भ॒र॒ । द॒द्धि । तत् । न॒ः । प्र । दा॒शुषे॑ ।
दात॑वे । भूरि॑ । यत् । ते॒ । नव्ये॑ । दे॒ष्णे । श॒स्ते । अ॒स्मिन् ।
ते॒ । उ॒क्थे । प्र । ब्र॒वा॒म । व॒यम् । इ॒न्द्र॒ । स्तु॒वन्त॑ः ॥ १० ॥

हेइन्द्र त्वंनोस्मान्मामर्धीर्माहिंसीः किंतु त्वंआभर पोषकोभव हेइन्द्र तेत्वदीयं भूरि बह्वपि यद्धनं दाशुषेहविर्दत्तवतेयजमानायदातवे दातुंप्रभवतीतिशेषः नोस्मभ्यंतद्धनमाहृत्य दद्धि देहि हेइन्द्र त्वांस्तुवन्तोवयं अस्मिन्नुक्थे अस्मिन्निष्केवल्याख्यशस्त्रे तेत्वदर्थं नव्ये नूतने शस्ते प्रशस्तेदेष्णे दातव्येहविषिनिमित्तभूतेसति प्रब्रवाम प्रकर्षेणत्वांवदाम ॥ १० ॥

अथैकादशी—

नूष्टु॒तइ॑न्द्र॒नूगृ॑णा॒नइषं॑जरि॒त्रेन॒द्यो॒३॒॑नपी॑पेः ।
अका॑रितेहरिवो॒ब्रह्म॒नव्यं॑धि॒यास्या॑मर॒थ्य॑ःसदा॒साः ॥ ११ ॥ ४ ॥

नु । स्तु॒तः । इ॒न्द्र॒ । नु । गृ॒णा॒नः । इष॑म् । ज॒रि॒त्रे॑ । न॒द्य॑ः । न ।
पी॒पे॒रिति॑पीपेः । अका॑रि । ते॒ । ह॒रि॒ऽव॒ः । ब्रह्म॑ । नव्य॑म् ।
धि॒या । स्या॒म॒ । र॒थ्य॑ः । स॒दा॒ऽसाः ॥ ११ ॥ ४ ॥

पूर्वंव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेचतुर्थोवर्गः ॥ ४ ॥

आयात्विन्द्रइत्येकादशर्चमेकादशंसूक्तंवामदेवस्यार्षंत्रैष्टुभमैन्द्रं आयात्वित्यनुक्रान्तम् । पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिएतन्निविद्धानीयं सूत्रितंच—आयात्विन्द्रोवसइतिमरुत्वतीयमिति ॥

तत्रप्रथमा—

आया॒त्विन्द्रोव॑स॒उप॑नइ॒हस्तु॒तःस॑ध॒माद॑स्तु॒शूर॑ः ।
वा॒वृ॒धा॒नस्तवि॑षी॒र्यस्य॑पू॒र्वीर्द्यौर्नक्ष॒त्रम॒भिभू॑ति॒पुष्या॑त् ॥ १ ॥

आ । या॒तु॒ । इन्द्रः॑ । अव॑से । उप॑ । नः॒ । इ॒ह । स्तु॒तः ।
स॒ध॒ऽमात् । अ॒स्तु॒ । शूरः॑ । व॒ट्धा॒नः । तवि॑षीः । यस्य॑ ।
पू॒र्वीः । द्यौः । न । क्ष॒त्रम् । अ॒भिऽभू॑ति । पुष्या॑त् ॥ १ ॥

सइन्द्रः नोस्माकमवसेरक्षणायउपायातु उपागच्छतु यइन्द्रः इहास्मिन्यज्ञेस्तुतःशूरोविक्रान्तोववृधानःप्रवृद्धःअयमिन्द्रःसधमादस्तु अस्माभिःसहमाद्यन्भवतु यस्येन्द्रस्यतविषीः तविष्यः बलानिपूर्वीःपूर्व्योबहूनिसन्तीतिशेषः यश्चेन्द्रः द्यौर्न द्योतमानःसूर्यइव अभिभूति परकीयंबलमभिभावुकंक्षत्रंस्वकीयंबलं तेजोवापुष्यात् पुष्यतु सइन्द्रः उपायात्वितिपूर्वेणसंबन्धः ॥ १ ॥

अथद्वितीया–

तस्येदि॒हस्त॑वथ॒वृष्ण्या॑नितु॒विद्यु॒म्नस्य॑तु॒वि॒राध॑सो॒नॄन् ।
यस्य॒क्रतु॑र्वि॒द॒थ्यो॒३॒नस॒म्राट्सा॒ह्वान्तरु॑त्रोअ॒भ्यस्ति॑कृ॒ष्टीः ॥ २ ॥

तस्य॑ । इत् । इ॒ह । स्त॒व॒थ॒ । वृष्ण्या॑नि । तु॒वि॒ऽद्यु॒म्नस्य॑ ।
तु॒वि॒ऽराध॑सः । नॄन् । यस्य॑ । क्रतुः॑ । वि॒द॒थ्यः॑ । न । स॒म्ऽराट् ।
स॒ह्वान् । तरु॑त्रः । अ॒भि । अस्ति॑ । कृ॒ष्टीः ॥ २ ॥

तुविद्युम्नस्यबहुकीर्तेः तुविराधसः बहुधनस्य तस्येत्तस्येन्द्रस्यैव वृष्ण्यानि बलभूतान्नॄन्नेतॄन्मरुतः हेस्तोतारोयूयंइहास्मिन्यज्ञेस्तवथ स्तुत साह्वान्शत्रूनभिभावुकः तरुत्रः अस्मानापद्भ्यस्तारकः यस्येन्द्रस्यक्रतुः कर्मकृष्टीः शत्रुसंबन्धिनीप्रजाःअभ्यस्ति अभिभवति तत्रदृष्टान्तः–विदथ्योन सम्राट्विदथार्होन यज्ञार्हःसम्राट्सकललोकानामधिपतिरिव तद्वत्तस्यवृष्ण्यानीतिपूर्वेणसंबन्धः ॥ २ ॥

अथतृतीया–

आया॒त्विन्द्रो॑दि॒वआपृ॑थि॒व्याम॒क्षूसं॑मु॒द्रादु॒तवा॒पुरी॑षात् ।
स्व॑र्णरा॒दव॑सेनोम॒रुत्वा॑न्परा॒वतो॑वा॒सद॑नादृ॒तस्य॑ ॥ ३ ॥

आ । या॒तु॒ । इन्द्रः॑ । दि॒वः । आ । पृ॒थि॒व्याः । म॒क्षु । स॒मु॒द्रात् ।
उ॒त । वा॒ । पुरी॑षात् । स्वः॑ऽनरात् । अव॑से । नः॒ । म॒रुत्वा॑न् ।
प॒रा॒ऽवतः॑ । वा॒ । सद॑नात् । ऋ॒तस्य॑ ॥ ३ ॥

मरुत्वान्मरुद्भिःसहितइन्द्रः नोस्माकमवसेरक्षणायदिवः स्वर्गलोकादायातु आगच्छतु पृथिव्याः भूलोकाच्चमक्षुशीघ्रमायातु उतवा अथवा समुद्रादन्तरिक्षलोकाच्चायातु समुद्रइत्यन्तरिक्षनाम सगरः समुद्रः अध्वरइतितन्नामसुपाठात् अथवा पुरीषादुदकात् आयातु पुरीषमित्युदकनाम मधुपुरीषंपिप्पलमितितन्नामसुपाठात् स्वर्णरात् स्वरादित्यः नरोनेतायस्यतस्माल्लोकाद्वाआयातु परावतोवादूराद्वाआयातु ऋतस्योदकस्यसदनात्स्थानात्मेघलोकाद्वाआयातु ॥ ३ ॥

अथचतुर्थी–

स्थूरस्यरायोबृहतोयईशेतमुष्टवामविदथेष्विन्द्रम् ।
योवायुनाजयतिगोमतीषुप्रधृष्णुयानयतिवस्योअच्छ ॥ ४ ॥

स्थूरस्य । रायः । बृहतः । यः । ईशे । तम् । ऊँ इति ।
स्तवाम । विदथेषु । इन्द्रम् । यः । वायुना । जयति ।
गोऽमतीषु । प्र । धृष्णुऽया । नयति । वस्यः । अच्छ ॥ ४ ॥

यइन्द्रः स्थूरस्य स्थूलस्य बृहतोमहतः रायोधनस्य ईशे ईष्टे विदथेषुयज्ञेषु विदथइति यज्ञनामैतत् तमु तमिन्द्रमेववयंस्तोतारःस्तवाम यइन्द्रः वायुनाप्राणरूपेण वलेन गोमतीषु सेनासुजयतिशत्रून्विजयते धृष्णुया धृष्णुः प्रगल्भः यइन्द्रः स्तोतॄन्वस्यः वसीयः श्रेष्ठंपश्वादिधनं अच्छाभिप्रणयति प्रापयति तमेवेन्द्रंस्तवामेतिपूर्वेणसंबन्धः ॥ ४ ॥

अथपञ्चमी–

उपयोनमोनमसिस्तभायन्नियर्तिवाचंजनयन्यजध्यै ।
ऋञ्जसानःपुरुवारउकथैरेन्द्रंकृण्वीतसदनेषुहोता ॥ ५ ॥ ५ ॥

उप । यः । नमः । नमसि । स्तभायन् । इयर्ति । वाचम् ।
जनयन् । यजध्यै । ऋञ्जसानः । पुरुऽवारः । उक्थैः । आ ।
इन्द्रम् । कृण्वीत । सदनेषु । होता ॥ ५ ॥ ५ ॥

उपस्तभायन् लोकानुपस्तंभयन् यजध्यै यष्टुंवाचंगर्जितलक्षणांवाचं जनयन्प्रजनयन् ऋंजसानः प्रसाध्यमानः ऋंजतिःप्रसाधनकर्मेतियास्कः । उक्थैःशस्त्रलक्षणैःस्तोत्रैःपुरुवारः बहुभिःसंभजनीयःयइन्द्रः नमसि नमइत्यन्ननामैतत् यजमानैर्दत्तेहविषिनम्रः यजमानेभ्योयज्ञादिसाधनमन्नंइयर्तिप्रेरयति इन्द्रोहविषातृप्तःसन् वृष्टिद्वाराअन्नंप्रयच्छति तेनचान्नेनपुनर्यज्ञःप्रजायतइत्यर्थः अस्मदीयोहोतासदनेषुयज्ञगृहेषुतमिन्द्रमाकृणवीत अभिमुखीकरोतु ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेपंचमोवर्गः ॥५ ॥

अथषष्ठी—

धि॒षायदि॑धिष॒ण्यन्तः॑सर॒ण्यान्त्सद॑न्तो॒अद्रि॑मौशि॒जस्य॒गोहे॑ ।
आदु॒रोषाः॑पा॒स्त्यस्य॒होता॒योनो॑म॒हान्त्सं॒वर॑णेषु॒वह्निः॑ ॥ ६ ॥

धि॒षा । यदि॑ । धि॒ष॒ण्यन्तः॑ । स॒र॒ण्यान् । सद॑न्तः । अद्रि॑म् ।
औ॒शि॒जस्य॑ । गोहे॑ । आ । दु॒रोषाः॑ । पा॒स्त्यस्य॑ । होता॑ । यः ।
नः॒ । म॒हान् । स॒म्ऽवर॑णेषु । वह्निः॑ ॥ ६ ॥

धिषण्यन्तः धिषणामिन्द्रविषयांस्तुतिमिच्छन्तः औशिजस्य उशिजःकामयमानाऋत्विजः तेषांसंबन्धी औशिजोयजमानः तस्य गोहे गृहेसदन्तोनिषीदन्तोजनाः अद्रिं आदृणातिशत्रूनित्यद्रिरिन्द्रः तमिंद्रं धिषास्तुत्या यदि यदा सरण्यात् उपागच्छेयुः तदा सइन्द्रः आयातु नोस्माकंसंवरणेषुशत्रुसंबन्धिषुनिरोधेषुवह्निर्वोढापास्त्यस्यपस्त्येगृहेवसतायजमानेनहोता आह्वातादुरोषाःदुस्तरक्रोधःयइन्द्रः महान् प्रभूतोभवति सआयात्विति ॥ ६ ॥

अथसप्तमी—

स॒त्रायदीं॑भार्व॒रस्य॒वृष्ण॒ःसिष॑क्ति॒शुष्मः॑स्तुव॒तेभरा॑य ।
गुहा॒यदी॑मौशि॒जस्य॒गोहे॒प्रयद्धि॒येप्राय॑से॒मदा॑य ॥ ७ ॥

स॒त्रा । यत् । ई॒म् । भा॒र्व॒रस्य॑ । वृष्णः॑ । सिस॑क्ति । शुष्मः॑ ।
स्तु॒व॒ते । भरा॑य । गुहा॑ । यत् । ई॒म् । औ॒शि॒जस्य॑ । गोहे॑ ।
प्र । यत् । धि॒ये । प्र । अय॑से । मदा॑य ॥ ७ ॥

---

१ नि० ६. २१.।

Funding by IKS-MoE

भार्वरस्य भर्वरोजगद्भर्ताप्रजापतिस्तस्यपुत्रोभार्वरः तस्यवृष्णः कामानांवर्षितुः इन्द्रस्यसंबन्धोईमेषः शुष्मोबलंस्तुवतेस्तोत्रंकुर्वन्तंयजमानंसिषक्ति सेवतइतियत् सत्रासत्यमेवईमेतद्बलंऔशिजस्ययजमानस्यभरायभर्तुं गुहा गुहायां गुहारूपेहृदयेप्रभवतीतियत् तत् सत्यं यजमानस्यगोहेगृहेधियेकर्मणेप्रभवतीतियत्तत्सत्यं अयसे गमनाय कामानांप्राप्तये मदाय हर्षाय तत्र यद्बलंप्रभवतितत्सत्यं इन्द्रस्यबलंयजमानंसर्वदापालयतीत्यर्थः ॥ ७ ॥

अथाष्टमी–

वियद्वरां॑सि॒पर्व॑तस्यवृ॒ण्वेपयो॑भिर्जि॒न्वेअ॒पांजवां॑सि ।
विद॑द्गौ॒रस्य॑गव॒यस्य॒गोहे॒यदी॒वाजा॑यसु॒ध्यो॒३॒॑वह॑न्ति ॥ ८ ॥

वि । यत् । वरां॑सि । पर्व॑तस्य । वृ॒ण्वे । पय॑ःऽभिः । जि॒न्वे ।
अ॒पाम् । जवां॑सि । वि॒दत् । गौ॒रस्य॑ । ग॒व॒यस्य॑ ।
गोहे॑ । यदि॑ । वाजा॑य । सु॒ऽध्य॑ः । वह॑न्ति ॥ ८ ॥

इन्द्रः पर्वतस्यमेघस्यवरांसिद्वाराणिविवृण्वे विवृतानिकृतवानितियत् अपामुदकानांजवांसिवेगान् पयोभिर्जलैः जिन्वे प्याययतीतियत् यदियदासुध्यःशोभनकर्माणोयजमानाः वाजायान्नायवहन्तिइन्द्रंप्राप्नुवन्ति तदा गोहेगृहे गौरस्य गौरमृगस्य गवयस्य गवयमृगस्यच विदत् तौद्वौपशूलभतइतियत् तत्सर्वंसत्रेतिपूर्वेणसंबन्धः ॥ ८ ॥

अभ्युदयेष्टाविन्द्रस्यप्रदातुःभद्रातेहस्तेतियाज्या सूत्रितंच–दीर्घस्तेअस्त्वंकुशोभद्रातेहस्तासुकृतोतपाणीइति ।

सूक्तेनवमी–

भ॒द्राते॒हस्ता॒सुकृ॑तो॒तपा॒णीप्र॑य॒न्तारा॑स्तुव॒तेराध॑इन्द्र ।
काते॒निष॑त्तिः॒किमु॒नोम॑मत्सि॒किंनोदु॑दुहर्ष॑से॒दात॒वाउ॑ ॥ ९ ॥

भ॒द्रा । ते॒ । हस्ता॑ । सु॒ऽकृ॑ता । उ॒त । पा॒णी इति॑ । प्र॒ऽय॒न्तारा॑ । स्तु॒व॒ते ।
राध॑ः । इ॒न्द्र॒ । का । ते॒ । निऽस॑त्तिः । किम् । ऊँ॒ इति॑ । नो इति॑ ।
म॒म॒त्सि॒ । किम् । न । उत्ऽउ॑त् । ऊँ॒ इति॑ । ह॒र्ष॒से॒ । दात॒वै । ऊँ॒ इति॑ ॥ ९ ॥

हेइन्द्र ते त्वदीयौ भद्रा भद्रौ कल्याणौ हस्ता हस्तौ सुकृता सुकृतौ शोभनकर्माणौ भवतः उतापिच पाणी त्वदीयौहस्तौ स्तुवतेस्तोत्रेयजमानायराधोधनंप्रयन्तारा प्रयन्तारौ प्रदातारौभवतः हेइन्द्र तेत्वदीयानिषत्तिर्निसदनंस्थितिः का त्वं अस्मान्किमुकिमर्थंनोममत्सि नमादयसि किमुदु किमर्थमेवदातवै अस्माकंधनं दातुंनहर्षसे हृष्टोनभवसि उःपूरणः ॥ ९ ॥

ऐन्द्रस्यवार्त्रघ्नस्यपशोरेवावस्वइतिहविषोयाज्या सूत्रितंच—एवावस्वइन्द्रःसत्यःसम्राडचद्वाग्वदंत्यविचेतनानीति ।

सैषादशमी—

ए॒वाव॒स्व॒इन्द्रः॑स॒त्यःस॒म्राड्ढन्ता॑वृ॒त्रंवरि॑वःपू॒रवे॑कः ।
पु॒रु॑ष्टु॒त॒क्रत्वा॑नःशग्धिरा॒योभ॑क्षी॒यतेव॑सो॒दैव्य॑स्य ॥ १० ॥

ए॒व । व॒स्वः॑ । इन्द्रः॑ । स॒त्यः । स॒म्ऽराट् । हन्ता॑ । वृ॒त्रम् ।
वरि॑वः । पू॒रवे॑ । क॒रिति॑कः । पु॒रु॑ऽस्तुत । क्रत्वा॑ । न॒ः । श॒ग्धि॒ ।
रा॒यः । भ॒क्षी॒य । ते॒ । अव॑सः । दैव्य॑स्य ॥ १० ॥

एवैवमुक्तप्रकारेणस्तूयमानःसत्यः सत्यवान् वस्वोधनस्यसम्राट्ईश्वरः वृत्रं वृत्रनामानमसुरंहन्ता हिंसिता इन्द्रः पूरवे मनुष्याय यजमानायवरिवोधनंकः करोति ददातीत्यर्थः क्रत्वा कर्मणास्तुतिहेतुना हेपुरुष्टुत बहुभिर्यजमानैःस्तुतेन्द्र त्वंनोस्मभ्यंरायोधनानिशग्धि देहि ते त्वयादीयमानस्यदैव्यस्यदेवसंबन्धिनः अवसोन्नस्य कर्मणिषष्ठी अन्नंभक्षीय अहंभजेयम्॥१०॥

अथैकादशी—

नू॒ष्टु॒तइ॑न्द्र॒नूगृ॑णा॒नइषं॑जरि॒त्रेन॒द्यो॒३॒नपी॑पेः ।
अका॑रितेहरिवो॒ब्रह्म॒नव्यं॑धि॒यास्या॑मर॒थ्यः॑सदा॒साः ॥ ११ ॥ ६ ॥

नु । स्तु॒तः । इ॒न्द्र॒ । नु । गृ॒णा॒नः । इष॑म् । ज॒रि॒त्रे । न॒द्यः॑ । न ।
पी॒पे॒रिति॑पीपेः । अका॑रि । ते॒ । ह॒रि॒ऽव॒ः । ब्रह्म॑ । नव्य॑म् । धि॒या ।
स्या॒म॒ । र॒थ्यः॑ । स॒दा॒ऽसाः ॥ ११ ॥ ६ ॥

पूर्वंव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेषष्ठोवर्गः ॥ ६

॥ इतिचतुर्थेमंडलेद्वितीयोनुवाकः ॥ २ ॥

तृतीयेनुवाकेएकादशसूक्तानि तत्रयन्नइन्द्रइत्येकादशर्चंप्रथमंसूक्तं वामदेवस्यार्षंत्रैष्टुभमैन्द्रं यन्नइत्यनुक्रमणिका पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिमाध्यंदिनसवनेमैत्रावरुणशस्त्रेद्वितीयमिदंसंपातसूक्तं, सूत्रितंच—एवात्वामिन्द्रयन्नइन्द्रइति ।

तत्रप्रथमा—

यन्न॒इन्द्रो॑जुजु॒षेयच्च॒वष्टि॒तन्नो॑म॒हान्क॑रतिशु॒ष्म्याचि॑त् ।
ब्रह्म॒स्तोमं॑म॒घवा॒सोम॑मु॒क्थायोअश्मा॑नं॒शव॑सा॒बिभ्र॒देति॑ ॥ १ ॥

यत् । नः॒ । इन्द्रः॑ । जु॒जु॒षे । यत् । च॒ । वष्टि॑ । तत् । नः॒ ।
म॒हान् । क॒र॒ति॒ । शु॒ष्मी । आ । चि॒त् । ब्रह्म॑ । स्तोम॑म् । म॒घ॒ऽवा॑ ।
सोम॑म् । उ॒क्था । यः । अश्मा॑नम् । शव॑सा । बिभ्र॑त् । एति॑ ॥ १ ॥

इन्द्रः नोस्मदीयंयद्धविर्लक्षणान्नादिकंजुजुषे सेवते यच्च हविरादिकंवष्टिकामयते महान्प्रभूतः शुष्मीबलवानिन्द्रः चिदितिचार्थे ब्रह्मचित् हविर्लक्षणपुरोडाशादिकमन्नंच स्तोमंस्तोत्रसमूहंच सोममभिषुतंसोमंच उक्था उक्थानिशस्त्राणिचेत्येवंभूतंतद्ब्रह्मादिचतुष्टयं आकरति आकरोतु स्वीकरोतु मघवा धनवान् अत्रअश्मशब्दोवज्रवाची अश्मानंवज्रंबिभ्रत् धारयन् शवसाबलेनयुक्तोयइन्द्रः एतिआगच्छति सइन्द्रःस्वीकरोत्वितिपूर्वेणसंबन्धः ॥ १ ॥

अथद्वितीया—

वृषा॒वृषं॑धिं॒चतु॑रश्रि॒मस्य॑न्नु॒ग्रोबा॒हुभ्यां॒नृत॑मः॒शची॑वान् ।
श्रि॒येपरु॑ष्णीमु॒षमा॑ण॒ऊर्णा॒यस्याः॒पर्वा॑णिस॒ख्याय॑वि॒व्ये ॥ २ ॥

वृषा॑ । वृष॑न्धिम् । चतुः॑ऽअश्रिम् । अस्य॑न् । उ॒ग्रः । बा॒हुऽभ्या॑म् ।
नृऽत॑मः । शची॑ऽवान् । श्रि॒ये । परु॑ष्णीम् । उ॒षमा॑णः ।
ऊर्णा॑म् । यस्याः॑ । पर्वा॑णि । स॒ख्याय॑ । वि॒व्ये ॥ २ ॥

वृषा कामानांवर्षिता वृषंधिं मेघभेदनद्वारेणवर्षंकुर्वंतं चतुरश्रिंचतसृभिरश्रिभिर्धाराभिरुपेतंवज्रंबाहुभ्यामस्यन् शत्रुषुप्रक्षिपन् उग्रउद्गूर्णबलः नृतमोनेतृतमः शचीवान्कर्मवानिन्द्रः ऊर्णामाच्छादिकां परुष्णीं पर्ववतींनदींश्रिये आश्रयणार्थं उषमाणः सेवमानोभवति यस्याः नद्याः पर्वाणिभिन्नान्देशान् सख्यायसखिकर्मणेविव्ये संवृतवान् ॥ २ ॥

अथतृतीया—

योदे॒वोदे॒वत॑मो॒जाय॑मानोम॒होवाजे॑भिर्म॒हद्भि॑श्च॒शुष्मैः॑ ।
दधा॑नो॒वज्रं॑बा॒ह्वोरु॒शन्तं॒द्याममे॑नरेजय॒त्प्रभूम॑ ॥ ३ ॥

यः । दे॒वः । दे॒वऽत॑मः । जाय॑मानः । म॒हः । वाजे॑भिः । म॒हत्ऽभिः॑ ।
च॒ । शुष्मैः॑ । दधा॑नः । वज्र॑म् । बा॒ह्वोः । उ॒शन्त॑म् । द्याम् ।
अमे॑न । रे॒ज॒य॒त् । प्र । भूम॑ ॥ ३ ॥

देवोदीप्यमानः देवतमोदातृतमः जायमानः उत्पद्यमानः यइन्द्रः महोमहद्भिर्वाजेभिरन्नैर्महद्भिः शुष्मैर्बलैश्चयुक्तोभवदितिशेषः सइन्द्रः बाह्वोर्हस्तयोः उशंतंकामयमानंवज्रंदधानोधारयन् अमेनबलेनद्यांद्युलोकंचभूम भूलोकंच प्ररेजयत् प्रकंपयतिस्म ॥ ३ ॥

अथचतुर्थी—

विश्वा॒रोधां॑सिप्र॒वत॑श्चपू॒र्वीर्द्यौर्ऋ॒ष्वाज्जनि॑मन्नेजत॒क्षाः ।
आमा॒तरा॒भर॑तिशु॒ष्म्यागोर्नृ॒वत्परि॑ज्मन्नोनुवन्त॒वाताः॑ ॥ ४ ॥

विश्वा॑ । रोधां॑सि । प्र॒ऽवतः॑ । च॒ । पू॒र्वीः । द्यौः । ऋ॒ष्वात् ।
जनि॑मन् । रे॒ज॒त॒ । क्षाः । आ । मा॒तरा॑ । भर॑ति । शु॒ष्मी । आ ।
गोः । नृ॒ऽवत् । परि॑ऽज्मन् । नो॒नु॒व॒न्त॒ । वाताः॑ ॥ ४ ॥

विश्वा विश्वानि रोधांसि रोधःशब्देनउन्नतप्रदेशाउच्यन्ते उन्नतप्रदेशाः पर्वताश्च पूर्वीः पूर्व्यः बहूनि प्रवतः प्रवणानि समुद्राश्चेत्यर्थः द्यौर्द्युलोकश्च क्षाः पृथिवीच जनिमन्निन्द्रस्यजन्मनिसति ऋष्वात् महतोस्मादिन्द्रात् रेजत अरेजंत अकंपन्त किंच शुष्मीबलवानिन्द्रः गोर्गन्तुःसूर्यस्यमातरामातरौमातापितृभूतौद्यावापृथिव्यौच आइतिचार्थे आभरति आसमन्ताद्बिभर्ति नृवन्मनुष्याइववाताः इन्द्रेण प्रेरितावायवश्च परिज्मन्नंतरिक्षेनोनुवन्तः शब्दायन्ते ॥ ४ ॥

अथपंचमी—

तानूत॑इन्द्रमह॒तोम॒हानि॒विश्वे॒ष्वित्सव॑नेषुप्र॒वाच्या॑ ।
यच्छू॑रधृष्णोधृष॒ताद॑धृ॒ष्वानाहिं॑वज्रे॑ण॒शव॒साविवे॑षीः ॥ ५ ॥ ७ ॥

Funding by IKS-MoE

ता । तु । ते । इन्द्र । महतः । महानि । विश्वेषु । इत् । सवनेषु ।
प्रऽवाच्या । यत् । शूर । धृष्णो इति । धृषता । दधृष्वान् ।
अहिम् । वज्रेण । शवसा । अविवेषीः ॥ ५ ॥ ७ ॥

हेइन्द्र महतःप्रभूतस्यतेत्वदीयानि ता तानि कर्माणि तु क्षिप्रं महानि महांतिभवंति कीदृशानितानि विश्वेष्वित् सर्वेष्वेवसवनेषुप्रातःसवनादिकर्मसु त्वदीयानिप्रवाच्या प्रवाच्यानि स्तोतृभिःप्रकर्षेणवक्तुंयोग्यानिस्तुत्यानीतियत् हेधृष्णो प्रगल्भ हेशूर विक्रान्तेन्द्र दधृष्वान् पालकत्वेनलोकान्धारयन् शवसाबलेनयुक्तस्त्वंधृषताधर्षकेणवज्रेण अहिं वृत्रमसुरंअविवेषीः अवधीरितियत् एतदादीनिकर्माणिमहान्तीतिपूर्वेणसंबन्धः अत्रअविवेषीरितिवधकर्मा ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेसप्तमोवर्गः ॥ ७ ॥

अथषष्ठी–

तातूतेसत्यातुविनृम्णविश्वाप्रधेनवःसिस्रतेवृष्णऊध्नः ।
अधाहत्वद्वृषमणोभियानाःप्रसिन्धवोजवसाचक्रमन्त ॥ ६ ॥

ता । तु । ते । सत्या । तुविऽनृम्ण । विश्वा । प्र । धेनवः । सिस्रते ।
वृष्णः । ऊध्नः । अध । ह । त्वत् । वृषऽमनः । भियानाः ।
प्र । सिन्धवः । जवसा । चक्रमन्त ॥ ६ ॥

हेतुविनृम्ण अधिकबलेन्द्र तेत्वदीयानि विश्वा विश्वानि ता तानि कर्माणि तु क्षिप्रं सत्या सत्यानिभवन्ति हेइन्द्र वृष्णःकामानांवर्षितुस्त्वत्तोभयात् धेनवोगावः ऊध्नः स्वकीयादापीनात्प्रसिस्रते प्रकर्षेणक्षीरंक्षरन्ति अधापिच हेवृषमनः कामानांवृषणपरमनस्केन्द्र सिन्धवो नद्यः त्वत्त्वत्तोभियानाः बिभ्यत्यःसत्यः जवसावेगेनप्रचक्रमन्तह प्रकर्षेणगच्छन्तिखलु ॥ ६ ॥

अथसप्तमी–

अत्राहतेहरिवस्ताउदेवीरवोभिरिन्द्रस्तवन्तस्वसारः ।
यत्सीमनुप्रमुचोबद्बधानादीर्घामनुप्रसितिंस्यन्दयध्यै ॥ ७ ॥

अत्र॑ । अह॑ । ते॒ । ह॒रि॒ऽव॒ः । ताः । ऊँ॒ इति॑ । दे॒वीः । अवः॑ऽभिः ।
इ॒न्द्र॒ । स्र॒व॒न्त॒ । स्वसा॑रः । यत् । सी॒म् । अनु॑ । प्र । मु॒चः ।
ब॒द्ध॒धा॒नाः । दी॒र्घाम् । अनु॑ । प्रऽसि॑तिम् । स्य॒न्द॒यध्यै॑ ॥ ७ ॥

हेइन्द्र त्वं यद्यदाबद्धधानाः वृत्रेणवध्यमानाः सीमनु एनानदीरुद्दिश्य दीर्घामत्यधिकां प्रसितिं बंधनं अनुस्यंदयध्यै यथाकामंस्यंदितुंप्रमुचः प्रकर्षेणमोचयः हेहरिवः हरिवन्निन्द्र अत्राह अत्रैवमोचनवेलायां ताउ ताःप्रसिद्धाएव देवीःदेव्यः द्योतमानाः स्वसारोनद्यः अत्रस्वसृशब्दोनदीवाची अवोभिस्त्वत्कृतैरक्षणैः तेत्वांस्तवन्त स्तावयन्ति नदीपूरणादिभिःकर्मभिः जनाइन्द्रंस्तुवन्तीत्यर्थः ॥ ७ ॥

अथाष्टमी—

पिपी॒ळेअं॒शुर्म॑द्यो॒नसिन्धु॒रात्वा॒शमी॑शशमा॒नस्य॑श॒क्तिः ।
अ॒स्म॒द्र्य॑क्शुशुचा॒नस्य॑यम्याआ॒शुर्न॑र॒श्मिंतु॒व्योज॑सं॒गोः ॥ ८ ॥

पि॒पी॒ळे । अं॒शुः । मद्यः॑ । न । सिन्धुः॑ । आ । त्वा॒ । शमी॑ ।
श॒श॒मा॒नस्य॑ । श॒क्तिः । अ॒स्म॒द्र्य॑क् । शु॒शु॒चा॒नस्य॑ । य॒म्याः॒ ।
आ॒शुः । न । र॒श्मिम् । तु॒वि॒ऽओज॑सम् । गोः ॥ ८ ॥

हेइन्द्र मद्योमादयिता अंशुः सोमः पिपीळेऽपीड्यत अभ्यसूयतइत्यर्थः नेतिसंप्रत्यर्थे नइदानींसिन्धुःस्यंदमानः सोमः त्वा त्वां आयम्याः आयच्छतु शुशुचानस्यदीप्यमानस्यशशमानस्यस्तुवतःसंबंधि अस्मद्र्यक् अस्मदभिमुखं शमी शमनं शक्तिः स्तुतिकर्मच आयच्छतु तत्रदृष्टान्तः—आशुःशीघ्रगामीयन्तागोर्गन्तुःअश्वस्यतुव्योजसं बहुबलंदृढमित्यर्थः रश्मिंन अश्वबन्धनरज्जुमिव तद्वत् ॥ ८ ॥

अथनवमी—

अ॒स्मेवर्षि॑ष्ठाकृ॒णु॒हि॒ज्येष्ठा॑नृ॒म्णानि॑स॒त्रासं॑हु॒रे॒सहां॑सि ।
अ॒स्मभ्यं॑वृ॒त्रासु॒हना॑निर॒न्धिज॒हिवधो॑व॒नु॒षो॒मर्त्य॑स्य ॥ ९ ॥

अ॒स्मे इति॑ । वर्षि॑ष्ठा । कृ॒णु॒हि॒ । ज्येष्ठा॑ । नृ॒म्णानि॑ । स॒त्रा ।
स॒हु॒रे॒ । सहां॑सि । अ॒स्मभ्य॑म् । वृ॒त्रा । सु॒ऽहना॑नि । र॒न्धि॒ । ज॒हि ।
वधः॑ । व॒नुषः॑ । मर्त्य॑स्य ॥ ९ ॥

हेसहुरे सहनशीलेन्द्र त्वंसत्रा सर्वदा सहांसि शत्रूनभिभावुकानिवर्षिष्ठा वर्षिष्ठानि प्रवृद्धानि ज्येष्ठा ज्येष्ठानि प्रशस्तानिनृम्णानिबलानि अस्मे अस्मभ्यं कृणुहि कुरु हेइन्द्र त्वं अस्मभ्यंसुहनानि शोभनवधानि वृत्रा वृत्राणि शत्रूंत्रंधि रंधय वशंनय किंच वनुषोहिंसकस्यमर्त्यस्यमरणशीलस्यशत्रोःसंबन्धिवधःहननसाधनमायुधं जहि नाशय ॥ ९ ॥

अथदशमी–

अस्माकमित्सुशृंणुहित्वमिन्द्रास्मभ्यंश्चित्राँउपंमाहिवाजांन् ।
अस्मभ्यंविश्वांइषणःपुरंन्धीरस्माकंसुमंघवन्बोधिगोदाः ॥ १० ॥

अस्माकंम् । इत् । सु । शृणुहि । त्वम् । इन्द्र । अस्मभ्यंम् । चित्रान् ।
उपं । माहि । वाजांन् । अस्मभ्यंम् । विश्वांः । इषणः । पुरंम्ऽधीः ।
अस्माकंम् । सु । मघऽवन् । बोधि । गोऽदाः ॥ १० ॥

हेइन्द्र त्वं अस्माकमित् अस्मदीयाएवस्तुतीः सु सुष्ठु शृणुहि तथा हेइन्द्र त्वं चित्रान् चायनीयानिवाजानन्नानि अस्मभ्यं उपमाहि देहि किंच अस्मभ्यं विश्वाःसर्वाःपुरंधीर्बुद्धीः इषणः प्रेरय अपिच हेमघवन् धनवन्निन्द्र अस्माकं गोदाः गवांदाता सु सुष्ठु बोधि भव ॥ १० ॥

अथैकादशी–

नूष्टुतइंन्द्रनूगृंणानइषंजरित्रेनद्यो३नपींपेः ।
अकांरितेहरिवोब्रह्मनव्यंधियास्यांमरथ्यंःसदासाः ॥ ११ ॥ ८ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषंम् । जरित्रे । नद्यः । न ।
पीपेरितिपीपेः । अकांरि । ते । हरिऽवः । ब्रह्म । नव्यंम् । धिया ।
स्याम । रथ्यंः । सदाऽसाः ॥ ११ ॥ ८ ॥

पूर्वव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेष्टमोवर्गः ॥ ८ ॥

कथामहामित्येकादशर्चंद्वितीयंसूक्तं वामदेवस्यार्षंत्रैष्टुभमैन्द्रं ऋतस्यहीत्याद्यास्तिस्रः पक्षेऋतदेवताकाः तथाचानुक्रान्तं–कथोपान्त्यास्तिस्रऋतदेव्योवेति । आभिप्लविकेहनिदशरात्रे

प्रथमेहनिमाध्यंदिनसवनेमैत्रावरुणशस्त्रे अहीनसूक्तस्यस्थानेइदंतृतीयंसंपातसूक्तं सूत्रितंच-कथामहामिन्द्रःपूर्भिद्यएकइदिति । महाव्रतेनिष्केवल्येएतत्तथैवपंचमारण्यकेशौनकेनसूत्रितं—कथामहामवृधत्कस्यहोतुरितिसंपातइति ।

तत्रप्रथमा—

क॒थाम॒हाम॑वृध॒त्कस्य॒होतु॑र्य॒ज्ञंजु॑षा॒णोअ॒भिसोम॒मूध॑ः ।
पिब॑न्नुशा॒नोजु॒षमा॑णो॒अन्धो॑वव॒क्षऋ॒ष्वःशुच॒॑तेधना॑य ॥ १ ॥

क॒था । म॒हाम् । अ॒वृ॒ध॒त् । कस्य॑ । होतु॑ः । य॒ज्ञम् । जु॒षा॒णः ।
अ॒भि । सोम॑म् । ऊध॑ः । पिब॑न् । उ॒शा॒नः । जु॒षमा॑णः । अन्ध॑ः ।
व॒व॒क्षे । ऋ॒ष्वः । शु॒च॒ते । धना॑य ॥ १ ॥

महां महांतं गुणैःप्रवृद्धमिन्द्रं कथा कथंकेनप्रकारेण अवृधत् वर्धयेत अस्मत्प्रेरितास्तुतिरितिशेषः तस्यमहिम्नोतिमहत्त्वादितिभावः सएवेन्द्रः होतुः होमनिष्पादकस्यकस्य यजमानस्ययज्ञंयागंजुषाणः प्रीयमाणःसन् अभिगच्छेदितिशेषः उपसर्गश्रुतेरुचितक्रियाध्याहारः किंच ऊधः उद्धतमतिप्रवृद्धं सोममन्धः सोमलक्षणमन्नंपिबन्नास्वादयन् उशानस्तदेवान्नंकामयमानः जुषाणः सेवमानश्च ऋष्वोमहानिन्द्रः शुचतेप्रदीप्तायधनायहिरण्यादिलक्षणाय उक्तलक्षणंधनंकस्मैयजमानायदातुंववक्षेवहति पीतमेवान्नंजठरेधारयति अनेनवाक्यद्वयेनेन्द्रस्याचिन्त्यचरितत्वंख्यापितंभवति ॥ १ ॥

अथद्वितीया—

कोअ॑स्यवी॒रःस॑ध॒माद॑माप॒समा॑नंशसुम॒तिभि॒ःकोअ॑स्य ।
कद॑स्यचि॒त्रंचि॑किते॒कदू॒तीवृ॒धेभु॑वच्छशमा॒नस्य॒यज्यो॑ः ॥ २ ॥

कः । अ॒स्य॒ । वी॒रः । स॒ध॒ऽमाद॑म् । आ॒प॒ । सम् । आ॒नं॒श॒ ।
सु॒म॒तिऽभि॑ः । कः । अ॒स्य॒ । कत् । अ॒स्य॒ । चि॒त्रम् । चि॒कि॒ते॒ ।
कत् । ऊ॒ती । वृ॒धे । भु॒व॒त् । श॒श॒मा॒नस्य॑ । यज्यो॑ः ॥ २ ॥

Funding by IKS-MoE

अस्येन्द्रस्यसंबन्धिनंसधमादं सहमाद्यन्तेअस्मिन्निितिसधमादःसंग्रामः तं सहसोमपानं वा वीरः स्तोत्राणाममित्राणांवावारयिताकःपुमानाप प्राप्नोति कश्चेन्द्रस्यसुमतिभिः शोभनाभिरनुग्रहबुद्धिभिः स्मानंश संगच्छते कत्कदावास्येन्द्रस्यचित्रंचायनीयंधनंचिकिते प्रज्ञायते तत्प्रदानसमयंनकोपिजानातीत्यर्थः कत्कदावा शशमानस्यस्तुवतः यज्योर्यष्टुर्यजमानस्यवृधेवर्धनाय ऊती ऊत्यारक्षया भुवत् भवेत् ॥ २ ॥

अथतृतीया–

क॒थाश्रृ॑णोतिहू॒यमा॑न॒मिन्द्रः॑क॒थाश्रृ॒ण्वन्नव॑सामस्यवेद ।
काअ॑स्यपू॒र्वीरु॒प॑मातयोहक॒थैन॑माहु॒ःपपु॑रिंजरि॒त्रे ॥ ३ ॥

क॒था । श्रृ॒णो॒ति॒ । हू॒यमा॑नम् । इन्द्रः॑ । क॒था । श्रृ॒ण्वन् ।
अव॑साम् । अ॒स्य॒ । वे॒द॒ । काः । अ॒स्य॒ । पू॒र्वीः॑ । उप॑ऽमातयः ।
ह॒ । क॒था । ए॒न॒म् । आ॒हु॒ः । पपु॑रिम् । ज॒रि॒त्रे ॥ ३ ॥

इन्द्रः परमैश्वर्ययुक्तः हूयमानं आह्वयन्तं स्तोतारं कथा कथंश्रृणोति स्तोत्राणिश्रृण्वन् अस्यस्तोतुःसंबन्धीनि अवसांरक्षणानिकथा कथंच वेद वेत्ति पूर्वीःपुरातनानिअस्येन्द्रस्यसंबन्धीनि उपमातयोदानानि काहकानि सन्तीतिशेषः तानिदानानि जरित्रे स्तोतुः संबंधिनां कामानांपपुरिं पूरयितारमेनमिन्द्रंकथाकथंचाहुः वदन्ति ॥ ३ ॥

अथचतुर्थी–

क॒थास॒बाधः॑शशमा॒नोअ॑स्य॒नश॑द॒भिद्रवि॑ण॒ंदीध्या॑नः ।
दे॒वोभु॑व॒न्नवे॑दामऋ॒ताना॒ंनमो॑जगृ॒भ्वाँअ॒भियज्जुजो॑षत् ॥ ४ ॥

क॒था । स॒ऽबाधः॑ । श॒श॒मा॒नः । अ॒स्य॒ । नश॑त् । अ॒भि ।
द्रवि॑णम् । दीध्या॑नः । दे॒वः । भु॒व॒त् । नवे॑दाः । मे॒ । ऋ॒ताना॑म् ।
नमः॑ । ज॒गृ॒भ्वान् । अ॒भि । यत् । जुजो॑षत् ॥ ४ ॥

सबाधः सपत्नानांपीडासहितः शशमानः इन्द्रविषयांस्तुतिंकुर्वन् दीध्यानः कर्मभिर्दीप्यमानोयजमानः अस्येन्द्रस्यसंबन्धि द्रविणं पश्वादिधनं कथा कथमभिनशत् अभिप्राप्नोति

नमः हविर्लक्षणमन्नंजगृभ्वान्गृहीतवानिन्द्रः यद्यदाभिजुजोषत् मामभिसेवेत तदादेवोदीप्यमानइन्द्रः मेमदीयानामृतानांस्तोत्राणांनवेदाः अतिशयेनज्ञाताभुवत् भवेत् अत्रनिपातस्थोनकारोतिशयवाची ॥ ४ ॥

अथपंचमी–

कथाकदस्याउषसोव्युंष्टौदेवोमर्तस्यसख्यंजुंजोष ।
कथाकदंस्यसख्यंसखिंभ्योयेअंस्मिन्कामंसुयुजंततस्रे ॥५॥९॥

कथा । कत् । अस्याः । उषसः । विऽउंष्टौ । देवः । मर्तस्य ।
सख्यम् । जुजोष । कथा । कत् । अस्य । सख्यम् । सखिंऽभ्यः ।
ये । अस्मिन् । कामम् । सुऽयुजंम् । ततस्रे ॥ ५ ॥ ९ ॥

देवोद्योतमानइन्द्रः अस्याउषसोव्युष्टौप्रभातेमर्तस्यमनुष्यस्यस्तोतुः संबन्धिसख्यंसखिकर्मकथाकथंकेनप्रकारेणकत्कदाजुजोष सेवेत येस्तोतारः अस्मिन्निन्द्रेसुयुजं सुष्ठुप्रयुज्यमानं कामंकमनीयंहविःस्तोत्रंच ततस्रे वितेनिरे अस्येन्द्रस्यसख्यं सखिकर्मसखिभ्यःस्तोतृभ्यःकथाकथं कत्कदाभवेदितिशेषः ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेनवमोवर्गः ॥ ९ ॥

अथषष्ठी–

किमादमंत्रंसख्यंसखिंभ्यःकदानुतेभ्रात्रंप्रब्रंवाम ।
श्रियेसुदृशोवपुंरस्यसर्गाःस्व१र्णचित्रतंममिषआगोः ॥ ६ ॥

किम् । आत् । अमंत्रम् । सख्यम् । सखिंऽभ्यः । कदा । नु । ते ।
भ्रात्रम् । प्र । ब्रवाम । श्रिये । सुऽदृशंः । वपुंः । अस्य ।
सर्गाः । स्वंः । न । चित्रऽतंमम् । इषे । आ । गोः ॥ ६ ॥

हेइन्द्र वयं यजमानाः तेत्वदीयं अमत्रं शत्रूनभिभावुकंसख्यं सखिकर्म सखिभ्यःस्तोतृभ्यः किमात् किंस्वित् प्रब्रवाम प्रकर्षेणवदेम तेत्वदीयंभ्रात्रं भ्रातृकर्मंच कदानु कदाखलु प्रब्रवाम सुदृशः शोभनदर्शनस्यास्येन्द्रस्यसंबन्धिनः सर्गाःउद्योगाः श्रिये सर्वेषांस्तोतॄणांश्रेयसे भवन्तीतिशेषः स्वर्ण सूर्योयथादर्शनीयतमः तथागोर्गन्तुरिन्द्रस्यचित्रतमंदर्शनीयतमं वपुः शरीरं एषे आसमन्तात्सर्वैरिष्यते ॥ ६ ॥

Funding by IKS-MoE

अथसप्तमी–

द्रुहंजिघांसन्ध्वरसमनिन्द्रान्तेतिक्तेतिग्मातुजसेअनीका ॥
ऋणाचिद्यत्रऋणयानउग्रोदूरेअज्ञाताउषसोबबाधे ॥ ७ ॥

द्रुहम् । जिघांसन् । ध्वरसम् । अनिन्द्राम् । तेतिक्ते । तिग्मा ।
तुजसे । अनीका । ऋणा । चित् । यत्र । ऋणऽयाः । नः ।
उग्रः । दूरे । अज्ञाताः । उषसः । बबाधे ॥ ७ ॥

अयमिन्द्रः द्रुहं द्रोहंकुर्वन्तीं ध्वरसं हिंसिकां अनिन्द्रामिन्द्रमजानतींराक्षसींजिघांसन् हन्तुमिच्छन् तिग्मा तिग्मानि पूर्वमेवतीक्ष्णानि अनीका अनीकान्यायुधानि तुजसे तद्वधाय तेतिक्ते अत्यर्थंतीक्ष्णीकरोति यत्रयासूषःसु तदुपलक्षितेष्वहःसु ऋणाचित् ऋणान्यपि नोस्मान्बाधन्तइतिशेषः ताउषसश्च उग्रउद्गूर्णबलः ऋणयाः ऋणस्यहन्तेन्द्रः यातिर्वधकर्मा दूरेअज्ञाताः अननुभूताःसतीर्बबाधेअपीडयत् ॥ ७ ॥

ऋतपेयनाम्न्येकाहेमरुत्वतीयनिष्केवल्यशस्त्रयोर्निविद्धानात्पुरस्तात्ऋतस्यहीत्येतदादिके द्वे ऋचौक्रमेणशंसनीये सूत्रितंच–ऋतस्यहिशुरुधःसन्तिपूर्वीरितिसूक्तमुखीयेइति ।

सूक्तेष्टमी–

ऋतस्यहिशुरुधःसन्तिपूर्वीऋतस्यधीतिर्वृजिनानिहन्ति ।
ऋतस्यश्लोकोबधिरातर्दकर्णाबुधानःशुचमानआयोः ॥ ८ ॥

ऋतस्य । हि । शुरुधः । सन्ति । पूर्वीः । ऋतस्य । धीतिः ।
वृजिनानि । हन्ति । ऋतस्य । श्लोकः । बधिरा । ततर्द ।
कर्णा । बुधानः । शुचमानः । आयोः ॥ ८ ॥

अत्र ऋतशब्देनेंद्रोवादित्योवासत्यंवायज्ञोवाउच्यते ऋतस्य ऋतदेवस्य संबन्धिन्यःपूर्वीर्बह्वयःशुरुधः आपः सन्तिहि भवन्तिखलु ऋतस्य ऋतदेवस्यसंबन्धिनीधीतिःप्रज्ञा तद्विषयास्तुतिर्वा वृजिनानिवर्जनीयानिपापानि हन्ति हिनस्ति ऋतस्य ऋतदेवस्यसंबन्धीश्लोकः स्तुतिरूपावाक् आयोर्गन्तुर्मनुष्यस्यसंबन्धिनौ बधिरा बधिरौ कर्णा कर्णौ ततर्द तृणत्ति कीदृशः श्लोकःबुधानोबुध्यमानः शुचमानोदीप्यमानः ॥ ८ ॥

अथनवमी—

ऋ॒तस्य॑दृ॒ळ्हाध॒रुणा॑निसन्तिपु॒रूणि॑च॒न्द्रावपु॑षे॒वपूं॑षि ॥
ऋ॒तेन॑दी॒र्घमि॑षणन्त॒पृक्ष॑ऋ॒तेन॒गाव॑ऋ॒तमावि॑वेशुः ॥ ९ ॥

ऋ॒तस्य॑ । दृ॒ळ्हा । ध॒रुणा॑नि । स॒न्ति॒ । पु॒रूणि॑ । च॒न्द्रा । वपु॑षे ।
वपूं॑षि । ऋ॒तेन॑ । दी॒र्घम् । इ॒ष॒ण॒न्त॒ । पृक्षः॑ । ऋ॒तेन॑ । गावः॑ । ऋ॒तम् ।
आ । वि॒वे॒शुः॒ ॥ ९ ॥

वपुषेवपुष्मतः षष्ठ्यर्थेंचतुर्थी ऋतस्य ऋतदेवस्यसंबन्धीनिदृळ्हा दृढानि धरुणानि धारकाणि पुरूणि बहूनि चन्द्रा चन्द्राणिआह्लादकानि वपूंषि रूपाणि सन्ति भवन्ति ऋतेनऋतदेवेन दीर्घमत्यधिकंपृक्षः अन्नं इषणन्त स्तोतारइच्छन्ति ऋतेनऋतदेवेनगावोधेनवःऋतंयज्ञंदक्षिणात्वेनआविवेशुः प्रविशन्ति यद्वा गावोरश्मयः ऋतमुदकमाविवेशुः॥ ९ ॥

अथदशमी—

ऋ॒तंये॑मा॒नऋ॒तमिद्व॑नोत्यृ॒तस्य॒शुष्म॑स्तुर॒याउ॑ग॒व्युः ।
ऋ॒ताय॑पृ॒थ्वीब॑हु॒लेग॑भी॒रेऋ॒ताय॑धे॒नूप॑र॒मेदु॑हाते ॥ १० ॥

ऋ॒तम् । ये॒मा॒नः । ऋ॒तम् । इत् । व॒नो॒ति॒ । ऋ॒तस्य॑ । शुष्मः॑ ।
तु॒र॒ऽयाः । ऊँ॒ इति॑ । ग॒व्युः । ऋ॒ताय॑ । पृ॒थ्वी इति॑ । ब॒हु॒ले इति॑ ।
ग॒भी॒रे इति॑ । ऋ॒ताय॑ । धे॒नू इति॑ । प॒र॒मे इति॑ । दु॒हा॒ते॒ इति॑ ॥ १० ॥

ऋतं ऋतदेवं येमानोनियच्छन्स्तुतिभिर्वशीकुर्वन्स्तोताऋतमित् ऋतदेवमेववनोति संभजते ऋतस्य ऋतदेवस्यसंबन्धिशुष्मोबलंतुरयाः तूर्णंगव्युः उइतिचार्थे जलकामश्चभवति बहुलेविस्तीर्णे गभीरे दुरवगाहे पृथ्वी द्यावापृथिव्यौ ऋताय ऋतदेवायभवतः धेनूप्रीणयित्र्यौ परमेउत्कृष्टे द्यावापृथिव्यौ ऋतायऋतदेवायैवदुहाते दोहनंकुर्वाते ॥ १० ॥

अथैकादशी—

नूष्टु॒तइ॑न्द्र॒नूगृ॑णा॒नइषं॑जरि॒त्रेन॒द्यो॒३॒॑नपी॑पेः ।
अका॑रितेहरिवो॒ब्रह्म॒नव्यं॑धि॒यास्या॑मर॒थ्यः॑सदा॒साः ॥ ११ ॥

नु । स्तु॒तः । इ॒न्द्र॒ । नु । गृ॒णा॒नः । इषं॑म् । ज॒रि॒त्रे । न॒द्यः॑ । न ।
पी॒पे॒रिति॑पीपेः । अका॑रि । ते॒ । ह॒रि॒ऽव॒ः । ब्रह्म॑ । नव्य॑म् । धि॒या ।
स्या॒म॒ । र॒थ्यः॑ । स॒दा॒ऽसाः ॥ ११ ॥ १० ॥

पूर्वव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेदशमोवर्गः ॥ १० ॥

कासुष्टुतिरित्येकादशर्चंतृतीयंसूक्तंवामदेवस्यार्षंऐन्द्रं दशमीअनुष्टुप् शिष्टास्त्रिष्टुभः तथाचानुक्रमणिका—कासुष्टुतिरुपान्त्यानुष्टुबिति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

कासु॑ष्टुतिःशव॑सःसू॒नुमिन्द्र॑मर्वाची॒नंराध॑स॒आव॑वर्तत् ।
द॒दिर्हिवी॒रोगृ॑ण॒तेवसू॑नि॒सगोप॑ति॒र्नि॒ष्षिधा॑न्नोजनासः ॥ १ ॥

का । सु॒ऽस्तु॒तिः । शव॑सः । सू॒नुम् । इन्द्र॑म् । अ॒र्वा॒ची॒नम् । राध॑से ।
आ । व॒व॒र्त॒त् । द॒दिः । हि । वी॒रः । गृ॒ण॒ते । वसू॑नि । सः । गोऽप॑तिः
नि॒ःऽसिधा॑म् । न॒ः । ज॒ना॒स॒ः ॥ १ ॥

का कीदृशी सुष्टुतिः सुष्ठुस्तुतिः शवसः सूनुं बलस्यपुत्रं अतिबलिनमित्यर्थः अर्वाचीनं अस्मदभिमुखंइन्द्रं परमैश्वर्ययुक्तं राधसे धनाय अस्मभ्यंधनंदातुं आववर्तत् आवर्तयेत् हेजनासोजना यजमानाः वीरोविक्रान्तः गोपतिः पश्वादिधनस्यपालकः सइन्द्रः निष्षिधांनिष्षेद्धॄणांशत्रूणांसंबन्धीनिवसूनिधनानि गृणते गृणद्भ्यः स्तोतृभ्यः नोस्मभ्यंददिर्हि दाताखलुभवति ॥ १ ॥

अथद्वितीया—

सवृ॑त्र॒हत्ये॒हव्य॒ःसईड्य॒ःससुष्टु॑त॒इन्द्र॒ःस॒त्यरा॑धाः ।
सयाम॒न्नाम॒घवा॒मर्त्या॑यब्रह्मण्य॒तेसुष्व॑ये॒वरि॑वोधात् ॥ २ ॥

सः । वृ॒त्र॒ऽह॒त्ये॑ । हव्यः॑ । सः । ईड्यः॑ । सः । सुऽस्तु॑तः । इन्द्रः॑ ।
स॒त्यऽरा॑धाः । सः । याम॑न् । आ । म॒घऽवा॑ । मर्त्या॑य । ब्र॒ह्म॒ण्य॒ते ।
सुस्व॑ये । वरि॑वः । धा॒त् ॥ २ ॥

Funding by IKS-MoE

सइन्द्रः वृत्रहत्ये वृत्राणांशत्रूणांहत्ये हननेनिमित्तभूतेसति यामन् युद्धे हव्यः आह्वातव्योभवति सइन्द्रईड्यःस्तुत्योभवति सइन्द्रः सुष्टुतःसन् सत्यराधाः यजमानेभ्योदातुंसत्यधनोभवति मघवाधनवान्सइन्द्रः ब्रह्मण्यते स्तोत्रमिच्छते सुष्वये सोमंसुन्वते मर्त्याय मनुष्याययजमानायवरिवोधनं वरिवइतिधननामैतत् आधात् आसमन्ताद्ददाति ॥२॥

अथतृतीया—

तमिन्नरो॒विह्व॑यन्तेसमी॒केरि॑रि॒क्वांस॑स्त॒न्व॑ःकृण्वत॒त्राम् ।
मि॒थोयत्त्या॒गमु॒भया॑सो॒अग्म॒न्नर॑स्तो॒कस्य॒तन॑यस्यसा॒तौ ॥ ३ ॥

तम् । इत् । नर॑ः । वि । ह्व॒य॒न्ते॒ । स॒म्ऽई॒के । रि॒रि॒क्वांस॑ः । त॒न्व॑ः ।
कृ॒ण्व॒त॒ । त्राम् । मि॒थः । यत् । त्या॒गम् । उ॒भया॑सः । अग्म॑न् ।
नर॑ः । तो॒कस्य॑ । तन॑यस्य । सा॒तौ ॥ २ ॥

नरोनेतारोमनुष्याःसमीकेयुद्धेतमित्तमेवेन्द्रंविह्वयन्ते विविधमाह्वानंकुर्वते तन्वः स्वकीयानिशरीराणि रिरिक्वांसः तपसारेचयन्तोयजमानाः तमेवेन्द्रं त्रां त्रातारंकृण्वत कृण्वते कुर्वते यद्यदामिथः परस्परंसंगताः उभयासः उभयेयजमानाः स्तोतारश्च त्यागंत्यागकर्तारं दातारमिन्द्रमग्मन्नुपगच्छन्ति तदानरः उभयविधामनुष्याः तोकस्य पुत्रस्य तनयस्य पौत्रस्यच सातौ लाभेनिमित्तभूतेसति तमेवेन्द्रंत्रातारंकुर्वन्तीतिसंबन्धः ॥ ३ ॥

अथचतुर्थी—

क्र॒तू॒यन्ति॑क्षि॒तयो॒योग॑उग्राशुषा॒णासो॑मि॒थोअर्ण॑सातौ ।
सं॑यद्विशोव॑वृत्रन्तयु॒ध्माआदिन्नेम॑इन्द्रयन्तेअ॒भीके॑ ॥ ४ ॥

क्र॒तु॒ऽयन्ति॑ । । क्षि॒तय॑ः । योगे॑ । उ॒ग्र॒ । आ॒शु॒षा॒णास॑ः । मि॒थः ।
अर्ण॑ऽसातौ । सम् । यत् । विश॑ः । अव॑वृत्रन्त । यु॒ध्माः । आत् ।
इत् । नेमे॑ । इ॒न्द्र॒य॒न्ते॒ । अ॒भीके॑ ॥ ४ ॥

हेउग्र उद्गूर्णबलेन्द्र आशुषाणासोव्याप्नुवन्तः क्षितयोमनुष्याः क्षितयइतिमनुष्यनामैतत् अर्णसातौ सस्यादिफलसिद्ध्यर्थमुदकलाभेनिमित्तेसति मिथःपरस्परंयोगेसंबन्धेसति क्रतूयन्ति

क्रतूनिकर्माणिइच्छन्ति यद्यदायुध्माः योधयित्र्योविशःप्रजाः अभीकेयुद्धे अभीकइतिसंग्रामनामैतत् समववृत्रंत संवर्तन्ते परस्परंसंगच्छन्ते आदित्तदानीमेव नेमे केचनभाग्यवन्तोयोधकाः इन्द्रयन्ते युद्धेइन्द्रमिच्छन्ति ॥ ४ ॥

अथपंचमी–

आदिद्ध॒नेम॑इन्द्रि॒यंय॑जन्त॒आदित्प॒क्तिःपु॑रो॒ळाशं॑रिरिच्यात् ।
आदित्सोमो॒विप॑पृच्या॒दसु॑ष्वी॒नादिज्जु॑जोषवृष॒भंयज॑ध्यै ॥५॥११॥

आत् । इत् । ह॒ । नेमे॑ । इ॒न्द्रि॒यम् । य॒ज॒न्ते॒ । आत् । इत् । प॒क्तिः ।
पु॒रो॒ळाश॑म् । रि॒रि॒च्या॒त् । आत् । इत् । सोम॑ः । वि । प॒पृ॒च्या॒त् ।
असु॑स्वीन् । आत् । इत् । जु॒जो॒ष॒ । वृ॒ष॒भम् । यज॑ध्यै ॥ ५ ॥ ११ ॥

आदित्तदानीमेवयुद्धकालेनेमे अन्ये योधाः इन्द्रियंबलवन्तमिन्द्रंयजन्तेह पूजयन्ति खलु कश्चिदादिदनंतरमेव पुरोळाशंपिष्टरूपंहविः पक्तिः पचन् रिरिच्यात् इन्द्रायदद्यात् आदिदनंतरमेवसोमःअभिषुतसोमोयजमानः असुष्वीन् अनभिषुतसोमान्यजमानान्विपपृच्यात्धनैःपृथक्कुर्यात् आदिदनंतरमेव कश्चिद्वृषभं कामानांवर्षितारमिन्द्रंयजध्यै यष्टुंजुजोष सेवते ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेएकादशोवर्गः ॥ ११ ॥

अथषष्ठी–

कृ॒णोत्य॑स्मै॒वरि॑वो॒यइ॒त्थेन्द्रा॑य॒सोम॑मुश॒तेसु॒नोति॑ ।
स॒ध्री॒चीने॑न॒मन॒साावि॑वेनन्त॒मित्सखा॑यंकृणुतेस॒मत्सु॑ ॥ ६ ॥

कृ॒णोति॑ । अ॒स्मै॒ । वरि॑वः । यः । इ॒त्था । इन्द्रा॑य । सोम॑म् । उ॒श॒ते ।
सु॒नोति॑ । स॒ध्री॒चीने॑न । मन॑सा । अवि॑ऽवेनन् । तम् । इत् ।
सखा॑यम् । कृ॒णु॒ते॒ । स॒मत्ऽसु॑ ॥ ६ ॥

योयजमानः सोमं उशते कामयमानाय इत्था अमुत्रस्वर्गलोकेस्थितायेन्द्राय सुनोति अभिषवंकरोति इन्द्रोप्यस्मैयजमानायवरिवोधनंकृणोति करोति सध्रीचीनेनसंगतेनमनसाप-

वणेनचित्तेन अविवेनन् वेनतिःकांतिकर्मा विवेनोविगतेच्छः तदन्यः अविवेनः आत्मानंकामयमानंतमित्तमेव सुन्वन्तंयजमानंसखायंमित्रं समत्सु संग्रामेषुइन्द्रः कृणुते करोति ॥ ६ ॥

अथसप्तमी–

यइन्द्रायसुनवत्सोमम्द्यपचात्पक्तीरुतभृज्जातिधानाः ।
प्रतिमनायोरुचथानिहर्यन्तस्मिन्दधद्वृषणंशुष्ममिन्द्रः ॥ ७ ॥

यः । इन्द्राय । सुनवत् । सोमम् । अद्य । पचात् । पक्तीः । उत ।
भृज्जाति । धानाः । प्रति । मनायोः । उचथानि । हर्यन् । तस्मिन् ।
दधत् । वृषणम् । शुष्मम् । इन्द्रः ॥ ७ ॥

अद्यास्मिन्दिवसेयोयजमानः इन्द्राय परमैश्वर्ययुक्ताय देवाय सोमं सोमलक्षणं अन्नं सुनवत्सुनुयात् अभिषवंकुर्यात् तथा यःपक्तीः पक्तव्यांश्चरुपुरोडाशादीन्पचात्पचेत् पचनंकुर्यात् उतअपिच यः धानाः भर्जनयोग्यान्यवान् अत्रभृष्टयववाचीधानाशब्दः तद्योग्यंयवमात्रंलक्षयति भृज्जातिभृज्जेत् भर्जनंकुर्यात् इन्द्रःमनायोः स्तुतिमिच्छतोयजमानस्य उचथानि स्तोत्राणि प्रतिहर्यन् प्रतिकामयमानःसन् तस्मिन्यजमाने वृषणं कामानांवर्षणसमर्थं शुष्मंबलं दधद्धारयति ॥ ७ ॥

अथाष्टमी–

यदासमर्यंव्यचेदृघावादीर्घंयदाजिमभ्यख्यदर्यः ।
अचिक्रदद्वृषणंपत्न्यच्छादुरोणआनिशितंसोमसुद्भिः ॥ ८ ॥

यदा । सम्ऽमर्यम् । वि । अचेत् । ऋघावा । दीर्घम् । यत् ।
आजिम् । अभि । अख्यत् । अर्यः । अचिक्रदत् । वृषणम् ।
पत्नी । अच्छ । दुरोणे । आ । निऽशितम् । सोमसुत्ऽभिः ॥ ८ ॥

यदा ऋघावा शत्रूणांहिंसकइन्द्रः समर्यं सहमर्तव्यंशत्रुं व्यचेत् व्याज्ञासीत् विशेषेणजानीयात् यदाअर्यःस्वामी इन्द्रः दीर्घं अत्यधिकमाजिंसंग्राममभ्यख्यत् अभिपश्येत् तदा तस्येन्द्रस्य पत्नी दुरोणे यज्ञगृहे सोमसुद्भिः सोमंसुन्वद्भिः ऋत्विग्भिर्निशितंतीक्ष्णीकृतंसोमपानेनोत्साहवन्तमित्यर्थः वृषणंकामानांवर्षितारं इन्द्रमच्छाभिलक्ष्यआचिक्रदत् आक्रन्दत्याह्वयते॥८॥

अथनवमी–

भूय॑सा॒व॒स्नम॑चर॒त्कनी॒योवि॑क्रीतोअकानिषं॒पुन॒र्य॑न् ।
सभूय॑सा॒कनी॑यो॒नारि॑रेचीद्दी॒नादक्षा॒विदु॑हन्ति॒प्रवा॒णम् ॥ ९ ॥

भूय॑सा । व॒स्नम् । अ॒च॒र॒त् । कनी॑यः । अवि॑ऽक्रीतः । अ॒का॒नि॒ष॒म् ।
पुन॑: । यन् । सः । भूय॑सा । कनी॑यः । न । अ॒रि॑रे॒ची॒त् । दी॒नाः ।
दक्षा॑: । वि । दु॒ह॒न्ति॒ । प्र । वा॒णम् ॥ ९ ॥

अत्र ऋग्द्वयेसंप्रदायविद्भिःपूर्वाचार्यैःकेचिद्श्लोकाःपठ्यन्तेतएवलिख्यंते–अल्पंयःप्रतिगृह्णातिमूल्यंपण्येनभूयसा ॥ सक्रेतारंपुनर्गछन्नविक्रीतस्त्वयंमया ॥ १ ॥ इतिब्रुवन्कामयतेपुनर्मूल्यस्यपूरणं ॥ सविक्रेतापुनर्मूल्यंभूयसानप्रपूरयेत् ॥ २ ॥ हीनंनलभतेवस्नंयदाविक्रीतवान्पुरा ॥ यथासमयमेवस्यात्तयोर्नपुनरन्यथा ॥ ३ ॥ अयंविक्रयएवेतिसमयश्चेत्कृतोभवेत् ॥ अथमूल्यार्थमेतत्स्यात्[illegible]चार्यैवतुनिर्णयः ॥ ४ ॥ इत्येवंसमयोकारितदामूल्यंप्रपूर्यंते ॥ तस्मादादौमयाकार्यःसमयोत्रेतिचिन्तयन् ॥ ५ ॥ वामदेवोवशीकृत्यशक्रंस्तोत्रेणभूयसा ॥ विक्रीणन्तसमयंचक्रेइंद्रंकइममित्यृचि ॥ ६ ॥ अतश्चद्वृचएकार्थोभूयसावस्नमित्ययमिति ॥ अयमर्थः प्रतिपाद्यते–कश्चिद्भूयसाभूम्नापण्येनद्रव्येणकनीयोल्पतरंवस्नंवसुमूल्यंधनंअचरत्प्राप्नोति पुनर्यन् क्रेतारंपुनर्गच्छन् सविक्रेता अयमर्थोमयाऽविक्रीतइतिब्रुवन्नकानिषंमूल्यपूर्तिंकामयते व्यत्ययेनोत्तमपुरुषः सविक्रेता भूयसाधनेनकनीयोल्पतरंमूल्यंनारिरेचीत् क्रेतुःसकाशान्नरिक्तीकरोति नलभतइत्यर्थः दीनाअसमर्थाः दक्षाः समर्थाश्च वाणंवचनं विप्रदुहन्ति यथोक्तंक्रयकालेतथैवलभन्ते ॥ ९ ॥

अथदशमी–

कइ॒मंद॒शभि॒र्ममेन्द्रं॑क्रीणाति॒धे॒नुभि॑: ।
य॒दावृ॒त्राणि॒जंघ॑न॒दथै॑नंमे॒पुन॑र्ददत् ॥ १० ॥

कः । इ॒मम् । द॒श॑ऽभिः । मम॑ । इन्द्र॑म् । क्री॒णा॒ति॒ । धे॒नु॑ऽभिः ।
य॒दा । वृ॒त्राणि॑ । जङ्घ॑नत् । अथ॑ । ए॒न॒म् । मे॒ । पुन॑: । द॒द॒त् ॥ १० ॥

Funding by IKS-MoE

मम मदीयं इमं स्वभूतमिन्द्रंधेनुभिःप्रीणयित्रीभिर्दशभिर्दशसंख्याकाभिः कः क्रीणाति क्रयंकरोति तदानीं हेक्रेतारोयुष्माकंमध्येएवमपिसमयःक्रियते यदायमिन्द्रः वृत्राणि त्वदीयान्शत्रून्जघंनत्हन्यात् अथानंतरमेवएनमिन्द्रंमेमह्यंपुनर्ददत् पुनर्दद्यात् ॥ १० ॥

अथैकादशी–

नूष्टुतइ॑न्द्र॒नूगृ॑णा॒नइषं॑जरि॒त्रेन॒द्यो॒३॑नपी॑पेः ।
अका॑रितेहरिवो॒ब्रह्म॒नव्यं॑धि॒यास्या॑मर॒थ्यः॑सदा॒साः ॥ ११ ॥१२॥

नु । स्तु॒तः । इ॒न्द्र॒ । नु । गृ॒णा॒नः । इष॑म् । ज॒रि॒त्रे । न॒द्यः॑ । न ।
पी॒पे॒रिति॑पीपेः । अका॑रि । ते॒ । ह॒रि॒ऽव॒ः । ब्रह्म॑ । नव्य॑म् ।
धि॒या । स्या॒म॒ । र॒थ्यः॑ । स॒दा॒ऽसाः ॥ ११ ॥ १२ ॥

॥ पूर्वंव्याख्याता ॥ ११ ॥

॥ इतितृतीयस्यषष्ठेद्वादशोवर्गः ॥ १२ ॥

कोअद्येत्यष्टर्चंचतुर्थंसूक्तंवामदेवस्यार्षंत्रैष्टुभमैन्द्रं तथाचानुक्रान्तं–कोअद्याष्टाविति । दशरात्रेचतुर्थेहनिमाध्यंदिनेसवनेस्तोमवृद्धौमैत्रावरुणशस्त्रेआरंभणीयायाउपरिष्टादिदंसूक्तमावपनीयं सूत्रितंच–स्तोमेवर्धमानेकोअद्यनर्यइति ।

तत्रप्रथमा–

कोअ॒द्यनर्यो॑दे॒वका॑मउ॒शन्निन्द्र॑स्यस॒ख्यंजु॑जोष ।
कोवा॑म॒हेव॑से॒पार्या॑य॒समि॑द्धेअ॒ग्नौसु॒तसो॑मईट्टे ॥ १ ॥

कः । अ॒द्य । नर्यः॑ । दे॒वऽका॑मः । उ॒शन् । इन्द्र॑स्य । स॒ख्यम् ।
जु॒जो॒ष॒ । कः । वा॒ । म॒हे । अव॑से । पार्या॑य । सम्ऽइ॑द्धे ।
अ॒ग्नौ । सु॒तऽसो॑मः । ई॒ट्टे॒ ॥ १ ॥

अद्यास्मिन्दिवसे कोनर्योमनुष्यहितः देवकामोदेवानिच्छन् उशन्कामयमानइन्द्रस्यसख्यंसखित्वंजुजोषसेवते किंच सुतसोमः अभिषुतसोमः कोवायजमानः अग्नौसमिद्धेप्रज्वलिते सति महे महते प्रवृद्धाय पार्याय पारमर्हतेअवसेतर्पणाय ईट्टे इन्द्रंस्तौति ॥ १ ॥

अथद्वितीया–

कोना॑नाम॒वच॑सासो॒म्याय॑मना॒युर्वा॑भवति॒वस्त॑उ॒स्राः ।
कइन्द्र॑स्य॒युज्यं॒कः॑स॑खि॒त्वंकोभ्रा॒त्रंव॑ष्टिक॒वये॒कऊ॒ती ॥ २ ॥

कः । न॒ना॒म॒ । वच॑सा । सो॒म्याय॑ । म॒ना॒युः । वा॒ । भ॒व॒ति॒ ।
वस्ते॑ । उ॒स्राः । कः । इन्द्र॑स्य । युज्य॑म् । कः । स॒खि॒ऽत्वम् ।
कः । भ्रा॒त्रम् । व॒ष्टि॒ । क॒वये॑ । कः । ऊ॒ती ॥ २ ॥

कोयजमानः वचसा वाग्रूपयास्तुत्या सोम्याय सोमार्हायेन्द्राय ननाम नमति प्रह्वीभवति कोवाइन्द्रायमनायुर्भवति स्तुतिकामोस्ति कःउस्राः इन्द्रेणदत्तागाः वस्तेआच्छादयति धारयतीत्यर्थः कइन्द्रस्ययुज्यंसाहाय्यंसखित्वंमित्रत्वं भ्रात्रं भ्रातृत्वंच वष्टिइच्छत कवयेक्रान्तदर्शिनेइन्द्राय ऊतीऊतये तर्पणायकोभवतीतिशेषः ॥ २ ॥

अथतृतीया–

कोदे॒वाना॒मवो॑अ॒द्यावृ॑णीते॒कआ॑दि॒त्याँअदि॑तिं॒ज्योति॑रीट्टे ।
कस्या॒श्विना॒विन्द्रो॑अ॒ग्निःसु॒तस्या॒ंशोःपि॑बन्ति॒मन॒सावि॑वेनम् ॥३॥

कः । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒ते॒ । कः । आ॒दि॒त्यान् ।
अदि॑तिम् । ज्योतिः॑ । ई॒ट्टे॒ । कस्य॑ । अ॒श्विनौ॑ । इन्द्रः॑ । अ॒ग्निः ।
सु॒तस्य॑ । अ॒ंशोः । पि॒ब॒न्ति॒ । मन॑सा । अवि॑ऽवेनम् ॥ ३ ॥

अद्यास्मिन्दिने कोयजमानः देवानांद्योतमानानामिन्द्रादीनांअवोरक्षणं वृणीते प्रार्थयते कआदित्यान्देवानदितिंदेवमातरंच ज्योतिरुदकंचईट्टे याचते अश्विनौ अश्विदेवौ इन्द्रश्चाग्निश्चमनसा स्तुत्याप्रीताःसन्तः अविवेनंअविगतकामंयथाकाममित्यर्थः कस्ययजमानस्यसंबन्धिनं सुतस्याभिषुतस्यांशोःसोमस्यसोममित्यर्थः पिबन्ति पानंकुर्वन्ति ॥ ३ ॥

अथचतुर्थी–

तस्मा॑अ॒ग्निर्भार॑त॒ःशर्म॑यंस॒ज्ज्योक्प॑श्या॒त्सूर्य॑मु॒च्चर॑न्तम् ।
यइन्द्रा॑यसु॒नवा॒मेत्याह॒नरे॒नर्या॑य॒नृत॑माय॒नृणाम् ॥ ४ ॥

तस्मै॑ । अ॒ग्निः । भार॑तः । शर्म॑ । यं॒स॒त् । ज्योक् । प॒श्या॒त् । सूर्य॑म् ।
उ॒त्ऽचर॑न्तम् । यः । इन्द्रा॑य । सु॒नवा॑म । इति॑ । आह॑ । नरे॑ ।
नर्या॑य । नृऽत॑माय । नृ॒णाम् ॥ ४ ॥

भारतः हविषोभर्ताग्निः प्राणोभूत्वा प्रजाअधारयत् तस्माद्भारतइति वाजसनेयकम्—तस्मैयजमानायशर्मसुखंयंसद्यच्छेत् किंचायमग्निः ज्योक् चिरकालंउच्चरंतं उद्यन्तंसूर्यं पश्यात्पश्येत् योयजमानः इन्द्रायसुनवामेत्याहइन्द्रार्थंसोमाभिषवंकुर्यामितिब्रवीति कीदृशायेन्द्राय नरेनेत्रे नर्याय नरहिताय नृणांनराणांनेतॄणांमध्ये नृतमाय नेतृतमाय ॥ ४ ॥

अथपंचमी—

नतंजि॑नन्तिब॒हवो॒नद॒भ्राउ॒र्व॑स्मा॒अदि॑ति॒ःशर्म॑यंसत् ।
प्रि॒यःसु॒कृत्प्रि॒यइन्द्रे॑मना॒युःप्रि॒यःसु॑प्रा॒वीःप्रि॒योअ॑स्यसो॒मी ॥५॥१३॥

न । तम् । जि॒न॒न्ति॒ । ब॒हवः॑ । न । द॒भ्राः । उ॒रु । अ॒स्मै॒ । अदि॑तिः ।
शर्म॑ । यं॒स॒त् । प्रि॒यः । सु॒ऽकृत् । प्रि॒यः । इन्द्रे॑ । म॒ना॒युः । प्रि॒यः ।
सु॒प्र॒ऽअ॒वीः । प्रि॒यः । अ॒स्य॒ । सो॒मी ॥ ५ ॥ १३ ॥

दभ्राअल्पाः बहवोन बहवोपिशत्रुजनाः तंयजमानंनजिनन्ति नहिंसन्तु यइन्द्रायसुनवामेत्याह तमितिपूर्वेणसंबन्धः अदितिरिन्द्रमाता अस्मै यजमानाय उरु विस्तीर्णंशर्मसुखंयंसद्यच्छतु किंच इन्द्रे इन्द्राय सुकृच्छोभनयागादीनांकर्तायजमानःप्रियोभवति मनायुः इन्द्रविषयस्तुतिकामश्च अस्येन्द्रस्यप्रियोभवति सुप्रावीःसुष्ठुप्राविता सुष्ठुप्रगच्छन् उपगच्छन्वा यजमानः अस्येन्द्रस्यप्रियोभवति सोमीसोमवान्यजमानः अस्येन्द्रस्यप्रियोभवति ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेत्रयोदशोवर्गः ॥ १३ ॥

अथषष्ठी—

सुप्रा॒व्यः॑प्राशुषाळे॒षवी॒रःसुष्वेः॑प॒क्तिंकृ॑णुते॒केव॒लेन्द्रः॑ ।
नासु॑ष्वेरा॒पिर्नसखा॒नजा॒मिर्दु॑ष्प्रा॒व्यो॑वह॒न्तेदवा॑चः ॥ ६ ॥

सु॒प्र॒ऽअ॒व्यः॑ । प्रा॒शु॒षाट् । ए॒षः । वी॒रः । सुस्वेः॑ । प॒क्तिम् । कृ॒णु॒ते॒ ।
केव॑ला । इन्द्रः॑ । न । असु॑स्वेः । आ॒पिः । न । सखा॑ । न ।
जा॒मिः । दुः॒ऽप्र॒ऽअ॒व्यः॑ । अ॒व॒ऽह॒न्ता । इत् । अवा॑चः ॥ ६ ॥

Funding by IKS-MoE

प्राशुषाट् शत्रूणांप्रकर्षेणशीघ्रमभिभविता वीरोविक्रान्तएषइन्द्रः सुप्राव्यः सुष्ठुउपगच्छतः हविर्भिःसुष्ठुप्रतर्पयितुर्वा सुष्वेःसुन्वतोयजमानस्यसंबन्धिनींकेवलांकेवलामसाधारणांपार्क्तिं कृणुते आत्मनःकुरुते किंचेन्द्रः असुष्वेः असुन्वतोयजमानस्य आपिर्व्याप्तोनभवति इन्द्रः अयजमानस्य सखानभवति जामिर्बन्धुश्चनभवति अपिच दुष्प्राव्यः दुरुपगमनस्यअवाचःस्तुतिरहितस्यपुरुषस्यअवहन्तेत् हिंसितैवभवति ॥ ६ ॥

अथसप्तमी–

नरे॒वता॑प॒णिना॑स॒ख्यमिन्द्रो॒सु॑न्वतासु॒त॒पाःसंगृ॑णीते ।
आस्य॒वेदः॑खि॒दति॒हन्ति॑न॒ग्नंविसुष्व॑येप॒क्तये॒केव॑लोभूत् ॥ ७ ॥

न । रे॒वता॑ । प॒णिना॑ । स॒ख्यम् । इन्द्रः॑ । असु॑न्वता । सु॒त॒ऽपाः ।
सम् । गृ॒णी॒ते॒ । आ । अ॒स्य॒ । वेदः॑ । खि॒दति॑ । हन्ति॑ । न॒ग्नम् ।
वि । सुस्व॑ये । प॒क्तये॑ । केव॑लः । भूत् ॥ ७ ॥

सुतपाः अभिषुतंसोमंपिबन्निन्द्रः रेवताधनवता पणिना वणिजालुब्धेनअसुन्वता सोमाभिषवमकुर्वता अयजमानेनसहसख्यंसखित्वंनसंगृणीते नसंस्तौति नानुमन्यतइत्यर्थः किंच अस्यायजमानस्य नग्नं निरर्थकं वेदोधनंज्ञानंवा आखिदति उद्धरति हन्ति हिनस्तिच अपिच सुष्वये सोमंसुन्वते पक्तये हवींषिपचते यजमानाय केवलोऽसाधारणःसन्विभूत विभवति ॥ ७ ॥

अथाष्टमी–

इन्द्रं॒परेव॑रेमध्य॒मास॒इन्द्रं॒यान्तोव॑सितास॒इन्द्र॑म् ।
इन्द्रं॑क्षि॒यन्त॑उ॒तयुध्य॑माना॒इन्द्रं॒नरो॑वाज॒यन्तो॑हवन्ते ॥८॥१४॥

इन्द्र॑म् । परे॑ । अव॑रे । म॒ध्य॒मासः॑ । इन्द्र॑म् । यान्तः॑ । अव॑ऽसितासः ।
इन्द्र॑म् । इन्द्र॑म् । क्षि॒यन्तः॑ । उ॒त । युध्य॑मानाः । इन्द्र॑म् । नरः॑ ।
वा॒ज॒ऽयन्तः॑ । ह॒व॒न्ते॒ ॥ ८ ॥ १४ ॥

Funding by IKS-MoE

परे उत्कृष्टाः अवरे निकृष्टाश्चजनाः इन्द्रं हवन्ते आह्वयन्ति मध्यमासोमध्यमाश्च इन्द्रमेवहवन्ते यांतःकार्यसिद्ध्यर्थं गच्छन्तोजनाः इन्द्रमेवाह्वयन्ति अवसितासः निविष्टाश्चइन्द्रमेवाह्वयन्ति क्षियन्तोगृहेनिवसन्तोजनाः इन्द्रमेवहवन्ते उतापिच युध्यमानाः युद्धंकुर्वाणाः जनाः जयार्थमिन्द्रमेवाह्वयन्ति वाजयन्तः वाजमन्नमिच्छन्तोनरोनेतारोमनुष्याः इन्द्रमेव हवन्ते ॥ ८ ॥

॥ इतितृतीयस्यषष्ठेचतुर्दशोवर्गः ॥ १४ ॥

अहंमनुरितिसप्तर्चंपंचमंसूक्तंवामदेवस्यार्षं अत्रेयमनुक्रमणिका—अहंमनुःसप्ताद्याभिस्तिसृभिरिन्द्रमिवात्मानमृषिस्तुष्टावेन्द्रोवात्मानंपरानवाष्टौवाश्येनस्तुतिरिति । अत्र अहंमनुरित्याद्याभिस्तिसृभिरात्मानमिन्द्ररूपेणवामदेवःस्तुतवान् यद्वा इन्द्रएवात्मानंस्तुतवान् अतोवामदेववाक्यपक्षेवामदेवऋषिः इन्द्रोदेवता इन्द्रवाक्यपक्षेत्विन्द्रऋषिः परमात्मादेवता त्रिष्टुप्छन्दः अवशिष्टानांवामदेवऋषिः अवशिष्टाभिरुत्तरसूक्तेनचसुपर्णात्मनाब्रह्मस्तूयते अतस्तासांपरब्रह्मदेवता श्येननाम्न्येकाहेमाध्यंदिनसवनेमरुत्वतीयशस्त्रेइदंसूक्तं सूत्रितंच—श्येनाजिराभ्यामभिचरन्यजेताहंमनुर्गर्भेनुसन्निति ।

तत्रप्रथमा—

अ॒हंमनु॑रभवं॒सूर्य॑श्चा॒हंक॒क्षीवाँ॒ऋषि॑रस्मि॒विप्रः॑ ।
अ॒हंकुत्स॑मार्जुने॒यन्यृ॑ञ्जे॒हंक॒विरु॒शना॒पश्य॑तामा ॥ १ ॥

अ॒हम् । मनुः॑ । अ॒भ॒व॒म् । सूर्यः॑ । च॒ । अ॒हम् । क॒क्षीवा॑न् । ऋषिः॑ ।
अ॒स्मि॒ । विप्रः॑ । अ॒हम् । कुत्स॑म् । आ॒र्जु॒ने॒यम् । नि । ऋ॒ञ्जे॒ ।
अ॒हम् । क॒विः । उ॒शना॑ । पश्य॑त । मा॒ ॥ १ ॥

इदमादिमंत्रत्रये अयंगर्भेवसन्वामदेवः उत्पन्नतत्वज्ञानःसन् सार्वात्म्यं स्वानुभवंमन्वादिरूपेणप्रदर्शयन्नाह—अहंवामदेवः मनुरभवं सर्वस्यमन्ताप्रजापतिरस्मि अहमेवसूर्यश्चसर्वस्यप्रेरकःसविताचास्मि विप्रोमेधावीकक्षीवान्दीर्घतमसःपुत्रः एतत्संज्ञकऋषिरप्यहमेवास्मि आर्जुनेयं आर्जुन्याःपुत्रंकुत्समेतन्नामकऋषिमहमेवन्यृंजे नितरांप्रसाधयामि कविःक्रांतदर्शी उशनाएतदाख्यऋषिरहमेवास्मि उक्तमुपलक्षणंपरमार्थदृष्ट्याकृत्स्नमप्यहमेवास्मीत्यर्थः हेजनाः मांसर्वात्मकंपश्यत यूयमप्येवमेवस्वस्वरूपमनुभवतेत्युक्तंभवति ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया—

अ॒हंभूमि॑मददा॒मार्या॑या॒हंवृ॒ष्टिंदा॒शुषे॒मर्त्या॑य ।
अ॒हम॒पोअ॑नयंवावशा॒नामम॑दे॒वासो॒अनु॒केत॑मायन् ॥ २ ॥

अ॒हम् । भूमि॑म् । अ॒द॒दा॒म् । आर्या॑य । अ॒हम् । वृ॒ष्टिम् ।
दा॒शुषे॑ । मर्त्या॑य । अ॒हम् । अ॒पः । अ॒न॒य॒म् । वा॒व॒शा॒नाः ।
मम॑ । दे॒वासः॑ । अनु॑ । केत॑म् । आ॒य॒न् ॥ २ ॥

अहंवामदेवइन्द्रोवा आर्यायमनवेभूमिंपृथ्वीमददांदत्तवानस्मि दाशुषेहविर्दत्तवतेमर्त्यायमनुष्याययजमानायवृष्टिंसस्याद्यभिवृद्ध्यर्थं वृष्टिलक्षणमुदकंअहमेवअददां किंच अहंवावशानाः शब्दायमानाअपः उदकानि अनयं सर्वमपिप्रादेशमगमयं देवासोवह्न्यादयोदेवाः ममकेतं मदीयंसंकल्पं अन्वायन् अनुयन्ति ॥ २ ॥

अथतृतीया—

अ॒हंपुरो॑मन्दसा॒नोऽव्यै॑रं॒नव॑सा॒कन्न॑व॒तीःशंब॑रस्य ।
श॒त॒त॒मं॑वे॒श्यं॑स॒र्वता॑ता॒दिवो॑दासमतिथि॒ग्वं॑यदाव॑म् ॥ ३ ॥

अ॒हम् । पुरः॑ । म॒न्द॒सा॒नः । वि । ऐ॒र॒म् । नव॑ । सा॒कम् । न॒व॒तीः ।
शम्ब॑रस्य । श॒त॒ऽत॒मम् । वे॒श्य॑म् । स॒र्वऽता॑ता । दिवः॑ऽदासम् ।
अ॒ति॒थि॒ऽग्वम् । यत् । आव॑म् ॥ ३ ॥

अहंवामदेवइन्द्रोवा मन्दसानः सोमेनमाद्यन् नव नवसंख्याकानवतीर्नवतिसंख्याकाश्चशंबरस्यैतन्नामकस्यासुरस्यसंबन्धीनिपुरः पुराणि साकं युगपदेव व्यैरं अध्वंसयं शततमं शतसंख्यापूरणं पुरं वेश्यं दिवोदासनाम्नेप्रवेशार्हंअकरवं सर्वताता सर्वतातौ यज्ञे अतिथिग्वं अतिथीनामभिगन्तारं दिवोदासं दिवोदासनामकंराजर्षिं यद्यदा आवं अपालयं तदापुरोऽव्यैरमितिपूर्वेणसंबन्धः ॥ ३ ॥

अथचतुर्थी—

प्रसुषविभ्यो॑मरुतो॒विर॑स्तुप्रश्ये॒नःश्ये॒नेभ्य॑आशु॒पत्वा॑ ।
अ॒च॒क्रया॒यत्स्व॒धया॑सु॒पर्णो॑ह॒व्यंभर॒न्मन॑वेदे॒वजु॑ष्टम् ॥ ४ ॥

प्र । सु । सः । वि॒ऽभ्यः॑ । म॒रु॒तः॒ । विः । अ॒स्तु॒ । प्र । श्ये॒नः ।
श्ये॒नेभ्यः॑ । आ॒शु॒ऽपत्वा॑ । अ॒च॒क्रया॑ । यत् । स्व॒धया॑ । सु॒ऽप॒र्णः ।
ह॒व्यम् । भर॑त् । मन॑वे । दे॒वऽजु॑ष्टम् ॥ ४ ॥

अथैतदादिभिःश्येनःस्तूयते हेमरुतः वेगेनमरुत्सदृशाःपक्षिणः प्रसिद्धःश्येनाख्योविःपक्षी विभ्योयुष्मत्तःप्रसुबलेनप्रकृष्टोस्तुभवतु किंच श्येनेभ्यः शंसनीयगमनेभ्यः स्वसमानजातिभ्यःपक्षिभ्यःसकाशादाशुपत्वाआशुपतनःशीघ्रगामीश्येनःप्रकृष्टोभवतु सुपर्णःशोभनपतनः यद्यदाश्येनःअचक्रया चक्रवर्जितयास्वधयारथेनदेवजुष्टं देवैःसेवितंहव्यं सोमलक्षणंहविः मनवे प्रजापतयेभरदहरत् द्युलोकसकाशादाहृतवान् अत्रस्वधाशब्दोरथवाची अचक्रयास्वधयावर्तमानमित्यादौदर्शनात् ॥ ४ ॥

अथपंचमी–

भर॒द्यदि॒विरतो॒वेवि॑जानःप॒थोरुणा॒मनो॑जवाअसर्जि॑ ।
तूयँ॑यया॒ैमधु॑नासो॒म्येनो॒तश्रवो॑विविदेश्ये॒नोअत्र॑ ॥ ५ ॥

भर॑त् । यदि॑ । विः ।अत॑ः । वेवि॑जानः । प॒था । उ॒रुणा॑ । मनः॑ऽजवाः ।
अ॒स॒र्जि॒ । तूय॑म् । य॒यौ॒ । मधु॑ना । सो॒म्येन॑ । उ॒त । श्रवः॑ । वि॒वि॒दे॒ ।
श्ये॒नः । अत्र॑ ॥ ५ ॥

यदि यदा विः पक्षी श्येनः अतोयुष्माद्द्युलोकाद्वेविजानः सोमकान्भीषयन्भरदहरत् सोममाहृतवान् तदा उरुणाविस्तीर्णेनपथा अन्तरिक्षमार्गेणमनोजवाः मनोवद्वेगयुक्तःसन् असर्जि संसृष्टआसीत् सोम्येनसोममयेनमधुनान्नेनसहतूयंक्षिप्रंययौ जगाम उतापिच अत्रास्मिन्लोकेश्येनःसुपर्णःश्रवः सोमाहरणनिमित्तंयशः विविदे लेभे ॥ ५ ॥

अथषष्ठी–

ऋ॒जी॒पीश्ये॒नोदद॑मानोअं॒शुंप॑रा॒वतः॑शकु॒नोम॒न्द्रंमद॑म् ।
सोमँ॑भरद्दादृहा॒णोदे॒वावा॑न्दि॒वोअ॒मुष्मा॒दुत्त॑रादा॒दाय॑ ॥ ६ ॥

ऋ॒जी॒पी । श्ये॒नः । दद॑मानः । अं॒शुम् । प॒रा॒ऽवतः॑ । श॒कु॒नः ।
म॒न्द्रम् । मद॑म् । सोम॑म् ।भ॒र॒त् । द॒दृ॒हा॒णः । दे॒वऽवा॑न् । दि॒वः ।
अ॒मुष्मा॑त् । उत्ऽत॑रात् । आ॒ऽदाय॑ ॥ ६ ॥

ऋजीपी ऋजुगामीपरावतोदूरादंशुंसोमंददमानोधारयन् श्येनःशंसनीयगमनः देववान्देवैःसहितः शकुनः पक्षी मन्द्रं मदनीयंस्तुत्यं मदं मदकरंसोमं उत्तरादुद्गततरादमुष्माद्दिवोद्युलोकादादायस्वीकृत्य दद्दहाणोदृढीभवन् भरत् अहरत् ॥ ६ ॥

अथसप्तमी–

आ॒दाय॑श्ये॒नोअ॑भर॒त्सोमं॑स॒हस्रं॑स॒वाँअ॒युतं॑चसा॒कम् ।
अत्रा॒पुरं॑धिरजहा॒दरा॑ती॒र्मदे॒सोम॑स्यमू॒राअमू॑रः ॥ ७ ॥ १५ ॥

आ॒ऽदाय॑ । श्ये॒नः । अ॒भ॒रत् । सोम॑म् । स॒हस्र॑म् । स॒वान् । अ॒युत॑म् । च॒ । सा॒कम् । अत्र॑ । पुर॑म्ऽधिः । अ॒ज॒हा॒त् । अरा॑तीः । मदे॑ । सोम॑स्य । मू॒राः । अमू॑रः ॥ ७ ॥ १५ ॥

श्येनः शंसनीयगमनः पक्षी सवान्सवानांयज्ञानांसहस्रंसहस्रसंख्याकं अयुतंच अयुतसंख्याकं अपरिमितसंख्याकमित्यर्थः साकं सह सोमं सोमलक्षणमन्नमादाय आदानंकृत्वा अभरदहरत् आजहार अत्रास्मिन्सोमेआहृतेसति पुरंधिः पुरंधीःबहुकर्माअमूरःअमूढः प्राज्ञइन्द्रः सोमस्यसंबन्धिनिमदेहर्षेसति मूराःमूढाः अरातीः शत्रूनजहात् अत्यजज्जघानेत्यर्थः अत्रारातिशब्दःस्त्रीलिंगः ॥ ७ ॥

॥ इतितृतीयस्यषष्ठेपंचदशोवर्गः ॥ १५ ॥

गर्भेन्वितिपंचर्चंषष्ठंसूक्तंवामदेवस्यार्षंत्रैष्टुभं अंत्याशक्करीषट्पंचाशदक्षरा श्येनोदेवता पूर्वसूक्तेअष्टौवेत्युक्तत्वादंत्यायाइन्द्रोदेवता तथाचानुक्रान्तं–गर्भेनुपंचांत्याशक्करीति । श्येनेनिष्केवल्येइदंसूक्तं सूत्रंतुपूर्वमुदाहृतम् ।

तत्रप्रथमा–

ग॒र्भेनुस॒न्नन्वे॑षामवेदम॒हंदे॒वानां॒जनि॑मानि॒विश्वा॑ ।
श॒तंमा॒पुर॒आय॑सीररक्ष॒न्नध॑श्ये॒नोज॒वसा॒निर॑दीयम् ॥ १ ॥

गर्भे॑ । नु । सन् । अनु॑ । ए॒षा॒म् । अ॒वे॒द॒म् । अ॒हम् । दे॒वाना॑म् । जनि॑मानि । विश्वा॑ । श॒तम् । मा॒ । पुरः॑ । आय॑सीः । अ॒र॒क्ष॒न् । अध॑ । श्ये॒नः । ज॒वसा॑ । निः । अ॒दी॒य॒म् ॥ १ ॥

अत्रैषःश्लोकःपठ्यते—श्येनभावंसमास्थायगर्भाद्योगेननिःसृतः । ऋषिर्गर्भेशयानःसन् ब्रूतेगर्भेनुसन्निति ॥ १ ॥गर्भेनु गर्भेएवसन् विद्यमानोहंवामदेवः एषामिन्द्रादीनांदेवानां विश्वा विश्वानि सर्वाणि जनिमानि जन्मानि अन्ववेदं आनुपूर्व्येणाज्ञासिषं परमात्मनः सकाशात्सर्वेदेवाजाताइत्यवेदिषमित्यर्थः इतःपूर्वंशतंबहूनि आयसी अयोमयान्यभेद्यानि पुरःशरीराणि मामामरक्षन् अपालयन् यथाहंशरीराद्व्यतिरिक्तमात्मानंनजानीयां तथामामरक्षन्नित्यर्थः अध अधुना श्येनः श्येनवत्स्थितोहं जवसावेगेननिरदीयं शरीरान्निरगमं अनावरणमात्मानंजानन्निर्गतोस्मीत्यर्थः [1]पुरुषेहवाअयमादितोगर्भइतिखंडेगर्भएवैतच्छयानोवामदेवएवमुवाचेत्यादिनाअयमर्थःसम्यक्प्रतिपादितः ॥ १ ॥

अथद्वितीया—

नघासमामपजोषंजभाराभीमांसत्वक्षंसावीर्येण ।
ईर्मापुरंधिरजहादरांतीरुतवाताँअतरच्छूशुवानः ॥ २ ॥

न । घ । सः । माम् । अप । जोषम् । जभार । अभि । ईम् । आस ।
त्वक्षंसा । वीर्येण । ईर्मा । पुरम्ऽधिः । अजहात् । अरातीः । उत ।
वातान् । अतरत् । शूशुवानः ॥ २ ॥

सगर्भः मां वामदेवं जोषं पर्याप्तं नघ नैवापजभार अपजहार गर्भेपिवसतोमेमोहोमाभूदित्यर्थः अहंतु ईं इदंगर्भस्थंदुःखं त्वक्षसा तीक्ष्णेनवीर्येण ज्ञानसामर्थ्येन अभ्यासअभ्यभवं ईर्मा सर्वस्यप्रेरकः पुरंधिः पुरांधारकः परमात्मा अरातीः गर्भसंस्थितान्शत्रूनजहात् अत्यजत् जघान उतापिच शूशुवानः वर्धमानः परिपूर्णः परमात्मावा तान्गर्भक्लेशकरान्वायूनतरत् अतारीत् ॥ २ ॥

अथतृतीया—

अवयच्छ्येनोअस्वनीदधद्योर्वियद्यदिवातऊहुःपुरंधिम् ।
सृजद्यदस्माअवहक्षिपज्ज्यांकृशानुरस्तामनसाभुरण्यन् ॥ ३ ॥

---

[1] ऐतरेयोपनिषत् ।

अव॑ । यत् । श्ये॒नः । अस्व॑नीत् । अध॑ । द्योः । वि । यत् । यदि॑ ।
वा॒ । अतः॑ । ऊ॒हुः । पुर॑म्ऽधिम् । सृ॒जत् । यत् । अ॒स्मै॒ । अव॑ ।
ह॒ । क्षि॒पत् । ज्याम् । कृ॒शानुः॑ । अस्ता॑ । मन॑सा । भु॒र॒ण्यन् ॥ ३ ॥

अध तदानीं सोमाहरणकाले यद्यदा श्येनः द्योः द्युलोकादवास्वनीत् अवाङ्मुखंशब्दमकरोत् यदिवा यदाच वेतिचार्थे यद्यंपुरंधिंसोमं अतोस्माच्छ्येनात् व्यूहुः सोमपालाविक्षिप्तवन्तः यद्यदा अस्ता शराणांक्षेप्ता मनसा मनोवेगेन भुरण्यन् गन्तुमिच्छन् कृशानुः एतन्नामकःसोमपालः ज्यांधनुषःकोटौमौर्वींक्षिपद्ध चिक्षेपखलु अस्मैश्येनाय शरमवासृजत्त्यक्तवान् तथाचब्राह्मणम्—तस्याअनुविसृज्यकृशानुःसोमपालःसव्यस्यपदोनखमच्छिनदित्यादि । यदायदासोमपालाइत्थमित्थंचक्रुःतदाश्येनःसोममाजहारेत्यृचोत्तरयासंबन्धः ॥ ३ ॥

अथचतुर्थी–

ऋ॒जि॒प्यई॒मिन्द्रा॑वतो॒नभु॒ज्युंश्ये॒नोज॑भारबृह॒तोअधि॒ष्णोः ।
अ॒न्तःप॑तत्पत॒त्र्य॑स्यप॒र्णमध॒याम॑नि॒प्रसि॑तस्य॒तद्वेः ॥ ४ ॥

ऋ॒जि॒प्यः । ई॒म् । इन्द्र॑ऽवतः । न । भु॒ज्युम् । श्ये॒नः । ज॒भा॒र॒ ।
बृ॒ह॒तः । अधि॑ । स्नोः । अ॒न्तरि॑ति । प॒त॒त् । प॒त॒त्रि । अ॒स्य॒ । प॒र्णम् ।
अध॑ । याम॑नि । प्रऽसि॑तस्य । तत् । वेरिति॒वेः ॥ ४॥

ऋजिप्यः ऋजुगामीश्येनः इन्द्रवतः इन्द्रोरक्षकोयस्य तस्माद्बृहतोमहतोऽधि उपरि स्नोः स्थितात् द्युलोकात् ईमेनंसोमंजभार आजहार तत्रदृष्टान्तः—इन्द्रवतः इन्द्रःसमर्थः तद्वतोदेशात् भुज्युंन भुज्युनामकंराजानं यथा अश्विनौआजह्रतुःतद्वत् अध तदानींयामनियुद्धे प्रसितस्यकृशानोरस्त्रैर्बद्धस्य वेर्गंतुरस्यांतर्मध्येस्थितं पतत्रिपतनशीलं तत्पर्णं पतदपतत्॥४॥

अथपंचमी–

अध॑श्वे॒तंक॒लशं॒गोभि॑र॒क्तमा॑पिप्या॒नंम॒घवा॑शु॒क्रमन्धः॑ ।
अ॒ध्व॒र्युभि॒ःप्रय॑तं॒मध्वो॒अग्र॒मिन्द्रो॒मदा॑य॒प्रति॑ध॒-
त्पिब॑ध्यै॒शूरो॒मदा॑य॒प्रति॑ध॒त्पिब॑ध्यै ॥ ५ ॥ १६ ॥

---

१ ऐ० ब्रा० ३. २६. ।

Funding by IKS-MoE

अध । श्वेतम् । कलशम् । गोभिः । अक्तम् । आऽपिप्यानम् ।
मघऽवा । शुक्रम् । अन्धः । अध्वर्युऽभिः । प्रऽयतम् । मध्वः ।
अग्रम् । इन्द्रः । मदाय । प्रति । धत् । पिबध्यै । शूरः । मदाय ।
प्रति । धत् । पिबध्यै ॥ ५ ॥ १६ ॥

अधाधुना शूरोविक्रान्तः मघवा धनवानिन्द्रः श्वेतं शुभ्रं कलशं कलशेपात्रेस्थितं गोभिर्गव्येनपयसा अक्तं सिक्तं आपिप्यानमाप्यायन्तं शुक्रं सारोपेतमध्वर्युभिःप्रयतंदत्तं अंधः सोमलक्षणमन्नं मध्वोमधुरस्यसोमरसस्यअग्रंअग्रेमदायमदार्थंपिबध्यै पातुंप्रतिधत् प्रतिदधातु पुनरुक्तिरादरार्था ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेषोडशोवर्गः ॥ १६ ॥

त्वायुजेतिपंचर्चंसप्तमंसूक्तंवामदेवस्यार्षं त्रैष्टुभमैंद्रासोमदेवताकं अनुक्रान्तंच–त्वायुजैन्द्रासोममिति । विनियोगोलैंगिकः ।

तत्रप्रथमा–

त्वायुजातवतत्सोमसख्यइन्द्रोअपोमनवेसस्रुतस्कः ।
अहन्नहिमरिणात्सप्तसिन्धूनपावृणोदपिहितेवखानि ॥ १ ॥

त्वा । युजा । तव । तत् । सोम । सख्यम् । इन्द्रः । अपः । मनवे ।
सऽस्रुतः । करितिकः । अहन् । अहिम् । अरिणात् । सप्त । सिन्धून् ।
अप । अवृणोत् । अपिहिताऽइव । खानि ॥ १ ॥

हेसोम तव त्वदीये तत्तस्मिन्सख्ये सखित्वे सति त्वा त्वया युजासहायेन इन्द्रः सस्रुतः सरणशीलाअपोवृष्टिलक्षणान्युदकानिमनवेमनुष्येभ्यः कः अकरोत् किंच अहिं वृत्रमसुरंअहन् हतवान् सप्तसर्पणशीलाः सिन्धूनपः अरिणात् प्रैरयेत् अपिहितेवअपिहितानीव वृत्रेणतिरोहितानिच अत्रेवशब्दश्चार्थे खानि स्रोतसांद्वाराणिअपावृणोदुद्घाटितवान् ॥ १ ॥

अथद्वितीया–

त्वायुजानिखिदत्सूर्यस्येन्द्रश्चक्रंसहसासद्यइन्दो ।
अधिष्णुनाबृहतावर्तमानंमहोद्रुहोअपविश्वायुधायि ॥ २ ॥

Funding by IKS-MoE

त्वा । यु॒जा । नि । स्वि॒द॒त् । सूर्य॑स्य । इन्द्रः॑ । च॒क्रम् । सह॑सा ।
स॒द्यः । इ॒न्दो॒ इति॑ । अधि॑ । स्नुना॑ । बृ॒ह॒ता । वर्त॑मानम् ।
म॒हः । द्रु॒हः । अप॑ । वि॒श्वऽआ॑यु । धा॒यि॒ ॥ २ ॥

हेइन्दो सोम इन्द्रःसद्यःसपदि त्वा त्वया युजा सहायेन सूर्यस्यप्रेरकस्यसवितुः संबन्धिनःपूर्वंद्विचक्रस्यरथस्यएकंचक्रंसहसाअभिभावुकेनबलेननिखिदत् आच्छिनत् कीदृशं अधि उपरि स्नुना स्थितेन बृहतामहतान्तरिक्षेणवर्तमानं किंच महोमहतःप्रभूतस्य द्रुहोद्रोग्धुः सूर्यस्य संबन्धिविश्वायु सर्वतोगंतृचक्रं अपधायि इन्द्रेणापहारि ॥ २ ॥

अथतृतीया—

अह॒न्निन्द्रो॒अद॑हद॒ग्निरि॑न्दोपु॒रादस्यू॑न्म॒ध्यन्दि॑नाद॒भीके॑ ।
दु॒र्गेदु॑रो॒णेक्रत्वा॒नया॒तांपु॒रूस॒हस्रा॒शर्वा॒निब॑र्हीत् ॥ ३ ॥

अह॑न् । इन्द्रः॑ । अद॑हत् । अ॒ग्निः । इ॒न्दो॒ इति॑ । पु॒रा ।
दस्यू॑न् । म॒ध्यंदि॑नात् । अ॒भीके॑ । दुः॒ऽगे । दु॒रो॒णे । क्रत्वा॑ । न ।
या॒ताम् । पु॒रु । स॒हस्रा॑ । शर्वा॑ । नि । ब॒र्ही॒त् ॥ ३ ॥

हेइन्दो सोम अभीके संग्रामे दस्यून् शत्रूनिन्द्रः अहन्नवधीत् अग्निः कांश्चिच्छत्रूनदहद्दाह कीदृशाविन्द्राग्नी मध्यंदिनान्मध्याह्नात्पुरापुरस्तात्पूर्वाह्णे तवपानाल्लब्धबलावितिशेषः यातांगच्छतामसुराणां पुरु पुरूणि बहूनि सर्वा सर्वाणि निरवशेषाणि सहस्रा सहस्राण्यपरिमितानि सैन्यानि निबर्हीत् इन्द्रःअवधीत् तत्रदृष्टान्तः—दुरोणे दुरवने रक्षितुमशक्येदुर्गेदुरवगाहेदेशेक्रत्वान कर्मणास्वकीयंकार्यमुद्दिश्यगच्छतःपथिकान्यथाधनलोलुपश्चोरोहन्तितद्वत् ॥३॥

अथचतुर्थी—

विश्व॑स्मात्सीमध॒माँइन्द्र॒दस्यू॒न्विशो॒दासी॑रकृणोरप्रश॒स्ताः ।
अबा॑धेथा॒ममृ॑णत॒ंनिशत्रू॒नवि॑न्देथा॒मप॑चिति॒ंवध॑त्रैः ॥ ४ ॥

विश्व॑स्मात् । सी॒म् । अ॒ध॒मात् । इ॒न्द्र॒ । दस्यू॑न् । विशः॑ । दासीः॑ ।
अ॒कृ॒णो॒ः । अ॒प्र॒ऽश॒स्ताः । अबा॑धेथाम् । अमृ॑णतम् । नि ।
शत्रू॑न् । अवि॑न्देथाम् । अप॑ऽचितिम् । वध॑त्रैः ॥ ४ ॥

हेइन्द्र त्वं सीमेनान्दस्यून् विश्वस्मात्सर्वस्मात् गुणादधमान्हीनान्अकृणोः अकरोः किंच दासीः कर्महीनाविशः मानुषीःप्रजाः अप्रशस्ताःगर्हिताअकृणोः हेइन्द्रासोमौ युवांशत्रून्बाधेथां न्यसृणतं नितरांहिंसितवन्तौ अपिच वधत्रैः तेषांशत्रूणांप्रहारैः अपचितिं पूजां जनेभ्यः अविन्देथां अलभेथाम् ॥ ४ ॥

अथपंचमी—

एवासत्यंमघवानायुवंतदिन्द्रश्चसोमोर्वमश्व्यंगोः ।
आदर्दृतमपिहितान्यश्नारिरिचथुःक्षाश्चित्ततृदाना ॥ ५ ॥ १७ ॥

एव । सत्यम् । मघऽवाना । युवम् । तत् । इन्द्रः । च । सोम ।
ऊर्वम् । अश्व्यम् । गोः । आ । अदर्दृतम् । अपिऽहितानि । अश्नां ।
रिरिचथुः । क्षाः । चित् । ततृदाना ॥ ५ ॥ १७ ॥

हेसोम त्वंचेन्द्रश्चेति युवामुभौ ऊर्वं महान्तमश्व्यं अश्वसमूहं गोः गवांसमूहंच आदर्दृतं आदरयतं अपिहितानि पणिभिराच्छादितानिगवांवृंदानि क्षाश्चित्पणीनांभूमीश्च अश्ना अशनपरेणबलेनरिरिचथुः रेचितवन्तौ हेमघवानौ धनवन्ताविन्द्रासोमौ ततृदाना शत्रूणांहिंसकौ युवं युवां एव एवं उक्तप्रकारेणयत्कृतवन्तौ तत्सर्वंसत्यमेव ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेसप्तदशोवर्गः ॥ १७ ॥

आनःस्तुतइतिपंचर्चमष्टमंसूक्तंवामदेवस्यार्षंत्रैष्टुभमैन्द्रं आनस्तुतइत्यनुक्रमणिका विनियोगोलैंगिकः ।

तत्रप्रथमा—

आनःस्तुतउपवाजेभिरूतीइन्द्रयाहिहरिभिर्मन्दसानः ।
तिरश्चिदर्यःसवनापुरूण्याङ्गूषेभिर्गृणानःसत्यराधाः ॥ १ ॥

आ । नः । स्तुतः । उप । वाजेभिः । ऊती । इन्द्र । याहि ।
हरिऽभिः । मन्दसानः । तिरः । चित् । अर्यः । सवना । पुरूणि ।
आङ्गूषेभिः । गृणानः । सत्यऽराधाः ॥ १ ॥

Funding by IKS-MoE

हेइन्द्र स्तुतस्त्वंवाजेभिर्वाजैरन्नैःसह तिरश्चित्प्राप्तानि तिरःसतइतिप्राप्तस्येतियास्कः[1] । पुरूणि पूर्णानि सवना सवनानि नोस्मदीयान्यज्ञान् उपप्रतिऊती ऊत्या नोस्माकंरक्षणार्थं हरिभिरश्वैरायाहि आगच्छ कीदृशः मंदसानोमोदमानः अर्यः स्वामी आंगूषेभिःस्तोत्रैर्गृणानःस्तूयमानःसत्यराधाःसत्यधनः ॥ १ ॥

अथद्वितीया–

आहिष्मा॒याति॒नर्य॑श्चिकि॒त्वान्हू॒यमा॑नःसो॒तृभि॒रुप॑य॒ज्ञम् ।
स्वश्वो॒योअभी॑रु॒र्मन्य॑मानःसुष्वा॒णेभि॒र्मद॑ति॒संह॑वी॒रैः ।। २ ॥

आ । हि । स्म॒ । याति॑ । नर्यः॑ । चि॒कि॒त्वान् । हू॒यमा॑नः ।
सो॒तृऽभिः॑ । उप॑ । य॒ज्ञम् । सु॒ऽअश्वः॑ । यः । अभी॑रुः । मन्य॑मानः ।
सु॒स्वा॒नेभिः॑ । मद॑ति । सम् । ह॒ । वी॒रैः ॥ २ ॥

नर्योनृभ्योहितः चिकित्वान्सर्वंजानन् सोतृभिः सोममभिषुण्वद्भिः ऋत्विग्भिर्हूयमानआहूयमानइन्द्रः अस्मदीयंयज्ञमुपप्रतिआयाति आगच्छतु हिष्मेतिपूरणौ स्वश्वः शोभनाश्वोपेतः अभीरुर्निर्भयशीलः सुस्वानेभिः सुन्वद्भिर्यजमानैर्मन्यमानःस्तूयमानोयइन्द्रः वीरैःशूरैर्मरुद्भिःसह संमदतिह सहमाद्यत्येव सइन्द्रः आगच्छत्वितिपूर्वेणसंबन्धः ॥ २ ॥

अथतृतीया–

श्रा॒वयेद॑स्य॒कर्णा॑वाज॒यध्यै॒जुष्टा॒मनु॒प्रदिशं॑मन्द॒यध्यै॑ ।
उ॒द्वा॒वृ॒षा॒णोराध॑से॒तुवि॑ष्मा॒न्कर॑न्न॒इन्द्रः॑सुती॒र्थाभय॑ंच ।। ३ ॥

श्र॒वय॑ । इत् । अ॒स्य॒ । कर्णा॑ ।। वा॒ज॒यध्यै॑ । जुष्टा॑म् । अनु॑ ।
प्र । दिश॑म् । म॒न्द॒यध्यै॑ । उ॒त्ऽव॒वृ॒षा॒णः । राध॑से । तुवि॑ष्मान् ।
कर॑त् । नः॒ । इन्द्रः॑ । सु॒ऽती॒र्था । अभ॑यम् । च॒ ॥ ३ ॥

हेस्तोतः त्वंअस्येन्द्रस्यसंबन्धिनौ कर्णा कर्णौ वाजयध्यै इन्द्रंबलिनं कर्तुंजुष्टामनुदिशंसेवितासुसर्वासुदिक्षु प्रमन्दयध्यै प्रकर्षेणेन्द्रंमादयितुंचश्रवय स्तोत्राणिश्रावय इ-

---

[1] नि० ३. २०.

दितिपूरणः उद्ववृषाणः सोमेनोत्सिच्यमानः तुविशुष्मान्बलवानिन्द्रः नोस्माकंराधसेधनार्थं सुतीर्था शोभनानितीर्थानि अभयंच भयराहित्यंच करत्करोतु ॥ ३ ॥

अथचतुर्थी–

अच्छा॒योगन्ता॒नाध॑मानमू॒तीइ॒त्थाविप्रं॒हव॑मानंगृ॒णन्त॑म् ।
उप॒त्मनि॒दधा॑नोधु॒र्या॒३॒॑शून्त्स॒हस्रा॑णिश॒तानि॒वज्र॑बाहुः ॥ ४ ॥

अच्छ॑ । यः । गन्ता॑ । नाध॑मानम् । ऊ॒ती । इ॒त्था । विप्र॑म् ।
हव॑मानम् । गृ॒णन्त॑म् । उप॑ । त्मनि॑ । दधा॑नः । धु॒रि । आ॒शून् ।
स॒हस्रा॑णि । श॒तानि॑ । वज्र॑ऽबाहुः ॥ ४ ॥

वज्रबाहुर्वज्रहस्तोयइन्द्रः त्मनि आत्मनि स्थितानात्मवश्यान् सहस्राणि सहस्रसंख्यान् शतानि शतसंख्याकान् आशून्शीघ्रगामिनोश्वान्धुरि रथवहनप्रदेशेउपदधानः संस्थापयन् ऊतीरक्षणार्थं नाधमानं याचमानं विप्रंमेधाविनं हवमानमाह्वयन्तं इत्था इत्थमनेनप्रकारेण गृणन्तं स्तुवन्तं यजमानं अच्छाभिमुख्येन गन्तागमनशीलोभवतीतिशेषः सइन्द्रः सुतीर्थान्यभयंच करोत्विति पूर्वेणसंबन्धः ॥ ४ ॥

अथपंचमी–

त्वोता॑सोमघवन्निन्द्र॒विप्रा॑व॒यन्ते॑स्यामसू॒रयो॑गृ॒णन्तः॑ ।
भे॒जा॒नासो॑बृ॒हद्दि॑वस्यरा॒यआ॑का॒य्य॑स्यदा॒वने॑पुरु॒क्षोः ॥५॥१८॥

त्वाऽऊ॑तासः । म॒घ॒ऽव॒न् । इ॒न्द्र॒ । विप्राः॑ । व॒यम् । ते॒ । स्या॒म॒ ।
सू॒रयः॑ । गृ॒णन्तः॑ । भे॒जा॒नासः॑ । बृ॒हत्ऽदि॑वस्य । रा॒यः । ।
आ॒ऽका॒य्य॑स्य । दा॒वने॑ । पु॒रु॒ऽक्षोः ॥ ५ ॥ १८ ॥

हेमधवन्धनवन्निन्द्र त्वोतासः त्वयारक्षिताः विप्रामेधाविनः गृणन्तः त्वां स्तुवन्तः सूरयः स्तोतारोवयं बृहद्दिवस्य महद्दीप्तेः आकाय्यस्य आसमन्तात्स्तुत्यस्य पुरुक्षोर्बहून्नस्य बहुकीर्तेर्वा ते त्वदीयस्य रायोधनस्य दावने निदाने निमित्तेसति भेजानासः त्वांभजमानाः स्याम भवेम ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेष्टादशोवर्गः ॥ १८ ॥

नकिरिन्द्रेतिचतुर्विंशत्यृचंनवमंसूक्तं वामदेवस्यार्षंगायत्रं अष्टमीचतुर्विंशीचद्वेअनुष्टुभौ इन्द्रोदेवता दिवश्चिद्धेत्ययंतृचउषोदेवताकइन्द्रदेवताकश्च तथाचानुक्रान्तं—नकिश्चतुर्विंशतिर्दिवश्चित्तृचउषस्यश्चगायत्रंत्वष्टम्यंत्येचानुष्टुभाविति । अतिरात्रेतृतीयेपर्यायेमैत्रावरुणशस्त्रेउत्तमावर्जमिदंसूक्तं तथाचसूत्रितम्—नकिरिन्द्रत्वदुत्तरइत्युत्तमामुद्धरेदिति ।

तत्रप्रथमा—

नकिरिन्द्रत्वदुत्तरोनज्यायाँअस्तिवृत्रहन् । नकिरेवायथात्वम् ॥ १ ॥

नकिः । इन्द्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति । वृत्रऽहन् ।
नकिः । एव । यथा । त्वम् ॥ १ ॥

हेवृत्रहन्निन्द्र वृत्रस्यनाशकेन्द्र लोकेएकोपीतिशेषः त्वत्त्वत्तःउत्तरःउत्कृष्टतरोनकिरस्ति नभवति त्वत्तः ज्यायान्प्रशस्यतरःएकोपिनास्ति हेइन्द्र त्वंलोकेयथाप्रसिद्धोभवसि तथाविधएकोपिनकिरेवास्ति नैवभवति कश्चिदपिलोकेइन्द्रसदृशोनास्तीत्यर्थः ॥ १ ॥

अथद्वितीया—

सत्रातेअनुकृष्टयोविश्वाचक्रेववावृतुः । सत्रामहाँअसिश्रुतः ॥ २ ॥

सत्रा । ते । अनु । कृष्टयः । विश्वा । चक्राऽइव । ववृतुः । सत्रा ।
महान् । असि । श्रुतः ॥ २ ॥

हेइन्द्र कृष्टयःप्रजाःतेत्वामनुलक्षीकृत्य सत्रा सत्यमेववावृतुः वर्तंते तत्रदृष्टान्तः—विश्वा विश्वानिव्याप्तानिचक्रेव चक्राणीव यथाचक्राणिशकटमनुवर्तन्तेतद्वत् हेइन्द्र महांस्त्वंसत्रा सत्यमेवश्रुतोविश्रुतोसि गुणैःप्रख्यातोभवसि ॥ २ ॥

अथतृतीया—

विश्वेचनेदनात्वादेवासइन्द्रयुयुधुः । यदहानक्तमातिरः ॥ ३ ॥

विश्वे । चन । इत् । अना । त्वा । देवासः । इन्द्र । युयुधुः । यत् ।
अहा । नक्तम् । आ । अतिरः ॥ ३ ॥

Funding by IKS-MoE

हेइन्द्र विश्वेचनेत् सर्वएवदेवतासोऽसुरान्विजिगीषवोदेवाः अनाप्राणरूपेणबलेन त्वा त्वां सहायंलब्ध्वायुयुधुः असुरैःसहयुद्धंचक्रुः यद्यस्मात्कारणात् अहा अहःसु नक्तंरात्रिषुच आतिरः आसमन्ताच्छत्रूनवधीः अतःकारणात् युयुधुरितिपूर्वेणसंबन्धः ॥ ३ ॥

अथचतुर्थी—

यत्रो॒तबा॑धि॒तेभ्य॑श्च॒क्रंकुत्सा॑ययु॒ध्यते॑ । मु॒षा॒यइ॑न्द्र॒सूर्य॑म् ॥ ४ ॥

यत्र॑ । उ॒त । बा॒धि॒तेभ्य॑ः । च॒क्रम् । कुत्सा॑य । युध्य॑ते ।

मु॒षा॒यः । इ॒न्द्र॒ । सूर्य॑म् ॥ ४ ॥

यत्रयस्मिन्युद्धे उतापिच हेइन्द्र त्वं बाधितेभ्यःकुत्ससहायेभ्यः युध्यते युद्धंकुर्वते कुत्सायच सूर्यं सूर्यसंबन्धिचक्रं मुषायः अमुष्णाः अपहृतवानसीत्यर्थः तस्मिन्युद्धेप्रावःशचीभिरेतशमितिपरेणसंबन्धः ॥ ४ ॥

अथपंचमी—

यत्र॑दे॒वाँऋ॑घाय॒तोविश्वाँ॒अयु॑ध्य॒एक॒इत् । त्वमि॑न्द्रव॒नूँरह॑न् ॥ ५ ॥ १९ ॥

यत्र॑ । दे॒वान् । ऋ॒घा॒य॒तः । विश्वा॑न् । अयु॑ध्यः । एक॑ः ।

इत् । त्वम् । इ॒न्द्र॒ । व॒नून् । अह॑न् ॥ ५ ॥ १९ ॥

हेइन्द्र त्वंएकइत् असहायएव यत्रयस्मिन्संग्रामेदेवानिन्द्रादीन्ऋघायतोबाधमानान्विश्वान्सर्वान्राक्षसादीन् अयुध्यःयुद्धमकरोः तथावनून्हिंसकान् अहन्नवधीः ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी—

यत्रो॒तमर्त्या॑य॒कमरि॑णाइन्द्र॒सूर्य॑म् । प्राव॒ःशची॑भि॒रेत॑शम् ॥ ६ ॥

यत्र॑ । उ॒त । मर्त्या॑य । कम् । अरि॑णाः । इ॒न्द्र॒ ।

सूर्य॑म् । प्र । आ॒व॒ः । शची॑भिः । एत॑शम् ॥ ६ ॥

यत्रयस्मिन्संग्रामे उतापिच हेइन्द्र त्वंमर्त्याय मनुष्याय एतशाख्याय ऋषये सूर्यमरिणाः अहिंसीः कमितिपूरणः तदानींशचीभिः युद्धकर्मभिःएतशंएतत्संज्ञकमृषिंप्रावः प्रकर्षेणारक्षः ॥ ६ ॥

अथसप्तमी–

कि॒मादु॒तासि॑वृत्रह॒न्मघ॑वन्मन्यु॒मत्त॑मः । अत्राह॒दानु॒माति॑रः ॥७॥

किम्॑ । आत् । उ॒त । अ॒सि॒ । वृ॒त्र॒ऽह॒न् । मघ॑ऽवन् । म॒न्यु॒मत्ऽत॑मः ।
अत्र॑ । अह॑ । दानु॑म् । आ । अ॒ति॒रः ॥ ७ ॥

हेवृत्रहन् वृत्राणामावरकाणांतमसांहन्तः मघवन्धनवन्निन्द्र त्वंआदनन्तरमेव उतापिच किमितिप्रश्ने मन्युमत्तमोसिकिं अत्यन्तंक्रोधवान्भवसि अत्रास्मिन्नन्तरिक्षेअहएवंदानुं दनोःपुत्रं वृत्रमातिरःआसमन्तादहिंसीः ॥ ७ ॥

अथाष्टमी–

ए॒तद्घेदु॒तवी॒र्य॑१॒मिन्द्र॑च॒कर्थ॒पौंस्य॑म् ।
स्त्रियं॒यद्दु॑र्हणा॒युवं॒वधी॑र्दुहि॒तरं॑दि॒वः ॥ ८ ॥

ए॒तत् । घ॒ । इत् । उ॒त । वी॒र्य॑म् । इन्द्र॑ । च॒कर्थ॑ । पौंस्य॑म् ।
स्त्रिय॑म् । यत् । दुः॒ऽह॒ना॒युव॑म् । वधीः॑ । दु॒हि॒तर॑म् । दि॒वः ॥ ८ ॥

हेइन्द्र उतापिच यत् यस्त्वंएतदुपलक्षितंपौंस्यंबलंवीर्यंसामर्थ्योपेतंचकर्थ कृतवानसि घइदितिपूरणौ किंच दुर्हणायुवं दुष्टंहननमिच्छन्तींदिवोदुहितरंद्युलोकसकाशादुत्पन्नांस्त्रियमुषसंवधीरवधीः ॥ ८ ॥

अथनवमी–

दि॒वश्चि॑द्घादुहि॒तरं॑म॒हान्म॑ही॒यमा॑नाम् । उ॒षास॑मिन्द्र॒सं॑पिणक् ॥९॥

दि॒वः । चि॒त् । घ॒ । दु॒हि॒तर॑म् । म॒हान् । म॒ही॒यमा॑नाम् ।
उ॒षस॑म् । इ॒न्द्र॒ । सम् । पि॒ण॒क् ॥ ९ ॥

हेइन्द्र महांस्त्वं दिवोदुहितरंद्युलोकस्यपुत्रीं महीयमानांपूज्यमानां उषसं उषोदेवीं संपिणक्चिद्ध संपिष्टवानसिखलु ॥ ९ ॥

अथदशमी–

अपो॒षाअन॑सःसर॒त्संपि॑ष्टा॒दह॑बि॒भ्युषी॑ । नियत्सीं॑शि॒श्नथ॒द्वृषा॑॥१०॥२०॥

Funding by IKS-MoE

अप । उषाः । अनसः । सरत् । सम्ऽपिष्टात् । अह । बिभ्युषी ।
नि । यत् । सीम् । शिश्नथत् । वृषा ॥ १० ॥ २० ॥

वृषा कामानांवर्षितेन्द्रः यद्यदासीमेतत् उषःसंबन्धिशकटंनिशिश्नथत् न्यवधीत् तदा उषाः उषोदेवता बिभ्युषी इन्द्रसकाशाद्भीतासतीसंपिष्टात् इन्द्रेणसंचूर्णितादनसःशकटात् अपसरदपजगाम अहेतिपूरणः ॥ १० ॥

॥ इतितृतीयस्यषष्ठेविंशोवर्गः ॥ २० ॥

अथैकादशी—

एतदस्याअनःशयेसुसंपिष्टंविपाश्या । ससारसींपरावतः ॥ ११ ॥
एतत् । अस्याः । अनः । शये । सुऽसंपिष्टम् । विऽपाशि ।
आ । ससार । सीम् । पराऽवतः ॥ ११ ॥

सुसंपिष्टमिन्द्रेणसुष्ठुचूर्णितंअस्याउषसःसंबन्धि एतदनःशकटं विपाशि विपाडाख्यानदी तस्यां तत्तीरेआशये आसमन्ताच्छेते अशेत सीमियमुषोदेवताशकटेभग्नेसति परावतोदूरदेशात् ससार अपससार ॥ ११ ॥

अथद्वादशी—

उतसिन्धुंविबाल्यंवितस्थानामधिक्षमि । परिष्ठाइन्द्रमायया ॥ १२ ॥
उत । सिन्धुम् । विऽबाल्यम् । विऽतस्थानाम् । अधि । क्षमि ।
परि । स्थाः । इन्द्र । मायया ॥ १२ ॥

हेइन्द्र उतापिच विबाल्यं विगतबाल्यावस्थांसंपूर्णजलां वितस्थानांवितिष्ठमानांसिंधुं नदीं अधिक्षमि क्षमायांमाययाप्रज्ञयापरिष्ठाः पर्यस्थाः सर्वतःस्थापनंकृतवानसि ॥ १२ ॥

अथत्रयोदशी—

उतशुष्णस्यधृष्णुयाप्रमृक्षोअभिवेदनम् । पुरोयदस्यसंपिणक् ॥ १३ ॥
उत । शुष्णस्य । धृष्णुऽया । प्र । मृक्षः । अभि । वेदनम् ।
पुरः । यत् । अस्य । सम्ऽपिणक् ॥ १३ ॥

Funding by IKS-MoE

उतापिच हेइन्द्र धृष्णुया धर्षकस्त्वं शुष्णस्यशुष्णनाम्नोसुरस्यसंबन्धिवेदनं वित्तं अभि अभितःसर्वतः प्रमृक्षः प्रकर्षेणाबाधथाः यद्यदा अस्यशुष्णस्यपुरःपुराणिनगराणिसंपिणक् संपिष्टवानसि तदाप्रमृक्षइतिसंबंधः ॥ १३ ॥

अथचतुर्दशी–

उतदासंकौलितरंबृहतःपर्वतादधि । अवाहन्निन्द्रशम्बरम् ॥१४॥

उत । दासम् । कौलिऽतरम् । बृहतः । पर्वतात् । अधि । अव ।
अहन् । इन्द्र । शम्बरम् ॥ १४ ॥

उतापिच हेइन्द्र त्वं दासमुपक्षपयितारंकौलितरं कुलितरनाम्नोपत्यं शंबरमसुरं बृहतोमहतःपर्वतादद्रेरधिउपरि अव अवाचीनंकृत्वा अहन् हतवानसि ॥ १४ ॥

अथपञ्चदशी–

उतदासस्यवर्चिनःसहस्राणिशतावधीः । अधिपञ्चप्रधीँरिव ॥ १५ ॥२१॥

उत । दासस्य । वर्चिनः । सहस्राणि । शता । अवधीः ।
अधि । पञ्च । प्रधीन्ऽइव ॥ १५ ॥ २१ ॥

उतापिच हेइन्द्र त्वं प्रधीनिव चक्रस्यपरितःस्थितान्शंकूनिव हिंसकान् पंचशता पंचशतानि पंचशतसंख्याकान् सहस्राणि सहस्रसंख्याकान् दासस्यलोकानामुपक्षपयितुः वर्चिनः वर्चिनामकस्यासुरस्यसंबन्धिनोनुचरान्पुरुषानधि अधिकं अवधीर्हतवानसि ॥१५॥

॥ इतितृतीयस्यषष्ठेएकाविंशोवर्गः ॥ २१ ॥

अथषोडशी–

उतत्यंपुत्रमग्रुवःपरावृक्तंशतक्रतुः । उक्थेष्विन्द्रआभजत् ॥ १६॥

उत । त्यम् । पुत्रम् । अग्रुवः । पराऽवृक्तम् । शतऽक्रतुः ।
उक्थेषु । इन्द्रः । आ । अभजत् ॥ १६ ॥

उतापिच शतक्रतुः शतकर्मेन्द्रः त्वं तं प्रसिद्धं अग्रुवः एतन्नाम्न्याःपुत्रं परावृक्तमेतन्नामकं उक्थेषु स्तोत्रेष्वाभजत् भागिनंकृतवान् अयमर्थोवम्रीभिःपुत्रमग्रुवइत्यस्यामृचि प्रतिपादितइति ॥ १६ ॥

अथसप्तदशी—

उ॒तत्यातु॒र्वशा॒यदू॑अस्ना॒तारा॒शची॒पति॑ः । इन्द्रो॑वि॒द्वाँअ॑पारयत् ॥ १७॥

उ॒त । त्या । तु॒र्वशा॒यदू इति॑ । अ॒स्ना॒तारा॑ । शची॒ऽपति॑ः ।
इन्द्र॑ः । वि॒द्वान् । अ॒पा॒र॒य॒त् ॥ १७ ॥

उतापिच अस्नाताराअस्नातारौययातिशापादनभिषिक्तौ त्या त्यौ तौ प्रसिद्धौ तुर्वशायदू तुर्वशनामानंयदुनामकंचराजानौ शचीपतिः कर्मणांपालकः यद्वा शचीन्द्रस्यभार्यातस्याःपतिर्भर्ताविद्वान्सकलमपिजानन्निन्द्रः अपारयदभिषेकार्हावकरोत् ॥ १७ ॥

अथाष्टादशी—

उ॒तत्यास॒द्यआर्या॑स॒रयो॑रिन्द्रपा॒रत॑ः । अर्णा॑चि॒त्रर॑थावधीः ॥ १८ ॥

उ॒त । त्या । स॒द्यः । आर्या॑ । स॒रयो॑ः । इ॒न्द्र॒ । पा॒रत॑ः ।
अर्णा॑चि॒त्रर॑था । अ॒व॒धी॒ः ॥ १८ ॥

उतापिच सद्यः सपदि हेइन्द्र त्वं त्या त्यौ तौ आर्या आर्यौ आर्यत्वाभिमानिनौसंतावपि इन्द्रविषयभक्तिश्रद्धारहितावित्यर्थः सरयोः सरय्वानद्याः पारतः पारेतीरेवसन्तौ अर्णाचित्ररथा अर्णनामकंचित्ररथनामकंचराजानौ अवधीःअहिंसीः ॥ १८ ॥

अथैकोनविंशी—

अनु॒द्वाज॑हि॒तान॑यो॒न्धंश्रो॒णंच॑वृत्रहन् । नतत्ते॑सु॒म्नम॒ष्ट॑वे ॥ १९ ॥

अनु॑ । द्वा । ज॒हि॒ता । न॒य॒ः । अ॒न्धम् । श्रो॒णम् । च॒ । वृ॒त्र॒ऽह॒न् ।
न । तत् । ते॒ । सु॒म्नम् । अष्ट॑वे ॥ १९ ॥

---

१ ऋ० सं० ३. ६. २. ।

हेवृत्रहन् वृत्रस्यहिंसकेन्द्र त्वं जहिता जहितौ सर्वैर्बन्धुभिःत्यक्तौअन्धंचक्षुर्हीनमेकंश्रोणं चपंगुमपरंचद्वाएतौद्वौअनुनयः अन्धपंगुत्वपरिहारेणानुनीतवानसि हेइन्द्र ते त्वयादत्तं तत्सुम्नं सुखं अष्टवे व्याप्तुंकोपिनप्रभवतीतिशेषः ॥ १९ ॥

अथविंशी–

शतमश्मन्मयीनांपुरामिन्द्रोव्यास्यत् । दिवोदासायदाशुषे ॥ २० ॥ २२ ॥

शतम् । अश्मन्ऽमयीनाम् । पुराम् । इन्द्रः । वि । आस्यत् ।
दिवःऽदासाय । दाशुषे ॥ २० ॥ २२ ॥

इन्द्रः अश्मन्मयीनां पाषाणैर्निर्मितानां पुरां शंबरस्यसंबन्धिनांनगराणां शतं शतसंख्याकं दिवोदासायैतन्नामकायदाशुषेहविर्दत्तवतेयजमानायव्यास्यत् व्यक्षिपत् ॥ २० ॥

॥ इतितृतीयस्यषष्ठेद्वाविंशोवर्गः ॥ २२ ॥

॥अथैकविंशी–

अस्वापयद्दभीतयेसहस्रात्रिंशतंहथैः । दासानामिन्द्रोमायया ॥ २१ ॥

अस्वापयत् । दभीतये । सहस्रा । त्रिंशतम् । हथैः । दासानाम् ।
इन्द्रः । मायया ॥ २१ ॥

इन्द्रोमायया स्वकीययाशक्त्या दासानांलोकानांउपक्षपयितॄणांराक्षसादीनांत्रिंशतं त्रिंशत्संख्याकानिसहस्रासहस्राणि दभीतयेदभीतिनामकस्यार्थाय हथैर्हननसाधनैरायुधैरस्वापयदवधीत् ॥ २१ ॥

अथद्वाविंशी–

सघेदुतासिवृत्रहन्त्समानइन्द्रगोपतिः । यस्ताविश्वानिचिच्युषे ॥ २२ ॥

सः । घ । इत् । उत । असि । वृत्रऽहन् । समानः । इन्द्र ।
गोऽपतिः । यः । ता । विश्वानि । चुच्युषे ॥ २२ ॥

उतापिच हेइन्द्र यस्त्वं ता तानि विश्वानि समस्तान्शत्रून्चिच्युषे प्राच्यावयः हेवृत्रहन् वृत्राणांशत्रूणांहिंसकेन्द्र गोपतिर्गवांपालकः सत्वंसमानःसर्वेषांयजमानानांसमःसन् प्रख्यातोसि घेदितिपूरणौ ॥ २२ ॥

अथत्रयोविंशी–

उतनूनंयदिन्द्रियंकरिष्याइन्द्रपौंस्यम् । अद्यानकिष्टदामिनत् ॥ २३ ॥

उत । नूनम् । यत् । इन्द्रियम् । करिष्याः । इन्द्र । पौंस्यम् ।
अद्य । नकिः । तत् । आ । मिनत् ॥ २३ ॥

उतापिच हेइन्द्र यत्पौंस्यंत्वदीयंबलं इन्द्रियं सामर्थ्योपेतं नूनंकरिष्याः कृतवानसिखलु अद्य अद्यतनः कश्चित्तद्बलंनकिरामिनत् नहिंस्यात् ॥ २३ ॥

अथचतुर्विंशी–

वामंवामंतआदुरेदेवोददात्वर्यमा ।
वामंपूषावामंभगोवामंदेवःकरूळती ॥ २४ ॥ २३ ॥

वामम्ऽवामम् । ते । आऽदुरे । देवः । ददातु । अर्यमा । वामम् ।
पूषा । वामम् । भगः । वामम् । देवः । करूळती ॥ २४ ॥ २३ ॥

हेआदुरे शत्रूणांदारयितरिन्द्र ते तव वामंवामं यद्यद्वननीयंसंभजनीयंधनमस्ति लोकेतद्वामंवसुअर्यमाअरीणांनियमयिता एतन्नामकोदेवःददातु प्रयच्छतु तथा करूळती कृत्तदंत पूषापोषकोदेवः वामंधनंददातु भगोपिधनंददातु अत्रकरूळतीत्येतत्संनिहितत्वाद्भगइत्यनेनसंबन्धनीयं अथवा अर्यमादीनांत्रयाणामपिविशेषणत्वेनभाव्यं कथंपूष्णोविशेषणंस्यादिति साकांक्षत्वात् नसान्निध्याकांक्षयोःसद्भावेपियोग्यतामन्तरेणान्वयायोगात् तस्मात्पूषाप्रपिष्टभागोदन्तकोहीत्यादिश्रुतिषुपूष्णएवादंतकत्वेनप्रसिद्धेर्व्यवहितस्यापितस्यैवविशेषणत्वंयुक्तं वामं वननीयंभवतीत्यादिनिरुक्तमत्रद्रष्टव्यं[1] ॥ २४ ॥

॥ इतितृतीयस्यषष्ठेत्रयोविंशोवर्गः ॥ २३ ॥

कयानइतिपंचदशर्चंदशमंसूक्तंवामदेवस्यार्षमैन्द्रं गायत्रं अभीषुणइत्येषापादनिचृन्नामगायत्री त्रयःसप्तकाःपादनिचृदितितल्लक्षणयुक्तत्वात् तथाचानुक्रमणिका–कयापंचोनाभीषुपादनिचृदिति । सूक्तविनियोगोलैंगिकः अग्निष्टोमेचातुर्विंशिकेहनिचमाध्यंदिनेसवनेमैत्रावरुणस्यकयानइत्याद्यस्तृचःस्तोत्रियः सूत्रितंच–होत्रकाणांकयानश्चित्रआभुवदिति । वरुणप्रघासेषुकायस्यहविषोनुवाक्याकयानइत्येषा तथाचसूत्रं–कयानश्चित्रआभुवद्धिरण्यगर्भःसमवर्तताग्रइति ।

---

[1] नि०६. ३१. ।

तत्रप्रथमा–

कया॑नश्चि॒त्रआभु॑वदू॒तीस॒दावृ॑ध॒ःसखा॑ । कया॒शचि॑ष्ठयावृ॒ता ॥ १ ॥

कया॑ । न॒ः । चि॒त्रः । आ । भु॒व॒त् । ऊ॒ती । स॒दाऽवृ॑धः । सखा॑ ।
कया॑ । शचि॑ष्ठया । वृ॒ता ॥ १ ॥

सदावृधः सदावर्धमानः चित्रश्चायनीयः पूजनीयः सखा मित्रभूतइन्द्रः कया ऊती ऊत्या तर्पणेननोस्मान् आभुवदाभिमुख्येनभवेत् शचिष्ठया प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन कयावृताकेनवर्तनेनकर्मणाच अभिमुखोभवेत् ॥ १ ॥

अथद्वितीया–

कस्त्वा॑स॒त्योमदा॑ना॒मंहि॑ष्ठोमत्स॒दन्ध॑सः । दृ॒ह्लाचि॑दा॒रुजे॒वसु॑ ॥ २ ॥

कः । त्वा॒ । स॒त्यः । मदा॑नाम् । मंहि॑ष्ठः । म॒त्स॒त् । अन्ध॑सः ।
दृ॒ह्ला । चि॒त् । आ॒ऽरुजे॑ । वसु॑ ॥ २ ॥

मंहिष्ठःपूजनीयः सत्यः सत्यभूतः मदानांमादयितॄणांमध्येकोमदकरः अंधसः सोमस्य रसः दृह्लाचिद्दृढान्यपि वसु वसूनि शत्रूणांधनानि आरुजे आसमन्ताद्भंक्तुं हेइन्द्र त्वा त्वां मत्सत् मादयेत् ॥ २ ॥

अथतृतीया–

अ॒भीषुण॒ःसखी॑नामवि॒ताज॑रितॄ॒णाम् । श॒तंभ॑वास्यू॒तिभि॑ः ॥ ३ ॥

अ॒भि । सु । न॒ः । सखी॑नाम् । अ॒वि॒ता । ज॒रि॒तॄ॒णाम् । श॒तम् ।
भ॒वा॒सि॒ । ऊ॒तिऽभि॑ः ॥ ३ ॥

हेइन्द्र त्वं सखीनांसमानख्यातीनां जरितॄणां स्तोतॄणां अवितारक्षिता त्वं शतं शतेन बह्वीभिरूतिभीरक्षाभिःसह नोस्माकं सु सुष्ठु अभिभवासि अभिमुखोभव ॥ ३ ॥

अथचतुर्थी–

अ॒भीन॒आव॑वृत्स्वच॒क्रंनवृ॒त्तमर्व॑तः । नि॒युद्भि॑श्चर्षणी॒नाम् ॥ ४ ॥

अ॒भि । न॒ः । आ । व॒वृ॒त्स्व॒ । च॒क्रम् । न । वृ॒त्तम् । अर्व॑तः ।
नि॒युत्ऽभि॑ः । च॒र्ष॒णी॒नाम् ॥ ४ ॥

हेइन्द्र त्वं वृत्तं चक्रंन वर्तमानंचक्रमिव अर्व॑तः उपगन्तॄन्नोस्मान् चर्ष॑णीनां अस्मदीयानांमनुष्याणां नियुद्भिः स्तुतिभिः अभ्याववृत्स्व अभ्यावर्तस्व ॥ ४ ॥

अथपंचमी–

प्र॒वता॒हिक्रतू॑ना॒माहा॑प॒दे॒वगच्छ॑सि । अभ॑क्षि॒सूर्ये॒॑सचा॑ ॥ ५ ॥ २४ ॥

प्र॒ऽवता॑ । हि । क्रतू॑नाम् । आ । ह॒ । प॒दाऽइ॑व । गच्छ॑सि । अभ॑क्षि ।
सूर्ये॑ । सचा॑ ॥ ५ ॥ २४ ॥

हेइन्द्र त्वं क्रतूनां कर्मणां यजमानानांसंबन्धिनः प्रवता प्रवतः प्रवणान्देशान्पदेव पदानिस्वकीयानिस्थानानीव आगच्छसिहि आगतोभवसिखलु हेतिपूरणः हेइन्द्र त्वां अहं सूर्ये सूर्येणसचासह अभक्षिभजे ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेचतुर्विंशोवर्गः ॥ २४ ॥

अथषष्ठी–

संयत्त॑इन्द्रम॒न्यव॒ःसंच॒क्राणि॑दधन्वि॒रे । अध॒त्वेअध॒सूर्ये॑ ॥ ६ ॥

सम् । यत् । ते॒ । इ॒न्द्र॒ । म॒न्यव॑ः । सम् । च॒क्राणि॑ । द॒ध॒न्वि॒रे ।
अध॑ । त्वे इति॑ । अध॑ । सूर्ये॑ ॥ ६ ॥

हेइन्द्र ते त्वदर्थं मन्यवः स्तुतयः यद्यदासंदधन्विरे अस्माभिरनुमन्यन्ते चक्राणि चंक्रमणानिकर्माणिचसंदधन्विरे अध तदानीं ताः स्तुतयः तानिकर्माणिच त्वे त्वयि भवन्ति अध तदनन्तरंसूर्येचभवन्ति ॥ ६ ॥

अथसप्तमी–

उ॒तस्मा॒हित्वामा॒हुरिन्म॒घवा॑नंशचीपते । दाता॑र॒मवि॑दीधयुम् ॥ ७ ॥

उ॒त । स्म॒ । हि । त्वाम् । आ॒हुः । इत् । म॒घऽवा॑नम् । श॒ची॒ऽप॒ते॒ ।
दाता॑रम् । अवि॑ऽदीधयुम् ॥ ७ ॥

हेशचीपते कर्मपालकेन्द्र उतापिच मघवानं धनवन्तं दातारं स्तोतृभ्योभीष्टप्रदं त्वा त्वामविदीधयुं विदीधयुरदीप्यमानः नविदीधयुरविदीधयुःतंदीप्यमानमाहुःस्म प्रवदन्तिखलु हीदितिद्वयंपूरणार्थं ॥ ७ ॥

अथाष्टमी–

उ॒तस्मा॑स॒द्यइत्परि॑शशमा॒नाय॑सुन्व॒ते । पु॒रूचि॑न्मंहसे॒वसु॑ ॥ ८ ॥

उ॒त । स्म॒ । स॒द्यः । इत् । परि॑ । श॒श॒मा॒नाय॑ । सु॒न्व॒ते । पु॒रु ।
चि॒त् । मं॒ह॒से॒ । वसु॑ ॥ ८ ॥

उतापिच हेइन्द्र त्वं सद्यइत् सद्यएव शशमानाय स्तुतिंकुर्वते शशमानःशंसमानइतियास्केनोक्तत्वात्[१] । सुन्वते सोमाभिषवंकुर्वतेयजमानाय पुरुचित् पुरूणिबहून्यपिवसूनि धनानिपरि परितोमंहसेस्म प्रयच्छसिखलु ॥ ८ ॥

अथनवमी–

न॒हिष्मा॑तेश॒तंच॒नराधो॒वर॑न्तआ॒मुरः॑ । नच्यौ॒त्नानि॑करिष्य॒तः ॥ ९ ॥

न॒हि । स्म॒ । ते॒ । श॒तम् । च॒न । राधः॑ । वर॑न्ते । आ॒ऽमुरः॑ । न ।
च्यौ॒त्नानि॑ । क॒रि॒ष्य॒तः ॥ ९ ॥

हेइन्द्र आमुरः बाधकाराक्षसादयः ते त्वदीयं शतंचन शतपरिमितमपि राधोधनं नहिवरन्तेस्म नवारयन्तिखलु किंच शत्रूणांहिंसनंकरिष्यतः तव च्यौत्नानि बलानि नवारयन्ति ॥ ९ ॥

अथदशमी–

अ॒स्माँअ॑वन्तुतेश॒तम॒स्मान्त्स॒हस्र॑मू॒तयः॑ ।
अ॒स्मान्विश्वा॑अ॒भिष्ट॑यः ॥ १० ॥२५॥

अ॒स्मान् । अ॒व॒न्तु । ते॒ । श॒तम् । अ॒स्मान् । स॒हस्र॑म् । ऊ॒तयः॑ ।
अ॒स्मान् । विश्वाः॑ । अ॒भिष्ट॑यः ॥ १० ॥ २५

---

[१] नि० ६. ८.।

Funding by IKS-MoE

हेइन्द्र ते त्वदीयाः शतं शतसंख्याकाः ऊतयोरक्षाः अस्मानवन्तु रक्षन्तु सहस्रं सहस्रसंख्याकास्त्वदीयारक्षाः अस्मानवन्तु विश्वासर्वाण्यभिष्टयः अभीष्टयस्त्वदीयान्यभिगमनानिअस्मानवन्तु ॥ १० ॥

॥ इतितृतीयस्यषष्ठेपंचविंशोवर्गः ॥ २५ ॥

अथैकादशी—

अ॒स्माँइ॒हावृ॑णीष्वस॒ख्याय॑स्व॒स्तये॑ । म॒होरा॒येदि॒वित्म॑ते ॥ ११ ॥

अ॒स्मान् । इ॒ह । वृ॒णी॒ष्व॒ । स॒ख्याय॑ । स्व॒स्तये॑ । म॒हः । रा॒ये ।
दि॒वित्म॑ते ॥ ११ ॥

हेइन्द्र त्वं इहास्मिन्यज्ञे अस्मान्यजमानान्सख्याय सखिभावाय स्वस्तये अविनाशायच महोमहतेदिवित्मते दीप्तिमते राये धनायच वृणीष्व संभजस्व ॥ ११ ॥

अथद्वादशी—

अ॒स्माँअ॑वि॒ड्ढि॒वि॒श्वहेन्द्र॑रा॒याप॑रीणसा ।
अ॒स्मान्विश्वा॑भिरू॒तिभिः॑ ॥ १२ ॥

अ॒स्मान् । अ॒वि॒ड्ढि॒ । वि॒श्वहा॑ । इन्द्र॑ । रा॒या । परी॑णसा । अ॒स्मान् ।
विश्वा॑भिः । ऊ॒तिऽभिः॑ ॥ १२ ॥

हेइन्द्र त्वं विश्वहा सर्वेष्वहःसुपरीणसा महतारायाधनेन अस्मान्यजमानानविड्ढि रक्ष किंच विश्वाभिःसर्वाभिरूतिभीरक्षाभिः अस्मानविड्ढि ॥ १२ ॥

अथत्रयोदशी—

अ॒स्मभ्यं॒ताँअपा॑वृधिव्र॒जाँअस्तै॑व॒गोम॑तः
नवा॑भिरिन्द्रो॒तिभिः॑ ॥ १३ ॥

अ॒स्मभ्य॑म् । तान् । अप॑ । वृ॒धि॒ । व्र॒जान् । अस्ता॑ऽइव ।
गोऽम॑तः । नवा॑भिः । इ॒न्द्र॒ । ऊ॒तिऽभिः॑ ॥ १३ ॥

हेइन्द्र त्वं नवाभिर्नूतनाभिः ऊतिभीरक्षाभिः अस्तेव क्षेप्ताशूरइव गोमतोगोभिर्युक्तान्तान्प्रसिद्धान्व्रजान्गोनिवासानस्मभ्यमपावृधि उद्घाटय ॥ १३ ॥

अथचतुर्दशी–

अ॒स्माकं॑धृष्णु॒यारथो॑द्यु॒माँइ॒न्द्रान॑पच्युतः । ग॒व्युर॑श्व॒युरी॑यते ॥ १४ ॥

अ॒स्माकं॑म् । धृ॒ष्णु॒ऽया । रथः॑ । द्यु॒ऽमान् । इ॒न्द्र॒ । अन॑पऽच्युतः ।
ग॒व्युः । अ॒श्व॒ऽयुः । ई॒य॒ते॒ ॥ १४ ॥

हेइन्द्र धृष्णुया धृष्णुःशत्रूणांधर्षकः द्युमान्दीप्तिमाननपच्युतः विनाशरहितः गव्युर्गोमान् अश्वयुरश्ववान् अस्माकमस्मत्संबन्धीरथईयते सर्वत्रगच्छतु तेनरथेनास्मान्रक्षेत्यर्थः ॥ १४ ॥

अस्माकमुत्तमंकृधीत्यनयाआदित्यंदृष्ट्वारथादवरोहेत् तथाचसूत्रितं–अस्माकमुत्तमंकृधीत्यादित्यमीक्षमाणोजपित्वावरोहेदिति ।

सैषापंचदशी–

अ॒स्माक॑मुत्त॒मंकृ॑धि॒श्रवो॑दे॒वेषु॑सूर्य । वर्षि॑ष्ठ॒न्द्यामि॑वो॒परि॑ ॥१५॥२६॥

अ॒स्माक॑म् । उ॒त्ऽत॒मम् । कृ॒धि॒ । श्रवः॑ । दे॒वेषु॑ । सू॒र्य॒ । वर्षि॑ष्ठम् ।
द्याम्ऽइ॑व । उ॒परि॑ ॥ १५ ॥ २६ ॥

हेसूर्य सर्वस्यप्रेरकेन्द्र हेआदित्यवा त्वंदेवेषुद्योतमानेषुवह्न्यादिषुमध्ये अस्माकमस्मत्संबन्धिश्रवोयशःउत्तममुत्कृष्टंकृधि कुरु तत्रदृष्टान्तः–वर्षिष्ठमतिशयेनप्रवृद्धंसेचनसमर्थंवाद्यामिव द्युलोकंयथासर्वेषांलोकानामुपरिस्थितमुत्कृष्टमकरोस्तद्वत् ॥ १५ ॥

॥ इतितृतीयस्यषष्ठेषड्विंशोवर्गः ॥ २६ ॥

आतूनइन्द्रेतिचतुर्विंशत्यृचमेकादशंसूक्तं वामदेवस्यार्षंगायत्रमैन्द्रं अन्त्येकनीनकेवेत्यादिकेद्वे इन्द्रस्याश्वदेवताके तथाचानुक्रान्तं–आतूनश्चतुर्विंशतिरन्त्याभ्यामैन्द्राश्वौस्तुताविति । गतोविनियोगः ।

तत्रप्रथमा–

आतू न॑इन्द्रवृत्रहन्न॒स्माक॑म॒र्धमाग॑हि । म॒हान्म॒हीभि॑रू॒तिभिः॑ ॥ १ ॥

आ । तु । नः॒ । इ॒न्द्र॒ । वृ॒त्र॒ऽह॒न् । अ॒स्माक॑म् । अ॒र्धम् । आ ।
ग॒हि॒ । म॒हान् । म॒हीभिः॑ । ऊ॒तिऽभिः॑ ॥ १ ॥

Funding by IKS-MoE

हेवृत्रहन् वृत्राणां शत्रूणांहिंसकेन्द्र त्वंनोस्मान्प्रति तु क्षिप्रमागच्छ हेइन्द्र महान्प्रभूतस्त्वं महीभिर्महतीभिरूतिभीरक्षाभिःसह अस्माकमर्धं समीपे आगहि आगच्छ ॥ १ ॥

अथद्वितीया—

भ्रमि॑श्चि॒द्घासि॒तूतु॑जि॒राचि॑त्रचि॒त्रिणी॒ष्वा । चि॒त्रंकृ॑णोष्यू॒तये॑ ॥ २ ॥

भ्रमि॑ः । चि॒त् । घ॒ । अ॒सि॒ । तूतु॑जिः । आ । चि॒त्र॒ । चि॒त्रिणी॑षु ।
आ । चि॒त्रम् । कृ॒णो॒षि॒ । ऊ॒तये॑ ॥ २ ॥

हेचित्र चायनीय पूजनीयेन्द्र त्वं भ्रमिश्चित् भ्रमणशीलोपि तूतुजिः घासि अस्मदभीष्टप्रदाताचभवसि आकारश्चार्थे चित्रिणीषुचित्रकर्मयुक्तासु अस्मद्रूपासु प्रजासु चित्रंचायनीयंधनं ऊतये रक्षणाय आकृणोषि आसमंतात्करोषि ॥ २ ॥

अथतृतीया—

द॒भ्रेभि॑श्चि॒च्छशी॑यांसं॒हंसि॒व्राध॑न्त॒मोज॑सा । सखि॑भि॒र्येत्वेसचा॑ ॥३॥

द॒भ्रेभि॑ः । चि॒त् । शशी॑यांसम् । हंसि॑ । व्राध॑न्तम् । ओज॑सा ।
सखि॑ऽभिः । ये । त्वे इति॑ । सचा॑ ॥ ३ ॥

हेइन्द्र त्वं दभ्रेभिश्चित् अल्पैरपिसखिभिर्यजमानैःसह शशीयांसं शशप्लुतगतौ उत्प्लुवमानं व्राधन्तं महान्तमपि शत्रुमोजसाबलेनहंसि नाशयसि येयजमानाः त्वेत्वयिसचा संगताः तैरितिपूर्वेणसंबन्धः ॥ ३ ॥

अथचतुर्थी—

व॒यमि॑न्द्र॒त्वेसचा॑व॒यन्त्वा॒भिनो॑नुमः । अ॒स्माँअ॑स्माँ॒इदुद॑व ॥ ४ ॥

व॒यम् । इ॒न्द्र॒ । त्वे इति॑ । सचा॑ । व॒यम् । त्वा॒ । अ॒भि । नो॒नु॒म॒ः ।
अ॒स्मान्ऽअ॑स्मान् । इत् । उत् । अ॒व॒ ॥ ४ ॥

हेइन्द्र वयंयजमानास्त्वे त्वयि सचासंगताः स्मः वयं त्वा त्वां अभिनोनुमः अतिशयेनाभिष्टुमः हेइन्द्र त्वमपि अस्मानस्मानित् सर्वानस्मानेव उदव उत्कर्षेणरक्ष ॥ ४ ॥

Funding by IKS-MoE

अथपंचमी–

सनं॑श्चि॒त्राभि॑रद्रिवोनव॒द्याभि॑रू॒तिभिः॑ । अना॑धृष्टाभि॒रागं॑हि ॥५॥२७॥

सः । न॒ः॑ । चि॒त्राभिः॑ । अ॒द्रि॒ऽव॒ः । अ॒न॒व॒द्याभिः॑ ऊ॒तिऽभिः॑ ।
अना॑धृष्टाभिः । आ । ग॒हि॒ ॥ ५ ॥ २७

हेअद्रिवः वज्रवन्निंद्र सत्वं चित्राभिश्चायनीयाभिरनवद्याभिरनिन्दिताभिः अनाधृष्टाभिः शत्रुभिरप्रधर्षितैः ऊतिभीरक्षणैःसहितःसन् नोस्मानागहि आगच्छ ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेसप्तविंशोवर्गः ॥ २७ ॥

अथषष्ठी–

भू॒यामो॒षुत्वाव॑त॒ःसखा॑यइन्द्र॒गोम॑तः । युजो॒वाजा॑य॒घृष्व॑ये ॥ ६ ॥

भू॒यामो॒ इति॑ । सु । त्वाऽव॑तः । सखा॑यः । इ॒न्द्र॒ । गोऽम॑तः ।
युज॑ः । वाजा॑य । घृष्व॑ये ॥ ६ ॥

हेइन्द्र त्वावतः त्वत्सदृशस्यगोमतोगोभिर्युक्तस्यदेवस्यसंबन्धिनःसखायः स्तोतारोवयं घृष्वये महते वाजायान्नाययुजः संयुक्ताः सु सुष्ठु भूयामोभवामैव ॥ ६ ॥

अथसप्तमी–

त्वंह्येक॒ईशि॑ष॒इन्द्र॒वाज॑स्य॒गोम॑तः । सनो॑यन्धिम॒हीमिष॑म् ॥ ७ ॥

त्वम् । हि । एक॑ः । ईशि॑षे । इन्द्र॑ । वाज॑स्य । गोऽम॑तः । सः ।
न॒ः । य॒न्धि॒ । म॒हीम् । इष॑म् ॥ ७ ॥

हेइन्द्र हियस्मात्कारणात् त्वं एकएव गोमतोगोभिर्युक्तस्यवाजस्यान्नस्य ईशिषे प्रभवसि अतःकारणात्सत्वंनोस्मभ्यंमहींमहतींइषमन्नं यन्धि प्रयच्छ ॥ ७ ॥

अथाष्टमी–

नत्वा॑वरन्तेअ॒न्यथा॒यद्दित्सं॑सिस्तु॒तोम॒घम् । स्तो॒तृभ्य॑इन्द्रगिर्वणः ॥८॥

न । त्वा॒ । व॒र॒न्ते॒ । अ॒न्यथा॑ । यत् । दित्सं॑सि । स्तु॒तः । म॒घम् ।
स्तो॒तृऽभ्य॑ः । इ॒न्द्र॒ । गि॒र्व॒ण॒ः ॥ ८ ॥

Funding by IKS-MoE

हेइन्द्र गिर्वणः गिरांसंभक्तः स्तुतोस्माभिःसंस्तुतः यद्यदा स्तोतृभ्योस्मभ्यंमघंधनंदित्ससि दातुमिच्छसि तदा त्वा त्वांअन्यथा प्रकारान्तरेणनवरन्ते ननिवारयन्ति किन्तुसर्वेप्यनुकूलाएवभवन्ति ॥ ८ ॥

अथनवमी–

अ॒भित्वा॒गोत॑मागि॒रानू॑षत॒प्रदा॒वने॑ । इन्द्र॒वाजा॑य॒घृष्व॑ये ॥ ९ ॥

अ॒भि । त्वा॒ । गोत॑माः । गि॒रा । अनू॑षत । प्र । दा॒वने॑ । युजः॑ ।
वाजा॑य । घृष्व॑ये ॥ ९ ॥

हेइन्द्र त्वा त्वामभिलक्षीकृत्य गोतमाएतन्नामकाऋषयः गिरा स्तुतिरुपयावाचा दावने धनदानार्थंप्रानूषत प्रकर्षेणस्तुवन्ति घृष्वयेमहतेवाजायान्नायप्रस्तुवन्ति ॥ ९ ॥

अथदशमी–

प्रते॑वोचामवी॒र्या॒३॑याम॑न्दसा॒नआरु॑जः । पुरो॒दासी॑र॒भीत्य॑ ॥१०॥२८॥

प्र । ते॒ । वो॒चा॒म॒ । वी॒र्या॑ । याः । म॒न्द॒सा॒नः । आ । अरु॑जः ।
पुरः॑ । दासीः॑ । अ॒भि॒ऽइत्य॑ ॥ १० ॥ २८ ॥

हेइन्द्र मंदसानः सोमेनमोदमानस्त्वं दासीःक्षेप्तुरसुरस्यस्वभूताःयाःपुरःयानिपुराणि नगराणि अभीत्याभिगम्य आरुजः आसमन्तादभांक्षीः हेइन्द्र तेत्वदीयानितत्रत्यानिवीर्यावीर्याणि वयंस्तोतारःप्रवोचाम प्रकर्षेणवदाम ॥ १० ॥

॥ इतितृतीयस्यषष्ठेष्टाविंशोवर्गः ॥ २८ ॥

अथैकादशी–

ताते॑गृणन्तिवे॒धसो॒यानि॑च॒कर्थ॒पौंस्या॑ । सु॒तेष्वि॑न्द्रगिर्व॑णः ॥ ११ ॥

ता । ते॒ । गृ॒ण॒न्ति॒ । वे॒धसः॑ । यानि॑ । च॒कर्थ॑ । पौंस्या॑ ।
सु॒तेषु॑ । इ॒न्द्र॒ । गि॒र्व॒णः॒ ॥ ११ ॥

हेइन्द्र गिर्वणः गिरांस्तुतिरूपाणांवाचांसंभक्ता त्वं यानि पौंस्या पौंस्यानि बलानि चकर्थ कृतवानसि हेइन्द्र वेधसः प्राज्ञाः सुतेष्वभिसुतेषुसोमेषु तेत्वदीयानिता तानि बलानि गृणन्तिकीर्तयन्ति ॥ ११ ॥

Funding by IKS-MoE

अथद्वादशी—

अवींवृधन्तगोतमाइन्द्रत्वेस्तोमवाहसः। ऐषुधावीरवद्यशः॥ १२॥

अवींवृधन्त। गोतमाः। इन्द्र। त्वे इति। स्तोमऽवाहसः। आ।
एषु। धाः। वीरऽवत्। यशः॥ १२॥॥

स्तोमवाहसः स्तोमानांस्तोत्राणांवोढारः गोतमाऋषयः हेइन्द्र त्वे त्वामवीवृधन्त स्तोत्रैर्वर्धयन्ति त्वंएषुगोतमेषु वीरवत्पुत्रपौत्रादियुक्तंयशोन्नमाधाः निधेहि॥ १२॥

अथत्रयोदशी—

यच्चिद्धिशश्वतामसीन्द्रसाधारणस्त्वम्। तंत्वांवयंहवामहे॥ १३॥

यत्। चित्। हि। शश्वताम्। असि। इन्द्र। साधारणः।
त्वम्। तम्। त्वा। वयम्। हवामहे॥ १३॥

हेइन्द्र त्वं यच्चिद्धि यद्यपिखलु शश्वतां बहूनां सर्वेषांयजमानानांसाधारणोसि सामान्योभवसि तथापि तमेव त्वा त्वांवयंस्तोतारः हवामहे आह्वयामः॥ १३॥

अथचतुर्दशी—

अर्वाचीनोवसोभवास्मेसुमत्स्वान्धसः। सोमानामिन्द्रसोमपाः॥ १४॥

अर्वाचीनः। वसो इति। भव। अस्मे इति। सु। मत्स्व।
अन्धसः। सोमानाम्। इन्द्र। सोमऽपाः॥ १४॥

हेवसोयज्ञेनिवासकेन्द्र त्वमस्मे अस्मासुयजमानेषु अर्वाचीनोभिमुखोभव तथा हेसोमपाः सोमानांपातरिन्द्र त्वं सोमानामन्धसान्नेन सु सुष्ठु मत्स्व माद्य॥ १४॥

अथपंचदशी—

अस्माकंत्वामतीनामास्तोमइन्द्रयच्छतु। अर्वागावर्तयाहरी॥ १५॥

अस्माकम्। त्वा। मतीनाम्। आ। स्तोमः। इन्द्र। यच्छतु।
अर्वाक्। आ। वर्तय। हरी इति॥ १५॥

मतीनांस्तोतॄणां मन्यतेःकर्तरिक्तिच् अस्माकंसंबन्धिस्तोमः स्तोत्रं हेइन्द्र त्वा त्वामायच्छतु अस्मासुनियच्छतु त्वमपिहरी त्वदीयावश्वौ अर्वागस्मदभिमुखंयथाभवतितथा वर्तय परिवर्तनंकुरु ॥ १५ ॥ अथषोडशी–

पुरोळाशंचनोघसोजोषयासेगिरश्चनः । वधूयुरिवयोषणाम् ॥ १६ ॥ २९ ॥

पुरोळाशम् । च । नः । घसः । जोषयासे । गिरः । च । नः ।
वधूयुःऽइव । योषणाम् ॥ १६ ॥ २९ ॥

हेइन्द्र त्वंनोस्मदीयंपुरोळाशं चरुपुरोडाशरूपमन्नंच घसः अद्धि तथानोस्मदीयागिरश्च स्तुतिरूपावाचश्च जोषयासे सेवस्व तत्रदृष्टान्तः–वधूयुरिव स्त्रीकामोयथायोषणांस्त्रीणांगिरःसेवतेतद्वत् ॥ १६ ॥

॥ इतितृतीयस्यषष्ठेएकोनत्रिंशोवर्गः ॥ २९ ॥

अथसप्तदशी–

सहस्रंव्यतीनांयुक्तानामिन्द्रमीमहे । शतंसोमस्यखार्यः ॥ १७ ॥

सहस्रम् । व्यतीनाम् । युक्तानाम् । इन्द्रम् । ईमहे ।
शतम् । सोमस्य । खार्यः ॥ १७ ॥

वयं स्तोतारः इन्द्रं परमैश्वर्ययुक्तंयुक्तानांशिक्षितानां व्यतीनां गमनवतामश्वानांसहस्रसंख्याकं ईमहे याचामहे तथा सोमस्याभिषुतसोमस्य शतं शतसंख्याकाः खार्यः खारीरीमहे अत्रमानविशेषवाचिनाखारीशब्देनद्रोणकलशउपलक्ष्यते अपरिमितद्रोणकलशान्बहून्यज्ञान्याचामहइत्यर्थः ॥ १७ ॥ अथाष्टादशी–

सहस्रातेशतावयंगवामाच्यावयामसि । अस्मत्राराधएतुते ॥ १८ ॥

सहस्रा । ते । शता । वयम् । गवाम् । आ । च्यवयामसि ।
अस्मऽत्रा । राधः । एतु । ते ॥ १८ ॥

हेइन्द्र ते त्वदीयानि गवां सहस्रा सहस्रसंख्याकानि शता शतसंख्याकानिच च्यावयामसि आच्यावयामः अस्मदभिमुखंकुर्मः तथा अस्मत्रा अस्मदीयंराधोधनं ते त्वत्तः एतु आगच्छतु ॥ १८ ॥ अथैकोनविंशी–

दशतेकलशानांहिरण्यानामधीमहि । भूरिदाअसिवृत्रहन् ॥ १९ ॥

Funding by IKS-MoE

दशं । ते । कुलशानाम् । हिरण्यानाम् । अधीमहि । भूरिऽदाः ।
असि । वृत्रऽहन् ॥ १९ ॥

हेइन्द्र ते त्वत्तः कलशानांकुंभानां कुंभपरिमितानामितियावत् हिरण्यानां हितरमणीयानांधनानां दशसंख्याकानि अधीमहि धारयामः हेवृत्रहन् वृत्राणांशत्रूणांहिंसकेन्द्र त्वं भूरिदाअसि बहुप्रदोभवसि ॥ १९ ॥ अथविंशी—

भूरिदाभूरिदेहिनोमादभ्रंभूर्याभर । भूरिघेदिन्द्रदित्ससि ॥ २० ॥

भूरिऽदाः । भूरि । देहि । नः । मा । दभ्रम् । भूरि । आ । भर ।
भूरि । घ । इत् । इन्द्र । दित्ससि ॥ २० ॥

हेइन्द्र भूरिदाः बहुप्रदस्त्वं भूरि बहुधनं नोस्मभ्यंदेहि प्रयच्छ किन्तु दभ्रंअल्पधनंमाप्रयच्छ भूरिबहुलंधनमस्मभ्यमाभरआहर किंच भूरिइत् अदभ्रमेवधनंदित्ससि घ अस्मभ्यंदातुमिच्छसिखलु ॥ २० ॥ अथैकविंशी—

भूरिदाह्यसिश्रुतःपुरुत्राशूरवृत्रहन् । आनोभजस्वराधसि ॥ २१ ॥

भूरिऽदाः । हि । असि । श्रुतः । पुरुऽत्रा । शूर । वृत्रऽहन् ।
आ । नः । भजस्व । राधसि ॥ २१ ॥

हेवृत्रहन् वृत्रस्यहिंसक शूर विक्रान्तेन्द्र भूरिदाः बहुप्रदस्त्वं पुरुत्रा पुरुषुबहुषुयजमानेषुश्रुतोसिहि विख्यातोभवसिखलु राधसि धनेनोस्मानाभजस्व आसमन्ताद्भागिनःकुरु ॥२१॥

अथद्वाविंशी—

प्रतेबभ्रूविचक्षणशंसामिगोषणोनपात् । माभ्यांगाअनुशिश्रथः ॥२२॥

प्र । ते । बभ्रू इति । विऽचक्षण । शंसामि । गोऽसनः ।
नपात् । मा । आभ्याम् । गाः । अनु । शिश्रथः ॥ २२ ॥

हेविचक्षण प्राज्ञेन्द्र ते त्वदीयौ बभ्रू बभ्रुवर्णावश्वौ प्रशंसामि प्रकर्षेणस्तौमि हेगोषणः गवांसनितः हेनपात् नपातयितः स्तोतॄनविनाशयितः किंतुपालयितरित्यर्थः हेइन्द्र त्वं आभ्यां त्वदीयाभ्यामश्वाभ्यांगाः अनु अस्मदीयागाःलक्षीकृत्य माशिश्रथः विनष्टामाकार्षीः गावोश्वदर्शनाद्विश्लिष्यन्ते तन्माभूदित्यर्थः ॥ २२ ॥

Funding by IKS-MoE

अथत्रयोविंशी–

क॒नी॒न॒केव॑विद्र॒धेनवे॑द्रु॒प॒देअ॑र्भ॒के । ब॒भ्रूयामे॑षुशोभेते ॥ २३ ॥

क॒नी॒न॒का इ॑व । वि॒द्र॒धे । नवे॑ । द्रु॒ऽप॒दे । अ॒र्भ॒के । ब॒भ्रू इति॑ ।
यामे॑षु । शो॒भे॒ते॒ इति॑ ॥ २३ ॥

विद्रधे विदृढे व्यूढे नवे नवजाते अर्भके अल्पके द्रुपदे द्रुमाख्यस्थानेस्थिते कनीनकेव कमनीयेशालभंजिकेइव हेइन्द्र बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ यामेषु यज्ञेषु शोभेते कान्तियुक्तौभवतः कनीनकेकन्यकेकन्याकमनीयाभवतिक्वेयंनेतव्येतिवाकमनेनानीयतइतिवाकनतेर्वास्यात्कान्तिकर्मणइत्यादिनिरुक्तम्[1] ॥ २३ ॥

अथचतुर्विंशी–

अरँ॑मउ॒स्रया॒म्णेर॒मनु॑स्रयाम्णे । ब॒भ्रूयामे॑ष्व॒स्रिधा॑ ॥ २४ ॥ ३० ॥

अर॑म् । मे॒ । उ॒स्रऽया॑म्ने । अर॑म् । अनु॑स्रऽयाम्ने ।
ब॒भ्रू इति॑ । यामे॑षु । अ॒स्रिधा॑ ॥ २४ ॥ ३० ॥

हेइन्द्र अस्रिधा अस्रिधौ अहिंसकौ बभ्रूबभ्रुवर्णौ त्वदीयावश्वौ यामेषु यज्ञेषु गमनेषु प्राप्तेषुसत्सु उस्रयाम्णे उस्राभ्यामनडुद्भ्यांयुक्तेनरथेनयातीत्युस्रयामा तस्मै मे मह्यं अरमलं पर्याप्तकारिणौभवतां अनुस्रयाम्णे पद्भ्यामेवगच्छते मह्यं अरंपर्याप्तकारिणौभवताम् ॥ २४ ॥

॥ इतितृतीयस्यषष्ठेत्रिंशोवर्गः ॥ ३० ॥

॥ इतिचतुर्थेमंडलेतृतीयोनुवाकः ॥ ३ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेतृतीयाष्टकेषष्ठोध्यायः ॥ ६ ॥

---

[1] नि० ४. १५. ।

Funding by IKS-MoE

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवंदेविद्यातीर्थंमहेश्वरं ॥ १ ॥

चतुर्थेनुवाकेत्रयोदशसूक्तानि तत्रप्रऋभुभ्यइत्येकादशर्चंप्रथमंसूक्तं वामदेवस्यार्षंत्रैष्टुभं तुह्यादिपरिभाषया इदमादिसूक्तपञ्चकमृभुदेवताकं अत्रानुक्रमणिका—प्रऋभुभ्यएकादशार्भवंवाइति । व्यूढेदशरात्रेचतुर्थेहनिवैश्वदेवशस्त्रेआर्भवनिविद्धानीयमिदं तथाचसूत्रितं—प्रऋभुभ्यःप्रशुक्रैत्विति वैश्वदेवमिति ।

तत्रप्रथमा—

ॐम् प्रऋ॒भुभ्यो॑दू॒तमि॑व॒वाच॑मिष्यउप॒स्तिरे॒श्वैत॑रीं॑धे॒नुमी॑ळे ।
येवात॑जूतास्त॒रणि॑भि॒रेवैः॒परि॒द्यांस॒द्योअ॒पसो॑बभू॒वुः ॥ १ ॥

प्र । ऋ॒भुऽभ्यः॑ । दू॒तम्ऽइ॑व । वाच॑म् । इ॒ष्ये॒ । उ॒प॒ऽस्तिरे॑ । श्वैत॑रीम् ।
धे॒नुम् । ई॒ळे॒ । ये । वात॑ऽजूताः । त॒रणि॑ऽभिः । एवैः॑ । परि॑ ।
द्याम् । स॒द्यः । अ॒पसः॑ । ब॒भू॒वुः ॥ १ ॥

तत्र ऋभूणांपूर्वंमनुष्याणामेवसतां तपसादेवत्वप्राप्तिः आर्भवंशंसत्यृभवोवैदेवेषुइत्यत्र ब्राह्मणेस्पष्टमाम्नाता[1] । केचनऋभवोनामसूर्यरश्मयइत्याचक्षते अहंयजमानः ऋभुभ्यउरुभासमानेभ्यएतन्नामकेभ्योदेवेभ्योवाचंस्तुतिरूपांप्रेष्ये प्रेरयामि किमिव दूतमिव यथादूतंस्वकार्यं प्रतिप्रेषयन्तितद्वत् किञ्च उपस्तिरे सोमोपस्तरणायश्वैतरींपयोयुक्तांश्वेततरांवाधेनुं ईळे याचामि ऋभून् येऋभवोवातजूताः वातसमानगतयः अपसः जगदुपकारिकर्माणःसन्तः तरणिभिस्तारकैः एवैर्गमनशीलैरश्वैः द्यां अन्तरिक्षं सद्यः तदानीमेव परिबभूवुः परिभवन्ति सर्वतोव्याप्नुवन्ति अथ रश्मयएव ऋभवइत्युक्तत्वादादित्यंवारश्मयःपरितोव्याप्नुवन्ति ॥ १ ॥

अथद्वितीया—

य॒दार॒मक्र॑न्नृ॒भवः॑पि॒तृभ्यां॒परि॑विष्टीवे॒षणा॑दं॒सना॑भिः ।
आदिद्दे॒वाना॒मुप॑स॒ख्यमा॑य॒न्धीरा॑सःपु॒ष्टिम॑वहन्म॒नायै॑ ॥ २ ॥

---

[1] ऐ० ब्रा० ३. ३०.।

य॒दा । अर॑म् । अक्र॑न् । ऋ॒भव॑ः । पि॒तृऽभ्या॑म् । परि॑ऽविष्टी ।
वे॒षणा॑ । दं॒सना॑भिः । आत् । इत् । दे॒वाना॑म् । उप॑ । स॒ख्यम् ।
आ॒य॒न् । धीरा॑सः । पु॒ष्टिम् । अ॒व॒ह॒न् । म॒नायै॑ ॥ २ ॥

यदा यस्मिन्काले ऋभवः पितृभ्यां मातापितृभ्यां परिविष्टी परिवेषणेन परिचर्यया वेषणा वेषणेन व्याप्त्या यद्वा वेषेणजरद्रूपयोर्युवत्करणेन दंसनाभिरन्यैश्चमसनिर्माणादिकर्मभिः अरं अत्यर्थंअक्रन् आदिदनन्तरमेव देवानांइन्द्रादीनां सख्यं सखित्वं समानख्यानत्वं देवतात्वमुपायन् आगमन् युवशाकत्वेंतिदेवत्वप्राप्तेरेकान्तत्वेनदेवैरुक्तत्वादितिभावः किंच धीरासोधीराबुद्धिमन्तस्तेषांपुष्टिंगवादिविषयांमनायै ऋतेन यजमानायावहन् वहन्ति धारयन्ति यद्वा सविषयांपुष्टिं मनायै मनसे प्रकृष्टमनस्कत्वायावहन् ॥ २ ॥

अथतृतीया–

पु॒नर्ये॑च॒क्रुःपि॒तरा॒युवा॑ना॒सना॒यूपे॑वज॒रणा॒शया॑ना ।
तेवाजो॒विभ्वाँ॑ऋ॒भुरिन्द्र॑वन्तो॒मधु॑प्सरसोनोवन्तुय॒ज्ञम् ॥ ३ ॥[1]

पुन॑ः । ये । च॒क्रुः । पि॒तरा॑ । युवा॑ना । सना॑ । यूपा॑ऽइव ।
ज॒र॒णा । शया॑ना । ते । वाज॑ः । विऽभ्वा॑ । ऋ॒भुः । इन्द्र॑ऽवन्तः ।
मधु॑ऽप्सरसः । न॒ः । अ॒व॒न्तु॒ । य॒ज्ञम् ॥ ३ ॥

येऋभवः पितरा मातापितरौ यूपेव छिन्नस्थाणूइव जरणा जीर्णौ शयाना शयानौ पुनः सना सदायुवाना युवानौ चक्रुः नित्यतरुणावकुर्वन् ते वाजोविभ्वाऋभुश्चएतन्नामकास्त्रयः सुधन्वनआंगिरसस्यपुत्राऋषयः इन्द्रवन्तः अनुग्राहकेणेन्द्रेणतद्वन्तः मधुप्सरसः मधुरस्यसोमरसस्यभक्षयितारोमनोहररूपावानोस्मदीयंयज्ञं अवन्तु रक्षन्तु गच्छन्तुवा ॥ ३ ॥

अथचतुर्थी–

यत्सं॒वत्स॑मृ॒भवो॒गामर॑क्ष॒न्यत्सं॒वत्स॑मृ॒भवो॒माअपिं॑शन् ।
यत्सं॒वत्स॒मभ॑र॒न्भासो॑अस्या॒स्ताभि॒ःशमी॑भिरमृत॒त्वमा॑शुः ॥ ४ ॥

---

[1] ऋ० सं० २. ३. ४. ।

Funding by IKS-MoE

यत् । सम्ऽवत्सम् । ऋभवः । गाम् । अरक्षन् । यत् । सम्ऽवत्सम् ।
ऋभवः । माः । अपिंशन् । यत् । सम्ऽवत्सम् । अभरन् । भासः ।
अस्याः । ताभिः । शमीभिः । अमृतऽत्वम् । आशुः ॥ ४ ॥

संवत्सं संवसन्तिभूतान्यस्मिन्नितिसंवत्सः संवत्सरः संवत्सरपर्यंतं ऋभवोगामृतामरक्षन् अपालयन् स्वसामर्थ्यादितियत् यदेतत्कर्मास्ति तथा संवत्सं संवत्सरं ऋभवोमास्तस्याएवगोर्मांसमपिंशन् अवयानकुर्वन्नितियत् किंच मृतायावोः त्वचांगपुच्छाद्यतस्यामांसं समयोजयन्नित्यर्थः किंच संवत्सं संवत्सरपर्यन्तमस्याःभासः अभरन् दीप्तीरवयवशोभाअकुर्वन् इतियत् ताभिःशमीभिः मृतायागोर्नवीकरणविषयैःकर्मभिरमृतत्वमाशुः देवत्वंप्राप्ताः धेनुंःकर्त्वेतिदेवत्वप्राप्तिसाधनत्वेनदेवैःप्रतिश्रुतत्वात् यद्वात्रसंवत्समित्येतद्वत्सेनसहेतिव्याख्येयम् ॥ ४ ॥

अथपंचमी–

ज्येष्ठआंहचमसाद्वाकरेतिकनीयात्रीन्कृंणवामेत्यांह ।
कनिष्ठआंहचतुरंस्करेतित्वष्टंऋभवस्तत्पंनयद्वचोंवः ॥ ५ ॥ १ ॥

ज्येष्ठः । आह । चमसा । द्वा । कर । इति । कनीयान् । त्रीन् ।
कृणवाम । इति । आह । कनिष्ठः । आह । चतुरः । कर । इति ।
त्वष्टा । ऋभवः । तत् । पनयत् । वचः । वः ॥ ५ ॥ १ ॥

एकंचमसंचतुरःकृणोतनेतियदादेवदूतोग्निः ऋभूनाह देवत्वप्राप्त्युपायत्वेन तदा तेषुमध्ये देवत्वप्राप्त्युक्तएकोज्येष्ठऋभुरितरावाह किमिति उच्यते–[2]चमसाद्वाकरेति । एकंचमसंसन्तंद्वौकृणवामेतिकनीयान्तदनन्तरोविभ्वा त्रीन्कृणवामकरवामेत्याह तत्कनिष्ठस्ततोपिकनीयान्वाजः चतुरस्करचतुर्धाकरवामेत्याह तदेवचतुःकरणरूपं हेऋभवः त्वष्टा युष्मद्गुरुः वः वचः युष्मद्वचनं पनयदस्तौत् अङ्गीचकारेत्यर्थः ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेप्रथमोवर्गः ॥ १ ॥

---

[1] ऋ. सं. २. ३. ४. । [2] ऋ० सं० २. ३. ४.।

अथषष्ठी—

सत्यमूचुर्नरएवाहिचक्रुरनुस्वधामृभवोजग्मुरेताम् ।
विभ्राजमानाँश्चमसाँअहेवावेनत्त्वष्टाचतुरोददृश्वान् ॥ ६ ॥

सत्यम् । ऊचुः । नरः । एव । हि । चक्रुः । अनु । स्वधाम् ।
ऋभवः । जग्मुः । एताम् । विऽभ्राजमानान् । चमसान् ।
अहाऽइव । अवेनत् । त्वष्टा । चतुरः । ददृश्वान् ॥ ६ ॥

नरोमनुष्यरूपाऋभवःसत्यमुचुः सत्यमेवाब्रुवन् हियस्मादेतेएवैवंचक्रुः चतुरोकुर्वन् यथोक्तंतथैवकृतत्वादित्यभिप्रायः अनु चतुर्धाकरणानन्तरमेतांतृतीयसवनगतांस्वधांसोमाख्यममृतमृभवोजग्मुः एकंचमसंचतुरःकृणोतन[1] । साकंदेवैर्यज्ञियासोभविष्यथेतिश्रुतत्वाव्[2] । अथत्वष्टादेवोविभ्राजमानानहेव अहानीव दीप्यमानांश्चमसांश्चतुरोददृश्वान् दृष्टवान्सन् अवेनदमन्यत अंगीचकारेत्यर्थः ॥ ६ ॥

अथसप्तमी—

द्वादशद्यून्यदगोह्यस्यातिथ्येरणन्नृभवःससन्तः ।
सुक्षेत्राकृण्वन्ननयन्तसिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥ ७ ॥

द्वादश । द्यून् । यत् । अगोह्यस्य । आतिथ्ये । रणन् । ऋभवः ।
ससन्तः । सुऽक्षेत्रा । अकृण्वन् । अनयन्त । सिन्धून् । धन्व । आ ।
अतिष्ठन् । ओषधीः । निम्नम् । आपः ॥ ७ ॥

तत्ररश्मयएव ऋभवइत्युक्तत्वात्तद्रूपेणस्तूयन्ते—यद्यदा द्वादशद्यून्दिवसान् आर्द्रादिद्वादशवृष्टिनक्षत्राणीत्यर्थः अगोह्यस्यागोप्यस्यादित्यस्यगृहे आतिथ्येकस्मादागतोतिथिः तदुचितं सत्काररूपंकर्मातिथ्यं तदर्थंससन्तःस्वपन्तःसुखेननिवसन्तऋभवः रणन्नमन्ते अगोह्यस्ययदसस्तनागृह[3]इत्युक्तम् तदानींसुक्षेत्राकृण्वन् अकृष्टानिशून्यानिक्षेत्राणिवृष्ट्यासस्यादिसमृद्धानिअकुर्वन् सिन्धून्नदीरनयन्त प्रैरयन् तस्मिन्काले ओषधीरोषधयोधन्व निरुदकस्थानमाश्रित्यातिष्ठन् निम्नंनीचस्थानमापोतिष्ठन् उद्वत्स्वस्माअकृणोतनातृणंनिवत्स्वप[4]इत्युक्तम् ॥ ७ ॥

---

[1] ऋ० सं० २. ३. ४. । [2] ऋ० सं० २. ३. ४. ।
[3] ऋ० सं० २. ३. ६. । [4] ऋ० सं० २. ३. ६. ।

Funding by IKS-MoE

अथाष्टमी–

र॒थं॑येच॒क्रुःसु॒वृतं॑नरे॒ष्ठां॑येधे॒नुं॑वि॑श्व॒जुवं॑वि॒श्वरू॑पाम्।
तआत॑क्षन्त्वृ॒भवो॑र॒यिंन॒ःस्वव॑स॒ःस्वप॑सःसु॒हस्ताः॑॥ ८॥

र॒थ॑म्। ये। च॒क्रुः। सु॒ऽवृत॑म्। न॒रे॒ऽस्था॑म्। ये। धे॒नुम्।
वि॒श्व॒ऽजुव॑म्। वि॒श्वऽरू॑पाम्। ते। आ। त॒क्ष॒न्तु। ऋ॒भवः॑। र॒यिम्।
न॒ः। सु॒ऽअव॑सः। सु॒ऽअप॑सः। सु॒ऽहस्ताः॑॥ ८॥

हेऋभवः सुवृतंसुचक्रं सुष्ठुवर्तमानंवा नरेष्ठां नेतरिचक्रेवर्तमानंरथंचक्रुः येच विश्वजुवं विश्वस्य प्रेरयित्रीं विश्वरूपां बहुरूपां एतन्नामिकांवाधेनुं गां चक्रुरकुर्वन् [1]बृहस्पतिर्विश्वरूपामुपाजतेतिह्युक्तम्। तेमहान्तऋभवोनोऽस्माकंरयिंधनमातक्षन्तु सर्वतोनिष्पादयन्तु कीदृशास्तेऋभवः स्वपसः सुकर्माणः स्ववसः शोभनान्नोपेताः सुहस्ताः शोभनहस्ताः॥ ८॥

अथनवमी–

अपो॒ह्ये॑षा॒मजु॑षन्तदे॒वाअ॒भिक्रत्वा॒मन॑सा॒दीध्या॑नाः।
वाजो॑दे॒वाना॑मभवत्सु॒कर्मेन्द्र॑स्यऋ॒भु॒क्षावरु॑णस्य॒विभ्वा॑॥ ९॥

अप॑ः। हि। ए॒षा॒म्। अजु॑षन्त। दे॒वाः। अ॒भि। क्रत्वा॑। मन॑सा।
दीध्या॑नाः। वाजः॑। दे॒वाना॑म्। अ॒भ॒व॒त्। सु॒ऽकर्मा॑। इन्द्र॑स्य।
ऋ॒भु॒क्षाः। वरु॑णस्य। वि॒ऽभ्वा॑॥ ९॥

एषामृभूणामपोऽश्वरथनिर्माणादिरूपंकर्मदेवाइन्द्रादयोजुषन्तासेवन्त इन्द्रोहरीयुयुजेअश्विनारथमित्यादि[2]र्मन्त्रोक्तप्रकारेणस्वीकृतवन्तइत्यर्थः कीदृशास्ते क्रत्वा वरप्रदानरूपेणकर्मणामनसाशोभनेनचित्तेनानुग्रहयुक्तेनाभिदीध्यानाः दीप्यमानाः देवानामनुग्रहेणकिंलब्धमित्याह–सुकर्माशोभनव्यापारोवाजःकनीयान्देवानांसर्वेषांसंबन्ध्यभवत् तथेन्द्रस्यसंबन्धाऋभुक्षाः ऋभुज्येष्ठःविभ्वामध्यमोवरुणस्यसंबन्ध्यभवत् हिपूरणः॥ ९॥

---

[1] ऋ० सं० २. ३. ५। [2] ऋ० सं० २. ३. ५।

Funding by IKS-MoE

अथदशमी–

येहरी॑मे॒धयो॒क्थामद॑न्त॒इन्द्रा॑यच॒क्रुःसु॒युजा॒येअश्वा॑ ।
तेरा॒यस्पोषं॒द्रवि॑णान्य॒स्मेध॒त्तऋ॑भवःक्षेम॒यन्तो॒नमि॒त्रम् ॥ १० ॥

ये । हरी॒ इति॑ । मे॒धया॑ । उ॒क्था । मद॑न्तः । इन्द्रा॑य । च॒क्रुः ।
सु॒ऽयुजा॑ । ये । अश्वा॑ । ते । रा॒यः । पोष॑म् । द्रवि॑णानि । अ॒स्मे इति॑ ।
ध॒त्त । ऋ॒भ॒वः॒ । क्षे॒म॒ऽयन्तः॑ । न । मि॒त्रम् ॥ १० ॥

येऋभवः हरी अश्वौ मेधयाप्रज्ञया उक्था उक्थैःस्तुतिभिःमदन्तोहर्षयन्तश्चक्रुः येच तौ सुयुजा सुयुजौ सुयोजमानौ अश्वा अश्वौ इन्द्रायेन्द्रार्थंचक्रुरकुर्वन् हेऋभवस्तेयूयंरायस्पोषंधनपुष्टिं द्रविणानिगवादिधनानिचसुखानिवाअस्मेअस्मासुधत्त धारयत किमिव क्षेमयन्तः क्षेममिच्छन्तोमित्रंन मित्रमिव अत्र यद्यप्येकएवऋभुनामातत्संबंधादितरेप्यृभवउच्यन्ते प्राणभृन्न्यायेन ॥ १० ॥

अथैकादशी–

इ॒दाह्नः॑पी॒तिमु॒तवो॒मद॑न्धु॒र्न॑ऋ॒तेश्रा॒न्तस्य॑स॒ख्याय॑दे॒वाः ।
तेनू॒नम॒स्मेऋ॑भवो॒वसू॑नितृ॒तीये॑अ॒स्मिन्त्सव॑नेदधात ॥ ११ ॥२॥

इ॒दा । अह्नः॑ । पी॒तिम् । उ॒त । वः॒ । मद॑म् । धुः॒ । न । ऋ॒ते ।
श्रा॒न्तस्य॑ । स॒ख्याय॑ । दे॒वाः । ते । नू॒नम् । अ॒स्मे इति॑ । ऋ॒भ॒वः॒ ।
वसू॑नि । तृ॒तीये॑ । अ॒स्मिन् । सव॑ने । द॒धा॒त॒ ॥ ११ ॥ २ ॥

इदा इदानीं चमसादिनिर्माणानन्तरं अह्नः सुत्यासंबन्धिनस्तृतीयेसवनेपीतिं सोमपानं उतापिच मदंतज्जनितं वोयुष्माकं धुः ददुः देवाःश्रान्तस्यश्रान्तात्तपोयुक्तादृतेसख्याय सखित्वाय नभवन्ति देवाः यतएतेश्रान्ताः अतोददुरित्यर्थः हेऋभवः तेमहान्तोयूयं नूनं निश्चयमस्मे अस्मासु अस्मिन्तृतीयसवने वसूनि धनानि दधात धारयत ॥ ११ ॥

॥ इतितृतीयस्यसप्तमेद्वितीयोवर्गः ॥ २ ॥

ऋभुर्विभ्वेत्येकादशर्चंद्वितीयंसूक्तं वामदेवस्यार्षंत्रैष्टुभमार्भवं ऋभुर्विभ्वेत्यनुक्रमणिका । व्यूळ्हेदशरात्रेपञ्चमेहनिवैश्वदेवशस्त्रे आर्भवनिविद्धानोयमिदं ऋभुर्विभ्वास्तुषेजनमितिसूत्रितत्वात् ।

Funding by IKS-MoE

तत्रप्रथमा—

ऋ॒भुर्विभ्वा॒वाज॒इन्द्रो॑नो॒अच्छे॒मंय॒ज्ञंर॑त्न॒धेयोप॑यात ।
इ॒दाहिवो॑धि॒षणा॑दे॒व्यह्ना॒मधा॑त्पी॒तिंसंमदा॑अग्मतावः ॥ १ ॥

ऋ॒भुः । विऽभ्वा॑ । वाजः॑ । इन्द्रः॑ । न॒ः । अच्छ॑ । इ॒मम् । य॒ज्ञम् ।
र॒त्न॒ऽधेया॑ । उप॑ । या॒त॒ । इ॒दा । हि । व॒ः । धि॒षणा॑ । दे॒वी । अह्ना॑म् ।
अधा॑त् । पी॒तिम् । सम् । मदाः॑ । अ॒ग्म॒त॒ । व॒ः ॥ १ ॥

ऋभुर्विभ्वावाजइन्द्रश्चेतेदेवाः नोस्मदीयमिमंयज्ञमच्छाभिमुखंरत्नधेयाऽस्मभ्यंरत्नधानाय उपयातोपगच्छत ननु इन्द्रःसोमस्वामित्वादागच्छतु कथमेतेषांयज्ञप्राप्तिरितिचेदुच्यते—इदाहि इदानींखलु वोयुष्माकंधिषणा वाक् देवी प्रजापतेःसम्बन्धिनी अह्नां सोमाभिषवसम्बन्धिनां पीतिं सोमपानमधात् सप्रजापतिरब्रवीत्सवितारंतववाइमेन्तेवासास्त्वमेवैभिःसम्पिबस्वेति[1]ब्राह्मणम् । यस्मादेवंतस्मान्मदाश्चवोयुष्मान्समग्मत सङ्गताः यद्वावोमदादेवैः सङ्गताः ॥ १ ॥

अथद्वितीया—

वि॒दा॒नासो॒जन्म॑नोवाजरत्ना॒उ॒तऋ॒तुभि॑र्ऋभवोमादयध्वम् ।
सं वो॒मदा॒अग्म॑त॒संपुर॑न्धिःसु॒वीरा॑म॒स्मेर॒यिमेर॑यध्वम् ॥ २ ॥

वि॒दा॒नासः॑ । जन्म॑नः । वा॒ज॒ऽर॒त्नाः॒ । उ॒त । ऋ॒तुऽभिः॑ । ऋ॒भ॒वः॒ ।
मा॒द॒य॒ध्व॒म् । सम् । व॒ः । मदाः॑ । अग्म॑त । सम् । पुर॑म्ऽधिः ।
सु॒ऽवीरा॑म् । अ॒स्मे इति॑ । र॒यिम् । आ । ई॒र॒य॒ध्व॒म् ॥ २ ॥

हेवाजरत्नाः सोमलक्षणेनान्नेनराजमानाः ऋभवोयूयं जन्मनोजननस्य देवत्वलक्षणस्य देवत्वप्राप्तिंविदानासोजानन्तः यद्वा विदानासः सोमप्राप्तिंजानन्तः जन्मनःपूर्वंमनुष्यजन्मवन्तश्चसन्तः उतशब्दश्चार्थे ऋतुभिर्देवैःसहमादयध्वं वोयुष्मान्मदाःसोमपानजनिताःसमग्मत सङ्गताः पुरन्धिः स्तुतिरपि समग्मत तेयूयं अस्मे अस्माकं सुवीरां शोभनैर्वीरैरुपेतांरयिमेरयध्वं प्रेरयत ॥ २ ॥

---

[1] ऐ० ब्रा ३. ३०।

Funding by IKS-MoE

अथतृतीया–

अयंवोयज्ञऋभवोकारियमामनुष्वत्प्रदिवोदधिध्वे ।
प्रवोच्छाजुजुषाणासोअस्थुरभूतविश्वेअग्रियोतवाजाः ॥ ३ ॥

अयम् । वः । यज्ञम् । ऋभवः । अकारि । यम् । आ । मनुष्वत् ।
प्रऽदिवः । दधिध्वे । प्र । वः । अच्छ । जुजुषाणासः । अस्थुः ।
अभूत । विश्वे । अग्रिया । उत । वाजाः ॥ ३ ॥

हेऋभवोवोयुष्मदर्थं अयंयज्ञोकारि यंयज्ञंमनुष्वत् मनुष्यवत्प्रदिवःप्रकर्षेणद्योतमानाः सन्तः आदधिध्वे धारयतजठरे तदर्थंवोयुष्मान् अच्छाभिमुख्येनजुजुषाणासः सेवमानाःसोमाःप्रास्थुः प्रतिष्ठन्ते उतापिच धारयित्वाच हेवाजाऋभवोविश्वेयूयमग्रियाअग्राहाःअग्रत्वसम्पादिनोवा अभूत भवथ ॥ ३ ॥

अथचतुर्थी–

अभूदुवोविधतेरत्नधेयमिदानरोदाशुषेमर्त्याय ।
पिबतवाजाऋभवोददेवोमहितृतीयंसवनंमदाय ॥ ४ ॥

अभूत् । ऊँ इति । वः । विधते । रत्नऽधेयम् । इदा । नरः ।
दाशुषे । मर्त्याय । पिबत । वाजाः । ऋभवः । ददे । वः । महि ।
तृतीयम् । सवनम् । मदाय ॥ ४ ॥

हेनरोनेतारऋभवः वोयुष्माकमनुग्रहात् इदाइदानीं तृतीयेसवने रत्नधेयंदातव्यंरत्नंविधते विधतिःपरिचरणकर्मा स्तुत्यापरिचरते दाशुषेहविर्दत्तवतेमर्त्याययजमानायमह्यमभून्भवतु उइतिपूरणः तदर्थं हेवाजाः हेऋभवः एतद्द्वयंविभ्वनामकस्याप्युपलक्षणं इतरापेक्षयामर्त्येकंबहुवचनं यूयंपिबत तदर्थंवोददे किंमहिमहत्प्रभूतंतृतीयंसवनंतत्सम्बन्धिनंसोममित्यर्थः किमर्थं मदाय हर्षाय तृप्तयेवा ॥ ४ ॥

Funding by IKS-MoE

अथपञ्चमी–

आवा॑जाया॒तोप॑नऋभुक्षाम॒होन॑रो॒द्रवि॑णसोगृणा॒नाः ।
आव॑ःपी॒तयो॑ऽभिपि॒त्वेअह्ना॑मि॒माअस्तं॑नव॒स्व॑इवग्मन् ॥ ५ ॥ ३ ॥

आ । वा॒जाः॒ । या॒त॒ । उप॑ । नः॒ । ऋ॒भु॒क्षाः॒ । म॒हः॒ । न॒रः॒ ।
द्रवि॑णसः । गृ॒णा॒नाः । आ । वः॒ । पी॒तयः॑ । अ॒भि॒ऽपि॒त्वे ।
अह्ना॑म् । इ॒माः । अस्त॑म् । न॒व॒स्वः॑ऽइव । ग्म॒न् ॥ ५ ॥ ३ ॥

हेवाजाः ऋभुक्षाः नरोनेतारोयूयं नः उपयात किंकुर्वन्तः महोमहतः द्रविणसोधनस्य कर्मणिषष्ठ्यौ महद्द्रविणंगृणानाःस्तुवन्तः किंच अह्नामभिपित्वेऽभिपतनेसमाप्तौ तृतीयसवनेइत्यर्थः वोयुष्मानिमाःपीतयः पानान्याग्मन् आगच्छन्ति तत्रदृष्टान्तः–अस्तं गृहनामैतत् गृहंन वस्वइव नवप्रसवागावइव ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेतृतीयोवर्गः ॥ ३ ॥

अथषष्ठी–

आन॑पातःशवसोयात॒नोपे॒मंय॒ज्ञंनम॑साहू॒यमा॑नाः ।
स॒जोष॑सःसूरयो॒यस्य॑च॒स्थमध्व॑ःपातरत्न॒धाइन्द्र॑वन्तः ॥ ६ ॥

आ । न॒पा॒तः॒ । श॒व॒सः॒ । या॒त॒न॒ । उप॑ । इ॒मम् । य॒ज्ञम् । नम॑सा ।
हू॒यमा॑नाः । स॒ऽजोष॑सः । सू॒र॒यः॒ । यस्य॑ । च॒ । स्थ । मध्वः॑ ।
पा॒त॒ । र॒त्न॒ऽधाः । इन्द्र॑ऽवन्तः ॥ ६ ॥

हेशवसोनपातः बलस्यनपातयितारः तस्यपुत्रावा बलवन्तइत्यर्थः यूयं नमसास्तोत्रेण हूयमानाआकारिताःसन्तः इमंयज्ञमुपायातन उपागच्छत कीदृशायूयं सजोषसः इन्द्रेणसहप्रीताः सूरयोमेधाविनः इन्द्रस्यचैषांचकःप्रसङ्गइत्युच्यते यस्यचस्थचेतिप्रसिद्धौ यस्येंद्रस्य सम्बन्धिनोयूयंभवथ तदुचिताश्वनिर्माणादित्यभिप्रायः यस्मादेवंतस्मादिन्द्रवन्तः प्रीतेनेन्द्रेण तद्वन्तोरत्नधाः रमणीयधनानांदातारोयूयं मध्वः मधुरंसोमंपात पिबत ॥ ६ ॥

Funding by IKS-MoE

अथसप्तमी–

स॒जोषा॑इन्द्र॒वरु॑णेन॒सोमं॑स॒जोषाः॑पाहिगिर्वणोम॒रुद्भिः॑ ।
अ॒ग्रे॒पाभि॑र्ऋ॒तु॒पाभिः॑स॒जोषा॒ग्नास्पत्नी॑भीरत्न॒धाभिः॑स॒जोषाः॑ ॥७॥

स॒ऽजोषाः॑ । इ॒न्द्र॒ । वरु॑णेन । सोम॑म् । स॒ऽजोषाः॑ । पा॒हि॒ । गि॒र्व॒णः॒ ।
म॒रुत्ऽभिः॑ । अ॒ग्रे॒ऽपाभिः॑ । ऋ॒तु॒ऽपाभिः॑ । स॒ऽजोषाः॑ । ग्नाःपत्नी॑भिः ।
र॒त्न॒ऽधाभिः॑ । स॒ऽजोषाः॑ ॥ ७ ॥

हेइन्द्र त्वंवरुणेन रात्र्यभिमानिदेवेन सजोषाः समानप्रीतिःसन् सोमंपाहि पिब हेगिर्वणः गीर्भिर्वननीय संभजनीयेन्द्र त्वंमरुद्भिः सजोषाः सङ्गतःसन् सोमंपाहि पिब किञ्च अग्रेपाभिः प्रथमपातृभिः ऋतुपाभिः ऋतुयाजदेवैश्च ग्नाः पत्नीभिः स्त्रीणांपालयित्र्योग्नाःपत्न्यः ताभिः मेनाग्नाइतिस्त्रीणामितिनिरुक्तम्[1] । रत्नधाभिःरमणीयधनदातृभिःऋतुभिःसहपिब यद्वैतत् ग्नाःपत्नीभिरित्यस्यविशेषणं ताभिर्वासजोषाःसोमंपिब ॥ ७ ॥

अथाष्टमी–

स॒जोष॑स॒आदि॒त्यैर्मा॑दयध्वं॑स॒जोष॑सऋभव॒ःपर्व॑तेभिः ।
स॒जोष॑सो॒दै॒व्ये॑नासवि॒त्रास॒जोष॑स॒ःसिन्धु॑भीरत्न॒धेभिः॑ ॥ ८ ॥

स॒ऽजोष॑सः । आ॒दि॒त्यैः । मा॒द॒य॒ध्व॒म् । स॒ऽजोष॑सः । ऋ॒भ॒वः॒ ।
पर्व॑तेभिः । स॒ऽजोष॑सः । दैव्ये॑न । स॒वि॒त्रा । स॒ऽजोष॑सः ।
सिन्धु॑ऽभिः । र॒त्न॒ऽधेभिः॑ ॥ ८ ॥

हेऋभवः आदित्यैः सजोषसःसङ्गताः यूयं मादयध्वं तथा पर्वतेभिः पर्ववद्भिः पर्वण्यर्घ्यमानैर्देवविशेषैः सजोषसोमादयध्वं तथाच दैव्येन देवेभ्योहितेनसवित्रासजोषसःरत्नधेभिः रत्नानांदातृभिःसिन्धुभिः स्यन्दनस्वभावैः नद्यभिमानिदेवैश्चसजोषसोमादयध्वम् ॥ ८ ॥

अथनवमी–

येअ॒श्विना॒येपि॒तरा॒यऊ॒तीधे॒नुंत॑त॒क्षुर्ऋ॒भवो॒येअश्वा॑ ।
येअंस॑त्रा॒यऋध॒ग्रोद॑सी॒येविभ्वो॒नरः॑स्वप॒त्यानि॑च॒क्रुः ॥ ९ ॥

---

[1] नि० ३. २१. ।

Funding by IKS-MoE

ये । अश्विनां । ये । पितरां । ये । ऊती । धेनुम् । ततक्षुः । ऋभवंः ।
ये ।अश्वां । ये । अंसंत्रा । ये । ऋधंक् । रोदंसी इतिं । ये । विऽभ्वंः ।
नरंः ।[1]सुऽअपत्यानिं । चक्रुः ॥ ९ ॥

येऋभवः अश्विना अश्विनौ ऊती ऊत्या क्रियया रथनिर्माणरूपया अप्रीणयन् येचपितरा पितरौ ततक्षुः तक्षणेनसमपादयन् जीर्णौसन्तौ ऊती ऊत्या युवानौचक्रुः येचधेनुंततक्षुः मृतायाःपुनर्नवीकरणेन येचाश्वाश्वौततक्षुः निश्चर्मणोगामरिणीतधीतिभिर्याजरन्तायुवशाताकृणोतनेत्याद्युक्तम् । येचांसत्रा अंसत्राणि कवचानिदेवेभ्यश्चक्रुः येच रोदसी द्यावापृथिव्यौ ऋधक् पृथक्चक्रुः एवमुक्तप्रकारेण येविभ्वोव्याप्ताः ऋभवोनरोनेतारः स्वपत्यानि स्वपतनसाधनानि तत्प्राप्तिसाधनानिवा कर्माणि चक्रुः ते अग्रेपाइत्युत्तरत्रसंबन्धः ॥ ९ ॥

अथदशमी–

येगोमंन्तंवाजंवन्तंसुवीरंंरयिंधत्थवसुंमन्तंपुरुक्षुम् ।
तेअंग्रेपाऋंभवोमन्दसानाअस्मेधंत्तयेचंरातिंगृणन्तिं ॥ १० ॥

ये । गोऽमंन्तम् । वाजंऽवन्तम् । सुऽवीरंम् । रयिम् । धत्थ ।
वसुंऽमन्तम् । पुरुऽक्षुम् । ते । अग्रेऽपाः । ऋभवः । मन्दसानाः ।
अस्मे इतिं । धत्त । ये । च । रातिम् । गृणन्ति ॥ १० ॥

हेऋभवः येयूयं गोमन्तं गोसहितं वाजवन्तं अन्नवन्तं सुवीरं शोभनपुत्रोपेतं वसुमन्तं निवासयोग्यगृहादिधनोपेतं पुरुक्षुंबह्वन्नं रयिं धनं धत्थ धारयथ मह्यंदातुं हेऋभवः तेयूयं अग्रेपाः प्रथमंपातारःमन्दसानाः माद्यन्तःसन्तः अस्मे अस्मभ्यंधत्त दत्तरयिम् येच यूयं रातिंदानं दत्तंसोमंवा गृणन्तिस्तुवन्तितेधत्त यद्वा येच रातिंगृणन्ति यजमानास्तेभ्योपिधत्त ॥ १० ॥

अथैकादशी–

नापांभूतनवोंतीतृषामानिंःशस्ताऋभवोयज्ञेअस्मिन् ।
समिन्द्रेंणमदंथसंमरुद्भिःसंराजंभीरत्नधेयांयदेवाः ॥ ११ ॥ ४ ॥

---

[1] ऋ० सं. २. ३. ५. ।

Funding by IKS-MoE

न । अप॑ । अ॒भू॒त॒ । न । व॒ः । अ॒ती॒तृ॒षा॒म॒ । अनि॑ःऽशस्ताः ।
ऋ॒भ॒व॒ः । य॒ज्ञे । अ॒स्मिन् । सम् । इन्द्रे॑ण । मद॑थ । सम् ।
म॒रुत्ऽभि॑ः । सम् । राज॑ऽभिः । र॒त्न॒ऽधे॒या॑य । दे॒वा॒ः ॥ ११ ॥ ४ ॥

हेऋभवः यूयं नापाभूत नापगच्छत अपरक्तानभवत वयंचवोयुष्मान् नातीतृषाम अत्यन्तंतृषितान्माकरवाम अतोहेऋभवोदेवाः अनिःशस्तः अनिन्दिताःसन्तोस्मिन्यज्ञे इन्द्रेणसंमदथ मरुद्भिःसंमदथ राजभिः राजमानैरन्यैर्देवैःसंमदथ तृप्ताभवथ किमर्थं रत्नधेयाय रमणीयधनदानाय ॥ ११ ॥

॥ इतितृतीयस्यसप्तमेचतुर्थोवर्गः ॥ ४ ॥

इहोपयातेतितृतीयंनवर्चंसूक्तं वामदेवस्यार्षंत्रैष्टुभमार्भवं इहोपनवेत्यनुक्रमणिका तृतीयसवनेमैत्रावरुणस्येदमुन्नीयमानसूक्तम् सूत्रितंच—आत्वावहन्त्वसाविदेवमिहोपयातेत्यनुसववनमिति ॥

तत्रप्रथमा—

इ॒होप॑यातशवसोनपा॒त॒ःसौध॑न्वनाऋभवो॒माप॑भूत ।
अ॒स्मिन्हिव॒ःसव॑नेरत्न॒धे॒यं॑गम॒न्त्विन्द्र॒मनु॑वो॒मदा॑सः ॥ १ ॥

इ॒ह । उप॑ । या॒त॒ । श॒व॒स॒ः । न॒पा॒त॒ः । सौध॑न्वनाः । ऋ॒भ॒व॒ः ।
मा । अप॑ । भू॒त॒ । अ॒स्मिन् । हि । व॒ः । सव॑ने । र॒त्न॒ऽधेय॑म् ।
गम॑न्तु । इन्द्र॑म् । अनु॑ । व॒ः । मदा॑सः ॥ १ ॥

हेशवसोनपातोबलस्यपुत्राः तस्यनपातयितारोवा हेसौधन्वनाः सुधन्वनःपुत्राः हेऋभवः वोयूयं इहोपयात अस्मिन्तृतीयसवनेउपगच्छत मापभूत अपगतानभवत अस्मिन्सवनेरत्नधेयंरमणीयधनस्यदातारमिन्द्रं अनुअनुसृत्य वोयुष्मान्मदासोमदकराःसोमाः गमन्तु गच्छन्तु अन्वितिक्रिययावासंबध्यते इन्द्रंयुष्मांश्चान्वागच्छन्त्वित्यर्थः हिपूरणः ॥ १ ॥

अथद्वितीया—

आग॑न्नृभू॒णामि॒हर॑त्न॒धेय॒मभू॒त्सोम॑स्य॒सुषु॑तस्यपी॒तिः ।
सु॒कृ॒त्यया॒यत्स्व॑प॒स्यया॑चँ॒एकं॑विच॒क्रच॑म॒संच॑तु॒र्धा ॥ २ ॥

आ । अगन् । ऋभूणाम् । इह । रत्नऽधेयम् । अभूत् । सोमस्य ।
सुऽसुतस्य । पीतिः । सुऽकृत्यया । यत् । सुऽअपस्यया । च ।
एकम् । विऽचक्र । चमसम् । चतुःऽधा ॥ २ ॥

ऋभूणां युष्माकमिहतृतीयसवनेरत्नधेयं रत्नदानमागन्नागच्छतुमस्वं यद्वा युष्माकमेव सोमाख्यंरत्नमागन् यस्मात्सोमस्यसुषुतस्यपीतिःपानमभूत् प्रजापतिनालब्धमित्यर्थः तदपिकुतइतिचेदुच्यते–यद्यस्मात्सुकृत्ययाशोभनहस्तव्यापारेण स्वपस्यया शोभनरथनिर्माणादिकर्मेच्छयाच एकंसन्तं चमसं चतुर्धाविचक्र कृतवन्तः ॥ २ ॥

अथतृतीया–

व्यंकृणोतचमसंचतुर्धासखेविशिक्षेत्यंब्रवीत ।
अथैतवाजाअमृतस्यपन्थांगणंदेवानामृभवःसुहस्ताः ॥ ३ ॥

वि । अकृणोत । चमसम् । चतुःऽधा । सखे । वि । शिक्ष ।
इति । अब्रवीत । अथ । ऐत । वाजाः । अमृतस्य । पन्थाम् ।
गणम् । देवानाम् । ऋभवः । सुऽहस्ताः ॥ ३ ॥

हेऋभवः यूयंचमसंचतुर्धाव्यकृणोत व्यकुरुत कृत्वाच हेसखे सखिभूताग्ने विशिक्ष अनुगृहाण सोमपानमित्यब्रवीत अवदतयूयं अथसोग्निर्युष्मान् अवादीवखलु किमिति हेवाजाः ऋभवः सुहस्ताः शोभनहस्तोपेतायूयममृतस्यामरणधर्मकस्य स्वर्गस्य पन्थां पन्थानमैत गच्छत किंतदमृतमितिदेवानामिन्द्रादीनांगणंसंघातमैत ॥ ३ ॥

अथचतुर्थी–

किंमयःस्विच्चमसएषआसयंकाव्येनचतुरोविचक्र ।
अथासुनुध्वंसवनंमदायपातऋभवोमधुनःसोम्यस्य ॥ ४ ॥

किम्ऽमयः । स्वित् । चमसः । एषः । आस । यम् । काव्येन ।
चतुरः । विऽचक्र । अथ । सुनुध्वम् । सवनम् । मदाय ।
पात । ऋभवः । मधुनः । सोम्यस्य ॥ ४ ॥

Funding by IKS-MoE

किंमयस्वित् किमात्मकएषचमसः आसस्वित्प्रश्ने यंचमसमेकंसन्तं काव्येन कवीनां सम्बन्धिनाकर्मणा कौशलेन चतुरोविचक्र कृतवन्तः अथाधुनासवनं सूयतइतिसवनःसोमः तं मदायहर्षायसुनुध्वं हेऋत्विजः हेऋभवोयूयंच सोम्यस्यसोमसम्बन्धिनूंमधुनोमधुरंरसं पातपिबत ॥ ४ ॥

अथपञ्चमी–

शच्या॑कर्तपि॒तरा॒युवा॑ना॒शच्या॑कर्तचम॒सं दे॑व॒पान॑म्।
शच्या॒हरी॒धनु॑तरावतष्टेन्द्र॒वाहा॑वृभवोवाजरत्नाः ॥ ५ ॥ ५ ॥

शच्या॑। अ॒क॒र्त॒। पि॒तरा॑। युवा॑ना। शच्या॑। अ॒क॒र्त॒। च॒म॒सम्।
दे॒व॒ऽपान॑म्। शच्या॑। हरी॒ इति॑। धनु॑ऽतरौ। अ॒त॒ष्ट॒।
इ॒न्द्र॒ऽवाहौ॑। ऋ॒भ॒व॒ः। वा॒ज॒ऽर॒त्ना॒ः ॥ ५ ॥ ५ ॥

हेवाजरत्नाः रमणीयसोमान्नाः हेऋभवः यूयं शच्याकर्मणा पितरा मातापितरौ युवाना युवानौ अकर्त अकुरुत तथा शच्याचमसं देवपानंदेवपानार्हमकर्त चतुर्धाकुरुतेत्यर्थः शच्याहराअतष्ट तक्षणेनसम्पादितवन्तः कीदृशौहरी धनुतरौ शीघ्रंगन्तृतरौ इन्द्रवाहौ इन्द्रवोढारौ ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेपञ्चमोवर्गः ॥ ५ ॥

अथषष्ठी–

योवः॑सु॒नोत्य॑भिपि॒त्वेअह्नां॑ती॒व्रंवा॑जास॒ःसव॑नं॒मदा॑य।
तस्मै॑र॒यिमृ॑भव॒ःसर्व॑वीर॒मात॑क्षतवृषणोमन्दसा॒नाः ॥ ६ ॥

यः। व॒ः। सु॒नोति॑। अ॒भि॒ऽपि॒त्वे। अह्ना॑म्। ती॒व्रम्। वा॒जा॒स॒ः।
सव॑नम्। मदा॑य। तस्मै॑। र॒यिम्। ऋ॒भ॒व॒ः। सर्व॑ऽवीरम्। आ।
त॒क्ष॒त॒। वृ॒ष॒ण॒ः। म॒न्द॒सा॒नाः ॥ ६ ॥

हेऋभवोवाजासोन्नवन्तोवोयुष्मभ्यं योयजमानःअह्नामभिपित्वेअभिपतनेतृतीयसवनेइत्यर्थः तस्मिन् तीव्रंरसवत्तरंसवनं सूयतइतिसवनःसोमस्तं मदायसुनोति तस्मै सर्ववीरंबहुपुत्रोपेतंरयिंधनं हेवृषणः फलवर्षितारः मंदसानाः मोदमानाः सन्तःआतक्षत सम्पादयतेत्यर्थः ॥६॥

Funding by IKS-MoE

अथसप्तमी–

प्रा॒तःसु॒तम॑पिबोहर्य॑श्व॒माध्यं॑न्दिनं॒सव॑नं॒केव॑लं॑ते ।
समृ॒भुभि॑ःपिबस्वरत्न॒धेभि॒ःसखीँ॒र्याँ॑इन्द्रचकृ॒षेसु॒कृत्या ॥ ७ ॥

प्रा॒तरिति॑ । सु॒तम् । अ॒पि॒बः॒ । ह॒रि॒ऽअ॒श्व॒ । माध्यं॑न्दिनम् । सव॑नम् ।
केव॑लम् । ते॒ । सम् । ऋ॒भु॒ऽभिः॑ । पि॒ब॒स्व॒ । र॒त्न॒ऽधेभिः॑ । सखी॑न् ।
यान् । इ॒न्द्र॒ । च॒कृ॒षे । सु॒ऽकृ॒त्या ॥ ७ ॥

हेहर्यश्व हरितवर्णाश्वोपेत इन्द्र प्रातः प्रातःसवने सुतमभिषुतंसोममपिबः पिबस्व माध्यंदिनंसवनंकेवलंते परंतवैव नान्येषां सवनद्वयस्यपृथगभिधानात्तृतीयसवनंपरिशिष्यते तृतीयसवनेरत्नधेभिः रमणीयदानैः ऋभुभिः संपिबस्व हेइन्द्र यानृभून्सुकृत्याशोभनकर्मणासखीन् चकृषे अकरोः ॥ ७ ॥

अथाष्टमी–

येदे॒वासो॒अभ॑वतासु॒कृ॒त्याश्ये॒नाइ॒वेदधि॑दि॒वि॑नि॒षे॒द ।
तेरत्नं॑धातशवसोनपात॒ःसौध॑न्वना॒अभ॑वता॒मृता॑सः ॥ ८ ॥

ये । दे॒वासः॑ । अभ॑वत । सु॒ऽकृ॒त्या । श्ये॒नाःऽइ॑व । इत् । आधि॑ ।
दि॒वि । नि॒ऽसे॒द । ते । रत्न॑म् । धा॒त॒ । श॒व॒सः॒ । न॒पा॒तः॒ ।
सौध॑न्वनाः । अभ॑वत । अ॒मृता॑सः ॥ ८ ॥

हेऋभवः येयूयं सुकृत्या शोभनकर्मणा देवासोदेवाः अभवत अभूत श्येनाइवेत् शंसनीयगतयोगृध्रविशेषाइव दिविद्युलोकेधिनिषेद अधिनिषण्णाः हेशवसोनपातः बलवन्तस्तेयूयंरत्नंधनंधात प्रयच्छत हेसौधन्वनाः अमृतासोऽमृतादेवाअभवत ॥ ८ ॥

अथनवमी–

यत्तृ॒तीयं॒सव॑नंरत्न॒धेय॒मकृ॑णुध्वंस्वप॒स्यासु॑हस्ताः ।
तदृ॑भव॒ःपरि॑षिक्तंव॒एतत्संमदे॑भिरिन्द्रि॒येभि॑ःपिबध्वम् ॥ ९ ॥ ६ ॥

Funding by IKS-MoE

यत् । तृतीयम् । सवनम् । रत्नऽधेयम् । अकृणुध्वम् । सुऽअपस्या ।
सुऽहस्ताः । तत् । ऋभवः । परिऽसिक्तम् । वः । एतत् । सम् ।
मदेभिः । इन्द्रियेभिः । पिबध्वम् ॥ ९ ॥ ६ ॥

हेसुहस्ताः शोभनहस्ताः ऋभवः रत्नधेयं रमणीयसोमदानवत् यत्तृतीयंसवनमकृणुध्वं प्रसाधितवन्तः स्वपस्या शोभनकर्मेच्छया तदेतत्सवनं सवनगतं सोमद्रव्यं परिषिक्तं परिषेचनवत् वोयुष्माकंसम्बन्धिभिर्मदेभिर्माद्यद्भिरिन्द्रियेभिरिन्द्रियैःसंपिबध्वं यद्यपि वदनमेवपानसाधनं तथापि चक्षुःश्रोत्रादीनामपिदर्शनश्रवणादिनातृप्तिसद्भावात्पातृत्वमुपचर्यते ॥ ९ ॥

॥ इतितृतीयस्यसप्तमेषष्ठोवर्गः ॥ ६ ॥

अनश्वोजातइतिनवर्चंचतुर्थंसूक्तं आर्भवं ऋषिर्वामदेवः अन्त्यात्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषयाजगत्यः अनश्वोन्त्यात्रिष्टुबित्यनुक्रमणिका । आभिप्लविकेतृतीयेहनिवैश्वदेवशस्त्रे आर्भवनिविद्धानीयमिदं तथाचसूत्रितम्—अनश्वोजातःपरावतोयइतिवैश्वदेवमिति ।

तत्रप्रथमा—

अनश्वोजातोअनभीशुरुक्थ्यो३रथस्त्रिचक्रःपरिवर्ततेरजः ।
महत्तद्वोदेव्यस्यप्रवाचनंद्यामृभवःपृथिवींयच्चपुष्यथ ॥ १ ॥

अनश्वः । जातः । अनभीशुः । उक्थ्यः । रथः । त्रिऽचक्रः ।
परि । वर्तते । रजः । महत् । तत् । वः । देव्यस्य । प्रऽवाचनम् ।
द्याम् । ऋभवः । पृथिवीम् । यत् । च । पुष्यथ ॥ १ ॥

हेऋभवः अश्विनोःसम्बन्धी युष्मद्दत्तोरथः अनश्वोजातः वाहनाश्वनिरपेक्षःसम्पन्नः तथा अनभीशुः प्रग्रहरहितः उक्थ्यः स्तुत्यः त्रिचक्रःचक्रत्रययुक्तःसन् रजोन्तरिक्षंपरिवर्ततेपरिभ्रमति महत्प्रभूतंतद्रथनिर्माणाख्यंकर्म वोयुष्माकं देव्यस्यदेवत्वस्यप्रवाचनंप्रवक्तृप्रख्यापकं यच्च येनकर्मणा द्यां पृथिवींच पुष्यथ पुष्टांकुरुथ ॥ १ ॥

अथद्वितीया—

रथंयेचक्रुःसुवृतंसुचेतसोविह्वरन्तंमनसस्परिध्यया ।
ताँऊन्व१स्यसवनस्यपीतयआवोवाजाऋभवोवेदयामसि ॥२॥

रथम् । ये । चक्रुः । सुऽवृतम् । सुऽचेतसः । अविऽह्वरन्तम् ।
मनसः । परि । ध्यया । तान् । ऊँ इति । नु । अस्य । सवनस्य ।
पीतये । आ । वः । वाजाः । ऋभवः । वेदयामसि ॥ २ ॥

सुचेतसः शोभनचित्तायेऋभवःसुवृतं सुवर्तनचक्रं आविह्वरन्तं अकुटिलंरथंमनसःपरिध्यया मनसोध्यानेनाप्रयत्नेननुक्षिप्रंचक्रुः तांउ उशब्दएवार्थे तानेवास्यसवनस्यपीतयेएतंसोमंपातुं हेवाजाः हेऋभवः वोयुष्मानावेदयामसि आवेदयामः ॥ २ ॥

अथतृतीया—

तद्वोवाजाऋभवःसुप्रवाचनंदेवेषुविभ्वोअभवन्महित्वनम् ।
जिव्रीयत्सन्तापितरासनाजुरापुनर्युवानाचरथायतक्षथ ॥ ३ ॥

तत् । वः । वाजाः । ऋभवः । सुऽप्रवाचनम् । देवेषु । विऽभ्वः ।
अभवत् । महिऽत्वनम् । जिव्री इति । यत् । सन्ता । पितरा ।
सनाऽजुरा । पुनः । युवाना । चरथाय । तक्षथ ॥ ३ ॥

हेवाजाः ऋभवः हेविभ्वः विभवः इतरापेक्षयापरस्परंबहुवचनंइत्युक्तं वोयुष्माकं तन्महित्वनंमहत्त्वं माहात्म्यं देवेषुमध्ये सुप्रवाचनं प्रवाच्यमभवत् तदित्युक्तं यदित्याह—जिव्रीवृद्धौसन्तासन्तौ सनाजुरा सदाजीर्णौसन्तौ पितरा पितरौ पुनर्युवानानित्यतरुणौ चरथाय यथेच्छंसञ्चरणाय तक्षथ सम्पादितवन्तः ॥ ३ ॥

अथचतुर्थी—

एकंविचक्रचमसंचतुर्वयंनिश्चर्मणोगामरिणीतधीतिभिः ।
अथादेवेष्वमृतत्वमानशश्रुष्टीवाजाऋभवस्तद्वउक्थ्यम् ॥ ४ ॥

एकम् । वि । चक्र । चमसम् । चतुःऽवयम् । निः । चर्मणः ।
गाम् । अरिणीत । धीतिऽभिः । अथ । देवेषु । अमृतऽत्वम् ।
आनश । श्रुष्टी । वाजाः । ऋभवः । तत् । वः । उक्थ्यम् ॥ ४ ॥

हेऋभवः एकंचमसं एकमेवसन्तंपानसाधनंचमसंचतुर्वयं वयाः शाखाश्चतुःशाखं चतुरवयवंविचक्र व्यकुरुत तथा धीतिभिः कर्मभिः चर्मणः नूतनांगांनिररिणीत संस्कुरुत निरित्येषसमित्येतस्यस्थाने अथातःकारणाद्देवेषुमध्ये अमृतत्वमानश प्रामुत हेवाजाः ऋभवः तत्तादृशं वोयुष्माकंकर्म श्रुष्टीतिक्षिप्रनामैतत् क्षिप्रमुक्थ्यंस्तुत्यंभवति ॥ ४ ॥

अथपञ्चमी–

ऋभुतोरयिःप्रंथमश्रंवस्तमोवाजंश्रुतासोयमजींजनन्नरंः ।
विभ्वतष्टोविदथेंषुप्रवाच्योयंदेवासोवंथासविचंर्षणिः ॥ ५ ॥ ७ ॥

ऋभुतः । रयिः । प्रथमश्रंवः ऽतमः । वाजंऽश्रुतासः । यम् ।
अजींजनन् । नरंः । विभ्वऽतष्टः । विदथेंषु । प्रऽवाच्यंः ।
यम् । देवासः । अवंथ । सः । विऽचंर्षणिः ॥ ५ ॥ ७ ॥

ऋभुतः ऋभूणांसकाशात्प्रथमश्रवस्तमः प्रथमंमुख्यमतिशयितंश्रवोन्नंयशोवायस्यधनस्यतद्रयिर्धनमस्माकंभवत्विविशेषः वाजश्रुतासः वाजैःसहविख्याताः नरोनेतारोऋभवः यंरयिमजीजनन्नुत्पादितवन्तः विभ्वतष्टः विभ्वभिर्ऋभुभिस्तष्टस्तक्षणसम्पन्नः चमसोश्विनोरथोवा विदथेषुयज्ञेषुप्रवाच्यः प्रकर्षेणस्तुत्यः हेदेवासोद्योतमानायूयंरथं चमसंवा अवथ रक्षथ सविचर्षणिः विविधंद्रष्टाभवति द्रष्टव्योभवतीत्यर्थः ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेसप्तमोवर्गः ॥ ७ ॥

अथषष्ठी–

सवाज्यर्वासऋषिंर्वंचस्ययासशूरोअस्तापृतंनासुदुष्टरंः ।
सरायस्पोषंससुवीर्यंदधेयंवाजोविभ्वाँऋभवोयमाविंषुः ॥ ६ ॥

सः । वाजी । अर्वा । सः । ऋषिंः । वचस्ययां । सः । शूरंः ।
अस्तां । पृतंनासु । दुस्तरंः । सः । रायः । पोषंम् । सः । सुऽवीर्यम् ।
दधे । यम् । वाजंः । विऽभ्वां । ऋभवंः । यम् । आविंषुः ॥ ६ ॥

सवाजी वेजनवान्बलवान्सन्नर्वा अरणकुशलोभवति सऋषिरतीन्द्रियज्ञानीसन्वचस्यया स्तुत्यायुक्तोभवति सशूरोविक्रान्तःसन्नस्ताक्षेप्ताशत्रूणांभवति स्वयंचपृतनासुसंग्रामे-

Funding by IKS-MoE

षु दुष्टरोनाभिभाव्योभवति सएवरायस्पोषंधनपुष्टिं दधे धत्ते ससुवीर्यंसुवीरत्वं दधे धत्ते यं मनुष्यंवाजोयंच विभ्वा ऋभवश्चाविषुररक्षन् सएवमेवंभवतीति अन्त्यस्यबहुवन्निर्देशस्त्रयाणामृभुत्वव्यवहारप्राचुर्याभिप्रायः ॥ ६ ॥

अथसप्तमी–

श्रेष्ठं॑व॒:पेशो॒अधि॑धायिद॒र्श॒तंस्तोमो॑वाजाऋभव॒स्तंजु॑जु॒ष्टन ।
धीरा॑सो॒हिष्ठाक॒वयो॑विप॒श्चित॒स्तान्व॑ए॒नाब्रह्म॒णावे॑दयामसि ॥७॥

श्रेष्ठ॑म् । व॒ः । पेश॑ः । आधि॑ । धा॒यि॒ । द॒र्श॒तम् । स्तोम॑ः । वा॒जा॒ः ।
ऋ॒भ॒व॒ः । तम् । जु॒जु॒ष्ट॒न॒ । धीरा॑सः । हि । स्थ । क॒वय॑ः ।
वि॒प॒ःऽचित॑ः । तान् । व॒ः । ए॒ना । ब्रह्म॑णा । आ । वे॒द॒या॒म॒सि ॥ ७॥

श्रेष्ठं अत्युत्कृष्टमतएव दर्शतं दर्शनीयं वोयुष्माकं पेशोरूपं अधिधायि अधिनिहितं अतस्तदुचितोयःस्तोमः स्तोत्रमस्मत्कृतमस्ति हेवाजाऋभवः तंस्तोमंस्तोत्रंजुजुष्टन सेवध्वं ये यूयंधीरासोहि धीमन्तःप्रसिद्धाःकवयोमेधाविनोविपश्चितोज्ञानवन्तःस्थभवथ तान्वोयुष्मानेना एतेनब्रह्मणामन्त्रेणशस्त्रात्मकेनावेदयामसि अथवोक्तलक्षणाविपश्चितःस्तोतारोयान्स्तुवंतितिशेषः तान्ब्रह्मणावेदयामः प्रज्ञापयामः ॥ ७ ॥

अथाष्टमी–

यू॒यम॒स्मभ्यं॑धि॒षणा॑भ्य॒स्परि॑वि॒द्वांसो॒विश्वा॒नर्या॑णि॒भोज॑ना ।
द्यु॒मन्तं॒वाजं॒वृष॑शुष्ममु॒त्तममानो॑र॒यिमृ॑भवस्तक्ष॒तावय॑ः ॥ ८ ॥

यू॒यम् । अ॒स्मभ्य॑म् । धि॒षणा॑भ्यः । परि॑ । वि॒द्वांस॑ः । विश्वा॑ ।
नर्या॑णि । भोज॑ना । द्यु॒ऽमन्त॑म् । वाज॑म् । वृष॑ऽशुष्मम् । ।
उ॒त्ऽत॒मम् । आ । न॒ः । र॒यिम् । ऋ॒भ॒व॒ः । त॒क्ष॒त । आ । वय॑ः॥८॥

हेऋभवः यूयमस्मभ्यं धिषणाभ्यस्परि स्तुतिभ्योनिमित्तभूताभ्यः परीतिपञ्चम्यर्थानुवादी यद्वा अस्मन्मतिभ्योधिकानिनर्याणि नृभ्योहितानि विश्वा सर्वाणि भोजना-

भोग्यानि विद्वांसोजानन्तःसन्तः आतक्षत सम्पादयत किञ्च द्युमन्तं दीप्तिमन्तं हिरण्यादिरूपंवार्जबलवन्तं वृषशुष्मं सेक्तृणांबलवतां शोषकमुत्तमंरयिं नोस्माकंवयोन्नंच आतक्षत हेऋभवः ॥ ८ ॥

अथनवमी—

इहप्रजामिहरयिंरराणाइहश्रवोवीरवंत्तक्षतानः ।
येनवयंचितयेमात्यन्यान्तंवाजंचित्रमृभवोददानः ॥ ९ ॥ ८ ॥

इह । प्रऽजाम् । इह । रयिम् । रराणाः । इह । श्रवः । वीरऽवत् ।
तक्षत । नः । येन । वयम् । चितयेम । अति । अन्यान् । तम् ।
वाजम् । चित्रम् । ऋभवः । दद । नः ॥ ९ ॥ ८ ॥

नोस्माकमिहयज्ञे रराणाः रममाणाः प्रजां पुत्रपौत्रादिरूपां तक्षत सम्पादयत इहैवरराणाः रयिंचतक्षत इहैवयज्ञेश्रवोयशः वीरवद्वीरैः भृत्यादिभिरूपेतंतक्षत किञ्च वयं येनवाजेनान्यानस्मत्समानतिचितयेम अतिक्रम्यज्ञायेमहि तंचित्रंचायनीयंवाजमन्नं हेऋभवः नोददास्मभ्यंदत्त ॥ ९ ॥

॥ इतितृतीयस्यसप्तमेष्टमोवर्गः ॥ ८ ॥

उपनोवाजाइत्यष्टर्चंपञ्चमंसूक्तं वामदेवस्यार्षमार्भवंत्रैष्टुभम् पञ्चम्याद्याश्चतस्रोनुष्टुभः तथाचानुक्रान्तम्—उपनोष्टौचतुरनुष्टुबन्तमिति । व्यूढेदशरात्रेषष्ठेहनिवैश्वदेवशस्त्रेआद्याश्चतस्रः शस्याः । उपनोवाजाइतित्रयोदशार्भवंचतस्रश्चेतिहिसूत्रितम् ।

तत्रप्रथमा—

उपनोवाजाअध्वरमृभुक्षादेवायातपथिभिर्देवयानैः ।
यथायज्ञंमनुषोविक्ष्वासुदधिध्वेरण्वाःसुदिनेष्वह्नाम् ॥ १ ॥

उप । नः । वाजाः । अध्वरम् । ऋभुक्षाः । देवाः । यात ।
पथिऽभिः । देवऽयानैः । यथा । यज्ञम् । मनुषः । विक्षु ।
आसु । दधिध्वे । रण्वाः । सुऽदिनेषु । अह्नाम् ॥ १ ॥

Funding by IKS-MoE

हेवाजाः हेऋभुक्षाः ऋभवःहेदेवाः नोध्वरंयागमुपयात उपगच्छत देवयानैःदेवैर्गंतव्यैः पथिभिर्मार्गैः यथायेनप्रकारेण मनुषोमनोःसम्बन्धिनीष्वासुविक्षुप्रजासु यजमानेषुमध्ये हेरण्वाः रमणीयाऋभवः अह्नांसुदिनेषु सुदिनत्वनिमित्तेषुयज्ञमस्मदीयंदधिध्वे धारयथ यथा येनप्रकारेण यज्ञमागत्यसुदिनत्वंकुरुथ तथा यज्ञमायातेति ॥ १ ॥

अथद्वितीया–

तेवोहृदेमनसेसन्तुयज्ञाजुष्टासोअद्यघृतनिर्णिजोगुः ।
प्रवःसुतासोहरयन्तपूर्णाःक्रत्वेदक्षायहर्षयन्तपीताः ॥ २ ॥

ते । वः । हृदे । मनसे । सन्तु । यज्ञाः । जुष्टासः । अद्य ।
घृतऽनिर्निजः । गुः । प्र । वः । सुतासः । हरयन्त । पूर्णाः । क्रत्वे ।
दक्षाय । हर्षयन्त । पीताः ॥ २ ॥

अद्यास्मिन्यागदिने ते एते यज्ञाः यागसाधनाः सोमाः वोहृदेहृदयाय मनसे तत्प्रीतये सन्तु भवन्तु अद्यास्मिन्दिनेजुष्टासः पर्याप्ताः सोमाः घृतनिर्णिजः मिश्रणद्रव्येणदीप्तरूपाः गुः गच्छन्तु युष्मद्धृदयं सुतासोभिषुताःसोमाश्चमसेषुपूर्णाः वोयुष्मदर्थंप्रहरयन्त प्रह्रियन्ते यद्वा हर्यतेःकान्तिकर्मणइदंरूपं प्रकर्षेणवोयुष्मान्कामयन्ते क्रत्वे क्रतवे कर्मणे दक्षायोत्साहाय पीताः हर्षयन्त हर्षयन्तु ॥ २ ॥

अथतृतीया–

त्र्युदायन्देवहितंयथावःस्तोमोवाजाऋभुक्षणोददेवः ।
जुह्वेमनुष्वदुपरासुविक्षुयुष्मेसचाबृहद्दिवेषुसोमम् ॥ ३ ॥

त्रिऽउदायम् । देवऽहितम् । यथा । वः । स्तोमः । वाजाः । ऋभुक्षणः ।
ददे । वः । जुह्वे । मनुष्वत् । उपरासु । विक्षु । युष्मे इति । सचा ।
बृहत्ऽदिवेषु । सोमम् ॥ ३ ॥

त्र्युदायं त्र्युदयं सवनत्रयगमनोपेतं देवहितं सोमाख्यमन्नं देवेभ्योहितं देवैर्वाविहितं तृतीयसवनस्थमित्यर्थः तद्यथावोयुष्मान्ददे धारयति हेवाजाः हेऋभुक्षणऋभवः यथास्तोमः

स्तोत्रंवोददे धारयति उपरासु उपदेवयजनसमीपेरमन्तइत्युपरास्तासु विक्षु प्रजासु बृहद्दिवेषु प्रभूतदीप्तेषु देवेषुमध्ये मनुष्वत् मनुरिवयुष्मे युष्मदर्थं सचा सहानेकग्रहेषु प्रस्थितं जुह्वे जुहोमिसोमम् ॥ ३ ॥

अथचतुर्थी—

पीवो॑अश्वाःशु॒चद्र॑था॒हिभू॒ताय॑ःशिप्रावाजिनःसुनि॒ष्काः ।
इन्द्र॑स्यसूनोशवसोनपा॒तोनु॑वश्चेत्यग्रि॒यंमदा॑य ॥ ४ ॥

पीव॑ःऽअश्वाः । शु॒चत्ऽर॑थाः । हि । भू॒त । अय॑ःऽशिप्राः । वा॒जि॒नः॒ ।
सु॒ऽनि॒ष्काः । इन्द्र॑स्य । सू॒नो॒ इति॑ । श॒व॒सः॒ । न॒पा॒तः॒ । अनु॑ । वः॒ ।
चे॒ति॒ । अ॒ग्रि॒यम् । मदा॑य ॥ ४ ॥

हेवाजिनऋभवः पीवोअश्वाः पीवानोश्वायेषांतेतादृशाः तथा शुचद्रथाः दीप्तरथाः अयःशिप्राः शिप्रेहनूनासिकेवा अयोवत्सारभूतशिप्राः सुनिष्काः शोभनधनाश्च भूत भवत हे इन्द्रस्यसूनो सूनवः पुत्रवद्रक्षणीयाः हेशवसोनपातः बलस्यपुत्राः बलिनः वोयुष्मभ्यंमदायानुचेति अन्वज्ञायि देवेष्वग्रियमग्रेभवंतृतीयसवनं हिपूरणः ॥ ४ ॥

अथपंचमी—

ऋ॒भुमृ॑भुक्षणोर॒यिंवाजे॑वा॒जिन्त॑मं॒युज॑म् ।
इन्द्र॑स्वन्तंहवामहेसदा॒सात॑मम॒श्विन॑म् ॥ ५ ॥ ९ ॥

ऋ॒भुम् । ऋ॒भु॒क्ष॒णः॒ । र॒यिम् । वाजे॑ । वा॒जिन्ऽत॑मम् ।
युज॑म् । इन्द्र॑स्वन्तम् । ह॒वा॒म॒हे॒ । स॒दा॒ऽसात॑मम् । अ॒श्विन॑म् ॥५॥९॥

हेऋभुक्षणः ऋभवः ऋभुं उरुभासमानं रयिं धनरूपं तद्धेतुभूतत्वात्ताच्छब्द्यं वाजेसंग्रामेवाजिन्तममत्यन्तबलवन्तं युजं परस्परयोगोपेतं इन्द्रस्वन्तमिन्द्रवन्तमिन्द्रियवन्तं सदासातमं सर्वदादातृतममश्विनमश्ववन्तं भवतांगणं हवामहे आह्वयामि ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेनवमोवर्गः ॥ ९ ॥

Funding by IKS-MoE

अथषष्ठी—

सेदृ॑भवो॒यमव॑थयू॒यमिन्द्र॑श्च॒मर्त्य॑म् ।
सधी॒भिर॑स्तु॒सनि॑तामे॒धसा॑ता॒सोअर्व॑ता ॥ ६ ॥

सः । इत् । ऋ॒भ॒व॒ः । यम् । अव॑थ । यू॒यम् । इन्द्र॑ः । च॒ । मर्त्य॑म् ।
सः । धी॒भिः । अ॒स्तु॒ । सनि॑ता । मे॒धऽसा॑ता । सः । अर्व॑ता ॥ ६ ॥

हेऋभवः यूयं इन्द्रश्च यंमर्त्यमवथ रक्षथ सेत् सएवास्तु भवतु नान्यःश्रेष्ठोभवतीत्यर्थः सएव धीभिः कर्मभिः सनिता संभक्ताभवतु मेधसाता मेधसातौ यज्ञे सएवार्वता रणताश्वेनयुक्तोभवतु ॥ ६ ॥

अथसप्तमी—

विनो॑वाजाऋभुक्षणःप॒थश्चि॑तन॒यष्ट॑वे ।
अ॒स्मभ्यं॑सूरयस्तु॒ताविश्वा॒आशा॑स्तरी॒षणि॑ ॥ ७ ॥

वि । न॒ः । वा॒जा॒ः । ऋ॒भु॒क्ष॒ण॒ः । प॒थः । चि॒त॒न॒ । यष्ट॑वे ।
अ॒स्मभ्य॑म् । सू॒र॒य॒ः । स्तु॒ताः । विश्वा॑ः । आशा॑ः । त॒री॒षणि॑ ॥ ७ ॥

हेवाजाः हेऋभुक्षणः हेऋभवोनोस्माकंपथोमार्गान्यष्टवे यष्टुं यज्ञमार्गान्विचितन विचेतयत प्रज्ञापयतेत्यर्थः अस्मभ्यं हेसूरयोमेधाविनः यूयंस्तुताःसन्तः विश्वाआशाः सर्वादिशः तरीषणि तरीतुंसामर्थ्यंवितरतेतिशेषः ॥ ७ ॥

अथाष्टमी—

तंनो॑वाजाऋभुक्षण॒इन्द्र॒नास॑त्यार॒यिम् ।
समश्वं॑चर्ष॒णिभ्य॒आपु॒रुश॑स्तम॒घत्त॑ये ॥ ८ ॥ १० ॥

तम् । न॒ः । वा॒जा॒ः । ऋ॒भु॒क्ष॒ण॒ः । इन्द्र॑ । नास॑त्या । र॒यिम् ।
सम् । अश्व॑म् । च॒र्ष॒णिऽभ्य॑ः । आ । पु॒रु । श॒स्त॒ । म॒घत्त॑ये ॥ ८ ॥ १० ॥

अनयास्तुतिमुपसंहृत्याभिमतमाशास्ते हेवाजाः हेऋभुक्षणः ऋभवः हेइन्द्र हेनासत्याश्विनौ ते यूयं नोस्मभ्यं चर्षणिभ्योमनुष्येभ्यःस्तोतृभ्यः तंपुरुप्रभूतं रयिं धनमश्वंच पुरुप्रभूतं मघत्तयेधनदानाय समाशस्त सम्यगाशासनंकुरुत ॥ ८ ॥

॥ इतितृतीयस्यसप्तमेदशमोवर्गः ॥ १० ॥

उतोहिवामितिदशर्चंषष्ठंसूक्तं वामदेवऋषिः त्रिष्टुपछन्दः दधिक्रादेवता आद्याद्यावापृथिव्या अत्रानुक्रमणिका—उतोहिदशदाधिक्रंहिद्यावापृथिव्याद्येति विनियोगोलैङ्गिकः ।

तत्रप्रथमा—

उ॒तोहिवां॑दा॒त्रासन्ति॒पूर्वा᳚यापू॒रुभ्य॑स्त्र॒सद॑स्युर्नि᳚तो॒शे ।
क्षे॒त्रा॒सांद॑दथुरु॒र्व᳚रा॒सांघ॒नंदस्यु॑भ्योअ॒भिभू॑तिमु॒ग्रम् ॥ १ ॥

उ॒तो इति॑ । हि । वा॒म् । दा॒त्रा । सन्ति॑ । पूर्वा᳚ । या । पू॒रुऽभ्य॑ः ।
त्र॒सद॑स्युः । नि॒ऽतो॒शे । क्षे॒त्र॒ऽसाम् । द॒द॒थुः । उ॒र्व॒रा॒ऽसाम् । घ॒नम् ।
दस्यु॑ऽभ्यः । अ॒भिऽभू॑तिम् । उ॒ग्रम् ॥ १ ॥

उतोइतिपूरणः अस्याद्यावापृथिव्यत्वादत्रतद्वाचकशब्दाभावेपितेएवसंबोद्धव्ये हेद्यावापृथिव्यौ वां युवाभ्यां सकाशाद्दात्रा दानकर्त्रा पौरुकुत्स्येन त्रसदस्युनालब्धानिपूर्वा पूर्वाणि पुरातनानि पूरकाणिवाधनानिसन्ति या यानिधनानि पूरुभ्योर्थिभ्योमनुष्येभ्यः त्रसदस्युः राजा नितोशे न्यतोशत दत्तवान् क्षेत्रसां क्षेत्राणि सर्वाभूमीः सनोतीतिक्षेत्रसाःअश्वःतंददथुः तथा उर्वरासां उर्वरासर्वसस्याढ्याभूः तांसनोतीति उर्वरासाः पुत्रःतंददथुः घनं हननार्हमायुधं दस्युभ्योदस्यूनांवधार्थंच ददथुः कीदृशंआयुधंअभिभूतिमभिभवितारंउग्रमुद्गूर्णबलं यद्वा उत्तरार्धमेकंवाक्यं दातव्यानिधनानि उक्तलक्षणंपुत्रंचददथुः दत्तवत्यौस्थः तानिमह्यमपिददाथामित्यर्थः हिपूरणः ॥ १ ॥

अथद्वितीया—

उ॒तवा॒जिनं॑पुरु॒नि॒ष्षिध्वा॑नंद॒धि॒क्रामु॑ददथु॒र्वि᳚श्वकृ॑ष्टिम् ।
ऋ॒जि॒प्यं॑श्ये॒नंप्रु॑षि॒तप्सु॑मा॒शुंच॒र्कृत्य॑म॒र्यो᳚नृ॒पतिं॒नशूर॑म् ॥ २ ॥

उ॒त । वा॒जिन॑म् । पु॒रु॒नि॒ःऽसिध्वा॑नम् । द॒धि॒ऽक्राम् । उँ॒ इति॑ ।
द॒द॒थुः॒ । वि॒श्वऽकृ॑ष्टिम् । ऋ॒जि॒प्यम् । श्ये॒नम् । प्रु॒षि॒तऽप्सु॑म् ।
आ॒शुम् । च॒र्कृत्य॑म् । अ॒र्यः । नृ॒ऽपति॑म् । न । शूर॑म् ॥ २ ॥

उतापिच वाजिनंगमनवन्तमश्वरूपंवादेवं अग्नेरश्वरूपस्येवदधिक्राख्यत्वादग्नेस्तद्रूपत्वंब्राह्मणेसमाम्नातम्—[1]तांनग्निरश्वोभूत्वाभ्यत्यद्रवदिति । पुरुनिष्षिध्वानं पुरूणांबहूनांशत्रूणांनिषेद्धारं दधिक्रांदधदन्यंधारयन्क्रामतीतिदधिक्राः तमेतन्नामकंदेवं उःपूरणः विश्वकृष्टिं विश्वाःकृष्टयोरक्षणीयाःसेवकावामनुष्यायस्यतं ऋजिप्यं ऋजुआप्नोतिगच्छतीतिऋजिप्यस्तं श्येनं शंसनीयगमयं प्रुषितप्सुं दीप्तरूपंआशुं व्याप्तं शीघ्रगमनंवा अर्यः अरेश्चर्कृत्यं कर्तनशीलं शूरं नृपतिंन राजानमिव स्थितंदेवंद्यावापृथिव्यौददथुः धारयतः ॥२॥

अथतृतीया—

यंसी॒मनु॑प्र॒वते॑व॒द्रव॑न्तं॒विश्वः॑पू॒रुर्मद॑ति॒हर्ष॑माणः ।
प॒ड्भिर्गृध्य॑न्तंमेध॒युंनशूरं॑रथ॒तुरं॒वात॑मिव॒ध्रज॑न्तम् ॥ ३ ॥

यम् । सी॒म् । अनु॑ । प्र॒वता॑ऽइव । द्रव॑न्तम् । विश्वः॑ । पू॒रुः । मद॑ति ।
हर्ष॑माणः । प॒ट्ऽभिः । गृध्य॑न्तम् । मे॒ध॒ऽयुम् । न । शूर॑म् । र॒थ॒ऽतुर॑म् ।
वात॑म्ऽइव । ध्रज॑न्तम् ॥ ३ ॥

यं दधिक्रां विश्वःपूरुःसर्वोपिमनुष्योहर्षमाणःहृष्यन्हर्षयन्वामदतिस्तौति तं देवं द्यावापृथिव्यौददथुरितिसंबन्धः सदेवोविशेष्यते सींसर्वतःप्रवताप्रवणवतानिम्नेनमार्गेणोदकमिव अनुक्रमेण द्रवन्तंगच्छन्तं पड्भिः पादैः गृध्यन्तमभिकांक्षन्तंदिशोलंघितुं तत्रदृष्टान्तः—मेधयुंनशूरं संग्रामेच्छुंशूरमिव यद्वा यज्ञक्रमणेच्छुमध्वर्य्वादिकमिव रथतुरं रथेनगच्छन्तंवातमिव ध्रजन्तंशीघ्रगंवायुमिव उक्तविशेषणविशिष्टानुदकशूरवायून्यथासर्वोजनःस्तौति तथा यंदेवंस्तौतितंददथुरित्यर्थः ॥ ३ ॥

---

[1] ऐ० ब्रा० ३. ४९. ।

Funding by IKS-MoE

अथचतुर्थी—

यःस्मा॑रु॒न्धा॒नोगध्या॑स॒मत्सु॒सनु॑तर॒श्चर॑ति॒गोषु॒गच्छ॑न् ।
आ॒विर्ऋ॑जीकोवि॒दथा॑नि॒चिक्य॑त्ति॒रोअ॑र॒तिंपर्याप॑आ॒योः ॥ ४ ॥

यः । स्म॒ । आ॒ऽरु॒न्धा॒नः । गध्या॑ । स॒मत्ऽसु॑ । सनु॑ऽतरः । चर॑ति । गोषु॑ । गच्छ॑न् । आ॒विःऽऋ॑जीकः । वि॒दथा॑ । नि॒ऽचिक्य॑त् । ति॒रः । अ॒र॒तिम् । परि॑ । आपः॑ । आ॒योः ॥ ४ ॥

यःस्म यःखलु देवोगध्यागध्यानि गध्यतिर्मिश्रीभावकर्मेतिनिरुक्तम्[1] । मिश्रयितव्यानिफलानिसमत्सुसंग्रामेषुआरुन्धानःसर्वतोनिरोधयन्सनुतरः संभक्तृतरोगोषुसर्वासुदिक्षु गोषुवानिमित्तभूतेषुगच्छन्नाविर्ऋजीकः आविर्भूतसाधनः आविर्भूतमुष्कोवा विदथानि ज्ञातव्यानि निचिक्यत् पश्यतिकर्मैतत् जानन् अरतिमरमणंदुःखमभिगन्तारं अरिंवापरिसर्वतस्तिरश्चति तिरस्करोति कस्यारतिमिति आपोआप्तस्यस्तोतुरायोर्मनुष्यस्ययजमानस्य ॥ ४ ॥

अथपञ्चमी—

उ॒तस्मै॑नंवस्त्र॒माथिं॒नता॒युमनु॑क्रोशन्तिक्षि॒तयो॒भरे॑षु ।
नी॒चाय॑मानं॒जसु॑रिं॒नश्ये॒नंश्रव॒श्चाच्छा॑पशु॒मच्च॑यू॒थम् ॥ ५ ॥ ११ ॥

उ॒त । स्म॒ । ए॒न॒म् । व॒स्त्र॒ऽमाथि॑म् । न । ता॒युम् । अनु॑ । क्रो॒श॒न्ति॒ । क्षि॒तयः॑ । भरे॑षु । नी॒चा । अय॑मानम् । जसु॑रिम् । न । श्ये॒नम् । श्रवः॑ । च॒ । अच्छ॑ । प॒शु॒ऽमत् । च॒ । यू॒थम् ॥ ५ ॥ ११ ॥

उतस्म अपिखलु एनंदधिक्रांभरेषुसंग्रामेषु वस्त्रमाथिंतायुंन वस्त्रमाथिनंतस्करमिव तंदृष्ट्वाक्षितयोमनुष्यायथाक्रोशन्तितद्वद्वैरिणोनुक्रोशन्ति किञ्च नीचा नीचैरयमानंगच्छन्तंजसुरिंन श्येनंक्षुधितंश्येनपक्षिणमिव तंयथादृष्ट्वापक्षिणःपलायन्तेतद्वत् श्रवोन्नंकीर्तिंवापशुमद्यूथंच अच्छाभिलक्ष्यगच्छन्तमेनमनुक्रोशन्तीतिसंबन्धः चपूरणः अपिस्मैनंवस्त्रमथिमिववस्त्रमाथिनमित्यादिनिरुक्तम्[2]अत्रानुसन्धेयम् ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेएकादशोवर्गः ॥ ११ ॥

---

[1] नि॰ ५. १५. । [2] नि॰ ४. २४. ।

अथषष्ठी–

उतस्मासुप्रथमःसरिष्यन्निवेवेतिश्रेणिभीरथानाम् ।
स्रजंकृण्वानोजन्योनशुभ्वारेणुंरेरिहत्किरणंददश्वान् ॥ ६ ॥

उत । स्म । आसु । प्रथमः । सरिष्यन् । नि । वेवेति । श्रेणिऽभिः ।
रथानाम् । स्रजम् । कृण्वानः । जन्यः । न । शुभ्वा ।
रेणुम् । रेरिहत् । किरणम् । ददश्वान् ॥ ६ ॥

उतस्म अपिचखलु आस्वसुरसेनासुसरिष्यन्सर्तुमिच्छन् प्रथमः प्रतमः उत्कृष्टतमोमुख्यः सन् रथानांश्रेणिभीराजिभिर्युक्तःसन्निवेवेति नितरांगच्छति इतस्ततोधावति कइवइत्युच्यते-स्रजंसृज्यते उत्पाद्यतेरूपमनयेतिस्रगलंकृतिस्तां कृण्वानः जन्योन जनेभ्योहितोश्वइव शुभ्वा सुष्ठुभवतीतिशुभ्वाशोभमानः किरणं आस्यगतंखलीनंददश्वान्दशन् रेणुं स्वपादघातजनितं रेरिहद्भृशंरेढि ॥ ६ ॥

अथसप्तमी–

उतस्यवाजीसहुरिर्ऋतावाशुश्रूषमाणस्तन्वासमर्ये ।
तुरंयतीषुतुरयन्नृजिप्योधिभ्रुवोःकिरतेरेणुमृञ्जन् ॥ ७ ॥

उत । स्यः । वाजी । सहुरिः । ऋतऽवा । शुश्रूषमाणः । तन्वा ।
सऽमर्ये ॥ तुरम् । यतीषु । तुरयन् । ऋजिप्यः । अधि ।
भ्रुवोः । किरते । रेणुम् । ऋञ्जन् ॥ ७ ॥

उतापिच स्यः सउक्तलक्षणोवाजी वेजनवान् गमनवान् समर्येसमरणेसहुरिःसहनशीलः शत्रूणां ऋतावाअन्नवान् तन्वास्वस्यावयवेनखुरादिनास्वतनुंशुश्रूषमाणः तुरंयतीषु त्वरगामिनीष्वसुरसेनासु तुरयन् त्वरयन् ऋजिप्यः ऋजुगामी रेणुं धूलिमृंजन् प्रसाधयन्तमेवरेणुंभुवोरधि उपरि किरते विक्षिपति ॥ ७ ॥

अथाष्टमी–

उतस्मास्यतन्यतोरिवद्योर्ऋघायतोअभियुजोभयन्ते ।
यदासहस्रमभिषीमयोधीद्दुर्वर्तुःस्माभवतिभीमऋञ्जन् ॥ ८ ॥

उ॒त । स्म॒ । अ॒स्य॒ । त॒न्य॒तोःऽइ॑व । द्योः । ऋ॒घा॒य॒तः । अ॒भि॒ऽयुज॑ः ।
भ॒य॒न्ते॒ । य॒दा । स॒ह॒स्र॑म् । अ॒भि । सी॒म् । अयो॑धीत् ।
दु॒ःऽवर्तु॑ः । स्म॒ । भ॒व॒ति॒ । भी॒मः । ऋ॒ञ्जन् ॥ ८ ॥

उतस्म अपिचखलु द्योर्दीप्यमानात्तन्यतोःशब्दयितुरशनेरिव ऋघायतोहिंसतोऽस्य अस्माद्दधिक्रावाख्याद्देवादभियुजोऽभियोक्तारोऽसुराःभयन्तेबिभ्यति किंचायं यदा सींसर्वतः सहस्रमभ्ययोधीत्संप्रहरेत् तदा ऋंजन्प्रसाधयन्नात्मानंभीमोभयहेतुर्दुर्वर्तुर्दुर्वारश्चभवति ॥ ८ ॥

अथनवमी–

उ॒तस्मा॑स्यपनयन्ति॒जना॑ंजू॒तिंकृ॑ष्टि॒प्रोअ॒भिभू॑तिमा॒शोः ।
उ॒तैनं॑माहुःसमि॒थेवि॒यन्त॒ःपरा॑दधि॒क्राअ॑सरत्स॒हस्रैः॑ ॥ ९ ॥

उ॒त । स्म॒ । अ॒स्य॒ । प॒न॒य॒न्ति॒ । जना॑ः । जू॒तिम् । कृ॒ष्टि॒ऽप्रः ।
अ॒भिऽभू॑तिम् । आ॒शोः । उ॒त । ए॒न॒म् । आ॒हु॒ः । स॒म्ऽइ॒थे ।
वि॒ऽयन्त॑ः । परा॑ । द॒धि॒ऽक्राः । अ॒स॒र॒त् । स॒हस्रैः॑ ॥ ९ ॥

उतस्मापिचखलु अस्यदधिक्राव्णोभिभूतिमभिभवित्रीं जूतिं पराभिभूतिमित्युभयं-वाजनाः पनयन्ति स्तुवन्ति कीदृशस्यास्यकृष्टिप्रः कृष्टयोमनुष्यास्तेषांपूरकस्याशोर्व्याप्तस्य वेगवतोवा उतापिचैनंसमिथे संग्रामेवियन्तोविविधंगच्छंतोजनाःअयंदधिक्रादेवः सहस्रैरनुचरैः परिवृतः परासरदितिअस्मान्विहायान्यान्हन्तुंगतइत्याहुः यद्वा एनमेवाहुः वियन्तःशत्रवः पराभवन्तीतिशेषः दधिक्रासहस्रैरसरत्गच्छन्तीति ॥ ९ ॥

पवित्रेष्टौआदधिक्राइतिदधिक्राव्णोयाज्या तथाचसूत्रितम्–दधिक्राव्णोअकारिषमाद-धिक्राःशवसापञ्चकृष्टीरिति ।

सैषादशमी–

आद॑धि॒क्राःशव॑सा॒पञ्च॑कृ॒ष्टीःसूर्य॑इव॒ज्योति॑षा॒पस्त॑तान ।
स॒ह॒स्र॒साःश॑त॒सावा॒ज्यर्वा॑पृ॒णक्तु॒मध्वा॒समि॒मावचां॑सि ॥१०॥१२॥

आ । दधिऽक्राः । शवसा । पञ्च । कृष्टीः । सूर्यःऽइव ।
ज्योतिषा । अपः । ततान । सहस्रऽसाः । शतऽसाः । वाजी ।
अर्वा । पृणक्तु । मध्वा । सम् । इमा । वचांसि ॥ १० ॥ १२ ॥

योदधिक्रादेवः शवसाबलेन पञ्चकृष्टीः पञ्चजनान्देवमनुष्यासुररक्षःपितृसंज्ञकान्निषादपञ्चमांश्चतुरोवर्णान्वासूर्योज्योतिषातेजसायथाजगदावृणोतितद्वदपः उकानि आततान आतनोति सहस्रसाःशतसाःशतानांसहस्राणांचदाता वाजी वेजनवानर्वाऽरणकुशलः सदेवोमध्वा मधुनामधुरेणफलेनइमेमान्युक्तानिस्तुतिवचांसिसंपृणक्तु संयोजयतु ॥ १० ॥

॥ इतितृतीयस्यसप्तमेद्वादशोवर्गः ॥ १२ ॥

आशुंदधिक्रामितिषळृचंसप्तमंसूक्तम् आदितःपञ्चत्रिष्टुभः षष्ठीअनुष्टुप् ऋषिर्वामदेवः पूर्वसूक्तेहीत्युक्तत्वादेतदपिदाधिक्रम् तथाचानुक्रान्तम्—आशुंषळंत्यानुष्टुबिति । सूक्तविनियोगोलैङ्गिकः ।

तत्रप्रथमा—

आशुंदधिक्रांतमुनुष्टवामदिवस्पृथिव्याउतचर्किराम ।
उच्छन्तीर्मामुषसःसूदयन्त्वतिविश्वानिदुरितानिपर्षन् ॥ १ ॥

आशुम् । दधिऽक्राम् । तम् । ऊँ इति । नु । स्तवाम । दिवः ।
पृथिव्याः । उत । चर्किराम । उच्छन्तीः । माम् । उषसः । सूदयन्तु ।
अति । विश्वानि । दुःऽइतानि । पर्षन् ॥ १ ॥

आशुं शीघ्रगामिनं तमु तमेव दधिक्रां देवं नु क्षिप्रं स्तवाम उतापिच दिवःपृथिव्याश्चसकाशादस्यघासंचर्किराम विक्षिपाम उच्छन्तीस्तमोविवासयन्तीः उषसोमांप्रति सूदयन्तु रक्षंतु विश्वानिदुरितानि अतिपर्षन्नतिपारयन्तुच अन्यदेवताकेषुमन्त्रेष्वन्यदेवतास्तुतिस्तासांनिपातभाक्त्कान्न विरुध्यते ॥ १ ॥

अथद्वितीया—

महश्चर्कर्म्यर्वतःक्रतुप्रादधिक्राव्णःपुरुवारस्यवृष्णः ।
यंपूरुभ्योदीदिवांसंनाग्निंददथुर्मित्रावरुणाततुरिम् ॥ २ ॥

म॒हः । च॒र्कि॒र्मि॒ । अर्व॑तः । क्र॒तु॒ऽप्राः । द॒धि॒ऽक्राव्ण॑ः । पु॒रु॒ऽवार॑स्य ।
वृष्ण॑ः । यम् । पू॒रुऽभ्य॑ः । दी॒दि॒ऽवांस॑म् । न । अ॒ग्निम् । द॒दथु॑ः ।
मि॒त्रा॒व॒रु॒णा॒ । ततु॑रिम् ॥ २ ॥

क्रतुप्राः कर्मणांपूरकोहं महोमहतोर्वतःअरणवतः पुरुवारस्यबहुभिर्वरणीयस्यवृष्णोवर्षकस्यदधिक्राव्णःस्तुतिंचर्कर्मि अत्यर्थंकरोमि हेमित्रावरुणा मित्रावरुणौ युवांततुरिं तारकं यं दीदिवांसं नाग्निं दीप्यमानमग्निमिव स्थितं पूरुभ्योमनुष्येभ्यस्तेषामुपकारायददथुः धारयथः ॥ २ ॥

अथतृतीया–

योअश्व॑स्यदधि॒क्राव्णो॒अका॑री॒त्समि॑द्धेअ॒ग्नाउ॒षसो॒व्यु॑ष्टौ ।
अना॑गस॒न्तमदि॑तिःकृणोतु॒समि॒त्रेण॒वरु॑णेनास॒जोषाः॑ ॥ ३ ॥

यः । अश्व॑स्य । द॒धि॒ऽक्राव्ण॑ः । अका॑रीत् । सम्ऽइ॑द्धे । अ॒ग्नौ ।
उ॒षस॑ः । विऽउ॑ष्टौ । अना॑गसम् । तम् । अदि॑तिः । कृ॒णो॒तु॒ । सः ।
मि॒त्रेण॑ । वरु॑णेन । स॒ऽजोषाः॑ ॥ ३ ॥

योयजमानोस्याश्वरूपस्याश्वव्याप्तस्यवा दधिक्राव्णःस्तुतिमुषसोव्युष्टौ प्रभातेसति अग्नौ समिद्धेसति अकारीदकार्षीत् मित्रेणवरुणेनचाहोरात्राभिमानिदेवाभ्यांसजोषासमानप्रीतिरदितिरखण्डनीयोदधिक्रास्तंयजमानमनागसंपापरहितंकृणोतुकरोतु ॥ ३ ॥

अथचतुर्थी–

द॒धि॒क्राव्ण॑इ॒षऊ॒र्जोम॒होयदम॑न्महिम॒रुतां॒नाम॑भ॒द्रम् ।
स्व॒स्तये॒वरु॑णंमि॒त्रम॒ग्निंह॑वामह॒इन्द्रं॒वज्र॑बाहुम् ॥ ४ ॥

द॒धि॒ऽक्राव्ण॑ः । इ॒षः । ऊ॒र्जः । म॒हः । यत् । अम॑न्महि । म॒रुता॑म् ।
नाम॑ । भ॒द्रम् । स्व॒स्तये॑ । वरु॑णम् । मि॒त्रम् । अ॒ग्निम् । हवा॑महे ।
इन्द्र॑म् । वज्र॑ऽबाहुम् ॥ ४ ॥

Funding by IKS-MoE

इषोन्नसाधकस्योर्जोबलसाधकस्यमहोमहतोदधिक्राव्णोदेवस्यमरुतांस्तोतॄणांस्वभूतंभद्रं कल्याणंनामनामरूपमस्ति यत्तदमन्महिस्तुमः किञ्चात्रनिपातभाजोवरुणादींश्चस्वस्तयेक्षेमायहवामहे ॥ ४ ॥

अथपंचमी–

इन्द्र॑मि॒वेदु॒भये॒विह्व॑यन्तउ॒दीरा॑णाय॒ज्ञमु॑पप्र॒यन्त॑ः ।
द॒धि॒क्रामु॒सूद॑न॒म्मर्त्या॑यद॒दथु॑र्मित्रावरुणानो॒अश्व॑म् ॥ ५ ॥

इन्द्र॑म्ऽइव । इत् । उ॒भये॑ । वि । ह्व॒य॒न्ते॒ । उ॒त्ऽईरा॑णाः । य॒ज्ञम् ।
उ॒प॒ऽप्र॒यन्त॑ः । द॒धि॒ऽक्राम् । ऊँ॒ इति॑ । सूद॑नम् । मर्त्या॑य । द॒दथु॑ः ।
मि॒त्रा॒व॒रु॒णा॒ । न॒ः । अश्व॑म् ॥ ५ ॥

इन्द्रमिवैनंदधिक्रामुदीराणाःयुद्धायोद्योगंकुर्वंतोयज्ञमुपप्रयन्तः यज्ञमुपक्रम्यवर्तमानाश्चोभयेविह्वयन्ते आह्वयन्ति यंमर्त्यायमर्त्यस्यसूदनंप्रेरकमश्वमश्वरूपंदधिक्रांदेवं हेमित्रावरुणा नोस्माकमर्थायददथुः धारयथः तंविह्वयन्ते उभयइत्यत्रस्तोतृशंसितृभेदेनवोभयविधत्वमवगन्तव्यं उदुपूरणौ ॥ ५ ॥

दधिक्राव्णोअकारिषमितिषष्ठीपवित्रेष्ट्याअनुवाक्या सूत्रितंच–दधिक्राव्णोअकारिषमादधिक्राःशवसापञ्चकृष्टीरिति । दधिद्रप्सभक्षणेप्येषादधिक्राव्णोअकारिषमित्याग्नीध्रीयेदधिद्रप्सान्भक्षयन्तीतिसूत्रितत्वात्।

अथषष्ठी–

द॒धि॒क्राव्णो॑अकारिषं॑जि॒ष्णोरश्व॑स्यवा॒जिन॑ः ।
सु॒र॒भिनो॒मुखा॑कर॒त्प्रण॒आयूं॑षितारिषत् ॥ ६ ॥ १३ ॥

द॒धि॒ऽक्राव्ण॑ः । अ॒का॒रि॒ष॒म् । जि॒ष्णोः । अश्व॑स्य । वा॒जिन॑ः ।
सु॒र॒भि । न॒ः । मुखा॑ । क॒र॒त् । प्र । न॒ः । आयूं॑षि । ता॒रि॒ष॒त् ॥ ६ ॥ १३ ॥

दधिक्राव्णोदेवस्यस्तुतिमकारिषंकरवाणि जिष्णोर्जयशीलस्याश्वस्यव्यापकस्यवाजिनोवेगवतः सदेवोस्माकंमुखामुखानिचक्षुरादींद्रियाणि सुरभि सुरभीणि करत्करोतु नोस्मभ्यमायूंषिप्रतारिषत् प्रवर्धयतु प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ६ ॥

॥ इतितृतीयस्यसप्तमेत्रयोदशोवर्गः ॥ १३ ॥

दधिक्राव्णइदितिपञ्चर्चमष्टमंसूक्तं वामदेवस्यार्षं दाधिक्रं आद्यात्रिष्टुप् शिष्टाजगत्यः हंसःशुचिषदित्येकासूर्यदेवत्या तथाचानुक्रमणिका—दधिक्राव्णःपञ्चचतस्रोंत्याजगत्योन्त्यासौरीति । सूक्तविनियोगोलैङ्गिकः ।

तत्रप्रथमा—

द॒धि॒क्राऽव्ण॒इदु॒नुच॑र्किराम॒विश्वा॒इन्मामु॒षसः॑सूदयन्तु॒ ।
अ॒पाम॒ग्नेरु॒षस॒ःसूर्य॑स्य॒बृह॒स्पते॑राङ्गि॒र॒सस्य॑जि॒ष्णोः ॥ १ ॥

द॒धि॒ऽक्राव्णः॑ । इत् । ऊँ॒ इति॑ । नु । च॒र्कि॒रा॒म॒ । विश्वाः॑ । इत् ।
माम् । उ॒षसः॑ । सू॒द॒य॒न्तु॒ । अ॒पाम् । अ॒ग्नेः । उ॒षसः॑ । सूर्य॑स्य ।
बृह॒स्पतेः॑ । आ॒ङ्गि॒र॒सस्य॑ । जि॒ष्णोः ॥ १ ॥

दधिक्राव्णइदुएतन्नामकस्यदेवस्यैवस्तुतिं नु क्षिप्रं चर्किराम भृशंकरवाम मां विश्वा इदुषसःसर्वाअपि ताः सूदयन्तु कर्मसुप्रेरयन्तु अपामग्नेरुषसःसूर्यस्यबृहस्पतेराङ्गिरसस्यजिष्णोरेतेषामहमप्यवादि देवतानांस्तुतिंकरवाणीतिशेषः तासामपिनिपातभाक्त्वात्स्तुतिरविरुद्धा॥१॥

अथद्वितीया—

सत्वा॑भरि॒षोग॑वि॒षोदु॑वन्य॒सच्छ्र॑व॒स्यादि॒षउ॒षस॑स्तु॒रण्य॒सत् ।
स॒त्योद्र॒वोद्र॑व॒रःप॑तङ्ग॒रोद॑धि॒क्रावेष॒मूर्ज॒स्व॑र्जनत् ॥ २ ॥

सत्वा॑ । भ॒रि॒षः । गो॒ऽइ॒षः । दु॒व॒न्य॒ऽसत् । श्र॒व॒स्यात् । इ॒षः ।
उ॒षसः॑ । तु॒र॒ण्य॒ऽसत् । स॒त्यः । द्र॒वः । द्र॒व॒रः । प॒त॒ङ्ग॒रः ।
द॒धि॒ऽक्रावा॑ । इष॑म् । ऊर्ज॑म् । स्वः॑ । ज॒न॒त् ॥ २ ॥

Funding by IKS-MoE

सत्वागन्ताभरिषोभरणकुशलः गविषोगवांप्रेरकः एष्टावा दुवन्यसत् दुवःपरिचरणमिच्छन्तोदुवन्याः तेषुसीदतीतिदुवन्यसत् इषःइष्यमाणायाउषसःसम्बन्धिनिकालेइत्यर्थः यद्वा इषएष्टाएषणीयोवाश्रवस्यात् श्रवस्येदन्नमिच्छेत् किञ्च तुरण्यसत् त्वरयासीदतीतितुरण्यसत् सत्यः सत्सुतायमानः द्रवोगन्ताद्रवरः प्रकृष्टवेगवान् पतङ्गरः पतनेनोत्प्लवनेनतपनंपतङ्गस्तद्वान्पतङ्गरः उक्तलक्षणोदधिक्रावादेवः इषमन्नमूर्जंबलं स्वः स्वर्गंच जनत्जनयेत् उत्पादयेत् ॥२॥

अथतृतीया–

उ॒तस्मा॑स्य॒द्रव॑तस्तुरण्य॒तःप॒र्णंनवेर॑नु॑वातिप्रग॒र्धिनः॑ ।
श्ये॒नस्ये॑व॒ध्रज॑तोअंक॒सं॑परि॑दध॒ि॒क्राऽव्णः॑स॒होर्जा॑तरि॑त्रतः ॥ ३ ॥

उ॒त । स्म॒ । अ॒स्य॒ । द्रव॑तः । तु॒र॒ण्य॒तः । प॒र्णम् । न । वेः । अनु॑ ।
वा॒ति॒ । प्र॒ऽग॒र्धिनः॑ । श्ये॒नस्य॑ऽइव । ध्रज॑तः । अं॒क॒सम् । परि॑ ।
द॒धि॒ऽक्राव्णः॑ । स॒ह । ऊ॒र्जा । तरि॑त्रतः ॥ ३ ॥

उतस्मापिचखलु द्रवतोगच्छतस्तुरण्यतस्त्वरमाणस्यप्रगर्धिनःप्रकर्षेणाभिकांक्षतोस्यदेवस्यगतिं वेर्गंतुःपक्षिणःपर्णंन गमनंपत्रंवानुसृत्ययथावान्त्यन्येपक्षिणस्तद्वदनुवातिसर्वोवेगवान्जनः सर्वेषामपिशीघ्रगामीत्यर्थः किञ्च ध्रजतोगच्छतः तरित्रतस्तारयतोन्यान् अन्तर्भावितण्यर्थोयं श्येनस्येवाङ्कसंपादाधारमुरःप्रदेशंवापरि परितःऊर्जाबलेननिमित्तेनअन्नार्थंवा सह एकीभूय सङ्घेनगच्छन्तीतिशेषः ॥ ३ ॥

अथचतुर्थी–

उ॒तस्यवा॒जीक्षि॑प॒णिंतु॑रण्यतिग्री॒वाया॑ंब॒द्धोअ॑पिक॒क्षआ॒सनि॑ ।
क्रतुं॑दधि॒क्राअनु॑सं॒तवी॑त्वत्प॒थामंका॒ंस्यन्वा॒पनी॑फणत् ॥ ४ ॥

उ॒त । स्यः । वा॒जी । क्षि॒प॒णिम् । तु॒र॒ण्य॒ति॒ । ग्री॒वाया॑म् । ब॒द्धः ।
अ॒पि॒ऽक॒क्षे । आ॒सनि॑ । क्रतु॑म् । द॒धि॒ऽक्राः । अनु॑ । स॒म्ऽतवी॑त्वत् ।
प॒थाम् । अंकां॑सि । अनु॑ । आ॒ऽपनी॑फणत् ॥ ४ ॥

Funding by IKS-MoE

उतापिच स्यः सवाजी वेजनवान् अश्वरूपोदेवोग्रीवायांगरणसाधनायांकण्ठेबद्धोपि कक्षे कक्षप्रदेशे आसनि आस्येचबद्धः बद्धपल्यंकस्योक्तेषुस्थानेषुपाशबन्धाःसम्भवन्ति एवंबद्धःसन् क्षिपर्णिं क्षेपणमनुतुरण्यतित्वरयतिगन्तुं किञ्चायंदधिक्रादेवः क्रतुं कर्मप्रज्ञांवा अनु अनुसृत्य संतवीत्वत् प्रवृद्धबलवान्सन्पथांमार्गाणामङ्कांसिकुटिलानिअनुसृत्य आपनीफणत् सर्वतोभृशंगच्छति फणतेर्गत्यर्थस्ययङ्लुकीदंरूपं अपिसवाजीवेजनवानित्यादिनिरुक्तमनुसंधेयम् ॥ ४ ॥

दशरात्रेषष्ठेहनितृतीयसवनेमैत्रावरुणशस्त्रेहंसःशुचिषदित्येषाआहूयदूरोहणंरोहेद्धंसःशुचिषदितिपच्छोर्धर्चशइतिसूत्रितम् । स्मार्तविनियोगमाहशौनकः—हंसःशुचिषदित्यृचाशुचिरीक्षेद्दिवाकरम् । अन्तकालेजपन्नेतिब्रह्मणःसद्मशाश्वतमिति ॥

सैषापंचमी—

हं॒सः शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑वेदि॒षदति॑थिर्दुरोण॒सत् ।
नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जागो॒जाऋ॑त॒जाअ॑द्रि॒जाऋ॒तम् ॥ ५ ॥ १४ ॥

हं॒सः । शुचि॒ऽसत् । वसु॑ः । अ॒न्त॒रि॒क्ष॒ऽसत् । होता॑ । वे॒दि॒ऽसत् ।
अति॑थिः । दु॒रो॒ण॒ऽसत् । नृ॒ऽसत् । व॒र॒ऽसत् । ऋ॒त॒ऽसत् । व्यो॒म॒ऽसत् ।
अ॒प्ऽजाः । गो॒ऽजाः । ऋ॒त॒ऽजाः । अ॒द्रि॒ऽजाः । ऋ॒तम् ॥५॥१४॥

अनयासौर्यर्चा यएषोन्तरादित्येहिरणमयःपुरुषोदृश्यते हिरण्यश्मश्रुरित्यादिश्रुत्योक्तोमण्डलाभिमानीदेवोस्ति यश्चसर्वप्राणिहृदिचिद्रूपःस्थितःपरमात्मा यच्चनिरस्तसमस्तोपाधिकंपरंब्रह्म तत्सर्वमेकमेवेतिप्रतिपाद्यते हंसः हन्तिर्गत्यर्थः सर्वत्रसर्वदागन्तायोहंसोसावित्यादिश्रुत्युक्तप्रकारेणैकीकृत्योपास्यः परमात्ममन्त्रप्रतिपाद्यआदित्यःसचशुचौदीप्तेद्युलोकेसीदतीतिशुचिषत् अथयदतःपरोदिवोज्योतिर्दीप्यतइत्यादिश्रुतेः । अनेनद्युस्थानआदित्यःप्रतिपादितः सएवमध्यस्थानोवायुरित्याह वसुःसर्वस्यवासयितावायुः सचान्तरिक्षसत् अन्तरिक्षसंचारी अथ तस्यैवक्षितिस्थानवैदिकाग्निरूपतामाह होता देवानामाह्वाता होमनिष्पादकोवा वेदिषत् वेद्यांगार्हपत्यादिरूपेणस्थितः अतिथिरतिथिवत्सर्वदापूज्योग्निः दुरोणसत्

---

१ नि० २. २८।

Funding by IKS-MoE

दुरोणंगृहनाम तत्र पाकादिसाधनत्वेनस्थितः अनेनलौकिकाश्यात्मकत्वमुक्तं नृषत् नृषुमनुष्येषुचैतन्यरूपेणसीदतीतिनृषत् अनेनपरमात्मरूपत्वमुक्तं पुनरप्यादित्यात्मतामाह—वरसत् वरेवरणीयेमंडलेसीदतीतिवरसत् आदित्यः वरंवाएतत्सद्मनांयस्मिन्नेषआसन्नस्तपतीतिहि[1]श्रूयते ऋतंसत्यंब्रह्मयज्ञोवातत्रसीदतीत्यृतसत् अग्निः व्योमान्तरिक्षं तत्रसीदतीतिव्योमसद्वायुः इदानीमादित्यतोच्यते अब्जाः उदकेषुजातः उदकमध्येखल्वयंजायते गोजाः गोषु रश्मिषुजातः ऋतंसत्यंसर्वैर्दृश्यत्वेनसत्याज्जातः नह्यसाविन्द्रादिवत्परोक्षोभवति यद्वोदकेषुवैद्युतरूपेणवा वाडवरूपेणवाजातः अद्रिजाः अद्रावुदयाचलेजातः एवंमहानुभावआदित्यः ऋतं सत्यमबाध्यंसर्वाधिष्ठानंब्रह्मतत्त्वं तद्रूपोह्यसावेवादित्यस्योक्तरूपत्वं हंसःशुचिषदित्येषवैहंसः शुचिषदित्यादिनाब्राह्मणेसमाम्ना[2]तम् ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेचतुर्दशोवर्गः ॥ १४ ॥

इन्द्राकोवामित्येकादशर्चंनवमंसूक्तं वामदेवस्यार्षं त्रैष्टुभमैन्द्रावरुणं अत्रानुक्रमणिका—इन्द्राकोवामेकादशैन्द्रावरुणंत्विति । आभिप्लविकेषूक्थ्येषुतृतीयसवनेमैत्रावरुणशस्त्रेषुस्तोमवृद्धावावापार्थमेतदादिसूक्तद्वयम् इन्द्राकोवामितिसूक्तेइतिसूत्रितत्वात् ।

तत्रप्रथमा—

इन्द्राकोवांवरुणासुम्नमापस्तोमोहविष्माँअमृतोनहोता ।
योवांहृदिक्रतुमाँअस्मदुक्तःपस्पर्शदिन्द्रावरुणानमस्वान् ॥ १ ॥

इन्द्रा । कः । वाम् । वरुणा । सुम्नम् । आप । स्तोमः । हविष्मान् ।
अमृतः । न । होता । यः । वाम् । हृदि । क्रतुऽमान् । अस्मत् ।
उक्तः । पस्पर्शत् । इन्द्रावरुणा । नमस्वान् ॥ १ ॥

हेइन्द्रा हेवरुणा हेइन्द्रावरुणौ परस्परापेक्षयाद्विवचनं वां युवयोः सुम्नं सुखं कः स्तोमोहविष्मान्हविर्भिरुपेतःसोमाज्यादिप्रदेयद्रव्योपेतं कतमत्स्तोत्रंसुम्नमाप फलकत्वेनप्राप्नुयादित्यर्थः यद्वा हविष्मानित्येतदुत्तरत्रयोज्यं हविष्मान् हविर्युक्तोऽमृतोऽमरणलक्षणः स्वर्गसाधनोहोताग्निरिव सयथा तथा यःस्तोमोहेइन्द्रावरुणौ वां युवयोर्हृदि हृदये क्रतुमान्प्रज्ञोपेतोस्मदस्मत्सकाशादुक्तोभिहितः नमस्वान्हविष्मान् नमस्कारोपेतोवापस्पर्शत् स्पृशेत् हृदयंगमोभवेत् सकइतिस्तोमप्रशंसा ॥ १ ॥

---

१ ऐ० ब्रा० ४. २०. ।   २ ऐ० ब्रा० ४. २०. ।

Funding by IKS-MoE

अथद्वितीया–

इन्द्रा॑ह॒योवरु॑णाच॒क्रआ॒पीदे॒वौमर्तः॑स॒ख्याय॒प्रय॑स्वान् ।
सह॑न्तिवृ॒त्रासं॑मि॒थेषु॒शत्रू॒नवो॑भि॒र्वा॑म॒हद्भिः॒सप्रशृ॑ण्वे ॥ २ ॥

इन्द्रा॑ । ह॒ । यः । वरु॑णा । च॒क्रे । आ॒पी इति॑ । दे॒वौ । मर्तः॑ ।
स॒ख्याय॑ । प्रय॑स्वान् । सः । ह॒न्ति॒ । वृ॒त्रा । स॒म्ऽइ॒थेषु॑ । शत्रू॑न् ।
अवः॑ऽभिः । वा॒ । म॒हत्ऽभिः॑ । सः । प्र । शृ॒ण्वे॒ ॥ २ ॥

हेइन्द्रावरुणा इन्द्रावरुणौदेवौ हशब्दःपूरणः प्रसिद्धौवा योमर्तोमरणधर्मःप्रयस्वान्हविर्लक्षणान्नवान्सन् सख्याय सखित्वाय आपी बन्धूचक्रे करोति समर्तोवृत्रा आवरकाणिपापानिहन्ति तथा समिथेषुसंग्रामेषुशत्रून्हन्ति वाशब्दश्चार्थे महद्भिरवोभीरक्षणैःसनरः प्रशृण्वे प्रकृष्टंश्रूयते विख्यातोभवति ॥ २ ॥

अथतृतीया–

इन्द्रा॑ह॒रत्नं॒वरु॑णा॒धेष्ठे॒त्थानृभ्यः॑शशमा॒नेभ्य॒स्ता ।
यदी॒सखा॑यास॒ख्याय॒सोमैः॑सु॒तेभिः॑सुप्र॒यसा॑मा॒दयै॑ते ॥ ३ ॥

इन्द्रा॑ । ह॒ । रत्न॑म् । वरु॑णा । धेष्ठा॑ । इ॒त्था । नृऽभ्यः॑ ।
श॒श॒मा॒नेभ्यः॑ । ता । यदि॑ । सखा॑या । स॒ख्याय॑ । स्तोमैः॑ ।
सु॒तेभिः॑ । सु॒ऽप्र॒यसा॑ । मा॒दयै॑ते॒ इति॑ ॥ ३ ॥

हेइन्द्रावरुणौ ता हेतिप्रसिद्धौ तौखलु देवौ इत्था इत्थं नृभ्योमनुष्येभ्यः शशमानेभ्यः शंसमानेभ्यः स्तोतृभ्योस्मभ्यंरत्नंरमणीयंधनंधेष्ठा दातृतमौभवतइतिशेषः यदि सखायापरस्परंयजमानस्यवासखिभूतौसख्यायसखिकर्मणेसखित्वायसुतेभिरभिषुतैःसोमैःसुप्रयसा शोभनसोमान्नवन्तौमादयैते माद्येताम् तर्हिरत्नानांदातारौभवतः ॥ ३ ॥

अथचतुर्थी–

इन्द्रा॑यु॒वंव॑रुणादि॒द्युम॑स्मि॒न्नोजि॑ष्ठमुग्रा॒निव॑धिष्टं॒वज्र॑म् ।
योनो॑दु॒रेवो॑वृ॒कति॑र्द॒भीति॒स्तस्मि॑न्मिमाथाम॒भिभू॒त्योजः॑ ॥ ४ ॥

Funding by IKS-MoE

इन्द्रा । युवम् । वरुणा । दिद्युम् । अस्मिन् । ओजिष्ठम् । उग्रा ।
नि । वधिष्टम् । वज्रम् । यः । नः । दुःऽएवः । वृकतिः । दभीतिः ।
तस्मिन् । मिमाथाम् । अभिऽभूति । ओजः ॥ ४ ॥

इन्द्रा इन्द्रौ वरुणा वरुणौ हेउग्रा उग्रौ अत्रसर्वत्रपरस्परापेक्षयाद्विवचनं प्रमित्रयोर्वरुणयोरितिवत् यद्वा छान्दसत्वाद्व्यवहितस्याप्यानङ् अस्मिन्शत्रौ दिद्युं दीप्तमोजिष्ठमतिशयेनतेजोवत् वज्रमायुधंनिवधिष्टं वधार्थंप्रेरयतमित्यर्थः यःशत्रुर्नोस्माकंदुरेवोदुःप्रापः वृकतिरतिशयेनादातादभीतिर्हिंसकःशत्रूणां तस्मिन्शत्रावभिभूत्यभिभावुकमोजोबलं युवं युवां मिमाथां कुरुतमित्यर्थः ॥ ४ ॥

अथपंचमी–

इन्द्रायुवंवरुणाभूतमस्याधियःप्रेतारावृषभेवधेनोः ।
सानोदुहीयद्यवसेवगत्वीसहस्रधारापयसामहीगौः ॥ ५ ॥ १५ ॥

इन्द्रा । युवम् । वरुणा । भूतम् । अस्याः । धियः । प्रेतारा ।
वृषभाऽइव । धेनोः । सा । नः । दुहीयत् । यवसाऽइव । गत्वी ।
सहस्रऽधारा । पयसा । मही । गौः ॥ ५ ॥ १५ ॥

हेइन्द्रावरुणा इन्द्रावरुणौ युवं युवामस्याधियःस्तुत्याः प्रेतारा प्रीणयितारौभूतंभवतं काविव वृषभासेक्तारौ वृषभोधेनोरिव सास्तुतिरूपाधेनुः नोस्माकंदुहीयत् दुह्येव कामान्पूरयेत् यवसातृणादिघासेननिमित्तेन गत्वी गत्वा पयसासहस्रधारामही महतीगौरिव ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेपञ्चदशोवर्गः ॥ १५ ॥

अथषष्ठी–

तोकेहितेतनयउर्वरासुसूरोदृशीकेवृषणश्चपौंस्ये ।
इन्द्रानोअत्रवरुणास्यातामवोभिर्दस्मापरितक्म्यायाम् ॥ ६ ॥

---

१ ऋ० सं० ५. ५. ८. ।

Funding by IKS-MoE

तोके । हिते । तनये । उर्वरासु । सूरः । दृशीके । वृषणः ।
च । पौंस्ये । इन्द्रा । नः । अत्र । वरुणा । स्याताम् ।
अवःऽभिः । दस्मा । परिऽतक्म्यायाम् ॥ ६ ॥

इन्द्रावरुणौदेवौ नोहिते तोके पुत्रे तनये तत्पुत्रेच उर्वरासु सस्याढ्यासुभूमिषुनिमित्तभूतासुसूरःप्रेरकस्यसूर्यस्यदृशीकेचिरकालदर्शनाय चिरजीवनायेत्यर्थः तथा वृषणःसेक्तुर्ममपौंस्येच पुंस्त्वायच पुनरपि प्रजननसामर्थ्यायच दस्मा शत्रूणांहिंसकौसन्तौ नोस्माकमवोभीरक्षणैः सह परितक्म्यायां परितकनेनिमित्तभूतेसति यद्वा रात्रिनामैतत् रात्रौहिंसकानांवधायस्यातां भवेताम् ॥ ६ ॥

अथसप्तमी–

युवामिद्ध्यवसेपूर्व्यायपरिप्रभूतीगविषःस्वापी ।
वृणीमहेसख्यायप्रियायशूरामंहिष्ठापितरेवशंभू ॥ ७ ॥

युवाम् । इत् । हि । अवसे । पूर्व्याय । परि । प्रभूती इति प्रऽभूती ।
गोऽइषः । स्वापी इति सुऽआपी । वृणीमहे । सख्याय ।
प्रियाय । शूरा । मंहिष्ठा । पितराऽइव । शम्भू इति शम्ऽभू ॥ ७॥

हेइन्द्रावरुणौ गविषोगाइच्छंतोवयं युवामिद्धि हीतिपूरणः युवामेवपूर्व्यायपुरातनाययुवाभ्यांकृतायावसेरक्षणायवृणीमहेइतिसम्बन्धः प्रभूती प्रभवन्तौ स्वापी शोभनबन्धुभूतौआपिरितिबन्धुनाम यद्वा सुष्ठुव्यापनशीलौशूराविक्रान्तौमंहिष्ठातिशयेनपूज्यौयुवांसख्यायसमानख्यानायप्रियायच परिवृणीमहे परितःप्रार्थयामहे शंभूसुखस्यभावयितारौ पितरेव पितरौ पुत्राय तद्वत् ॥ ७ ॥

अथाष्टमी–

तावांधियोवसेवाजयन्तीराजिंनजग्मुर्युवयूःसुदानू ।
श्रियेनगावउपसोममस्थुरिन्द्रंगिरोवरुणंमेमनीषाः ॥ ८ ॥

ताः । वाम् । धियः । अवसे । वाजऽयन्तीः । आजिम् । न । जग्मुः ।
युवऽयूः । सुदानू इति सुऽदानू । श्रिये । न । गावः । उप । सोमम् ।
अस्थुः । इन्द्रम् । गिरः । वरुणम् । मे । मनीषाः ॥ ८ ॥

सुदानू शोभनफलदातारौ हेदेवौ वां युवां वाजयन्तीरत्नमिछन्त्योधियः स्तुतयोजग्मुर्गच्छन्ति युवयूर्युवांकामयमानाःपत्तयः अवसेरक्षणाय आजिंन संग्राममिव किञ्च श्रियेदध्यादिश्रयणायगावःसोमंन सोममिवेन्द्रंवरुणंचमेमदीयामनीषामनसईषागिरःस्तुतयः उपास्थुस्तिष्ठन्ति प्रीणयन्तीत्यर्थः ॥ ८ ॥

अथनवमी–

इमाइन्द्रंवरुंणंमेमनीषाअग्मन्नुपद्रविंणमिच्छमांनाः ।
उपेंमस्थुर्जोष्टारंइववस्वोरघ्वीरिंवश्रवंसोभिक्षंमाणाः ॥ ९ ॥

इमाः । इन्द्रंम् । वरुंणम् । मे । मनीषाः । अग्मंन् । उपं । द्रविंणम् ।
इच्छमांनाः । उपं । ईम् । अस्थुः । जोष्टारंःऽइव । वस्वंः ।
रघ्वीःऽइंव । श्रवंसः । भिक्षंमाणाः ॥ ९ ॥

इन्द्रंवरुणंञ्च मे मम मनीषाः स्तुतयोद्रविणमिच्छमानाःसत्यः उपाग्मन्नुपगच्छन्ति जोष्टारःसेवकाः वस्वइव धनस्यलाभायधनिकंस्वामिनमिव रघ्वीरिव लघ्व्यइव शीघ्रगामिन्यइव श्रवसोन्नस्यान्नंभिक्षमाणाः एनमिन्द्रंवरुणंचोपास्थुःउपतिष्ठन्ते ॥ ९ ॥

अथदशमी–

अश्व्यंस्यत्मनारथ्यंस्यपुष्टेर्नित्यंस्य[illegible]ःपतंयःस्याम ।
ताचंक्राणाऊतिभिर्नव्यंसीभिरस्मत्रारायोंनियुतंःसचन्ताम् ॥ १० ॥

अश्व्यंस्य । त्मनां । रथ्यंस्य । पुष्टेः । नित्यंस्य । रायः । पतंयः ।
स्याम । ता । चक्राणौ । ऊतिऽभिः । नव्यंसीभिः । अस्मऽत्रा ।
रायंः । निऽयुतंः । सचन्ताम् ॥ १० ॥

अश्व्यस्याश्वसमूहस्य रथ्यस्यरथसमूहरूपस्य रथार्हस्य वा पुष्टेःपोषस्य नित्यस्याविचलितस्यरायोधनस्य त्मना आत्मना स्वयमेवाप्रयत्नेनपतयःस्याम ता तौ देवौ चक्राणा चंक्रममाणौगन्तारौभवतमितिशेषः नव्यसीभिर्नूतनाभिरूतिभीरक्षाभिरस्मत्राऽस्मासुनियुतोश्वाः रायोधनानिचसचन्तां सेवन्ताम् ॥ १० ॥

अथैकादशी—

आनो॑बृहन्ता॑बृह॒ती॑भिरू॒तीइन्द्र॑या॒तंव॑रुण॒वाज॑सातौ ।
यद्दि॒द्यव॒ःपृत॑नासुप्र॒क्रीळा॒न्तस्य॑वांस्यामसनि॒तार॑आ॒जेः ॥११॥१६॥

आ । न॒ः । बृ॒ह॒न्ता॒ । बृ॒ह॒ती॑भिः । ऊ॒ती । इन्द्र॑ । या॒तम् । व॒रु॒ण॒ ।
वाज॑ऽसातौ । यत् । दि॒द्यवः॑ । पृत॑नासु । प्र॒ऽक्रीळा॑न् । तस्य॑ ।
वा॒म् । स्या॒म॒ । स॒नि॒तार॑ः । आ॒जेः ॥ ११ ॥ १६ ॥

हेबृहन्ता महान्तौ हेइन्द्र हेवरुण बृहतीभिर्महतीभिरूतीऊतिभीरक्षाभिःसहायातमागच्छतं वाजसातौ संग्रामेन्नलाभनिमित्तभूतेवा यद्यस्मिन्नाजौसंग्रामेपृतनासुसेनासुदिद्यवः आयुधनामैतत् आयुधानिशत्रुसम्बन्धीनिप्रक्रीळान्प्रक्रीडन्ते तस्यतादृशस्याजेः सनितारः संभक्तारः स्याम भवेम वांयुवयोरनुग्रहात् ॥ ११ ॥

॥ इतितृतीयस्यसप्तमेषोडशोवर्गः ॥ १६ ॥

ममद्वितेतिदशर्चंदशमंसूक्तं पुरुकुत्सस्यपुत्रस्त्रसदस्यूराजाऋषिः आद्यासुषट्सुस्वात्मनःस्तुत्यत्वादात्मादेवता अवशिष्टानांचतसृणांइन्द्रावरुणौदेवते छन्दस्त्रिष्टुप् अत्रानुक्रमणिका—ममद्वितादशत्रसदस्युःपौरुकुत्स्यःषळाद्याआत्मस्तवइति । उक्तोविनियोगःपूर्वसूक्ते ।

तत्रप्रथमा—

मम॑द्वि॒तारा॒ष्ट्रंक्ष॒त्रिय॑स्यवि॒श्वायो॒र्विश्वे॑अ॒मृता॒यथा॑नः ।
क्रतुं॑सचन्ते॒वरु॑णस्यदे॒वाराजा॑मिकृ॒ष्टेरु॑प॒मस्य॑व॒व्रेः ॥ १ ॥

मम॑ । द्वि॒ता । रा॒ष्ट्रम् । क्ष॒त्रिय॑स्य । वि॒श्वऽआ॑योः । विश्वे॑ ।
अ॒मृताः॑ । यथा॑ । न॒ः । क्रतु॑म् । स॒च॒न्ते॒ । वरु॑णस्य । दे॒वाः ।
राजा॑मि । कृ॒ष्टेः । उ॒प॒ऽमस्य॑ । व॒व्रेः ॥ १ ॥

क्षत्रियस्य क्षत्रियजात्युत्पन्नस्यविश्वायोः कृत्स्नमनुष्याधीशस्य ममेत्यात्मनोनिर्देशः द्विताक्षितिः स्वर्गभेदेनद्वित्वापन्नंराष्ट्रंमम त्रसदस्योर्विश्वेसर्वेऽमृतादेवायथानोस्माकंभवन्ति तथा राष्ट्रंप्रजाश्चेत्यर्थः वरुणस्यवारकस्यवरुणात्मनोवाकृष्टेर्मनुष्यस्यतद्वतोवा उपमस्यान्तिकनामैतत्

Funding by IKS-MoE

सर्वेषामन्तिकतमस्यवव्रेः रूपनामैतव् रूपवतोममक्रतुंकर्मसचन्ते सेवन्ते देवाः सर्वेपिअहंच राजामि राजतिरैश्वर्यकर्मा सर्वस्येश्वरोभवामि यद्वोपमस्यवव्रेःकृष्टेराजामीतियोज्यम् ॥ १ ॥

अथद्वितीया—

अहंराजावरुणोमह्यंतान्यसुर्याणिप्रथमाधारयन्त ।
क्रतुंसचन्तेवरुणस्यदेवाराजामिकृष्टेरुपमस्यवव्रेः ॥ २ ॥

अहम् । राजा । वरुणः । मह्यम् । तानि । असुर्याणि । प्रथमा ।
धारयन्त । क्रतुम् । सचन्ते । वरुणस्य । देवाः । राजामि । कृष्टेः ।
उपऽमस्य । वव्रेः ॥ २ ॥

अहमेवचवरुणोराजाभवामि मह्यंमदर्थमेवप्रथमा मुख्यानि तानि प्रसिद्धानिअसुर्याण्यसुरविघातकानिबलानिधारयन्त अधारयन्देवाः शिष्टंगतम् ॥ २ ॥

अथतृतीया—

अहमिन्द्रोवरुणस्तेमहित्वोर्वीगभीरेरजसीसुमेके ।
त्वष्टेवविश्वाभुवनानिविद्वान्त्समैरयंरोदसीधारयंच ॥ ३ ॥

अहम् । इन्द्रः । वरुणः । ते इति । महिऽत्वा । उर्वी इति ।
गभीरे इति । रजसी इति । सुमेके इति सुऽमेके । त्वष्टाऽइव । विश्वा ।
भुवनानि । विद्वान् । सम् । ऐरयम् । रोदसी इति । धारयम् । च ॥ ३ ॥

अहंत्रसदस्युरिन्द्रः इन्द्रोप्यस्मि अहं वरुणश्च तेमहित्वा महत्त्वेनोर्वीविस्तीर्णेगभीरेदुरवगाहेअवकाशवत्यौवा सुमेकेसुरूपे रजसीद्यावापृथिव्यौ तेअप्यहमेव विद्वान् जानन्नहं त्वष्टेव प्रजापतिरिव विश्वा भुवनानि सर्वाणि भूतानि समैरयं सम्प्रैरयं रोदसीद्यावापृथिव्यौ धारयंच धृतवानस्मि ॥ ३ ॥

अथचतुर्थी—

अहमपोअपिन्वमुक्षमाणाधारयंदिवंसदनऋतस्य ।
ऋतेनपुत्रोअदितेर्ऋतावोतत्रिधातुप्रथयद्विभूम ॥ ४ ॥

Funding by IKS-MoE

अहम् । अपः । अपिन्वम् । उक्षमाणाः । धारयम् । दिवम् । सदने ।
ऋतस्य । ऋतेन । पुत्रः । अदितेः । ऋतऽवा । उत । त्रिऽधातु ।
प्रथयत् । वि । भूम ॥ ४ ॥

अहमेवोक्षमाणाः सिञ्चन्तीरपोपिन्वमसेचयम् तथा ऋतस्योदकस्यादित्यस्यवासदनेस्थानेनिमित्तभूतेसति दिवं द्युलोकंधारयं यद्वोदकाधारेस्थानेदिवमादित्यंधारयं अहमेवऋतेनोदकेननिमित्तेनादितेःपुत्रऋतावायज्ञवानभूवं उतापिच भूमव्याप्तमाकाशंत्रिधातु त्रिःप्रकारं वि विशेषेणप्रथयत्व मदर्थमेवक्षित्यादिलोकत्रयमकार्षीत्परमेश्वरः ॥ ४ ॥

अथपंचमी—

मांनरःस्वश्वावाजयन्तोमांवृताःसमरणेहवन्ते ।
कृणोम्याजिंमघवाहमिन्द्रइयर्मिरेणुमभिभूत्योजाः ॥ ५ ॥ १७ ॥

माम् । नरः । सुऽअश्वाः । वाजयन्तः । माम् । वृताः । सम्ऽअरणे ।
हवन्ते । कृणोमि । आजिम् । मघऽवा । अहम् । इन्द्रः । इयर्मि ।
रेणुम् । अभिभूतिऽओजाः ॥ ५ ॥ १७ ॥

मां मामेव स्वश्वाः शोभनाश्वाः वाजयन्तः संग्राममिच्छन्तोनरोनेतारोभटाः अनुगच्छन्तीतिशेषः मामेववृताःसन्तः समरणेसंग्रामेहवन्ते आह्वयन्तियुद्धार्थं मघवाधनवानहमिन्द्रःसन्नाजिंकृणोमि करोमि अभिभूत्योजाः परेषामभिभाविबलोहंरेणुमियर्मि प्रेरयामि ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी—

अहंताविश्वाचकरंनकिर्मादैव्यंसहोवरतेअप्रतीतम् ।
यन्मासोमासोममदन्यदुक्थोभेभयेतेरजसीअपारे ॥ ६ ॥

अहम् । ता । विश्वा । चकरम् । नकिः । मा । दैव्यम् । सहः ।
वरते । अप्रतिऽइतम् । यत् । मा । सोमासः । ममदन् । यत् ।
उक्था । उभे इति । भयेते इति । रजसी इति । अपारे इति ॥ ६ ॥

Funding by IKS-MoE

अहं त्रसदस्युः ता तानि प्रसिद्धानि विश्वा सर्वाणिकर्माणि चकरमकार्षं अप्रतीतमप्रतिगतंमामांदैव्यंदेवसम्बन्धिसहोबलंचनकिर्वरते नैववारयति यद्यस्मात्सोमासःसोमामामाममदन् अमादयन् यच्चोक्था शस्त्राण्यपि ममदन् तस्मान्मत्तःअपारेदूरपारेउभेरजसी द्यावापृथिव्यौ भवेते चलतः ॥ ६ ॥

अथसप्तमी—

विदुष्टेविश्वाभुवनानितस्यताप्रब्रवीषिवरुणायवेधः ।
त्वंवृत्राणिशृण्विषेजघन्वान्त्वंवृताँअरिणाइन्द्रसिन्धून् ॥ ७ ॥

विदुः । ते । विश्वा । भुवनानि । तस्य । ता । प्र । ब्रवीषि । वरुणाय । वेधः । त्वम् । वृत्राणि । शृण्विषे । जघन्वान् । त्वम् । वृतान् । अरिणाः । इन्द्र । सिन्धून् ॥ ७ ॥

इतःपरमिन्द्रावरुणयोःस्तुतिः हेवरुण तस्य ते कर्मणिषष्ठी तंत्वांविश्वासर्वाणि ता तानि भुवनानि भूतजातानि विदुर्जानन्ति हेवेधः स्तोतृनामैतत् हेस्तोतः वरुणायप्रब्रवीषि वरुणंस्तौषि हेइन्द्र त्वं वृत्राणिवैरिणोजघन्वान् हतवानितिश्शृण्विषे श्रूयसे किंच हेइन्द्र त्वं वृतानाच्छन्नान् सिन्धून्स्यन्दनस्वभावानप्संघानरिणाः अगमयः ॥ ७ ॥

अथाष्टमी—

अस्माकमत्रपितरस्तआसन्त्सप्तऋषयोदौर्गहेबध्यमाने ।
तआयजन्तत्रसदस्युमस्याइन्द्रंनवृत्रतुरमर्धदेवम् ॥ ८ ॥

अस्माकम् । अत्र । पितरः । ते । आसन् । सप्त । ऋषयः । दौःऽगहे । बध्यमाने । ते । आ । अयजन्त । त्रसदस्युम् । अस्याः । इन्द्रम् । न । वृत्रऽतुरम् । अर्धऽदेवम् ॥ ८ ॥

पुरुकुत्सस्यमहिषीदौर्गहेबन्धनेस्थिते ॥ पत्यावराजकंदृष्ट्वाराष्ट्रंपुत्रस्यलिप्सया ॥ १ ॥
यदृच्छयासमायातान्सप्तर्षीन्पर्यपूजयत् ॥ तेचप्रीताःपुनःप्रोचुर्यजेन्द्रावरुणौभृशम् ॥ २ ॥

Funding by IKS-MoE

साचेन्द्रावरुणाविष्ट्वात्रसदस्युमजीजनत् ॥ इतिहासमिमंजानन्नृषिर्ब्रूतेह्यृचाविह ॥ ३ ॥ अथास्माकमत्रास्मिन्नराजकेदेशेऽस्यांपृथिव्यांवा पितरःपालयितारः उत्पादकास्तेआसन्नभवन् एतेसप्तर्षयःप्रसिद्धाः दौर्गहे दुर्गहस्यपुत्रे पुरुकुत्से बध्यमाने दृढंपाशैः यस्मादस्याअस्यैपुरुकुत्सान्यै त्रसदस्युंमांआअयजन्त प्रादुरिन्द्रावरुणयोरनुग्रहात् कीदृशंतं वृत्रतुरं वृत्रस्यशत्रोर्हन्तारमर्धदेवं देवानामर्धेसमीपेवर्तमानं यद्वा देवानामर्धभूतमिन्द्रंन इन्द्रमिव स्थितंपुत्रंदत्तवन्तः यत्सर्वेषामर्धमिन्द्रःभतितस्मादिन्द्रोदेवतानांभूयिष्ठभाक्तमइतिहितैत्तिरीयकम्[1] ॥ ८ ॥

अथनवमी–

पु॒रु॒कुत्सा॑नी॒हिवा॒मदा॑शद्ध॒व्येभि॑रिन्द्रावरुणा॒नमो॑भिः ।
अथा॒राजा॑नंत्र॒सद॑स्युमस्यावृत्र॒हणं॑ददथुरर्ध॑दे॒वम् ॥ ९ ॥

पु॒रु॒ऽकुत्सा॑नी । हि । वा॒म् । अदा॑शत् । ह॒व्येभिः॑ । इ॒न्द्रा॒व॒रु॒णा॒ ।
नमः॑ऽभिः । अथ॑ । राजा॑नम् । त्र॒सद॑स्युम् । अ॒स्याः॒ । वृ॒त्र॒ऽहन॑म् ।
द॒द॒थुः॒ । अ॒र्ध॒ऽदे॒वम् ॥ ९ ॥

हेइन्द्रावरुणौ पुरुकुत्सानीपुरुकुत्सस्यपत्नी ऋषिप्रेरिता वांयुवां अदाशद्धि अप्रीणयत्खलु हव्येभिर्हविर्भिर्नमोभिःस्तुतिभिश्च अथ त्रसदस्युंराजानं वृत्रहणमर्धदेवमुक्तलक्षणंपुत्रमस्यामस्यैपुरुकुत्सान्यैददथुर्दत्तवन्ताविति ॥ ९ ॥

अथदशमी–

रा॒याव॒यंस॑स॒वाँसो॑मदेमह॒व्येन॑दे॒वायव॑सेन॒गावः॑ ।
तांधे॒नुमि॑न्द्रावरुणायु॒वन्नो॑वि॒श्वाहा॑धत्त॒मन॑पस्फुरन्तीम् ॥१०॥१८॥

रा॒या । व॒यम् । स॒स॒ऽवांसः॑ । म॒दे॒म॒ । ह॒व्येन॑ । दे॒वाः । यव॑सेन ।
गावः॑ । ताम् । धे॒नुम् । इ॒न्द्रा॒व॒रु॒णा॒ । यु॒वम् । नः॒ । वि॒श्वाहा॑ ।
ध॒त्त॒म् । अन॑पऽस्फुरन्तीम् ॥ १० ॥ १८ ॥

---

[1] तै० सं० ५. ४. ८. ।

Funding by IKS-MoE

रायाधेनन मदेम ससवांसोयुवांसंभक्तारोवयंहव्येनदेवामोदन्तुयवसेनगावः तांधेनुं प्रीणयित्रींरयिं हेइन्द्रावरुणौ विश्वाहा विश्वस्यहन्तारौ युवं युवां नोस्माकंधत्तंदत्तं कीदृशमनपस्फुरन्तीमनवहिंसितां यद्वा विश्वाहेत्यव्ययं सर्वदेत्यर्थः ॥ १० ॥

॥ इतितृतीयस्यसप्तमेष्टादशोवर्गः ॥ १८ ॥

कउश्रवदितिसप्तर्चमेकादशंसूक्तं सुहोत्रपुत्रौपुरुमीळ्हाजमीळ्हौऋषी त्रिष्टुप्छन्दः अश्विनौदेवता अत्रानुक्रमणिका—कउश्रवत्सप्तपुरुमीळ्हाजमीळ्हौसौहोत्रौत्वाश्विनंहीति । प्रातरनुवाकाश्विनशस्त्रयोराश्विनेक्रतौत्रैष्टुभेछन्दसिइदमादिकेद्वेसूक्ते धेनुःप्रत्नस्यकउश्रवदितिसूक्ते इतिसूत्रितत्वात् ।

तत्रप्रथमा—

कउ॑श्रवत्क॒त॒मोय॒ज्ञिया॑नांव॒न्दारु॑दे॒वःक॑त॒मोजु॑षाते ।
कस्ये॒मांदे॒वीम॒मृते॑षु॒प्रेष्ठां॑हृ॒दिश्रे॑षामसुष्टु॒तिंसु॑ह॒॰व्याम् ॥ १ ॥

कः । ऊँ॒ इति॑ । श्र॒व॒त् । क॒त॒मः । य॒ज्ञिया॑नाम् । व॒न्दारु॑ । दे॒वः ।
क॒त॒मः । जु॒षा॒ते॒ । कस्य॑ । इ॒माम् । दे॒वीम् । अ॒मृते॑षु । प्रेष्ठा॑म् ।
हृ॒दि । श्रे॒षा॒म॒ । सु॒ऽस्तु॒तिम् । सु॒ऽह॒॰व्याम् ॥ १ ॥

यज्ञियानां यज्ञार्हाणां देवानांमध्ये कउदेवःश्रवत् शृणुयात्स्तुतिं कतमोदेवोवन्दारु वन्दनशीलंस्तोत्रंकतमोदेवोजुषाते सेवते अमृतेषुदेवेषुमध्येकस्यहृदि इमांप्रेष्ठांप्रियतरांदेवींद्योतमानांसुहव्यांशोभनाह्वानोपेतां शोभनैर्हविर्भिर्युक्तांवा सुष्टुतिं शोभनांस्तुतिं श्रेषामश्लेषयेम श्रावयेमवा अश्विनावन्तरेणस्तुतेःकोदेवःस्वामीभवेदिति ॥ १ ॥

अथद्वितीया—

कोमृ॑ळातिक॒त॒मआग॑मिष्ठोदे॒वाना॑मुक॒त॒मःशंभ॑विष्ठः ।
रथं॒कमा॑हुर्द्र॒वद॑श्वमा॒शुंयंसूर्य॑स्यदुहि॒ता॑वृणीत ॥ २ ॥

Funding by IKS-MoE

कः । मृ॒ळा॒ति॒ । क॒त॒मः । आऽग॑मिष्ठः । दे॒वाना॑म् । ऊँ॒ इति॑ ।
क॒त॒मः । शम्ऽभ॑विष्ठः । रथ॑म् । कम् । आ॒हु॒ः । द्र॒वत्ऽअ॑श्वम् ।
आ॒शुम् । यम् । सूर्य॑स्य । दु॒हि॒ता । अवृ॑णीत ॥ २ ॥

कोमृळाति कोदेवोमृळाति सुखयेदस्मान् कतमोदेवआगमिष्ठः आगन्तृतमोस्मद्यज्ञंप्रति देवानामु देवानांमध्येकतमोदेवः शंभविष्ठः सुखस्यभावयितृतमः एवमुक्तगुणविशिष्टः कोभवेत् अश्विनावन्तरेणेतिभावः कंरथंद्रवदश्वमाशुमाहुर्ब्रुवते यंरथंसूर्यस्यदुहितासूर्यस्यपुत्री अवृणीत समभजत् तंकंरथंवेगवन्तमाहुः ॥ २ ॥

अथतृतीया—

म॒क्षूहिष्मा॒गच्छ॑थ॒ईव॑तो॒द्यूनिन्द्रो॒नश॒क्तिंपरि॑तक्म्यायाम् ।
दि॒वआजा॑तादि॒व्यासु॑प॒र्णा॑कया॒शची॑नांभव॑थ॒ःशचि॑ष्ठा ॥ ३ ॥

म॒क्षु । हि । स्म॒ । गच्छ॑थः । ईव॑तः । द्यून् । इन्द्रः॑ । न ।
श॒क्तिम् । परि॑ऽतक्म्यायाम् । दि॒वः । आऽजा॑ता । दि॒व्या ।
सु॒ऽप॒र्णा॑ । कया॑ । शची॑नाम् । भ॒व॒थ॒ः । शचि॑ष्ठा ॥ ३ ॥

मक्षू शीघ्रं हिस्मेतिपूरणौ ईवतोगमनवतः आगामिनोद्यून्दिवसान्सुत्यासंबन्धिनःप्रतिगच्छथः इन्द्रःशक्तिंन स्वकीयांशक्तिंयथापरितक्म्यायां रात्रावतीतायां प्रदर्शयतीति शेषः सुत्याहन्युषःकालेइन्द्रोयथागच्छतितद्वत् युवामपिगच्छतमित्यर्थः दिवोद्युलोकादाजाता आगतौ दिव्या दिविभवौ सुपर्णा शोभनगमनौ युवां शचीनां युष्मत्सम्बन्धिनां कर्मणां शक्तीनांवामध्येकयाशच्या शचिष्ठाशक्तिमत्तरौशोभनकर्मवन्तौवाभवथः ॥ ३ ॥

अथचतुर्थी—

कावां॑भू॒दुप॑माति॒ःकया॑न॒आश्वि॑नागमथोहू॒यमा॑ना ।
कोवां॑म॒हश्चि॒त्त्यज॑सोअ॒भीक॑उरु॒ष्यतं॑माध्वीदस्रानऊ॒ती ॥ ४ ॥

का । वा॒म् । भू॒त् । उप॑ऽमातिः । कया॑ । न॒ः । आ । अ॒श्वि॒ना॒ ।
ग॒म॒थ॒ः । हू॒यमा॑ना । कः । वा॒म् । म॒हः । चि॒त् । त्यज॑सः । अ॒भीके॑ ।
उ॒रु॒ष्यत॑म् । मा॒ध्वी॒ इति॑ । द॒स्रा॒ । न॒ः । ऊ॒ती ॥ ४ ॥

वांयुवयोःकाउपमातिः उपसमीपेमातिर्मानंगुणानांपरिच्छित्तिर्यस्यांसास्तुतिःकाभूद्भवेत् कयास्तुत्याहूयमाना आहूयमानौसन्तौ नोस्मानागमथः आगच्छथः वांयुवयोरभीकेआसन्नप्रदेशे महश्चित् महतस्त्यजसः त्यज्यतेपरित्यज्यतेसर्वैरितित्यजःक्रोधस्तस्यसोढाकोभवेत् हेमाध्वी मधुररसस्योदकस्यस्रष्टारौ हेदस्रा शत्रूणामुपक्षपयितारावश्विनौ नोस्मानुतीऊत्या रक्षणयाउरुष्यतं रक्षाकर्मैतत् रक्षतम् ॥ ४ ॥

अथपञ्चमी–

उ॒रुवां॒रथ॒ःपरि॑नक्षति॒द्यामायत्स॑मु॒द्राद॒भिवर्त॑तेवाम् ।
मध्वा॑माध्वी॒मधु॑वांप्रुषा॒यन्यत्सीं॑वां॒पृक्षो॑भु॒रज॑न्तप॒क्वाः ॥ ५ ॥

उ॒रु । वा॒म् । रथः॑ । परि॑ । न॒क्षति॒ । द्याम् । आ । यत् ।
स॒मु॒द्रात् । अ॒भि । वर्त॑ते । वा॒म् । मध्वा॑ । मा॒ध्वी॒ इति॑ । मधु॑ ।
वा॒म् । प्रु॒षा॒य॒न् । यत् । सी॒म् । वा॒म् । पृक्षः॑ । भु॒रज॑न्त । प॒क्वाः॥ ५॥

हेअश्विनौ वांरथोद्यांपरि द्युलोकस्यपरितः उरु प्रभूतं नक्षति गच्छति यद्यस्मादा अर्वाक्समुद्रात्समुद्रवणसाधनादन्तरिक्षाद्वांप्रत्यभिवर्तते आभिमुख्येनगच्छति हेमाध्वी उक्तलक्षणौ मध्वा मधुरेणपयसा मधुमधुरंसोमरसंप्रुषायन् सिञ्चन्त्यध्वर्यवः यद्यस्मात्सींसर्वतोवांपृक्षः युवयोःसोमंपक्वाः पक्वायवा भुरजन्त प्राप्नुवन्ति स्थिताभवन्ति तस्मादभिवर्ततेवामिति ॥ ५ ॥

अथषष्ठी–

सिन्धु॑र्हवांर॒सया॑सिञ्च॒दश्वा॑न्घृ॒णावयो॑रु॒षास॒ःपरि॑ग्मन् ।
तदू॒षुवा॑मजि॒रंचे॑ति॒यानं॒येन॒पती॒भव॑थःसू॒र्याया॑ः ॥ ६ ॥

सिन्धुः॑ । ह॒ । वा॒म् । र॒सया॑ । सि॒ञ्च॒त् । अश्वा॑न् । घृ॒णा । वयः॑ ।
अ॒रु॒षासः॑ । परि॑ । ग्म॒न् । तत् । ऊँ॒ इति॑ । सु । वा॒म् । अ॒जि॒रम् ।
चे॒ति॒ । यान॑म् । येन॑ । पती॒ इति॑ । भव॑थः । सू॒र्यायाः॑ ॥ ६ ॥

वांयुवयोरश्वान्सिन्धुः स्यन्दमानोमेघउदकंवा रसेनसिञ्चदसेचयत् घृणादीप्त्यावयः पक्षिसदृशावेतारोवाअश्वाअरुषासः आरोचमानाःसन्तः परि परितोग्मन् गच्छन्ति वांयानंगमनसाधनंप्रसिद्धोरथः अजिरं क्षिप्रनामैतत् क्षिप्रं सुखुष्ठुचेतिज्ञायते येनरथेनसूर्यायाः पती पालयितारौ वोढारौभवथः सरथश्चेतीति ॥ ६ ॥

अथसप्तमी–

इ॒हेह॒यद्वां॑स॒म॒नाप॑पृ॒क्षेसेयम॒स्मेसु॑म॒तिर्वा॑जरत्ना ।
उ॒रु॒ष्यतं॑जरि॒तारं॑यु॒वंह॑श्रि॒तःकामो॑नासत्यायु॒व॒द्रिक् ॥ ७ ॥ १९ ॥

इ॒ह॒ऽइ॑ह । वा॒म् । स॒म॒ना । प॒पृ॒क्षे । सा । इ॒यम् । अ॒स्मे इति॑ ।
सु॒ऽम॒तिः । वा॒ज॒ऽर॒त्ना॒ । उ॒रु॒ष्यत॑म् । ज॒रि॒तार॑म् । यु॒वम् ।
ह॒ । श्रि॒तः । काम॑ः । ना॒स॒त्या॒ । यु॒व॒द्रिक् ॥ ७ ॥ १९ ॥

हेअश्विनौ यद्यस्मात् ययावासुमत्या इहेह अस्मिन्नेवयज्ञेसमना समानमनस्कौसदृशावित्यर्थः तौ वां युवां सुमत्या पपृक्षे स्तुत्यासंयोजयामि सेयमिदानींक्रियमाणा सुमतिः शोभनस्तुतिः अस्मे अस्माकमेव फलवतीभवत्वितिशेषः हेवाजरत्ना रमणीयान्नौ अन्नंवैवाजंइतिश्रुतेः । युवं युवां जरितारं गरितारं स्तोतारं मां उरुष्यतं रक्षतं हेनासत्याश्विनौ कामोस्मदीयः युवद्रिक्‌ह युवामेवगच्छन्नश्रितःप्राप्तः ॥ ७ ॥

॥ इतितृतीयस्यसप्तमेएकोनविंशोवर्गः ॥ १९ ॥

तंवांरथमितिसप्तर्चंद्वादशंसूक्तं पुरुमीह्लाजमीह्लावेवऋषी त्रिष्टुप्छन्दः अश्विनौदेवता तंवामित्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ॥

तत्रप्रथमा–

तंवां॒रथं॑व॒यम॒द्याहु॑वेमपृथु॒ज्रयं॑मश्विना॒सङ्ग॑ति॒गोः ।
यःसू॒र्यांवहं॑तिवन्धु॒रा॒यु॒र्गिर्वा॑हसंपु॒रु॒तमं॑वसू॒युम् ॥ १ ॥

---

१ ऐ० ब्रा० १. ३. ६. ।

Funding by IKS-MoE

तम्। वा॒म्। रथ॑म्। व॒यम्। अ॒द्य। हु॒वे॒म॒। पृ॒थु॒ऽज्रय॑म्।
अ॒श्वि॒ना॒। सम्ऽग॑तिम्। गोः। यः। सू॒र्या॑म्। वह॑ति। व॒न्धु॒र॒ऽयुः।
गिर्वा॑हसम्। पु॒रु॒ऽतम॑म्। व॒सु॒ऽयुम्॥ १॥

हेअश्विनौ वां युवयोरथं वयंस्तोतारोऽद्यसुत्याहनिहुमेव आह्वयामः कीदृशंतं पृथुज्रयं प्रथितवेगं गोःगवांसङ्गतिं सङ्गमयितारं योरथः सूर्यांवहतिधारयति वन्धुरायुः रथेनिवासाधारभूतः काष्ठोवन्धुरं तद्वान् गिर्वाहसं गिरांस्तुतीनांवोढारं पुरुतमं प्रभूततमं वसूयुं वसुमन्तम्॥ १॥

अथद्वितीया–

यु॒वं॑श्रिय॑मश्विनादे॒वता॒तांदिवो॑नपातावनथ॒ःशची॑भिः।
यु॒वोर्वपु॑र॒भिपृक्ष॑ःसचन्ते॒वह॑न्ति॒यत्क॑कु॒हासो॒रथे॑वाम्॥ २॥

यु॒वम्। श्रिय॑म्। अ॒श्वि॒ना॒। दे॒वता॑। ताम्। दिव॑ः। न॒पा॒ता॒।
व॒न॒थ॒ः। शची॑भिः। यु॒वोः। वपु॑ः। अ॒भि। पृक्ष॑ः। स॒च॒न्ते॒।
वह॑न्ति। यत्। क॒कु॒हास॑ः। रथे॑। वा॒म्॥ २॥

हेदिवोनपाता आदित्यस्यपुत्रस्थानीयौ द्युलोकस्यवानपातयितारौ हेअश्विना अश्विनौ युवं युवां देवता देवते विभक्तिव्यत्ययः तांप्रसिद्धां श्रियं शचीभिःकर्मभिःशक्तिभिर्वा वनथः संभजेथे यद्वा वनतिर्दानार्थः युवोः युवयोर्वपुःशरीरं पृक्षोन्नानि सोमलक्षणानि अभिसचन्ते प्राप्नुवन्ति यद्यदा रथेवांवहन्ति ककुहासोमहान्तोश्वाः यद्वा स्तुतयोवां युवांरथे वहन्ति॥ २॥

अथतृतीया–

कोवा॑म॒द्याक॑रतेरा॒तह॑व्यऊ॒तये॑वासु॒तपेया॑यवा॒र्कैः।
ऋ॒तस्य॑वाव॒नुषे॑पू॒र्व्या॑य॒नमो॑येमा॒नोअ॑श्वि॒नाव॑वर्तत्॥ ३॥

कः। वा॒म्। अ॒द्य। क॒र॒ते॒। रा॒तऽह॑व्यः। ऊ॒तये॑। वा॒।
सु॒त॒ऽपेया॑य। वा॒। अ॒र्कैः। ऋ॒तस्य॑। वा॒। व॒नुषे॑। पू॒र्व्याय॑।
नम॑ः। ये॒मा॒नः। अ॒श्वि॒ना॒। आ। व॒व॒र्त॒त्॥ ३॥

कोयजमानोद्य वां युवयोःकरते कुर्यात्स्तुतिं अर्कैर्मंत्रैःरातहव्योदत्तसोमः ऊतयेवा रक्षणायवा सुतपेयायसोमपानायवा ऋतस्योदकस्ययज्ञस्यवा पूर्व्याय पुराणाय वनुषेसंभजनाय हेअश्विना नमोयेमानः नमस्कारंकुर्वाणः कआववर्तत् आवर्तयेद्यज्ञंप्रति ॥ ३ ॥

अथचतुर्थी—

हि॒र॒ण्यये॑नपुरुभू॒रथे॑ने॒मंय॒ज्ञंना॑स॒त्योप॑यातम् ।
पिबा॑थ॒इन्मधु॑नःसो॒म्यस्य॒दध॑थो॒रत्नं॑विध॒तेजना॑य ॥ ४ ॥

हि॒र॒ण्यये॑न । पु॒रु॒भू॒ इति॑ पुरुऽभू॒ । रथे॑न । इ॒मम् । य॒ज्ञम् । ना॒स॒त्या॒ ।
उप॑ । या॒त॒म् । पिबा॑थः । इत् । मधु॑नः । सो॒म्यस्य॑ । दध॑थः ।
रत्न॑म् । वि॒ध॒ते । जना॑य ॥ ४ ॥

हेपुरुभू बहुभवन्तौ नासत्यौ इमंयज्ञंहिरण्ययेनरथेनोपयातं सोम्यस्य सोमसम्बन्धिनोमधुनोमधुररसस्य कर्मणिषष्ठचौ सोमरसंपिबाथः पिबथः विधतेपरिचरते जनाय मह्यं रत्नं रमणीयंधनंमादधथोधारयथः दधतेर्दानार्थस्यलेटिरूपम् ॥ ४ ॥

अथपंचमी—

आनो॑यातंदि॒वोअच्छा॑पृथि॒व्याहि॑र॒ण्यये॑नसु॒वृता॒रथे॑न ।
मावा॑म॒न्येनिय॑मंदे॒वयन्त॒ःसंयद्द॒देनाभिः॑पू॒र्व्या॑वाम् ॥ ५ ॥

आ । नः॒ । या॒त॒म् । दि॒वः । अच्छ॑ । पृ॒थि॒व्याः । हि॒र॒ण्यये॑न ।
सु॒ऽवृता॑ । रथे॑न । मा । वा॒म् । अ॒न्ये । नि । य॒म॒न् । दे॒व॒ऽयन्तः॑ ।
सम् । यत् । द॒दे । नाभिः॑ । पू॒र्व्या । वा॒म् ॥ ५ ॥

नोस्मानच्छाभिप्राप्तुं दिवोद्युलोकात्पृथिव्याःसकाशाद्वा आयातं केनसाधनेन हिरण्ययेनहितरमणीयेन सुवृता शोभनावर्तनेनरथेन वां युवां अन्येदेवयन्तोदेवौयुवांइच्छन्तोयजमानाः मानियमन्नियमनंमाकुर्वन् यद्यस्मात्पूर्व्या पूर्वाह्णा इतरयष्टृभ्यःपूर्वभाविनीनाभिः बन्धिकास्तुतिः सन्ददे संबध्नाति तस्मादायातम् ॥ ५ ॥

Funding by IKS-MoE

अथषष्ठी—

नूनोरयिंपुरुवीरंबृहन्तंदस्रामिमाथामुभयेष्वस्मे ।
नरोयद्वामश्विनास्तोममावन्त्सधस्तुतिमाजमीह्लासोअग्मन् ॥६॥

नु । नः । रयिम् । पुरुऽवीरम् । बृहन्तम् । दस्रा । मिमाथाम् ।
उभयेषु । अस्मे इति । नरः । यत् । वाम् । अश्विना । स्तोमम् ।
आवन् । सधऽस्तुतिम् । आजऽमीह्लासः । अग्मन् ॥ ६ ॥

नु क्षिप्रंनोस्माकं रयिं धनं पुरुवीरं बहुपुत्रोपेतंबृहन्तं महान्तं धनं हेदस्राश्विनौ मिमाथां कुरुतं उभयेषु पुरुमीह्लाजमीह्लेषुअस्मेऽस्मासु यद्यदा नरोनेतारः ऋत्विजः पुरुमीह्लसम्बन्धिनोवांयुवयोःस्तोमंस्तोत्रं आवन्नगमन्प्राप्ताः तथा सधस्तुतिं सहस्तुतिमाजमीह्लासोजमीह्लसम्बन्धिनोपेतैःसहाग्मन्नगमन् ॥ ६ ॥

अथसप्तमी—

इहेहयद्वांसमनापपृक्षेसेयमस्मेसुमतिर्वाजरत्ना ।
उरुष्यतंजरितारंयुवंहश्रितःकामोनासत्यायुवद्रिक् ॥ ७ ॥ २० ॥

इहऽइह । यत् । वाम् । समना । पपृक्षे । सा । इयम् । अस्मे इति ।
सुऽमतिः । वाजऽरत्ना । उरुष्यतम् । जरितारम् । युवम् । ह ।
श्रितः । कामः । नासत्या । युवऽद्रिक् ॥ ७ ॥ २० ॥

व्याख्यातेयम् ॥ ७ ॥

॥ इतितृतीयस्यसप्तमोविंशोवर्गः ॥ २० ॥

एषस्यभानुरितिसप्तर्चंत्रयोदशंसूक्तं आदितःषट्जगत्यः सप्तमीत्रिष्टुप् मण्डलद्रष्टावामदेवऋषिः अश्विनौदेवता एषस्यत्रिष्टुबन्तमितिह्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसीदंशस्यं तथाचसूत्रितम्—अबोध्यग्निर्ज्मएषस्यभानुरिति ।

तत्रप्रथमा—

एषस्यभानुरुदियर्तियुज्यतेरथःपरिज्मादिवोअस्यसानवि ।
पृक्षासोअस्मिन्मिथुनाअधित्रयोदृतिस्तुरीयोमधुनोविरप्शते ॥ १ ॥

Funding by IKS-MoE

एषः । स्यः । भानुः । उत् । इयर्ति । युज्यते । रथः । परिऽज्मा ।
दिवः । अस्य । सानवि । पृक्षासः । अस्मिन् । मिथुनाः । अधि ।
त्रयः । दृतिः । तुरीयः । मधुनः । वि । रप्शते ॥ १ ॥

एषःपुरतोदृश्यमानःस्यः सभानुर्दीप्तिमानादित्यः उदियर्ति ऊर्ध्वंगच्छति पुरस्ताद्रथश्च युवयोःसंबन्धीपरिज्मा परितोगन्ता अस्यदिवोद्योतमानस्यादित्यस्यसानवि सानौ समुछ्रितप्रदेशे उदियर्तीतिवा रप्शतेइतिवासंबन्धिनीयं अस्मिन्रथे अध्युपरिभागे मिथुना मिथुनीभूतास्त्रयस्त्रिविधाः पृक्षासोन्नानित्रेधाविहितंचान्नं इदमन्नमशनंपानंखादश्चेतिहिश्रुतम् । त्रिष्वपिपदार्थेषुमिथुनशब्दस्तैत्तिरीयेदृश्यते मातापितापुत्रस्तदेवतन्मिथुनं[1]मिति । दृतिस्तुरीयः रसद्रव्याधारःपदार्थश्चर्ममयोदृतिरित्युच्यते मधुनःसोमरसस्यसंबन्धीमधुपर्णश्चतुर्थोविरप्शते विविधं राजते ॥ १ ॥

अथद्वितीया–

उद्वांपृक्षासोमधुमन्तईरतेरथाअश्वासउषसोव्युष्टिषु ।
अपोर्णुवन्तस्तमआपरीवृतंस्व१र्णशुक्रंतन्वन्तआरजः ॥ २ ॥

उत् । वाम् । पृक्षासः । मधुऽमन्तः । ईरते । रथाः । अश्वासः ।
उषसः । विऽउष्टिषु । अपऽऊर्णुवन्तः । तमः । आ । परिऽवृतम् ।
स्वः । न । शुक्रम् । तन्वन्तः । आ । रजः ॥ २ ॥

पृक्षासः पक्षास्त्रिविधान्नवन्तोमधुमन्तः सोमरसोपेताअश्वासोश्वयुक्ताः वां युवयोरथाः यद्वा मधुमन्तः पृक्षारथाअश्वासोश्वाः उषसोव्युष्टिषुव्युच्छनेषुसत्सूदीरते उन्मुखंगच्छन्ति किंकुर्वन्तः परीवृतं परितोव्याप्तंतमः आसर्वतः अपोर्णुवन्तः अपाकुर्वन्तः स्वर्णआदित्यइव शुक्रंदीप्तंरजस्तेजश्चतन्वन्तः आकारश्चार्थे यद्वा रजोन्तरिक्षंशुक्रंदीप्तंतन्वन्तः ॥ २ ॥

अथतृतीया–

मध्वःपिबतंमधुपेभिरासभिरुतप्रियंमधुनेयुञ्जाथांरथम् ।
आवर्तनिंमधुनाजिन्वथस्पथोदृतिंवहेथेमधुमन्तमश्विना ॥ ३ ॥

---

[1] तै० ब्रा० १. ६. ३. ।

मध्वः । पिबतम् । मधुऽपेभिः । आसऽभिः । उत । प्रियम् । मधुने ।
युञ्जाथाम् । रथम् । आ । वर्तनिम् ।। मधुना । जिन्वथः । पथः ।
दृतिम् । वहेथे इति । मधुऽमन्तम् । अश्विना ॥ ३ ॥

मध्वोमधुरंसोमरसं मधुपेभिः सोमपानार्हैरासभिरास्यैःपिबतं उतापिच प्रियंरथं मधुने मधुलाभाय युञ्जाथां अश्वैर्युक्तंकुरुतं वर्तिनिं यजमानगृहं आगच्छतमितिशेषः पथोगमनमार्गात् मधुनाजिन्वथः प्रीणयतं यद्वैकंवाक्यं पथोवर्तनिमाकाशंजिन्वथः दृतिंमधुमन्तं हेअश्विनाश्विनौ वहेथे धारयथ ॥ ३ ॥

अथचतुर्थी–

हंसासोयेवांमधुमन्तोअस्रिधोहिरंण्यपर्णाउहुवंउषर्बुधः ।
उदप्रुतोमन्दिनोमन्दिनिस्पृशोमध्वोनमक्षःसवंनानिगच्छथः ॥४॥

हंसासः । ये । वाम् । मधुऽमन्तः । अस्रिधः । हिरंण्यऽपर्णाः ।
उहुवः । उषःऽबुधः । उदऽप्रुतः । मन्दिनः । मन्दिनिऽस्पृशः ।
मध्वः । न । मक्षः । सवंनानि । गच्छथः ॥ ४ ॥

हंसासोध्वनिशीघ्रंगन्तारः मधुमन्तोमाधुर्योपेताअस्रिधः अद्रोग्धारः हिरण्यपर्णाः हितरमणीयपर्णाः उहुवःओढारःउषर्बुधः उषसिबुध्यमानाः उदप्रुत उदकस्यप्लावयितारः मन्दिनोहर्षयितारः मन्दिनिस्पृशः मन्दिनंसोमंस्पृशन्तः उक्तलक्षणायेश्वाःसन्ति तैरश्वैर्मध्वोन मधुमिव मक्षोमक्षिकाः सवनान्यस्मदीयानिगच्छथः ॥ ४ ॥

अथपंचमी–

स्वध्वरासोमधुमन्तोअग्नयंउस्राजरन्तेप्रतिवस्तोरश्विना ।
यन्निक्तहस्तस्तरणिर्विचक्षणःसोमंसुषावमधुमन्तमद्रिभिः ॥५॥

सुऽअध्वरासः । मधुऽमन्तः । अग्नयः । उस्रा । जरन्ते । प्रति ।
वस्तोः । अश्विना । यत् । निक्तऽहस्तः । तरणिः । विऽचक्षणः ।
सोमम् । सुसाव । मधुऽमन्तम् । अद्रिऽभिः ॥ ५ ॥

स्वध्वरासः शोभनयागसाधनाः मधुमन्तोहोतव्यसोमवन्तः अग्नयोगार्हपत्यादयः उस्रासहनिवसन्तौ अश्विनौ प्रतिवस्तोः अन्वहमुषःकालेजरन्ते स्तुवन्ति यद्यदानिक्तहस्तः समंत्रेणोदकेनशोधितहस्तः तरणिः कर्मणस्तारयिता विचक्षणोविविधंद्रष्टाध्वर्युः सोमंमधुमन्तमद्रिभिर्ग्रावभिःसुषावाभिषुतवान् तदातेग्नयःस्तुवन्ति तस्मादागच्छतमित्यर्थः ॥ ५ ॥

अथषष्ठी—

आ॒के॒नि॒पासो॒अह॑भि॒र्दवि॑ध्वत॒ःस्व१॒र्णशु॒क्रंत॒न्वन्त॒आरज॑ः ।
सूर॑श्चि॒दश्वा॑न्युयुजा॒नई॑यते॒विश्वाँ॒अनु॑स्व॒धया॑चेतथस्प॒थः ॥ ६ ॥

आ॒के॒ऽनि॒पास॑ः । अह॑ऽभिः । दवि॑ध्वतः । स्व॑ः । न । शु॒क्रम् ।
त॒न्वन्त॑ः । आ । रज॑ः । सूर॑ः । चि॒त् । अश्वा॑न् । यु॒यु॒जा॒नः ।
ई॒य॒ते॒ । विश्वा॑न् । अनु॑ । स्व॒धया॑ । चे॒त॒थ॒ः । प॒थः ॥ ६ ॥

आकेनिपासः अन्तिकेनिपतन्तीत्याकेनिपारश्मयः तेचाहभिरहोभिर्दविध्वतः कम्पयन्तोध्वंसयन्तोवातमांसिस्वर्णआदित्यइव शुक्रंदीप्तंरजः आतन्वन्तोभवन्त्यःअश्विनोरश्वाःसूरश्चित्सूर्यश्चाश्वान्युयुजानोयोजयन्नीयतेगच्छति हेअश्विनौ युवांविश्वान्पथः आगमनमार्गाननुक्रमेणस्वधयान्नेनसोमलक्षणेनचेतथः चेतयथः प्रज्ञापयथः ॥ ६ ॥

अथसप्तमी—

प्रवां॑मवोचमश्विनाधिय॒न्धारथ॒ःस्वश्वो॑अ॒जरो॒योअस्ति॑ ।
येन॑स॒द्यःपरि॒रजां॑सिया॒थोह॒विष्म॑न्तंत॒रणिं॑भो॒जमच्छ॑ ॥७॥२१॥

प्र । वा॒म् । अ॒वो॒च॒म् । अ॒श्वि॒ना॒ । धि॒य॒म्ऽधाः । रथ॑ः । सु॒ऽअश्व॑ः ।
अ॒जर॑ः । यः । अस्ति॑ । येन॑ । स॒द्यः । परि॑ । रजां॑सि । या॒थः ।
ह॒विष्म॑न्तम् । त॒रणि॑म् । भो॒जम् । अच्छ॑ ॥ ७ ॥ २१ ॥

धियंधाः कर्मणांधारकोहं हेअश्विनाश्विनौ वां प्रवोचं प्रब्रवीमि स्तौमि स्वश्वः सुष्ठुअश्वः अजरः अजीर्णोनित्यनूतनोजरयितावारथोयोस्ति येनरथेन सद्यस्तदानीमेवरजांसि लोकान्परियाथस्तेनरथेन हविष्मन्तंसोमादिहविर्युक्तं तरणिं तारकं शीघ्रगामिनं भोजं भोजयितारमस्मद्यागं अच्छ प्राप्तुमागच्छतमितिशेषः ॥ ७ ॥

॥ इतितृतीयस्यसप्तमेएकविंशोवर्गः ॥ २१ ॥

॥ इतिचतुर्थेमण्डलेचतुर्थोनुवाकः ॥ ४ ॥

Funding by IKS-MoE

पञ्चमेनुवाकेत्रयोदशसूक्तानि तत्राग्रंपिबेतिसप्तर्चंप्रथमंसूक्तं वामदेवस्यार्षंगायत्रं कृत्स्नंसूक्तमिन्द्रवायुदेवताकं आद्याकेवलावायव्या तथाचानुक्रान्तम्—अग्रंवायव्याद्यैन्द्रवायवन्तुगायत्रमिति। सूक्तविनियोगोलैङ्गिकः आद्येद्वेऐन्द्रवायवग्रहस्ययाज्ये तथाचसूत्रम्—अग्रंपिबामधूनामितियाज्येअनवानमिति।

तत्रप्रथमा—

अग्रंपिबामधूनांसुतंवायोदिविष्टिषु। त्वंहिपूर्वपाअसि॥ १॥

अग्रम्। पिब। मधूनाम्। सुतम्। वायो इति। दिविष्टिषु।
त्वम्। हि। पूर्वऽपाः। असि॥ १॥

हेवायो त्वमग्रं इन्द्रादिभ्यःपूर्वं मधूनां मधुररसानांसोमानांसंबन्धिनंसुतमभिषुतंरसं पिब कुत्रेतितदुच्यते—दिविष्टिषु दिवःस्वर्गस्यप्रापकेषुयज्ञेषु यद्वास्माकंदिवःस्वर्गस्यैषणेषु निमित्तेषु त्वंहि त्वंखलु पूर्वपाअसि हिशब्दोदेवदधिषेपूर्वपेयमित्यादिमंत्रान्तरप्रसिद्धिद्योतनार्थः वायोरग्रपानंदेवावैसोमस्यराज्ञोग्रपेयेनसमपादयन्नहंप्रथमःपिबेयमित्यादिब्राह्मणेस्पष्टमा[1]म्नातम्—तत्रहिवायुराजिंप्रथमंधावित्वाग्रपानंलब्धवान्॥ १॥

अथद्वितीया—

शतेनानोअभिष्टिभिर्नियुत्वाँइन्द्रसारथिः। वायोसुतस्यतृम्पतम्॥ २॥

शतेन। नः। अभिष्टिऽभिः। नियुत्वान्। इन्द्रऽसारथिः।
वायो इति। सुतस्य। तृम्पतम्॥ २॥

हेवायो नियुत्वान् नियुद्भिस्तद्वानिन्द्रसारथिरिन्द्रसहायःसन् त्वंशतेनापरिमितैरभिष्टिभिरभितएषणीयैःकामैर्निमित्तभूतैरागच्छेतिशेषः आगत्यच सुतस्यसुतमभिषुतंनोस्मदीयंसोमंतृम्पतं पिबतं त्वमिन्द्रश्च इन्द्रस्यसाहित्यंब्राह्मणेएवोक्तम्—तत्तुरीयभागिन्द्रोभवत्त्रिभाग्वायुरितितुरीयेहैवसंग्रहीतारोवदन्तेमुनैवानूकाशेनयददइन्द्रःसारथिरिवभूत्वोदजय[2]दितिच॥ २॥

अथतृतीया—

आवांसहस्रंहरयइन्द्रवायूअभिप्रयः। वहन्तुसोमपीतये॥ ३॥

---

१ ऐ० ब्रा० २. २५।
२ ऐ० ब्रा० २. २५।

आ । वा॒म् । स॒हस्र॑म् । हर॑यः । इन्द्र॑वायू॒ इति॑ । अ॒भि । प्रय॑ः ।
वह॑न्तु । सोम॑ऽपीतये ॥ ३ ॥

हेइन्द्रवायू वां युवां सहस्रंहरयः सहस्रसंख्याकाअश्वाः प्रयोन्नंप्रतित्वरयन्तःसन्ति अत्रहरिशब्दोश्वसामान्यवचनः तेसोमपीतयेआवहन्तु ॥ ३ ॥

अथचतुर्थी—

रथं॒हिर॑ण्यवन्धुर॒मिन्द्र॑वायूस्वध्व॒रम् । आहिस्थाथो॑दिवि॒स्पृश॑म् ॥४॥

रथ॑म् । हिर॑ण्यऽवन्धुरम् । इन्द्र॑वायू॒ इति॑ । सु॒ऽअ॒ध्व॒रम् । आ ।
हि । स्थाथ॑ः । दि॒वि॒ऽस्पृश॑म् ॥ ४ ॥

हेइन्द्रवायू हिरण्यवन्धुरं हिरण्मयनिवासाधारकाष्ठोपेतंदिविस्पृशं द्युलोकस्पर्शिनंस्वध्वरं शोभनाध्वरवन्तंरथमास्थाथोहि आस्थितौखलु यस्मादेवंतस्मादागच्छतमित्यर्थः स्वध्वरंप्रत्यास्थाथइतिवाव्याख्येयम् ॥ ४ ॥

रथेनपृथ्वित्यादिकस्तृचोदशरात्रेपञ्चमेहनिप्रउगशस्त्रेऐंद्रवायवोद्वितीयः सूत्रितंच—रथेनपृथुपाजसाबहवःसूरचक्षसइति ।

तृचेप्रथमासूक्तेपञ्चमी—

रथे॑नपृथु॒पाज॑सादा॒श्वांस॒मुप॑गच्छतम् । इन्द्र॑वायूइ॒हाग॑तम् ॥ ५ ॥

रथे॑न । पृ॒थु॒ऽपाज॑सा । दा॒श्वांस॑म् । उप॑ । ग॒च्छ॒त॒म् ।
इन्द्र॑वायू॒ इति॑ । इ॒ह । आ । ग॒त॒म् ॥ ५ ॥

हेइन्द्रवायू पृथुपाजसा प्रभूतबलेनरथेन दाश्वांसं दातारं यजमानमुपगच्छतं तदर्थमिहास्मिन्यज्ञेआगतमागच्छतम् ॥ ५ ॥

अथषष्ठी—

इन्द्र॑वायूअ॒यंसु॒तस्तंदे॒वेभि॑ःस॒जोष॑सा । पिब॑तंदा॒शुषो॑गृ॒हे ॥ ६ ॥

इन्द्र॑वायू॒ इति॑ । अ॒यम् । सु॒तः । तम् । दे॒वेभि॑ः । स॒ऽजोष॑सा ।
पिब॑तम् । दा॒शुष॑ः । गृ॒हे ॥ ६ ॥

Funding by IKS-MoE

हेइन्द्रवायू अयंसोमः सुतोभिषुतः तंसोमंदेवेभिःदेवैःसजोषसा समानप्रीतौसन्तौ दाशुषोहविर्दातुर्गृहे यागशीलायांपिबतम् ॥ ६ ॥

अथसप्तमी—

इ॒हप्र॒याणं॑मस्तुवा॒मिन्द्र॑वायूवि॒मोच॑नम् । इ॒हवां॒सोम॑पीतये ॥७॥२२॥

इ॒ह । प्र॒ऽयान॑म् । अ॒स्तु । वा॒म् । इन्द्र॑वायू॒ इति॑ । वि॒ऽमोच॑नम् ।
इ॒ह । वा॒म् । सोम॑ऽपीतये ॥ ७ ॥ २२ ॥

हेइन्द्रवायू वांयुवयोः इहास्मिन्यज्ञेप्रयाणंगमनमस्तु इहास्मिन्नेवयज्ञे वां सोमपीतये विमोचनमश्वानामस्तु इहशब्दस्यपर्यवसानएकार्थत्वेपिआदरार्थत्वादविरोधः ॥ ७ ॥

॥ इतितृतीयस्यसप्तमेद्वाविंशोवर्गः ॥ २२ ॥

वायोशुक्रइतिचतुर्ऋचंद्वितीयंसूक्तं वामदेवस्यार्षमानुष्टुभमैन्द्रवायवं आद्याकेवलवायव्या अत्रानुक्रमणिका—वायोचतुष्कमानुष्टुभमाद्यावायव्येति । सूक्तविनियोगोलैङ्गिकः । आद्यादशरात्रेचतुर्थेहनिप्रउगशस्त्रेवायव्येतृचेप्रथमा वायोशुक्रोअयामितेविहिहोत्राअवीताइति सूत्रितम् ।

तत्रप्रथमा—

वायो॑शु॒क्रोअ॑यामिते॒मध्वो॒अग्रं॒दिवि॑ष्टिषु ।
आया॑हि॒सोम॑पीतयेस्पा॒र्होदे॑वनि॒युत्व॑ता ॥ १ ॥

वायो॒ इति॑ । शु॒क्रः । अ॒या॒मि॒ । ते॒ । मध्वः॑ । अग्र॑म् । दिवि॑ष्टिषु ।
आ । या॒हि॒ । सोम॑ऽपीतये । स्पा॒र्हः । दे॒व॒ । नि॒युत्व॑ता ॥ १ ॥

हेवायो ते तुभ्यं शुक्रोव्रतचर्यादिनादीप्तोहं मध्वः मधुरंसोमरसं कर्मणिषष्ठी अग्रमितरेभ्यःपूर्वं यामि प्रयामि अयतिरन्तर्भावितण्यर्थः किमर्थं दिविष्टिषु दिवोद्युलोकस्यैषणेषुसत्सु हेदेव वायो स्पार्हःस्पृहणीयस्त्वंनियुत्वतानियुत्वत् वायोःप्रतिनियुतोश्वस्तेनसाधनेनायाहि सोमपीतये सोमपानाय ॥ १ ॥

इन्द्रश्चेत्यादितृचोदशरात्रेचतुर्थेहन्यैन्द्रवायवोद्वितीयः सूत्रंच—इन्द्रश्चवायवेषांसोमानामाचिकितानसुक्रतूइति ।

Funding by IKS-MoE

सूक्तेद्वितीया–

इन्द्र॑श्चवायवेषां॒सोमा॑नांपी॒तिम॑र्हथः ।
यु॒वांहियन्तीन्द॑वोनि॒म्नमापो॒नस॒ध्र्य॑क् ॥ २ ॥

इन्द्र॑ः । च॒ । वा॒यो॒ इति॑ । ए॒षा॒म् । सोमा॑नाम् । पी॒तिम् । अ॒र्ह॒थ॒ः ।
यु॒वाम् । हि । यन्ति॑ । इन्द॑वः । नि॒म्नम् । आप॑ः । न । स॒ध्र्य॑क् ॥२॥

हेवायो त्वमिन्द्रश्चैषांगृहीतानांसोमानांपीतिंपानमर्हथः युवांहिखलु इन्दवः सोमाः यन्तिप्राप्नुवन्ति निम्नंखातप्रदेशंआपोनसध्र्यक् उदकानियथासहैवगच्छन्तितद्वत्सर्वेसोमायुवांहियन्ति॥२॥

अथतृतीया–

वाय॒विन्द्र॑श्चशु॒ष्मिणा॑स॒रथं॑शवसस्पती ।
नि॒युत्व॑न्तानऊ॒तय॒आया॒तंसोम॑पीतये ॥ ३ ॥

वा॒यो॒ इति॑ । इन्द्र॑ः । च॒ । शु॒ष्मिणा॑ । स॒ऽरथ॑म् । श॒व॒स॒ः । प॒ती॒ इति॑ ।
नि॒युत्व॑न्ता । न॒ः । ऊ॒तये॑ । आ । या॒त॒म् । सोम॑ऽपीतये ॥ ३ ॥

हेवायो त्वमिन्द्रश्च हेशवस्पती बलस्यपती शुष्मिणाबलवन्तौ नियुत्वन्ता नियुत्संज्ञाश्ववन्तौ युवां सरथं समानमेवरथमारुह्येतिशेषः नः ऊतयेरक्षणाय सोमपीतये सोमपानायात्रायातमागच्छतं यद्वा सरथमधितिष्ठतमारुह्यचायातमितिचवाक्यद्वयम् ॥ ३ ॥

अथचतुर्थी–

यावां॒सन्ति॑पु॒रु॒स्पृहो॑नि॒युतो॑दा॒शुषे॑नरा ।
अ॒स्मेताय॑ज्ञवाह॒सेन्द्र॑वायू॒निय॑च्छतम् ॥ ४ ॥ २३ ॥

याः । वा॒म् । सन्ति॑ । पु॒रु॒ऽस्पृह॑ः । नि॒ऽयुत॑ः । दा॒शुषे॑ । न॒रा॒ । अ॒स्मे इति॑ ।
ताः । य॒ज्ञ॒ऽवा॒ह॒सा॒ । इन्द्र॑वायू॒ इति॑ । नि । य॒च्छ॒त॒म् ॥ ४ ॥ २३ ॥

हेनरा नेतारौ हेयज्ञवाहसा यज्ञवाहकाविन्द्रवायू याः पुरुस्पृहोबहुभिःस्पृहणीयाः नियुतः सन्ति ताअस्मेस्मभ्यंदाशुषेहविर्दत्तवतेयजमानायमदर्थंतानियुतोनियच्छतम् ॥ ४ ॥

॥ इतितृतीयस्यसप्तमेत्रयोविंशोवर्गः ॥ २३ ॥

Funding by IKS-MoE

विहिहोत्राइतिपञ्चर्चंतृतीयंसूक्तं वामदेव्यंवायव्यं अत्रानुक्रमणिका—विहिपञ्चवायव्यमिति । सूक्तविनियोगोलैङ्गिकः आद्यादशरात्रेचतुर्थेहनिप्रउगशस्त्रेवायव्यतृचस्यद्वितीया तथाचसूत्रितं—विहिहोत्राअवीतावायोशतंहरीणामिति ।

सैषाप्रथमा—

वि॒हिहो॒त्राअवी॑ताव॒िपोनरायो॑अ॒र्य॑ः ।
वाय॒वाच॒न्द्रेण॒रथे॑नया॒हिसु॒तस्य॑पी॒तये॑ ॥ १ ॥

वि॒हि । होत्रा॑ः । अवी॑ताः । विप॑ः । न । राय॑ः । अ॒र्यः ।
वायो॒ इति॑ । आ । च॒न्द्रेण॑ । रथे॑न । या॒हि । सु॒तस्य॑ । पी॒तये॑ ॥१॥

हेवायो विहि वीहि भक्षय होत्राः होमसाधिकाःसोमाहुतीरवीताअन्यैःपूर्वमभक्षिताः विपोन शत्रूणांवेपयिताराजेव किंचार्यःस्तोतुर्ममरायोधनानिसंपादयेतिशेषः हेवायो चन्द्रेणाह्लादकेनरथेनायाहि सुतस्यसोमस्यपीतयेपानाय ॥ १ ॥

अथद्वितीया—

नि॒र्यु॑वा॒णोअश॑स्तीर्नि॒युत्वाँ॒इन्द्र॑सारथिः ।
वाय॒वाच॒न्द्रेण॒रथे॑नया॒हिसु॒तस्य॑पी॒तये॑ ॥ २ ॥

नि॒ःऽयु॒वा॒नः । अश॑स्तीः । नि॒युत्वा॑न् । इन्द्र॑ऽसारथिः । वायो॒ इति॑ ।
आ । च॒न्द्रेण॑ । रथे॑न । या॒हि । सु॒तस्य॑ । पी॒तये॑ ॥ २ ॥

हेवायो त्वमशस्तीरभिशस्तीःनिर्युवाणःनिःशेषेणनियोजयन् नियुत्वान्नियुत्संज्ञकाश्वानिंन्द्रसारथिरिन्द्रसहायःसन्नायाहि ॥ २ ॥

अथतृतीया—

अनु॑कृ॒ष्णेवसु॑धितीये॒माते॑वि॒श्वपे॑शसा ।
वाय॒वाच॒न्द्रेण॒रथे॑नया॒हिसु॒तस्य॑पी॒तये॑ ॥ ३ ॥

अनु॑ । कृ॒ष्णे इति॑ । वसु॑धिती॒ इति॒ वसु॑ऽधिती । ये॒माते॒ इति॑ ।
वि॒श्वऽपे॑शसा । वायो॒ इति॑ । आ । च॒न्द्रेण॑ । रथे॑न । या॒हि । सु॒तस्य॑ ।
पी॒तये॑ ॥ ३ ॥

Funding by IKS-MoE

कृष्णे कृष्णवर्णे वसुधिती वसूनांधात्र्यौ विश्वपेशसा बहुरूपेद्यावापृथिव्यौ त्वामनुयेमाते अनुगच्छतः ॥ ३ ॥

अथचतुर्थी—

वह॑न्तुत्वामनो॒युजो॑यु॒क्तासो॑नव॒तिर्नव॑ ।
वाय॒वाच॒न्द्रेण॒रथे॑नया॒हिसु॒तस्य॑पी॒तये॑ ॥ ४ ॥

वह॑न्तु । त्वा॒ । म॒न॒ःऽयुज॑ः । यु॒क्तास॑ः । न॒व॒तिः । नव॑ । वायो॒ इति॑ ।
आ । च॒न्द्रेण॑ । रथे॑न । या॒हि । सु॒तस्य॑ । पी॒तये॑ ॥ ४ ॥

हेवायो त्वात्वांमनोयुजोमनःसमानगतयोयुक्तासः परस्परंसंयुक्ताः नवतिर्नवनवोत्तरनवतिसंख्याकाः अश्वावहन्तु धारयन्तु ॥ ४ ॥

वायोशतमितिपञ्चमीपूर्वोक्तएवतृचेतृतीया सूक्तंतुपूर्वमेवोक्तं ।

अथपञ्चमी—

वायो॑श॒तंहरी॑णांयु॒वस्व॒पोष्या॑णाम् ।
उ॒तवा॑तेसह॒स्रिणो॒रथ॒आया॑तु॒पाज॑सा ॥ ५ ॥ २४ ॥

वायो॒इति॑ । श॒तम् । हरी॑णाम् । यु॒वस्व॑ । पोष्या॑णाम् ।
उ॒त । वा॒ । ते॒ । स॒ह॒स्रिण॑ः । रथ॑ः । आ॑ । या॒तु॒ । पाज॑सा ॥५॥२४॥

हेवायो त्वं पोष्याणां पोषणीयानां हरीणां शतं युवस्व योजय रथे उतवाथवा ते सहस्रिणः सहस्रसंख्यापूरकाअश्वाःतैर्युक्तोरथः पाजसाबलेनायात्वागच्छतु ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेचतुर्विंशोवर्गः ॥ २४ ॥

इदंवामास्यइतिषळृचंचतुर्थंसूक्तं वामदेवस्यार्षंगायत्रमैन्द्राबार्हस्पत्यं अत्रानुक्रमणिका—इदंवांषळैन्द्राबार्हस्पत्यंगायत्रमिति । सूक्तविनियोगोलैङ्गिकः ।

तत्रप्रथमा—

इ॒दं॑वा॑मा॒स्ये॑ह॒विःप्रि॒यमि॑न्द्राबृहस्पती । उ॒क्थंमद॑श्चशस्यते ॥ १ ॥

इ॒दम । वा॒म् । आ॒स्ये॑ । ह॒विः । प्रि॒यम् । इ॒न्द्रा॒बृ॒ह॒स्प॒ती॒ इति॑ ।
उ॒क्थम् । मद॑ः । च॒ । श॒स्य॒ते॒ ॥ १ ॥

Funding by IKS-MoE

हेइन्द्राबृहस्पती वामास्ये इदंमियंहविःसोमरूपं प्रक्षिपामीतिशेषः उक्थंशस्त्रंच मदोमदजनकंशस्यते ॥ १ ॥

अथद्वितीया–

अ॒यंवां॒परि॑षिच्यते॒सोम॑इन्द्राबृहस्पती । चा॒रुर्मदा॑यपी॒तये॑ ॥ २ ॥

अ॒यम् । वा॒म् । परि॑ । सि॒च्य॒ते॒ । सोम॑ः । इ॒न्द्रा॒बृ॒ह॒स्प॒ती॒ इति॑ ।
चारु॑ः । मदा॑य । पी॒तये॑ ॥ २ ॥

हेइन्द्राबृहस्पती वामास्ये चारुः शोभनः अयंसोमः परिषिच्यते परितोदीयते मदायहर्षाय पीतयेपानायच ॥ २ ॥

ऐन्द्राबार्हस्पत्यायामिष्टौप्रधानस्यानइन्द्रेतितृतीयानुवाक्या उत्तरायाज्या सूत्रितंच–आनइन्द्राबृहस्पतीअस्मेइन्द्राबृहस्पतीइति ।

सैषातृतीया–

आनं॑इन्द्राबृहस्पतीगृ॒हमिन्द्रं॑श्चगच्छतम् । सो॒म॒पासोम॑पीतये॥३॥

आ । नः॒ । इ॒न्द्रा॒बृ॒ह॒स्प॒ती॒ इति॑ । गृ॒हम् । इन्द्र॑ः । च॒ । ग॒च्छ॒त॒म् ।
सो॒म॒ऽपा । सोम॑ऽपीतये । ॥ ३ ॥

हेइन्द्राबृहस्पती अथ विविच्योच्यते हेबृहस्पते त्वंचेन्द्रश्चसोमपा सोमपौ युवांसोमपीतये सोमपानाय नोगृहंअस्मद्यागसंबन्धि आगच्छतम् ॥ ३ ॥

अथचतुर्थी–

अ॒स्मेइं॑न्द्राबृहस्पतीर॒यिंधत्तं॑शत॒ग्विनं॑म् । अश्वा॑वन्तंसह॒स्रिणं॑म्॥४॥

अ॒स्मे इति॑ । इ॒न्द्रा॒बृ॒ह॒स्प॒ती॒ इति॑ । र॒यिम् । ध॒त्त॒म् । श॒त॒ऽग्विन॑म् ।
अश्व॑ऽवन्तम् । स॒ह॒स्रिण॑म् ॥ ४ ॥

अस्याविनियोगःपूर्वमन्त्रेणसहोक्तः हेइन्द्राबृहस्पती अस्मेस्मभ्यंरयिंधनंधत्तं कीदृशं शतग्विनं शतसंख्याकाभिर्गोभिर्युक्तं अश्वावन्तमश्ववन्तं सहस्रिणं सहस्रसंख्यायुक्तम् ॥४॥

Funding by IKS-MoE

अथपंचमी–

इन्द्रा॒बृह॒स्पती॑व॒यंसु॒तेगी॒र्भिर्ह॑वामहे । अ॒स्यसोम॑स्यपी॒तये॑ ॥५॥

इन्द्रा॒बृह॒स्पती॒ इति॑ । व॒यम् । सु॒ते । गीः॒ऽभिः । ह॒वा॒म॒हे॒ ।
अ॒स्य । सोम॑स्य । पी॒तये॑ ॥ ५ ॥

सुतेअभिषुतेसोमेगीर्भिःस्तुतिभिःशिष्टंस्पष्टम् ॥ ५ ॥

अथषष्ठी–

सोम॑मिन्द्राबृहस्पती॒पिब॑तंदा॒शुषो॑गृ॒हे । मा॒दये॑था॒ंतदो॑कसा ॥६॥२५॥

सोम॑म् । इ॒न्द्रा॒बृ॒ह॒स्प॒ती॒ इति॑ । पिब॑तम् । दा॒शुषः॑ । गृ॒हे ।
मा॒दये॑थाम् । तत्ऽओ॑कसा ॥ ६ ॥ २५ ॥

हेइन्द्राबृहस्पती युवां दाशुषोहविर्दातुर्यजमानस्यगृहे तदोकसा तदेवयजमानगृहं ओकोनिवासस्थानंययोस्तौ तादृशौसन्तौ सोमंपिबतं पीत्वाचमादयेथामिति ॥ ६ ॥

॥ इतितृतीयस्यसप्तमेपञ्चविंशोवर्गः ॥ २५ ॥

यस्तस्तंभेत्येकादशर्चंपञ्चमंसूक्तं वामदेवस्यार्षंत्रैष्टुभं दशमीजगती दशम्येकादश्याविन्द्राबृहस्पतिदेवताके शिष्टानवबार्हस्पत्यः अत्रानुक्रमणिका–यस्तस्तम्भैकादशबार्हस्पत्यमन्त्येऐन्द्र्यौचोपान्त्याजगतीति । आभिप्लविकेषूक्थ्येषुतृतीयसवनेब्राह्मणाच्छंसिनःस्तोमवृद्धाविदंसूक्तमावापार्थं तथाचसूत्रं–यस्तस्तंभयोअद्रिभिदिति । आद्येबृहस्पतिसवेमरुत्वतीयनिष्केवल्ययोःसूक्तमुखीये सूत्रितंच–यस्तस्तम्भधुनेतयइतिसूक्तमुखीयेइति ।

तत्रप्रथमा–

यस्त॒स्तम्भ॒सह॑सा॒विज्मोअन्ता॒न्बृह॒स्पति॑स्त्रिषध॒स्थोरवे॑ण ।
तंप्र॒त्नास॒ऋष॑यो॒दीध्या॑नाःपु॒रोविप्रा॑दधिरेम॒न्द्रजि॑ह्वम् ॥ १ ॥

यः । तस्तम्भ । सहसा । वि । ज्मः । अन्तान् । बृहस्पतिः ।
त्रिऽसधस्थः । रवेण । तम् । प्रत्नासः । ऋषयः । दीध्यानाः ।
पुरः । विप्राः । दधिरे । मन्द्रऽजिह्वम् ॥ १ ॥

योबृहस्पतिः बृहतोवेदस्ययज्ञस्यवापालयितादेवः सहसाबलेनज्मः पृथिव्याः अन्तान्दशदिशइत्यर्थः तान्वितस्तम्भ विविधंस्तम्भितवान् नियमितवान् कीदृशःसः त्रिषधस्थः त्रिषु स्थानेषुवर्तमानः केनसाधनेन रवेण एवंतिष्ठेतत्यनेनशब्देन तंदेवंप्रत्नासःपुराणाऋषयोतीन्द्रियद्रष्टारोदीध्यानादीप्यमानाविप्रामेधाविनोयजमानादयःपुरोदधिरे पुरस्तात्स्थापितवन्तः कीदृशेनस्तुत्यादिना मन्द्रजिह्वंमंद्राजिह्वायस्यासौमन्द्रजिह्वः तंमन्दनजिह्वंमोदनजिह्वंतम् ॥ १ ॥

अथद्वितीया–

धुनेतयःसुप्रकेतंमदन्तोबृहस्पतेअभियेनस्ततस्रे ।
पृषन्तंसृप्रमदब्धमूर्वंबृहस्पतेरक्षतादस्ययोनिम् ॥ २ ॥

धुनऽइतयः । सुऽप्रकेतम् । मदन्तः । बृहस्पते । अभि । ये । नः ।
ततस्रे । पृषन्तम् । सृप्रम् । अदब्धम् । ऊर्वम् । बृहस्पते ।
रक्षतात् । अस्य । योनिम् ॥ २ ॥

हेबृहस्पते धुनेतयः धुनाशत्रूणांकम्पयित्रीइतिर्गतिर्येषांतेतादृशाः सुप्रकेतं शोभनप्रज्ञं त्वां मदन्तोमादयन्तोनोस्मत्संबन्धिनोयेऋत्विजोभिततस्रे आत्मानमुपक्षिपन्ति स्तुवन्तिवा अस्यएषांयोनिंकारणंयज्ञंयजमानंवा मां रक्षताद्रक्ष योनिर्विशेष्यते पृषन्तंफलानिसिञ्चंतं सृप्रं सर्पणस्वभावं अदब्धमहिंसितमूर्वमुरुं ॥ २ ॥

बृहस्पतयेत्यादिकेद्वेबार्हस्पत्येपशौवपापुरोडाशयोरनुवाक्ये बृहस्पतेयापरमापरावदितिद्वे-इतिहिसूत्रितम् ।

सैषातृतीया–

बृहस्पतेयापरमापरावदतआतऋतस्पृशोनिषेदुः ।
तुभ्यंखाताअवताअद्रिदुग्धामध्वश्चोतन्त्यभितोविरप्शम् ॥ ३ ॥

Funding by IKS-MoE

बृह॑स्पते । या । प॒र॒मा । प॒रा॒ऽवत् । अतः॑ । आ । ते॒ । ऋ॒त॒ऽस्पृशः॑ ।
नि । से॒दुः॒ । तुभ्य॑म् । खा॒ताः । अ॒व॒ताः । अद्रि॑ऽदुग्धाः । मध्वः॑ ।
श्चो॒त॒न्ति॒ । अ॒भितः॑ । वि॒ऽर॒प्शम् ॥ ३ ॥

हेबृहस्पते या प्रसिद्धा परमोत्कृष्टा परावदत्यन्तंदूरभूतावसतिः स्वर्गाख्यास्ति यद्वा लिङ्गव्यत्ययः परमंस्थानमस्ति अतःअस्माद्देशादा आइत्यर्वागर्थे अधस्तात्तेतवसंबन्धिनः ऋतस्पृशः यज्ञंस्पृशंतोश्वाः निषेदुर्निषण्णाभवन्ति तुभ्यंखाताअवताअवटाः लुप्तोपमैषा यथाखाताःकूपा अभितः श्चोतन्तितद्वत् अद्रिदुग्धाः ग्रावभिरभिषुताःसोमाः विरप्शं विशेषेणशब्देन स्तोत्रंयथाभवतितथामध्वोमधुरंरसश्चोतन्तिस्रवन्ति ॥ ३ ॥

अथचतुर्थी–

बृह॒स्पतिः॑प्रथ॒मंजाय॑मानोम॒होज्योति॑षःपर॒मेव्यो॑मन् ।
स॒प्तास्य॑स्तुविजा॒तोरवे॑ण॒विस॒प्तर॑श्मिरधम॒त्तमां॑सि ॥ ४ ॥

बृह॒स्पतिः॑ । प्र॒थ॒मम् । जाय॑मानः । म॒हः । ज्योति॑षः । प॒र॒मे ।
विऽओ॑मन् । स॒प्तऽआ॑स्यः । तु॒वि॒ऽजा॒तः । रवे॑ण । वि ।
स॒प्तऽर॑श्मिः । अ॒ध॒म॒त् । तमां॑सि ॥ ४ ॥

अयंबृहस्पतिर्मन्त्राभिमानीदेवः महोमहतोज्योतिषोदीप्तस्यादित्यस्यपरमेनिरतिशयेव्योमन्व्योमनि प्रथमंजायमानः प्रादुर्भवन् सप्तास्यः सप्तच्छन्दोमयमुखः तुविजातः बहुप्रकारंसंभूतोरवेणशब्देनसप्तरश्मिःसर्पणस्वभावस्तेजोयुक्तस्तमांसिव्यधमत् धमतिर्गतिकर्मेतिनिरुक्तं[१] । विविधंगच्छतिनाशयतीत्यर्थः ॥ ४ ॥

अथपञ्चमी–

ससु॒ष्टुभा॒सऋक्व॑ताग॒णेन॑व॒लंरु॑रोजफलि॒गंरवे॑ण ।
बृह॒स्पति॑रु॒स्रिया॑हव्य॒सूदः॒कनि॑क्रद॒द्वाव॑शतीरु॒दाज॑त् ॥ ५ ॥ २६ ॥

---

[१] नि० ६. २. ।

Funding by IKS-MoE

सः । सु॒ऽस्तुभा॑ । सः । ऋक्व॑ता । ग॒णेन॑ । व॒लम् । रु॒रो॒ज॒ । फ॒लि॒ऽगम् ।
रवे॑ण । बृह॒स्पति॑ः । उ॒स्रियाः॑ । ह॒व्य॒ऽसूदः॑ । कनि॑क्रदत् । वाव॑शतीः ।
उत् । आ॒ज॒त् ॥ ५ ॥ २६ ॥

सबृहस्पतिः सुष्टुभा शोभनस्तुतिमता ऋक्वता दीप्तिमतागणेनांगिरसांरवेणशब्देनचसहफलिगं ञिफलाविशरणेफलिर्भेदस्तेनगच्छतीतिफलिगं बलं बलनामानमसुरंरुरोजबभञ्ज द्वितीयःसशब्दःपूरणः सएवदेवः उस्रियाः भोगानामुत्स्राविणीर्हव्यसूदः क्षीरादिहविःप्रेरिकाः वावशतीर्वावश्यमानागाः कनिक्रदच्छब्दंकुर्वन् उदाजदुद्घाटयतिस्म ॥ ५ ॥

॥ इतितृतीयस्यसप्तमेषड्विंशोवर्गः ॥ २६ ॥

एवापित्रइतिबार्हस्पत्येपशौहविषोयाज्या एवापित्रेविश्वदेवायवृष्णेविश्वेअद्यमरुतोविश्वऊतीइतिसूत्रितत्वात् । अग्निष्टोमेवैश्वदेवशस्त्रेएषैवधाय्या तथाचसूत्रं—एवापित्रेविश्वदेवायवृष्णेआनोभद्राःक्रतवोयन्तुविश्वतइतिवैश्वदेवमिति ॥

सैषाषष्ठी—

ए॒वापि॒त्रेवि॒श्वदे॑वाय॒वृष्णे॑य॒ज्ञैर्वि॑धेम॒नम॑साह॒विर्भिः॑ ।
बृह॑स्पतेसुप्र॒जावी॒रव॑न्तोव॒यंस्या॑म॒पत॑योरयी॒णाम् ॥ ६ ॥

ए॒व । पि॒त्रे । वि॒श्वऽदे॑वाय । वृष्णे॑ । य॒ज्ञैः । वि॒धे॒म॒ । नम॑सा ।
ह॒विःऽभिः॑ । बृह॑स्पते । सु॒ऽप्र॒जाः । वी॒रऽव॑न्तः । व॒यम् । स्या॒म॒ ।
पत॑यः । र॒यी॒णाम् ॥ ६ ॥

पित्रेपालकायविश्वेदेवाय सर्वदेवतारूपाय देवानांमन्त्रप्रतिपाद्यत्वादस्यचमन्त्राभिमानित्वाद्वैश्वदेवत्वं यद्वा अत्रदेवशब्दःस्तुत्यर्थः सर्वैःस्तुत्यायवृष्णेवर्षकायबृहस्पतयेदेवाय एव एवमुक्तप्रकारेण यज्ञैस्तत्साधनैर्हविर्भिराज्यचर्वादिलक्षणैर्नमसास्तुत्याचविधेम परिचरेम हेबृहस्पते सुप्रजाः शोभनप्रजाः वीरवन्तोवीर्योपेतावयं रयीणांधनानांपतयःस्याम ॥ ६ ॥

अथसप्तमी—

सइद्राजा॒प्रति॑जन्यानि॒विश्वा॒शुष्मे॑णतस्थाव॒भिवी॒र्ये॑ण ।
बृह॒स्पतिं॒यःसुभृ॑तंबि॒भर्ति॑वल्गू॒यति॒वन्द॑तेपूर्व॒भाज॑म् ॥ ७ ॥

सः । इत् । राजा॑ । प्रति॑ऽजन्यानि । विश्वा॑ । शुष्मे॑ण । त॒स्थौ॒ ।
अ॒भि । वी॒र्ये॑ण । बृह॒स्पति॑म् । यः । सुऽभृ॑तम् । बि॒भर्ति॑ । व॒ल्गु॒ऽयति॑ ।
वन्द॑ते । पू॒र्व॒ऽभाज॑म् ॥ ७ ॥

इदमाद्यृक्त्रयंपुरोहितप्रशंसेतिब्राह्मणं अथवासूक्तस्यऋग्द्वयवर्जितस्यबार्हस्पत्यत्वाद्बृहस्पतेरेवस्तुतिः सइत् सएव राजा मूर्धाभिषिक्तोन्योवाराजमानः प्रतिजन्यानि जन्यंयुद्धं प्रतिबलानीत्यर्थः प्रत्यर्थिजनपदानिवा तानि विश्वा सर्वाणि शुष्मेणबलेन वीर्येणशरीरसामर्थ्येनवा अभि अभिगम्याक्रम्य तस्थौ तिष्ठति सइत्युक्तंकइत्याह—योबृहस्पतिंबृहतांमहतांमन्त्राणांपालयितारंदेवमुक्तलक्षणंपुरोहितंवा सुभृतं सुष्ठुहविःस्तोत्रादिनान्नाच्छादनादिवाबिभर्ति भरति वल्गूयति स्तौति वन्दते नमस्करोतिच पूर्वभाजमितरेभ्यःप्रथमसंभक्तारंकृत्वाएवंयःकरोतिसएवतस्थाविति ॥ ७ ॥

अथाष्टमी—

सइत्क्षे॑ति॒सुधि॑त॒ओक॑सि॒स्वेतस्मा॒इळा॑पिन्वतेविश्व॒दानी॑म् ।
तस्मै॒विशः॑स्व॒यमे॒वान॑मन्ते॒यस्मि॑न्ब्र॒ह्माराज॑नि॒पूर्व॑एति॑ ॥ ८ ॥

सः । इत् । क्षे॒ति॒ । सुऽधि॑तः । ओक॑सि । स्वे । तस्मै॑ । इळा॑ ।
पि॒न्व॒ते॒ । वि॒श्व॒ऽदानी॑म् । तस्मै॑ । विशः॑ । स्व॒यम् । ए॒व । न॒म॒न्ते॒ ।
यस्मि॑न् । ब्र॒ह्मा । राज॑नि । पूर्वः॑ । एति॑ ॥ ८ ॥

सइत्सएवक्षेति निवसति सुधितः सुष्ठुतृप्तःसन् कुत्र स्वेस्वकीयेएव ओकसि सदने सएवसमृद्धोनिर्बाधःसन् सुखेनास्ते तस्मैइळाभूमिर्विश्वदानीं सर्वकालंपिन्वते वर्धतेफलैः तस्मै विशःप्रजाः स्वयमेवनमन्ते प्रणताभवन्ति दण्डनमन्तरेणस्वयमेवदत्तकराभवन्ति यस्मिन्राजनि ब्रह्मापूर्वःप्रथमंपूज्यःसन्नेति गच्छति वर्ततेइत्यर्थः ॥ ८ ॥

अथनवमी—

अप्र॑तीतोजयति॒संधना॑नि॒प्रति॑जन्यान्यु॒तयासज॑न्या ।
अ॒व॒स्यवे॒योवरि॑वःकृ॒णोति॑ब्र॒ह्मणे॒राजा॒तम॑वन्तिदे॒वाः ॥ ९ ॥

Funding by IKS-MoE

अप्रतिऽइतः । जयति । सम् । धनानि । प्रतिऽजन्यानि । उत । या ।
सऽजन्या । अवस्यवे । यः । वरिवः । कृणोति । ब्रह्मणे । राजा ।
तम् । अवन्ति । देवाः ॥ ९ ॥

सएवाप्रतीतोन्यैरप्रतिगतःसन्यानिधनानिप्रतिजन्यानिप्रतिस्पर्धिजनसंबन्धीनि उतापिच सजन्याजनसंबन्धीनिधनानिसंजयति योराजाअवस्यवेवसीयसेधनरहितायरक्षणमिच्छतेवा ब्रह्मणेब्राह्मणायप्रीणनमिच्छते बृहस्पतयेवावरिवोधनंकृणोति करोति ददाति सउक्तप्रकारेणमहान्भवति तमेवदेवाअवन्ति रक्षन्ति ॥ ९ ॥

इन्द्रश्चसोममितिदशमीतृतीयसवनेब्राह्मणाच्छंसिनःप्रस्थितयाज्या सूत्रितंच—इन्द्रश्चसोमंपिबतंबृहस्पतआवोवहन्तुसप्तयोरघुष्यदइति ।

अथदशमी—

इन्द्रश्चसोमंपिबतंबृहस्पतेस्मिन्यज्ञेमन्दसानावृषण्वसू ।
आवांविशन्त्विन्दवःस्वाभुवोस्मेरयिंसर्ववीरंनियच्छतम् ॥ १० ॥

इन्द्रः । च । सोमम् । पिबतम् । बृहस्पते । अस्मिन् । यज्ञे ।
मन्दसाना । वृषण्वसू इति वृषण्ऽवसू । आ । वाम् । विशन्तु । इन्दवः ।
सुऽआभुवः । अस्मे इति । रयिम् । सर्वऽवीरम् । नि । यच्छतम् ॥ १० ॥

हेबृहस्पते त्वमिन्द्रश्च सोमंपिबतं कीदृशौयुवां अस्मिन्यज्ञेमन्दसानाहृष्यन्तौ वृषण्वसू वर्षितृधनौ यजमानेभ्योदीयमानधनावित्यर्थः वां युवां स्वाभुवः सुष्ठु सर्वतोभवन्तःकृत्स्नशरीरव्यापनसमर्थाइत्यर्थः तादृशाइन्दवः सोमाः आविशन्तु युवयोःशरीरंप्रविशन्तु अस्मेस्मभ्यं रयिंधनंसर्ववीरं सर्वपुत्राद्युपेतंनियच्छतं दत्तम् ॥ १० ॥

अथैकादशी—

बृहस्पतइन्द्रवर्धतंनःसचासावांसुमतिर्भूत्वस्मे ।
अविष्टंधियोजिगृतंपुरंधीर्जजस्तमर्योवनुषामरातीः ॥ ११ ॥ २७ ॥

बृह॑स्पते । इ॒न्द्र॒ । वर्ध॑तम् । न॒ः । सचा॑ । सा । वा॒म् । सु॒ऽम॒तिः ।
भू॒तु । अ॒स्मे इति॑ । अ॒वि॒ष्टम् । धियः॑ । जि॒गृ॒तम् । पुर॑म्ऽधीः ।
ज॒ज॒स्तम् । अ॒र्यः । व॒नुषा॑म् । अरा॑तीः ॥ ११ ॥ २७ ॥

हेबृहस्पते हेइन्द्र युवां नोस्मान्वर्धतं वर्धयतं प्रवृद्धान्कुरुतं सासुमतिःयुवयोरनुग्रहबुद्धिरस्मेस्मासु सचा सह भूतुभवतु धियःकर्माण्यविष्टंरक्षतं पारंनयतं पुरंधीः पुरंशरीरंधीयतेस्थाप्यतेयाभिर्मतिभिस्ताःस्तुतीर्जिगृतं प्रबुध्यतं वनुषांसंभक्तॄणामस्माकमर्योगन्त्रीररातीः शत्रूनित्यर्थः जजस्तं युध्यतं क्षपयतमित्यर्थः छन्दस्यरातिशब्दःस्त्रीलिङ्गः एवंस्तुतिं निगमय्याभीष्टंप्रार्थितवान्॥ ११ ॥

॥ इतितृतीयस्यसप्तमेसप्तविंशोवर्गः ॥ २७ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

श्रीमत्सायणमन्त्रीशोदाशतय्यास्तृतीयके ॥ अष्टकेसप्तमाध्यायंव्याकार्षीदतिपेशलम् ॥२॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येतृतीयाष्टकेसप्तमोध्यायःसंपूर्णः ॥७॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥

अथाष्टमंव्याख्यातुमारभते इदमुत्यदित्येकादशर्चंषष्ठंसूक्तं वामदेवस्यार्षं त्रैष्टुभमुषोदेवताकम् इदमुषस्यन्त्वित्यनुक्रान्तं । प्रातरनुवाकेउषस्येक्रतौत्रैष्टुभेछन्दस्याश्विनशस्त्रेचेदंसूक्तं सूत्रितंच–उषोवाजेनेदमुत्यदिति ।

तत्रप्रथमा–

ओ३म् इ॒दमु॒त्यत्पु॑रु॒तमं॑पु॒रस्ता॒ज्ज्योति॒स्तम॑सोव॒युना॑वदस्थात् ।
नू॒नंदि॒वोदु॑हि॒तरो॑विभा॒तीर्गा॒तुंकृ॑णवन्नु॒षसो॒जना॑य ॥ १ ॥

इ॒दम् । ऊँ॒ इति॑ । त्यत् । पु॒रु॒ऽतम॑म् । पु॒रस्ता॑त् । ज्योति॑ः । तम॑सः ।
व॒युन॑ऽवत् । अ॒स्था॒त् । नू॒नम् । दि॒वः । दु॒हि॒तरः॑ । वि॒ऽभा॒तीः ।
गा॒तुम् । कृ॒ण॒व॒न् । उ॒षसः॑ । जना॑य ।॥ १ ॥

इदमुपुरतोदृश्यमानमिदं त्यत्तत् अस्माभिःस्तुत्यं सर्वप्रसिद्धं पुरुतममत्यन्तप्रभूतं ज्योतिस्तेजोवयुनावत् वेतेःकान्तिकर्मणइदं प्रकृष्टकान्तिमत् अथवा वयुनमितिप्रज्ञानाम प्रज्ञोपेतं सर्वस्यप्रज्ञापकमित्यर्थः कीदृक्तेजः पुरस्तात्पूर्वस्यांदिशितमसोन्धकारादस्थात्उदतिष्ठत् एवं सति नूनं सत्यं दिवआदित्यस्यदुहितरोदुहितृस्थानीयाविभातीर्विभानंकुर्वतीरुषसोजनाय यजमानानांगातुंगमनं गमनादिव्यापारसामर्थ्यंकृणवन्नकुर्वन् ॥ १ ॥

अथद्वितीया–

अस्थु॑रुचि॒त्राउ॒षसः॑पु॒रस्ता॑न्मि॒ताइ॑व॒स्वर॑वोध्व॒रेषु॑ ।
ऽव्यू॑व्र॒जस्य॒तम॑सो॒द्वारो॒च्छन्ती॑रव्र॒ञ्छुच॑यःपाव॒काः ॥ २ ॥

अस्थुः॑ । ऊँ॒ इति॑ । चि॒त्रा । उ॒षसः॑ । पु॒रस्ता॑त् । मि॒ताःऽइ॑व ।
स्वर॑वः । अ॒ध्व॒रेषु॑ । वि । ऊँ॒ इति॑ । व्र॒जस्य॑ । तम॑सः ।
द्वारा॑ । उ॒च्छन्तीः॑ । अ॒व्र॒न् । शुच॑यः । पा॒व॒काः ॥ २ ॥

Funding by IKS-MoE

चित्राश्चायनीयाउषसःपुरस्तात्पूर्वस्यांदिश्यस्थुः तिष्ठन्ति व्याप्ताइत्यर्थः तत्रदृष्टान्तः—अध्वरेषुमिताःखाताःस्वरवोयूपाइव तेयथावेद्याःपुरतोभासन्तेतद्वत् यद्यपिस्वरुशब्दोयूपच्छेदपतितप्रथमशकलवाची यःप्रथमःशकलःपरापतेत् सस्वरुःकार्यइत्युक्तत्वात्तथाप्यत्र[1]मितशब्दश्रवणाच्चषालवन्तःस्वरवइत्यादौतथादर्शनाच्चात्रयूपवचनः ताःव्रजस्यवारकस्यतमसोद्वारा द्वाराणि व्युच्छन्तीः शुचयोदीप्ताःपावकाः शोधिकाअव्रन् व्यवृण्वन् ॥ २ ॥

अथतृतीया—

उ॒च्छन्ती॑र॒द्याचि॑तयन्तभो॒जान्रा॑धो॒देया॑यो॒षसो॑म॒घोनीः॑ ।
अ॒चि॒त्रेअ॒न्तःप॒णयः॑सस॒न्त्वबु॑ध्यमाना॒स्तम॑सो॒विम॑ध्ये ॥ ३ ॥

उ॒च्छन्तीः॑ । अ॒द्य । चि॒त॒य॒न्त॒ । भो॒जान् । रा॒ध॒ःऽदेया॑य ।
उ॒षसः॑ । म॒घोनीः॑ । अ॒चि॒त्रे । अ॒न्तरिति॑ । प॒णयः॑ । स॒स॒न्तु॒ ।
अबु॑ध्यमानाः । तम॑सः । विऽम॑ध्ये ॥ ३ ॥

अद्यास्मिन्दिने उच्छन्तीस्तमोविवासयन्त्योमघोनीर्धनवत्यउषसोभोजान्भोजयितॄन्यजमानान्तेषांराधोदेयाय सोमादिधनदानाय चितयन्त प्रज्ञापयन्ति अचित्रे अचायनीये तमसोविमध्ये अत्यन्तगाढान्धकारेइत्यर्थः अन्तःतत्रपणयोवणिजइवादातारःअबुध्यमानाः ससन्तु स्वपन्तु ॥ ३ ॥

अथचतुर्थी—

कु॒वित्सदे॑वीःस॒नयो॒नवो॑वा॒यामो॑बभू॒यादु॑षसोवोअ॒द्य ।
येना॒नव॑ग्वे॒अङ्गि॑रे॒दश॑ग्वेस॒प्तास्ये॑रेवती॑रे॒वदू॒ष ॥ ४ ॥

कु॒वित् । सः । दे॒वीः॒ । स॒नयः॑ । नवः॑ । वा॒ । यामः॑ । ब॒भू॒यात् ।
उ॒ष॒सः॒ । व॒ः । अ॒द्य । येन॑ । नव॑ऽग्वे । अङ्गि॑रे । दश॑ऽग्वे ।
स॒प्तऽआ॑स्ये । रे॒व॒ती॒ः । रे॒वत् । ऊ॒ष ॥ ४ ॥

---

[1] ऋ० सं० ३. १. ४.।

Funding by IKS-MoE

हेदेवीर्द्योतमानाउषसः वोयुष्मान्सनयः पुराणोनवोवायामोगमनसाधनः सरथः अद्यास्मिन्यागदिने कुविद्बहुवारंबभूयात् भवेद्गच्छेदित्यर्थः येनरथेन हेरेवतीर्धनवत्योयूयंनवग्वेदशग्वे सप्तास्ये सप्तच्छन्दोयुक्तमुखे अंगिरेअंगिरोगणे यद्वैतेत्रयोप्यंगिरसः तेषांगणेतथान्यत्र नवग्वोनुदशग्वोअङ्गिरस्तं[1]मइति । रेवद्धनवद्यथाभवतितथाऊष विभातंकृतवत्यः वसेर्व्युच्छनकर्मणोलिटोमध्यमबहुवचनस्येदंरूपम् ॥ ४ ॥

अथपञ्चमी–

यू॒यंहिदे॑वीर्ऋ॑त॒युग्भि॒रश्वैः॑परिप्रया॒थभुव॑नानिस॒द्यः ।
प्र॒बो॒धय॑न्तीरुषसः॒स॒सन्तं॑द्वि॒पाच्चतु॑ष्पाच्च॒रथा॑यजी॒वम् ॥ ५ ॥ १ ॥

यू॒यम् । हि । दे॒वीः॒ । ऋ॒त॒युक्ऽभिः॑ । अश्वैः॑ । प॒रि॒ऽप्र॒या॒थ ।
भुव॑नानि । स॒द्यः । प्र॒ऽबो॒धय॑न्तीः । उ॒ष॒सः॒ । स॒सन्त॑म् । द्वि॒ऽपात् ।
चतुः॑ऽपात् । च॒रथा॑य । जी॒वम् ॥ ५ ॥ १ ॥

हेदेवीर्द्योतमानाउषसोयूयंहिखलु ऋतयुग्भिर्यज्ञगामिभिरश्वैःभुवनानिसद्यःपरिप्रयाथ परितःप्रकृष्टंगच्छथ किंकुर्वत्यः ससन्तंस्वपन्तं द्विपाच्चतुष्पान्मनुष्यगवादिलक्षणंजीवंचरथायचरणाय गमनादिव्यवहारायप्रबोधयन्तीः प्रबोधयन्त्यःसत्यः परिप्रयाथ ॥ ५ ॥

॥ इतितृतीयस्याष्टमेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी–

क्वं॑स्विदासांकत॒मापु॑रा॒णीयया॑वि॒धाना॑विद॒धुर्ऋ॑भू॒णाम् ।
शु॒भं॑यच्छु॒भ्राउ॒षस॒श्चर॑न्ति॒नविज्ञा॑यन्तेस॒दृशी॑रजु॒र्याः ॥ ६ ॥

क्व॑ । स्वि॒त् । आ॒सा॒म् । क॒त॒मा । पु॒रा॒णी । यया॑ । वि॒ऽधाना॑ ।
वि॒ऽद॒धुः । ऋ॒भू॒णाम् । शु॒भम् । यत् । शु॒भ्राः । उ॒षसः॑ । चर॑न्ति ।
न । वि । ज्ञा॒य॒न्ते॒ । स॒ऽदृशीः॑ । अ॒जु॒र्याः ॥ ६ ॥

---

[1] ऋ० सं० ८. २. २. ।

आसामुषसांमध्ये क्वस्विदभूदद्यकतमापुराणीपुरातनी यया ऋभूणांसंबन्धीनिविधाना चमसादिनिर्माणानि विदधुरकुर्वन्नृभवः यत् याश्चोषसः शुभ्रादीप्ताः शुभंचरन्ति शोभांदीप्तिं कुर्वन्ति ताअजुर्याअशीर्णानित्यनूतनानविज्ञायन्ते यतःसदृशीःसदृश्यः सर्वेष्वपिदिवसेषुएकरूपाः अतोद्यतन्यएताःएताःपुराण्यइतिनज्ञायन्ते उषसांसादृश्यं [1]सदृशीरद्यसदृशीरिदुश्वइत्यत्रप्रतिपादितम् ॥ ६ ॥

अथसप्तमी–

ताघ॒ताभ॒द्राउ॒षसः॑पु॒रासु॑रभि॒ष्टिद्यु॑म्नाऋ॒तजा॑तसत्याः ।
यास्वी॑जा॒नःशं॑शमा॒नउ॒क्थैःस्तु॒वञ्छंस॒न्द्रवि॑णंस॒द्यआप॑ ॥ ७ ॥

ताः । घ॒ । ताः । भ॒द्राः । उ॒षसः॑ । पु॒रा । आ॒सुः॒ । अ॒भि॒ष्टिऽद्यु॑म्नाः ।
ऋ॒तजा॑तऽसत्याः । यासु॑ । ई॒जा॒नः । श॒श॒मा॒नः । उ॒क्थैः । स्तु॒वन् ।
शंस॑न् । द्रवि॑णम् । स॒द्यः । आप॑ ॥ ७ ॥

ताघ घेतिप्रसिद्धौ ताःखलु उपकारिण्यः ताभद्राः कल्याण्यःस्तुत्यावा उषसःपुरापूर्वमासुरभवन् अभिष्टिद्युम्नाः अभिगमनमात्रेणद्युम्नंधनंयासांताः ऋतजातसत्याः ऋतार्थंयज्ञार्थं जाताश्चताः सत्याः सत्यफलाश्चतादृश्याः यासूषःसु ईजानोयागंकुर्वाणः उक्थैः शस्त्रैः शशमानः शंसमानः स्तुवन्सामभिःस्तोत्रंनिष्पादयन् शंसन्शस्त्राणिकुर्वन् द्रविणंधनं सद्यःआप प्राप्नोति ताभद्राइतिसंबन्धः ॥ ७ ॥

अथाष्टमी–

ताआच॑रन्तिसम॒नापु॒रस्ता॑त्समा॒नतः॑सम॒नाप॑प्रथा॒नाः ।
ऋ॒तस्य॑दे॒वीःसद॑सोबु॒धा॒नागवा॒ंनसर्गा॑उ॒षसो॑जरन्ते ॥ ८ ॥

ताः । आ । च॒र॒न्ति॒ । स॒म॒ना । पु॒रस्ता॑त् । स॒मा॒नतः॑ । स॒म॒ना ।
प॒प्र॒था॒नाः । ऋ॒तस्य॑ । दे॒वीः । सद॑सः । बु॒धा॒नाः । गवा॑म् ।
न । सर्गाः॑ । उ॒षसः॑ । ज॒र॒न्ते॒ ॥ ८ ॥

---

[1] ऋ० सं. २. १. ५.।

ताउषसः आसर्वतश्चरन्ति समनासमेताःपुरस्तात्पूर्वस्यांदिशिसमानतःसमानाद्देशादेकरूपादन्तरिक्षात्समनासर्वतःपप्रथानाः प्रथमानाऋतस्ययज्ञस्य सदसः सदः तत्रत्यमृत्विग्घविरादिकमित्यर्थः बुधानाबोधयन्त्यः अन्तर्भावितण्यर्थोयं एवंमहानुभावाउषसः जरन्तेस्तूयते गवांसर्गान उदकानांसृष्टयइव गवांसर्गानरश्मयंइतिहिश्रुतिः । तायथासर्वत्रप्रसङ्गादुपकारत्वाच्चस्तूयन्तेतद्वत् ॥ ८ ॥

अथनवमी—

ताइन्न्वे॒३॒वस॑म॒नास॑मा॒नीरमी॑तवर्णा॑उ॒षस॑श्चरन्ति ।
गूह॑न्ती॒रभ्व॒मसि॑तं॒रुश॑द्भिःशु॒क्रास्त॒नूभि॒ःशुच॑योरुचा॒नाः ॥ ९ ॥

ताः । इत् । नु । ए॒व । स॒म॒ना । स॒मा॒नीः । अमी॑तऽवर्णाः ।
उ॒षसः॑ । च॒र॒न्ति॒ । गूह॑न्तीः । अभ्व॑म् । असि॑तम् । रुश॑त्ऽभिः ।
शु॒क्राः । त॒नूभिः॑ । शुच॑यः । रु॒चा॒नाः ॥ ९ ॥

ताएवोषः इदितिपूरणः नु अद्य समना समानाः एकधेत्यर्थः समानीरेकरूपाः अमीतवर्णाः अहिंसितवर्णाअपरिमितवर्णावाउषसश्चरन्तिसर्वतः किंकुर्वत्यः अभ्वं महन्नामैतत् अतिमहदसितंकृष्णरूपंगूहन्तीः गोपयन्त्यः रुशद्भिः रोचमानैः तनूभिः स्वशरीरैः शुक्रादीप्ताः शुचयःशुद्धाः रुचानाः रोचमानाः रोचयन्त्योवा ॥ ९ ॥

अथदशमी—

र॒यिंदि॒वोदु॑हितरोविभा॒तीःप्र॒जाव॑न्तंयच्छता॒स्मासु॑देवीः ।
स्यो॒नादावः॑प्रति॒बुध्य॑मानाःसु॒वीर्य॑स्य॒पत॑यःस्याम ॥ १० ॥

र॒यिम् । दि॒वः । दु॒हि॒त॒रः । वि॒ऽभा॒तीः । प्र॒जाऽव॑न्तम् । य॒च्छ॒त॒ ।
अ॒स्मासु॑ । दे॒वीः॒ । स्यो॒नात् । आ । व॒ः । प्र॒ति॒ऽबुध्य॑मानाः ।
सु॒ऽवीर्य॑स्य । पत॑यः । स्या॒म॒ ॥ १० ॥

---

१ ऋ० सं० ३. ८. ३. ।

Funding by IKS-MoE

हेदिवोदुहितरः द्योतमानस्यादित्यस्यदुहितृस्थानीयाः विभातीः विभात्यः विशेषेण भानंकुर्वत्यः अस्मासु प्रजावन्तंरयिंपुत्राद्युपेतंधनंयच्छत दत्त हेदेवीर्देव्यः स्योनात्सुखात् निमित्तभूताद्वोयुष्मान्प्रतिबुध्यमानाः प्रतिबोधयन्तोवयं सुवीर्यस्यपतयःस्याम पुत्रादिसहितस्यधनस्यपालकाभवेम आपूरणः ॥ १० ॥

तद्वोदिवइतिव्युष्टायांजपेत् ।

अथैकादशी–

तद्वो॑दिवोदुहितरोविभा॒तीरुप॑ब्रुवउषसोय॒ज्ञके॑तुः ।
व॒यंस्या॑मय॒शसो॒जने॑षु॒तद्द्यौश्च॑ध॒त्तांपृ॑थि॒वीच॑दे॒वी ॥ ११ ॥ २ ॥

तत् । व॒ः । दि॒व॒ः । दुहि॒त॒र॒ः । वि॒ऽभा॒तीः । उप॑ । ब्रुवे॒ । उ॒ष॒स॒ः ।
य॒ज्ञऽके॑तुः । व॒यम् । स्या॒म । य॒शस॑ः । जने॑षु । तत् । द्यौः ।
च॒ । ध॒त्ताम् । पृ॒थि॒वी । च॒ । दे॒वी ॥ ११ ॥ २ ॥

हेदिवोदुहितरः हेउषसः विभातीः विविधभानाः वोयुष्मान् तदुत्तरार्धप्रथमपादेन वक्ष्यमाणंफलं यज्ञकेतुः यज्ञएवकेतुःप्रज्ञापकोयस्यताद्दशोहमुपब्रुवे उपेत्यब्रवीमि अथ बहुवदुच्यते वयं स्तुवन्तोजनेषु अस्मत्समानेषुमध्येयशसःकीर्तेरन्नस्यवास्वामिनःस्याम तद्यशः द्यौः पृथिवीचदेवी धत्तां धारयताम् ॥ ११ ॥

॥ इतितृतीयस्याष्टमेद्वितीयोवर्गः ॥ २ ॥

प्रतिष्येतिसप्तर्चंसप्तमंसूक्तं गायत्रमुषोदेवताकं प्रतिष्यासप्तगायत्रमित्यनुक्रमणिका प्रातरनुवाकेउषस्येक्रतौगायत्रेछन्दस्याश्विनशस्त्रेचेदंशस्यं अथोषस्यःप्रतिष्यासूनरीतिहिसूत्रितम् ।

तत्रप्रथमा–

प्रति॒ष्यासू॒नरी॒जनी॑व्यु॒च्छन्ती॒परि॒स्वसु॑ः । दि॒वोअ॑दर्शिदुहि॒ता ॥१॥

प्रति॑ । स्या । सू॒नरी॑ । जनी॑ । वि॒ऽउ॒च्छन्ती॑ । परि॑ । स्वसु॑ः ।
दि॒वः । अ॒द॒र्शि॒ । दुहि॒ता ॥ १ ॥

स्या सा प्रस्तूयमाना सूनरी सुष्ठुप्राणिनांनेत्री जनी जनयित्री फलानां स्वसुः स्वसृस्थानीयायारात्रेःपरि उपरिभागे रात्रिपर्यवसानकाले व्युछन्ती तमोविवासयंती स्वसास्वंस्रेज्यायस्याइत्युक्तं दिवोद्योतमानस्यादित्यस्यदुहितोषाः प्रत्यदर्शि प्रतिदृश्यतेसर्वैः ॥ १ ॥

अथद्वितीया—

अश्वे॑वचि॒त्रारु॑षीमा॒तागवा॑मृ॒ताव॑री । सखा॑भूद॒श्विनो॑रु॒षाः॥२॥

अश्वा॑ऽइव । चि॒त्रा । अरु॑षी । मा॒ता । गवा॑म् । ऋ॒तऽव॑री । सखा॑ ।
अ॒भू॒त् । अ॒श्विनोः॑ । उ॒षाः ॥ २ ॥

अश्वेवचित्रा चायनीया अरुषी आरोचमाना गवांरश्मीनांमाता निर्मात्री ऋतावरीयज्ञवत्युषाः अश्विनोः सखा समानख्याना सहस्तूयमानाभूत् भवति अश्विनोरुषसा सहस्तूयमानत्वात्सखित्वंपरस्परम् ॥ २ ॥

अथतृतीया—

उ॒तसखा॑स्य॒श्विनो॑रु॒तमा॒तागवा॑मसि । उ॒तोषो॒वस्व॑ईशिषे ॥ ३ ॥

उ॒त । सखा॑ । अ॒सि॒ । अ॒श्विनोः॑ । उ॒त । मा॒ता । गवा॑म् । अ॒सि॒ ।
उ॒त । उ॒ष॒ः । वस्वः॑ । ई॒शि॒षे॒ ॥ ३ ॥

उतापिचाश्विनोः सखा सख्यसि उतापिच गवांरश्मीनांमाताअसि उतापिच हेउषः वस्वोधनस्येशिषे ईश्वराभवसि ॥ ३ ॥

अथचतुर्थी—

या॒व॒यद्द्वे॑षसन्त्वाचिकि॒त्वित्सू॑नृतावरि । प्रति॒स्तोमै॑रभुत्स्महि ॥४॥

य॒व॒यत्ऽद्वे॑षसम् । त्वा॒ । चि॒कि॒त्वित् । सू॒नृ॒ता॒ऽव॒रि॒ । प्रति॑ । स्तोमैः॑ ।
अ॒भु॒त्स्म॒हि॒ ॥ ४ ॥

---

१ ऋ० सं० २. १. ८. ।

Funding by IKS-MoE

यवयतद्वेषसं यवयन्तोवियुज्यमानाद्वेषांसिद्वेष्टारोयस्यास्तादृशीपृथक्क्रियन्ते द्वेषांस्यनयेतिवारात्रौहननायोद्युक्ताद्वेषिणउषःकालेहिपलायन्ते तादृशींचिकित्वित् ज्ञापयन्तीं त्वा त्वां सूनृतावरि सूनृतेतिवाङ्नाम तद्वतिदेवि स्तोमैःस्तुतिभिःप्रत्यभुत्स्महि प्रतिबोधयामः स्तुमइत्यर्थः॥४॥

अथपञ्चमी–

प्रति॑भ॒द्राअ॑दृक्षत॒गवां॒सर्गा॒नर॒श्मयः॑। ओषाअ॑प्राउ॒रुज्रयः॑ ॥ ५ ॥

प्रति॑ । भ॒द्राः । अ॒दृ॒क्ष॒त॒ । गवा॑म् । सर्गाः॑ । न । र॒श्मयः॑ । आ ।
उ॒षाः । अ॒प्राः॒ । उ॒रु । ज्रयः॑ ॥ ५ ॥

भद्राः स्तुत्याः रश्मयः प्रत्यदृक्षत प्रतिदृश्यन्ते गवामुदकानांसर्गान वर्षधाराइव इयमुषाउरुज्रयोमहत्तेजः आप्राः आपूरयत् ॥ ५ ॥

अथषष्ठी–

आ॒प॒प्रुषी॑विभावरि॒व्या॑व॒र्ज्योति॑षा॒तमः॑। उषो॒अनु॑स्व॒धाम॑व ॥६॥

आ॒ऽप॒प्रुषी॑ । वि॒भा॒ऽव॒रि॒ । वि । आ॒वः॒ । ज्योति॑षा । तमः॑ । उषः॑ ।
अनु॑ । स्व॒धाम् । अ॒व॒ ॥ ६ ॥

हेविभावरि विभावत्युषः त्वमापप्रुषी आपूरयन्ती तेजसाजगज्ज्योतिषा तेजसा तमोन्धकारंव्यावः व्यावृणोः किंच स्वधां हविर्लक्षणमन्नं अनुलक्षीकृत्याव रक्ष ॥ ६ ॥

आद्यांतनोषीत्येषादेवानांहविष्षूषसोनुवाक्या सूत्रितंच–आद्यांतनोषिरश्मिभिरावहन्तीपोष्यावार्याणीति ।

सैषासप्तमी–

आद्यांत॑नोषिर॒श्मिभि॒रान्तरि॑क्षमु॒रुप्रि॒यम् । उषः॑शु॒क्रेण॑शो॒चिषा॑ ॥७॥३॥

आ । द्याम् । त॒नो॒षि॒ । र॒श्मिऽभिः॑ । आ । अ॒न्तरि॑क्षम् । उ॒रु । प्रि॒यम् ।
उषः॑ । शु॒क्रेण॑ । शो॒चिषा॑ ॥ ७ ॥ ३ ॥

हेउषः रश्मिभिर्द्यांदिवमातनोषि उरु विस्तीर्णं प्रियमन्तरिक्षं रश्मिभिरातनोषि शुक्रेणदीप्तेनशोचिषाप्रकाशेनयुक्तासत्येवंकरोषि ॥ ७ ॥

॥ इतितृतीयस्याष्टमेतृतीयोवर्गः ॥ ३ ॥

Funding by IKS-MoE

तद्देवस्येतिसप्तर्चमष्टमंसूक्तं वामदेवस्यार्षं जागतं सावित्रं तथाचानुक्रम्यते–तद्देवस्यसावित्रंतुजागतमिति । आभिप्लविकेतृतीयेहनिवैश्वदेवशस्त्रेसावित्रनिविद्धानं तथाचसूत्रितं–तद्देवस्यघृतेनद्यावापृथिवीइतितिस्रइति ।

तत्रप्रथमा–

तद्दे॒वस्य॑सवि॒तुर्वार्यं॑म॒हद्वृ॑णी॒महे॒असु॑रस्य॒प्रचे॑तसः ।
छ॒र्दिर्येन॑दा॒शुषे॒यच्छ॑ति॒त्मना॒तन्नो॑म॒हाँउद॑यान्दे॒वोअ॒क्तुभिः॑ ॥१॥

तत् । दे॒वस्य॑ । स॒वि॒तुः । वार्य॑म् । म॒हत् । वृ॒णी॒महे॑ । असु॑रस्य ।
प्रऽचे॑तसः । छ॒र्दिः । येन॑ । दा॒शुषे॑ । यच्छ॑ति । त्मना॑ । तत् । नः॒ ।
म॒हान् । उत् । अ॒या॒न् । दे॒वः । अ॒क्तुऽभिः॑ ॥ १ ॥

सवितुःप्रेरकस्यदेवस्यवार्यंवरणीयंमहत्पूज्यंतद्धनंवृणीमहे प्रार्थयामः असुरस्य असुर्वलं तद्वतःप्रचेतसःप्रकृष्टमतेः देवस्येतिसंबन्धः येनधनेनयुक्तःसन् छर्दिः गृहनामैतत् गृहोपलक्षितंधनजातं दाशुषे हविर्दत्तवते यजमानाय त्मनाआत्मनैवयच्छति तच्छर्दिः महान्देवः सविता अक्तुभीरात्रिभिः एतदह्नामप्युपलक्षणं सर्वैर्दिवसैः सर्वेषुदिवसेषुनोस्माकमुदयान् उद्यच्छतु करोत्वित्यर्थः यद्वा छर्दिरितितेजोनाम तत्तेजःउद्यच्छत्विति ॥ १ ॥

अथद्वितीया–

दि॒वोध॒र्ताभुव॑नस्यप्र॒जाप॑तिःपि॒शङ्गं॑द्रा॒पिंप्रति॑मुञ्चतेक॒विः ।
वि॒च॒क्ष॒णःप्र॒थय॑न्नापृ॒णन्नु॒र्वजी॑जनत्सवि॒तासु॒म्नमु॒क्थ्य॑म् ॥ २ ॥

दि॒वः । ध॒र्ता । भुव॑नस्य । प्र॒जाऽप॑तिः । पि॒शङ्ग॑म् । द्रा॒पिम् । प्रति॑ ।
मु॒ञ्च॒ते॒ । क॒विः । वि॒ऽच॒क्ष॒णः । प्र॒थय॑न् । आ॒ऽपृ॒णन् । उ॒रु ।
अजी॑जनत् । स॒वि॒ता । सु॒म्नम् । उ॒क्थ्य॑म् ॥ २ ॥

दिवोद्युलोकस्यधर्ता धारकः नकेवलंदिवएव अपितु भुवनस्यकृत्स्नस्यापिलोकस्य धर्ता प्रजापतिः प्रजानांप्रकाशवृष्ट्यादिनापालयिता कविः प्राज्ञोदेवः पिशंगं द्रापिं हिरण्मयंकवचं प्रतिमुंचते आच्छादयति प्रत्युदयं विचक्षणः विविधंद्रष्टा सएवदेवःप्रथयन् प्रख्यापयन्तेजःआपृणन्नापूरयन्परितः उरु प्रभूतंसुम्नंसुखंउक्थ्यंस्तुत्यमजीजनदुत्पादयति॥२॥

अथतृतीया—

आप्रा॒रजाँ॑सिदि॒व्यानि॒पार्थि॑वा॒श्लोकं॑दे॒वःकृ॑णुते॒स्वाय॒धर्म॑णे ।
प्रबा॒हूअ॑स्राक्सवि॒तासवी॑मनिनिवे॒शय॑न्प्रसु॒वन्न॒क्तुभि॒र्जग॑त् ॥३॥

आ । अ॒प्राः॒ । रजाँ॑सि । दि॒व्यानि॑ । पार्थि॑वा । श्लोक॑म् । दे॒वः ।
कृ॒णु॒ते॒ । स्वाय॑ । धर्म॑णे । प्र । बा॒हू इति॑ । अ॒स्रा॒क् । स॒वि॒ता ।
सवी॑मनि । नि॒ऽवे॒शय॑न् । प्र॒ऽसु॒वन् । अ॒क्तुऽभिः॑ । जग॑त् ॥ ३ ॥

अयंदेवः सविता दिव्यानि द्युसंबन्धीनिपार्थिवा पृथिवीसंबन्धीनिरजांसि लोकान् तिस्रःखलु द्यावःपृथिव्यश्च तिस्रो[1]भूमीर्धारयन्त्रीरुँतद्यूनितिहिश्रुतम् । अप्राः आपूरयति स्वाभिर्भाभिर्देवः स्वायधर्मणेस्वकीयायधारणाय श्लोकं प्रशस्तिंकृणुते करोति सविता सवीमनिप्रसवेअनुज्ञायांनिमित्तायां बाहूस्वीयौप्रास्राक्प्रसृजति प्रसारयतीत्यर्थः किंकुर्वन्नक्तुभिःकान्तिभिर्जगन्निवेशयन्स्वस्वकार्येस्थापयन्प्रसुवन्प्रेरयन् अथवा अक्तुभिरितिरात्रिनाम तदुपलक्षितैःसर्वैर्वासरैः सर्वेष्वपिदिनेष्वेवंकरोतीत्यर्थः ॥ ३ ॥

अथचतुर्थी—

अदा॑भ्यो॒भुव॑नानिप्र॒चाक॑शद्व्र॒तानि॑दे॒वःस॑वि॒ताभिर॑क्षते ।
प्रास्रा॑ग्बा॒हूभुव॑नस्यप्र॒जाभ्यो॑धृ॒तव्र॑तोम॒होअज्म॑स्यराजति ॥४॥

अदा॑भ्यः । भुव॑नानि । प्र॒ऽचाक॑शत् । व्र॒तानि॑ । दे॒वः । स॒वि॒ता ।
अ॒भि । र॒क्ष॒ते॒ । प्र । अ॒स्रा॒क् । बा॒हू इति॑ । भुव॑नस्य । प्र॒ऽजाभ्यः॑ ।
धृ॒तऽव्र॑तः । म॒हः । अज्म॑स्य । रा॒ज॒ति॒ ॥ ४ ॥

सवितादेवः अदाभ्योन्यैरहिंसितःसन्भुवनानि प्रचाकशद्दीपयन् व्रतानि कर्माणि प्राणिनामभिरक्षते भुवनस्यलोकस्यप्रजाभ्यस्तत्रत्याभ्योबाहूस्वीयौप्रास्राक्प्रसारयति स्वस्वकर्मणेनुजानातीत्यर्थः सर्वव्यापाराणांसूर्याधीनत्वात् सविता[2]वैप्रसवानामीशेइतिहिश्रुतिः । धृतव्रतोधृतकर्मासतथाकुर्वन्महोमहतः अज्मस्य जगतोराजति ईश्वरोभवति ॥ ४ ॥

---

[1] ऋ० सं० २.७.७.।
[2] ऐ० ब्रा० १.३०.।

Funding by IKS-MoE

अथपंचमी–

त्रिरन्तरिक्षंसविताम॑हित्वनात्रीरजांसिपरिभूस्त्रीणिरोचना ।
तिस्रोदिवःपृथिवीस्तिस्रइंन्वतित्रिभिर्व्रतैरभिनोरक्षातित्मना॥५॥

त्रिः । अन्तरिक्षम् । सविता । महिऽत्वना । त्री । रजांसि । परिऽभूः ।
त्रीणि । रोचना । तिस्रः । दिवः । पृथिवीः । तिस्रः । इन्वति ।
त्रिऽभिः । व्रतैः । अभि । नः । रक्षति । त्मना ॥ ५ ॥

अयंसविता त्रिः त्रिभेदमन्तरिक्षं अन्तराक्षान्तंभवति जगदित्यन्तरिक्षं परिभूः परिभवितासन् महित्वना महत्त्वेनइन्वतिव्याप्नोति वायुविद्युद्वरुणाख्यास्त्रयोलोकाअन्तरिक्षभेदाः सवायुलोकंसवरुणलोकमित्यादिश्रुतेः । त्रीरजांसि रंजनात्मकानि त्रीणिक्षित्यन्तरिक्षद्युलक्षणान्त्रीन्लोकानिन्वति पूर्वमन्तरिक्षस्यैवावान्तरभेदउक्तः इहतु सामान्याकारेणेतिनपुनरुक्तिः त्रीणिरोचनारोचनानिरोचमानानग्निवाय्वादित्यानुक्तस्थानत्रयस्वामित्वेनेन्वति पूर्वमन्तरिक्षस्यावान्तरभेदउक्तः अथ द्युपृथिव्योरवान्तरभेदउच्यते–तिस्रोदिवः इन्द्रप्रजापतिसत्याख्यां त्रीन्लोकानिन्वति तथा तिस्रःपृथिवीरिन्वति क्षित्यवान्तरभेदान्लोकानिन्वति एवंसर्वत्रव्याप्तोदेवः त्रिभिर्व्रतैःकर्मभिरुष्णवर्षहिमाख्यैर्नोऽस्मान् त्मना आत्मनैव स्वीयानुग्रहबुद्ध्यैवाभिरक्षति अभिरक्षतु परिपालयतु ॥ ५ ॥

अथषष्ठी–

बृहत्सुम्नःप्रसवीतानिवेशंनोजगंतःस्थातुरुभयंस्ययोवशी ।
सनोदेवःसंविताशर्मंयच्छत्वस्मेक्षयांयत्रिवरूथमंहंसः ॥ ६ ॥

बृहत्ऽसुम्नः । प्रऽसविता । निऽवेशनः । जगंतः । स्थातुः । उभयंस्य ।
यः । वशी । सः । नः । देवः । सविता । शर्म । यच्छतु । अस्मे इति ।
क्षयांय । त्रिऽवरूथम् । अंहंसः ॥ ६ ॥

योबृहत्सुम्नः प्रभूतधनः प्रभूतसुखोवा प्रसविताप्रकर्षेणानुज्ञाताकर्मणां निवेशनः सर्वैर्गंतव्यः जगतोजंगमस्य स्थातुःस्थावरस्योभयस्य योवशी समहान्सवितादेवोस्मभ्यंशर्मसुखंयच्छतुददातु कीदृशं शर्म त्रिवरूथं त्रीणिवरूथानिगृहाणिस्थानानि क्षित्यादीनियस्यतत्तादृशमस्मे अस्माकमंहसःपापस्यक्षयायभवत्वितिशेषः ॥ ६ ॥

Funding by IKS-MoE

राजक्रये आगन्देवइत्येषानुवचनीया सूत्रितंच—आगन्देवऋतुभिर्वर्धतुक्षयमित्यर्धर्चेआरमेदिति ।

सैषासप्तमी—

आग॑न्दे॒वऋ॒तुभि॒र्वर्ध॑तु॒क्षयं॒दधा॑तुनःसवि॒तासु॑प्र॒जामिष॑म् ।
सनः॑क्ष॒पाभि॒रह॑भिश्चजिन्व॑तुप्र॒जाव॑न्तंर॒यिम॒स्मेसमि॑न्वतु ॥७॥४॥

आ । अ॒ग॒न् । दे॒वः । ऋ॒तुऽभिः॑ । वर्ध॑तु । क्षय॑म् । दधा॑तु । नः॒ ।
स॒वि॒ता । सु॒ऽप्र॒जाम् । इष॑म् । सः । नः॒ । क्ष॒पाभिः॑ । अह॑ऽभिः । च॒ ।
जि॒न्व॒तु॒ । प्र॒जाऽव॑न्तम् । र॒यिम् । अ॒स्मे इति॑ । सम् । इ॒न्व॒तु॒ ॥७॥४॥

देवः सविता ऋतुभिःसह आगन्नागच्छतु गमेर्लङिरूपं किंच क्षयं गृहं वर्धतु वर्धयतु नोस्माकंसुप्रजांशोभनपुत्राद्युपेतंइषमन्नंदधातु ददातु सएवनोस्मान्क्षपाभीरात्रिभिः अहभिश्च सर्वेषुदिनेष्वित्यर्थः जिन्वतु प्रीणयतु धनान्यस्मेस्मासु प्रजावन्तंरयिंसमिन्वतु व्याप्नोतु प्रापयत्वित्यर्थः ॥ ७ ॥

॥ इतितृतीयस्याष्टमेचतुर्थोवर्गः ॥ ४ ॥

अभूद्देवइतिषळृचंनवमंसूक्तं वामदेवस्यार्षंसावित्रं अंत्यात्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषयाजगत्यः तथाचानुक्रमणिका—अभूद्देवःषट्त्रिष्टुबन्तमिति । अग्निष्टोमेवैश्वदेवशस्त्रेसावित्रनिविद्धानमिदं तथाचसूत्रं अभूद्देवएकयाचदशभिश्चस्वभूतइति । आद्यासावित्रग्रहस्यानुवाक्या तथाचसूत्रं—सावित्रेणग्रहेणचरन्त्यभूद्देवःसवितावन्द्योनुनइति ।

सैषाप्रथमा—

अभू॑द्दे॒वःस॑वि॒तावन्द्यो॒नुन॑इ॒दानी॒मह्न॑उप॒वाच्यो॒नृभिः॑ ।
वियोरत्ना॒भज॑तिमान॒वेभ्यः॒श्रेष्ठं॑नो॒अत्र॒द्रवि॑णं॒यथा॒दध॑त् ॥ १ ॥

अभू॑त् । दे॒वः । स॒वि॒ता । वन्द्यः॑ । नु । नः॒ । इ॒दानी॑म् । अह्नः॑ ।
उ॒प॒ऽवाच्यः॑ । नृऽभिः॑ । वि । यः । रत्ना॑ । भज॑ति । मा॒न॒वेभ्यः॑ ।
श्रेष्ठ॑म् । नः॒ । अत्र॑ । द्रवि॑णम् । यथा॑ । दध॑त् ॥ १ ॥

ससवितादेवः अभूत्प्रादुरासीत् अतोनुक्षिप्रमेवनोस्माकं वन्द्योवन्दनीयोभवति इदानीं यागकाले अह्नःतृतीयसवनेनृभिरस्मदीयैर्होतृभिरुपवाच्यःस्तुत्योभवति योदेवोमानवेभ्योमनोरपत्येभ्योयजमानेभ्यःतेषामर्थायरत्नारमणीयानिधनानिविभजति सदेवः श्रेष्ठंप्रशस्यंद्रविणंधनंगवादिलक्षणंधनंनोस्मभ्यमत्रास्मिन्कर्मणि यथा दधद्दद्यादित्यर्थः तथा वंद्यःउपवाच्यश्चाभूदिति ॥ १ ॥

अथद्वितीया—

दे॒वेभ्यो॒हिप्र॑थ॒मंय॒ज्ञिये॑भ्योऽमृत॒त्वंसु॒वसि॑भा॒गमु॑त्त॒मम् ।
आदिद्दा॒मानं॑सवित॒र्व्यू॑र्णुषेनू॒ची॒नाजी॑वि॒तामानु॑षेभ्यः ॥ २ ॥

दे॒वेभ्यः॑ । हि । प्र॒थ॒मम् । य॒ज्ञिये॑भ्यः । अ॒मृ॒त॒ऽत्वम् । सु॒वसि॑ ।
भा॒गम् । उ॒त्ऽत॒मम् । आत् । इत् । दा॒मान॑म् । स॒वि॒तः॒ । वि । ऊ॒र्णु॒षे॒ ।
अ॒नू॒ची॒ना । जी॒वि॒ता । मानु॑षेभ्यः ॥ २ ॥

प्रथमंदेवेभ्योहि हिशब्दःप्रसिद्धौ देवेभ्योयज्ञियेभ्योयज्ञार्हेभ्योमृतत्वंतत्साधनमुत्तमं उत्कृष्टतमंभागं सोमाज्यादिलक्षणं सुवसि अनुजानासि आदिदनंतरमेव दामानं हविषांदातारं हेसवितःव्यूर्णुषे प्रकाशयसि मानुषेभ्योयजमानेभ्योजीविताजीवितानि अनूचीना अनुक्रमयुक्तानि पितृपुत्रपौत्राइत्यनुक्रमः ईदृशानिजीवितानिपश्चाद्व्यूर्णुषे ॥ २ ॥

अथतृतीया—

अचि॑त्तीयच्च॑कृ॒मादैव्ये॒जने॑दी॒नैर्दक्षैः॒प्रभू॑तीपूरु॒षत्व॑ता ।
दे॒वेषु॑चसवित॒र्मानु॑षेषुच॒त्वंनो॒अत्र॑सुवता॒दना॑गसः ॥ ३ ॥

अचि॑त्ती । यत् । च॒कृ॒म । दैव्ये॑ । जने॑ । दी॒नैः । दक्षैः॑ । प्रऽभू॑ती ।
पु॒रु॒ष॒ऽत्वता॑ । दे॒वेषु॑ । च॒ । स॒वि॒तः॒ । मानु॑षेषु । च॒ । त्वम् ।
न॒ः । अत्र॑ । सु॒व॒ता॒त् । अना॑गसः ॥ ३ ॥

हेसवितः वयमचित्ती अप्रज्ञयादैव्येजनेदेवेत्वयिदीनैर्दुर्बलैःपुत्रादिभिर्ऋत्विग्भिर्वा तथा दक्षैः प्रवृद्धैर्वातैः प्रभूती प्रभूत्या ऐश्वर्यमदेनेतियावत् पुरुषत्वता पुरुषवत्तयाच यदागश्चकृम नकेवलंत्वय्येवकृतं अपितुदेवेष्वन्येषुमानुषेषुवाज्ञानादिभिर्यच्चकृम नःकृतवतोस्मान्त्वमत्रास्मिन्कर्मणिअनागसःअपापात्सुवतात् अनुजानीहि ॥ ३ ॥

देवसुवांहविष्णुसवितुःसत्यप्रसवस्यनप्रमियइतियाज्या तथाचसूत्रं—नप्रमियेसवितुर्दैव्यस्यतद्बृहस्पतेप्रथममिति ।

सैषाचतुर्थी—

न प्र॒मिये॑सवि॒तुर्दैव्य॑स्य॒तद्यथा॒विश्वं॒भुव॑नंधारयि॒ष्यति॑ ।
यत्पृ॑थि॒व्यावरि॑म॒न्नास्व॑ङ्गु॒रिर्वर्ष्म॑न्दि॒वःसु॒वति॑स॒त्यम॑स्य॒तत् ॥४॥

न । प्र॒ऽमिये॑ । स॒वि॒तुः । दैव्य॑स्य । तत् । यथा॑ । विश्व॑म् ।
भुव॑नम् । धा॒र॒यि॒ष्यति॑ । यत् । पृ॒थि॒व्याः । वरि॑मन् । आ ।
सु॒ऽअ॒ङ्गु॒रिः । वर्ष्म॑न् । दि॒वः । सु॒वति॑ । स॒त्यम् । अ॒स्य॒ । तत् ॥ ४ ॥

सवितुर्दैव्यस्य देवस्य तत्कर्म नप्रमिये नप्रमीयेत नहिंस्येत हिंसार्हंनभवतीत्यर्थः कृत्यार्थेकेन्प्रत्ययः यद्वा दैव्यस्येत्यधिकरणेषष्ठी साचकर्मार्था दैव्यंकर्मेत्यर्थः कथमहिंस्यमित्यतआह-यथाविश्वंभुवनंधारयिष्यतिधारयति विश्वधारणरूपंयत्कर्मास्तितन्नप्रमिये तथास्वंगुरिःशोभनांगुल्युपलक्षितहस्तोयद्यः पृथिव्याः वरिमन्नाकारश्चार्थे भूम्याउरुत्वेचसुवतिप्रेरयति तथा दिवोद्युलोकस्यवर्ष्मन्नुरुत्वेचसुवति अस्यदेवस्ययदुक्तंकर्मसत्यमबाध्यमिति ॥ ४ ॥

अथपंचमी—

इन्द्र॑ज्येष्ठान्बृ॒हद्भ्य॒ःपर्व॑तेभ्य॒ःक्षयाँ॑एभ्यःसुवसिप॒स्त्याव॑तः ।
यथा॑यथाप॒तय॑न्तोवियेमि॒रए॒वैवत॑स्थुःसवितःस॒वाय॑ते ॥ ५ ॥

इन्द्र॑ऽज्येष्ठान् । बृ॒हत्ऽभ्य॑ः । पर्व॑तेभ्यः । क्षया॑न् । ए॒भ्य॒ः ।
सु॒व॒सि॒ । प॒स्त्य॑ऽवतः । यथा॑ऽयथा । प॒तय॑न्तः । वि॒ऽये॒मि॒रे ।
ए॒व । ए॒व । त॒स्थु॒ः । स॒वि॒त॒रिति॑ । स॒वाय॑ । ते॒ ॥ ५ ॥

हेसवितः इन्द्रज्येष्ठान् इन्द्रःपरमैश्वर्ययुक्तः त्वमेवेन्द्रोवाज्येष्ठोज्यायान् पूज्योयेषांतेतादृशाः तान्बृहद्भ्योमहद्भ्यः पर्वतेभ्योप्यधिकान्सुवसिप्रेरयसि किंचैभ्योयजमानेभ्यः पस्त्यावतोगृहवतः क्षयान्निवासान्ग्रामनगरादीन्सुवसि प्रेरयसि यथायथा पतयन्तोगच्छन्तस्त्वां वियेमिरे विनियम्यन्ते त्वया तेतवसवायानुज्ञायै एवैव एवमेव नियमनमनतिक्रम्यतस्थुस्तिष्ठन्ति ॥ ५ ॥

Funding by IKS-MoE

अथषष्ठी—

येते॒त्रिरह॑न्सवितःस॒वासो॑दि॒वेदि॑वे॒सौभ॑गमासु॒वन्ति॑ ।
इन्द्रो॒द्यावा॑पृथि॒वीसिन्धु॑र॒द्भिरा॑दि॒त्यैर्नो॒अदि॑ति॒ःशर्म॑यंसत् ॥६॥५॥

ये । ते॒ । त्रिः । अह॑न् । स॒वि॒त॒रिति॑ । स॒वास॑ः । दि॒वेऽदि॑वे ।
सौभ॑गम् । आ॒ऽसु॒व॑न्ति । इन्द्र॑ः । द्यावा॑पृथि॒वी इति॑ । सिन्धु॑ः ।
अ॒त्ऽभिः । आ॒दि॒त्यैः । न॒ः । अदि॑तिः । शर्म॑ । यं॒स॒त् ॥ ६ ॥ ५ ॥

येयजमानाः हेसवितः तेत्वदर्थं सवासः सवाः सोमाः द्वितीयार्थेप्रथमा सोमान् यद्वा सवासः सवनानि प्रातरादीनि प्रतित्रिरहन् अभिषुण्वन्ति नकेवलमेकस्मिन्नेवाहनि सवनत्रयेषु अपितु दिवेदिवे प्रतिदिनं सौभगं सौभाग्यजनकमासुवन्ति अभिषुण्वन्ति तेभ्योनोस्मभ्यंइन्द्रः शर्मयंसत् यच्छतु द्यावापृथिव्यौच अद्भिर्विशिष्टासिन्ध्वभिमानिदेवताच आदित्यैःसहितादितिश्चशर्मयंसत् सावित्रेसूक्ते इन्द्रादीनांनिपातभाक्त्वात्तेषांप्रार्थनानविरुध्यते ॥ ६ ॥

॥ इतितृतीयस्याष्टमेपंचमोवर्गः ॥ ५ ॥

कोवस्त्रातेतिदशर्चंदशमंसूक्तं वामदेवस्यार्षं विश्वेदेवदेवताकं अष्टम्याद्यास्तिस्रोगायत्र्यः शिष्टाअनादेशपरिभाषयात्रिष्टुभः तथाचानुक्रम्यते—कोवोदशवैश्वदेवंत्रिगायत्र्यंतंत्विति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

कोव॑स्त्रा॒ताव॑सव॒ःकोव॑रू॒ताद्यावा॑भूमीअदिते॒त्रासी॑थां॑नः ।
सही॑यसोवरुणमित्र॒मर्ता॒त्कोवो॑ध्व॒रेवरि॑वोधातिदेवाः ॥ १ ॥

कः । व॒ः । त्रा॒ता । व॒स॒व॒ः । कः । व॒रू॒ता । द्यावा॑भूमी॒ इति॑ ।
अ॒दि॒ते॒ । त्रासी॑थाम् । न॒ः । सही॑यसः । व॒रु॒ण॒ । मि॒त्र॒ । मर्ता॑त् ।
कः । व॒ः । अ॒ध्व॒रे । वरि॑वः । धा॒ति॒ । दे॒वा॒ः ॥ १ ॥

हेवसवः सर्वस्यवासयितारोदेवाः वोयुष्मान्कस्त्रातास्ति यतोयूयंवसवः अतइत्यभिप्रायः कश्चवरूता संभक्तास्ति यद्वावोयुष्माकंमध्येकस्त्रातारक्षकोदेवः कश्चवरूतावारयितादुःखानांव-

Funding by IKS-MoE

रणीयोवाभवति हेद्यावाभूमी नोस्मान्त्रासीथां रक्षतं हेअदिते अखंडनीये एतदपिद्यावापृथिव्योर्विशेषणं संख्याव्यत्ययः यदीदंपृथग्देवतामंत्रणंस्यात्तर्हिनिघातोनस्यात् आमंत्रितंपूर्वमविद्यमानवदितिपूर्वस्याविद्यमानत्वेनास्यैवपादादित्वात् अदितेमित्र[1]वरुणोतमृळ । आदित्या[2]रुद्रावसवःसुदानवश्चेतिवत् । तस्यैवविशेषणत्वेनामंत्रितेसमानाधिकरणेइत्यविद्यमानवत्त्वप्रतिषेधादग्नेपा[3]वकरोचिषेतिवदस्यनिघातःसिध्यति तस्मात् द्यावाभूमी इत्येतस्यविशेषणं हेवरुण हेमित्र युवांसहीयसोमर्तात् अभिभवितुर्मनुष्यात् नःत्रासीथां हेदेवावोयुष्माकंअध्वरेयागेकोवरिवोधनं धाति ददाति यद्वा वोयुष्माकंमध्येकोवरिवोधाति धारयति तं रक्षतम् ॥ १ ॥

अथद्वितीया–

प्रयेधामा॑निपू॒र्व्याण्यर्चा॒न्वियदु॒च्छान्वि॑यो॒तारो॒अमू॑राः ।
वि॒धा॒तारो॒वि॑तेद॑धु॒रज॑स्राऋ॒तधी॑तयोरुरुचन्तद॒स्माः ॥ २ ॥

प्र । ये । धामा॑नि । पू॒र्व्याणि॑ । अर्चा॑न् । वि । यत् । उ॒च्छान् ।
वि॒ऽयो॒तार॑ः । अमू॑राः । वि॒ऽधा॒तार॑ः । वि । ते । द॒धु॒ः । अज॑स्राः ।
ऋ॒तऽधी॑तयः । रु॒रु॒च॒न्त॒ । द॒स्माः ॥ २ ॥

येदेवाः पूर्व्याणिपुरातनानिधामानिस्थानानि प्रार्चानर्चन्तिप्रयच्छन्तिस्तोतृभ्यः यद्येच वियोतारोदुःखानाममिश्रयितारः अमूराअमूढाःव्युच्छान्व्युच्छन्ति तमोविवासयन्ति देवाः ते विधातारः फलानांकर्तारः अजस्रानित्याः विदधुः कुर्वन्त्यभिमतम् किंच ऋतधीतयः सत्यकर्माणोदस्माः दर्शनीयास्ते रुरुचन्त रोचन्ते ॥ २ ॥

अथतृतीया–

प्रप॒स्त्या॒३॑मदि॑ति॒सिन्धु॑म॒र्कैःस्व॒स्तिमी॑ळेस॒ख्याय॑दे॒वीम् ।
उ॒भेयथा॑नो॒अह॑नीनि॒पात॑उ॒षासा॒नक्ता॑करता॒मद॑ब्धे ॥ ३ ॥

प्र । प॒स्त्या॑म् । अदि॑तिम् । सिन्धु॑म् । अ॒र्कैः । स्व॒स्तिम् । ई॒ळे॒ ।
स॒ख्याय॑ । दे॒वीम् । उ॒भे इति॑ । यथा॑ । न॒ः । अह॑नी॒ इति॑ ।
नि॒ऽपात॑ः । उ॒षसा॒नक्ता॑ । क॒र॒ता॒म् । अद॑ब्धे॒ इति॑ ॥ ३ ॥

---

[1] ऋ०सं० ३. ७. ८. । [2] ऋ०सं० ८. २. १४. । [3] ऋ०सं० ४. १. १९. ।

Funding by IKS-MoE

पस्त्यानां सर्वैर्गन्तव्यामदितिमदीनां देवमातरं तांदेवीं सिन्धुं स्यंदनशीलं नद्यभिमानिदेवीं स्वस्तिं सुखनिवासामेतन्नामिकांदेवीं सख्यायानुकूल्यायार्कैःमंत्रैरीळेस्तौमि उभे अहनी द्यावापृथिव्यौ तथा नोस्मान्निघातः नितरांपातः तथास्तौमि उषासानक्ताहोरात्राभिमानिर्देवते अदब्धे अदंभनीयेकरतां कुरुतां अभिमतमितिशेषः ॥ ३ ॥

अथचतुर्थी–

व्य॑र्य॒माव॑रु॑णश्चेति॒पन्था॑मि॒षस्पति॑ःसुवि॒तंगा॒तुम॒ग्निः ।
इन्द्रा॑विष्णूनृ॒वदु॒षुस्तवा॑ना॒शर्म॑नोयन्त॒मम॑व॒द्वरू॑थम् ॥ ४ ॥

वि । अ॒र्य॒मा । वरु॑णः । चे॒ति॒ । पन्था॑म् । इ॒षः । पति॑ः । सु॒वि॒तम् ।
गा॒तुम् । अ॒ग्निः । इन्द्रा॑विष्णू॒ इति॑ । नृ॒ऽवत् । उँ॒ इति॑ ।
सु । स्तवा॑ना । शर्म॑ । न॒ः । य॒न्त॒म् । अम॑ऽवत् । वरू॑थम् ॥ ४ ॥

अर्यमादेवोनोस्माकंपंथां यज्ञादिमार्गंविचेति ज्ञापयति तथा वरुणश्चविचेति इषोन्नस्यहविर्लक्षणस्यपतिःपालकोग्निः सुवितंसुखकरं गातुं गमनंमार्गं वा स्वर्गादेर्विचेति इन्द्राविष्णू सु सुष्ठुस्तवानास्तूयमानौ नृवन्मनुष्यवन्मनुष्योपेतं वरूथं वरणीयं अमवद्बलोपेतं शर्म गृहं सुखंवा नोस्माकं यंत यच्छतम् ॥ ४ ॥

अथपंचमी–

आपर्व॑तस्यम॒रुता॒मवाँ॑सिदे॒वस्य॑त्रा॒तुर॑व्रि॒भग॑स्य ।
पात्पति॒र्ज॑न्या॒दंह॑सोनोमि॒त्रोमि॒त्रिया॑दु॒तन॑उरुष्येत् ॥ ५ ॥ ६ ॥

आ । पर्व॑तस्य । म॒रुता॑म् । अवाँ॑सि । दे॒वस्य॑ । त्रा॒तुः । अ॒व्रि॒ ।
भग॑स्य । पात् । पति॑ः । जन्या॑त् । अंह॑सः । न॒ः । मि॒त्रः ।
मि॒त्रिया॑त् । उ॒त । न॒ः । उ॒रु॒ष्ये॒त् ॥ ५ ॥ ६ ॥

पर्वतस्येन्द्रसखस्यैतन्नामकस्य देवस्य मरुतांचत्रातुःरक्षकस्य भगस्यदेवस्यचावांसिरक्षणानि आ अव्रि आवृणे किंच पतिर्वरुणोदेवः जन्याज्जनसंबन्धादंहसःपापान्नोस्मान्पातु रक्षतु उतापिच मित्रश्चमित्रियान्मित्रभावेननोस्मानुरुष्येद्रक्षतु ॥ ५

॥ इतितृतीयस्याष्टमेषष्ठोवर्गः ॥ ६ ॥

अथषष्ठी–

नू॒रोद॑सी॒अहि॑नाबु॒ध्न्ये॑नस्तुवी॒तदे॑वी॒अप्ये॑भिरि॒ष्टैः ।
स॒मु॒द्रंन॒सं॒चर॑णेसनि॒ष्यवो॑घ॒र्मस्व॑रसोन॒द्यो॒३अप॑व्रन् ॥ ६ ॥

नु । रो॒द॒सी॒ इति॑ । अहि॑ना । बु॒ध्न्ये॑न । स्तु॒वी॒त । दे॒वी॒ इति॑ ।
अप्ये॑भिः । इ॒ष्टैः । स॒मु॒द्रम् । न । स॒म्ऽचर॑णे । स॒नि॒ष्यव॑ः ।
घ॒र्मऽस्व॑रसः । न॒द्य॑ः । अप॑ । व्र॒न् ॥ ६ ॥

हेरोदसी द्यावापृथिव्यौ युवां अहिनाबुध्न्येनअहिर्बुध्न्यनामकेनदेवेनसह नु क्षिप्रमप्येभिरापनीयैरिष्टैः कामैर्निमित्तभूतैःस्तुवीत स्तुवे सनिष्यवोधनानांसंभक्तुमिच्छन्तः संचरणेसंचाराय समुद्रमध्यगमनाय समुद्रंन समुद्रमिव तंयथास्तुवन्तितद्वत् यस्मादेतेदेवाः घर्मस्वरसोदीप्तध्वनयोनद्योनदीरपव्रन् अपवृण्वन्तीति परोक्षइव अथवा तेदेवानदीरपवृण्वन्त्वित्याशीः तस्मात्स्तुवइतिसंबन्धः ॥ ६ ॥

अथसप्तमी–

दे॒वैर्नो॑दे॒व्यदि॑ति॒र्निपा॑तुदे॒वस्त्रा॒तात्रा॑यता॒मप्र॑युच्छन् ।
न॒हिमि॒त्रस्य॒वरु॑णस्यधा॒सिमर्हा॑मसिप्र॒मियं॒सान्व॒ग्नेः ॥ ७ ॥

दे॒वैः । न॒ः । दे॒वी । अदि॑तिः । नि । पा॒तु॒ । दे॒वः । त्रा॒ता । त्रा॒य॒ता॒म् ।
अप्र॑ऽयुच्छन् । न॒हि । मि॒त्रस्य॑ । वरु॑णस्य । धा॒सिम् । अर्हा॑मसि ।
प्र॒ऽमिय॑म् । सानु॑ । अ॒ग्नेः ॥ ७ ॥

अदितिर्देवी अदीनादेवमाता देवैरन्यैर्मित्रादिभिःसहनोस्मान्निपातु पाळयतु तथा त्रातापाळकोदेवइन्द्रइत्यर्थः सोप्यप्रयुच्छन् अप्रमाद्यन् त्रायतां वयंच मित्रस्यवरुणस्याग्नेश्च सानुं समुच्छ्रितं धासिं अन्नं सोमादिळक्षणं प्रमियं हिंसितुंनह्यर्हामसि अर्हामः समर्थाभवामः किंत्वनुष्ठानेनसंवर्धितुमर्हामेत्यर्थः ॥ ७ ॥

अथाष्टमी–

अ॒ग्निरी॑शेवस॒व्य॑स्या॒ग्निर्म॒हःसौभ॑गस्य । तान्य॒स्मभ्यं॑रासते ॥८॥

Funding by IKS-MoE

अ॒ग्निः । ई॒शे॒ । व॒स॒व्यं॑स्य । अ॒ग्निः । म॒हः । सौभ॑गस्य । तानि॑ ।
अ॒स्मभ्यं॑म् । रा॒स॒ते॒ ॥ ८ ॥

अग्निर्देवोवसव्यस्य धनमूहस्येशेईष्टेदातुं तथाग्निर्महोमहतः सौभगस्य सुभगत्वस्यापीशे अतस्तानिधनानिसौभाग्यंचास्मभ्यं रासते ददातु ॥ ८ ॥

अथनवमी–

उषो॑मघो॒न्याव॑ह॒सूनृ॑ते॒वार्या॑पु॒रु । अ॒स्मभ्यं॑वाजिनीवति ॥ ९ ॥
उष॑ः । म॒घो॒नि॒ । आ । व॒ह॒ । सूनृ॑ते । वार्या॑ । पु॒रु । अ॒स्मभ्य॑म् ।
वा॒जि॒नी॒ऽव॒ति॒ ॥ ९ ॥

हेउषः हेमघोनि धनवति हेसूनृते प्रियसत्यरूपवागभिमानिनि हेवाजिनीवति अन्नवति देवि अस्मभ्यं वार्या वरणीयानि पुरु बहूनि धनानि आवह प्रापय ॥ ९ ॥

अथदशमी–

तत्सुनः॑सवि॒ताभगो॒वरु॑णोमि॒त्रोअ॑र्य॒मा । इन्द्रो॑नो॒राध॒सागं॑मत् ॥ १० ॥ ७ ॥
तत् । सु । न॒ः । स॒वि॒ता । भग॑ः । वरु॑णः । मि॒त्रः । अ॒र्य॒मा । इन्द्र॑ः ।
न॒ः । राध॑सा । आ । ग॒म॒त् ॥ १० ॥ ७ ॥

येनराधसा धनेनसह सवितामगोवरुणोमित्रोर्यमेन्द्रः प्रत्येकमागमदागच्छन्तियज्ञं तद्राधोधनं तेदेवानोस्मभ्यं सु सुष्ठु प्रयच्छन्तु इतिशेषः ॥ १० ॥

॥ इतितृतीयस्याष्टमेसप्तमोवर्गः ॥ ७ ॥

महीद्यावापृथिवीइतिसप्तर्चमेकादशंसूक्तं वामदेवस्यार्षं द्यावापृथिव्यं पूर्वंत्रिगायत्र्यंतंत्वित्युक्तत्वात्पंचम्याद्यास्तिस्रोगायत्र्यः शिष्टास्त्रिष्टुभः महीसप्तद्यावापृथिव्यमित्यनुक्रमणिका । व्यूळ्हेदशरात्रेपंचमेहनिवैश्वदेवशस्त्रेआदितश्चतुर्ऋचंद्यावापृथिव्यनिविद्धानीयं तथाचसूत्रं–महीद्यावापृथिवीइतिचतस्रऋभुर्विभ्वेति ।

तत्रप्रथमा–

म॒हीद्यावा॑पृथि॒वीइ॒हज्येष्ठे॑रु॒चाभ॑वतांशु॒चय॑द्भिर॒र्कैः ।
यत्सी॒ंवरि॑ष्ठेबृह॒तीवि॑मि॒न्वन्रु॒वद्धो॒क्षाप॑प्रथा॒नेभि॒रेवैः ॥ १ ॥

मही इति । द्यावापृथिवी इति । इह । ज्येष्ठे इति । रुचा ।
भवताम् । शुचयंतऽभिः । अर्कैः । यत् । सीम् । वरिष्ठे इति ।
बृहती इति । विऽमिन्वन् । रुवत् । ह । उक्षा । पप्रथानेभिः । एवैः ॥ १॥

इहयज्ञे मही महत्यौ ज्येष्ठे प्रशस्ये द्यावापृथिवी द्यावापृथिव्यौ रुचादीप्त्यायुक्ते शुचयद्भिर्दीपयद्भिरर्कैर्मंत्रैःसोमादिहविर्भिर्वायुक्तेभवतां यद्यस्मात्सींसर्वतोवरिष्ठेउरुतरेबृहती महत्यौद्यावापृथिव्यौ विमिन्वन्परिच्छिन्दन् स्थापयन्नुक्षा सेक्ता पर्जन्यः पप्रथानेभिः प्रथमानैरेवैर्गमनशीलैर्मरुद्भिर्मेघैर्वासह रुवत् रौति शब्दंकरोति हेतिपूरणः तस्माद्रुचाभवतामितिसंबन्धः ॥ १ ॥

अथद्वितीया—

देवीदेवेभिर्यजतेयजत्रैरमिनतीतस्थतुरुक्षमाणे ।
ऋतावरीअद्रुहादेवपुत्रेयज्ञस्यनेत्रीशुचयद्भिरर्कैः ॥ २ ॥

देवी इति । देवेभिः । यजते इति । यजत्रैः । अमिनती इति ।
तस्थतुः । उक्षमाणे इति । ऋतवरीइत्यृतऽवरी । अद्रुहा ।
देवपुत्रे इतिदेवऽपुत्रे । यज्ञस्य । नेत्री इति । शुचयंतऽभिः । अर्कैः ॥२॥

देवी देव्यौ यजते यष्टव्यौ अमिनती प्रजाअहिंसत्यौ उक्षमाणेसिंचत्यौ ऋतावरी ऋतवत्यौ अद्रुहा अद्रोग्ध्र्यौ द्रोहमकुर्वत्यौ देवपुत्रे देवोत्पादिक्यौ यज्ञस्यनेत्री निर्वाहयित्र्यौ द्यावापृथिव्यौ देवेभिर्देवैः यजत्रैःयष्टव्यैःसहिते शुचयद्भिः शोचयद्भिरर्कैः मंत्रैर्हविर्भिर्वायुक्तेतस्थतुः तिष्ठतः स्यातामित्यर्थः ॥ २ ॥

अथतृतीया—

सइत्स्वपाभुवनेष्वासयइमेद्यावापृथिवीजजान ।
उर्वीगभीरेरजसीसुमेकेअवंशेधीरःशच्यासमैरत् ॥ ३ ॥

सः । इत् । सुऽअपाः । भुवनेषु । आस । यः । इमे इति ।
द्यावापृथिवी इति । जजान । उर्वी इति । गभीरे इति । रजसी इति ।
सुमेके इति सुऽमेके । अवंशे । धीरः । शच्या । सम् । ऐरत् ॥ ३ ॥

सइत्सएव स्वपाः शोभनकर्मासन्भुवनेष्वास आस्ते यइमेद्यावापृथिवी द्यावापृथिव्यौ जजानोत्पादितवान् यश्चप्रजापतिः उर्वी उर्व्यौ विस्तीर्णे गभीरे अविचले सुमेके शोभनरूपे अवंशे उत्पत्तिरहिते अनाधारेवांतरिक्षेधीरोधीमान् शच्या कुशलकर्मणासमैरत् सम्यक्प्रेरितवान् सएवस्वपाइति ॥ ३ ॥

अथचतुर्थी–

नूरो॑दसीबृ॒हद्भि॑र्नो॒वरू॑थैः॒पत्नी॑वद्भिरि॒षय॑न्तीस॒जोषा॑ः ।
उ॒रू॒चीविश्वे॑यज॒ते॑निपा॑तंधि॒यास्या॑मर॒थ्य॑ःसदा॒साः ॥ ४ ॥

नु । रो॒द॒सी॒ इति॑ । बृ॒ह॒त्ऽभि॑ः । न॒ः । वरू॑थैः । पत्नी॑वत्ऽभिः ।
इ॒षय॑न्ती॒ इति॑ । स॒ऽजोषा॑ः । उ॒रू॒ची इति॑ । विश्वे॒ इति॑ । य॒ज॒ते इति॑ ।
नि । पा॒त॒म् । धि॒या । स्या॒म॒ । र॒थ्य॑ः । स॒दा॒ऽसाः ॥ ४ ॥

हेरोदसी द्यावापृथिव्यौ नु क्षिप्रं पत्नीवद्भिःपत्नीसहितैः बृहद्भिर्महद्भिः वरूथैर्गृहैर्धनैर्वा सहइषयन्ती अस्माकमन्नमिच्छन्त्यौ सजोषाः परस्परंसंगते उरूची उर्वंचने विश्वे व्याप्ते यजते यष्टव्ये सत्यौ नोस्मान्निपातं नितरांरक्षतं धियेत्यादिगतम् ॥ ४ ॥

प्रवामित्यादिगायत्रस्तृचोव्यूढेदशरात्रेवैश्वदेवशस्त्रेद्यावापृथिव्यनिविद्धानीयत्वेनप्रक्षेप्यः तथाचसूत्रं–प्रवांमहिद्यवीइतितृचाविति ।

अथपञ्चमी–

प्रवां॒महि॒द्यवी॑अ॒भ्युप॑स्तुतिं॑भरामहे । शुची॒उप॒प्रश॑स्तये ॥ ५ ॥

प्र । वा॒म् । महि॑ । द्यवी॒ इति॑ । अ॒भि । उप॑ऽस्तुतिम् । भ॒रा॒म॒हे॒ ।
शुची॒ इति॑ । उप॑ । प्रऽश॑स्तये ॥ ५ ॥

हेद्यावापृथिव्यौ द्यवी द्योतमाने वां युवाभ्यामुपस्तुतिं स्तोत्रं महि महत्प्रभूतं अभिप्रभरामहे प्रकर्षेणसंपादयामः शुचीशुद्धेयुवां प्रशस्तये प्रशंसितुं उप उपसर्गश्रुतेरुचितक्रियाध्याहारः उपगच्छामइतिशेषः ॥ ५ ॥

अथषष्ठी–

पु॒ना॒नेत॒न्वा॑मि॒थः॒स्वेन॒दक्षे॑णराजथः । ऊ॒ह्याथे॑स॒नादृ॒तम् ॥ ६ ॥

पुनाने इति । तन्वा । मिथः । स्वेन । दक्षेण । राजथः ।
ऊह्याथे इति । सनात् । ऋतम् ॥ ६ ॥

हेदेव्यौ तन्वा स्वकीययामूर्त्या स्वेनदक्षेणबलेनच मिथःप्रत्येकंपुनाने शोधयन्त्यौ यज्ञं यजमानंवा युवांराजथः ईशानेभवथः यद्वा तन्वा स्वस्वशरीरैकदेशेन मिथःपरस्परं पुनाने शोधयन्त्यौद्यौः स्वीयेनासारेणभुवं साच स्वकीयेनकार्श्येन चंद्रमसिस्थितेन दिवमितिविवेकः सनात्सदाकालं ऋतंयज्ञमूह्याथेवहथः ॥ ६ ॥

अथसप्तमी—

महीमित्रस्यसाधथस्तरन्तीपिप्रतीऋतम् । परियज्ञंनिषेदथुः ॥७॥८॥
मही इति । मित्रस्य । साधथः । तरन्ती इति । पिप्रती इति ।
ऋतम् । परि । यज्ञम् । नि । सेदथुः ॥ ७ ॥ ८ ॥

मही महत्यौ द्यावापृथिव्यौ मित्रस्य मित्रभूतस्य स्तोतुरभिमतंसाधथः साधयथः ऋतमन्नंतरन्ती तारयन्त्यौ पिप्रती पूरयन्त्यौ यज्ञंपरिपरितोनिषेदथुराश्रयथः ॥ ७ ॥

॥ इतितृतीयस्याष्टमेऽष्टमोवर्गः ॥ ८ ॥

क्षेत्रस्यपतिनेत्यष्टर्चंद्वादशंसूक्तंवामदेवस्यार्षं आद्याचतुर्थीषष्ठीसप्तम्योनुष्टुभः पंचमीपुरउष्णिक् आद्यश्चेत्पुरउष्णिगितिहितल्लक्षणं शिष्टास्तिस्रस्त्रिष्टुभः आद्यास्तिस्रः क्षेत्रपतिदेवताकाः चतुर्थीशुनाख्यदेवताका पंचम्यष्टम्यौशुनासीरदेवताके षष्ठीसप्तम्यौसीतादेवताके तथाचानुक्रमणिका—क्षेत्रस्याष्टौतिस्रःक्षैत्रपत्याःशुनायैकापरापुरउष्णिक्सात्यांचशुनासीराभ्यामुपांत्येसीतायैतेचानुष्टुभावाद्याश्चतुर्थीचेति । क्षेत्रकर्षणे अनेनसूक्तेनप्रत्यृचंजुहुयाज्जपेद्वा तथाचसूत्रितं—क्षेत्रस्यपतिनावयमितिप्रत्यृचंजुहुयाज्जपेद्वेति । अप्तोर्यामेहोतुरतिरिक्तोक्थे आश्विनशस्त्रादूर्ध्वंचत्वार्यतिरिक्तोक्थानि तत्राद्यापरिधानीया सूत्रितंच—क्षेत्रस्यपतिनावयमितिपरिधानीयेति ।

तत्रप्रथमा—

क्षेत्रस्यपतिनावयंहितेनेवजयामसि ।
गामश्वंपोषयित्न्वासनोमृळातीदृशे ॥ १ ॥

Funding by IKS-MoE

क्षेत्र॑स्य । पति॑ना । व॒यम् । हि॒तेन॑ऽइव । ज॒या॒म॒सि॒ । गाम् ।
अश्व॑म् । पो॒ष॒यि॒त्नु । आ । सः । नः॒ । मृ॒ळा॒ति॒ । ई॒दृशे॑ ॥ १ ॥

वयंयजमानाः क्षेत्रस्यपतिना देवेन रुद्रं क्षेत्रपतिंप्राहुः केचिदग्निं अथापरेस्वतंत्र एववाकश्चित्क्षेत्रस्यपतिरुच्यते हितेनेव इवशब्दएवार्थे सर्वप्राणिहितेनैवतेन अथवा मित्रेणेव यथासख्युःसाहाय्येसन्स्वकार्यंसाधयतितद्वत् जयामसि जयामः क्षेत्रं सदेवोगामश्वंचपोषयित्नु पोषयितृ गवाश्वलक्षणंधनं आहरत्विति शेषः उपसर्गश्रुतेर्योग्यक्रियाध्याहारः सएवदेवोनोस्मानीदृशे उक्तलक्षणेधने दातव्येसति मृळाति सुखयति अत्रक्षेत्रस्यपतिनेत्यादिनिरुक्तं[1]जानीयात् ॥ १ ॥

अप्तोर्यामेमैत्रावरुणस्यातिरिक्तोक्थेपरिधानीया सूत्रितंच—क्षेत्रस्यपतेमधुमन्तमूर्मिमितिपरिधानीयेति ।

सैषाद्वितीया—

क्षेत्र॑स्यपते॒मधु॑मन्तमू॒र्मिं॑धे॒नुरि॑व॒पयो॑अ॒स्मासु॑धुक्ष्व ।
म॒धु॒श्चुतं॑घृ॒तमि॑व॒सुपू॑तमृ॒तस्य॑नः॒पत॑योमृळयन्तु ॥ २ ॥

क्षेत्र॑स्य । प॒ते॒ । मधु॑ऽमन्तम् । ऊ॒र्मिम् । धे॒नुःऽइ॑व । पयः॑ ।
अ॒स्मासु॑ । धु॒क्ष्व॒ । म॒धु॒ऽश्चुत॑म् । घृ॒तम्ऽइ॑व । सुऽपू॑तम् ।
ऋ॒तस्य॑ । नः॒ । पत॑यः । मृ॒ळ॒य॒न्तु॒ ॥ २ ॥

हेक्षेत्रस्यपते त्वं मधुमन्तं माधुर्योपेतं ऊर्मिं प्रवृद्धमुदकं धेनुःपयइव सायथादुग्धे तथास्मासुधुक्ष्व मधुश्चुतं मधुस्राविसुपूतंघृतमिवेत्युपमा तादृशमुदकमित्यर्थः ऋतस्ययज्ञस्योदकस्यवापतयः स्वामिनोनोस्मान्मृळयन्तु सुखयन्तु यद्वा ऋतस्यैतत्कर्मणिषष्ठी ऋतंमृळयन्तुप्रयच्छन्तु मृच्छतिरत्रदानकर्मा ॥ २ ॥

ब्राह्मणाच्छंसिनोतिरिक्तोक्थेपरिधानीयैषा मधुमतीरोषधीर्द्यावआपइतिपरिधानीयेतिसूत्रितत्वात् ।

---

[1] नि० १०. १५. ।

सैषातृतीया—

मधु॑मती॒रोष॑धी॒र्द्याव॒आपो॒मधु॑मन्नोभवत्व॒न्तरि॑क्षम् ।
क्षेत्र॑स्य॒पति॒र्मधु॑मान्नोअ॒स्त्वरि॑ष्यन्तो॒अन्वे॑नंचरेम ॥ ३ ॥

मधु॑ऽमतीः । ओष॑धीः । द्याव॑ः । आप॑ः । मधु॑ऽमत् । न॒ः ।
भ॒व॒तु॒ । अ॒न्तरि॑क्षम् । क्षेत्र॑स्य । पति॑ः । मधु॑ऽमान् । न॒ः ।
अ॒स्तु॒ । अरि॑ष्यन्तः । अनु॑ । ए॒न॒म् । च॒रे॒म॒ ॥ ३ ॥

ओषधीरोषध्यः व्रीहिप्रियंग्वादयोनोस्मभ्यं मधुमतीर्मधुमत्योभवन्तु तथा द्यावः तिस्रोदिवइत्युक्तत्वाद्बहुवचनंयुक्तं तथाआपः अन्तरिक्षंच नोमधुमद्भवतु किंच क्षेत्रस्यपतिरपिमधुमान्नोअस्तु अरिष्यन्तः अन्यैरहिंस्यन्तः वयं एनं क्षेत्रपतिमन्वनुसृत्यचरेम संचरेम सुखेन ॥३॥

अथचतुर्थी—

शु॒नंवा॒हाःशु॒नंनर॑ःशु॒नंकृ॑षतु॒लाङ्ग॑लम् ।
शु॒नंव॑र॒त्राब॑ध्यन्तांशु॒नमष्ट्रा॒मुदि॑ङ्गय ॥ ४ ॥

शु॒नम् । वा॒हाः । शु॒नम् । नर॑ः । शु॒नम् । कृ॒ष॒तु॒ । लाङ्ग॑लम् । शु॒नम् ।
व॒र॒त्राः । ब॒ध्य॒न्ता॒म् । शु॒नम् । अष्ट्रा॑म् । उत् । इ॒ङ्ग॒य॒ ॥ ४ ॥

वाहाः बलीवर्दाः शुनं सुखनामैतत् सुखंयथाभवतितथावहन्त्वितिशेषः तथा नरोनेतारोमनुष्याः कर्षकाः शुनंकुर्वन्तु तथालांगलमपिशुनंकृषतु वरत्राः वरणेनत्रायमाणाःप्रग्रहाः शुनंबध्यन्तां अष्ट्रां प्रतोदं शुनमुदिंगय प्रेरय शुनाख्योवाय्विन्द्रयोरन्यतमःसुखकृद्देवःतदनुग्रहादेतत्सर्वंभवत्वितितस्यश्रुतिसामान्येनस्तुतिः ॥ ४ ॥

शुनासीरीयेपर्वणि शुनासीरदेवताकस्य हविषोनुवाक्यैषा अंत्याऋग्याज्या सूत्रितंच—शुनासीराविमांवाचंजुषेथांशुनंनःफालाविकृषंतुभूमिमिति ।

सैषापंचमी—

शुना॑सीरावि॒मांवाचं॑जुषेथां॒यद्दि॒विच॒क्रथु॒ःपय॑ः ।
तेने॒मामुप॑सिञ्चतम् ॥ ५ ॥

शुना॑सीरौ । इ॒माम् । वाच॑म् । जु॒षे॒था॒म् । यत् । दि॒वि ।
च॒क्रथुः॑ । पयः॑ । तेन॑ । इ॒माम् । उप॑ । सि॒ञ्च॒त॒म् ॥ ५ ॥

घुदेक्षःशुनदेवतेतिशौनकः अतःशुनइन्द्रः सीरोवायुः शुनोवायुःशुएत्यन्तरिक्षेसीरआदित्यःसरणादितियास्कः[1] । हे शुनासीरौ तौ युवां इमांवक्ष्यमाणांमदीयांवाचंजुषेथां सेवेथां यत्पयोदिविचक्रथुः तेनेमांभूमिमुपासिंचतम् ॥ ५ ॥

अथषष्ठी–

अ॒र्वाची॑सुभगेभव॒सीते॒वन्दा॑महेत्वा ।
यथा॑नःसु॒भगास॑सि॒यथा॑नःसु॒फलास॑सि ॥ ६ ॥

अ॒र्वाची॑ । सु॒ऽभ॒गे॒ । भ॒व॒ । सीते॑ । वन्दा॑महे । त्वा॒ । यथा॑ । नः॒ ।
सु॒ऽभगा॑ । अस॑सि । यथा॑ । नः॒ । सु॒ऽफला॑ । अस॑सि ॥ ६ ॥

हेसुभगे सीते त्वमर्वाची अर्वागंचनाभव त्वा त्वां वंदामहे स्तुवीमहि यथानःसुभगासति शोभनधनाभवसि यथानःसुफलासतितथावन्दामहे ॥ ६ ॥

अथसप्तमी–

इन्द्रः॒सीतां॒निगृ॑ह्णातु॒तांपू॒षानु॑यच्छतु ।
सानः॒पय॑स्वतीदुहा॒मुत्त॑रामुत्तरां॒समा॑म् ॥ ७ ॥

इन्द्रः॑ । सीता॑म् । नि । गृ॒ह्णा॒तु॒ । ताम् । पू॒षा । अनु॑ । य॒च्छ॒तु॒ ।
सा । नः॒ । पय॑स्वती । दु॒हा॒म् । उत्त॑राम्ऽउत्तराम् । समा॑म् ॥ ७ ॥

इन्द्रोदेवः सीतांसीताधारकाष्ठांनिगृह्णातु तांसीतांपूषादेवोनियच्छतु नियमयतु साद्यौःपयस्वतीउदकवतीदुहांदुह्यात् कदेतितदुच्यते उत्तरामुत्तरांसमांउत्तरमुत्तरंसंवत्सरम् ॥ ७ ॥

अस्याष्टम्याविनियोगःशुनासीराविमामित्यत्रोक्तः ।

अथाष्टमी–

शु॒नंन॒ःफाला॒विकृ॑षन्तु॒भूमिं॑शु॒नंकी॒नाशा॑अ॒भिय॑न्तुवा॒हैः ।
शु॒नंप॒र्जन्यो॒मधु॑ना॒पयो॑भिः॒शुना॑सीराशु॒नम॒स्मासु॑धत्तम् ॥८॥१॥

---

[1] नि० ९. ४०.।

शु॒नम् । न॒ः । फाला॑ः । वि । कृ॒ष॒न्तु॒ । भूमि॑म् । शु॒नम् । की॒नाशाः॑ ।
अ॒भि । य॒न्तु॒ । वा॒हैः॑ । शु॒नम् । प॒र्जन्यः॑ । मधु॑ना । पय॑ःऽभिः ।
शुना॑सीरा । शु॒नम् । अ॒स्मासु॑ । ध॒त्त॒म् ॥ ८ ॥ ९ ॥

नोभूमिंफालाः भूमिविदारककाष्ठाः शुनंविकृषन्तु शुनंयथाभवतितथाकीनाशाबलीवर्दरक्षकाः वाहैर्बलीवर्दैरभियन्तु अभिगच्छन्तु शुनंयथाभवतितथापर्जन्योमधुनामधुरैःपयोभिरुदकैःसिंचतु हेशुनासीरा इन्द्रवायू वाय्वादित्यौवा शुनंसुखमस्मासुधत्तंधारयतं ॥ ८ ॥

॥ इतितृतीयस्याष्टमेनवमोवर्गः ॥ ९ ॥

समुद्रादूर्मिरित्येकादशर्चंत्रयोदशंसूक्तं अंत्याजगती शिष्टास्त्रिष्टुभः अग्निसूर्यापूगोघृतानामन्यतमादेवता वामदेवऋषिः अत्रानुक्रमणिका—समुद्रादेकादशाग्नेयंजगत्यंतंसौर्यंवापंवागव्यंवाघृतस्तुतिर्वेति । विषुवतीदंसूक्तमाज्यं तथाचसूत्रं—समुद्रादूर्मिरित्याज्यंत्यंसुमेषमिति । व्यूळ्हेदशरात्रेसप्तमेहनिइदमेवसूक्तमाज्यं सूत्रितंच—अथच्छन्दोमाःसमुद्रादूर्मिरित्याज्यमिति ।

तत्रप्रथमा—

स॒मु॒द्रादू॒र्मिर्मधु॑माँ॒उदा॑र॒दुपां॒शुना॒सम॑मृ॒त॒त्वमा॑नट् ।
घृ॒तस्य॒नाम॒गुह्यं॒यदस्ति॑जि॒ह्वादे॒वाना॑म॒मृत॑स्य॒नाभिः॑ ॥ १ ॥

स॒मु॒द्रात् । ऊ॒र्मिः । मधु॑ऽमान् । उत् । आ॒र॒त् । उप॑ । अं॒शुना॑ । सम् ।
अ॒मृ॒त॒ऽत्वम् । आ॒न॒ट् । घृ॒तस्य॑ । नाम॑ । गुह्य॑म् । यत् । अस्ति॑ ।
जि॒ह्वा । दे॒वाना॑म् । अ॒मृत॑स्य । नाभिः॑ ॥ १ ॥

संमोदन्तेस्मिन्यजमानाइतिसमुद्रोग्निःपार्थिवः अथवा समुद्रवन्त्यापोस्मादितिव्युत्पत्त्या वैद्युतोग्निः तस्मादूर्मिः ऊर्मिवदुपर्युपर्युद्भूतोमधुमान्माधुर्योपेतफलसमूहः उदारत् उद्गच्छति अथवा वैद्युतादूर्म्युत्पादकोरसउदारदुद्भूतः अथवा समुद्रात्समुद्रवणसाधनादित्यादूर्मीरसउदकलक्षणउदारत् आदित्याज्जायतेवृष्टिरितिश्रुतेः। यद्वा समुद्रादुक्तव्युत्पत्तेरंतरिक्षादूर्मिरुदकमुदारत् अथवा समुद्रादुक्तलक्षणाद्गवामूधसःसकाशादूर्मिरुज्ज्वलःक्षीररसः एतद्धृतपक्षेपि समानं यद्यपिघृतंक्षीराज्जायते तथापि तस्योधसउत्पत्तेरेवमुपचर्यते शिष्टंवाक्यमग्न्यादिपंचसु पक्षेष्वपिसमानं अंशुनादीप्त्यांशेनवा अमृतत्वंमोक्षमुपसमानट् उपेतिपूरणः प्राप्नोतिनरः घृतस्यदीप्तस्यक्षरद्द्रव्यरूपस्यवा गुह्यंनाम गोपनीयं नमनसाधनंयदस्तितद्ब्रवीमि तद्देवानांजि-

Funding by IKS-MoE

ह्वा आस्वादकजिह्वास्थानीयंभवति तदेवामृतस्यनाभिर्बन्धकंभवति तदुभयंघृतस्यनामेत्यर्थः एवंसर्वमंत्रेषुतत्तत्पक्षानुसारेणयोज्यम् ॥ १ ॥

अथद्वितीया–

व॒यंनाम॒प्रब्र॑वामाघृ॒तस्या॒स्मिन्य॒ज्ञेधा॑रयामा॒नमो॑भिः ।
उप॑ब्र॒ह्माशृ॑णवच्छ॒स्यमा॑नं॒चतुः॑शृङ्गोवमीद्गौ॒रए॒तत् ॥ २ ॥

व॒यम् । नाम॑ । प्र । ब्र॒वा॒म॒ । घृ॒तस्य॑ । अ॒स्मिन् । य॒ज्ञे । धा॒र॒या॒म॒ ।
नमः॑ऽभिः । उप॑ । ब्र॒ह्मा । शृ॒ण॒व॒त् । श॒स्यमा॑नम् । चतुः॑ऽशृङ्गः ।
अ॒व॒मी॒त् । गौ॒रः । ए॒तत् ॥ २ ॥

वयंयजमानाः घृतस्यनाम प्रब्रवाम स्तुमः अस्मिन्यज्ञेनमोभिर्नमस्कारैर्हविर्भिर्वाधारयामच ब्रह्मापरिवृढोदेवःशस्यमानंस्तूयमानमिदमुपशृणवच्छृणुयात् चतुःशृंगः चत्वारिशृंगाणिवेदचतुष्टयरूपाणियस्यसःआदित्याग्निपक्षेएवंइतरेष्वपियास्कोक्तव्युत्पत्त्याशृंगशब्दोव्याख्येयः गौरोगौरवर्णः तादृशोदेवएतत्कर्मजगद्वा अवमीदुद्गिरति निर्वहतीत्यर्थः ॥ २ ॥

अथतृतीया–

च॒त्वारि॒शृङ्गा॒त्रयो॑अस्य॒पादा॒द्वेशी॒र्षेस॒प्तहस्ता॑सोअस्य ।
त्रिधा॑ब॒द्धोवृ॑ष॒भोरो॑रवीतिम॒होदे॒वोमर्त्याँ॒आवि॑वेश ॥ ३ ॥

च॒त्वारि॑ । शृङ्गा॑ । त्रयः॑ । अ॒स्य॒ । पादाः॑ । द्वे इति॑ । शी॒र्षे इति॑ ।
स॒प्त । हस्ता॑सः । अ॒स्य॒ । त्रि॒धा॑ । ब॒द्धः । वृ॒ष॒भः । रो॒र॒वी॒ति॒ ।
म॒हः । दे॒वः । मर्त्या॑न् । आ । वि॒वे॒श॒ ॥ ३ ॥

यद्यपिसूक्तस्याग्निसूर्यादिपंचदेवतात्मकत्वात्पंचधायंमंत्रोव्याख्येयः तथापि निरुक्ताद्युक्तनीत्या यज्ञात्मकाग्नेः सूर्यस्यचप्रकाशकत्वेनतत्परतयाव्याख्यायते—अस्ययज्ञात्मकस्याग्नेःचत्वारिशृंगा चत्वारोवेदाःशृंगस्थानीयाः यद्यप्यापस्तंबेनयज्ञंव्याख्यास्यामः सत्रिभिर्वेदैर्विधीयतइत्युक्तंतथाप्याथर्वणस्येतरानपेक्षयैवैकाग्निसाध्यानांकृत्स्नकर्मणांअभिधायकत्वात् तदपेक्षयाचत्वारिशृंगेत्युक्तं त्रयोअस्यपादाः सवनानित्रीण्यस्यपादाः प्रवृत्तिसाधनत्वात्पादाइत्युच्यन्ते द्वेशीर्षे ब्रह्मौदनंप्रवर्ग्यश्चइष्टिसोमप्राधान्येनेदमुक्तं सप्तहस्तासः सप्तच्छन्दांसिहस्तामुख्यसाधनं छंदांस्यपिदे-

वताप्रीणनस्यमुख्यसाधनमितिहस्तव्यवहारः त्रिधाबद्धः मंत्रब्राह्मणैस्त्रिप्रकारंबद्धः बन्धनमस्यतन्निष्पाद्यत्वात् वृषभः फलानांवर्षिता रोरवीति भृशंशब्दायते ऋग्यजुःसामोक्तैः शस्त्रयागस्तुतिरूपैः होत्राद्युत्पादितैर्ध्वनिभिः असौरौति एवंमहोदेवः एषयज्ञात्मामहानुभावोदेवः मर्त्यांनाविवेश मर्त्यैर्यजमानैर्निष्पाद्यत्वात् प्रवेशउपचर्यते अत्रयास्कः—[1]चत्वारिशृंगेतिवेदावाएतउक्ताइत्यादिनानिरवोचत्तदत्रानुसंधेयं । अथसूर्यपक्षेव्याख्यायते—अस्यादित्यस्यचत्वारिशृंगाणिचतस्रोदिशएताःश्रयणार्हत्वाच्छृंगाणीत्युपचर्यंते त्रयोअस्यपादाः त्रयोवेदाः पादस्थानीयाभवन्तिगमनसाधनत्वात् तथाहि [2]ऋग्भिःपूर्वाह्णेदिविदेवईयतेइत्युपक्रम्यवेदैरशून्यस्त्रिभिरेतिसूर्यः इतिहिवेदत्रयेणगतिराम्नाता द्वेशीर्षे अहश्चरात्रिश्चेतिद्वेशिरसी सप्तहस्तासोअस्य सप्तरश्मयः षड्विलक्षणाऋतवएकःसाधारणइतिसप्तहस्ताभवन्ति त्रिधाबद्धः त्रिषुस्थानेषुक्षित्यादिषु अग्न्याद्यात्मकत्वेनसंबद्धः ग्रीष्मवर्षाहेमन्ताख्यैस्त्रिभिस्त्रेधाबद्धोवा वृषभोवर्षिता रोरवीति शब्दंकरोतिवृष्ट्यादिद्वारा समहोमहान्देवोमर्त्यांनाविवेश तन्नियंतृतया सूर्यआत्माजगतस्तस्थुषश्चेतिहि[3]श्रुतं । एवमबादिपक्षेपियोज्यं शाब्दिकास्तुशब्दब्रह्मपरतयाचत्वारिशृंगेतिचत्वारिपदजातानिनामाख्यातेचोपसर्गनिपाताश्चेत्यादिनाव्याचक्षते अपरेत्वपरतया तत्सर्वंमन्त्रद्रष्टव्यम् ॥ ३ ॥

अथचतुर्थी—

त्रिधा॑हि॒तंप॒णिभि॑र्गु॒ह्यमा॑नं॒गवि॑दे॒वासो॑घृतमन्व॑विन्दन् ।
इन्द्र॒एकं॒सूर्य॒एकं॑जजानवे॒नादेकं॑स्व॒धया॒निष्टं॑तक्षुः ॥ ४ ॥

त्रिधा॑ । हि॒तम् । प॒णिऽभि॑ः । गु॒ह्यमा॑नम् । गवि॑ । दे॒वास॑ः । घृतम् ।
अनु॑ । अ॒वि॒न्द॒न् । इन्द्र॑ः । एक॑म् । सूर्य॑ः । एक॑म् । ज॒जा॒न॒ । वे॒नात् ।
एक॑म् । स्व॒धया॑ । निः । त॒त॒क्षुः ॥ ४ ॥

पणिभिरसुरैर्गवि गोषु त्रिधा क्षीरदध्याज्यभेदेनत्रिप्रकारंहितं निहितं गुह्यमानं गोपितं घृतं दीप्तं रसरूपंवाद्रव्यं देवासोदेवाःअन्वविन्दन्नलभन्त तत्रेन्द्रएकंक्षीरंजजानोदपादयत् सूर्यएकंजजानवेनात्कान्तिमतोग्नेर्गमनवतोवायोर्वैकंघृतं स्वधयान्नेननिमित्तेनद्रव्येणवासाधनेननिष्टतक्षुः निरपादयन्देवाः ॥ ४ ॥

---

१ नि० १३. ७. । २ तै० ब्रा० ३. १२. ९. । ३ ऋ. सं. १. ८७. ।

Funding by IKS-MoE

अथपंचमी—

ए॒ताअ॑र्षन्ति॒हृद्या॑त्समु॒द्राच्छ॒तव्र॑जारि॒पुणा॒नाव॒चक्षे॑ ।
घृ॒तस्य॒धारा॑अ॒भिचा॑कशीमिहि॒रण्ययो॑वेत॒सोमध्य॑आसाम् ॥५॥१०॥

ए॒ताः । अ॒र्ष॒न्ति॒ । हृद्या॑त् । स॒मु॒द्रात् । श॒तऽव्र॑जाः । रि॒पुणा॑ । न । अ॒व॒ऽचक्षे॑ । घृ॒तस्य॑ । धारा॑ः । अ॒भि । चा॒क॒शी॒मि॒ । हि॒र॒ण्ययः॑ । वे॒त॒सः । मध्ये॑ । आ॒सा॒म् ॥ ५ ॥ १० ॥

एताआपोघृतधारावा अर्षंत्यधःपतन्ति शतव्रजाः अपरिमितगतयः सत्यः हृद्यात् हृदयंगमात्समुद्रादन्तरिक्षात् रिपुणाजलमोकप्रतिबंधकारिणाशत्रुणावृत्रेणनावचक्षे नावदर्शनाययथाअदृष्टंभवतितथाअर्षन्ति ताघृतस्यधाराः अभिचाकशीमिअभिपश्यामि कुत्रेतितदुच्यते हिरण्ययोहिरणमयोवेतसः अप्सुंभवोग्निर्वैद्युतः आसामपांमध्येवर्ततइतिशेषः अत्रघृतस्यधारा-अभिचाकशीमीत्यनेनचरमपादेनहोमाधारोग्निर्वैद्युतोग्निरादित्योवोक्तः ॥ ५ ॥

॥ इतितृतीयस्यषष्ठेदशमोवर्गः ॥ १० ॥

अथषष्ठी—

स॒म्यक्स्र॑वन्तिस॒रितो॒नधेना॑अ॒न्तर्हृ॒दामन॑सापू॒यमा॑नाः ।
ए॒तेअ॑र्षन्त्यू॒र्मयो॑घृ॒तस्य॑मृ॒गाइ॑वक्षिप॒णोरीष॑माणाः ॥ ६ ॥

स॒म्यक् । स्र॒व॒न्ति॒ । स॒रितः॑ । न । धेनाः॑ । अ॒न्तः । हृ॒दा । मन॑सा । पू॒यमा॑नाः । ए॒ते । अ॒र्ष॒न्ति॒ । ऊ॒र्मयः॑ । घृ॒तस्य॑ । मृ॒गाःऽइ॑व । क्षि॒प॒णोः । ईष॑माणाः ॥ ६ ॥

अस्याग्नेरुपरिसम्यक्स्रवन्ति क्षरन्ति घृतधाराः किमिव सरितोनधेनाः प्रीणयित्र्योनद्यइव किंच अन्तर्हृदामनसा हृदयमध्यगतेनचित्तेन भावनासचिवेनेतियावत् तेनपूयमानाः शुद्धीकृताः किंतदेवोच्यते—एतेघृतस्योर्मयोरसाअर्षन्तिगच्छन्ति जुह्वाःसकाशादग्नेरुपरिपतन्ति किमिव क्षिपणोःक्षेपकाद्व्याधादीषमाणाः पलायमानामृगाइव तेयथा कक्षंप्रविशन्ति तद्वत् अनेनशैघ्र्यमुक्तंभवति ॥ ६ ॥

Funding by IKS-MoE

अथसप्तमी–

सिन्धो॑रिवप्राध्व॒नेशू॑घ॒नासो॒वात॑प्रमियःपतयन्तिय॒ह्वाः ।
घृ॒तस्य॒धारा॑अरु॒षोनवा॒जीकाष्ठा॑भि॒न्दन्नू॒र्मिभि॒ःपिन्व॑मानः ॥ ७ ॥

सिन्धोः॑ऽइव । प्र॒ऽअ॒ध्व॒ने । शू॒घ॒नासः॑ । वात॑ऽप्रमियः । प॒त॒य॒न्ति॒ ।
य॒ह्वाः । घृ॒तस्य॑ । धाराः॑ । अ॒रु॒षः । न । वा॒जी । काष्ठाः॑ । भि॒न्दन् ।
ऊ॒र्मिऽभिः॑ । पिन्व॑मानः ॥ ७ ॥

सिन्धोःस्यन्दमानायानद्याःसकाशादिव उदकानीव प्राध्वनेप्रवणवतिदेशे शूघनासः आशुगंत्र्यः आशुइतिचशुइतिचक्षिप्रनामनीभवतइतिनिरुक्तम्[1] । वातप्रमियः वायुवत्प्रकृष्टवेगाः यह्वाःमहत्योघृतस्यधाराःपतयन्ति गच्छन्ति अग्नेरुपरि घृतमुदकमितिपक्षेसिन्धोरिवेत्यत्रेवशब्दोनर्थकः स्यन्दनसाधनादन्तरिक्षादुक्तलक्षणाघृतधाराउदकधाराःपतयन्ति गच्छन्ति भूमौ किंच घृतसंस्त्यायःकाष्ठाःमर्यादाभूतान्परिधीन्भिन्दन्नूर्मिभीरसैःपिन्वमानोवर्धमानोभवति उदकमितिपक्षेकाष्ठाक्रान्त्वास्थितादिशोभिन्दन्नूर्मिभिस्तरंगैःपिन्वमानोभवति तत्रदृष्टान्तः—अरुषोनवाजी आरोचमानोगर्वेणगमनशीलोश्वइव सयथाकाष्ठाभिन्दन्पिन्वमानश्चभवतितद्वत् ॥७॥

अथाष्टमी–

अ॒भिप्र॑वन्त॒सम॑नेव॒योषाः॑कल्या॒ण्यः१॒॑स्मय॑मानासोअ॒ग्निम् ।
घृ॒तस्य॒धाराः॑स॒मिधो॑नसन्त॒ताजु॑षा॒णोह॑र्यतिजा॒तवे॑दाः ॥ ८ ॥

अ॒भि । प्र॒व॒न्त॒ । सम॑नाऽइव । योषाः॑ । क॒ल्या॒ण्यः॑ । स्मय॑मानासः ।
अ॒ग्निम् । घृ॒तस्य॑ । धाराः॑ । स॒म्ऽइधः॑ । न॒स॒न्त॒ । ताः । जु॒षा॒णः ।
ह॒र्य॒ति॒ । जा॒तऽवे॑दाः ॥ ८ ॥

घृतस्यधाराः अमुमग्निंसमनेव समानमनस्कायोषायोषितःपतिमिवाभिप्रवन्त अभिनमयन्ति निमग्नंकुर्वन्ति कीदृश्यस्ताः कल्याण्योभद्ररूपाः स्मयमानासोहसन्त्यः किंच ताः समिधःसम्यग्दीपयित्र्यःसत्योनसंत व्याप्नुवन्ति ताएवधाराजुषाणःप्रीयमाणःसेवमानोवाअयं जातवेदाः हर्यति कामयते घृतशब्दस्योदकमितिपक्षे अग्निजातवेदःशब्दाभ्यांवैद्युतोग्निरादित्योवागृह्यते तंदेवमुदकधाराअभिप्रवन्त नसंतच सचताःहर्यतीति ॥ ८ ॥

---

[1] नि० ६. १. ।

Funding by IKS-MoE

अथनवमी–

कन्याइववहतुमेतवाउअंज्यआनाअभिचाकशीमि।
यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितत्पवन्ते॥ ९॥

कन्याःऽइव। वहतुम्। एतवै। ऊँ इति। अञ्जि। अञ्जानाः।
अभि। चाकशीमि। यत्र। सोमः। सूयते। यत्र। यज्ञः। घृतस्य।
धाराः। अभि। तत्। पवन्ते॥ ९॥

कन्याइव अनूढाबालिकाः तायथावहतुंउद्वाहंप्राप्तुं एतवै एतुंपतिंगन्तुं अंजि अंजकमाभरणंतेजोवाअंजानाऽव्यंजयन्त्यःएवंकुर्वन्त्यः कन्याइव स्वभर्तृभूतंअध्वरंवैद्युतंवाग्निमादित्यंवावहतुमेतुंअंजिऽव्यंजकंतदीयंरूपमंजानाः ऽव्यंजयन्त्योतादृशीर्घृतस्यधाराः अभिचाकशीम्यभिपश्यामि घृतेनोदकेनचभौमस्यवैद्युतस्यचाग्नेःप्रज्वलनंप्रसिद्धं किंच ताधाराः यत्रसोमः सूयते यत्रचेतरोयज्ञस्तायतेतत्तंयज्ञमभिलक्ष्यपवन्ते उपगच्छन्तिखलु॥ ९॥

अथदशमी–

अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त।
इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवन्ते॥ १०॥

अभि। अर्षत। सुऽस्तुतिम्। गव्यम्। आजिम्। अस्मासु।
भद्रा। द्रविणानि। धत्त। इमम्। यज्ञम्। नयत। देवता।
नः। घृतस्य। धाराः। मधुऽमत्। पवन्ते॥ १०॥

हेमदीयाऋत्विजः गव्यं गोसमूहरूपं गोसंबन्धिनंवा आजिं संघातमभ्यर्षत अभिगच्छन्त अभिगमयतवा सुष्टुतिंशोभनांस्तुतिं अत्रगोशब्देन उदकानिगावोवोच्यन्ते तत्संघातोभिप्रेतः अस्मासुयजमानेषु भद्रा स्तुत्यानि द्रविणानि धत्त धारयत स्तुत्याखलुफलंलप्स्यते किंच नोस्मदीयमिमंयज्ञंदेवता अत्रयष्टव्यान्देवान्नयत प्रापयत घृतस्यधाराः मधुमद्यथातथापवन्तगच्छन्ति॥ १०॥

धामन्तइत्येषाउत्तरसूक्तस्याद्यावाध्यायोत्सर्जनोपाकरणयोर्विनियुक्ते धामन्तेविश्वमिति-प्रतीकमुक्त्वातदन्तेइतिद्वचाइतिसूत्रितत्वात्।

सैषैकादशी–

धाम॑न्ते॒विश्वं॒भुव॑न॒मधि॑श्रि॒तम॒न्तःस॑मु॒द्रेहृ॒द्य१॒॑न्तरायु॑षि ।
अ॒पामनी॑केस॒मि॒थेयआभृ॑त॒स्तम॑श्याम॒मधु॑मन्तंतऊ॒र्मिम् ॥११॥११॥

धाम॑न् । ते॒ । विश्व॑म् । भुव॑नम् । अधि॑ । श्रि॒तम् । अ॒न्तरिति॑ ।
स॒मु॒द्रे । हृ॒दि । अ॒न्तः । आयु॑षि । अ॒पाम् । अनी॑के । स॒म्ऽइ॒थे । यः ।
आऽभृ॑तः । तम् । अ॒श्या॒म॒ । मधु॑ऽमन्तम् । ते॒ । ऊ॒र्मिम् ॥ ११ ॥ ११ ॥

तेत्वदीयेधामन्धामनि तेजःस्थाने विश्वंभुवनं कृत्स्नंभूतजातमधिश्रितं तदपिचधामकुत्रकुत्रास्तइत्युच्यते अन्तःसमुद्रे वडवाग्नित्वेनांतरिक्षस्यमध्ये सूर्यमंडलत्वेन हृद्यन्तः सर्वप्राणिनांहृदयेवैश्वानरत्वेनायुष्यन्नेसर्वप्राण्याहारत्वेन यद्वा आयुषीत्येतत्हृद्विशेषणं जठराग्निनाखल्वायुर्ध्रियते अपामनीके उदकसंस्त्यायेवैद्युताग्नित्वेनसमिथेसंग्रामेच शौर्याग्निरूपेण एवं सर्वेषुस्थानेषु वर्तमानं धाम तस्मिन्धामनि यऊर्मिः घृतरूपउदकरूपोवारसआभृतः आहृतः स्थापितः तेत्वदीयं रसंअश्याम व्याप्नुयाम ॥ ११ ॥

॥ इतितृतीयस्याष्टमेएकादशोवर्गः ॥ ११ ॥

॥ इतिचतुर्थेमंडलेपंचमोनुवाकः ॥ ५ ॥

इत्थंश्रीबुक्कभूपालसाम्राज्यैकधुरंधरः ॥ विद्यातीर्थगुरोर्दृष्ट्याप्राप्तसर्वज्ञवैभवः ॥ १ ॥
श्रीमत्सायणमंत्रीशःसकलागमतत्त्ववित् ॥ दाशतय्यांमाधवीयवेदार्थस्यप्रकाशने ॥२॥
चतुर्थमंडलंसम्यक्वामदेवेनवीक्षितं ॥ अष्टोत्तरैस्तुपंचाशत्सूक्तैःपंचशतैरपि ॥ ३ ॥
एकोनयानवत्याचयुक्तैर्मंत्रैश्चसंमितं ॥ व्याकार्षीत्सुखबोधार्थंपश्यतैतद्विमत्सराः ॥ ४ ॥

॥ इतिवामदेवंचतुर्थमण्डलंसमाप्तम् ॥ ४ ॥

Funding by IKS-MoE

॥श्रीगणेशायनमः॥

आत्रेयेपंचमेमंडलेषडनुवाकाः तत्रप्रथमेनुवाकेचतुर्दशसूक्तानि तत्राबोध्यग्निरितिद्वादशर्चंप्रथमंसूक्तं अत्रेयमनुक्रमणिका—अबोधिद्वादशबुधगविष्ठिराविति । पंचमेमंडलेनुक्तगोत्रमात्रेयंविद्यादितिपरिभाषितत्वादात्रेयौबुधगविष्ठिरावृषी अनादेशपरिभाषयात्रिष्टुप् मंडलादिपरिभाषयाग्निर्देवता प्रातरनुवाकेआग्नेयेक्रतौत्रैष्टुभेछन्दसिआश्विनशस्त्रेचैतदादिचत्वारिसूक्तानि तथाचसूत्रितं—अबोध्यग्निःसमिधेतिचत्वारीति । अध्यायोत्सर्जनोपाकरणयोर्धामन्तेविश्वमितिद्वचत्वेनविनियोगउक्तः ।

तत्रप्रथमा—

अबो॑ध्य॒ग्निःस॒मिधा॒जना॑नां॒प्रति॑धे॒नुमि॑वाय॒तीमु॒षास॑म् ।
य॒ह्वाइ॑व॒प्रव॒यामु॒ज्जिहा॑ना॒ःप्रभा॒नवः॑सिस्रते॒नाक॒मच्छ॑ ॥ १ ॥

अबो॑धि । अ॒ग्निः । स॒म्ऽइधा॑ । जना॑नाम् । प्रति॑ । धे॒नुम्ऽइ॑व ।
आ॒ऽय॒तीम् । उ॒षस॑म् । य॒ह्वाःऽइ॑व । प्र । व॒याम् । उ॒त्ऽजिहा॑नाः ।
प्र । भा॒नवः॑ । सि॒स्र॒ते॒ । नाक॑म् । अच्छ॑ ॥ १ ॥

अयमग्निर्जनानामध्वर्य्वादीनांसमिधासमिद्भिरबोधिप्रबुद्धोभूत् धेनुमिव अग्निहोत्रार्थं धेनुंप्रतियथाप्रातर्बुध्यतेतद्वत् आयतीमागच्छन्तीमुषसंप्रति उषःकालेइत्यर्थः अथप्रबुद्धस्याग्नेर्भानवोज्वालायह्वाः महान्तोवयांशाखांप्रोज्जिहानाः प्रोद्गमयन्तोवृक्षाइव प्रोज्जिहानाः स्वाधिष्ठानंत्यजन्तोनाकमन्तरिक्षं अच्छाभिमुख्येनप्रसिस्रतेप्रसरन्ति ॥ १ ॥

अथद्वितीया—

अबो॑धि॒होता॑य॒जथा॑यदे॒वानू॒र्ध्वो॑अ॒ग्निःसु॒मनाः॑प्रा॒तर॑स्थात् ।
समि॑द्धस्य॒रुश॑ददर्शि॒पाजो॑म॒हान्दे॒वस्तम॑सो॒निर॑मोचि ॥ २ ॥

Funding by IKS-MoE

अबो॑धि । होता॑ । य॒जथा॑य । दे॒वान् । ऊ॒र्ध्वः । अ॒ग्निः ।
सु॒ऽमनाः॑ । प्रा॒तः । अ॒स्था॒त् । सम्ऽइ॑द्धस्य । रुश॑त् । अ॒द॒र्शि॒ ।
पाजः॑ । म॒हान् । दे॒वः । तम॑सः । निः । अ॒मो॒चि॒ ॥ २ ॥

अयंहोताहोमनिष्पादकोग्निः देवान्यष्टव्यान्यजथाय यष्टुंअबोधि बुध्यते सोग्निःप्रातःकालेसुमनाःशोभनमनस्कःयजमानानुग्रहबुद्धिःसन् ऊर्ध्वोस्थात् उत्तिष्ठति समिद्धस्यास्यरुशद्रोचमानंपाजोबलंज्वालालक्षणमदर्शि दृश्यते अथ तथाभूतोमहान्देवस्तमसोंधकारान्निरमोचि निर्मुक्तोभूत् ॥ २ ॥

अथतृतीया—

यदीं॑ग॒णस्य॑रश॒नामजी॑ग॒ःशुचि॑रंक्ते॒शुचि॑भि॒र्गोभि॑र॒ग्निः ।
आद्दक्षि॑णायुज्यतेवाज॒यन्त्यु॑त्ता॒नामू॒र्ध्वो॑अंधयज्जु॒हूभिः॑ ॥ ३ ॥

यत् । ई॒म् । ग॒णस्य॑ । र॒श॒नाम् । अजी॑ग॒रिति॑ । शुचिः॑ । अ॒ङ्क्ते॒ ।
शुचि॑ऽभिः । गोभिः॑ । अ॒ग्निः । आत् । दक्षि॑णा । यु॒ज्य॒ते॒ ।
वा॒ज॒ऽयन्ती॑ । उ॒त्ता॒नाम् । ऊ॒र्ध्वः । अ॒ध॒य॒त् । जु॒हूभिः॑ ॥ ३ ॥

यद्यदा ईमयमग्निर्गणस्यसंघातमकस्यजगतः रशनांरज्जुरिव व्यापारप्रतिबन्धकंतमः अजीगः गिरति गृह्णातिवा समिद्धोग्निर्भवतीत्यर्थः तदा शुचिर्दीप्तोग्निः शुचिभिर्गोभिर्दीप्तैरश्मिभिः अंक्ते व्यनक्ति विश्वंजगत् आदनन्तरमेवदक्षिणाप्रवृद्धावाजयन्ती अन्नमिच्छन्ती आज्यधारायुज्यतेयुक्ताभवति अथवा दक्षिणाप्रवृद्धाज्यधारायुज्यते तांचधारामुत्तानां ऊर्ध्वंतानामुपरिविस्तृतां ऊर्ध्वउन्नतःसन् जुहूभिरधयत् पिबति ॥ ३ ॥

अथचतुर्थी—

अ॒ग्निमच्छा॑देव॒यतां॑मनां॑सि॒चक्षूं॑षीव॒सूर्ये॒सञ्च॑रन्ति ।
यदीं॒सुवा॑तेउ॒षसा॒विरू॑पे॒श्वे॒तोवा॒जीजा॑यते॒अग्रे॒अह्ना॑म् ॥ ४ ॥

अ॒ग्निम् । अच्छ॑ । दे॒व॒ऽय॒ताम् । मनां॑सि । चक्षूं॑षिऽइव । सूर्ये॑ । सम् ।
च॒र॒न्ति॒ । यत् । ई॒म् । सु॒वाते॒ इति॑ । उ॒षसा॑ । विरू॑पे॒इति॒विऽरू॑पे ।
श्वे॒तः । वा॒जी । जा॒य॒ते॒ । अग्रे॑ । अह्ना॑म् ॥ ४ ॥

Funding by IKS-MoE

अग्निमच्छ अग्निंदेवं आभिमुख्येन देवयतांदेवानात्मनइच्छतांयजमानानांमनांसि संचरन्ति देवायष्टव्यास्तदर्थं कदायंवर्धिष्यतीतिध्यायन्तीत्यर्थः चक्षूंषीव सर्वेषांप्राणिनां यथासूर्येसंचरन्तितद्वत् यद्यदाईमेनमग्निमुषसासह विरूपे द्यावापृथिव्यौ सुवाते जनयतः तदानींश्वेतः प्रकृष्टवर्णोपेतोवाजीवेजनवानग्निरह्नामग्रेप्रातःकाले जायते उत्पद्यते प्रवर्धतइत्यर्थः ॥ ४ ॥

अथपंचमी—

जनिष्ट॒हिजेन्यो॒अग्रे॒अह्नां॑हि॒तोहि॒तेष्व॑रु॒षोवने॑षु ।
दमे॑दमेस॒प्तरत्ना॒दधा॑नो॒ग्निर्होता॒निष॑सादा॒यजी॑यान् ॥ ५ ॥

जनिष्ट । हि । जेन्य॑ः । अग्रे॑ । अह्ना॑म् । हि॒तः । हि॒तेषु॑ । अ॒रु॒षः ।
वने॑षु । दमे॑ऽदमे । स॒प्त । रत्ना॑ । दधा॑नः । अ॒ग्निः । होता॑ ।
नि । स॒सा॒द॒ । यजी॑यान् ॥ ५ ॥

अयमग्निर्जेन्यः उत्पादनीयः अह्नामग्रे उदयकाले जनिष्ट प्रादुरभूत् पश्चात् हि तेषुसवनेषुवनोत्थेषुकाष्ठेषु अरुषआरोचमानःसन् हितः स्थापितः पश्चाद्दमेदमे तत्तद्यागगृहे सप्तरत्नारमणीयाः सप्तज्वालाः दधानोधारयमाणः अथवा यजमानेभ्यः सप्तविधानिरत्नानिदधानोग्निर्होताहोमनिष्पादकः सन् यजीयान्यष्टव्यःसन्निषसाद निषण्णोभवति ॥ ५ ॥

जीवतियजमानेमृतइतिशब्दोयदिस्यात्तदानींसुरभिमतीष्टिःकार्या तत्रेयमनुवाक्या सूत्रितंच—अग्निर्होतान्यसीदद्यजीयान्साध्वीमकर्देववीतिंनोअद्येति ।

सैषाषष्ठी—

अ॒ग्निर्होता॒न्य॑सीद॒द्यजी॑यानु॒पस्थे॑मा॒तुःसु॑र॒भाउ॑ल्लोके ।
युवा॑क॒विःपु॑रुनि॒ःष्ठऋ॒तावा॑ध॒र्ता॑कृ॒ष्टी॒ना॒मु॒तमध्य॑इ॒द्धः ॥ ६ ॥ १२ ॥

अ॒ग्निः । होता॑ । नि । अ॒सी॒द॒त् । यजी॑यान् । उ॒पऽस्थे॑ । मा॒तुः ।
सु॒र॒भौ । ऊँ इति॑ । लो॒के॑ । युवा॑ । क॒विः । पु॒रु॒नि॒ःऽस्थः ।
ऋ॒तऽवा॑ । ध॒र्ता । कृ॒ष्टी॒नाम् । उ॒त । मध्ये॑ । इ॒द्धः ॥ ६ ॥ १२ ॥

अयमग्निर्होताहोमनिष्पादकः यजीयान्यष्टव्यश्चसन् न्यसीदत् निषसाद कुत्रेतितदुच्यते—मातुःसर्वस्यनिर्मातुर्भूम्याउपस्थेउत्संगेतत्रापिसुरभौ आज्यादिसौरभ्ययुक्तेलोकेसर्वैर्द्रष्टव्ये स्थाने वेदिलक्षणे उतापिच युवा नित्यतरुणः सर्वत्रमिश्रितोवा कविर्मेधावी पुरुनिष्ठः बहुस्थानः ऋतावा यज्ञवान् धर्ता सर्वस्यधारकः एवंभूतः सन्कृष्टीनामृत्विग्यजमानानांमध्ये इद्धः दीप्तः सन्वर्ततइतिशेषः ॥ ६ ॥

॥ इतितृतीयस्याष्टमेद्वादशोवर्गः ॥ १२ ॥

अथसप्तमी—

प्रणुत्यंविप्र॑मध्व॒रेषु॑सा॒धुम॒ग्निंहोता॑रमीळते॒नमो॑भिः ।
आयस्त॒तान॒रोद॑सीऋ॒तेन॒नित्यं॑मृजन्तिवा॒जिनं॑घृ॒तेन॑ ॥ ७ ॥

प्र । नु । त्यम् । विप्र॑म् । अ॒ध्व॒रेषु॑ । सा॒धुम् । अ॒ग्निम् । होता॑रम् । ई॒ळ॒ते॒ । नमः॑ऽभिः । आ । यः । त॒तान॑ । रोद॑सी॒ इति॑ । ऋ॒तेन॑ । नित्य॑म् । मृ॒ज॒न्ति॒ । वा॒जिन॑म् । घृ॒तेन॑ ॥ ७ ॥

त्यंतमग्निंनमोभिःस्तुतिभिर्नुक्षिप्रं ईळते स्तुवन्ति कीदृशंतं विप्रं मेधाविनमध्वरेषुसाधुं फलसाधकं होतारं होमनिष्पादकं योदेवोरोदसीद्यावापृथिव्यौ ऋतेनोदकेन ततान विस्तारितवान् अग्नौप्रास्ताहुतेरादित्यद्वारावृष्ट्युत्पादकत्वात् अथवा ऋतेनसत्यभूतेनहविषा दिवं तथाभूतेनवृष्ट्यादिफलेनभुवंचाततान वाजिनमन्नवन्तंदेवंयजमानाः नित्यंघृतेनोदकेनाज्येनवामृजन्ति परिचरन्ति ॥ ७ ॥

अथाष्टमी—

मा॒र्जा॒ल्यो॑मृज्यते॒स्वेदमू॑नाःकविप्रश॒स्तोअति॑थिःशि॒वोनः॑ ।
स॒हस्र॑शृङ्गोवृष॒भस्तदो॑जा॒विश्वाँ॑अग्ने॒सह॑सा॒प्रास्य॒न्यान् ॥ ८ ॥

मा॒र्जा॒ल्यः॑ । मृ॒ज्य॒ते॒ । स्वे । दमू॑नाः । क॒वि॒ऽप्र॒श॒स्तः । अति॑थिः । शि॒वः । न॒ः । स॒हस्र॑ऽशृङ्गः । वृ॒ष॒भः । तत्ऽओ॑जाः । विश्वा॑न् । अ॒ग्ने॒ । सह॑सा । प्र । अ॒सि॒ । अ॒न्यान् ॥ ८ ॥

मार्जाल्यः संमार्जनीयोयमग्निः मृज्यतेपरिचर्यतेस्वेस्वकीयेस्थाने कीदृशोयं दमूनादानमनादान्तमनावाकविप्रशस्तः कविभिर्मेधाविभिःप्रशस्तः प्रकर्षेणस्तुत्यः नोस्माकमतिथिरतिथिवत्पूज्यः शिवः सुखकरश्च सहस्रशृंगोपरिमितज्वालः वृषभोवर्षिताफलानां तदोजाः यत्प्रसिद्धंबलंतेजोवास्तितदेवौजोयस्यतादृशः सर्वबलस्वरूपइत्यर्थः अथप्रत्यक्षवादः हेअग्ने विश्वान्यान्स्वव्यतिरिक्तान्सर्वान्सहसाबलेनप्रासि प्रेतिपरेत्यर्थे पराभवसि व्याप्तुंवाप्रभवसि ॥ ८ ॥

अथनवमी–

प्रस॒द्योअ॑ग्ने॒अत्ये॑ष्य॒न्याना॒विर्यस्मै॒चारु॑तमोब॒भूथ॑ ।
ई॒ळेन्यो॑वपु॒ष्यो॑वि॒भावा॑प्रि॒योवि॒शामति॑थि॒र्मानु॑षीणाम् ॥ ३ ॥

प्र । स॒द्यः । अ॒ग्ने॒ । अति॑ । ए॒षि॒ । अ॒न्यान् । आ॒विः । यस्मै॑ ।
चारु॑ऽतमः । ब॒भूथ॑ । ई॒ळेन्य॑ः । व॒पुष्य॑ः । वि॒भाऽवा॑ । प्रि॒यः ।
वि॒शाम् । अति॑थिः । मानु॑षीणाम् ॥ ९ ॥

हेअग्ने त्वंयज्ञमासाद्य सद्यस्तदानीमेवान्यान्स्वसमानान् अत्येषि अतिक्रामसि यस्मै चारुतमःसन् आविर्बभूथ किंच त्वमीळेन्यस्तुत्योवपुष्योवपुष्करोदीप्तिकरोवा विभावा विशिष्टदीप्तिमान्प्रियः प्रियभूतोविशांसर्वेषांप्राणिनां तथाअतिथिः पूज्योमानुषीणांप्रजानां भवसि ॥ ९ ॥

अथदशमी–

तुभ्यं॑भरं॑तिक्षि॒तयो॑यविष्ठब॒लिम॑ग्ने॒अन्ति॑त॒ओतदू॒रात् ।
आभन्दि॑ष्ठस्यसुम॒तिंचि॑किद्धिबृ॒हत्ते॑अग्ने॒महि॒शर्म॑भ॒द्रम् ॥ १० ॥

तुभ्य॑म् । भ॒र॒न्ति॒ । क्षि॒तय॑ः । य॒वि॒ष्ठ॒ । ब॒लिम् । अ॒ग्ने॒ । अन्ति॑तः ।
आ । उ॒त । दू॒रात् । आ । भन्दि॑ष्ठस्य । सु॒ऽम॒तिम् । चि॒कि॒द्धि॒ ।
बृ॒हत् । ते॒ । अ॒ग्ने॒ । महि॑ । शर्म॑ । भ॒द्रम् ॥ १० ॥

हेयविष्ठ युवतमाग्ने तुभ्यं क्षितयोमनुष्याभरन्ति संपादयंति किंबलिंपूजांहविर्लक्षणां अन्तितोअन्तिकात् उतापिच दूरात् आइतिचार्थे किंच भंदिष्ठस्य अतिशयेनस्तोतुः सुमतिंस्तुतिमाचिकिद्धि आजानीहि हेअग्ने ते तव शर्मसुखमस्मभ्यंदातव्यंबृहन्महद्भद्रंस्तुत्यंच ॥ १० ॥

Funding by IKS-MoE

अथैकादशी–

आद्यरथं॑भानुमोभानु॒मन्त॒मग्ने॒तिष्ठ॑यज॒तेभि॒ःसम॑न्तम् ।
वि॒द्वान्प॑थी॒नामु॒र्व॑१॒न्तरि॑क्ष॒मेहदे॒वान्ह॑वि॒रद्या॑यवक्षि ॥ ११ ॥

आ । अ॒द्य । रथ॑म् । भा॒नु॒ऽम॒ः । भा॒नु॒ऽमन्त॑म् । अग्ने॑ । तिष्ठ॑ ।
य॒ज॒तेभि॑ः । सम्ऽअ॑न्तम् । वि॒द्वान् । प॒थी॒नाम् । उ॒रु । अ॒न्तरि॑क्षम् ।
आ । इ॒ह । दे॒वान् । ह॒वि॒ःऽअद्या॑य । व॒क्षि॒ ॥ ११ ॥

हेभानुमोदीप्तिमन्नग्ने अद्यास्मिन्यागदिने भानुमन्तं दीप्तिमन्तं समन्तं समीचीनप्रान्तोपेतं रथं यजतेभिर्यष्टव्यैर्देवैःसहातिष्ठारोह विद्वान्यष्टव्यदेवपरिज्ञानवांस्त्वं पथीनां देवयजनमार्गान्प्रति द्वितीयार्थेषष्ठी उर्वन्तरिक्षंप्रभूतेन्तरिक्षे देवान्यष्टव्यान्हविरद्याय हविर्भक्षणायेहावक्षि आवहसि ॥ ११ ॥

अथद्वादशी–

अवो॑चामक॒वये॒मेध्या॑य॒वचो॑व॒न्दारु॑वृष॒भाय॒वृष्णे॑ ।
गवि॑ष्ठिरो॒नम॑सा॒स्तोम॑म॒ग्नौदि॒वी॑वरु॒क्ममु॑रु॒व्यं॑चमश्रेत् ॥ १२ ॥१३॥

अवो॑चाम । क॒वये॑ । मेध्या॑य । वच॑ः । व॒न्दारु॑ । वृ॒ष॒भाय॑ । वृष्णे॑ ।
गवि॑ष्ठिरः । नम॑सा । स्तोम॑म् । अ॒ग्नौ । दि॒विऽइ॑व । रु॒क्मम् ।
उ॒रु॒ऽव्यञ्च॑म् । अ॒श्रे॒त् ॥ १२ ॥ १३ ॥

वयमात्रेयाः कवये मेधाविने मेध्याय मेधार्हाय वृषभाय वर्षकायफलानां वृष्णे सेक्त्रे यूने वन्दारु वन्दनशीलंवचः स्तोत्रं अवोचाम अथऋषिरात्मानंपरोक्षेणैवनिर्दिश्यस्तुतिमुपसंहरति गविष्ठिरोयमृषिर्नमसानमस्कारेणहविषावायुक्तंस्तोमंस्तोत्रमग्नौ अश्रेत् श्रयतिस्म दिविरुक्मंरोचमानंउरुव्यंचं उरुगमनमादित्यमिव ॥ १२ ॥

॥ इतितृतीयस्यषष्ठेत्रयोदशोवर्गः ॥ १३ ॥

कुमारंमातेतिद्वादशर्चंद्वितीयंसूक्तं अत्रेःपुत्रःकुमारऋषिः जरनाम्नःपुत्रोवृशोवा उभौवात्रऋषी कमेतंविज्योतिषेत्यनयोस्तुवृशएवनोभौ नकुमारः अन्त्याषट्पञ्चाशदक्षराशक्करी शिष्टास्त्रिष्टुभः अग्निर्देवता अत्रानुक्रमणिका–कुमारंकुमारोवृशोवाजारउभौवाशक्कर्यन्तंकंवीत्यृचोस्तुवृशएवेति । प्रातरनुवाकाश्विनशस्त्रयोरस्यापिसूक्तस्यविनियोगउक्तःपूर्वसूक्तेनसह ।

तत्रप्रथमा—

कु॒मा॒रंमा॒तायु॑व॒तिःसमु॑ब्धं॒गुहा॑बिभर्ति॒नद॑दातिपि॒त्रे ।
अनी॑कमस्य॒नमि॒नज्जना॑सःपु॒रःप॑श्यन्ति॒निहि॑तमर॒तौ ॥ १ ॥

कु॒मा॒रम् । मा॒ता । यु॒व॒तिः । सम्ऽउ॑ब्धम् । गुहा॑ । बि॒भ॒र्ति॒ । न । द॒दा॒ति॒ । पि॒त्रे । अनी॑कम् । अ॒स्य॒ । न । मि॒नत् । जना॑सः । पु॒रः । प॒श्य॒न्ति॒ । निऽहि॑तम् । अ॒र॒तौ ॥ १ ॥

शाट्यायनब्राह्मणोक्तइतिहासइहोच्यते ॥ राजात्रैवृष्णइक्ष्वाकुस्त्र्यरुणोभवदस्यच ॥ १ ॥ पुरोहितोवृशोजारऋषिरासीत्तदाखलु ॥ संगृह्यंतिरथात्राज्ञांरक्षणायपुरोहितः ॥ २ ॥ त्र्यरुणस्यवृशोरश्मिसंजग्राहपुरोहितः ॥ कुमारोवर्त्मनिक्रीडन्नथचक्रेणघातितः ॥ ३ ॥ छिन्नः कुमारश्चक्रेणममाराथपुरोहितः ॥त्वंहन्तास्येतिराजानंराजावापिपुरोहितम् ॥ ४ ॥ त्वंहन्तास्यकुमारस्यनाहमित्यब्रवीत्तदा ॥ यतस्त्वंरथवेगस्यनियन्तातस्त्वयाहतः ॥ ५ ॥ रथस्वामीयतोराजन् तस्मात्त्वंतस्यघातकः ॥ एवंविवदमानौताविक्ष्वाकून्प्रष्टुमागतौ ॥ ६ ॥ तौपप्रच्छतुरिक्ष्वाकून्केनासौनिहतोद्विजाः ॥ तेब्रुवन्नथयन्तारंहन्तारंवृशसंज्ञकं ॥ ७ ॥ सवृशोवार्शसाम्नातंकुमारं समजीवयत् ॥ एवमाख्यायतत्रैवपुनरन्यदुदीरितम् ॥ ८ ॥ यतइक्ष्वाकवोरागाद्धन्तारमृषिमब्रुवन् ॥ तस्मात्तेषांगृहेष्वग्नेस्तेजोनिर्गतमेषुच ॥ ९ ॥ गृहेपाकादयोनासन्तत्कारणमचिन्तयन् ॥ वृशंकुमारहन्तारंयदवोचामतेननः ॥ १० ॥ अपक्रामद्धरोवह्नेराह्वयामवृशोवयं ॥ इतिनिश्चित्यतमृषिमाह्वयामासुरादरात् ॥ ११ ॥ सआगत्यततःशीघ्रंतेषामग्नेर्हरोभवेत् ॥ इतिवार्शेनसाम्नासावकामयतपूर्ववत् ॥ १२ ॥ एवंगायन्सऋषिर्ब्रह्महत्यांभार्यांजातांत्रसदस्योर्नृपस्य॥ पिशाचवेषांहरआदायचाग्नेर्गृहान्नीत्वाकशिपौस्थापयन्तीम् ॥ १३ ॥ दृष्ट्वासम्यक्तद्धरस्तोषयित्वासाम्नापश्चाद्योजयामासचाग्निम् ॥ ततःसतेजाःसंजातोभवत्पाकादिःपूर्ववत् ॥ एवंशाट्यायनेनोक्तंतांडकोक्तमथोच्यते ॥ १४ ॥ वृशःपुरोधाअभवत्त्रसदस्योर्महीपतेः ॥ सरथंधावयन्राजाब्राह्मणस्यकुमारकं ॥ १५ ॥ चिच्छेदरथचक्रेणप्रमादात्सोब्रवीद्वृशंम् ॥ पुरोहितेवर्तमाने त्वयिमांहन्तिरागता ॥ १६ ॥ एषात्वयापनेतव्याऋषिमित्यब्रवीन्नृपः ॥ सऋषिर्वार्शसाम्नातंकुमारमुदजीवयत् ॥ १७ ॥ माताकुमारस्योत्पादयित्रीयुवतिर्यौवनोपेताकुमारंपथिसंचरन्तंसमुब्धंचक्रेणहतं गुहा गुहायां बिभर्तिधारयति नददातिपित्रेतस्यजनकाय यद्वा मातासर्वस्य निर्मात्री पृथिवीसमुब्धं सम्यक्निरूढं गुहाबिभर्तिनददातिपित्रे अस्यकुमारस्यानीकंरूपं मिनत्

Funding by IKS-MoE

हिंसितं जनासोजनाः नपश्यन्ति किन्तु अरतौ अरमणेदेशेनिहितंस्थितं पुरः पुरोदेशेपश्यन्ति अथवा अयंवृशेनपुनरुज्जीवितः कुमारआत्मानमपरोक्षतयावक्तिकथयति जारोवा तंजीवयित्वावक्ति अथवासूक्तस्याग्नेयत्वात्कुमारइत्यग्निरुच्यते तंमाता अरणिर्युवतिर्मिश्रयन्ती समुब्धं निगूढं गुहायांबिभर्ति पित्रे उत्पादकाय यजमानायनददाति अस्याग्नेर्मिनत्हिंसत् दाहकर्मनीकंतेजोजनानपश्यन्ति किंतु अरतावरण्यांहितंपश्यन्ति ॥ १ ॥

अथद्वितीया–

कमेतंत्वंयुवतेकुमारंपेषीबिभर्षिमहिषीजजान ।
पूर्वीर्हिगर्भःशरदोववर्धापश्यञ्जातंयदसूतमाता ॥ २ ॥

कम् । एतम् । त्वम् । युवते । कुमारम् । पेषी । बिभर्षि । महिषी ।
जजान । पूर्वीः । हि । गर्भः । शरदः । ववर्ध । अपश्यम् । जातम् ।
यत् । असूत । माता ॥ २ ॥

अत्राग्नेरुत्पाद्यमानत्वात्कुमारशब्देनव्यवहारः हेयुवते त्वंकमेतंकुमारं पेषी हिंसिकापिशाचिकासती बिभर्षि एवंवृशाख्योमहर्षिः कशिपुनाच्छन्नमग्नेर्हरोब्रूते त्वया अनुत्पादितत्वाद्धारणमनुचितमित्यर्थः महिषीमहतीपूजनीया अरणिरेनंजजाना जनयत् तदेवाह गर्भः शिशोर्ग्राहकः अरण्याःसंबन्धीगर्भोहियस्मात्पूर्वीःशरदः गताननेकान्संवत्सरान्ववर्ध ववृधे अहंचततोजातं अपश्यम् यद्यस्मान्माता अरणिरसूत उदपादयत् राजकुमारपक्षे हेयुवते भूदेवि कमेतंकुमारंपेषीसतीबिभर्षि अवशिष्टंकुमारजननपरतयायोज्यं एवमुत्तरत्रापिकुमाराग्निहरसोःपरत्वेनयथोचितंव्याख्येयम् ॥ २ ॥

अथतृतीया–

हिरण्यदन्तंशुचिवर्णमारात्क्षेत्रादपश्यमायुधामिमानम् ।
ददानोअस्माअमृतंविपृक्वत्किमामनिन्द्राःकृणवन्ननुक्थाः ॥ ३ ॥

हिरण्यऽदन्तम् । शुचिऽवर्णम् । आरात् । क्षेत्रात् । अपश्यम् ।
आयुधा । मिमानम् । ददानः । अस्मै । अमृतम् । विपृक्वत् ।
किम् । माम् । अनिन्द्राः । कृणवन् । अनुक्थाः ॥ ३ ॥

हिरण्यदन्तं हिरण्यसदृशदंतस्थानीयज्वालोपेतं शुचिवर्णंप्रदीप्तवर्णं आयुधा आयुधानि आयुधस्थानीयान्विस्फुलिंगान्ज्वालावामिमानंनिर्मिमाणं अग्निमारात्समीपे क्षेत्रात् क्षेत्रे देशे अपश्यं पश्येयं एवंवृशःकामयते अहमस्माअग्नयेअमृतमविनाश्यमृतत्वसाधनंवाविपृक्कत् सर्वतोऽव्याप्तं हविःस्तोत्रंवाददानोदातास्मि मामनिन्द्राः इन्द्रःपरमैश्वर्योग्निः तद्रहिताअनिन्द्राः इन्द्रमयजन्तइत्यर्थः अनुक्थाः अस्तुतयः इन्द्रमस्तुवन्तश्च किंकृणवन् किंकुर्युः ॥३॥

अथचतुर्थी—

क्षेत्रा॑दपश्यंसनु॒तश्चर॑न्तंसु॒मद्यू॒थंनपु॒रुशोभ॑मानम् ।
नताअ॑गृभ्र॒न्नज॑निष्ट॒हिषः॑पलि॑क्नी॒रिद्यु॑व॒तयो॑भवन्ति ॥ ४ ॥

क्षेत्रा॑त् । अ॒प॒श्य॒म् । स॒नु॒तरि॑ति । चर॑न्तम् । सु॒ऽमत् । यू॒थम् । न ।
पु॒रु । शोभ॑मानम् । न । ताः । अ॒गृ॒भ्र॒न् । अज॑निष्ट । हि । सः ।
पलि॑क्नीः । इत् । यु॒व॒तयः॑ । भ॒व॒न्ति॒ ॥ ४ ॥

अहंवृशः इदानींक्षेत्रात्क्षेत्रे सनुतः अन्तर्हितनामैतत् निगूढंचरन्तं आरण्यं यूथंन गवांसमूहमिव सुमत्स्वयमेव पुरुबहु शोभमानमपश्यं पश्यामि पुराहरसः पिशाच्याक्रमणकाले ताज्वालानिर्वीर्यानागृभ्रन्नागृह्णन्तनरः इदानींसोग्निरजनिष्टहि हरसाप्रादुरभूत्खलु अतएवहेतोः पलिक्नीरित् पलिक्नयः पलिताःज्वालाएवेदानींयुवतयोभवन्ति ॥ ४ ॥

अथपञ्चमी—

केमे॑मर्य॒कं॑विय॑वन्त॒गोभि॒र्नयेषां॑गो॒पाअर॑णश्चि॒दास॑ ।
यईं॑जगृ॒भुरव॒तेसृ॑ज॒न्त्वाजा॑तिप॒श्वउप॑नश्चिकि॒त्वान् ॥ ५ ॥

के । मे॒ । म॒र्य॒कम् । वि । य॒व॒न्त॒ । गोभिः॑ । न । येषा॑म् । गो॒पाः ।
अर॑णः । चि॒त् । आस॑ । ये । ई॒म् । ज॒गृ॒भुः । अव॑ । ते । सृ॒ज॒न्तु॒ ।
आ । अ॒जा॒ति॒ । प॒श्वः । उप॑ । नः॒ । चि॒कि॒त्वान् ॥ ५ ॥

के मे मदीयं मर्यकं मर्त्यसंघं राष्ट्रं गोभिःसहवियवन्त वियुक्तमकुर्वन् गाःभृत्यांश्च वियोजयन् येषांगोपाः अस्माकंगोपयिताः अरणश्चिदभिगन्तानासबभूव सोयमग्निः येद्वेषिणः

ईमेनंजनसंघंराष्ट्रंजगृहुः गृह्णन्ति तेअवसृजन्तु नश्यन्तु किंच चिकित्वांश्चेतनावानस्मद्विषयज्ञानवानग्निर्नोस्माकंपश्वः पशूनुप आअजाति उपागच्छति ॥ ५ ॥

अथषष्ठी–

व॒सां॑राजा॑नंवस॒तिं॑जना॑ना॒मरा॑तयो॒निद॑धु॒र्मर्त्ये॑षु ।
ब्र॒ह्मा॒ण्यत्रे॒रव॒तंसृं॑जन्तुनिन्दि॒तारो॒निन्द्या॑सोभवन्तु ॥ ६ ॥ १४ ॥

व॒साम् । राजा॑नम् । व॒स॒तिम् । जना॑नाम् । अरा॑तयः । नि । द॒धु॒ः । मर्त्ये॑षु । ब्रह्मा॑णि । अत्रेः॑ । अव॑ । तम् । सृ॒ज॒न्तु॒ । नि॒न्दि॒तारः॑ । निन्द्या॑सः । भ॒व॒न्तु॒ ॥ ६ ॥ १४ ॥

वसां वसतां प्राणिनां राजानंस्वामिनं जनानांप्राणिनां वसतिं आवासभूतं त्र्यरुणं उक्तलक्षणमग्निंवा अरातयोनिदधुरगोपयन् मर्त्येषुलोकेषुमध्ये अत्रेरत्रिगोत्रस्यवृशस्य ब्रह्माणि मंत्राःस्तोत्राणि एवंकुमारमग्निंवा अवसृजन्तु यद्वा वृशस्यब्रह्माणि अत्रेःअत्रिगोत्रं कर्मणिषष्ठी तंकुमारमवसृजन्तु विसृजन्तु निन्दितारोस्मान्निंद्यासोस्माभिर्निन्द्याभवन्तु अत्रेर्ब्रह्माणीत्येतदुपजीव्य वृशमप्यात्रेयंवदन्ति आत्रेयःकुमारइतिपक्षे सएवप्राणमयमात्मानमवसृजन्त्वित्याशास्ते ॥६॥

॥ इतितृतीयस्याष्टमेचतुर्दशोवर्गः ॥ १४ ॥

अंजःसवआहवनीयोपस्थानेशुनश्चिच्छेपमित्येषा अग्निमाहवनीयमुपस्थापयांचकार शुनश्चिच्छेपंनिदितंसहस्रादितिब्राह्मणम्[1] ।

सैषासप्तमी–

शुनं॑श्चि॒च्छेपं॒निदि॑तंस॒हस्रा॒द्यूपा॑दमुञ्चो॒अशं॑मिष्ट॒हिषः ।
ए॒वास्मद॑ग्ने॒विमुं॑मुग्धि॒पाशा॒न्होतं॑श्चिकित्वइ॒हतूनि॒षद्यं॑ ॥ ७ ॥

शुन॒ःशे॑पम् । चि॒त् । निऽदि॑तम् । स॒हस्रा॑त् । यूपा॑त् । अ॒मु॒ञ्चः॒ । अशं॑मिष्ट । हि । सः । ए॒व । अ॒स्मत् । अ॒ग्ने॒ । वि । मु॒मु॒ग्धि॒ । पाशा॑न् । होत॒रिति॑ । चि॒कि॒त्वः॒ । इ॒ह । तु । नि॒ऽसद्य॑ ॥७॥

---

[1] ऐ० ब्रा० ७. १७.

हेअग्ने निदितंनितरांबद्धं शुनःशेपमृषिं सहस्रादनेकरूपाद्यूपादमुंचः अमोचयः चिदितिपूरणः शुनःशेपमितिपदस्यमध्येपदान्तरस्यसंहितायांव्यत्ययेनावस्थितिः सऋषिरशमिष्टहि शान्तवान्खलु यद्वा सहियस्मादशमिष्ट स्तुतिकर्मैतत् अस्तावीत् तस्मादमुंचइतिसंबन्धः एव एवमस्मदस्मत्तः पाशान्विमुमुग्धि विमोचय हेहोतर्हैंचिकित्वः चेतनावन्नग्ने इह तु वेद्यांनिषद्यावस्थाय ॥ ७ ॥

अथाष्टमी–

हृणीयमानोअपहिमदैयेःप्रमेदेवानांव्रतपाउवाच ।
इन्द्रोविद्वाँअनुहित्वाचचक्षतेनाहमग्नेअनुशिष्टआगाम् ॥ ८ ॥

हृणीयमानः । अप । हि । मत् । ऐयेः । प्र । मे । देवानाम् ।
व्रतऽपाः । उवाच । इन्द्रः । विद्वान् । अनु । हि । त्वा । चचक्ष ।
तेन । अहम् । अग्ने । अनुऽशिष्टः । आ । अगाम् ॥ ७ ॥

हेअग्ने हृणीयमानः क्रुध्यंस्त्वं मत् मत्तः अपैयेर्हि अपागाःखलु ईंगतावित्यस्मात्श्यन् विकरणाल्लङि मध्यमेछांदसेपरस्मैपदे अडागमेवृद्धौव्यत्ययेनश्यनोकारस्यएकारेचकृतेरूपम मेमह्यंदेवानां व्रतपाः कर्मणःपालकः इन्द्रःप्रोवाचहि सएवविद्वान्त्वामनुचचक्ष त्वांददर्श तेनानुशिष्टोहं हेअग्ने त्वामागामिति एवंवृशआह ॥ ८ ॥

अथनवमी–

विज्योतिषाबृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा ।
प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृङ्गेरक्षसेविनिक्षे ॥ ९ ॥

वि । ज्योतिषा । बृहता । भाति । अग्निः । आविः । विश्वानि ।
कृणुते । महिऽत्वा । प्र । अदेवीः । मायाः । सहते । दुःऽएवाः ।
शिशीते । शृङ्गे इति । रक्षसे । विऽनिक्षे ॥ ९ ॥

अयमग्निर्ज्योतिषातेजसाबृहतामहताविभाति विशेषेणदीप्यते अथ तथाभूतःसन्महित्वा स्वमहत्त्वेन विश्वानिसर्वाणिपदार्थजातानि आविष्कृणुते प्रकटीकरोति एवंप्रवृद्धोग्निरदेवीः अदेवनशीलाः आसुरीर्मायाः दुरेवाः दुःखगमनाः प्रसहते अभिभवति किंच

Funding by IKS-MoE

शिशीते तीक्ष्णीकरोति श्रृंगे श्रृंगाणि श्रृंगसदृशीः हिंसिकावाज्वालाः शिशीते तीक्ष्णीकरोति किमर्थं रक्षसे विनिक्षे रक्षसोनाशाय निश्यतिश्रृंगेरक्षसोविनिक्षणनायेतियास्कः[1] ॥ ९ ॥

अथदशमी–

उ॒तस्वा॒नासो॑दि॒विष॑न्त्व॒ग्नेस्ति॒ग्मायु॑धा॒रक्ष॑से॒हन्त॒वाउ॑ ।
मदे॑चिदस्य॒प्ररु॑जन्ति॒भामा॒नव॑रन्तेपरि॒बाधो॒अदे॑वीः ॥ १० ॥

उ॒त । स्वा॒नास॑ः । दि॒वि । स॒न्तु॒ । अ॒ग्नेः । ति॒ग्मऽआ॑युधाः । रक्ष॑से ।
हन्त॒वै । ऊँ॒ इति॑ । मदे॑ । चि॒त् । अ॒स्य॒ । प्र । रु॒ज॒न्ति॒ । भामाः॑ ।
न । व॒र॒न्ते॒ । प॒रि॒ऽबाध॑ः । अदे॑वीः ॥ १० ॥

उतापिचाग्नेःस्वानासः शब्दंकुर्वाणाःज्वालादिविषन्तु द्युलोकेप्रादुर्भवन्तु किमर्थं तिग्मायुधाः तीक्ष्णायुधस्थानीयाज्वालाः रक्षसेहन्तवाउ रक्षसोहननाय उइतिपूरणः मदेचिद्धर्षेसति अस्याग्नेर्भामाः क्रोधादीप्तयोवा प्ररुजन्ति प्रकर्षेणभंगंगच्छन्ति पीडयन्तिवारक्षांसि परिबाधः परितोबाधिकाः अदेवीरदेवनाः आसुर्यः सेनानवरन्ते नवारयन्त्येनं ॥ १० ॥

अथैकादशी–

ए॒तंते॒स्तोमं॑तुविजात॒विप्रो॒रथं॒नधीर॒ःस्वपा॑अतक्षम् ।
यदीद॑ग्ने॒प्रति॒त्वंदे॑व॒हर्या॒ःस्व॑र्वतीर॒पए॑नाजयेम ॥ ११ ॥

ए॒तम् । ते॒ । स्तोम॑म् । तु॒वि॒ऽजा॒त॒ । विप्र॑ः । रथ॑म् । न । धीर॑ः ।
सु॒ऽअपाः॑ । अ॒त॒क्ष॒म् । यदि॑ । इत् । अ॒ग्ने॒ । प्रति॑ । त्वम् । दे॒व॒ ।
हर्याः॑ । स्व॑ःऽवतीः । अ॒पः । ए॒न॒ । ज॒ये॒म॒ ॥ ११ ॥

हेतुविजात बहुभावमापन्नाग्ने तेत्वदर्थमेतंस्तोमं एतत्स्तोत्रं विप्रोमेधावी स्तोतारथं न रथमिव धीरःस्वपाः शोभनकर्माहं अतक्षं समपादयं हेअग्ने देव त्वं यदीत् यद्येव एनंस्तोमंप्रतिहर्याः प्रतिकामयेथाः तर्हिस्वर्वतीः स्वरणवतीर्व्याप्तिमतीरपएनाएनेनयजेमप्राप्नुयाम ॥ ११ ॥

---

[1] नि० ४. १८.।

Funding by IKS-MoE

अथद्वादशी—

तुविग्रीवोवृषभोवावृधानोशत्र्व१र्यःसमजातिवेदः ।
इतीममग्निममृताअवोचन्बर्हिष्मतेमनवेशर्मयंसद्धविष्मते
मनवेशर्मयंसत् ॥ १२ ॥ १५ ॥

तुविऽग्रीवः । वृषभः । ववृधानः । अशत्रु । अर्यः । सम् । अजाति ।
वेदः । इति । इमम् । अग्निम् । अमृताः । अवोचन् । बर्हिष्मते ।
मनवे । शर्म । यंसत् । हविष्मते । मनवे । शर्म । यंसत् ॥ १२ ॥ १५ ॥

तुविग्रीवोबहुज्वालः प्रभूतग्रीवोवा वृषभोवर्षिताकामानां ववृधानोवर्धमानोग्निरर्यः अरेर्वेदोधनं अशत्रु अकंटकं समजाति संयोजयति इतीममर्थमग्निं अमृताअन्येदेवाअवोचन् यस्मादेवंतस्माद्बर्हिष्मते यागवते मनवे मनुष्याय यजमानाय शर्म सुखं यंसत् यच्छतु हविष्मतेचशर्मयंसत् ॥ १२ ॥

॥ इतितृतीयस्याष्टमेपञ्चदशोवर्गः ॥ १५ ॥

त्वमग्नेवरुणइतिद्वादशर्चंतृतीयंसूक्तं आत्रेयस्यवसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं त्वमग्नेवसुश्रुतइत्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः अबोध्यग्निरित्यत्रोक्तः ।

तत्रप्रथमा—

त्वमग्नेवरुणोजायसेयत्त्वंमित्रोभवसियत्समिद्धः ।
त्वेविश्वेसहसस्पुत्रदेवास्त्वमिन्द्रोदाशुषेमर्त्याय ॥ १ ॥

त्वम् । अग्ने । वरुणः । जायसे । यत् । त्वम् । मित्रः । भवसि ।
यत् । सम्ऽइद्धः । त्वे इति । विश्वे । सहसः । पुत्र । देवाः ।
त्वम् । इन्द्रः । दाशुषे । मर्त्याय ॥ १ ॥

हेअग्ने त्वं वरुणस्तमसांवारकोरात्र्यभिमानिदेवोपित्वमेव यद्यदाजायसे किंच त्वंमित्रोहरभिमानीदेवःप्रमीतेस्त्राता यद्यदा समिद्धस्त्वं उत्पन्नमात्रःसन्तमोनिवारयसि प्रवृद्धःसन्हित-

कारीभवसीत्यर्थः तदा त्वे त्वयि विश्वेसर्वेपिदेवावर्तंते त्वद्दत्तेनहविषातेषांजीवनात् तेदेवा-बिभ्यतोग्निंप्राविशन्नितिहिश्रुतेः । हेसहसस्पुत्र बलेनमथ्यमानत्वात् किंच त्वमिन्द्रःस्वामी दाशुषे हविर्दात्रेमर्त्याय यजमानायभवसि ॥ १ ॥

विवाहेचतुर्थ्यामाज्याहुतौत्वमर्यमेत्येषा सूत्रितंच—त्वमर्यमाभवसियत्कनीनामितिविवाहेचतुर्थीमिति ।

अथद्वितीया—

त्वमर्यमाभवसियत्कनीनांनामस्वधावन्गुह्यंबिभर्षि ।
अञ्जन्तिमित्रंसुधितंनगोभिर्यद्दंपतीसमनसाकृणोषि ॥ २ ॥

त्वम् । अर्यमा । भवसि । यत् । कनीनाम् । नाम । स्वधाऽवन् ।
गुह्यम् । बिभर्षि । अञ्जन्ति । मित्रम् । सुऽधितम् । न । गोभिः ।
यत् । दम्पती इति दम्ऽपती । सऽमनसा । कृणोषि ॥ २ ॥

हेअग्ने त्वं अर्यमाभवसि सर्वेषांनियमितासि यद्यदा कनीनांकन्यकानांसंबन्धयसि किंच हेस्वधावन् हविर्लक्षणान्नवन् गुह्यंगोपनीयंनामबिभर्षि वैश्वानरइति तन्नाम सुधितं सुष्ठुनिहितं मित्रंन मित्रमिवगोभिः विकारेप्रकृतिशब्दः गोविकारैःक्षीरादिभिःअंजन्ति यद्यस्माद्दंपती जायापती समनसा समानमनस्कौ कृणोषि करोषि ॥ २ ॥

अथतृतीया—

तवश्रियेमरुतोमर्जयन्तरुद्रयत्तेजनिमचारुचित्रम् ।
पदंयद्विष्णोरुपमंनिधायितेनपासिगुह्यंनामगोनाम् ॥ ३ ॥

तव । श्रिये । मरुतः । मर्जयन्त । रुद्र । यत् । ते । जनिम । चारु ।
चित्रम् । पदम् । यत् । विष्णोः । उपऽमम् । निऽधायि । तेन । पासि ।
गुह्यम् । नाम । गोनाम् ॥ ३ ॥

---

१ तै० सं० ६. २. २.।

अनयाग्नेर्माध्यमिकीमूर्तिरुच्यते हेअग्ने तवश्रिये श्रयणाय मरुतःअपोन्तरिक्ष्यामर्जयन्त मार्जयन्ति हेरुद्र वृष्ट्यारुद्रवद्वर्धितरग्ने ते तव यज्जनिम जन्म वैद्युतलक्षणं चारु चरणीयं चित्रं चायनीयंच तत्कथमितिचेदुच्यते—विष्णोर्व्यापनशीलस्यदेवस्योपममुपमेयं गुह्यं अगम्यं यत्पदंनिधायि अनेनान्तरिक्षमुक्तं उपमेयमिवविष्णोर्मध्यमंपदं तस्मान्नांतरिक्षंपश्यन्तीतिब्राह्मणं । तेनगोनामुदकानांगुह्यंनामनामानिपासि रक्षसि ॥ ३ ॥

अथचतुर्थी—

तवश्रियासुदृशोदेवदेवाःपुरूदधानाअमृतंसपन्त ।
होतारमग्निंमनुषोनिषेदुर्दशस्यन्तउशिजःशंसमायोः ॥ ४ ॥

तव । श्रिया । सुऽदृशः । देव । देवाः । पुरु । दधानाः । अमृतम् । सपन्त । होतारम् । अग्निम् । मनुषः । नि । सेदुः । दशस्यन्तः । उशिजः । शंसम् । आयोः ॥ ४ ॥

हेदेवाग्ने सुदृशः तवश्रिया समृद्ध्यादेवाः इन्द्रादयः पुरु अत्यधिकं दधानाः त्वयिप्रीतिंधारयंतः अमृतंसपंत स्पृशन्ति होतारंहोमनिष्पादकमग्निं मनुषोमनुष्यानिषेदुः परिचरंतिऋत्विजः किंकुर्वन्तः दशस्यन्तः हविर्वितरन्तः शंसं फलमुशिजःकामयमानस्यायोर्मनुष्यस्ययजमानस्यार्थं ॥ ४ ॥

अथपञ्चमी—

नत्वद्धोतापूर्वोअग्नेयजीयान्नकाव्यैःपरोअस्तिस्वधावः ।
विशश्चयस्याअतिथिर्भवासिसयज्ञेनवनवद्देवमर्तान् ॥ ५ ॥

न । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । न । काव्यैः । परः । अस्ति । स्वधाऽवः । विशः । च । यस्याः । अतिथिः । भवासि । सः । यज्ञेन । वनवत् । देव । मर्तान् ॥ ५ ॥

हेअग्ने त्वत्त्वत्तोन्योनास्ति होता पूर्वःपूरकः पुराणोवा यजीयानतिशयेनपूज्यः यष्टा वा काव्यैःस्तोत्रैःस्तुत्यः परः परस्तात्परस्मिन्नपिकालेनास्ति हेदेव हेस्वधावः अन्नवन् य-

---

[१] तै० सं० ५. ६. ८. ।

स्याविशःप्रजायाऋत्विग्रूपायाअतिथिर्भवासि अतिथिवत्पूज्योभवसि सयज्ञेनमर्तान्स्मद्द्वेष्टॄन्वनवत् वृश्चति हिनस्ति यद्वा मर्तान्परिचारकान्वनवत्संभजेत् ॥ ५ ॥

अथषष्ठी–

व॒यम॑ग्नेवनु॒याम॒त्वोता॑वसू॒यवो॑ह॒विषा॒बुध्य॑मानाः ।
व॒यंस॑म॒र्येवि॒दथे॒ष्वह्नां॑व॒यंरा॒यास॑हसस्पु॒त्र॒मर्ता॑न् ॥ ६ ॥ १६ ॥

व॒यम् । अ॒ग्ने॒ । व॒नु॒या॒म॒ । त्वाऽऊ॑ताः । व॒सु॒ऽयवः॑ । ह॒विषा॑ ।
बुध्य॑मानाः । व॒यम् । स॒ऽम॒र्ये॑ । वि॒दथे॑षु । अह्ना॑म् । व॒यम् । रा॒या ।
स॒ह॒स॒ः । पु॒त्र॒ । मर्ता॑न् ॥ ६ ॥ १६ ॥

हेअग्ने वयंयजमानाः त्वोताः त्वयारक्षिताःसन्तः वनुयाम शत्रून्पीडयाम संभजेमहि वाधनं कीदृशावयं वसूयवोवसुकामाः हविषा त्वां बुध्यमानाबोधयन्तः वयंसमर्यें समरणे जयेम शत्रूनितिशेषः विदथेषुयागेषुप्राप्नुयामबलं यद्वा वनुयामेत्येतदनुषज्यते अह्नांसर्वेष्वहःसु किंचवयं हेसहसस्पुत्र बलस्यपुत्र पालकवाग्ने रायाधनेनसहमर्तान्पुत्रभृत्यादीन्लभेमहि ॥६॥

॥ इतितृतीयस्याष्टमेषोडशोवर्गः ॥ १६ ॥

अथसप्तमी–

योन॒आगो॑अ॒भ्येनो॒भरा॒त्यधीद॒घम॒घशं॑सेदधात ।
ज॒हीचि॑कित्वोअ॒भिश॑स्तिमे॒ताम॑ग्ने॒योनो॑म॒र्चय॑तिद्व॒येन॑ ॥ ७ ॥

यः । न॒ः । आगः॑ । अ॒भि । एनः॑ । भरा॑ति । अधि॑ । इत् । अ॒घम् ।
अ॒घऽशं॑से । द॒धा॒त॒ । ज॒हि । चि॒कि॒त्व॒ः । अ॒भिऽश॑स्तिम् । ए॒ताम् ।
अग्ने॑ । यः । न॒ः । म॒र्चय॑ति । द्व॒येन॑ ॥ ७ ॥

योमर्त्यः आगः अपराधं एनःपापंचनोस्मभ्यमभिभराति अभितःकरोति तस्मिन्नघशंसे अघंपापं अधिदधात ददात्वग्निः इत्पूरणः आगोपराधंयोमह्यमिदंकरोतितस्माएवाग्निस्तत्करोत्वित्यर्थः अथप्रत्यक्षेणोच्यते–हेअग्ने एतामभिशस्तिंजहि उत्तरत्रयच्छब्दश्रवणात् तदानुगुण्येनैनमभिशंसकमितिव्याख्येयं योभिशस्ता नोस्मान्द्वयेनोक्तेनागसैनसावामर्चयतिबाधतेतमिति ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी—

त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।
संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥ ८ ॥

त्वाम् । अस्याः । विऽउषि । देव । पूर्वे । दूतम् । कृण्वानाः ।
अयजन्त । हव्यैः । सम्ऽस्थे । यत् । अग्ने । ईयसे । रयीणाम् ।
देवः । मर्तैः । वसुऽभिः । इध्यमानः ॥ ८ ॥

हेअग्ने त्वामस्यारात्रेः व्युषि व्युष्टायां उषसीत्यर्थः पूर्वे पुरातनायजमानाः दूतंदेवानांप्रेरकं कृण्वानाः कुर्वाणाः अयजन्तहव्यैर्हविर्भिःसाधनैः रयीणां हविर्लक्षणानां संस्थे संस्थाने आसादनेसति हेअग्ने यद्यदाईयसे गच्छसि देवोद्योतमानोमर्तैर्मनुष्यैर्ऋत्विग्भिर्वसुभिर्वासकैरिध्यमानःसमिध्यमानःसन् ॥ ८ ॥

अथनवमी—

अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे ।
कदा चिकित्वो अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे ॥ ९ ॥

अव । स्पृधि । पितरम् । योधि । विद्वान् । पुत्रः । यः । ते । सहसः ।
सूनो इति । ऊहे । कदा । चिकित्वः । अभि । चक्षसे । नः ।
अग्ने । कदा । ऋतऽचित् । यातयासे ॥ ९ ॥

हेसहसःसूनो बलस्यपुत्राग्ने त्वमवस्पृधि पारय योधि पृथक्कुरुपापात् यःपुत्रः पुत्रस्थानीयः तव योयजमानः ते त्वांपितरंपालकं पितृभूतं विद्वान् जानन्नूहे वहतिहविः तमेवंकुर्वीति ऋषिरात्मानंपरोक्षेणाह हव्यवाळग्निरजरःपितानइतिहि[1]वक्ष्यति । यद्वा पितृपुत्रभावोव्यत्यस्तः पितरंपितृवद्रक्षकं यजमानमवस्पृधि योधिच यस्त्वंपुत्रः पुत्रवत्सदारक्षणीयः त्वंपुत्रोभवसियस्तेविधदितिहि[2]श्रुतिः । हेचिकित्वः चेतनावन्नग्ने कदानोस्मानभिचक्षसे अभिपश्यसि कदाचऋतचित् यज्ञस्योदकस्यवाचेतयिता यातयासे प्रेरयसिसन्मार्गेण ॥ ९ ॥

---

[1] ऋ०सं० ३.८.१८.।   [2] ऋ०सं० २.५.१८.।

अथदशमी–

भूरिनामवन्दमानोदधातिपितावसोयदितज्जोषयासे ।
कुविद्देवस्यसहसाचकानःसुम्नमग्निर्वनतेवावृधानः ॥ १० ॥

भूरि । नाम । वन्दमानः । दधाति । पिता । वसो इति । यदि ।
तत् । जोषयासे । कुवित् । देवस्य । सहसा । चकानः । सुम्नम् ।
अग्निः । वनते । वावृधानः ॥ १० ॥

भूरिप्रभूतंनामत्वदीयंनामवन्दमानःसंदधाति धारयति सामर्थ्याद्धविः अथवा नामकंहविः प्रभूतंधारयतिदातुं पितापालकस्त्वं हेवसोवासकाग्ने यदितद्धविःजोषयासे सेवसे देवस्यव्यवहर्तुर्यजमानस्यकुविद्बहुहविःसहसाबलेनयुक्तःसन्चकानःकामयमानः यद्वा कर्मणिषष्ठी देवंयजमानंकामयमानोग्निर्ववृधानोवर्धमानोयजमानंवर्धयन्वा सुम्नं सुखं वनते प्रयच्छति ॥ १० ॥

अथैकादशी–

त्वमङ्गजरितारंयविष्ठविश्वान्यग्नेदुरितातिपर्षि ।
स्तेनाअदृश्रन्रिपवोजनासोज्ञातकेतावृजिनाअभूवन् ॥ ११ ॥

त्वम् । अङ्ग । जरितारम् । यविष्ठ । विश्वानि । अग्ने । दुःऽइता ।
अति । पर्षि । स्तेनाः । अदृश्रन् । रिपवः । जनासः ।
अज्ञातऽकेताः । वृजिनाः । अभूवन् ॥ ११ ॥

अंग हेस्वामिन् यविष्ठ युवतमाग्ने जरितारंस्तोतारमनुग्रहीतुं विश्वानिदुरिता दुरितानि अतिपर्षि अतिपारयसि स्तेनास्तस्कराअदृश्रन् दृशयन्ते रिपवोजनासः शत्रुभूतामनुष्याः अज्ञातकेताःअप्रज्ञातचिह्नाः वृजिनाअस्माभिर्वर्जिताअभूवन्भवन्ति ॥ ११ ॥

अथद्वादशी–

इमेयामासस्त्वद्रिगभूवन्वसवेवातदिदागोअवाचि ।
नाहायमग्निरभिशस्तयेनोनरीषतेवावृधानःपरादात् ॥ १२ ॥ १७ ॥

Funding by IKS-MoE

इ॒मे । यामा॑सः । त्व॒द्रिक् । अ॒भू॒व॒न् । वस॑वे । वा॒ । तत् । इत् ।
आगः॑ । अ॒वा॒चि॒ । न । अह॑ । अ॒यम् । अ॒ग्निः । अ॒भिऽश॑स्तये ।
न॒ः । न । रिष॑ते । वा॒वृ॒धा॒नः । परा॑ । दा॒त् ॥ १२ ॥ १७ ॥

इमेयामासोगन्तारः स्तोमाः त्वद्रिक् त्वदभिमुखाअभूवन्भवन्ति वा अथवा वसवे वासकाय तदागोपराधमाशासनरूपमवाचि उक्तवानहमग्निमिदंवेहीतियाचमानमेवापराधः इदितिपूरणः यद्वा तदिदंवक्ष्यमाणंशत्रुभिःकृतमागः किंचायमग्निर्ववृधानः स्तुत्यावर्धमानःसन् नाह नैवाभिशस्तयेनिन्दकायनोस्मान्परादात्परादद्यात् तथा रिषतेहिंसकायनैवपरादात् ॥ १२ ॥

॥ इतितृतीयस्याष्टमेसप्तदशोवर्गः ॥ १७ ॥

त्वामग्नइत्येकादशर्चंचतुर्थंसूक्तं आत्रेयस्यवसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं अनुक्रान्तंच—त्वामग्नएकादशेति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगोबोध्यग्निरित्यत्रोक्तः ।

तत्रप्रथमा—

त्वाम॑ग्ने॒वसु॑पतिं॒वसू॑नाम॒भिप्रम॑न्देअध्व॒रेषु॑राजन् ।
त्वया॒वाजं॑वाज॒यन्तो॑जयेमा॒भिष्या॑मपृत्सु॒तीर्मर्त्या॑नाम् ॥ १ ॥

त्वाम् । अ॒ग्ने॒ । वसु॑ऽपतिम् । वसू॑नाम् । अ॒भि । प्र । म॒न्दे॒ ।
अ॒ध्व॒रेषु॑ । रा॒ज॒न् । त्वया॑ । वाज॑म् । वा॒ज॒ऽयन्तः॑ । ज॒ये॒म॒ ।
अ॒भि । स्या॒म॒ । पृ॒त्सु॒तीः । मर्त्या॑नाम् ॥ १ ॥

हेअग्ने वसूनांवसुपतिंवृत्त्यवृत्तिभ्यांवसूनांबाहुल्यं तत्स्वामित्वंचोक्तं बहूनांधनानांस्वामिनंत्वामध्वरेषुयागेषु अभिप्रमन्दे आभिमुख्येनस्तौमि हेराजन् किंच त्वया अनुकूलेनवाजयन्तोन्नमिच्छन्तोवयंवाजंजयेम किंच मर्त्यानांमरणधर्मकाणां पृत्सुतीः सेनाअभिष्याम अभिभवेम ॥ १ ॥

दर्शपूर्णमासेपत्नीसंयाजेगृहपतेर्याज्यैषा सूत्रितंच—हव्यवाळग्निरजरःपितानइतिपत्नीसंयाजाइति । देवसुवांहविःष्वप्यग्नेरेषैवयाज्या सूत्रितंच—हव्यवाळग्निरजरःपितानस्त्वंचसोमनोवशइति ।

Funding by IKS-MoE

सैषाद्वितीया–

हव्यवाळग्निरजरःपितानोविभुर्विभावासुदृशीकोअस्मे ।
सुगार्हपत्याःसमिषोदिदीह्यस्मद्र्य१क्संमिमीहिश्रवांसि ॥ २ ॥

हव्यऽवाट् । अग्निः । अजरः । पिता । नः । विऽभुः । विभाऽवा ।
सुऽदृशीकः । अस्मे इति । सुऽगार्हपत्याः । सम् । इषः । दिदीहि ।
अस्मद्र्यक् । सम् । मिमीहि । श्रवांसि ॥ २ ॥

अयंहव्यवाळग्निरजरः अजीर्णःसन् नःपिताभवत्वितिशेषः किंच विभुर्व्याप्तः विभावा दीप्तिमान् सुदृशीकः शोभनदर्शनः अस्मे अस्माकंभवतु अथप्रत्यक्षवादः सुगार्हपत्याः शोभनगार्हपत्ययुक्तानि इषोन्नानिसन्दिदीहि सम्यक्प्रकाशय ददस्ववा अस्मद्र्यक् अस्मदभिमुखंश्रवांस्यन्नानिसंमिमीहि सम्यक्प्रयच्छ ॥ २ ॥

अथतृतीया–

विशांकविंविश्पतिंमानुषीणांशुचिंपावकंघृतपृष्ठमग्निम् ।
निहोतारंविश्वविदंदधिध्वेसदेवेषुवनतेवार्याणि ॥ ३ ॥

विशाम् । कविम् । विश्पतिम् । मानुषीणाम् । शुचिम् । पावकम् ।
घृतऽपृष्ठम् । अग्निम् । नि । होतारम् । विश्वऽविदम् । दधिध्वे ।
सः । देवेषु । वनते । वार्याणि ॥ ३ ॥

मानुषीणांविशां विश्पतिं सर्वासांमनुष्यरूपाणांप्रजानांपालकं स्वामिनंवा कविं मेधाविनं शुचिं विशुद्धं दीप्तंवा पावकमन्येषांशोधकं घृतपृष्ठं प्रदीप्तपृष्ठोपलक्षितशरीरं अथवा उपरितनभागआज्योपेतंहोतारंहोमनिष्पादकं विश्वविदं विश्वस्यवेत्तारं अग्निंनिदधिध्वे धारयथ हेऋत्विजः सदेवोदेवेषुमध्येवार्याणिवरणीयानिधनानि वनते संभजतेस्मदर्थं स्वयंवा वार्याणिहवींषिवनते ॥ ३ ॥

अथचतुर्थी–

जुषस्वाग्नइळयासजोषायतमानोरश्मिभिःसूर्यस्य ।
जुषस्वनःसमिधंजातवेदआचदेवान्हविरद्यायवक्षि ॥ ४ ॥

जु॒षस्व॑ । अ॒ग्ने॒ । इळ॑या । स॒ऽजोषाः॑ । यत॑मानः । र॒श्मिऽभिः॑ ।
सूर्य॑स्य । जु॒षस्व॑ । नः॒ । स॒म्ऽइध॑म् । जा॒त॒ऽवे॒दः॒ । आ । च॒ ।
दे॒वान् । ह॒वि॒ःऽअद्या॑य । व॒क्षि॒ ॥ ४ ॥

हेअग्ने जुषस्व सेवस्व स्तुतिं इळयावेदिलक्षणयाभूम्यावाचावासजोषाःसमानप्रीतिः तथासूर्यस्यरश्मिभिः यतमानः प्रयत्नमुषःकालेकुर्वन् किंच हेजातवेदः जातस्यवेदितरग्ने नोस्मदीयांसमिधंजुषस्व सेवस्व आवहच देवान्हविरद्यायहविरदनाय आवाह्यवक्षिवहसि तद्धविः ॥ ४ ॥

अथपवित्रेष्टचांस्विष्टकृतोनुवाक्यैषा सूत्रितंच–जुष्टोदमूनाअग्नेशर्धमहतेसौभगायेतिसंयाज्येइति । मरुद्भ्यःपुरोडाशंसप्तकपालमित्यत्रापिस्विष्टकृतोनुवाक्या अत्यासोनयेमरुतःस्वंचोजुष्टोदमूनाइतिसूत्रितम् ।

सैषापंचमी–

जुष्टो॒दमू॑ना॒अति॑थिर्दुरो॒णइ॒मंनो॑य॒ज्ञमुप॑याहिवि॒द्वान् ।
विश्वा॑अग्नेअ॒भि॒युजो॑वि॒हत्या॑शत्रूय॒तामाभ॑रा॒भोज॑नानि ॥५॥१८॥

जुष्टः॑ । दमू॑नाः । अति॑थिः । दु॒रो॒णे । इ॒मम् । नः॒ । य॒ज्ञम् ।
उप॑ । या॒हि॒ । वि॒द्वान् । विश्वाः॑ । अ॒ग्ने॒ । अ॒भि॒ऽयुजः॑ ।
वि॒ऽहत्य॑ । श॒त्रु॒ऽय॒ताम् । आ । भ॒र॒ । भोज॑नानि ॥ ५ ॥ १८ ॥

जुष्टःपर्याप्तोदमूनादानमनादान्तमनावा अतिथिस्तद्वत्पूज्यःसन् इमंनोस्मदीयंयज्ञंउपयाहि उपगच्छ विद्वान्जानन् हेअग्ने विश्वाअभियुजः सर्वानभियोक्तॄन् विहत्य शत्रूयतां तेषांभोजनानि अन्नानि धनान्याभर आहर अतिथिरभ्यतितोगृहान्भवतीत्यादिनिरुक्तं[१]द्रष्टव्यम् ॥ ५ ॥

॥ इतितृतीयस्याष्टमेऽष्टादशोवर्गः ॥ १८ ॥

---

[१] नि० ४. ५.

अथषष्ठी—

व॒धेन॒दस्यु॑ंप्रहिचा॒तय॑स्व॒वय॑ःकृ॒ण्वा॒नस्त॒न्वे॒३॑स्वायै॑ ।
पिप॑र्षि॒यत्स॑हसस्पुत्रदे॒वान्त्सोअ॑ग्नेपाहिनृतम॒वाजे॑अ॒स्मा॑न् ॥६॥

व॒धेन॑ । दस्यु॑म् । प्र । हि । चा॒तय॑स्व । वय॑ः । कृ॒ण्वा॒नः ।
त॒न्वे॑ । स्वायै॑ । पिप॑र्षि । यत् । स॒ह॒स॒ः । पु॒त्र॒ । दे॒वान् । सः ।
अ॒ग्ने॒ । पा॒हि॒ । नृ॒ऽत॒म॒ । वाजे॑ । अ॒स्मान् ॥ ६ ॥

हेअग्ने वधेनायुधेन दस्युमुपक्षपयितारं प्रहिचातयस्व प्रणाशय हीतिपूरणः वयःकृण्वानः तन्वेशरीराय स्वायै स्वीयाय अथवा स्वायैतन्वे यजमानादिरूपाय पुत्राय वयोन्नंकुर्वाणः यद्यस्मात्सहसस्पुत्राग्ने देवान्पिपर्षि तर्पयसि हेनृतम नेनृतमाग्ने सत्वंवाजेसंग्रामे अस्मान्पाहिरक्ष ॥ ६ ॥

अथसप्तमी—

व॒यंते॑अग्नउ॒क्थैर्वि॑धेमव॒यंह॒व्यैःपा॑वकभद्रशोचे ।
अ॒स्मेर॒यिं॑वि॒श्ववा॑र॒ंसमि॑न्वा॒स्मेविश्वा॑नि॒द्रवि॑णानिधेहि ॥ ७ ॥

व॒यम् । ते॒ । अ॒ग्ने॒ । उ॒क्थैः । वि॒धे॒म॒ । व॒यम् । ह॒व्यैः । पा॒व॒क॒ ।
भ॒द्र॒ऽशो॒चे॒ । अ॒स्मे इति॑ । र॒यिम् । वि॒श्वऽवा॑रम् । सम् । इ॒न्व॒ ।
अ॒स्मे इति॑ । विश्वा॑नि । द्रवि॑णानि । धे॒हि॒ ॥ ७ ॥

हेअग्ने ते त्वां वयं उक्थैःशस्त्रैर्विधेम परिचरेम वयंहव्यैर्हविर्भिर्विधेम हेपावक शोधक हेभद्रशोचे कल्याणदीप्ते अग्ने अस्मभ्यंविश्ववारं विश्वैर्वरणीयंरयिंधनंसमिन्व प्रापय अस्मे अस्मभ्यंविश्वानि द्रविणानि धेहि स्थापय ॥ ७ ॥

अथाष्टमी—

अ॒स्माक॑मग्नेअध्व॒रंजु॑षस्व॒सह॑सःसूनोत्रिषधस्थह॒व्यम् ।
व॒यंदे॒वेषु॑सु॒कृत॑ःस्याम॒शर्म॑णानस्त्रिवरू॑थेनपाहि ॥ ८ ॥

अस्माकम् । अग्ने । अध्वरम् । जुषस्व । सहसः । सूनो इति ।
त्रिऽसधस्थ । हव्यम् । वयम् । देवेषु । सुऽकृतः । स्याम ।
शर्मणा । नः । त्रिऽवरूथेन । पाहि ॥ ८ ॥

हेअग्ने अस्माकमध्वरंजुषस्व सेवस्व हेसहसःसूनो बलस्यपुत्र त्रिषधस्थ त्रिषुक्षित्यादिषुस्थानेषुस्थित हव्यंहविर्जुषस्व यद्वा अध्वरंहविरितियोज्यं अहिंसितंहविरित्यर्थः वयंयजमानादेवेषुमध्ये सुकृतः शोभनापूर्वकर्तारःस्याम भवेम त्रिवरूथेन वाचिकादिभेदेन त्रिधावरणीयेन शर्मणासुखेन त्रिच्छदिष्केण गृहेण वा नः पाहि रक्ष ॥ ८ ॥

अथनवमी—

विश्वानिनोदुर्गहाजातवेदःसिन्धुंननावादुरितातिपर्षि ।
अग्नेअत्रिवन्नमसागृणानोऽस्माकंबोध्यविततनूनाम् ॥ ९ ॥

विश्वानि । नः । दुःऽगहा । जातऽवेदः । सिन्धुम् । न । नावा ।
दुःऽइता । अति । पर्षि । अग्ने । अत्रिऽवत् । नमसा । गृणानः ।
अस्माकम् । बोधि । अविता । तनूनाम् ॥ ९ ॥

हेजातवेदः नोस्माकं दुर्गहा दुःखेनग्राह्याणि दुःखेनभोग्यानि विश्वानिदुरितान्यतिपर्षि अतिपारय सिंधुंननावा नदीं नाविकोयथा तद्वत् हेअग्ने अत्रिवत् अत्रेर्यथा तथानोस्माकं नमसास्तोत्रेणगृणानः स्तूयमानःसन्नोस्माकं तनूनामविता रक्षकोबोधि बुध्यस्व ॥ ९ ॥

पुत्रकामेष्ट्यांयस्त्वेत्येषाप्रधानस्ययाज्या सूत्रितंच—यस्त्वाहृदाकीरिणामन्यमानोग्निस्तुविश्रवस्तममिति ।

सैषादशमी—

यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि ।
जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्याम् ॥ १० ॥

यः । त्वा । हृदा । कीरिणा । मन्यमानः । अमर्त्यम् । मर्त्यः ।
जोहवीमि । जातऽवेदः । यशः । अस्मासु । धेहि । प्रऽजाभिः ।
अग्ने । अमृतऽत्वम् । अश्याम् ॥ १० ॥

Funding by IKS-MoE

योमर्त्योमरणधर्माहं अमर्त्यमनाशं त्वा त्वां कीरिणा स्तुत्यादिषुविक्षिप्तेनहृदा हृदयेन युक्तोमन्यमानःस्तुवन् जोहवीमि अत्यर्थमाह्वयामि यद्वा स्तोतृवाचकेनकीरिणा शब्देन स्तुतिरुपलक्ष्यते स्तुतियुक्तेनमनसात्वामन्नप्रदंमन्यमानोजोहवीमि हेजातवेदोयशोधनं प्रजांवास्मासुधेहि प्रजाभिस्त्वद्दत्ताभिः हेअग्ने अहममृतत्वं संतत्यविच्छेदलक्षणंअश्यां प्राप्नुयां प्रजामनुप्रजायतेतदुतेमर्त्यामृतमितिहिश्रुतिः ॥ १० ॥

तस्यामेवपुत्रकामेष्ट्यांयस्मैत्वमित्येषाग्नेःपुत्रवतोनुवाक्या यस्मैत्वंसुकृतेजातवेदोयस्त्वाहृदाकीरिणामन्यमानइतिहिसूत्रितम् ।

सैषैकादशी—

यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवःस्योनम् ।
अश्विनंसपुत्रिणंवीरवन्तंगोमन्तंरयिंनशतेस्वस्ति ॥ ११ ॥ १९॥

यस्मै । त्वम् । सुऽकृते । जातऽवेदः । ऊँ इति । लोकम् । अग्ने ।
कृणवः । स्योनम् । अश्विनम् । सः । पुत्रिणम् । वीरऽवन्तम् ।
गोऽमन्तम् । रयिम् । नशते । स्वस्ति ॥ ११ ॥ १९॥

हेजातवेदरग्ने त्वं यस्मैसुकृते सुकर्मणे यजमानाय उइतिपूरणः लोकंस्योनं सुखकरं कृणवरकरोः यद्वा लोकमालोकेनस्योनंकृणवः अनुग्रहेणकुर्वित्यर्थः सयजमानोश्विनंबह्वश्वोपेतं पुत्रिणं बहुपुत्रोपेतं वीरवन्तं वीरैर्वीर्येणवोपेतं गोमन्तं रयिं धनं नशते प्राप्नोति स्वस्त्यविनश्वरम् ॥ ११ ॥

॥ इतितृतीयस्याष्टमेएकोनविंशोवर्गः ॥ १९ ॥

सुसमिद्धायेत्येकादशर्चंपंचमंसूक्तं आत्रेयस्यवसुश्रुतस्यार्षंगायत्रं इध्माद्युक्तदेवताकं आप्रमित्युक्तत्वात्तनूनपाद्वर्जितं सुसमिद्धायाप्रंगायत्रमित्यनुक्रमणिका । अत्रीणामिदमाप्रीसूक्तं समिद्धोअद्येतिवासर्वेषांयथर्षिवेत्युक्तत्वात् ।

तत्रप्रथमा—

सुसंमिद्धायशोचिषेघृतंतीव्रंजुहोतन । अग्नयेजातवेदसे ॥ १ ॥

---

१ तै० ब्रा० १.५.५।

Funding by IKS-MoE

सु॒ऽस॑मिद्धाय । शो॒चिषे॑ । घृ॒तम् । ती॒व्रम् । जु॒हो॒त॒न । अ॒ग्नये॑ ।
जा॒तऽवे॑दसे ॥ १ ॥

सुसमिद्धाय सुष्ठुसमिद्धायैतन्नामकायाग्नये शोचिषे दीप्तिमते घृतमाज्यं तीव्रं प्रभूतं जुहोतन हेऋत्विजः अग्नयेंगनादिगुणयुक्तायजातवेदसेजातधनाय ॥ १ ॥

अथद्वितीया—

नरा॒शंसः॑सुषूद॒ती॒मंय॒ज्ञमदा॑भ्यः । क॒विर्हिमधु॑हस्त्यः ॥ २ ॥
नरा॒शंसः॑ । सु॒सू॒द॒ति॒ । इ॒मम् । य॒ज्ञम् । अदा॑भ्यः । क॒विः । हि ।
मधु॑ऽहस्त्यः ॥ २ ॥

नराशंसः नरैःशंसनीयोयमग्निरिमंयज्ञमिदंहविर्वा सुषूदति सुष्ठुप्रेरयति सदेवः अदाभ्यः अहिंस्यःकेनापि कविर्मेधावी मधुहस्त्यः मधुरहस्त्यः ॥ २ ॥

अथतृतीया—

ई॒ळि॒तोअ॑ग्न॒आव॒हेन्द्रं॑चि॒त्रमि॒हप्रि॒यम् । सु॒खैरथे॑भिरू॒तये॑ ॥ ३ ॥
ई॒ळि॒तः । अ॒ग्ने॒ । आ । व॒ह॒ । इन्द्र॑म् । चि॒त्रम् । इ॒ह । प्रि॒यम् ।
सु॒ऽखैः । रथे॑भिः । ऊ॒तये॑ ॥ ३ ॥

हेअग्ने ईळितः स्तुतःसन्नावहेन्द्रं चित्रंचायनीयं प्रियमिहास्मिन्यज्ञेसुखैरथेभीरथैरूतयेस्मद्रक्षणाय ॥ ३ ॥

अथचतुर्थी—

ऊर्ण॑म्रदा॒विप्र॑थस्वा॒भ्य१॒॑र्काअ॑नूषत । भवा॑नःशुभ्रसा॒तये॑ ॥ ४ ॥
ऊर्ण॑ऽम्रदाः । वि । प्र॒थ॒स्व॒ । अ॒भि । अ॒र्काः । अ॒नू॒ष॒त । भव॑ ।
न॒ः । शु॒भ्र॒ । सा॒तये॑ ॥ ४ ॥

हेऊर्णम्रदाः ऊर्णाकंबलवत्मृदु हेबर्हिर्विप्रथस्व प्रथय अर्कास्तोतारोभ्यनूषत स्तुवन्ति हेशुभ्र दीप्त सातये धनाय तद्दानायवा नोस्माकंभव ॥ ४ ॥

Funding by IKS-MoE

अथपंचमी–

देवी॑र्द्वारो॒विश्र॑यध्वंसुप्राय॒णान॑ऊ॒तये॑ । प्रप्र॑य॒ज्ञंपृ॑णीतन ॥५॥२०॥

देवीः॑ । द्वा॒र॒ः । वि । श्र॒य॒ध्व॒म् । सु॒प्र॒ऽअ॒य॒नाः । न॒ः । ऊ॒तये॑ ।
प्रऽप्र॑ । य॒ज्ञम् । पृ॒णी॒त॒न ॥ ५ ॥ २० ॥

हेद्वारोयज्ञस्यद्वाराभिमानिन्योहेदेवीर्देव्यः विश्रयध्वं विमुक्ताभवत सुप्रायणाः शोभनगमनसाधनाः नोस्माकमूतयेरक्षायै यज्ञं यजमानं प्रप्रपृणीतन पूरयतकामैः यज्ञमेववाफलैः ॥ ५ ॥

॥ इतितृतीयस्याष्टमेविंशोवर्गः ॥ २० ॥

अथषष्ठी–

सु॒प्रती॑केवयो॒वृधा॑य॒ह्वीऋ॒तस्य॑मा॒तरा॑ । दो॒षामु॒षास॑मीमहे ॥६॥

सु॒प्रती॑के॒ इति॑ सु॒ऽप्रती॑के । व॒य॒ःऽवृधा॑ । य॒ह्वी इति॑ । ऋ॒तस्य॑ ।
मा॒तरा॑ । दो॒षाम् । उ॒षस॑म् । ई॒म॒हे॒ ॥ ६ ॥

हेअह्नोरात्रेश्चाभिमानिदेव्यौ सुप्रतीके सुरूपे शोभनांगेवा वयोवृधा अन्नस्यवर्धयित्र्यौ यह्वी महत्यौ ऋतस्ययज्ञस्योदकस्यवामातरा निर्मात्र्यौ तयोर्मध्ये प्रत्येकं दोषां रात्रिदेवीमुषसमहर्देवीं ईमहे स्तुमः ॥ ६ ॥

अथसप्तमी–

वात॑स्य॒पत्म॑न्नीळि॒तादैव्या॒होता॑रा॒मनु॑षः । इ॒मंनो॑य॒ज्ञमाग॑तम् ॥ ७ ॥

वात॑स्य । पत्म॑न् । ई॒ळि॒ता । दैव्या॑ । होता॑रा । मनु॑षः । इ॒मम् ।
न॒ः । य॒ज्ञम् । आ । ग॒त॒म् ॥ ७ ॥

वातस्यपत्मन् लुप्तोपमैषा वायुगमनसदृशगमनार्थमीळिता ईळितौ अस्माभिःस्तुतौ यद्वा वातस्य पतनसाधनेंतरिक्षेगच्छन्तौ दैव्या देवादग्नेरादित्याच्चसमुद्भूतौ होतारा देवानामाह्वातारौ युवां मनुषोमनुष्यस्य इमंनोस्माकंयज्ञमागतमागच्छतं नोमनुषोयज्ञमितिव्यधिकरणे षष्ठ्यौ अस्माकंयजमानस्ययज्ञमित्यर्थः ॥ ७ ॥

अथाष्टमी–

इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः । बर्हिःसीदन्त्वस्रिधः ॥८॥

इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः । बर्हिः । सीदन्तु । अस्रिधः ॥ ८ ॥

इळापृथिवी सरस्वती सरउदकं तस्मात्सरस्वान्वायुः तस्यस्त्रीसरस्वती मही महती भारती भरतस्यादित्यस्यपत्नी अत्र यद्यप्येषानोक्ता तथापि सर्वत्रसहदृष्टत्वात् त्रिसंख्याश्रवणाच्च सा गृह्यते अथवैताः क्षित्यंतरिक्षद्युस्थानावाग्देव्यः एतामयोभुवः सुखस्यभावयित्र्यः अस्रिधोहिंसिकाः सत्योबर्हिर्बर्हिषिसीदन्तु उपविशन्तु ॥ ८ ॥

अथनवमी–

शिवस्त्वंष्टरिहागंहिविभुःपोषंउतत्मना । यज्ञेयंज्ञेनउदंव ॥ ९ ॥

शिवः । त्वष्टः । इह । आ । गहि । विऽभुः । पोषे । उत । त्मना । यज्ञेऽयंज्ञे । नः । उत् । अव ॥ ९ ॥

हेत्वष्टर्देव शिवः सुखकरःसन्निहागहि अस्मद्यज्ञमागच्छ विभुर्व्याप्तस्त्वं पोषे पोषकरणे उत आगत्यच त्मना आत्मना स्वयमेव यज्ञे यज्ञे सर्वेषुयज्ञेषुनोस्मानुदवोत्कृष्टंरक्ष ॥ ९ ॥

अग्निहोत्रउत्तराहुतिस्कन्दने यत्रवेत्थेत्यनयासमिधमादध्यात् सूत्रितंच–यत्रवेत्थवनस्पतइत्युत्तरस्याआहुत्यास्कन्दनइति ।

सैषादशमी–

यत्रवेत्थंवनस्पतेदेवानांगुह्यानामांनि । तत्रंहव्यानिंगामय ॥१०॥

यत्रं । वेत्थं । वनस्पते । देवानाम् । गुह्या । नामानि । तत्रं । हव्यानि । गमय ॥ १० ॥

हेवनस्पते यूपाभिमानिदेव यत्रयस्मिन्स्थानेवेत्थ देवानांगुह्या गुह्यानि नामानि नामकानि रूपाणि तत्र हव्यानि गमय प्रापय ॥ १० ॥

Funding by IKS-MoE

अथैकादशी—

स्वाहा॒ग्नये॒वरु॑णाय॒स्वाहेन्द्रा॑यम॒रुद्भ्यः॑ । स्वाहा॑दे॒वेभ्यो॑ह॒विः ॥११॥२१॥

स्वाहा॑ । अ॒ग्नये॑ । वरु॑णाय । स्वाहा॑ । इन्द्रा॑य । म॒रुत्ऽभ्यः॑ ।
स्वाहा॑ । दे॒वेभ्यः॑ । ह॒विः ॥ ११ ॥ २१ ॥

अग्न्यादिविश्वेदेवाः तेभ्योदेवेभ्यः इदंहविः स्वाहाकरोमीतिशेषः स्वाहुतंकरोमीत्यर्थः एवंस्वाहाकृतेःस्तुतिः ॥ ११ ॥

॥ इतितृतीयस्याष्टमेएकविंशोवर्गः ॥ २१ ॥

अग्निंतंमन्यइतिदशर्चंषष्ठंसूक्तं वसुश्रुतस्यार्षं आग्नेयं पाङ्क्तं अग्निंतंदशपाङ्क्तमित्यनुक्रमणिका प्रातरनुवाकेआग्नेयेक्रतौपाङ्क्तेछन्दस्याश्विनशस्त्रेचेदंसूक्तं अग्निंतंमन्यइतिपांक्तमितिहि सूत्रितम् । आश्वमेधिकेमध्यमेहनीदमेवाज्यशस्त्रं सूत्रितंच—अग्निंतंमन्यइत्याज्यंतस्यैकाहिकमुपरिष्टादिति । आद्येआभिप्लविकेषूक्थ्येषुमैत्रावरुणस्यानुरूपस्तृचः सूत्रितंच—अग्निंतंमन्येयोवसुराग्नेस्थूरंरयिंभरेति ।

तत्रप्रथमा—

अ॒ग्निंतंम॑न्ये॒योवसु॒रस्तं॒यंयन्ति॑धे॒नवः॑ ।
अस्त॒मर्व॑न्तआ॒शवोस्तं॒नित्या॑सोवा॒जिन॒इषं॑स्तो॒तृभ्य॒आभ॑र ॥१॥

अ॒ग्निम् । तम् । म॒न्ये॒ । यः । वसुः॑ । अस्त॑म् । यम् । यन्ति॑ ।
धे॒नवः॑ । अस्त॑म् । अर्व॑न्तः । आ॒शवः॑ । अस्त॑म् । नित्या॑सः ।
वा॒जिनः॑ । इष॑म् । स्तो॒तृऽभ्यः॑ । आ । भ॒र॒ ॥ १ ॥

तमग्निंमन्ये स्तौमि योग्निर्वसुर्वासकः यमस्तंसर्वेषां गृहवदाश्रयभूतं धेनवोयन्ति गच्छन्ति प्रीणयितुं अस्तमुक्तलक्षणमर्वन्तोरणवन्तोश्वाः आशवः शीघ्रगामिनोयन्ति तथा नित्यासुनित्यप्रवृत्तयः वाजिनोहविर्लक्षणान्नवन्तोयजमानायमस्तंयन्ति तंमन्ये इषमन्नंस्तोतृभ्योस्मभ्यमाभराग्ने ॥ १ ॥

Funding by IKS-MoE

अथद्वितीया–

सोअग्निर्योवसुर्गृणेसंयमायन्तिधेनवः ।
समर्वन्तोरघुद्रुवःसंसुजातासःसूरयइषंस्तोतृभ्यआभर ॥ २ ॥

सः । अग्निः । यः । वसुः । गृणे । सम् । यम् । आऽयन्ति ।
धेनवः । सम् । अर्वन्तः । रघुऽद्रुवः । सम् । सुऽजातासः । सूरयः ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ २ ॥

सःअग्निः सखल्वग्निः योवसुर्वासकोगृणे स्तूयते यंधेनवःसमायन्तिहोमार्थं अर्वन्तोश्वारघुद्रुवः लघुगमनाःसमायन्ति सुजातासः सुत्कुलोत्पन्नाः सूरयोमेधाविनश्च समायन्ति सखल्वग्निरिति ॥ २ ॥

अथतृतीया–

अग्निर्हिवाजिनंविशेददातिविश्वचर्षणिः ।
अग्नीरायेस्वाभुवंसप्रीतोयातिवार्यमिषंस्तोतृभ्यआभर ॥ ३ ॥

अग्निः । हि । वाजिनम् । विशे । ददाति । विश्वऽचर्षणिः ।
अग्निः । राये । सुऽआभुवम् । सः । प्रीतः । याति । वार्यम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ३ ॥

अग्निर्हि अयमग्निःखलु विशे यजमानाय वाजिनमन्नवन्तंपुत्रमश्वमन्नंवाददाति विश्वचर्षणिः विश्वेचर्षणयोमनुष्यारक्षणीयाअर्चकावायस्यसतथोक्तः यद्वा पश्यतिकर्मैतत् सर्वस्यद्रष्टाग्नीरायेधनार्थिने अथवा द्वितीयार्थेचतुर्थी धनं स्वाभुवं सुष्ठुसर्वत्रव्याप्तं वार्यं सर्वैर्वरणीयं प्रीतःसन्याति यमयति दातुंवागच्छति इषमित्यादिगतम् ॥ ३ ॥

आभिप्लविकेषूक्थ्येषुतृतीयसवनेस्तोत्रियस्तृचस्यातेअग्नइधीमहीत्यादिकेप्रथमाद्वितीये सूत्रितंभवति–आतेअग्नइधीमह्युभेसुश्चंद्रसर्पिषइतिद्वेएकाचेति ।

Funding by IKS-MoE

तत्रद्व्चेप्रथमासूक्तेचतुर्थी—

आते॑अग्नइधीमहिद्यु॒मन्तँ॑देवा॒जर॑म् ।
यद्ध॒स्याते॒पनी॑यसीस॒मिद्दी॒दय॑ति॒द्यवी॑षँ॑स्तो॒तृभ्य॒आभ॑र ॥ ४ ॥

आ । ते॒ । अ॒ग्ने॒ । इ॒धी॒म॒हि॒ । द्यु॒ऽमन्त॑म् । दे॒व॒ । अ॒जर॑म् । यत् ।
ह॒ । स्या । ते॒ । पनी॑यसी । स॒म्ऽइत् । दी॒दय॑ति । द्यवि॑ ।
इष॑म् । स्तो॒तृऽभ्यः॑ । आ । भ॒र॒ ॥ ४ ॥

हेअग्ने देव द्युमन्तं दीप्तिमन्तमजरमजीर्णं तेत्वां आसर्वतइधीमहि दीपयामः यद्ध खलु ते तव स्या सा पनीयसी स्तुत्यासमिद्दीप्तिर्दीदयतिदीप्यते द्यवि द्युलोके ॥ ४ ॥

अथपञ्चमी—

आते॑अग्नऋ॒चाह॒विःशु॒क्र॑स्यशोचिषस्पते ।
सुश्च॑न्द्र॒दस्म॒विश्प॑ते॒हव्य॑वा॒ट्तुभ्यँ॑हूयत॒इषँ॑स्तो॒तृभ्य॒आभ॑र ॥ ५ ॥ २२ ॥

आ । ते॒ । अ॒ग्ने॒ । ऋ॒चा । ह॒विः । शु॒क्र॑स्य । शो॒चि॒षः॒ । प॒ते॒ ।
सु॒ऽच॒न्द्र॒ । दस्म॑ । विश्प॑ते । ह॒व्य॒ऽवा॒ट् । तुभ्य॑म् । हू॒य॒ते॒ ।
इष॑म् । स्तो॒तृऽभ्यः॑ । आ । भ॒र॒ ॥ ५ ॥ २२ ॥

हेशोचिषोदीप्तेःपते स्वामिन्नग्ने शुक्रस्य दीप्तस्य ते तुभ्यमृचामंत्रेणसहहविर्हूयते हे सुश्चंद्र सुष्ठुआह्लादक शोभनहिरण्यवा हेदस्म शत्रूणांउपक्षयितः विश्पते विशांप्रजानांपालक हव्यवाट् हविषोवोढः आपूरणः इषंगतम् ॥ ५ ॥

॥ इतितृतीयस्याष्टमेद्वाविंशोवर्गः ॥ २२ ॥

अथषष्ठी—

प्रोत्येअ॒ग्नयो॒ग्निषु॒विश्वँ॑पुष्यन्ति॒वार्य॑म् ।
तेहि॑न्विरे॒तइ॑न्विरे॒तइषण्यन्त्यानुषगिषँ॑स्तो॒तृभ्य॒आभ॑र ॥ ६ ॥

प्रो इति । त्ये । अग्नयः । अग्निषु । विश्वम् । पुष्यन्ति ।
वार्यम् । ते । हिन्विरे । ते । इन्विरे । ते । इषण्यन्ति । आनुषक् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ६ ॥

प्रोप्रैवपुष्यन्तित्येतेअग्नयोधिष्ण्याअग्निषुगार्हपत्यादिषु यद्वालौकिकाअग्नयस्तेजःपदार्थभूताअग्निषुवैदिकेषुविश्वंसर्वं वार्यं वरणीयं अपेक्षितंधनंपुष्यन्ति तेअग्नयोहिन्विरे प्रीणयन्ति इन्विरेप्रीणयितुंव्यामुवन्तिच तेइषण्यन्ति अन्नमिच्छन्ति आनुषक् सर्वत्रानुषक्तं तत्राग्निसामान्याभिप्रायेणैकवचनम् ॥ ६ ॥

अथसप्तमी–

तवत्येअंग्नेअर्चयोमहिव्राधन्तवाजिनः ।
येपत्वभिःशफानांव्रजाभुरन्तगोनामिषंस्तोतृभ्यआभर ॥ ७ ॥

तव । त्ये । अग्ने । अर्चयः । महि । व्राधन्त । वाजिनः ।
ये । पत्वऽभिः । शफानाम् । व्रजा । भुरन्त । गोनाम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ७ ॥

हेअग्ने तव त्वदीयाः त्ये ते अर्चयोरश्मयोमहि महदत्यधिकंवाजिनोवेजनवन्तोन्नवन्तोवाव्राधन्त वर्धन्ते यद्वा लुप्तोपमा वाजिनोश्वाइव ये रश्मयः पत्वभिः पतनैः शफानांखुरवतां गोनांव्रजायूथानि भुरन्त इच्छन्ति आयताज्वालाहोमायकांक्षंतइत्यर्थः तेवर्धन्ते ॥ ७ ॥

अथाष्टमी–

नवानोअग्नआभरस्तोतृभ्यःसुक्षितीरिषः ।
तेस्यामयआनृचुस्त्वादूतासोदमेदमइषंस्तोतृभ्यआभर ॥ ८ ॥

नवाः । नः । अग्ने । आ । भर । स्तोतृऽभ्यः । सुऽक्षितीः ।
इषः । ते । स्याम । ये । आनृचुः । त्वाऽदूतासः । दमेऽदमे ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ८ ॥

Funding by IKS-MoE

हेअग्ने स्तोतृभ्योनोस्मभ्यं नवाः स्तुत्याः नून्नावासुक्षितीः सुनिवासाः सुप्रजावाइषःउक्तलक्षणान्यन्नानि आभर प्रयच्छ येवयंदमेदमे सर्वेषुयागगृहेषु त्वामानृचुरर्चयन्ति ते वयं त्वादूतासः त्वांदूतंफलसूचकंलब्धवन्तःसन्तः स्याम समृद्धाभूयास्म दमेदमेस्यामेतिवा योज्यम् ॥ ८ ॥

आभिप्लविकेषूक्थ्येषुतृतीयसवनेवैकल्पिकस्तोत्रियतृचे उभेसुश्चंद्रेत्येषातृतीया सूत्रमुक्तम् ।

सैषानवमी–

उभेसुश्चन्द्रसर्पिषोदर्वीश्रीणीषआसनि ।
उतोनउत्पुपूर्याउक्थेषुशवसस्पतइषंस्तोतृभ्यआभर ॥ ९ ॥

उभे इति । सुऽचन्द्र । सर्पिषः । दर्वी इति । श्रीणीषे । आ । सनि ।
उतो इति । नः । उत् । पुपूर्याः । उक्थेषु । शवसः ।
पते । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ९ ॥

हेसुश्चन्द्र शोभनाह्लादन शोभनहिरण्यवाग्ने उभे सर्पिषःपूर्णे दर्वी जुहूपभृतावासन्यास्ये श्रीणीषे श्रयसि पचसिवा उतोअपिच नोस्मानुक्थेषु यागेषूत्पुपूर्याः उत्पूरयफलैः हेशवसस्पतेबलस्यपालयितः ॥ ९ ॥

अथदशमी–

एवाँअग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।
दधदस्मेसुवीर्यमुतत्यदाश्वश्व्यमिषंस्तोतृभ्यआभर ॥१०॥२३॥

एव । अग्निम् । अजुर्यमुः । गीःऽभिः । यज्ञेभिः । आनुषक् ।
दधत् । अस्मे इति । सुऽवीर्यम् । उत । त्यत् । आशुऽअश्व्यम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ १० ॥ २३ ॥

एवैवं उक्तरीत्या अग्निं गीर्भिःस्तुतिभिःयज्ञेभिर्यज्ञैस्तत्साधनैर्हविर्भिर्वा अनुषगनुषक्तं संबद्धं अजुः गच्छन्ति तथाकृत्वा यमुः यमयन्ति स्थापयन्ति हविर्भिर्यजन्तीत्यर्थः एवमात्रेयाःस्वान्परोक्षतयानिर्दिशन्ति । अजुर्यमुरित्यत्राख्यातमाख्यातेनक्रियासातत्यइतिसमासः किं-

चास्मे अस्मासु सुवीर्यंशोभनपुत्रादिकं उतापिच त्यत्तदाश्वश्व्यं आशवः अश्वायस्यभवन्तिसआश्वश्वः तस्यभावःआश्वश्व्यं तदपिदधत् धारयति ॥ १० ॥

॥ इतितृतीयस्याष्टमेत्रयोविंशोवर्गः ॥ २३ ॥

सखायःसंवइतिदशर्चंसप्तमंसूक्तं आत्रेयइषऋषिः अंत्यापंक्तिः शिष्टाःपंक्त्यन्तपरिभाषयानुष्टुभः तथाचानुक्रान्तम्—सखायइषःपंक्त्यंतमिति। प्रातरनुवाकेआग्नेयेक्रतावानुष्टुभेछन्दस्याश्विनशस्त्रेचोत्तमावर्जमिदंसूक्तं सूत्रितंच—सखायःसंवस्त्वामग्नेहविष्मन्तइतिसूक्तेइति ।

तत्रप्रथमा—

सखा॑य॒ःसंव॑ःस॒म्यञ्च॒मिषं॒स्तोमं॑चा॒ग्नये॑ ।
वर्षि॑ष्ठायक्षिती॒नामू॒र्जो॑नप्त्रे॒सह॑स्वते ॥१॥

सखा॑यः । सम् । व॒ः । स॒म्यञ्च॑म् । इष॑म् । स्तोम॑म् । च॒ ।
अ॒ग्नये॑ । वर्षि॑ष्ठाय । क्षि॒ती॒नाम् । ऊ॒र्जः । नप्त्रे॑ । सह॑स्वते ॥ १ ॥

हेसखायः सखिभूताऋत्विजःवोयूयं संस्कुरुत उपसर्गश्रुतेर्योग्यक्रियाध्याहारः किंच सम्यंचमिषमन्नंस्तोमंस्तोत्रंचाग्नयेवर्षिष्ठायातिशयेन प्रवृद्धाय क्षितीनां यजमानानामर्थाय वर्षिष्ठाय प्रवृद्धतमाय ऊर्जोनप्त्रे बलस्यनपातयित्रे तत्पुत्रायवा सहस्वते बलवते संस्कुरुतेति ॥१॥

अथद्वितीया—

कुत्रा॑चि॒द्यस्य॒समृ॑तौर॒ण्वानरो॑नृ॒षद॑ने ।
अर्ह॑न्तश्चि॒द्यमि॑न्ध॒तेसं॑ज॒नय॑न्तिज॒न्तव॑ः ॥ २ ॥

कुत्र॑ । चि॒त् । यस्य॑ । सम्ऽऋ॑तौ । र॒ण्वाः । नर॑ः । नृ॒ऽसद॑ने ।
अर्ह॑न्तः । चि॒त् । यम् । इ॒न्ध॒ते । स॒म्ऽज॒नय॑न्ति । ज॒न्तव॑ः ॥ २ ॥

सोग्निः कुत्रचिद्वर्ततइतिशेषः कुत्रास्ते यस्याग्नेःसमृतौ संप्राप्तौ रण्वाः रममाणानरोनेतारऋत्विजः नृषदने यागगृहे अर्हन्तश्चित् चिदितिपूजायां अर्हन्तःपूज्याः पूजयन्तोवासन्तः यमिन्धतेदीपयन्ति तदर्थंसंजनयन्तिचारण्यांजंतवःप्राणिनःसकुत्रेतिसंबन्धः ॥ २ ॥

Funding by IKS-MoE

अथतृतीया–

संयदिषोवनामहेसंहव्यामानुषाणाम् ।
उतद्युम्नस्यशवसऋतस्यरश्मिमाददे ॥ ३ ॥

सम् । यत् । इषः । वनामहे । सम् । हव्या । मानुषाणाम् ।
उत । द्युम्नस्य । शवसा । ऋतस्य । रश्मिम् । आ । ददे ॥ ३ ॥

यद्यदाइषोन्नानि संवनामहे संभजामहे यदाच मानुषाणां मनुष्याणामस्माकंहव्या हवींषि अग्निःसंसेवते उत तदानींद्युम्नस्यद्योतमानस्यान्नस्य शवसाबलेन सामर्थ्येन ऋतस्योदकस्य ग्राहकं रश्मिमाददे आदत्तेग्निः फलजनकंतेजःस्वीकृतवानित्यर्थः यद्वा ऋतस्ययज्ञस्य रश्मिं रश्मिवद्ग्राहकं स्तवमाददे स्वीकरोति ॥ ३ ॥

अथचतुर्थी–

सःस्माकृणोतिकेतुमानक्तंचिद्दूरआसते ।
पावकोयद्वनस्पतीन्प्रस्मामिनात्यजरः ॥ ४ ॥

सः । स्म । कृणोति । केतुम् । आ । नक्तम् । चित् । दूरे । आ ।
सते । पावकः । यत् । वनस्पतीन् । प्र । स्म । मिनाति । अजरः ॥४॥

सस्म सखल्वग्निः कृणोति करोति केतुंप्रज्ञानमासर्वतः कस्येत्युच्यते चिदप्यर्थे नक्तंचिद्रात्रावपि दूरे आसते आइतिचार्थे दूरेपिवर्तमानायमनुष्याय कदा यद्यदापावकोयमग्निरजरोजीर्णोनभिभाव्यःसन् वनस्पतीनेधांसि प्रमिनाति प्रकर्षेणदहति स्मेतिपूरणः॥४॥

अथपंचमी–

अवस्मयस्यवेषणेस्वेदंपथिषुजुह्वति ।
अभीमहस्वजेन्यंभूमापृष्ठेवरुरुहुः ॥ ५ ॥ २४ ॥

अव । स्म । यस्य । वेषणे । स्वेदम् । पथिषु । जुह्वति । अभि ।
ईम् । अह । स्वऽजेन्यम् । भूम । पृष्ठाऽइव । रुरुहुः ॥ ५ ॥ २४ ॥

यस्याग्नेर्वेषणे परिचर्यायां पथिषु होममार्गेषुरश्मिषु स्वेदं स्रवदाज्यमवाधोमुखंजुह्वत्यध्वर्यवः तदानीमीमेनमग्निमभिरुरुहुरह अभ्यारोहंत्येवाज्यधाराः अहइतिविनिग्रहार्थीयः स्वजेन्यं स्वोत्पन्नंभूम बहुभवतीतिभूमापत्यं तत्पृष्ठेव पितुःपृष्ठदेशानिव पुत्रायथापितुरन्तिकमारोहन्तितद्वत् ॥ ५ ॥

॥ इतितृतीयस्याष्टमेचतुर्विंशोवर्गः ॥ २४ ॥

अथषष्ठी—

यं॑मर्त्यः॑पु॒रु॒स्पृहं॑वि॒दद्विश्वं॑स्य॒धायं॑से ।
प्रस्वादं॑नंपि॒तू॒नामस्तं॑तातिं॑चिदा॒यवे॑ ॥ ६ ॥

यम् । मर्त्यः॑ । पु॒रु॒ऽस्पृहं॑म् । वि॒दत् । विश्वं॑स्य । धायं॑से । प्र ।
स्वादं॑नम् । पि॒तू॒नाम् । अस्तं॑ऽतातिम् । चि॒त् । आ॒यवे॑ ॥ ६ ॥

यमग्निं पुरुस्पृहं बहुभिःस्पृहणीयमग्निं विदत् वेत्ति मर्त्योयजमानोविश्वस्य धायसे सर्वव्यापारार्थं पितूनामन्नानां प्रस्वादनं प्रकर्षेणस्वादूकर्तारं अस्ततातिं अस्तेगृहेनिवासकर्तारमायवे अन्नार्थंयजमानार्थंवा ॥ ६ ॥

अथसप्तमी—

सहि॒ष्मा॒धन्वाक्षि॑तं॒दाता॒नदात्याप॒शुः ।
हिरि॑श्मश्रुः॒शुचि॑दन्नृ॒भुरनि॑भृष्टतविषिः ॥ ७ ॥

सः । हि । स्म॒ । धन्वं॑ । आऽक्षिं॑तम् । दाता॑ । न । दाति॑ । आ ।
प॒शुः । हिरि॑ऽश्मश्रुः । शुचि॑ऽदन् । ऋ॒भुः । अनि॑भृष्टऽतविषिः ॥ ७ ॥

सहिष्म सखल्वग्निः धन्वनिरुदकदेशं आक्षितं तृणकाष्ठादिभिराक्षिप्तंआदाति सर्वतःखंडयति दहतीत्यर्थः दातातृणादिखंडयिता पशुर्न पशुरिव पशुर्यथातृणजातंक्रमेण भक्षयतितद्वत् हिरिश्मश्रुः हिरण्यश्मश्रुः शुचिदन्दीप्तदन्तः ऋभुरुरुभवन्महानित्यर्थः अनिभृष्टतविषिः अपीडितबलः ॥ ७ ॥

Funding by IKS-MoE

अथाष्टमी–

शुचिःष्मयस्माअत्रिवत्प्रस्वधितीवरीयते ।
सुषूरसूतमाताक्राणायदानशेभगम् ॥ ८ ॥

शुचिः । स्म । यस्मै । अत्रिऽवत् । प्र । स्वधितिःऽइव । रीयते ।
सुऽसूः । असूत । माता । क्राणा । यत् । आनशे । भगम् ॥ ८ ॥

अयमग्निः शुचिष्म दीप्तःखलु यस्मैअग्नये अत्रिवदत्रिरिवयजमानः हविर्दातुं प्ररीयते प्रगच्छति यद्वास्मेतिपूरणः शुचिर्यस्मै प्रथमार्थेचतुर्थी दीप्तोयोत्रिवत् अत्तितृणमितिअत्रिः पशुः सइव सयथातृणानिखादमानोगच्छतितद्वद्दहतीत्यर्थः स्वधितिरिव परशुरिव छिन्दन्सुषूःसुप्रसवामातारणिरसूत क्राणाकुर्वाणाजगदुपकारं यद्यस्माद्यइतिवा योग्निर्भगमन्नमानशे अश्नुते ॥ ८ ॥

अथनवमी–

आयस्तेसर्पिरासुतेग्नेशमस्तिधायसे ।
ऐषुद्युम्नमुतश्रवआचित्तंमर्त्येषुधाः ॥ ९ ॥

आ । यः । ते । सर्पिःऽआसुते । अग्ने । शम् । अस्ति । धायसे । आ ।
एषु । द्युम्नम् । उत । श्रवः । आ । चित्तम् । मर्त्येषु । धाः ॥ ९ ॥ २५ ॥

हेसर्पिरासुते घृताख्यान्नाग्ने यस्त्वमासर्वतोभवसि तादृशायधायसे सर्वस्यधात्रे ते तुभ्यं शमस्ति सुखमस्ति स्तुतेःसकाशात् तथाचेत् एषुमर्त्येषु स्तोतृष्वात्रेयेषु द्युम्नं यशआधाः आधेहि उतापिच श्रवोन्नमाधाः चित्तंत्वदीयानुग्रहबुद्धिमप्याधाः ॥ ९ ॥

अथदशमी–

इतिचिन्मन्युमध्रिजस्त्वादातमापशुंददे ।
आदग्नेअपृणतोत्रिःसासह्याद्दस्यूनिषःसासह्यान्नॄन् ॥ १० ॥ २५ ॥

Funding by IKS-MoE

इर्ति । चि॒त् । म॒न्युम् । अ॒ध्रिजः॑ । त्वाऽदा॑तम् । आ । प॒शुम् । द॒दे ।
आत् । अ॒ग्ने॒ । अपृ॑णतः । अत्रि॑ः । स॒स॒ह्या॒त् । दस्यू॑न् । इ॒षः ।
स॒स॒ह्या॒त् । नॄन् ॥ १० ॥ २५ ॥

इतिचिदित्थंकृतप्रकारेण मन्युं मननसाधनं स्तोत्रं अध्रिजः अधृतमन्यैरग्निव्यतिरिक्तैः अधृष्यंवा जनयिता ऋषिस्त्वादातं त्वयादातव्यं पशुमाददे आदत्ते आददीतवा आदनन्तरमेवाग्नेरपृणतोअददतःदस्यून् अत्रिः तद्गोत्रइषःसासह्यात् भृशमभिभवेत् इषःद्वेष्टॄन्नृन्विरोधिनः सासह्यात् पुनरुक्तिरादरार्था ॥ १० ॥

॥ इतितृतीयस्याष्टमेपंचविंशोवर्गः ॥ २५ ॥

त्वामग्नइतिसप्तर्चमष्टमंसूक्तं आत्रेयस्यैषस्यार्षं जागतमाग्नेयं त्वामग्नेसप्तजागतमित्यनुक्रमणिका प्रातरनुवाकेआग्नेयेक्रतौजागतेछन्दस्याश्विनशस्त्रेचेदंसूक्तं तथाचसूत्रं—जनस्यगोपास्त्वामग्नऋतायवइति ।

तत्रप्रथमा—

त्वामग्नऋतायवःसमीधिरेप्रत्नंप्रत्नासऊतयेसहस्कृत ।
पुरुश्चन्द्रंयजतंविश्वधायसंदमूनसंगृहपतिंवरेण्यम् ॥ १ ॥

त्वाम् । अ॒ग्ने॒ । ऋ॒त॒ऽयवः॑ । सम् । ई॒धि॒रे । प्र॒त्नम् । प्र॒त्नासः॑ ।
ऊ॒तये॑ । स॒ह॒ःऽकृ॒त॒ । पु॒रु॒ऽच॒न्द्रम् । य॒ज॒तम् । वि॒श्वऽधा॑यसम् ।
दमू॑नसम् । गृ॒ह॒ऽप॑तिम् । वरे॑ण्यम् ॥ १ ॥

हेसहस्कृत बलस्यकर्तरग्ने प्रत्नं पुरातनं त्वां प्रत्नासः पुरातनाः ऋतायवोयज्ञकामाऋषयः ऊतये स्वरक्षणाय समीधिरे सम्यग्दीपितवंतः कीदृशंत्वां पुरुश्चन्द्रं बहुधनमतिशयेनाह्लादकंवा यजतं यष्टव्यं विश्वधायसं बह्वन्नं दमूनसं दानमनसं गृहपतिं यजमानगृहस्यपालकं वरेण्यं वरणीयं ॥ १ ॥

अथद्वितीया—

त्वामग्नेअतिथिंपूर्व्यंविशःशोचिष्केशंगृहपतिंनिषेदिरे ।
बृहत्केतुंपुरुरूपंधनस्पृतंसुशर्माणंस्ववसंजरद्विषम् ॥ २ ॥

Funding by IKS-MoE

त्वाम् । अ॒ग्ने॒ । अति॑थिम् । पू॒र्व्यम् । विशः॑ । शो॒चिःऽके॑शम् ।
गृ॒हऽप॑तिम् । नि । से॒दि॒रे॒ । बृ॒हत्ऽके॑तुम् । पु॒रु॒ऽरू॒प॑म् । ध॒न॒ऽस्पृत॑म्
सु॒ऽशर्मा॑णम् । सु॒ऽअव॑सम् । ज॒र॒त्ऽवि॑षम् ॥ २ ॥

हेअग्ने त्वांविशोयजमानाः गृहपतिं गृहस्वामिनं निषेदिरे गार्हपत्यरूपेणस्थापितवन्तइत्यर्थः कीदृशंत्वां अतिथिमतिथिवत्पूज्यं पूर्व्यं पुरातनं शोचिष्केशं दीप्तज्वालं बृहत्केतुं प्रभूतप्रज्ञानं पुरुरूपमाहवनीयादिरूपेणबहुरूपं धनस्पृतं धनानांस्पर्तारं सुशर्माणं शोभनसुखं स्ववसं सुरक्षणं जरद्विषं जरतांवृक्षाणांव्यापकं जीर्णोदकंवा ॥ २ ॥

अग्नीनांपरस्परसंसर्गे विविचयेग्नयेकाचिदिष्टिः तत्रत्वामग्नेमानुषीरितियाज्या सूत्रितंच—त्वामग्नेमानुषीरीळतेविशोग्नआयाहिवीतयइति ।

सैषातृतीया—

त्वाम॑ग्ने॒मानु॑षीरीळते॒विशो॑होत्रा॒विदं॒विवि॑चिंरत्न॒धात॑मम् ।
गुहा॒सन्तं॑सुभगवि॒श्वद॑र्शतंतुविष्व॒णसं॑सु॒यजं॑घृत॒श्रिय॑म् ॥ ३ ॥

त्वाम् । अ॒ग्ने॒ । मानु॑षीः । ई॒ळ॒ते॒ । विशः॑ । हो॒त्रा॒ऽविद॑म् । विवि॑चिम् ।
र॒त्न॒ऽधात॑मम् । गुहा॑ । सन्त॑म् । सु॒ऽभ॒ग॒ । वि॒श्वऽद॑र्शतम् ।
तु॒वि॒ऽस्व॒नस॑म् । सु॒ऽयज॑म् । घृ॒त॒ऽश्रिय॑म् ॥ ३ ॥

हे सुभग शोभनधन त्वां मानुषीर्विशः मानुषसंबन्धिन्यः सर्वाःप्रजाः ईळते स्तुवन्ति कीदृशंत्वां होत्राविदं होमानां सप्तहोत्रकाणांवावेत्तारं विविचिं विवेचकं सदसतोः रत्नधातमं रत्नानांधनानांधातृतमं गुहा गुहायां अरण्यां हृदयेषु वा संतं सर्वदावर्तमानं विश्वदर्शतं विश्वैर्दर्शनीयं तुविष्वणसं प्रभूतध्वनिं सुयज्ञं सुष्ठुयष्टारं घृतश्रियं घृतंश्रयन्तं ॥३॥

Sri Sankaracharya Sanskrit

अथचतुर्थी—

त्वाम॑ग्नेध॒र्णसिं॑वि॒श्वधा॑व॒यंगी॒र्भिर्गृ॒णन्तो॒नम॒सोप॑सेदिम ।
सनो॑जुषस्वसमिधा॒नो अ॑ङ्गिरोदे॒वोमर्त॑स्ययशसा॑सु॒दीति॑भिः ॥ ४ ॥

Bhawan's Sri Sankaracharya
Vidya
Mahav

Funding by IKS-MoE

DATE DUE

Class No. ____________ **Book No.** ____________

Accession No. 947 ____________

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.

Funding by IKS-MoE

Funding by IKS-MoE